श्री १०८ श्रीराधारमणोजयति।

षष्ठस्कन्धः

महर्षिप्रवरश्रीकृष्णद्वैपायनप्रणीतम्

श्रीमद्भागवतम्।

श्रीश्रीपादश्रीधरस्वामिकृतभावार्थदीपिका, श्रीराधारमणदासगोस्वामिविरचितदीपिन्याख्यतट्टिप्पनी, श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका, श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली, श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी, श्रीगौडीयवैष्णवाचार्य्यप्रवरश्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भाख्यटीका, श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी, श्रीनिम्बार्कसम्प्रदायिश्रीमच्छुकदेवकृतसिद्धान्तप्रदीपाख्यटीका इत्यष्टभिर्व्याख्याभिर्भाषानुवादेनच समलङ्कृतम्।

इदम्

परमहंसपरिव्राजकाचार्य्यश्रीमत्स्वामिप्रकाशानन्दसरस्वतीपूज्यपादशिष्य

श्रीनित्यस्वरूपब्रह्मचारिणा

सम्पादितम्

वङ्गदेशान्तर्गत ताड़ास भूपति श्रीराधाविनोद प्रेम सेवा परायण राजर्षि राय

'श्री वनमालिराय बहादुरस्य'

सम्पूर्णसाहाय्येन

प्रकाशितञ्च।

तच्च

काञ्चीमण्डलान्तर्वर्त्ति 'काम्दूर' पं० श्रीरङ्गाचार्येण संशोध्य

श्रीवृन्दावनधामनि

स्वकीये "श्रीदेवकीनन्दन" यन्त्रालये

मुद्रितम्।

सम्वत् १९६१

श्रीमद्भागवतम् ।

षष्ठस्कन्धः ।

प्रथमोऽध्यायः

श्रीं नमः श्रीकृष्णाय ।

राजोवाच ।

निवृत्तिमार्गः कथित आदौ भगवता यथा ।
क्रमयोगोपलब्धेन ब्रह्मणा यदसंसृतिः ॥ १ ॥
प्रवृत्तिलक्षणश्चैव त्रैगुण्यविषयो मुने ! ।
योऽसावलीनप्रकृतेर्गुणसर्गः पुनः पुनः ॥ २ ॥
अधर्मलक्षणा नाना नरकाश्चानुवर्णिताः ।
मन्वन्तरश्च व्याख्यात आद्यः स्वायम्भुवो यतः ॥ ३ ॥
(१) प्रियव्रतोत्तानपदोर्वंशस्तच्चरितानि च ।
द्वीपवर्षसमुद्राद्रिनद्युद्यानवनस्पतीन् ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्रीगणेशाम्बिकाभ्यां नमः ।

पुण्यारण्ये नृसिंहैकनामसिंहो विराजते ।
यस्मादतः पलायन्ते महाकल्मषकुञ्जराः ॥ १ ॥
विसर्गसम्भवान् जीवान् स्वमर्यादासु संस्थितान् ।
विष्णुः पात्यखिलै रूपैरित्येवं पञ्चमे स्थितम् ॥ २ ॥
अध्यायैकोनविंशत्या षष्ठे पोषणमुच्यते ।
अतिलङ्घितमर्याद भक्तरक्षणलक्षणम् ॥ ३ ॥
अजामिलो मनुष्येषु महापापो यथाऽवितः ।
विश्वरूपादिघाती च यथा देवेषु वासवः ॥ ४ ॥
अजामिलस्य भक्तत्वं विष्णुदूतैर्निरूपितम् ।
सङ्केतभगवन्नामपुत्रस्नेहानुषङ्गजम् ॥ ५ ॥
इन्द्रोऽपि भगवद्भक्तः सख्येनोपेन्द्रसेवकः ।
तदधीनसुरैश्वर्यशत्रुनिर्जयजीवितः ॥ ६ ॥
तत्रादौ त्रिभिरध्यायैरजामिलकथोच्यते ।
विश्वरूपकथा षड्भिरिन्द्रदोषोक्तये ततः ॥ ७ ॥
इन्द्रस्यैव तु दोषोक्तौ वृत्राख्यानं ततोऽष्टभिः ।
द्वाभ्यां च मरुदाख्यानमेवं प्रकरणक्रमः ॥ ८ ॥
तत्रादौ प्रथमे विष्णोर्दूतैः पातकिमोचने ।
तत्पापख्यापनायोक्तं यास्यैर्धर्मादिलक्षणम् ॥ ९ ॥

अथ षष्ठस्कन्धो व्याख्यायते । पूर्वोक्तानुवादपूर्वकं निरन्तरोक्तनरकपरिहारोपायं पृच्छति । निवृत्तिमार्ग इति षड्भिः । आदौ द्वितीयस्कन्धे "वैश्वानरं याति" इत्यादिना भगवता त्वया यथा यथावत् यथेन मार्गेण क्रमेण योगोऽर्चिरादिप्राप्तिस्तेनोपलब्धो ब्रह्मा तेन सहासंसृतिर्मोक्षो भवति ।

ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे ।
परस्यान्ते कृतात्मानः प्रविशन्ति परम्पदम् ॥

इति वचनात् ॥ १ ॥

त्रैगुण्यं स्वर्गादिसुखं तदेव विषयः प्राप्यं यस्य न लीना प्रकृतिर्यस्य तस्य पुंसः पुनः पुनर्गुणसर्गो भोगार्थं देहारम्भरूपो यो मार्गः स च कथितस्तृतीये ।

(१) प्रियव्रतोत्तानपादौ वंश इति श्रीधर० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दक्षिणेन पथार्यम्णः पितृलोकं व्रजन्ति ते ।

इत्यादिना ॥ २ ॥

अनुवर्णिता निरन्तराध्याये व्याख्यातश्चतुर्मुखस्यादौ यतो यस्मिन् ॥ ३ ॥

द्वीपादीन् भागतो लक्षणतो मानतश्च धरामण्डलस्य संस्थानं ज्योतिषां विवराणां चेदं संस्थानं विभुर्यथासृजत्तथा व्याख्यातमित्यर्थः ॥ ४—५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

श्रीमते रामानुजाय नमः ।

एवं नानाविधनरकेषु तत्प्राप्तिहेतुभूतावचेषु पापेषु चोपवर्णितेषु तन्निस्तारोपायं पिपृच्छिषुस्तावदुक्तमनुवदति । निवृत्तिमार्ग इत्यादिभिः पञ्चभिः । भगवता त्वया आदौ द्वितीये निवृत्तिमार्गः यथावत्कथितः निवृत्तिर्निवृत्तधर्मः मोक्षधर्म इति यावत् तस्य कामादिनिवृत्तिपूर्वकत्वात्तेन प्राप्यो मार्गः मुक्तिस्वरूपतदुपायादिकं सर्वं "गृहात्प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः" इत्यादिना कथितमित्यर्थः कोऽसौ निवृत्तिमार्ग इत्यत्राह । क्रमयोगेति । क्रमः स्वस्ववर्णाश्रमोचितपञ्चमहायज्ञादिरूपकर्मयोगानुष्ठानक्रमः आत्मयाथात्म्यज्ञानयोगः भगवद्भक्तियोगश्च तन्त्रेण योगशब्देन विवक्षितौ क्रमयोगाभ्यामुपलब्धेन ज्ञानकर्मयोगाभ्यामनुगृहीतेन भक्तियोगेनोपलब्धेन प्राप्तेन ब्रह्मणा हेतुना संसृतिर्मुक्तिरिति यदेष निवृत्तिमार्ग इत्यर्थः । ब्रह्मणा वृक्तिं पृष्ठयन्तपाठे ब्रह्मणः क्रमः क्रमयोगोपलब्धेन ज्ञानकर्मयोगाभ्यामुपलब्धेन भक्तियोगेनेति शेषः केचिदत्र क्रमयोगोऽर्चिरादिप्राप्तिस्तेन उपलब्धो ब्रह्मा चतुर्मुखस्तेन सहासंसृतिर्मोक्षो भवति ।

ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे ।

परस्यान्ते कृतात्मानः प्रविशन्ति परम्पदम् ॥

इति वचनादित्याचक्षते तन्न मोक्षेऽथ सम्पत्स्य इति शरीरपातावधिमात्रविलम्बश्रवणाविरोधापत्तेः ब्रह्मणा सह ते सर्वे इतिवचनस्य "ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे" इति श्रुतेश्च विशेषवशात्सालोक्यप्राप्तजीवविषयात्पुण्यवशाच्चतुर्मुखलोकं प्राप्य तत्र निर्वृत्तोपासनाः ब्रह्मणा सह मुच्यन्त इति तदर्थः ॥ १ ॥

तथा हे मुने ! शुक ! त्रैगुण्यविषयः प्रवृत्तिलक्षणश्च मार्गः कथितः कापिले त्रैगुण्यविषयत्रिगुणयुक्तपुरुषाधिकारः प्रवृत्त्या सुखदुःखादिसाधनकर्मणालक्ष्यते प्राप्यत इति प्रवृत्तिलक्षणः लक्ष्यतेऽनेनेति लक्षणं प्रवृत्तिर्लक्षणमस्येति वा कोऽसौ प्रवृत्तिलक्षणो मार्गस्तत्राह । अलीनप्रकृतेरविनष्टप्रकृतिसम्बन्धस्य जीवस्य योऽसौ पुनः पुनर्गुणसर्गः सृज्यतेऽनेनेति सर्गः गुणाः गुणार्थं सर्गो यस्य स गुणसर्गः पुनः पुनः सुखदुःखभोगार्थगुणकार्यरूपदेहसम्बन्ध इत्यर्थः देहो हि कर्मफलभूतसुखदुःखादिभोगाय पुण्यापुण्यात्मकप्रवृत्त्याख्यकर्मणा प्राप्यते कर्म हि देहसम्बन्धोपादानद्वारा सुखदुःखादिसाधनं न साक्षादतो गुणसर्गः प्रवृत्तिलक्षणो मार्गो भवतीत्यर्थः ॥ २ ॥

अधर्मः कारणतया लक्षणं येषां ते नानाविधा नरकाश्चानुवर्णिताः तथा स्वायम्भुवसम्बन्धी आद्यो मन्वन्तरश्च व्याख्यातः ॥ ३ ॥

कोऽसौ स्वायम्भुवः यत्सम्बन्धी मन्वन्तरो व्याख्यातः तत्राह । यतः स्वायम्भुवमनोः प्रियव्रतोत्तानपादौ वंशः सन्ततिरपत्यभूताविति यावत्, तथा तच्चरितानि प्रियव्रतोत्तानपादयोश्चरितानि च व्याख्यातानीत्यर्थः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रीमदानन्दतीर्थपादेभ्यो नमः ।

श्रीलक्ष्मीनारायणाभ्यां नमः ।

भवभयजटां (१) घोरां यस्याभिधानमघच्छिदो
दलयति नृणां सद्यः सङ्कीर्तितं स्खलनादिषु ॥
(२) अहिरिपुरहेर्हत्यायंहो जहौ हि यदर्चया ।
शरणमनिशं शान्तं कान्तं नमामि मुरद्विषम् ॥ १ ॥

प्लवारूढः पञ्चमस्कन्धशैलादहं षष्ठस्कन्धसिन्धावगाधे ॥ अनुज्ञां वः प्रार्थये स्नातुकामो भवन्तः सन्तो गुणार्थैकलुब्धाः ॥ २ ॥

अस्मिन् स्कन्धेऽतीतस्कन्धार्थोऽध्येतृप्रवक्तृश्रोतॄणां फलाधिक्यप्रकटनाय संक्षिप्य निरूप्यते तत्र प्रारिप्सितेऽध्याये सर्वाधिकारिकं सुखसाध्यं श्रीहरिप्रसादजनकज्ञानसाधनमपि भक्त्या हरेर्नामसङ्कीर्तनं पापपरिहारद्वारावश्यकं मुक्तिसाधनमिति निरूप्यते तदर्थं ज्ञानदरिद्रजनदयालुर्विद्वानपि परीक्षिद्येन विना पापविनाशो न स्यात्तदभावे ज्ञानानुदयः तस्मिन्सति मोक्षमात्रमपि न स्यादतस्त्वया तदवश्यं वक्तव्यमितीममेवार्थं वादयितुं (३) द्वितीयस्कन्धोक्तार्थमनुवदति । निवृत्तिमार्ग इति । आदौ द्वितीयस्कन्धारम्भे वरीयानेष ते प्रश्न इत्यादिना निवृत्तिमार्गः स्वस्वरूपानन्दाविर्भावलक्षणमोक्षसाधनविशेषः । ननु साधनविशेषप्रपञ्चनमन्तरेण सृष्ट्यादिकथनं कुत्रोपयोगितया सङ्गच्छत इति तत्राह । यथेति । यथावत्सृष्ट्यादिलक्षणेन दोषत्रयरहितेन लक्षितं श्रीनारायणस्वरूपं मुख्यपुरुषार्थोपयोगीत्यभिप्रायेण तत्प्रपञ्चितमिति भावः तस्य फलमाह । क्रमयोगेति । यद्यस्मान्निवृत्तिमार्गादनुष्ठिताज्ज्ञानब्रह्मणा सर्वगुणपूर्णेन श्रीनारायणेनासंसृतिः संसाराभावलक्षणं फलं भवति । जीवस्येति शेषः "कर्तृकरणयोस्तृतीया" इति अत उभयथापि मुख्यत्वं श्रीहरेरेवेति प्रकटनाय ब्रह्मणेति तृतीया "अथ कस्मादुच्यते ब्रह्मेति बृहन्तो ह्यस्मिन्गुणाः" इति श्रुतेः गुणपरिपूर्णस्तथा ज्ञात एव पुरुषार्थप्रदः न निर्गुणत्वेन इत्यतो ब्रह्मेति पदं प्रायोजि कथं ज्ञातेनेति तत्राह । क्रमेति । क्रमेणानुष्ठितेन योगेन वैराग्यभक्तिनिरन्तरध्यानज्ञानलक्षणोपायेनोपलब्धेन दृष्टेन प्रथमं स्मरणं पश्चादेकैकावयवध्यानं तदनन्तरं समग्राङ्गध्यानमिति वा क्रमयोगः ॥ १ ॥

"ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणस्पतिम्" इति प्रवृत्तिलक्षणश्च शब्दात्कथितः स किंफल इति तत्राह । त्रैगुण्येति । त्रिगुणात्मकपुरन्दरादिदेवतास्थानप्राप्तिफलमित्यर्थः तत्फलं किं नित्यं नेत्याह । य इति । योऽसौ प्रवृत्तिमार्गः कामकर्मविदूषितान्तःकरणादोषभर्जनासमर्थत्वादलीनप्रकृतेरविलष्टप्रकृतिशक्तेः पुरुषस्य पुनः पुनर्गुण-

(१) शिफाजटे इत्यमरः । (२) सर्पे वृत्रासुरे व्यह्निरित्यमरः ।
(३) शुकमुखेनानुवादयितुम् ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भूतस्य देहस्य सर्गो यस्मात्स तथा सत्त्वादिगुणैः सर्गो यस्मादिति वा भूयो जननमरणे प्राप्य चक्रवत्परिभ्रमणफलं ददातीत्यर्थः अलीनप्रकृतेर्यो गुणसर्गः सत्त्वादिगुणनिमित्तोत्पत्तिः असावपि तृतीयस्कन्धादौ कथित इति वा योगविभागः ॥ २ ॥

अधर्मेण लक्ष्यन्ते दृश्यन्ते अनुभूयन्ते पृथक्संज्ञावत्त्वेन क्रियन्त इति वाधर्मलक्षणाः अधर्मे लक्षयन्तीति वा नास्ति रतिः कथञ्चन येषु ते नरका उपवर्णिताः पञ्चमान्त इति शेषः मन्वन्तरो मन्वन्तरविषयो विचारश्चतुर्थारम्भे व्याख्यातः कोऽसाविति तत्राह । आद्य इति । आद्यः प्राथमिकः केन सृष्ट इत्यत उक्तम् । स्वायम्भुव इति । स्वयम्भुवा कल्पितः यतः यस्मिन्मन्वन्तरे स्वायम्भुवो जातो मनुराद्यः सर्वमनूनामाद्यभूत इति वा ॥ ३ ॥

ननु स्वायम्भुव इति सामान्योक्तौ मनुविशेषः कुतो निश्चीयते न च तच्छब्दादिति वाच्यमश्रवणात् न च तेनैव स्वयम्भूजातानां सर्वेषामपि तत्सम्बन्धितया तच्छब्दवाच्यत्वोपपत्तेः न च रूढ्या तदङ्गीकारः किं न स्यादिति वाच्यं विशेषमन्तरेण केवलया निश्चेतुमशक्यत्वात् "स्वायम्भुव ! कथां वृत्त्या वर्तितं ते परम्वयः" इति अत्र नारदपरत्वेन रूढेरेपहारादित्याशङ्क्य यत इत्यादिमुत्तरत्र सम्बद्ध्य परिह्रियते । यत इति । यतो यस्मात्स्वायम्भुवान्मनोर्जातयोः प्रियव्रतोत्तानपादयोर्वंशः तयोश्चरितानि चतुर्थे पञ्चमे च व्याख्यातानीत्यनेन स्वायम्भुवो मनुरेवोच्यत इति निश्चीयत इति द्वीपादयश्च पञ्चमे व्याख्याता इति शेषः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

श्रीकृष्णचैतन्यचन्द्राय नमः ।

श्रीकृष्ण कृष्णचैतन्य ससनातनरूपक ।
गोपाल रघुनाथाप्त व्रजजीवक पाहि माम् ॥ १ ॥
षष्ठस्य क्रमसन्दर्भे सन्दर्भाणां समाहृतिः ।
क्रियते यन्निदेशेन समेऽनन्यगतेर्गतिः ॥ २ ॥
अथ षष्ठस्कन्धस्य क्रमसन्दर्भः ।
स्वामिपादैर्यद्व्यक्तं यद्व्यक्तं चास्फुटं क्वचित् ।
तत्र तत्रैव विज्ञेयः सन्दर्भः क्रमसंज्ञकः ॥ ३ ॥
वैष्णवपरितोषः स्याद्यत्र यत्र ततस्ततः ।
लेख्यं वैष्णवसिद्धान्तं तद्विषयेनैव किञ्चन ॥ ४ ॥

प्रष्टव्यार्थोपयुक्तमेव तत् पूर्वोक्तमनुवदति । निवृत्तीति पञ्चभिः । तत्र परलोकमार्गो तावद्वौ । वेदानुसारैकस्तदतिक्रमेणान्यः प्रथमोऽत्र द्विविधः । निवृत्तिप्रवृत्तिलक्षणः उत्तरस्त्वेकविधोऽधर्मलक्षणः । तत्र मार्गत्वं नाम कर्मयोगहेतुत्वमित्युक्तं कर्मयोगोपलब्धेनेति ज्ञानभक्ती तु सद्यः प्रापकत्वान्मार्गत्वेन न विवक्षिते । तदेतदभिप्रेत्याह । प्रथमसार्द्धद्वयेन । तत्र निवृत्तीति युग्मकम् ॥ १ ॥ २ ॥

अधर्मेत्यर्द्धकम् । अधर्मलक्षणास्तज्ज्ञापकाः मन्वन्तरादिकं तु प्रासङ्गिकतयैव वर्णितमित्याह । मन्वन्तरश्चेति सार्द्धद्वयेन । यतो यस्मिन् मार्गद्वये ॥ ३ ॥

द्वीपेति सार्द्धकम् । विवरणं येषुपलक्षणं नरकाणाम् ॥ ४ ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

श्रीकृष्णचैतन्यचन्द्राय नमः ।

प्रणम्य श्रीगुरुं भूयः श्रीकृष्णं करुणार्णवम् ।
लोकनाथं जगच्चक्षुः श्रीगुरुं तमुपाश्रये ॥ १ ॥
गोपरामाजनप्राणप्रेयसेति प्रभुष्णवे ।
तदीयप्रियदास्याय मां मदीयमहं ददे ॥ २ ॥
स्वमर्यादास्थितानां यद्भूपातालदिवौकसाम् ।
पालनं स्थाननाम्नोक्तं पञ्चमे तदुदीरितम् ॥ ३ ॥
भक्तानां धर्ममर्यादोल्लङ्घिनामपि पालनम् ।
यद्भवेत्तत्तु विद्वाद्भिः पोषणं परिकीर्त्तितम् ॥ ४ ॥
पापिनोऽजामिलस्यापि नामाभासेन भक्तता ।
गुरुद्रोहोऽपि शक्रस्य प्रोक्ताभिकृतभक्तता ॥ ५ ॥
तयोश्च पोषणाच्चित्रकेत्वादीनाञ्च किं पुनः ।
अध्यायैकोनविंशत्या भक्तवात्सल्यमुच्यते ॥ ६ ॥
तत्र तु त्रिभिरध्यायैः कथाजामिलसंश्रया ।
विश्वरूपाश्रया षड्भिर्वृत्राख्यानमथाष्टभिः ॥ ७ ॥
मरुदाख्यानमध्यायद्वयेन परिकीर्त्तितम् ।
यत्रानुवृत्तिरिन्द्रेण दित्यां पुंसवनव्रते ॥ ८ ॥
तत्रेह प्रथमेऽध्याये विष्णुदूतैरजामिले ।
मोच्यमाने तदीयाघान्युच्यन्ते यमकिङ्करैः ॥ ९ ॥

नराणां नरकपातयातनाश्रवणेन दयार्द्रहृदयस्तन्निस्तारोपायस्य प्रष्टव्यस्य प्रत्युत्तरवाचनयोग्यतायामुत्साहमुपपादयितुं पूर्वोक्तानुवादेनोपदिष्टार्थावधारणयोग्यतां स्वस्याभिव्यञ्जयति । निवृत्तीति । यथा यथावत् आदौ द्वितीयस्कन्धे "वैश्वानरं याति" इत्यादिना तथा तृतीये च "ये स्वधर्मान् दुहन्ति" इत्यादिना यतः येन मार्गेण क्रमयोगेन प्राप्तौ यो ब्रह्मा तेन सह असंसृतिर्मोक्षो भवति ।

ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे ।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥

इति श्रुतेः प्रवृत्तिलक्षणश्च कथितस्तृतीय एव "येऽविहासक्तमनस" इत्यादिना त्रैगुण्यं स्वर्गादिसुखं तदेव विषयः प्राप्य यस्य न लीना प्रकृतिर्यस्य तस्य संसारिणः गुणैरेव सर्गः पुनः पुनर्जन्म यतः सः ॥ १ ॥ २ ॥

यतो यस्मिन् ॥ ३ ॥

द्वीपादीन् यथा असृजत् तथा व्याख्यातमित्यन्वयः । आगतो लक्षणतो मानतश्च धरामण्डलस्य ज्योतिषां सूर्यादीनामिदं संस्थानं यथा असृजत् तथा व्याख्यातमित्यर्थः ॥ ४ ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीभगवन्निम्बार्काय नमः

श्रीहंसादीन् गुरून्नत्वा षष्ठे सिद्धान्तद्योतकः ।
एकोनविंशदध्याययुतो दीपो विरच्यते ॥ १ ॥
पोषणं विष्णुनामादिसत्संसर्गवतामपि ।
अजामिलाद्युपाख्यानैः क्रमादिह निरूप्यते ॥ २ ॥

पापफलान्नरकान् श्रुत्वा कृतपापानां हिताय तन्निस्तारं प्रष्टुं गुरुमुखाच्छ्रुतमनुवदति । निवृत्तिमार्ग इत्यादिना । निवृत्तिमार्गः देहिकामुष्मिकलोकप्रापककर्मानुष्ठानादिभ्यो या निवृत्तिस्तत्पू-

धरामण्डलसंस्थानं भागलक्षणमानतः ।
ज्योतिषां विवराणां च यथेदमसृजद्विभुः ॥ ५ ॥
अधुनेह महाभाग ! यथैव नरकान्नरः ।
नानोग्रयातनान्नेयात्तन्मे व्याख्यातुमर्हसि ॥ ६ ॥

श्रीशुक उवाच ।

न चेदिहैवापचितिं यथांहसः कृतस्य कुर्यान्मनउक्तिपाणिभिः ।
ध्रुवं स वै प्रेत्य नरकानुपैति ये कीर्तिता मे भवतस्तिग्मयातनाः ॥ ७ ॥
तस्मात् पुरैवाश्विह पापनिष्कृतौ यतेत मृत्योरविपद्यतात्मना ।
दोषस्य दृष्ट्वा गुरुलाघवं यथा भिषक् चिकित्सेत रुजां निदानवित् ॥ ८ ॥

राजोवाच ।

दृष्टश्रुताभ्यां यत्पापं जानन्नप्यात्मनोऽहितम् ।
करोति भूयो विवशः प्रायश्चित्तमथो कथम् ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वेकः मोक्षधर्मः ।

तस्माद्भारत ! सर्वात्मा भगवान् हरिरीश्वरः ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छता भयम् ।

इत्यादिना आदौ तत्र तत्र मुमुक्षूपादेयत्वेन यथा यथावत्कथितः यत् येन क्रमयोगोपलब्धेन पूर्वपुण्यार्जितशुभजन्मतीर्थवाससत्सङ्गादिक्रमयोगाल्लब्धेन प्राप्तेन अनुष्ठितेन असंसृतिर्मुक्तिः स चान्येन वक्तुमशक्य इति सूचयितुमाह । ब्रह्मणा ब्राह्मणदेहधारिणा भगवता त्वयेत्यर्थः ॥ १ ॥

प्रवृत्तिलक्षणश्च ऐहिकामुष्मिकलोकप्रापककर्मानुष्ठानादौ प्रवृत्तिरेव लक्षणं स्वरूपं यस्य सः पुरुषार्थत्रयसाधनरूपो धर्मः बुभुक्षूपादेयतया ।

श्रोतव्यादीनि राजेन्द्र ! नृणां सन्ति सहस्रशः ।
अपश्यतामात्मतत्त्वं गृहेषु गृहमेधिनाम् ।

इत्यादिना पुनः पुनस्त्वया कथितः त्रैगुण्यमैहिकामुष्मिकसुखं तदेव विषयः फलं यस्य सः न लीना प्रकृतिः सांसारिकः स्वभावो यस्य तस्य बुभुक्षोः गुणै रागादिभिः सर्गो जन्म तदुपलक्षितो जन्ममरणप्रवाहो यतः इमौ श्लोकौ कैश्चिदर्चिरादिमार्गद्वयपरत्वेन व्याख्यातौ तदयुक्तम् । निवृत्तिप्रवृत्तिधर्मयोः आदौ स्कन्धचतुष्टयेऽपि वर्णितयोरनुवादसम्भवमार्गद्वयमात्रानुवादानौचित्यान्मार्गद्वयस्य तत्रैवान्तर्भावाच्च ॥ २ ॥

अधर्मस्य लक्षणं फलं येषु ते आद्यः मन्वन्तरः मन्वादिषट्करूपः व्याख्यातः यतो यस्मिन् मनुश्च स्वायम्भुवो व्याख्यातः प्रियव्रतोत्तानपदोर्वंशस्तच्चरितानि च व्याख्यातानि द्वीपादीन् भागतो लक्षणतो मानतश्च धरामण्डलस्य संस्थानं ज्योतिषां विवराणां च संस्थानम् इदं ब्रह्माण्डं यथा विभुर्विष्णुः असृजत् तथा च त्वमुक्तवानिति सार्द्धश्लोकान्वयः ॥ ३ ॥ ४ ॥ ५ ॥

भाषा टीका ।

॥ दोहा ॥

रामानुज पद वन्दिकर, कृष्ण चरण चितलाय ।
भाषा षष्ठ स्कन्ध की, लक्ष्मणदास बनाय ॥ १ ॥

राजा परीक्षत् जी बोले आपने पहिले निवृत्ति मार्ग का कथन यथार्थ से किया है जिस मार्ग में क्रम से ब्रह्मज्ञान के लाभ होने पर संसारसे मोक्ष होता है ॥ १ ॥

त्रिगुण के विषय स्वर्गादि सुख को प्राप्त होने वाला जिस का प्रकृति सम्बन्ध नष्ट नहीं भया है तिस जीव के वारम्वार गुणों से सृष्टि होने का प्रवृत्ति मार्ग भी आप ने कथन किया है ॥ २ ॥

अधर्म से प्राप्त होने वाले अनेक नरक भी आपने वर्णन किये हैं आद्य मन्वन्तर भी आपने कहा है जिस में कि स्वायम्भुव मनु भये हैं ॥ ३ ॥

प्रियव्रत उत्तानपाद इन दोनों के वंश और उन के चरित्र भी कहे उस मे द्वीपवर्ष समुद्र पर्वत नदी उद्यान वृक्ष इन सबों का कथन किया ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नाना उग्रा यातना येषु तान्नरकान् यथा येनोपायेन नेयात्न गच्छेत्तन्मेऽधुना व्याख्यातुमर्हसि ॥ ६ ॥

तत्र तावन्मन्वाद्युक्तं प्रायश्चित्तं विना नरका दुर्निवारा इत्याह । न चेदिति द्वाभ्याम् । मनउक्तिपाणिभिर्मनोवाक्कायैः कृतस्यांहसस्तैरेवेहैवापचितिं प्रायश्चित्तं न कुर्याच्चेत्तर्हि स पुरुषः प्रेत्य मृत्वा नरकान् ध्रुवमुपैति मे मया ये भवतः कीर्तिताः तिग्मा दारुणा यातना येषु तान् ॥ ७ ॥

यस्मादेवं तस्मात् पापस्य प्रायश्चित्ते यतेत कदा मृत्योः पुरैव तत्रापि अविपद्यता अक्षीयमाणेनात्मना देहेन । यद्वा । अविपद्

क्वचिन्निवर्ततेऽभद्रात् क्वचिच्चरति तत् पुनः ।
प्रायश्चित्तमतोऽपार्थं मन्ये कुञ्जरशौचवत् ॥ १० ॥

श्रीशुक उवाच ।

कर्मणा कर्मनिर्हारो नह्यात्यन्तिक इष्यते ।
अविद्वदधिकारित्वात् प्रायश्चित्तं विमर्शनम् ॥ ११ ॥
नाश्नतः पथ्यमेवान्नं व्याधयोऽभिभवन्ति हि ।
एवं नियमकृद्राजञ्छनैः क्षेमाय कल्पते ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विपत्तिरहितो यावत् यतात्मना संयतेन मनसा तत्राप्याशु अन्यथा "अतीव चिरकाले तु द्विगुणं व्रतमर्हति" इति द्वैगुण्यापत्तेः तत्र च पापस्य महत्त्वमल्पत्वञ्चावेक्ष्य तदनुरूपे प्रायश्चित्ते यतेत रुजां रोगाणां निदानविद्यया वैद्यस्तदनुरूपं चिकित्सेत तद्वत् ॥ ८ ॥

अत्र चोदयति द्वाभ्याम् । दृष्टं राजदण्डादि श्रुतं नरकपातादि ताभ्यामात्मनः पापमहितं जानन्नपि भूयः प्रायश्चित्तानन्तरं करोति अथो अतः कारणाद्द्वादशाब्दादि कथं प्रायश्चित्तं तेन समूलस्य दोषस्यानिवृत्तेः निवृत्तौ वा पुनश्च पापप्ररोहयोगादिति भावः ॥ ९ ॥

किञ्च । क्वचित्कदाचिदभद्रात्पापान्निवर्तते क्वचित्तदेव पुनराचरति यथा कुञ्जरः स्नातोऽपि रजोभिरात्मानं मलिनीकरोति तथा पापस्य पुनर्दुर्निवारत्वेन नरकपातस्यावश्यं भावित्वात्प्रायश्चित्तं व्यर्थमिति मन्ये ॥ १० ॥

परिहरति । कर्मणा कृच्छ्रादिप्रायश्चित्तेन कर्मणः पापस्य निर्हारो नाश आत्यन्तिकः समूलो न हीष्यते अविद्वानधिकारी यस्मिंस्तस्य भावस्तत्त्वं तस्मादतोऽविद्याया नाशाभावान्नष्टेऽपि तस्मिन्पापे तत्संस्कारेण पापान्तरस्य पुनः पुनः प्ररोहो भवत्येव किं तर्हि मुख्यं प्रायश्चित्तं तदाह । प्रायश्चित्तं तु विमर्शनं ज्ञानम् ॥ ११ ॥

तत्तु नित्यमप्रमत्तः शनैर्लभते नान्य इति सदृष्टान्तमाह । नेति । पथ्यमेवान्नमश्नतः पुरुषान् यथा व्याधयो न बाधन्ते तथा नियमादिकर्ता क्षेमाय तत्त्वज्ञानाय समर्थो भवति ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथा द्वीपादीन् भूमण्डलसंस्थानज्योतिषां सूर्यादीनां विवराणामतलादीनां संस्थानं च भागादिभिर्व्याख्यातवानसीति शेषः भागोऽवान्तरविभागः लक्षणमसाधारणाकारणं मानं परिमाणं किं बहुना यथेदं भगवानसृजद्याहग्विधमिदं जगद्भगवानसृजत् तथैव व्याख्यातमित्यर्थः एवमुक्तानुवादः क्रमानादरेण कृतस्तत्रायं क्रमश्चार्थो विवक्षितः प्रवृत्तिलक्षणो धर्मः "मन्वन्तरश्च व्याख्यातः आद्यः स्वायम्भुवो यतः" इति च तृतीयस्कन्धार्थानुवादकम् अधर्मलक्षण इति पूर्वार्धं प्रियव्रतोत्तानपादौ इत्यादि चतुर्थपञ्चमस्कन्धार्थानुवादकमिति ॥ ५ ॥

एवमुक्तमनूद्याथ पूर्वस्कन्धान्तेऽनुवर्णितनरकानिस्तरणोपायं पृच्छति । अधुनेहेति । हे महाभाग ! भागो विवेकात्मको बुद्धिविशेषः विवेको हि हेयमुपादेयं च भज्यतेऽनेनेति भागः करणे घञ् महांश्चासौ भागश्च महाभागः सोऽस्यास्तीति महाभागः अर्शआद्यच् नानाविधा उग्रास्तीव्रा यातना येषु तान्नरः अधुनैवाशु यथैव नयात् येन साधनेन न प्राप्नुयात्तत्साधनं मे मह्यं व्याख्यातुमर्हसि ॥ ६ ॥

एवमापृष्टो भगवान् वादरायणिस्तावदकृतनिष्कृतिभिरवश्यं स्वदुरितानुसारेण नरकाः प्राप्यन्त एवेति वदन्नवश्यं दुरितप्रतीकारे यतितव्यमित्याह । न चेदिति द्वाभ्याम् । मनउक्तिपाणिभिर्मनोवाक्कायैः कृतस्यांहसः पापस्यापाचिर्ति प्रायश्चित्तादिभिः क्षयं यदा इहैव लोके यदि न कुर्यात्तदा स वै अकृतनिष्कृतिर्देही प्रेत्य मृत्वा ध्रुवं तु तान्नरकानुपैति प्राप्नोति नरकान्विशिनष्टि । भवतस्ते तुभ्यं मे मया ये नरकास्तिग्मा तीव्रा यातना येषु तादृशाः कीर्तिताः कथिताः इत्यर्थः ॥ ७ ॥

तस्मादकृतनिष्कृतेर्नरकप्राप्तेर्दुर्निवारत्वात्पुरैव मृत्योर्मरणात्पूर्वमेवाविपद्यता विपत्तिमगच्छता पटुतरेणेत्यर्थः आत्मना देहेनेहैव लोके पापस्य निष्कृतौ नाशे यतेत किं कृत्वा दोषस्य पापस्य गुरुलाघवं भावप्रधानो निर्देशः गौरवलाघवे दृष्ट्वा यथा योग्यं प्रायश्चित्ते यतेतेत्यर्थः तत्र दृष्टान्तः यथा रुजां रोगिणां निदानज्ञो भिषग्रोगानुसारेण चिकित्सितं प्रतीकारं कुर्यात् इति ॥ ८ ॥

एवं प्रतिपदोक्तं प्रायश्चित्तमेव उपाय इत्युक्तं विषयपरवशस्य नरस्य पुनः पुनः पापाचरणशीलत्वात्तेषामानन्त्यात्प्रायश्चित्तानुष्ठानासम्भवात्तत्सम्भवे पुनर्दुरितसम्भावनयाकृतप्रायत्वाच्च नेदं प्रश्नस्योत्तरमिति वदन्नुपायान्तरं पृच्छति राजा । दृष्टश्रुताभ्यामिति द्वाभ्याम् । यद्यस्माद्दृष्टश्रुताभ्यां प्रत्यक्षेण शिष्टगर्हादिना शास्त्रवचनेन चात्मनः स्वस्याहितमनिष्टसाधनमिति जानन्नपि पुनर्विवशः विषयपरवशः पापङ्करोत्यथोऽतः प्रायश्चित्तं कथं व्यवस्थितं सद्दुरितशोधकं कथं भवेदित्यर्थः अभद्रात्पापात्क्वचिन्निवर्त्तते विषयपरवशः क्वचिदभद्रं पुनश्चरति करोति अथोऽतः कृतमपि प्रायश्चित्तमपार्थं व्यर्थं भवति अत्र दृष्टान्तः कुञ्जरशौचवदिति । यथा कुञ्जरो गजः स्नातोऽपि पुनः स्वशिरसि धूलिं प्रक्षिपति तस्य शौचं स्नानं व्यर्थं तद्वत्कृतमपि प्रायश्चित्तं पुनः पापाचरणाद्व्यर्थं मन्य इत्यर्थः अत उपायान्तरं मे कथयितव्यमिति भावः ॥ ९ ॥ १० ॥

एवमुक्ते निरवशेषतया दुरितनिवर्तकं विवक्षुस्तावत्प्रायश्चित्तमपि कतिपयदुरितनिवर्तकत्वेनाधिकारिभेदेन व्यवस्थितमन्यथा प्रायश्चित्तविधायकमन्वादिस्मृतिवैयर्थ्यं स्यादि-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्याह भगवान् बादरायणिः । कर्मणेत्यादिना । कर्मणा प्रतिपदोक्तप्रायश्चित्ताख्येन कर्मणा कर्मणः पापकर्मणो निर्हारः आत्यन्तिकः पुनः पापसम्बन्धरहितो नेष्यते यथोपदेशमेव दुरितनिवर्त्तकं प्रायश्चित्तं न तु ज्ञानवदुत्तराघस्यापि साकल्येन विनाशकमिति भावः तर्हि प्रायश्चित्तविधिवैयर्थ्यमत आह । अविद्वदधिकारित्वादविदुषोऽपरमात्मोपासकस्याहङ्कारममकाररागद्वेषादिमतः प्रायश्चित्ते अधिकारित्वाद्विदुष उत्तरपूर्वाघयोरश्लेषविनाशकरस्य वेदनस्यैव सत्त्वान्न तत्पापनिवृत्तये प्रायश्चित्तापेक्षेति । यद्यपि तद्विधिवैयर्थ्यं तदाप्यविदुषस्तात्कालिकरोगोपशामकौषधादिवत्कतिपयदुरितनिरसनाय प्रायश्चित्तमपेक्षितमिति न तद्विधिवैयर्थ्यमिति भावः अत एवोच्यते । प्रायश्चित्तं विमर्शनमिति । विमृश्यत इति विमर्शनं "कृत्यल्युटो बहुलम्" इति बहुवचनात्कर्मणि घञ् पापविशेषनिवर्त्तकत्वेन प्रायश्चित्तं विमृश्यते न कार्त्स्न्येनेत्यर्थः । यद्वा । विमृश्यते विविच्यते पृथक्कृत्य निवर्त्यतेऽनेन पापमिति करणे घञ् ॥ ११ ॥

एवं प्रतिपदोक्तप्रायश्चित्तान्यधिकारिभेदेन कतिपयदुरितनिरसनक्षमाणि वेदनं तु निःशेषदुरितनिवर्त्तनद्वारा नरकपरिहारकमित्युक्तं तर्हि तादृशं वेदनङ्कैरुपायैर्निष्पद्यत इत्यपेक्षायां तन्निष्पत्तिप्रतिबन्धकनिरसनोपायैर्नियमैस्तन्निष्पद्यत एवेति सदृष्टान्तमाह । नाश्नत इति । पथ्यमेवान्नमश्नतः पुरुषस्य व्याधयो नाभिभवन्ति न बाधन्ते हि हे राजन् ! एवं नियमकृद्वक्ष्यमाणतथा नियमवान् शनैः क्षेमाय दुःखासम्भिन्ननिरतिशयसुखाय कल्पते क्षमते मुक्तो भवतीत्यर्थः शनैरित्यनेनेयं प्रणालयत्राभिप्रेता ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भागतो विभागतो लक्षणतो मानतश्च ज्योतिषां स्वरूपमिति शेषः विवराणामधोभुवनानां संस्थानमिति शेषः विभुरिदं जगद्यथा येन प्रकारेणासृजत्सोऽपि द्वितीयतृतीयादौ कथित इति शेषः ॥ ५ ॥

प्रवक्तुर्व्याख्याने हर्षोद्रेककारणाय स्वस्योक्तार्थग्रहणसामर्थ्यं प्रदर्श्य विवक्षितार्थं पृच्छति । अधुनेति । अधुनेममर्थं भवन्तं पृच्छामीति शेषः । इह जीवलोके दुष्कर्मापि नरो यथा येन साधनेन नानोग्रयातनान्नरकान्नेयान्न गच्छेदधुना दुष्कर्मपरिहारपटीयः साधनं व्याख्यातुमर्हसीत्यन्वयः "यातना तीव्रवेदना" इत्यभिधानात् नानाविधा यातनास्तीव्रवेदना येषु नरकेषु तथा तानिति नरकविशेषणमेतत् ॥ ६ ॥

"न(१)चेदिहावेदीन्महती विनष्टिः" इति श्रुत्यर्थं पश्यन्प्रवक्ति । न चेदिति । यः पुरुषः मनउक्तिपाणिभिः(२)मनोवाक्कायैः कृतस्यांहसः अपचितिं प्रायश्चित्तोपलक्षणां नाशमिहैव न कुर्याच्चेत्तर्हि स पापी प्रेत्य नरकानुपैतीत्यन्वयः कीदृशानत्राह । ये कीर्तिता इति । वा इत्यनेन पारम्पर्येणेतीममर्थमाह । कथङ्कारमपचितिः स्यादित्यत उक्तम् । यथेति । अंहसो गुरुलाघवं यथा तथा प्रायश्चित्तकरणमित्यर्थः न चेदमौपचारिकं ध्रुवं निश्चितमिति यस्मिन् जन्मन्याचरितं तस्मिन्प्रायश्चित्तश्चेल्लघ्वपि क्षिप्रं गुरुदोषनिवृत्तिलक्षणफलदमित्येवेत्येनेन दर्शयति ॥ ७ ॥

यस्मादेवमनर्थप्राप्तिस्तस्माद्देहवियोगात्पूर्वमेव कालक्षेपमन्तरेण पापनिष्कृतौ पापपरिहारे यतेत यतनमपि मध्यमे वयस्येवेत्यभिप्रायेणोक्तमविपदिति बाल्ये वार्धके वा दौर्बल्यलक्षणविपत्तिसम्भवात्तारुण्ये तदयोगात्समर्थ इत्यर्थः अनेन द्रव्यादिसम्पत्तावेव प्रयतनीयमिति ध्वनितं यथेत्युक्तं विवृणोति । यदात्मन इति । आत्मनो दोषस्य यद्गुरुत्वं लघुत्वं च तद्दृष्ट्वा तदनुसारेणेत्यर्थः अत्रैव दृष्टान्तमाह । यथेति । रुजां रोगाणां "निदानं त्वादिकारणम्" इत्यभिधानान्मूलनिमित्तज्ञानी भिषग्वैद्यो यथा चिकित्सेत चिकित्सते आत्मनो दोषस्य गुरुलाघवज्ञानाभावे तद्गुरुमुखादपि ज्ञात्वा कर्तव्यमिति सूचितमनेन दृष्टान्तेन । यद्वा । यत् यावदात्मनो देहस्य मृत्योः सकाशाद्यन्मरणलक्षणविपन्न भवति तस्मात्तावत्पुरैव पापस्य गुरुलाघवज्ञानपूर्वकं निष्कृतौ यतेत इममर्थं सदृष्टान्तमाह । दोषस्येति ॥ ८ ॥

राजा निष्कृतेर्वैयर्थ्यं शङ्कते । दृष्टेति । चौर्यादिकारिणो राजदण्डादिदर्शनेन "मृतो नरकमभ्येति ह्यगम्यागमनान्नरः" इति श्रुतेः स चात्मनः पापमहितं दुःखसाधनं जानन्नपि विवशः स्वकर्माधीनः भूयः पश्चादपि पापं करोतीति यद्यस्मादथो तस्मात्प्रायश्चित्तं कथं भवतीत्यन्वयः ॥ ९ ॥

असम्भवं विवृणोति । क्वचिदभद्रात्प्रायश्चित्तेन निवर्तते क्वचित्तत्सदृशमभद्रमाचरतीति यदथो तस्मात्प्रायश्चित्तमपार्थं मन्ये निष्प्रयोजनत्वे कुञ्जरशौचेन स्नानं लक्षयति ॥ १० ॥

प्रायश्चित्तलक्षणं कर्मापार्थमिति वदन् किं केवलं व्यर्थमुत विद्वद्भिर्विमृश्य विहितमाहोस्विज्ज्ञानपूर्वकमपि क्रियमाणं तदिति तत्राद्यः सम्मत इत्याह । कर्मणेति । प्रायश्चित्तलक्षणेन कर्मणा कर्मनिर्हारः पापकर्मविनाशः आत्यन्तिकः छिन्नमूलत्वेन नेष्यते उभयोरप्यज्ञानमूलत्वेनाधिकृतत्वात् द्वितीयं न व्यर्थमित्याह । प्रायश्चित्तेति । विद्वद्भिरविदुषोऽधिकृत्य प्रायश्चित्तं कर्म विमर्शनं कृत्वा विहितं कर्म व्यर्थं नेष्यते इति पूर्वेणान्वयः ॥ ११ ॥

(३) तृतीये इदम्पापमिति जानता तदकुर्वाणेन स्वविहितं क्रियमाणमुत मया कृतं पापमिति ज्ञात्वा तस्येदं प्रायश्चित्तमिति जानतेति पक्षद्वयेऽपि क्रियमाणं कर्म व्यर्थं किन्तु सार्थकमिति भावेनाह । नाश्नत इति । एवमिति वचनाद्यथेत्यध्याहर्तव्यं पथ्यमेवान्नमश्नतः पुंसो व्याधयो नाभिभवन्ति यथा देहमिति शेषः "अत्यम्बुपानाच्च स एव दोषः तस्मान्नरो वह्निविवर्धनाय मुहुर्मुहुर्वारि पिबेदभूरि" इत्यादिविधानं हि शब्देनाक्षिप्तं स्पष्टयति । एवमिति । नियमकृत्पापकर्माकुर्वन्स्वविहितं कुर्वन् शनैर्बहुजन्मात्यये पुण्यप्रचयेन ज्ञानोत्पत्तौ क्षेमाय कल्पते मोक्षाय समर्थो भवति ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

प्रष्टव्यमाह । अधुनेति । लोकानां यथेष्टसाधने ते द्वे ज्ञाने तथानिष्टपरिहारसाधनमपि ज्ञातव्यमिति भावः ॥ ६ ॥

तत्र स्वमतं प्रायश्चित्तं प्रश्नेनोत्पादयितुमन्यमनुवदति । न चेदिति ॥ ७ ॥ ८ ॥

---

(१) इहैव पापप्रायश्चित्तं नावेदीच्चेन्महती हानिरिति श्रुत्यर्थः ।

(२) पाणिर्हस्त इतिख्यातः कदाचिद्देह उच्यत इत्यभिधानम् ।

(३) ज्ञानपूर्वकक्रियमाणविषये ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तथैव पृच्छति । दृष्टेति ॥ ९ ॥ १० ॥
स्वमतं वक्तुमाह । कर्मणेति ॥ ११—१४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नाना उग्रा यातना येषु तान् नरकान् यथा न इयात् न गच्छेत् तत् लोकानामिष्टानिष्टसाधने द्वे यथा ज्ञाते तथानिष्टपरिहारसाधनमपि ज्ञातव्यमिति भावः ॥ ६ ॥

तत्र स्वशिष्यस्य परीक्षितः स्वमते व्युत्पत्तिं परीक्षमाणः कर्मिणां मते नरके प्रतीकारमाह । नचेदिति द्वाभ्याम् । इहैव जन्मनि मनोवाक्कायैर्यैस्तैः समस्तैर्वा कृतस्यांहसः अपचितिं प्रायश्चित्तम् इहैव जन्मनि न कुर्याच्चेत्तदा तिग्मा दारुणाः ॥ ७ ॥

यस्मादेवं तस्मान्मृत्योः पुरैव तत्राप्याशु अन्यथा "अतीव चिरकालेतु द्विगुणं व्रतमर्हति" इति द्वैगुण्यापत्तेः । अविपद्यतात्मनेति । यावज्जरारोगादिभिर्व्रताद्यसामर्थ्यं न स्यादित्यर्थः । अत्र व्यवस्थापको विद्वान् धर्मशास्त्रतात्पर्यविज्ञो मृग्य इत्याह । दोषस्येति गुरुलाघवं गौरवं लाघवञ्च ॥ ८ ॥

मतमिदमाक्षिपन्न सम्मन्यमान आह । दृष्टेति द्वाभ्याम् । दृष्टं राजदण्डादि श्रुतं नरकपातादि ताभ्यामात्मनोऽहितं पापं प्रायश्चित्तानन्तरमपि करोति लोके तथा दृष्टत्वादित्यर्थः । अथो अतः प्रायश्चित्तं कथं पापनाशकमित्यर्थः । तस्य पापनाशकत्वे पुनः पापप्ररोहायोगादिति भावः ॥ ९ ॥

क्वचिद्यौवनादौ अभद्रात् पापान्निवर्त्तते पुनस्तदेव पापं कांचिद्वार्द्धके चरति अथो अत एव अपार्थं व्यर्थं कुञ्जरशौचवदिति कुञ्जरोहि स्नात्वापि पुनरात्मानं रजोभिर्मलिनीकरोति ॥ १० ॥

परीक्षयोस्तीर्णां परीक्षितं पुनरपि परीक्षिष्यमाणः सिद्धान्तं ज्ञापयति । कर्मणा कृच्छ्रादिप्रायश्चित्तेन कर्मणः पापस्य नाशो नात्यन्तिकः किन्त्वापातत उपशमन इत्यर्थः । अविद्वान् अविद्याबद्धो जीव एवाधिकारी यस्य तस्य भावस्तत्त्वं तस्माद्धेतोरित्यविद्यायाः पापमूलस्य विद्यमानत्वात् पुनः पुनरपि पापप्ररोहादिति भावः किं तर्हि मुख्यं प्रायश्चित्तमित्यतः पुनरपि परीक्षमाणो ज्ञानिनां मतेनाह । विमर्शनं ज्ञानं तस्यैवाविद्यानिवर्त्तकत्वादिति भावः ॥ ११ ॥

ननु तर्हि पापवत्त्वे अन्तःकरणाशुद्धभावस्तस्मिंश्च सति कुतो ज्ञानप्रसङ्ग इति चेत् सत्यं ज्ञानसाधनेनापि पापोपशम इति सदृष्टान्तमाह । पथ्यमेवान्नमश्नतः पुरुषान् यथा व्याधयो न बाधन्ते तथा नियमादिकर्त्ता क्षेमाय पापनाशनाय शनैः शनैरेव समर्थो भवति ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नाना बहुप्रकारा उग्राः दुःसहा यातनाः पीडा येषु तान् नेयान् गच्छेत् यथा येन प्रयत्नेन तन्मे मह्यं व्याख्यातुं वर्णयितुं त्वमर्हसि ॥ ६ ॥

"मनुर्यदब्रवीत्तद्भेषजम्" इत्यादिश्रुतिसरकृतमन्वादिमहर्षिप्रणीतस्मृत्यादरार्थमकृतनिष्कृतिरवश्यं नरकं प्राप्नोत्यतो मन्वादिस्मृत्युक्तरीत्या प्रायश्चित्तं पापिना कर्त्तव्यमित्याह । न चेति द्वाभ्याम् । मनआदिभिः कृतस्य अंहसः पापस्य यथा यथावत् मन्वाद्युक्तविधिना अपचितिं प्रायश्चित्तं न कुर्याच्चेत् तर्हि तिग्माः तीक्ष्णाः यातना येषु तथाविधा ये मया कीर्तिता नरकाः तान् ध्रुवमुपैति ॥ ७ ॥

तस्मादुक्तकारणान्मृत्योः पुरैव तत्रापि अविपद्विपद्रहितः पापनिष्कृतौ यतेत ॥ ८ ॥

महर्षिभिरुक्ता पापनिष्कृतिः पुण्यपुरुषेण पापभीरुणा दैवात्कृतस्य पापस्य निराकरणार्थो भवतु अत्यन्ततो मायामोहितस्य कामक्रोधादिपारवश्येन पापेभ्यो निवर्तितुमशक्तस्यानुक्षिणमहद्भ्र्यैर्दीनस्य प्रायश्चित्तशतेनापि शोधितुमशक्यस्य का गतिरिति दयार्द्रचित्तो महाराजो हृदि निधाय आक्षिपति । दृष्टश्रुताभ्यामिति द्वयेन । दृष्टश्रुताभ्यां पापफलाभ्यां राजदण्डनरकपातादिभ्यां पापमहितं जानन्नपि भूयः कृतेऽपि प्रायश्चित्ते पुनः करोति यतो विवशः कामादिपरवशः अतो अतः प्रायश्चित्तं कथं निष्पापत्वहेतुः स्यादिति शेषः ॥ ९ ॥

अभद्रात्पापाद्गङ्गादिजले कृतस्नानेन कुञ्जरेण स्नानरूपशौचं स्वदेहे प्रक्षितैः रजोभिरपार्थं क्रियते तद्वत्प्रायश्चित्तमपार्थं मन्ये ॥ १० ॥

परिहरति । कर्मणेत्यादिना । कर्मणा प्रायश्चित्तेन कर्मनिर्हारः पापरूपकर्मनाशः आत्यन्तिकः समूलो नेष्यते अविद्वदधिकारित्वादात्मानात्मपरमात्मस्वरूपयाथात्म्यमजानन् देहात्मत्वाभिमानादिरूपं पापमूलमज्ञानं बिभ्राणः प्रायश्चित्तेन पापं नाशयन्नपि अविद्वान् पापमूलमज्ञानं नैव नाशयति किन्तु पुनः पापं देहे आत्मत्वाभिमानेन गृहादौ ममत्वाभिमानेन परमात्मनि पुरुषविशेषत्वभ्रान्त्यापमानेन एवमाद्यज्ञानेन करोतीत्यर्थः अतो मुख्यं प्रायश्चित्तं विमर्शनमात्मानात्मपरमात्मज्ञानं न हि तत्त्ववित् परमानन्दप्राप्त्युपायं पुण्यादिकं हित्वा देहार्थं पापं करोत्यात्मानं नरके पातयितुं किन्तु कचिद्दैवाज्जातेऽपि पापे यथोक्तप्रायश्चित्तेन केवलेन हरिस्मरणेनापि तन्निराकृत्य निष्पापः यथोक्तमुक्त्युपायेन मुक्तो भवतीति भावः ॥ ११ ॥

इममर्थं दृष्टान्तेन स्फुटीकरोति । नाश्नत इति । नियमकृत् नियतमोक्षसाधनकर्त्ता क्षेमाय मोक्षाय ॥ १२ ॥

भाषा टीका ।

पृथिवी मण्डल की स्थितिभी भाग लक्षण प्रमाण से कहीही है ज्योतिर्गणों की पातालों की स्थिति जिस प्रकार परमेश्वर ने जगत् सृजा है सो सब आपने कहा है ॥ ५ ॥

हे महाभाग अब आप जिस प्रकार से अनेक उग्र दुःखों वाले नरकों को मनुष्य न जावै सो उपाय मेरे से कहिये ॥ ६ ॥

श्री शुकदेवजी बोले इहां पर जिन पापों के जैसे प्रायश्चित्त कहे हैं शास्त्र मे उन को जब नहीं करता है तब मन वचन कर्म से जो किये पाप हैं तिन के हेतु से जो मैंने तुम से कथन किये हैं बडे दण्ड के स्थान उन नरकों मे मरे पीछे वह अवश्य ही जाता है ॥ ७ ॥

तपसा ब्रह्मचर्येण शमेन च दमेन च ।
त्यागेन सत्यशौचाभ्यां यमेन नियमेन च ॥ १३ ॥
देहवाग्बुद्धिजं धीरा धर्मज्ञाः श्रद्धयान्विताः ।
क्षिपन्त्यघं महदपि वेणुगुल्ममिवानलः ॥ १४ ॥
केचित्केवलया भक्त्या वासुदेवपरायणाः ।
अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्करः ॥ १५ ॥
न तथा ह्यघवान् राजन् ! पूयेत तपआदिभिः ।
यथा कृष्णार्पितप्राणस्तत्पूरुषनिषेवया ॥ १६ ॥
सध्रीचीनो ह्ययं लोके पन्थाः क्षेमोऽकुतोभयः ।
सुशीलाः साधवो यत्र नारायणपरायणाः ॥ १७ ॥
प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखम् ।
न निष्पुनन्ति राजेन्द्र ! सुराकुम्भमिवापगाः ॥ १८ ॥
सकृन्मनः कृष्णपदारविन्दयोर्निवेशितं तद्गुणरागि यैरिह ।
न ते यमं पाशभृतश्च तद्भटान् स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः ॥ १९ ॥
अत्र चोदाहरन्तीममितिहासं पुरातनम् ।
दूतानां विष्णुयमयोः सम्वादस्तं निबोध मे ॥ २० ॥

भाषा टीका

तिस हेतु से मरने से पहिले शीघ्रही देह केवल रहते ही पापों के प्रायश्चित्त करने का यत्न करै तिस मे दोषों का गौरवलाघव देख कर प्रायश्चित्त करै जैसे कि रोगों के निदान को जानने वाला वैद्य रोग के अनुसार चिकित्सा करता है ॥ ८ ॥

राजा बोले पापके करनेसे राजादिकोंसे दण्डको देखतेहैं शास्त्रसे सुनतेहैं तब अपना अहित जानकरभी स्वभावके परवश होकर फिरपाप करतेहैं तो प्रायश्चित्त कैसे होसक्ताहै ॥ ९ ॥

यह मनुष्य कहींपर पापसे निवृत्त होजाताहै कहीं फिर वसा पापको करताहै तिससे प्रायश्चित्त तो हाथिके स्नानके तुल्य व्यर्थही मालूम पडताहै ॥ १० ॥

श्री शुकदेवजी बोले कर्म से कर्म का नाश कर करना तो अच्छी तरह से नहीं होता है क्योंकि केवल कर्मों से कर्मों का नाश करने का उपाय थोडे ज्ञानी के वास्ते कहा है ज्ञानी के वास्ते तो परमात्माके स्वरूपादि का ज्ञानही प्रायश्चित रूप होजाता है ॥ ११ ॥

जो पुरुष पथ्य पदार्थों को खाता है उसको रोग नहीं लगते हैं हे राजन् । इसी प्रकार शास्त्रोक्त नियमोंके करने वाला पुरुष कालान्तर में संसार रोग से छूटकर मोक्ष को प्राप्त होजाता है ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एतदेव विशदयति द्वाभ्याम् । तपसा ऐकाग्र्येण ।

"मनसश्चेन्द्रियाणां च ऐकाग्र्यं परमं तपः" ।

इति स्मृतेः ब्रह्मचर्येणाष्टाङ्गेन तदुक्तम् ।

स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रिया निर्वृत्तिरेव च ॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ।
विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम् ॥

इति । शमो मनसो नियमनं दमो बाह्येन्द्रियाणां त्यागो दानं यमोऽहिंसादिः नियमो जपादिः ॥ १३ ॥ १४ ॥

अस्यातिदुष्करत्वान्मुख्यमेवान्यत्प्रायश्चित्तमाह । केचिदित्यनेन । एवम्भूता भक्तिप्रधाना विरला इति दर्शयति । केवलया तपआदिनिरपेक्षया वासुदेवपरायणा इति नाधिकारिविशेषणमेतत्किन्त्वन्येषां श्रद्धया तत्राप्रवृत्तेरर्थात्तेष्वेव पर्यवसानादनुवादमात्रम् ॥ १५ ॥

एतच्च ज्ञानमार्गादपि श्रेष्ठमित्याह । न तथा पूयेत शुद्ध्येत् तत्पूरुषनिषेवया कृष्णेऽर्पिताः प्राणा येन ॥ १६ ॥

तत्र हेतुः सध्रीचीनः समीचीनः अयं पन्था भक्तिमार्गः यतः क्षेमः क्षेमत्वे हेतुः न कुतश्चिद्विघ्नादेर्भयं यस्मिन् तदेवाह । सुशीलाः कृपालवः साधवो निष्कामाः यत्र यस्मिन्मार्गे धर्मनिष्ठाः अतो न ज्ञानमार्ग इवासहायतानिमित्तं भयं नापि कर्ममार्गवन्मत्सरादियुक्तेभ्यो भयमिति भावः ॥ १७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भक्तेरन्यनिरपेक्षत्वमुक्तं कृच्छ्रादीनि तु भक्तिं विना न शोधयन्तीत्याह । प्रायश्चित्तानीति । महतामप्यशोधकत्वे दृष्टान्तमाह । सुराकुम्भमापगा नद्य इवेति ॥ १८ ॥

भक्तिः स्वल्पापि पुनात्येवेत्याह । सकृदिति । तस्य गुणेषु रागमात्रमस्ति न तु ज्ञानं यस्य तन्मनः तावतैव चीर्णं निष्कृतं प्रायश्चित्तं यैः ॥ १९ ॥

इममर्थमितिहासेनोपपादयति । अत्र चेति मे मत्तः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तावत्तपआदिभिर्नियमैर्वेदनोत्पत्तिप्रतिबन्धकदुरितनिवृत्तिः ततो वेदनस्य निष्पत्तिस्ततो ब्रह्मप्राप्तिप्रतिबन्धकपूर्वोत्तराघाविवेदनाशाश्लेषौ ततो ब्रह्मप्राप्तिस्ततः क्षेम इति नियमान् दर्शयन् तेषां वेदनोत्पत्तिप्रतिबन्धकदुरितनिवर्तकत्वमाह । तपसेति द्वाभ्याम् । तपसानशनादिना "तपसानाशकेन" इति श्रुतेः अनाशकेनेत्यत्यशननिषेधः न तु सुतरामशननिषेधः तथा सति देहधारणासम्भवेनोपासनानिष्पादात् तथा चोक्तं भगवता "युक्ताहारविहारस्य" इति ब्रह्मचर्येण ऋतुवितरकालिकस्त्रीसङ्गादिराहित्येन शमेनान्तरिन्द्रियनिग्रहेण दमेन बाह्येन्द्रियनिग्रहेण त्यागेन सत्पात्रदानेन सत्यशौचाभ्यां सत्यभूतहितकारित्वमनृतावदनं च शौचं सदाचारः यमः कामानभिष्वङ्गः नियमः वर्णाश्रमधर्मः पञ्चमहायज्ञादिस्तेन ॥ १३ ॥

एभिः धीराः शीतोष्णसुखदुःखादिद्वन्द्वसहनशीलाः धर्मज्ञाः निरतिशयसुखसाधनोपासनात्मकधर्मप्रतिपादकशास्त्रजन्यज्ञानवन्तः श्रद्धया स्वचिकीर्षितविषयकत्वरया युक्ताः सन्तः देहवाग्बुद्धिजं करणत्रयजं महदप्यघं वेदनोत्पत्तिप्रतिबन्धकमनलोऽग्निर्वेणुगुल्ममिव क्षपयन्त्यपनुदन्ति एवं तपआदिभिर्वेदनोत्पत्तिप्रतिबन्धकेऽघे निरस्ते तत उत्पन्नया वेदनया ब्रह्मप्राप्तिप्रतिबन्धकमघं निरस्यन्तीत्याह । केचिदिति । "मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये" इत्युक्तरीत्योक्तविद्याधिकारिणां दुर्लभत्वाभिप्रायेण केचिदित्युक्तम् ॥ १४ ॥

ये केचिद्वासुदेवः परमयनं प्राप्यं प्राप्तिसाधनमाधारश्च येषां तादृशाः सन्तः तपआदिभिर्निष्पन्नया केवलया भक्त्योपासनात्मकवेदनया कार्त्स्न्येनाघं वासुदेवप्राप्तिप्रतिबन्धकं भास्करः सूर्यो नीहारं तुहिनमिव धुन्वन्ति निरस्यन्ति केवलयेत्यनेन भक्तेरुत्पत्तौ तपआद्यपेक्षा तपआदिभिरुत्पन्ना भक्तिरेकैव पापं क्षपयतीत्यभिप्रेतम् ॥ १५ ॥

कार्त्स्न्येन धुन्वन्तीत्येतदेव प्रतिपादयति । न तथेति । हे राजन् ! अघवान्पापी तपआदिभिः कृच्छ्रचान्द्रायणादिभिः प्रायश्चित्तैस्तथा न पूयेत न शुद्ध्येत् कथं यथा कृष्णे भगवत्यर्पितः समर्पितः प्राणः जीवात्मा येन तादृशः "ओमित्यात्मानं युञ्जीत" इति श्रुत्युक्तरीत्या भगवच्चरणारविन्दयोः संन्यस्तात्मस्वरूप इत्यर्थः तत्पूरुषाणां भागवतानां निषेवया यथा पूयेत तथा कृष्णार्पितप्राणः कार्त्स्न्येनाघं धुन्वन् पूयेत अघवांस्तपआदिभिस्तु न कार्त्स्न्येन पूयेतेत्यर्थः ॥ १६ ॥

उक्तं निःशेषदुरितक्षपणसमर्थं भगवद्भक्तियोगं विशिनष्टि सध्रीचीन इति । लोके श्रेयःसाधनत्वेन विचार्यमाणे उपायसमुदायेऽयं भगवद्भक्तिरूपः पन्था उपायः सध्रीचीनः समीचीनः कुतः हि यतोऽकुतोभयः कुतश्चिदपि भयरहितः क्षेमः आनन्दो मोक्षात्मको भवति अत एव शोभनाचाराः साधवो नारायणपरायणाः सन्तो अत्र भगवद्भक्त्यात्मके पथि वर्त्तन्त इति शेषः अत्र वासुदेवपरायणा नारायणपरायणा इत्यनयोर्मध्यपठितेन कृष्णार्पितप्राणा इत्यनेनात्मसमर्पणपूर्वकं भगवत्येवोपायोपेयभावानुसन्धानमेव वासुदेवपरायणत्वमिति सूच्यते एवं च न्यासयोगोऽपि निरतिशयक्षेमकृत् इति सूचितं स च स्वतो वा भक्त्यङ्गतया वेत्यन्यत् ॥ १७ ॥

एवं नानाविधानन्तदुःखावहनरकप्राप्तिनिमित्तदुरितनिरसनोपायो भगवद्भक्तियोग एवेत्यभिप्रायः अथ प्रायश्चित्तान्यपि भगवत्पराङ्मुखं न निष्पुनन्तीत्याह । प्रायश्चित्तानीति । चीर्णान्यनुष्ठितानि प्रायश्चित्तानि नारायणपराङ्मुखं कदाचिन्नारायणमस्मरन्तं न निष्पुनन्ति न पवित्रयन्ति यथा सुरया पूर्णभाण्डमापगा गङ्गाजलानि तद्वन्नारायणस्मरणगर्भाण्येव प्रायश्चित्तानि चीर्णानि पुनन्ति न केवलानीति भावः ॥ १८ ॥

एवम् "अधुनैव महाभाग ! यथैव नरकान्नरः" इति प्रश्नस्य परिहार उक्तो भवतीत्याह । सकृदिति । यैर्नरैरिह लोके तस्य भगवतो गुणेषु रागि आसक्तं मनः कृष्णपदारविन्दयोः सकृन्निवेशितं ते नराः यमं पाशधारिणो यमभटांश्च स्वप्नेऽपि न पश्यन्ति कुतः हि यस्मात् ते चीर्णनिष्कृताः निष्कृतिर्निष्कृतं भावे क्तः चीर्णं कृतं निष्कृतं सकृत् कृष्णपदारविन्दयोः मनो निवेशनरूपं यैस्तादृशाः सकृन्निवेशितमित्यनेनायमर्थोऽभिप्रेतः निष्पन्नभगवद्भक्तियोगानां निरयप्राप्तिनिमित्तसमस्तवृजिनविधूननेन नित्यनिरतिशयानन्दरूपभगवत्प्राप्तिरिति किमु वक्तव्यं यतस्तद्गुणश्रवणनामस्मरणाद्यन्यतमेनापि मनस्तच्चरणनिवेशनरूपो भक्तियोगारम्भ एव सुतरां यमवश्यतापरिहारक इति तथा चोक्तं भगवता ।

> नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
> स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥
> न हि कल्याणकृत्कश्चिद्दुर्गतिं तात ! गच्छति ।

इत्यादि च ॥ १९ ॥

अथ भक्तियोगारम्भस्यापि कैमुत्यन्यायेन दुरितनिवर्तकतां शनैर्मुक्त्युपायतां च वक्तुमन्यापदेशेनापि स्मृतस्य भगवन्नाम्नो भक्तियोगारम्भविरोधिदुरितनिवर्तकत्वे दृष्टान्ततयेतिहासं प्रस्तोष्यन् प्रतिजानीते । अत्रेति । आस्तां तावन्निष्पन्नभक्तियोगस्यारब्धभक्तियोगस्य वा न यमवश्यतेत्यन्यापदेशेन नामोच्चारणस्य यमवश्यतापरिहारकत्वं भक्तियोगारम्भकारणत्वञ्चेत्यत्रैव पुरातनमितिहासमुदाहरन्ति दृष्टान्तत्वेन कथयन्ति इतिहासं विशिनष्टि । दूतानामिति । विष्णुयमयोर्ये दूतास्तेषां सम्वादरूपमितिहासं मे कथयतो मत्तो निबोध शृणु ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ज्ञानेन तपआदिप्रायश्चित्तकर्मणा महदघं क्षपयन्तीत्यन्वयः ॥ १३ ॥ १४ ॥

दुर्बलकायादिमतां तपआद्याचरणाशक्तानां केन पापक्षयः स्यादिति तत्राह । केचिदिति ॥ १५ ॥

इदमशक्ताधिकारिकश्रेष्ठिकष्टं किं न किन्तु ततोऽप्युत्तममिति

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आवेनाह । न तथेति । कृष्णे अर्पिताः प्राणाः श्रोत्रादयो यस्य स तथा कृष्णार्पितप्राणत्वं केन स्यादत्राह । तत्पूरुषेति । तस्य कृष्णस्य पुरुषाः तेषां निषेवया "भक्त्या त्वनन्यया शक्यः" इत्यादिप्रसिद्धिं हिशब्देन दर्शयति ॥ १६ ॥

अत्र त्रिषु दुष्कृतपरिहारमार्गेषु भक्तिमार्गस्यैव प्राधान्यमित्याह । सध्रीचीन इति । लोके प्रायश्चित्तलक्षणसाधनसमूहे आनन्दरूपत्वात्क्षेम इत्युच्यते । तत्राधिकारिण आह । सुशीला इति ॥ १७ ॥

तपआदीनामपि भक्त्योपचितबलानां पापनिर्हरणहेतुत्वं न केवलानामित्यतोऽपि भक्तेरेव प्राधान्यमित्याह । प्रायश्चित्तानीति १८

ननु केवलभक्त्या पापनिर्हरणप्रकारः कथमत्राह । सकृदिति । पापनिर्हरणं तपआदाविव चिरसाध्यं न भवति किन्तु क्षिप्रसाध्यमित्यतो वा भक्तेः प्राधान्यमित्याह । सकृदिति । कृतपापानुतापपूर्वकं श्रीकृष्णाङ्घ्रिपद्मे सकृन्मनोनिवेशनेन चीर्णनिष्कृताः कृतप्रायश्चित्ताः ॥ १९ ॥

नन्वेवं वैदिकानामस्तु अवैदिकानां स्त्रीशूद्रादीनां पापप्रायश्चित्तं कथं स्यादित्याशङ्क्य भक्त्या तेषां नामसङ्कीर्तनेन दुष्कृतनिष्कृतिः स्यादितीममर्थमितिहासेन दर्शयति । अत्रेति । भक्त्या भगवन्नामसङ्कीर्तनादपि दुष्कर्मनाशः स्यात्किमु वक्तव्यं निरन्तरमेकमनस्कत्वेन श्रीहरिचरणस्मरणादिनेत्यतो वेममर्थमाख्यायिकया दर्शयति । अत्रेति । अत्र वैदिकानामवैदिकानामपि भक्त्या नामसङ्कीर्तनादघक्षये (१) एवकारेणायोगं व्यवच्छिनत्ति न त्वन्ययोगं तथात्वे पूर्वोक्ता व्यर्थाः स्युरित्यर्थः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

स्वमतमाह । केचिदित्यादिना । तृतीयाध्यायं यावत् । अत्र भक्तिर्द्विविधा । सन्तता कादाचित्की च तत्राद्या द्विविधा आसक्तिमात्रयुक्ता रागमयी च । अन्त्या तु त्रिधा रागाभासमयी तच्छून्यस्वरूपभूता आभासभूता च तत्राभासभूताया अपि सर्वोत्तमप्रायश्चित्तत्वं दर्शयितुं रागमय्याः कैमुत्यबोधकमासक्तिमय्या माहात्म्यमाह । केचिदिति । कार्त्स्न्येन वासनया सहेत्यर्थः भास्करदृष्टान्तेन स्वाभाविक्या भाःस्थानीयया भक्त्या नीहारस्थानीयस्यागन्तुकस्य स्पृष्टमात्रकस्य चाघसङ्घस्यानुषङ्गिकतयैव सद्यो निःशेषधूननमिति ज्ञापितम् ॥ १५—१७ ॥

प्रायश्चित्तानीति निश्चितं न पुनन्ति ॥ १८ ॥

अथ रागाभासमय्यास्ततोऽप्युत्तमत्वमाह । सकृदिति । रागोऽत्र तत्राभासः , सकृच्छब्दप्रयोगात् साक्षाद्गतौ सत्यामसकृदेव तन्निवेशः स्यात् "दधति सकृन्मनस्त्वयि य आत्मनि नित्यसुखे न पुनरुपासते पुरुषसारहरावसथान्" इति श्रुतिस्तुतेः अत एव टीकायां तस्य गुणेषु रागमात्रमस्ति न तु ज्ञानमित्युक्तं रागमात्रं यत्किञ्चिद्रागः ज्ञानञ्च याथार्थ्येनानुभव इति अन्येषां पूर्वेभ्यः उत्तमत्वं भक्तभक्त्याभाससद्भावेन यमादीनां तद्दृष्टिपथेऽपि गन्तुमशक्यत्वान्महाप्रभावरूपं दर्शितम् ॥ १९ ॥

अथ तत्र तत्र कैमुत्यं दर्शयितुमितिहासमुपक्षिपति । अत्रचेति ॥ २०—२३ ॥

(१) अत्रैवोदाहरन्तीति मूले इदम् ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एतदेव विशदयति द्वाभ्याम् । तपसा भोगराहित्येन ब्रह्मचर्येण स्त्रीप्रेक्षणादित्यागेन शमेन यथाशक्तिमनोनियमेन दमेन बाह्येन्द्रियनिग्रहेण त्यागेन दानेन यमेनाहिंसादिना नियमेन जपादिना ॥ १३ ॥ १४ ॥

अत्रापि वेणुगुल्मानलदृष्टान्तेन पुनरपि पापप्ररोहसूचनाद्प्रसन्नमनसं राजानं भक्तानां मतेनाह । केचिदिति । एते पुनर्विरलप्रचारा इति भावः । केवलया कर्मज्ञानादिरहितया सतोऽपि गुणीभूतान् कर्मज्ञानादीननपेक्षमाणया च अत्र कार्त्स्न्येन इति प्रयोगान्नीहारभास्करदृष्टान्तेन च पापनिर्मूलनं भक्त्यैव नान्यथेति सूचितम् ॥ १५ ॥

अत्रापि पापप्रशमने तुच्छ एव वस्तुनि भक्तिमहादेव्या विनियोगोऽनुचित इति भक्तिशास्त्रतात्पर्यविज्ञानां मतेन स्वाभिमतेनान्यमताक्षेपपूर्वकमाह । नेति । कृष्णार्पितप्राणा इति । पापकर्माणं मां समुचितशिक्षादण्डार्थं नरके पातयतु न पातयतु वा स एव मे गतिस्तस्यैवाहमित्यात्मन एव समर्पणेन नरकप्रतीकारमप्यकुर्वन् शुद्धभक्तिमानित्यर्थः कृष्णार्पितप्राणत्वं कथं स्यादित्यत आह । तत्पुरुषेति ॥ १६ ॥

न च ज्ञानयोगव्रताद्यसमर्थानामेव भक्तियोग इति वाच्यमित्याह । सध्रीचीनः हि निश्चितम् अयमेव सर्वतः श्रेष्ठः न कुतोऽपि विघ्नादेर्भयं यत्र सः सुशीलाः साधव इति ज्ञानमार्ग इव असहायतानिमित्तं भयं न नापि कर्ममार्गवन्मत्सरतादिहेतुकं भयमिति भावः ॥ १७ ॥

किञ्चान्वयव्यतिरेकाभ्यां भक्तिरेव पापप्रशमनी दृष्टा न ज्ञानकर्मादीत्याह । प्रायश्चित्तानीति । बहुवचनेन कर्मज्ञानमयानि सर्वाणीत्यर्थः नारायणपराङ्मुखं भक्तिभक्तोत्कर्षयोः श्रुतयोरपि तत्र श्रद्धाहीनं न पुनन्ति भक्तिस्तु ज्ञानकर्मादिहीनमपि पुनाति केवलया भक्त्येति पूर्वोक्तेः ॥ १८ ॥

नात्र भक्तिभूमाप्यपेक्षणीय इत्याह । सकृदपि किं पुनरसकृत् मनोऽपि किं पुनः श्रोत्रादि तच्च मनो गुणरागिविषयासक्तं किं पुनर्गुणरागरहितं स्वप्नेऽपि किं पुनः साक्षात्तावन्मात्रध्यानेनैवाचीर्णं निष्कृतं प्रायश्चित्तं यैस्ते अत्र सकृदित्यादिपदैः कस्यचिच्छुद्धभक्तस्य दैवात् पापानां पौनःपुन्येऽप्युत्खातदंष्ट्रोरगदंशानामिव तेषामकिञ्चित्करत्वात् कुञ्जरशौचवदाक्षेपविषयीभावोऽनुचित एव "अपि चेत् सुदुराचारो भजते माम्" इत्यादिवचनेभ्यः ॥ १९ ॥

अत्रार्थे एवेतिहासमुपक्षिपति । अत्रेति । यः सम्वादस्तं निबोध मे मत्तः ॥ २० ॥ २१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विस्तरेण प्रोक्तानि मन्वादिभिः प्रायश्चित्तानि संक्षेपतो दर्शयति । तपसेति द्वाभ्याम् । तपसा कृच्छ्रादिना ब्रह्मचर्येण आश्रमविशेषधर्माचरणेन शमेन देवताध्यानेन दमेनेन्द्रियनिग्रहेण त्यागेन दानेन सत्येन पापप्रख्यापनवाक्येन शौचेन गङ्गास्नानादिना यमेन अहिंसादिना नियमेन जपादिना ॥ १३ ॥ १४ ॥

कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः ।
नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः ॥ २१ ॥
बन्द्यक्षकैतवैश्चौर्यैर्गर्हितां वृत्तिमास्थितः ।
बिभ्रत्कुटुम्बमशुचिर्यातयामास देहिनः ॥ २२ ॥
एवं निवसतस्तस्य लालयानस्य तत्सुतान् ।
कालोऽत्यगान्महान्राजन्नष्टाशीत्यायुषः समाः ॥ २३ ॥
तस्य प्रवयसः पुत्रा दश तेषां तु योऽवमः ।
बालो नारायणो नाम्ना पित्रोश्च दयितो भृशम् ॥ २४ ॥
स बद्धहृदयस्तस्मिन्नर्भके कलभाषिणि ।
निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशम् ॥ २५ ॥
भुञ्जानः प्रपिबन् खादन् बालकस्नेहयन्त्रितः ।
भोजयन् पाययन्मूढो न वेदागतमन्तकम् ॥ २६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उक्तप्रायश्चित्तस्य दुष्करत्वात् वेणुगुल्ममिवानल इत्यनेन भूयः पापप्ररोहद्योतनाद्वासुदेवप्रसादरूपवलहीनत्वाच्चादृढत्वं अन्वानो भगवान् बादरायणिः सुदृढं सर्वपुरुषार्थदं सर्वसाधनाङ्गीभूतं सर्वशास्त्रसारं सर्वदुरितघ्नं श्रीकृष्णभजनमाह । केचिदित्यादिना । केचिदित्यनेन अभाग्यैः लौकिकैरज्ञातप्रभावा इति ज्ञापितं वासुदेवः परमुत्कृष्टमयनमाश्रयो येषां ते केवलया पुरुषार्थसाधने स्वतन्त्रया ॥ १५ ॥

अघवांस्तस्य श्रीकृष्णस्य पुरुषाणां निषेवया हेतुभूतया कृष्णार्पितप्राणः कृष्णेऽर्पितः प्राणः इन्द्रियगणः प्राणोपलक्षित आत्मा च येन सः श्रीकृष्णभजनपरः सन् यथा पूयेत शुध्येत् तथा तपआदिभिर्न पूयेत श्रीकृष्णपराङ्मुखत्वात् ॥ १६ ॥

अयं पन्थाः श्रीकृष्णभजनमार्गः सध्रीचीनः समीचीनः।१७।१८
चीर्णं सम्पादितं निष्कृतं प्रायश्चित्तं येस्ते ॥ १९ ॥

विष्णुयमयोर्दूतानां यः सम्वादस्तदात्मकमितिहासमुदाहरन्ति तन्मे मत्तः शृणु ॥ २० ॥

भाषा टीका ।

तप ब्रह्मचर्य शम दम त्याग सत्य बाहिर भीतर का शौच अहिंसादि यम जपादि नियम इनों के करने से श्रद्धा युक्त धर्मज्ञ धीर पुरुष मन वचन कर्म के वडे पाप को भी जैसे अग्नि वांसके पेडों को जलाता है तैसे नाश कर देते हैं ॥ १३ ॥ १४ ॥

कोई वासुदेव के भक्त पुरुष तो केवल भगवद्भक्तिमात्र से जैसे सूर्य कुहडी का नाश करै तैसे संपूर्ण पाप को नाश करदेते हैं ॥ १५ ॥

हे राजन् ! तपआदिकों से पापी पुरुष वैसा पवित्र नहीं होता है जैसा कि श्रीकृष्ण चरण कमल में मन लगाकर भगवद्भक्तों का सेवा करने वाला पवित्र होता है ॥ १६ ॥

इस लोक में यही एक सुन्दर सर्वत्र निर्भय मार्ग है जिस भक्तिमार्ग में नारायण परायण सुशील साधुजन चलते हैं ॥ १७ ॥

हे राजेन्द्र ! अच्छे किये प्रायश्चित्त भी नारायण से विमुख पुरुष को पवित्र नहीं करसकते हैं जैसे कि नदी एक भी मदिरा के घडे को नहीं पवित्र करसक्ती हैं ॥ १८ ॥

जिन पुरुषोंने भगवान् के गुणोंके अनुरागयुक्त मनको एक वखतभी श्रीकृष्णचरणारविन्दमें लगायाहै उनके सवप्रायश्चित्त होचुके वे पुरुष स्वप्नमेंभी यमके पुरुषोंको अथवा यमराज को नहीं देखतेहैं ॥ १९ ॥

इसी विषयमें एक प्राचीन इतिहासको कहते हैं जिसमें श्रीविष्णुदूत तथा यमदूत इनों का सम्वाद है तिसको तुम मेरे से श्रवण करो ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कान्यकुब्जे पुरे दास्याः पतिः नाम्ना अजामिलः ॥ २१ ॥

बन्दीग्रहेणाक्षैश्च द्यूतेन कैतवैर्वञ्चनादिभिश्च वृत्तिं जीविकां बिभ्रत् पुष्णन् यातयामास पीडयामास ॥ २२ ॥

आयुषः सम्बन्धी महान् कालोऽत्यगात् । सत्क्रियानित्यपेक्षायामाह । अष्टाशीत्या सङ्ख्यया युक्ताः समाः सम्वत्सराः ॥ २३ ॥

प्रवयसो वृद्धस्य ॥ २४ ॥

बद्धं हृदयं येन जरठो वृद्धः ॥ २५ ॥

एतच्च तदुपलालनादि श्रीनारायणनामोच्चारणमाहात्म्येन तद्भक्तिरेवाभूदिति सिद्धान्तोपयोगित्वेनापि द्रष्टव्यम् ॥ २६ ॥ २७ ॥

स एवं वर्त्तमानोऽज्ञो मृत्युकाल उपस्थिते ।
मतिं चकार तनये बाले नारायणाह्वये ॥ २७ ॥
स पाशहस्तांस्त्रीन् दृष्ट्वा पुरुषान् भृशदारुणान् ।
वक्रतुण्डानूर्ध्वरोम्ण आत्मानं नेतुमागतान् ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

वक्राणि तुण्डानि मुखानि येषामूर्ध्वानि रोमाणि येषां तान् ॥२८॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

प्रतिज्ञातमितिहासमाह । कान्यकुब्ज इत्यादिना । कान्यकुब्जाख्ये जनपदे कश्चिन्नाम्नाजामिल इतिप्रसिद्धो द्विजः दास्याः शूद्र्याः पतिरासीदिति शेषः स च नष्टः सदाचारः स्ववर्णाश्रमधर्मो यस्य तादृशस्तत्र हेतुर्दास्याः संसर्गेण दूषितः पतितः ॥ २१ ॥

गर्हितामार्गैर्गर्हितां वृत्तिमाश्रितो वन्यचौर्मोषाबन्धनपूर्वकैर्द्यूतैः कैतवैः शाठचैश्च कुटुम्बं बिभ्रन्नित्यमशुचिः यदा वन्यचौरादिभिः कुटुम्बस्यानिर्वाहस्तदा देहिनः प्राणिनो यातयामास पक्षिमृगान् हिंसितवानित्यर्थः ॥ २२ ॥

एवं निवसतो जीवतस्तस्य दास्याः सुतान् स्वोत्पादितान् लालयानस्य लालनं कुर्वतः हे महाराजन् ! समासान्तविधेरनित्यत्वात् "राजाह" इतिटजभावः कालः अभ्यगादतिक्रान्तः कियान् कालोऽतिक्रान्तस्तत्राह । अष्टाशीति । परिमिता आयुषः सम्बन्धिन्यः समाः सम्वत्सराः ॥ २३ ॥

तस्य प्रवयसः वार्द्धकययुक्तस्य दश पुत्राः स्थितास्तेषां मध्येऽवमः कनीयान् बाल एव स्थितः स च नाम्ना नारायण इति प्रसिद्धः प्रवयसः पुत्रोत्पत्तिकथनमपि पापातिशयज्ञापनार्थं "दास्यां चैव प्रसूतस्य निष्कृतिर्न विधीयते" इति स्मरणात् स नारायणाख्यः पित्रोर्मातापित्रोर्भृशं नितरां दयितः प्रियः ॥ २४॥

स द्विजस्तस्मिन्नर्भे नारायणनाम्नि कलभाषिणि अव्यक्तमधुरभाषिणि बद्धहृदयः आसक्तचित्तः तस्यार्भकस्य लीलां चेष्टां निरीक्षमाणः जरठः जीर्णः भृशं मुमुदे हृष्टवान् ॥ २५ ॥

स्वयम्भुञ्जानो बालकमपि तत्स्नेहपरवशो भोजयन् स्वयंपिबंस्तमपि पाययन्मूढोऽज्ञः सन्नागतं प्राप्तं मृत्युं न वेद ॥ २६ ॥

एवं वर्त्तमानः स द्विजः मृत्युकाले उपस्थिते सत्यज्ञो नारायणाख्ये पुत्र एव मतिं चकार मतिमासक्तामकरोदित्यर्थः ॥ २७ ॥

सोऽजामिलस्त्रीन्पुरुषान् दृष्ट्वाकुलेन्द्रियः व्याकुलचित्तः दूरे क्रीडासक्तं नारायणाह्वयं पुत्रं प्लावितेन प्लुतस्वं नीतेन प्लुतीकृतेनेति यावत् स्वरेणोच्चैराजुहाव नारायणेत्याहूतवान् कथम्भूतान् पुरुषान् पाशो हस्ते येषां भृशदारुणानत्युग्ररूपान् वक्राणि कुटिलानि तुण्डानि मुखानि येषाम् ऊर्ध्वमुखानि रोमाणि येषां ज्ञानात्मानं यमालयं प्रति नेतुमागतान् ॥ २८ ॥ २९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अजया प्रकृत्या ज्ञानस्य मीलो मीलनं तिरोभावो यस्य स तथा पश्चादजाद्धरेः पूर्वपुण्यसम्पन्नज्ञानस्यामील उन्मीलनं यस्य स तथेत्युभयथा वाजामिलत्वं युक्तं ह्रस्वत्वं छान्दसं सन् समीचीन आचारः सदाचारः (१) ॥ २१ ॥

बन्दिग्रहणैरक्षैर्देवनैः "कितवः स्यादनृतवादी कैतवं तस्य भाषणम्" इत्यभिधानात् असत्यव्यवहारैश्चौर्यैः परस्वापहरणलक्षणव्यापारैः वृत्तिं वर्तनं जीवनोपायं देहिनं यातयामास नरकगमनाभिमुखमकरोत् शरीरयाप्यायुक्तमकृतेति वा ॥ २२ ॥

अष्टाशीत्यायुषो याः समाः ये सम्वत्सराः तत्परिमाणलक्षणः कालः ॥ २३ ॥

अवमः कनिष्ठः ॥ २४ । २५ ॥

अन्तकं मृत्युम् ॥ २६ ॥

मृत्युकाले देहवियोगलक्षणकाले मृत्योः सर्वदोषापहरस्य हरेरनुग्रहात् काले दत्तज्ञानलक्षणे उपस्थिते हृदि प्रकाशिते (२) तनये पूर्णज्ञाने बाले पञ्चवर्षकल्पे प्रादेशमात्रे नारायणाह्वये मूर्तिविशेषे मतिं स्मरणसमर्थं चित्तं चकार भक्त्याऽस्मरदित्यर्थः अजामिलोऽपि स्मरणाद्भक्त्या मृत्योर्मुच्यतेत्येतद्वाक्यमशेषाघहरं विदुरित्यत्र प्रमाणत्वेन वक्ष्यमाणमत्राप्यनुसन्धेयमिति ज्ञातव्यम् ॥ २७ ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पित्रोश्च दयित इति मातुरपि कृतार्थत्वमुक्तम् ॥ २४—३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

बन्दीश्रृङ्खलितजनता तया तदाकर्षणेनेत्यर्थः । अक्षैश्च द्यूतेन कैतवैर्वञ्चनादिभिश्च वृत्तिं जीविकां यातयामास पीडयामास ॥२२॥

आयुषः सम्बन्धी महान् कालोऽत्यगात् स कियानित्यपेक्षायामाह । अष्टाशीत्या सङ्ख्यया युक्ताः समाः सम्वत्सराः ॥ २३ ॥

प्रवयसो वृद्धस्य ॥ २४ ॥

जरठो वृद्धः ॥ २५ ॥

खादन् चर्वयन् ॥ २६ ॥

(१) यत्र च ब्राह्मणाभासा मानवा मत्स्यहारिणः ।
तमध्येर्निकटं देशं कान्यकुब्जंवदन्ति हि ।

२ तनुविस्तारे । येतिज्ञानं समुद्दिष्टमिति धातुप्रमाणाच्चायमर्थः सूचितः ।

दूरे क्रीडनकासक्तं पुत्रं नारायणाह्वयम् ।
प्लावितेन स्वरेणोच्चैराजुहावाकुलेन्द्रियः ॥ २९ ॥
निशम्य म्रियमाणस्य ब्रुवतो हरिकीर्त्तनम् ।
भर्तुर्नाम महाराज ! पार्षदाः सहसापतन् ॥ ३० ॥
विकर्षतोऽन्तर्हृदयाद्दासीपतिमजामिलम् ।
यमप्रेष्यान्विष्णुदूता वारयामासुरोजसा ॥ ३१ ॥
ऊचुर्निषेधितास्तांस्ते वैवस्वतपुरःसराः ।
के यूयं प्रतिषेद्धारो धर्मराजस्य शासनम् ॥ ३२ ॥
कस्य वा कुत आयाताः कस्मादस्य निषेधथ ।
किं देवा उपदेवा वा यूयं किं सिद्धसत्तमाः ॥ ३३ ॥
सर्वे पद्मपलाशाक्षाः पीतकौशेयवाससः ।
किरीटिनः कुण्डलिनो लसत्पुष्करमालिनः ॥ ३४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एतच्च तत्पुत्रलालनादि श्रीनारायणनामोच्चारणमाहात्म्येन सद्भक्तिरेवाभूदिति सिद्धान्तोपयोगित्वेन द्रष्टव्यमिति श्रीस्वामिचरणाः ॥ २७ ॥

त्रीनिति । अजामिलेन कृतानामनन्तानामपि पापानां कायिकवाचिकमानसत्वेन त्रैविध्यात्त्रय एव याम्या आगताः नारायणनाम्नश्चतुरक्षरत्वाच्चत्वारो विष्णुपार्षदा आगता इति ज्ञेयम् । ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

कान्यकुब्जे पुरे ॥ २१ ॥

बन्दीग्राहिनिग्रहक्रिया तथा अक्षैश्च द्यूतेन कैतवैर्वञ्चनादिभिश्च गर्हितां वृत्तिं जीविकामास्थितः आश्रितः कुटुम्बं बिभ्रद्देहिनः यातयामास यतोऽशुचिः अतो दास्याः संसर्गदूषितः ॥ २२ ॥

तस्य दास्याः सुतान् लालयतः आयुषः सम्बन्धी महान् कालः अत्यगात् तमेवाह । अष्टाशीत्या सङ्ख्यया युक्ताः समाः सम्वत्सराः ॥ २३ ॥

तस्याजामिलस्य प्रवयसो वृद्धस्य अवमः कनिष्ठः ॥ २४ ॥

कलभाषिणि मधुरभाषिणि बद्धं हृदयं येन सः जरठो वृद्धः ॥ २५—२८ ॥

भाषा टीका ।

कान्यकुब्ज नाम के नगर में दासी का पति कोई अजामिल नाम का ब्राह्मण था वह दासी के सङ्ग से दुष्ट हो गया था उसके सदाचार सब नष्ट होगये थे ॥ २१ ॥

जुआ खेलने वाले कपटी बंदी चौर इन्होंके साथ खोटी वृत्तिको करता था अपवित्र होकर कुटुंब के पोषण करने के वास्ते सब प्राणियों को पीडा देता था ॥ २२ ॥

हे राजन् ! इस प्रकार से अपनी दासीके पुत्रों के लाड करके निवास करते हुये उसके बडा भारी काल बीत गया अठासी वर्ष बीत गये ॥ २३ ॥

उस वृद्ध के दश पुत्र थे उनके मध्य में जो छोटा था उस बालक का नारायण नाम था वह माता पिता दोनों का बडा प्यारा था ॥ २४ ॥

मधुर वचन बोलने वाले उस बालक के ऊपर उसका मन बंधा था उसकी लीला को देखकर वह वृद्ध बहुत खुसी होता था ॥ २५ ॥

बालक के स्नेह मे बन्ध कर खाते पीते समय में उस को भी खवावे पिवावे इस प्रकार से उस मूर्खने आवते हुये काल को नहीं जाना ॥ २६ ॥

वह अज्ञानी इस प्रकार वर्तमान होकर रहा था इतने में मृत्यु काल उपस्थित होगया तब नारायण नाम के बालक में उसने मन लगाया ॥ २७ ॥

उसने पाशों को हाथ में लिये हुये बडे कठोर टेढे मुख वाले ऊपर को खड़े रामों वाले अपने लेनेको आये हुये तीन पुरुषों को देखा ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्लावितेन प्लुतत्वं नीतेन ॥ २९ ॥

हरिकीर्तनं निशम्यापतन् । यतस्तद्भर्तुर्नाम ॥ ३० ॥ ३१ ॥

पुरःसरा भृत्याः ॥ ३२ ॥

सर्वे च नूत्नवयसः सर्वे चारुचतुर्भुजाः ।
धनुर्निषङ्गासिगदाशङ्खचक्राम्बुजश्रियः ॥ ३५ ॥
दिशो वितिमिरालोकाः कुर्वन्तः स्वेन रोचिषा ।
किमर्थं धर्मपालस्य किङ्करान्नो निषेधथ ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अस्य नयनं निषेधथ ॥ ३३ ॥

वयं युष्मान्न जानीम इति न कोपः कार्यो यतोऽलौकिकाद्भुतरूपा यूयमित्याहुः । सर्वे इति सार्धाभ्याम् । लसन्त्यः पुष्करमालाः सन्ति येषाम् ॥ ३४ ॥

नूत्नं नवं वयो येषां निषङ्ग इषुधिः धनुर्निषङ्गादिभिः श्रीः शोभा येषां ते ॥ ३५ ॥

विगतं तिमिरमालोकश्चान्यस्य प्रकाशो यासु तथाभूता दिशः कुर्वन्तः भवतामेतदनुचितमित्याहुः । किमर्थमिति ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

म्रियमाणस्य मर्त्तुमुद्यतस्य मुखेन यद्धरिः कीर्त्यते येन तद्धरिकीर्त्तनम् इति नामविशेषणं तन्निशम्य श्रुत्वा हे महाराज ! भर्तुर्भगवतः पार्षदाः सहसा त्वरया अभ्यपतन्नाजग्मुर्हि ॥ ३० ॥

तेऽभिपतिता विष्णुदूता ओजसा बलात्कारेण दासीपतिमजामिलमन्तर्हृदयान्निकर्षतः यमप्रेष्यान् वारयामासुः ॥ ३१ ॥

एवं निषेधितास्ते वैवस्वतस्य यमस्य पुरःसराः भृत्याः ऊचुः उक्तिमेवाह । क इति । धर्मराजस्य यमस्य शासनमाज्ञां प्रतिषेद्धारो यूयं के ॥ ३२ ॥

कस्य वा सम्बन्धिनः कस्माल्लोकादागताः अस्य कस्माद्गुणलेशादेतोः धर्मराजस्य शासनं निषेधथ यूयं किं देवा उत उपदेवा गन्धर्वा अथवा सिद्धश्रेष्ठाः ॥ ३३ ॥

एवं पृष्ट्वा पुनस्तान् वर्णयन्तो यमशासनप्रतिषेधप्रयोजनं पृच्छन्ति । सर्वे इति त्रिभिः । सर्वे यूयं पद्मपलाशे इवाक्षिणी येषां पीतं कौशेयं कृमिकोशोत्थं वासो वस्त्रं येषां किरीटानि येषां सन्ति तथा कुण्डले येषां स्त इति तथा लसन्त्यः पुष्करमालाः कमलमाला येषां सन्तीति ॥ ३४ ॥

तथा सर्वे यूयं नूत्नं नवं वयः येषां ते चारवः सुन्दराश्चत्वारो भुजा येषां धनुरादीनां श्रीः शोभा येषां धनुरादिधरा इत्यर्थः तत्र निषङ्ग इषुधिरसिः खड्गः अम्बुजं कमलम् ॥ ३५ ॥

स्वेन रोचिषा दिशो वितिमिरालोका विगतं तिमिरं तमः यस्मात्स आलोकः प्रकाशो यासां तादृशीः दिशः कुर्वन्त इत्यर्थः धर्मराजस्य किङ्करानोऽस्मान् किमर्थं निषेधथ कस्मै प्रयोजनाय निषेधयेत्यर्थः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दूरे अण्डाद्बहिः स्थितं जगत्सर्जनादिलीलाविलासोपेतं पुंनाम्नो नरकात्त्रातारं नारायणनामानमुच्चैः प्लावितेन चतुरादिमात्रात्मना स्वरेण पूर्वाचरितपुण्यप्रचयेनोत्पन्नया भक्त्याकुलेन्द्रियः ॥ २९ ॥

हरेः कीर्तनं किं (१) गुणरूपं नेत्याह । भर्तुरिति । भर्तुः स्वामिनो नारायणेति नामरूपं दोषहरणशीलं कीर्तनं यस्य नाम्नस्तद्धरिकीर्तनं भर्तुर्नाम निशम्येति वा हरिरित्यक्षरद्वयं नारायणेत्यक्षरचतुष्टयमनेनोक्तमिति ज्ञापनायानन्वितत्वेनोक्तमिति वा अनेन पुत्रस्नेहमन्तरेण प्राचीनादृष्टबलादुद्भूतया भक्त्या भगवन्नामसङ्कीर्तनं कृतमिति ज्ञायते ॥ ३० ॥

ओजसाऽवष्टम्भेन बलेन वा "ओजोऽवष्टम्भबलयोः" इति यादवः ॥ ३१ ॥ ३२ ॥

निषेधथ अस्य नयनमिति शेषः ॥ ३३ ॥

नूत्नवयसः षोडशवर्षवयसः धनुरादिभिः श्रीर्येषां ते तथा ॥ ३४ ॥ ३५ ॥

वितिमिरालोका इत्यत्र वीत्युपसर्गः प्रत्येकमभिसम्बध्यते विगतानि तिमिराणि विगताः आलोकाः अन्यप्रकाशाश्च यासु दिक्षु तास्तथा निरस्तान्धकारान्यप्रकाशा इत्यर्थः ॥ ३६ ॥ ३७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्लावितेन प्लुतत्वं नीतेन ॥ २९ ॥

हरिकीर्त्तनं निशम्यापतन् कथम्भूतस्य भर्तुर्नाम ब्रुवतः ॥ ३० ॥

अजामिलमिमं वैष्णवं मा विकर्षथ रे मा विकर्षथ यदि जीवितुमिच्छथेति वारयामासुः ॥ ३१ ॥

पुरःसरा भृत्या अस्य नयनं निषेधथ ॥ ३२—३४ ॥

आकृत्या च यूयं परमशिष्टा एव लक्ष्यध्वे इत्याहुः । सर्वे इति ॥ ३५ ॥

विगतं तिमिरमालोकश्चान्यदीयो यासु ताः कर्मणा तु कथमशिष्टा इत्याहुः । किमर्थमिति ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्लावितेन दैन्याक्रान्तेन ॥ २९ ॥

पार्षदाः भर्तुर्नाम ब्रुवतः साङ्केत्यनामोच्चारणं कृतवतस्तदेव हरिकीर्त्तनं निशम्य ज्ञात्वा सहसा आपतन् ॥ ३० ॥

ओजसा बलात्कारेण वारयामासुः ॥ ३१ ॥

वैवस्वतस्य यमस्य पुरःसराः भृत्याः धर्म एव राजा धर्मराजः अस्याजामिलस्य नयनं कस्मान्निषेधथ ॥ ३२ ॥ ३३ ॥

(१) अप्रधानम् ।

॥ श्रीशुक उवाच ॥

इत्युक्ते यमदूतैस्तैर्वासुदेवोक्तकारिणः ।
तान् प्रत्यूचुः प्रहस्येदं मेघनिर्ह्रादया गिरा ॥ ३७ ॥

विष्णुदूता ऊचुः ॥

यूयं वै धर्मराजस्य यदि निर्देशकारिणः ।
ब्रूत धर्मस्य नस्तत्त्वं यच्च धर्मस्य लक्षणम् ॥ ३८ ॥
कथंस्विद्ध्रियते दण्डः किंवास्य स्थानमीप्सितम् ।
दण्ड्याः किं कारिणः सर्वे आहोस्वित्कतिचिन्नृणाम् ॥ ३९ ॥

यमदूता ऊचुः ॥

वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः ।
वेदो नारायणः साक्षात् स्वयम्भूरिति शुश्रुम ॥ ४० ॥
येन स्वधाम्न्यमी भावा रजःसत्त्वतमोमयाः ।
गुणनामक्रियारूपैर्विभाव्यन्ते यथातथम् ॥ ४१ ॥
सूर्योऽग्निः खं मरुद्गावः सोमः सन्ध्याऽहनी दिशः ।
कं कुः कालो धर्म इति ह्येते दैह्यस्य साक्षिणः ॥ ४२ ॥
एतैरधर्मो विज्ञातः स्थानं दण्डस्य युज्यते ।
सर्वे कर्मानुरोधेन दण्डमर्हन्ति कारिणः ॥ ४३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

लसन्त्यः पुष्करमालाः सन्ति येषां ते ॥ ३४ ॥

नूतनं वयो येषां ते निषङ्गः इषुधिः धनुर्निषङ्गादिभिः श्रीः शोभा येषां ते ॥ ३५ ॥

विगतः तिमिरं आलोक इतरप्रकाशश्च याभ्यस्ताः ॥ ३६-३७ ॥

भाषा टीका

सब उसकी इन्द्रियां व्याकुल होगईं तब दूर में खेल में आसक्त नारायण नामक पुत्रको बड़े ऊंचे स्वर से पुकारने लगा ॥ २९ ॥

हे महाराज ! मरते समय में हरिनाम लेते सुनकर अपने पति का नाम जानकर हरिकीर्तन मानकर शीघ्रही विष्णु के पार्षद आगये ॥ ३० ॥

शरीर हृदय के मध्य में से दासी के पति अजामिल को खैंचते हुये देखकर यमदूतों को विष्णुदूतों ने अपने तेज से निवारण किया ॥ ३१ ॥

निषेध करते मात्र यमराज के दूत उन विष्णुदूतों से बोलने लगे कि धर्मराज के आज्ञा को निषेध करने वाले तुम कौन हो ॥ ३२ ॥

किसके दूत हो कहां से आये हो क्यों इसका लेजाना निषेध करते हो क्या देव हो अथवा उपदेव हो क्या कोई सिद्धेश्वर हो ३३ ॥

आप सब कमल सरीके नेत्रों वाले हो पीत रेसम के वस्त्रधारण किये हो किरीट कुण्डल धारण किये हो प्रकाशमान कमलकी माला धारण किये हो ॥ ३४ ॥

सब नई अवस्था वाले हो सब सुंदर चार भुजों वाले हो धनुः तरकस तरवार गदा शंख चक्र कमल इनकी शोभा आपके हाथों में होरही है ॥ ३५ ॥

अपने तेजसे दिशों को अन्धकार रहित अधिक प्रकाश करते हो धर्मराजके किङ्कर हमलोगों को क्यों निषेध करते हो ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अहो दण्ड्यादण्ड्यादिज्ञानशून्या एते चोरा एवास्मद्विधा धर्मराजस्य किङ्करा इत्यनृतं वदन्तीति विस्मयेन प्रहस्य तान् प्रत्यूचुः मेघस्येव निर्ह्रादो ध्वनिर्यस्यास्तया ॥ ३७ ॥

तत्त्वं स्वरूपं लक्षणं प्रमाणम् ॥ ३८ ॥

कथंस्वित्केन प्रकारेण स्थानं विषयः कारिणः कर्मिणः नृणामिति नरा एव न पश्वादयः तेष्वपि कतिचिदेवेत्यर्थः ॥ ३९ ॥

वेदेन प्रणिहितो विहितो धर्मः वेदप्रमाणक इत्यर्थः अनेन

सम्भवन्ति हि भद्राणि विपरीतानि चानघाः !
कारिणां गुणसङ्गोऽस्ति देहवान्नह्यकर्मकृत् ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यो वेदप्रमाणकः स धर्मो यो धर्मः स वेदप्रमाणक इति स्वरूपं प्रमाणं चोक्तम् । यथाह जैमिनिः "चोदनालक्षणोऽर्थो धर्मः" इति व्याख्यातं च भट्टैः "द्वयमेकेन सूत्रेण श्रुत्यर्थाभ्यां निरूप्यते" इति अपृष्टस्याप्यधर्मस्य स्वरूपं लक्षणं च दण्डस्थानकथनायाहुः । तद्विपर्ययो यो वेदनिषिद्धः सोऽधर्मः निषेधश्च तस्मिन् प्रमाणमित्यर्थः वेदस्य प्रामाण्ये हेतुः वेदो नारायणादुद्भूतः स एव साक्षादित्युपचारः स्वयम्भूरिति च निःश्वासमात्रेण स्वयमेव भवतीति । तथा च श्रुतिः । "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेद" इति ॥ ४० ॥

कोऽसौ नारायणस्तत्राहुः । येन स्वधाम्नि स्वस्वरूपेऽमी भावाः प्राणिनो गुणाः शान्तत्वादयः नामानि ब्राह्मण इत्यादीनि क्रियाश्चाध्ययनाद्या रूपाणि वर्णाश्रमादयस्तैर्विभाव्यन्ते विविच्यन्ते यथातथं यथावत् स नारायणः ॥ ४१ ॥

तथाप्यधर्मोऽनेन कृतइति कुतो ज्ञायते तत्राहुः । सूर्य इति । अहनी अहश्च रात्रिश्च कमुदकं कुः पृथ्वी देहस्य जीवस्य यथाहुः

आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम् ॥
इति ॥ ४२ ॥

स्थानमाहुः । एतैर्निमित्तभूतैर्विज्ञातः दण्ड्यानाहुः । सर्वे इति ।४३। विपरीतान्यभद्राण्यपि कर्मिणां सम्भवन्ति यतस्तेषां गुणसङ्गोऽस्ति यदि कश्चिदकर्ता स्यात्तर्हि तस्याभद्राणि न स्युर्न त्वेतदस्तीत्याहुः । नहि देहवानकर्मकृदस्तीति अतः सर्वे कर्मिणः कर्मिणां च पापस्यावश्यंभावित्वात्ते सर्वे दण्डमर्हन्तीत्यर्थः ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमुक्ता विष्णुपार्षदा आहुरित्याह मुनिः । इत्युक्ता इतीत्थं यमदूतैरुक्तास्ते वासुदेवाज्ञाकारिणः पार्षदाः प्रहस्य तान् यमदूतान् प्रतीदं वक्ष्यमाणं गर्जितमेघवद्गम्भीरया गिरा वाण्योचुः ॥ ३७ ॥

उक्तिमेवाह । यूयमिति । धर्मराजस्येति हेतुगर्भं धर्म एव यमरूपेणावस्थित इत्यर्थः तस्य यदि यूयं निर्देशकारिणः शासनकारिणः तर्हि यूयमपि धर्माधर्मस्वरूपज्ञा भवेयुरतो धर्मस्य तत्त्वं याथात्म्यं यद्धर्मस्य लक्षणं स्वरूपं तच्च नोऽस्मभ्यं ब्रूथ । यद्वा । धर्मस्याधर्मस्य च तत्त्वं लक्षणं प्रमाणं चेत्यन्वयः ॥ ३८ ॥

तत्र दण्डनस्य प्रकारविषयादिकं पृच्छन्ति । कथं स्विदिति । दण्डः केन प्रकारेण क्रियते नित्यं दण्डस्य स्थानं विषयः किं स्थानमेव विकल्पयन्ति । दण्ड्या इति कारिणः । सर्वे नरा दण्ड्या आहोस्वित्कारिणां नृणां मध्ये कतिचिदेव ॥ ३९ ॥

एवमुक्ता यमदूता आहुः । वेदेत्यादिना । वेदेन प्रणिहितः कर्तव्यत्वेन बोधितो धर्मः अधर्मस्तु तद्विपर्ययः अकर्तव्यत्वेन बोधितः अनेन वेद एवायं धर्मोऽयमधर्म इत्यत्र प्रमाणमिति लक्षणमुक्तं वेदप्रणिहिततद्विपर्ययावेव धर्माधर्मयोः स्वरूपमिति चोक्तम् । ननु वेदस्यापि पौरुषेयत्वात्पुरुषस्य च भ्रमविप्रलम्भादिदोषसम्भवात्कथं वेदस्य धर्मप्रमापकत्वमित्यत आह । वेदो नारायण इति । साक्षान्नारायणादेव वेदः प्रसूतः न पौरुषेयत्वाशङ्केति भावः कारणवाचिनो नारायणशब्दस्य कार्यकारणयोरभेदात्कार्यभूते वेदे वृत्तिः नारायणाद्वेदस्याविर्भावो लक्ष्यते "तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः ऋचः सामानि जज्ञिरे छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत" इति च कार्यत्वप्रयुक्तानित्यत्वशङ्कां वारयति । स्वयम्भूरिति । स्वयमित्यात्मनेत्यर्थः स्वयमात्मनैवाविकृतरूपेणैवाविप्लुतपूर्वानुपूर्व्याप्रादुर्भवतीति स्वयम्भूरितिशुश्रुम यमादिभ्य इति शेषः ॥ ४० ॥

कोऽसौ नारायणः यतः प्रादुर्भूतो वेदस्तत्राह । येनेति । येन स्वधाम्नि स्वस्वरूपेऽन्तःप्रविश्य धारकेऽमी भावाः वेददेवमनुष्यादयः पदार्थाः रजआदिगुणत्रयप्रचुराः गुणनामक्रियारूपैः यथायथं यथाकर्म भाव्यन्ते विभाव्यन्ते सृज्यन्ते स नारायण इत्यर्थः तत्र गुणाः शान्तिक्षमासौन्दर्यादयः नामानि वेदो देवो मनुष्यो ब्राह्मण इत्यादि क्रिया अर्थप्रत्यायनाध्ययनादयः रूपाणि शब्दात्मकत्वार्थात्मकत्वादीनि ॥ ४१ ॥

भवतु धर्मे वेदः प्रमाणं वेदप्रणिहितो धर्मः वेदश्च नारायणादुद्भूतो नारायणस्त्वीदृशस्तथापि प्रतिक्षणसंसारिभिरनुष्ठितौ धर्माधर्मौ वनन्तौ कथं ज्ञायेते तत्राह । सूर्य इति । समाहारः अहश्च रात्रिश्चाहनी द्विवचननिर्देशसामर्थ्याद्रात्रिर्विवक्षिता कमुदकं कुः पृथ्वी स्वयं साक्षाद्धर्मश्च वायुः तदधिदेवताः सूर्याग्निसोमाश्चेते चतुर्दश देहस्य देहस्य कर्म देहं ब्राह्मणादित्वात्कर्मणि ष्यञ् बुद्धीन्द्रियमनःप्राणात्मकेन देहेन क्रियमाणस्य कर्मणः साक्षिणः साक्षाद्द्रष्टारः सूर्यादिमुखेन देह्यो धर्मो ज्ञायत इत्यर्थः ॥ ४२ ॥

एतैरेवाधर्मोऽपि ज्ञायत इत्याहुः । एतैरधर्मो विज्ञात इति एतैर्ज्ञापितो ऽधार्मिको दण्डस्य विषय इत्याहुः । स्थानं दण्डस्य युज्यत इति दण्ड्याः किं कारिणः सर्वे इत्यस्योत्तरमाहुः । सर्वे कारिणः अतस्ते सर्वे कर्मानुरोधेन दण्डं प्रत्यर्हन्ति धर्ममनुतिष्ठतामपि विषयपरवशत्वादधर्मोऽवर्जनीयः अधर्मफलानुभवदशायां च ते दण्डमर्हन्तीत्यभिप्रायेण सर्वे कर्मानुरोधेन दण्डमर्हन्तीत्युक्तम् ॥ ४३ ॥

एतदेव प्रतिपादयन्ति । सम्भवन्ति हीति । हे अनघाः ! भद्राणि पुण्यानि विपरीतान्यपुण्यानि च सम्भवन्ति भद्राणि कुर्वतामभद्राण्यवर्जनीयतया आपतन्तीत्यर्थः कुतः यतस्तेषां कारिणां गुणेषु शब्दादिविषयेषु सङ्गः व्यासक्तिरस्ति विषयपरवशत्वात्तेषामभद्राण्यपि सम्भवन्तीत्यर्थः धर्माधर्मपरिहारेण तूष्णीं वर्तमाना न दण्डमर्हेयुस्तत्राहुः देहवान्नह्यकर्मकृत् नहि देहवानकर्मकृदस्तीत्यर्थः स्वरूपतः कर्मपरिहारेणावस्थातुं न कोऽपि देही प्रभुरिति सर्वेऽपि देहिनः कारित्वात्पर्यायेण दण्डमर्हन्तीति भावः ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्त्वमनारोपितं रूपं लक्षणं व्यावर्तकधर्मम् ॥ ३८ ॥

कथंस्वित्केन प्रकारेण स्थानं देशः विषयो वा नृणां मध्ये कारिणः कर्मकारिणः सर्वेऽपि दण्ड्याः किमाहोस्वित् कतिचिदेव दण्ड्याः तत्रापि किङ्कारिणो वा किमकारिणो वा इति ब्रूत ॥ ३९ ॥

यच्चाधर्मस्य लक्षणमित्यत्राहुरित्याह । वेदेति । वेद एव धर्माधर्मौ मिथो व्यावर्त्य वक्तीत्यनेन प्रमाणं चोक्तं धर्मस्य तत्त्वं ब्रूतेत्यत्रोत्तरमाहुरित्याह । वेद इति । वेदो नारायणवक्तृकः तपःशक्त्या दृष्टवेदवक्तृमुनिव्यावृत्त्यर्थं साक्षादिति तदुक्तम् ।

वेदानां प्रथमो वक्ता हरिरेव यतो विभुः ।
अतो विष्ण्वात्मका वेदा इत्याहुर्वेदवादिनः । इति

देवदत्तवन्नारायणोऽपि किमन्यस्मादवाप्तदेह इति नेत्याह । स्वयम्भूरिति । अनेन नारायणवक्तृत्वेऽपौरुषेयत्वेनानारोपितरूपत्वाभावेन तदुक्तधर्माधर्मनिश्चयायोग इत्याशङ्का परिहृता । तेषां स्वयम्भुत्वेनाभिव्यक्तिरेव हरेर्न तु पुराणादिवदन्यथा रचितत्वम् "यावद्ब्रह्म विष्ठितं तावती वाक्" इति श्रुतेः ॥ ४० ॥

नन्वेनावता नारायण इतरस्मात्कथं व्यावृत्ततया ज्ञायत इति तल्लक्षणमाह । येनेति । स्वधाम्नि स्वाधारतया गुणाः शुक्लादयः नामान्यश्वमहिषदेवदत्तादीनि क्रियाः पचतिपठतीत्यादयः रूपाणि द्विपाच्चतुष्पादित्यादीनि क्रिया पञ्चविधं कर्मेति वा गुणाः शमदमादयः रूपाणि शुक्लादीनि । यथातथमसाङ्कर्येण विभाव्यन्ते उत्पाद्यन्ते ॥ ४१ ॥

किं वास्य स्थानमीप्सितमित्यत्राहुरित्याह । सूर्योऽग्निरिति । गाव आपः "गौर्भूमिरापः" इतिवचनात् सन्ध्याचाहश्च सन्ध्याहनी कालाभिमानी देवः स्वयं पापपुण्ययोः कर्ता देवशब्दवाच्यः श्रीहरिर्वा कालः हृदयं मन इति द्वे स्वयमित्यनेन व्याख्याते धर्मस्येत्युपलक्षणम् अधर्मस्यापि साक्षादीक्षन्त इति साक्षिणः ॥ ४२ ॥

धर्माधर्मलक्षणपुण्यपापदर्शिभिरेतैः सूर्यादिभिः न धर्मो यस्य सोऽधर्मः अधर्म इति विज्ञातो यः पुरुषः स एव दण्डस्य स्थानं दण्ड्य इति युज्यते यमस्तु दण्ड एवाधिकृतः कथंश्चित् ध्रियते दण्ड इत्यस्योत्तरमाहुरित्याह । सर्व इति । कारिणः पापकारिणः सर्वे कर्मानुरोधेन पापकर्मतारतम्यानुकूल्येन दण्ड्याः किं कारिणः सर्वे इत्यत्राहुरित्यतो वा आह । सर्व इति । पापकारिणः सर्वे दण्डमर्हन्तीत्यनेन पापकारिण एव यमेन दण्ड्याः न पुण्यकारिण इति च ग्राह्यम् ॥ ४३ ॥

ननूभयेषामपि दृष्टश्रुताभ्यामैहिके सुखदुःखफले जानताम् उभयाविश्रकर्मसम्भवः कथमत्राह । सम्भवन्तीति । विपरीतानि पापविरुद्धपुण्यानि राज्याद्यवाप्तिनिमित्तसुखफलप्रदानि "आचतुर्दशमाद्वर्षात्कर्माणि नियमेन तु । दशावराणाम्" इत्येतद्दिशब्दगृहीतं सम्भवेऽपि किं कारणमत्राह । कारणमिति । त्रिगुणसम्बन्ध एव कारणमिति भावः । नन्वेतल्लिङ्गशरीरिण्यनैकान्त्यं तस्य कर्माकरणादित्याशङ्क्य स्थूलदेहविवक्षयोक्तमिति भावेनाह । देहवानिति । यो गुणसङ्गेऽपि पुण्यवाञ्च कर्म करोति ज्ञानादिति चेत्तत्राह । देहवानिति वा । देही चेदकर्मकृन्नास्त्येव गुणानां तादृशशक्तिमत्त्वात् "कार्यते ह्यवशः" इत्युक्तेः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वेदे प्रणिहितो विहित इत्यर्थः साक्षादिति स्वयमेवेत्यर्थः । अत एव स्वयम्भूः ॥ ४० ॥

येन परमेण हेतुना ॥ ४१ ॥

साक्षिणः आदित्यचन्द्रावित्यादिमन्त्रमयपरीक्षादौ तद्भद्राभद्रव्यञ्जकाः ॥ ४२ ॥

युज्यते भवतीत्यर्थः ॥ ४३—४५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रहस्येत्यरे धर्ममेव न जानीथ किमित्यस्मद्भयेन धर्मराजस्य किङ्करा इति ब्रूथ किन्तु यूयं प्रेतविशेषा एवास्मद्धस्तपतिताः कथमद्य जीविष्यथेति भावः ॥ ३७ ॥

ननु वयं धर्मराजस्य दूता भवाम एव के तावदस्मान् परिचिन्वन्तीत्यत आहुर्यूयमिति । निर्देशो निदेशः नोऽस्मान् प्रति तत्त्वं स्वरूपं लक्षणं प्रमाणम् ॥ ३८ ॥

कथमिति । दण्डस्य प्रकारप्रश्नः तिष्ठत्यस्मादिति स्थानमिति दण्डस्य कारणप्रश्नः कारिणः कर्मिण इति विषयप्रश्नः सर्वे इति किं पश्वादयोऽपि किं वा नृणां मध्ये कतिचिदिति तत्र व्यवस्थाप्रश्नः ॥ ३९ ॥

वेदेन प्रणिहितो विहितः वेदविहितत्वं धर्मत्वमिति धर्मस्वरूपं तत्र वेदविधिरेव प्रमाणमिति प्रमाणञ्चोक्तं दण्डकारणप्रश्नेनाधर्मस्यापि पृष्टत्वादधर्मस्य स्वरूपं प्रमाणञ्चाहुः । तद्विपर्ययो यो वेदनिषिद्धः सोऽधर्मः वेदनिषेध एव तस्मिन् प्रमाणमित्यर्थः स्वयम्भूरिति नारायणस्य निःश्वासमात्रेण स्वयमेव भवतीति तथा च श्रुतिः "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः" इति ॥ ४० ॥

कोऽसौ नारायणस्तत्राहुः । येन स्वधाम्नि वैकुण्ठे स्थितेनैव अमी भावाः प्राणिनः सङ्कल्पमात्रेणैव गुणाः शान्तत्वादयः नामानि ब्राह्मण इत्यादीनि क्रिया अध्ययनाद्याः रूपाणि वर्णाश्रमादीनि तैर्विभाव्यन्ते विविधतया सृज्यन्ते यथायथं यथावत् ॥ ४१ ॥

कोऽपि न जानात्विति पापं पुम्भिर्विविक्ते क्रियते अत्र सूर्यादयो देहस्य जीवस्य साक्षिणो येनैव विभाव्यन्त इति पूर्वेणान्वयः अहश्च रात्रिश्च कमुदकं कुः पृथिवी यथाहुः ।

आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये धर्मोऽपि जानाति नरस्य वृत्तम्
इति ॥ ४२ ॥

स्थानमाहुः । एतैरिति । दण्ड्यानाहुः सर्वे एव प्राणिनः ॥ ४३ ॥

सर्वेषां दण्ड्यत्वे हेतुः । सम्भवन्तीति । विपरीतान्यभद्राणि पापानि यतः कारिणां कर्मिणां गुणसङ्गोऽस्त्येव गुणाश्च सत्त्वाद्याः पुण्यपापहेतव एव यावज्जीवमयं धार्मिकोऽधार्मिको वेति तु भूम्नैव व्यपदेशः । ननु कारिणामेव गुणसङ्ग इत्युच्यते । यदि कश्चिदकारी स्यात् स त्वदण्ड्य एवेति तत्राहुः । देहवानिति । देहधारी नरः अथ च कर्मरहित इति प्रत्यक्षविरुद्धमित्यर्थः ॥ ४४ ॥

येन यावान् यथाधर्मो धर्मो वेह समीहितः ।
स एव तत्फलं भुङ्क्ते तथा तावदमुत्र वै ॥ ४५ ॥
यथेह देवप्रवरास्त्रैविध्यमुपलभ्यते ।
भूतेषु गुणवैचित्र्यात्तथान्यत्रानुमीयते ॥ ४६ ॥
वर्त्तमानोऽन्ययोः कालो गुणाभिज्ञापको यथा ।
एवं जन्मान्ययोरेतद्धर्माधर्मनिदर्शनम् ॥ ४७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किमर्थं धर्मराजस्य किङ्करान्नो निषेधथेत्यत्राहुः । यदि धर्मराजस्य निर्देशकारिणः निदेशकारिणस्तर्हि धर्मस्य तत्त्वं स्वरूपं लक्षणं प्रमाणं च नोऽस्मान् प्रति ब्रूत ॥ ३८ ॥

कथंस्वित् केन प्रकारेण दण्डः ध्रियते इति दण्डप्रकारप्रश्नः अस्य दण्डस्य तिष्ठत्यस्मादिति स्थानं हेतुरिति दण्डहेतुप्रश्नः ईप्सितं स्वरूपप्रमाणाभ्यां ज्ञातुमिष्टं वक्ष्यमाणस्य दण्डहेतोरधर्मस्यानेन स्वरूपप्रमाणप्रश्नः कारिणः कर्मिणः सर्वे दण्ड्याः किमाहोस्विन्नृणां मध्ये कतिचिदिति दण्डविषयप्रश्नः ॥ ३९ ॥

उत्तरमाहुः । वेदेत्यादिना । वेदैः प्रणिहितो विहितो हि धर्मः अनेन वेदविहितत्वं धर्मत्वमिति धर्मस्वरूपं विधिवाक्यं तत्प्रमाणमिति चोक्तम् अधर्मस्तद्विपर्ययः इत्यनेन वेदैर्निषिद्धत्वमिति स्थानस्य स्वरूपं निषेधवाक्यञ्च तत्प्रमाणञ्चोक्तं वेदस्यान्यप्रमाणनिरपेक्षत्वान्नित्यत्वान्नारायणात्मकत्वाच्च प्रामाण्यं प्राहुः वेदस्वरूपमन्यप्रमाणनैरपेक्ष्येण भगवन्निःश्वसितरूपेण भवति नित्यनिष्पन्नपदवाक्यरूपः प्रादुर्भवतीति स्वयम्भूः तथा च श्रुतिः "तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतदृग्वेदः । ऋच सामानि जज्ञिरे छन्दांसि जज्ञिरे तस्माद्यजुरजायत" इति । स्मृतिश्च "अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा" इति निःश्वासभूतस्य स्वरूपतो भिन्नस्यापि वेदस्य निःश्वासवतः सकाशात् अपृथक्स्थितिप्रवृत्तिमत्वेनाभिन्नत्वमाहुः । साक्षान्नारायण इति शुश्रुम इति ॥ ४० ॥

कोऽसौ साक्षान्नारायण इत्याकाङ्क्षायामाहुः । येन स्वधाम्नि सर्वाधारे स्वस्वरूपे अमी भावाः ब्रह्मादिस्तम्बपर्यन्ताः रजआदिप्रचुरास्तत्तदनुरूपैर्गुणादिभिर्यथातथं विविधतया भाव्यन्ते सृज्यन्ते स साक्षान्नारायणः ॥ ४१ ॥

अधर्मो देहिभिः क्रियमाणः केन ज्ञायते इत्यत्राहुः । सूर्य इति । अहनी अहश्च रात्रिश्च क्षमुदकं कुः पृथ्वी धर्मराजः देहस्य धर्मस्य साक्षिणः साक्षाद्द्रष्टारः ॥ ४२ ॥

एतैः सूर्यादिभिरधर्मोऽभिज्ञातः सन् दण्डस्य स्थानं युज्यते अधर्म एव दण्डपातने हेतुरित्यर्थः दण्डविषयमाहुः । सर्वे इति ॥ ४३ ॥

सर्वेषां दण्डविषयत्वे हेतुमाहुः । सम्भवन्तीति । कारिणां कर्तॄणां भद्राणि पुण्यानि अभद्राणि पापानि च सम्भवन्ति यतो गुणसङ्गो गुणकार्यरूपदेहेन्द्रियसम्बन्धोऽस्ति देहवांश्च अकर्मकृत् कर्मकर्तृत्वरहितो न अतः सर्वेषां गुणकार्यरूपदेहवतां पापकारित्वे सिद्धे तद्धेतुकदण्डविषयत्वमित्यर्थः ॥ ४४ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले इस प्रकार यमदूतों के कहने पर वासुदेव की आज्ञा करने वाले दूत हंसकरके मेघ सरी की गर्जनावाली गंभीर वाणी से उन यमदूतों से बोलने लगे ॥ ३७ ॥

विष्णु दूत बोले आप लोग यदि धर्मराज के आज्ञा करनेवाले हो तो जो धर्मका तत्त्व होवे जो धर्मका लक्षण होवे, सो हमसे कहो ॥ ३८ ॥

किस प्रकार दंड दिया जाता है कौन सा उस दंडनीय पुरुष का योग्य स्थान है क्या पापादि करने वाले सब ही दंडने योग्य हैं अथवा मनुष्यों में कितने एकही हैं ॥ ३९ ॥

यमदूत बोले वेद में आज्ञा रूप विधि से प्रतिपादित जो है सोई धर्म है उससे जो विपरीत है वही अधर्म है वेद तो साक्षात् स्वयंभू होने से नारायण रूप ही है ऐसा सुनते हैं ४०

जो अपने स्वरूप से रज सत्त्व तमोगुणमय इन सब प्राणियों को गुण नाम क्रिया रूपों से ब्राह्मणादि नाम अध्ययनादिक क्रिया द्विहस्तादिरूप इन प्रकार से यथा योग्य बनाते हैं वही श्रीमान् नारायण हैं ॥ ४१ ॥

सूर्य अग्नि आकाश पवन सरस्वती सोम दिन रात दिशा जल पृथिवी काल धर्म इनों के अभिमानी देवता सब जीव मात्र के किये पाप पुण्य के साक्षी हैं ॥ ४२ ॥

इनका जाना हुआ जो अधर्म वही दण्डका हेतु होजाता है पाप करने वाले सबही कर्मके अनुसार दण्ड पाते हैं ॥ ४३ ॥

हे अनघो ! हो सबजीवों से भले बुरे कर्म होतेही हैं क्यों कि सब करने वाले गुणों के सङ्गी हैं जो देह धारी है सो विना कर्म किये नहीं रहता है ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कथं स्विद्ध्रियते दण्ड इत्यस्योत्तरम् । येनेति । धर्मो वेति दृष्टान्तः अधर्मानुसारेण दण्डो धर्मानुसारेण सुखवदित्यर्थः ॥ ४५ ॥

मनसैव पुरे देवः पूर्वरूपं विपश्यति ।
अनुमीमांसतेऽपूर्वं मनसा भगवानजः ॥ ४८ ॥
यथाज्ञस्तमसा युक्त उपास्ते व्यक्तमेव हि ।
न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा ॥ ४९ ॥
पञ्चभिः कुरुते स्वार्थान् पञ्च वेदाथ पञ्चभिः ।
एकस्तु षोडशेन त्रीन् स्वयं सप्तदशोऽश्नुते ॥ ५० ॥
तदेतत् षोडशकलं लिङ्गं शक्तित्रयं महत् ।
धत्तेऽनु संसृतिं पुंसि हर्षशोकभयार्तिदाम् ॥ ५१ ॥
देह्यज्ञोऽजितषड्वर्गो नेच्छन् कर्माणि कार्यते ।
कोशकार इवात्मानं कर्मणाच्छाद्य मुह्यति ॥ ५२ ॥
नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म गुणैः स्वाभाविकैर्बलात् ॥ ५३ ॥
लब्ध्वा निमित्तमव्यक्तं व्यक्ताव्यक्तं भवत्युत ।
यथायोनि यथाबीजं स्वभावेन बलीयसा ॥ ५४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

न केवलं सूर्यादय एव धर्माधर्मज्ञापकाः किन्त्वर्थापत्तिरपीत्याहुः । यथेति । हे देवप्रवराः ! इह जन्मनि शान्तघोरमूढत्वेन वा सुखदुःखमिश्रत्वेन वा धार्मिकत्वादिना वा त्रैविध्यं भूतेषु यथोपलभ्यते तथान्यत्र जन्मान्तरेऽनुमीयते त्रैविध्यान्यथानुपपत्त्या कल्प्यते ॥ ४६ ॥

वर्तमानजन्मना पूर्वापरजन्मधर्माधर्मज्ञानं भवतीति सदृष्टान्तमाहुः । वर्तमानो वसन्तादिकालः अन्ययोर्भूतभविष्ययोर्वसन्तयोर्ये गुणाः पुष्पफलादयस्तेषामभिज्ञापको यथा एवमेतज्जन्म अन्ययोर्भूतभाविजन्मनोर्धर्माधर्मौ निदर्शयतीति तथा ॥ ४७ ॥

अयं च धर्माधर्मज्ञानप्रकारोऽन्येषां धर्मराजस्तु मनसैव सर्वं पश्यतीत्याहुः । पुरे संयमिन्यां स्थित एव देवो यमो देहे स्थितोऽन्तर्यामी वा जीवस्य पूर्वरूपं धर्माधर्मादियुक्तं विशेषेण पश्यति अन्वनन्तरमपूर्वं रूपं मीमांसते यद्यस्यानुरूपं तद्विचारयति । यतोऽसौ भगवानजः ॥ ४८ ॥

जीवस्त्वीश्वरेणोपस्थापितं वर्त्तमानं देहं पश्यति न तु पूर्वमपरञ्चेत्याहुः । यथेति । अज्ञोऽविद्योपाधिर्जीवस्तु व्यक्तमेव प्राचीनकर्माभिव्यक्तं वर्तमानमेव देहाद्युपास्तेऽहमिति मन्यते पूर्वमपरं वा न वेद अत्र हेतुः । नष्टा जन्मनां स्मृतिर्यस्य अत्र दृष्टान्तः तमसा निद्रया युक्तो यथा स्वप्नेऽपि व्यक्तमेव देहाद्युपास्ते न तु जाग्रद्देहादिपूर्वस्वप्नादिगतं वा तद्वदित्यर्थः ॥ ४९ ॥

एवं भूतस्य जीवस्य संसारं प्रपञ्चयति पञ्चभिः श्लोकैः । पञ्चभिः कर्मेन्द्रियैः स्वार्थानुपादानादीन् कुरुते पञ्च शब्दादीन्वेद पञ्चभिर्ज्ञानेन्द्रियैः षोडशेन मनसा सह सप्तदशः षोडशोपाध्यन्तर्गतोऽपि स्वयन्त्वेक एव सर्वेन्द्रियविषयप्रतिसन्धानात् त्रीन् ज्ञानकर्मेन्द्रियमनोविषयान् प्राप्नोति ॥ ५० ॥

तदेतल्लिङ्गशरीरं शक्तित्रयं गुणत्रयकार्यं महदनादि पुंसि जीवे अन्वनु संसृतिं धत्त ॥ ५१ ॥

नेच्छन्ननिच्छन्नप्यनेनैव कर्माणि कार्यते कोशकारः कीटविशेषः मुह्यति निर्गमोपायं न जानाति ॥ ५२ ॥

कार्यत इत्यत्रानुभवं प्रमाणयन्ति । नहीति । गुणैर्गुणकार्यैरागादिभिः स्वाभाविकैः पूर्वकर्मसंस्कारोद्भूतैः ॥ ५३ ॥

कर्मवशेन च तदनुरूपो देहो भवतीत्याहुः । लब्ध्वेति । अव्यक्तमदृष्टं निमित्तं लब्ध्वा व्यक्ताव्यक्तं तदनुरूपं स्थूलं सूक्ष्मं च शरीरं भवति यथायोनि मातृसदृशं यथाबीजं पितृसदृशं स्वभावो वासना शुक्रशोणितयोरेकत्वेऽपि कर्मवासनया मातापितृसदृशो देहो भवतीत्यर्थः ॥ ५४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कथं स्विद्ध्रियते दण्ड इत्यस्योत्तरमाहुः । येन गुणत्रयसंसृष्टेन जीवेन कर्त्रा यथा स्वस्वगुणानामेषानुसारेण धर्मोऽधर्मो वा यावान् देहसमीहितः देहेन बुद्धीन्द्रियमनःप्राणसङ्घातरूपेण देहेन करणेन समीहितः स कर्त्ता तावदेव तत्फलं स्वर्गनरकादिरूपं धर्माधर्मफलममुत्र भुङ्क्ते न धार्मिको नरकं न वा अधार्मिकः स्वर्गं नाप्यल्पपापान्महद्दुःखं नाप्यल्पधर्मान्महत्सुखं भुङ्क्ते इत्यर्थः धर्मो यथेति दृष्टान्तो वा तत्रायमर्थः यथा धर्मो यावान् देहसमीहितः तावदेव तत्फलं सुखममुत्र स्वर्गे भुङ्क्ते एवमधर्मोऽपि यावांस्तावदेव तत्फलं दण्डरूपं भुङ्क्ते इति ॥ ४५ ॥
न केवलं परत्रैव कर्मानुसारेण तत्फलभोग अपि त्विहापि लोके

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्राचीनकर्मानुसारेणैव फलभोग उपलब्धस्तद्वत्परलोकेऽप्यनुमीयत इत्याहुः । यथेति । हे देवप्रवराः ! इह लोके भूतेषु गुणवैचित्र्यात्सत्त्वादिगुणोन्मेषनिमित्तप्राचीनसात्त्विकादिकर्मवैचित्र्यात्त्रैविध्यं सुखित्वदुःखित्वमूढत्वरूपं त्रैविध्यम् उपलक्ष्यते गुणवैचित्र्यनिमित्तमिदं त्रैविध्यमिति सर्वजनीनं ज्ञायते तथान्यत्र परलोकेऽपि गुणवैचित्र्यात्त्रैविध्यमनुभूयत इत्यर्थः ॥ ४६ ॥

एवं भूतभविष्यद्वर्त्तमानकालत्रयगोचरेषु कारिषु कर्मानुसारेणैव फलभोगः कर्म च धर्माधर्ममिश्ररूपं तच्च सत्त्वादिगुणोन्मेषनिमित्तमिति चोक्तम् इदानीं धर्मादिरूपं कर्म सत्त्वादिगुणोन्मेषनिमित्तमिति कथं ज्ञायत इत्यपेक्षायां कार्येण कारणमनुमीयत इति सदृष्टान्तमाहुः । वर्त्तमान इति । यथा वर्त्तमानः कालः सुखदुःखाद्यनुभवसहचरितः कालः अनयोर्द्धर्माधर्मयोर्गुणाः निमित्तभूताः सत्त्वादयस्तेषां सुखदुःखमोहरूपैः कार्यैरभिज्ञापकः यथा वर्त्तमानकालिकाधर्मादिनिमित्ताः सुखदुःखमोहाः स्वनिमित्तभूतानां धर्मादीनां सत्त्वादिगुणोन्मेषमूलत्वं ज्ञापयन्तीत्यर्थः एवमेतद्वर्त्तमानकालिकं दुःखादित्रयं जन्मान्ययोरन्यजन्मनोः बहुलवचनाद्विशेषणस्य परनिपातः पूर्वापरजन्मनोः धर्माधर्मयोर्निदर्शनं तयोः सत्त्वादिगुणोन्मेषमूलत्वाभिज्ञापकमित्यर्थः सत्त्वादयो हि धर्मादिरूपकर्मोपादानद्वारा तत्फलत्वेन सुखदुःखादीन् जनयन्ति न साक्षादतः सुखादीनां सत्त्वादिकार्यत्वात्कार्यभूतैस्तैः स्वनिमित्तभूतधर्मादीनां सत्त्वादिमूलत्वमनुमीयते,कार्येण कारणानुमानादिति भावः ॥ ४७ ॥

येन यावान् यथाधर्म इति कर्मैव स्वानुरूपसुखदुःखादिकारणमित्युक्तं तस्य क्षणिकत्वात्कथं कालान्तरे सुखादिनिमित्तत्वमित्यत आहुः । मनसैवेति । पुरे देहे देवः स्वतेजसा दीप्यमानः न तु जीववत्कर्मणा सङ्कुचितज्ञान इत्यर्थः जीवान्तरात्मतयावस्थितः परमात्मा मनसैव नित्यासङ्कुचितापरिच्छिन्नधर्मभूतज्ञानेनैव पूर्वरूपं प्राक्तनजन्मसम्बन्धिपुण्यपापादिरूपं विपश्यति पुण्यपापादिरूपदर्शनेन चिकीर्षितानुग्रहनिग्रहवान् भवतीति भावः तथाजो भगवान् मनसापूर्वमनु प्राचीनं कर्मानुसृत्यैव मीमांसते तत्फलदानादिप्रकारं चिन्तयति कर्मणः क्षणिकत्वेऽपि तन्निमित्तानुग्रहनिग्रहवान् परमात्मा तदनुसारेण सुखदुःखादिफलदो भवतीति भावः ॥ ४८ ॥

यदि कर्मनिमित्तनिग्रहानुग्रहस्तदनुरोधिफलदः परमात्मा तर्ह्ययं जीवः परमात्मानुग्रहापादकं शुभमेव कर्माचरन् सुखमेव किं नाश्नुत इत्यत्राहुः । यथेति । तमसा युक्तः अन्धकारेणाभिभूतः अत एवाज्ञः यथा व्यक्तं शरीरमेवोपास्ते चिन्तयति न तु पूर्वं पुरः स्थितमपरं पृष्ठतः स्थितं च वेद निद्रया युक्तं स्वप्नेऽभिव्यक्तं देहाद्युपास्ते न तु जाग्रद्देहादि वेदेति वार्थः तथा जीवोऽपि तमसाज्ञानेन युक्तः देहात्माभिमानस्वतन्त्रात्माभिमानयुक्त इत्यर्थः अत एवाज्ञः कर्मणा सङ्कुचितज्ञानः व्यक्तं वर्त्तमानं देहमुपास्तेऽनुसन्धत्ते न तु पूर्वं प्राक्तनमपरं भविष्यच्च शरीरं वेद तत्र हेतुः नष्टा जन्मस्मृतिः पूर्वापरजन्मस्मृतिर्यस्य सः पूर्वापरजन्मविषयकस्मृत्यभावात्केवलवर्त्तमानदेहात्माभिमानशीलत्वाच्च तत्परवशोऽज्ञो जीवः प्रकृतेः देहसुखोचितमेव कर्म करोति न तु परमात्मप्रसादापादकं शुभं कर्मेति भावः ॥ ४९ ॥

एवं जीवानाद्यविद्याकर्मवासनाभिस्तिरोहितस्वरूपाणां सत्त्वादिगुणत्रयसंसृष्टानां स्वस्वगुणोन्मेषनिमित्तधर्माधर्ममिश्ररूपेण कर्मणा सुखदुःखमिश्ररूपफलानुभवाय देवतिर्यङ्मनुष्यरूपेण संसरतां धर्मादिनिमित्तेश्वरानुग्रहहेतुकः सुखाद्यनुभव उक्तः अथैषां संसरणप्रकारं तद्धेतुं च प्रपञ्चयंस्तन्निस्तरणोपायमाहुः । पञ्चभिरित्यादिभिः सप्तभिः । पञ्चभिः कर्मेन्द्रियैः पाण्यादिभिः स्वार्थानुपादानगत्यादीन् पञ्च कुरुते अथ ननु पञ्चभिर्ज्ञानेन्द्रियैः श्रोत्रादिभिः पञ्च शब्दादीन्वेद केन करोति वेद च षोडशेन भूतपञ्चकदशेन्द्रियापेक्षया षोडशं मनः तेन मनःसंयुक्तैः पञ्चभिः कुरुते पञ्चभिर्वेद चेत्यर्थः कथंभूतः स्वयं जीव एक एव शरीरवदनेकद्रव्यसङ्घातरूपत्वाभावादेक इत्युक्तमिति जीवनानात्वमत्र निषिध्यत इति न भ्रमितव्यं सप्तदशः उक्तषोडशतत्त्वापेक्षया सप्तदशः त्रीन् सुखदुःखमोहान् भुङ्क्तेऽनुभवतीत्यर्थः ॥ ५० ॥

तदेतत् षोडशकलं षोडश कला अवयवा यस्य तत् षोडशकलं षोडशतत्त्वात्मकं शक्तित्रयं शक्तीनां त्रयं यस्मिन्निति व्यधिकरणपदो बहुव्रीहिः प्रकाशक्रियावरणशक्तिमत्सत्त्वादिगुणत्रयात्मकमविद्याकर्मवासनारूपशक्तित्रयाश्रयं वा महत्कार्यदशायां स्थूलाकारं लिङ्गं सूक्ष्मशरीरं पुंसि, जीवे हर्षशोकभयार्त्तिदामनुसंसृतिं गर्भजन्माद्यवस्थां परिवृत्तिरूपां धत्ते आपादयति षोडशकलात्मकलिङ्गसम्बन्धनिमित्तो जीवस्य संसार इति भावः ॥५१॥

एवं लिङ्गे संसृतिं पुंस्यादधति सत्ययं देही अज्ञः देहात्माभिमानवानत एवाजितषड्वर्गः अजितषडिन्द्रियकार्यः नेच्छन्ननिच्छन्नपि बलादित्यर्थः कर्माणि धर्माधर्ममिश्ररूपाणि कार्यते शक्तित्रयात्मकेन लिङ्गेनेति शेषः एवं कृतेन कर्मणा कोशकारवदात्मानं स्वस्वरूपमाच्छाद्य तिरोधाप्य मुह्यति देह एवाहमिति मोहं प्राप्नोति कोशकारः कीटविशेषः स यथा तन्तून् करण्डरूपेण सृष्ट्वा स्वनिर्गमोपायं न जानाति तद्वदिति दृष्टान्तार्थः ॥ ५२ ॥

नेच्छन् कर्माणि कार्यत इत्येतदेव प्रतिपादयति । न हि कश्चिदिति । कश्चिद्देही जातु कदाचिदपि अकर्मकृत् कर्माकुर्वन्न तिष्ठति अन्ततस्तृणच्छेदादिकमपि कुर्वन्नेव तिष्ठतीति भावः स्वाभाविकैरनादिसिद्धैर्गुणैः सत्त्वादिभिर्बलात्कर्माणि विषयादीनि कार्यते एवेत्यर्थः ॥ ५३ ॥

एवमव्यक्तं संसरता जीवेनाव्यक्तमनभिज्ञातं निमित्तं संसृतिनिमित्तमवर्जनीयतया कृतं कर्म लब्ध्वा कर्मवासनाश्रयं सदित्यर्थः लिङ्गमिति कर्तृपदमध्याहार्यं व्यक्ताव्यक्तं स्थूलसूक्ष्मरूपं भवति उत्पत्तिदशायां देहरूपेण स्थूलाकारं मरणदशायां सूक्ष्माकारं च भवतीत्यर्थः यद्वाव्यक्तं मूलप्रकृतिरूपं प्रधानं कर्तृ तन्निमित्तं जन्ममरणनिमित्तं कर्म लब्ध्वाऽवलम्ब्य व्यक्ताव्यक्तं भवति कदाचित् षोडशकलात्मकत्वेनाव्यक्तं कदाचिद्देवादिदेहाकारेण व्यक्तं भवति एकस्य प्रधानस्य स्थूलावस्था उत्पत्तिः तस्यैव पुनः सूक्ष्मावस्था मरणमिति हि जन्ममरणयाथात्म्यविद आचक्षते तथा चोक्तं भगवता ।

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत । अव्यक्तनिधनान्येव इति । यद्वा । कर्मानुसारेणैव पिपीलिकादिरूपाः सूक्ष्मा गजादिरूपाः स्थूलाश्च देहा भवन्तीत्यर्थः तद्व्यक्तमपि यथायोनि यथाबीजमेवेत्याहुः । यथायोनीति । यथायोनि पश्वादियोन्यनतिक्रमेण यथाबीजं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

कर्मानुसारेण। यद्वा। यथायोनि मातृसदृशं यथाबीजं पितृसदृशं च बलीयसा स्वभावेन सात्त्विकादिकर्मवासनारूपस्वभावेन भवतीत्यर्थः॥ ५४॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

किमत इत्यतः फलितमाह। येनेति। अमुत्र परलोके॥ ४५॥

नन्‌ु यावज्जीवं सुखं जीवेदृणं कृत्वा घृतं पिबेत्।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥

इति वचनात्स एवामुत्र स्वकृतं भुङ्क्ते इति न घटत इत्यत्राह। यथेदंति। स्वकृतफलदातारो दृश्यन्ते प्रमाणात इति शेषः वाक्यप्रामाण्यानङ्गीकारेऽपि प्रत्यक्षगृहीतव्याप्तिकानुमानात्सिद्धमित्याह। त्रैविध्यमिति। सत्त्वादिगुणानां वैचित्र्याद्भूतेषु उत्तमाधममध्यमत्वभेदेन त्रैविध्यमुपलभ्यते यथा प्रत्यक्षेणेति शेषः अन्यत्र जन्मान्तरे परलोके वा॥ ४६॥

अनुमानस्य प्रामाण्यं ग्राहयितुम् एतदर्थं सदृष्टान्तमुपपादयन्नीत्याह। वर्तमान इति। वर्तमानः प्रतीयमानः वसन्तादिकालः अन्ययोः अतीतैष्यद्वसन्तयोः गुणानां फलपुष्पादिकार्याणामभिज्ञापको यथा एवमेतद्वर्तमानं जन्म धर्माधर्मज्ञापकमनयोरतीतानागतजन्मनोः यौ धर्माधर्मौ तौ नितरां दर्शयति ज्ञापयतीति धर्माधर्मनिदर्शनम्॥ ४७॥

इतोऽप्यनुमानं प्रमाणमिति ज्ञापयितुं जीवसमवेतधर्माधर्मसद्भावे हरेः प्रत्यक्षं प्रमाणयन्तीत्याह। मनसेति। पुरे जीवशरीरे स्थितो देवः श्रीनारायणः जीवस्य पूर्वरूपमपूर्वमनागतरूपं च तत्समवेतधर्माधर्मौ च स्वमनसैव विपश्यति। अपरोक्षीकृत्य वर्तते दर्शनस्य क्वापि बाधो नास्तीति लट्प्रयोगः अन्येषामदर्शनमेव किं नेत्याहुरित्याह। अनुमीमांसत इति। अजः परमेष्ठी भगवान्मनसानुमीमांसते तदनुग्रहेणालोच्य विचार्य पश्यतीत्यर्थः सर्वजीवसाधारणाजशब्दप्रयोगादन्ये देवा अपि यथायोग्यं जानन्तीति ग्राह्यम्। किञ्च जीवात्मनोऽपि धर्माधर्मसमवेतपूर्वापररूपे वर्तमानसिद्धे इत्याहुरित्यतो वाह। मनसेति। सुरनरतिर्यगादिपुरे देवः क्रीडन् भगवान्माग्यगुणोपेतः जीवः पूर्वानुभवसंस्कारसंस्कृतेन मनसैव पूर्वरूपं धर्माधर्मसमवायात्मकं रूपं विपश्यति विजानाति अपूर्वमनागतं मनसानुमीमांसते विचार्यानुमिनोति (१)"अजो ह्येको जुषमाणोऽनुशेते" इति श्रुतेः॥ ४८॥

पूर्वापररूपे जानाति चेत्तर्हि कथमन्यत्र मृतोऽन्यत्र जातोऽहमिति न जानातीत्याशङ्क्य श्रीनारायणानुग्रहमन्तरेण तादृशज्ञानं न सुलभं सर्वेषामित्यभिप्रेत्याह। यथेति। अज्ञोऽविवेकी अव्यक्तं प्रकृतिनिमित्तदेहमेवोपास्ते देहात्मनोरभेदं कल्पयति। व्यक्तमेव पुरःस्थितमेव जानाति न तु पूर्वापरे इति वा। तत्र कारणमाहुरित्याह। तमसेति। विपरीतप्रत्ययापादकतमोगुणयुक्तत्वादत एव पूर्वमपरं च न वेद यावज्जीवं सुखं जीवेदिति चार्वाकमतमप्रलपितमिति ज्ञायत इति भावः॥ ४९॥

देही चेत्कर्म करोत्येवेत्युक्तं तत्र कर्मकरणप्रकारं दर्शयति।

पञ्चभिरिति। पञ्चभिर्वागादिकर्मेन्द्रियैः स्वार्थान् स्वविषयानभिवदनशिल्पगतिविसर्गानन्दाख्यान् पञ्चभिः श्रोत्रादिज्ञानेन्द्रियैः पञ्च शब्दादीन् सप्तदश स्वयमेक आत्मा षोडशेन षोडशभेदयुक्तेन लिङ्गशरीरेण त्रीन् सत्त्वादिगुणैस्त्रिधा विभक्तं सुखं दुःखं मिश्रं च भुङ्क्ते "सत्त्वं सुखे संजयति" इत्यादेः देहात्मनोर्भेदप्रकाशनाय सप्तदश इत्युक्तम्॥ ५०॥

तर्हि कस्मात्संसारोऽस्येति तत्राह। तदेतदिति। षोडश कलाः श्रोत्रादीन्द्रियाणि मनश्च पञ्च भूतानि यस्मिंस्तत्तथा शक्तीनां प्रकाशक्रियावरणलक्षणानां त्रयं यस्मिंस्तत्तथा सत्त्वादिगुणशक्तियुक्तमित्यर्थः अत एव महापुरुषार्थाभिभवसमर्थं त्रिशक्तियुक्तत्वाद्धर्षादिप्रदं लिङ्गं लिङ्गशरीरं पुंस्यनु स्वकर्मानुकूल्येन संसृतिं धत्त इत्यन्वयः। अधिकरणत्वमात्रप्रदर्शनाय पुंसीति सप्तमी तस्मादभिमाननिमित्तमिदं सर्वमित्यर्थः॥ ५१॥

आत्मनः संसारप्रकारं निरूपयति। देहीति। अवशीकृतषडिन्द्रियवर्गोऽनिच्छन्नपि कर्माणि कार्यते गुणाधीनषडिन्द्रियैरिति शेषः। विधिगृहीतवद्बलात्कार्यमाणश्चेत्स्वसंपद्विपदौ वेत्ति किं नेत्याह। कोशकार इति। यथा कोशकारः कृमिः स्वकर्मणा निर्मितकोशेनात्मानमाच्छाद्य कोश एव वसन्मुह्यति कोशनाशनाशौ न जानाति तथा देह्यपि कर्मणात्मानमाच्छाद्य मुह्यतीत्यर्थः॥५२॥

मोहोऽस्यास्तीति कुतो ज्ञायत इत्याशङ्क्य पुनः पुनः कर्मकरणादित्यभिसन्धिमन्तः स्वोक्तार्थे प्रमाणं दर्शयन्तीत्याह। नहीति। ॥ ५३॥

जननमरणे अपि देहस्यैव आत्मनस्तदभिमानादुपचर्यते इत्याहुरित्याह। लब्ध्वेति। संसारनिमित्तमव्यक्तं प्रकृतिकार्यं शरीरं लब्ध्वा व्यक्ताव्यक्तमुत जन्ममरणमपि भवति जीवस्योपचार इति शेषः। "देहस्य सर्वथा नाशादनाशाच्चेतनस्य च" इत्यादेः निमित्तं कारणमव्यक्तं प्रकृतिं लब्ध्वा प्राप्य व्यक्ताव्यक्तं जन्ममरणात्मकं शरीरं भवति जीवस्येति शेषः इति वा कथं यथायोनि पश्वादियोनिमनतिलङ्घ्य यथाबीजं कर्मराशिमनतिक्रम्य सत्त्वादिनिमित्तस्वभावेन॥ ५४॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

अनुमीयते मर्त्यैरपीति शेषः॥ ४६॥

वर्त्तमानः पूर्वसंवत्सरादिवसन्तादिर्वा स यथा पूर्वभागे स्वपूर्वकालस्य रात्र्यादेः शिशिरादेर्वा गुणांशान् व्यञ्जयति। उत्तरभागे च स्वपरकालस्य दिवसादेर्निदाघादेर्वा तथा वर्तमानजन्मापि स्वपूर्वजन्मादेरित्यर्थः॥ ४७॥

भगवानज इति यमपक्षे तद्विभूतित्वाद्वक्त्या तदभेदनिर्देशः॥ ४८—५३॥

लब्ध्वेति अदृष्टेन निमित्तेन ये योनिबीजे प्राप्येते तत्स्वभावानुसारेण देहो भवतीत्यर्थः॥ ५४॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

कथं दण्ड इत्यस्योत्तरमाहुः। यावान् यत्प्रमाणकः यथा येन प्रकारेण अधर्मो धर्मो वा कृतः। तत्फलं दुःखं सुखं वा तावत्तत्प्रमाणकं तत्प्रकारमेवैवेति शेषः॥ ४५॥

---

(१) अजः जीवः एकः कर्म जुषमाणः सेवमानः सन् शरीरे अनुशेते इतिश्रुत्यर्थः।

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

सत्वादिगुणसङ्गः प्रत्यक्षमेवोपलभ्यतामित्याहुः। इह लोके त्रैविध्यं पुण्यपापमिश्रकर्मत्वेन नृणां त्रैविध्यं यथा तथैवान्यत्र परलोकेऽन्यजन्मनि वा सुखित्वमिश्रत्वदुःखित्वेन त्रैविध्यम् अनुमीयते शास्त्रदृष्टयैवेति भावः॥ ४६॥

वर्त्तमानजन्मनैव पूर्वापरजन्मधर्माधर्मज्ञानं भवतीति सदृष्टान्तमाहुः। वर्त्तमानो वसन्तादिकालः अन्ययोर्भूतभविष्यतोर्वसन्तयोर्ये गुणाः पुष्पफलादयस्तेषामभिज्ञापको यथा एवमेतज्जन्मैव अन्ययोर्भूतभाविनोर्जन्मनोर्धर्माधर्मौ निदर्शयतीति तथा॥४७॥

मयञ्च धर्माधर्मज्ञानप्रकारस्त्वन्येषां प्रायिकः धर्मराजस्तु मनसैव निश्चितमेव सर्वं पश्यतीत्याहुः। पुरे संयमन्यां स्थित एव देवो यमः पूर्वरूपं पूर्वजन्मस्वरूपं धर्माधर्मादियुक्तं पश्यति। अनु अनन्तरमपूर्वं वर्त्तमानं भाविरूपं मीमांसते। यद्यस्यानुरूपं तद्विचारयति भगवान् सर्वज्ञः अजो ब्रह्मतुल्यः॥ ४८॥

जीवस्य तु पूर्वापरज्ञानाभावात् पापादौ प्रवृत्तिर्न चित्रमित्याहुः। यथा तमसा युक्तः पश्वादिर्व्यक्तं वर्त्तमानदेहमेव उपास्ते यथेष्टाहाराद्यैः सुखयति तथैव नरोऽपि नष्टा जन्मनैव स्मृतिर्यस्येति पूर्वापरज्ञानाभावे हेतुः॥ ४९॥

ततश्च पञ्चभिः कर्मेन्द्रियैर्यथेष्टं स्वार्थान् कुरुते पञ्चभिर्ज्ञानेन्द्रियैः पञ्च शब्दादिविषयभोगाननुभवति षोडशेन मनसा इन्द्रियेण तु त्रीन् ज्ञानकर्मेन्द्रियमनोविषयान् अश्नुते प्राप्नोति स्वयं सप्तदशो जीवः॥ ५०॥

सप्तदशस्य तस्य तदेतल्लिङ्गशरीरं कर्तृ शक्तित्रयं गुणत्रयकार्यं पुंसि जीवे अनुसंसृतिं धत्ते भवत् दुर्निवारम्॥ ५१॥

अनेन लिङ्गेनैव कदाचित् कर्म कर्तुमनिच्छन्नपि बलात् कर्माणि कार्यते ततश्च कोशकारः कीट इव मुह्यति निर्गमोपायं न जानाति५२

स्वाभाविकैः पूर्वसंस्कारोद्भूतैः॥ ५३॥

एवञ्च निमित्तमदृष्टं लब्ध्वा तत्कर्मानुसारेण व्यक्ताव्यक्तं स्थूलं सूक्ष्मञ्च शरीरं भवति यथायोनि क्वचिन्मातृसदृशं यथाबीजं क्वचित् पितृसदृशं क्वचिदुभयसदृशं स्वभावेन हिंस्रत्वसौम्यत्वेन च युक्तम्॥ ५४॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

कथंस्विद्ध्रियते दण्ड इत्यस्योत्तरमाहुः। येनेति। यावान् स्वरूपतो यथा येन प्रकारेण शान्तघोरादिस्वभावेन इह लोके येन धर्मः कृतः स एव तावदेव तथा तेनैव प्रकारेण तत्फलं भुङ्क्ते येनाधर्मो वा यावान् यथा समीहितः स एव तावदेव तथैव तत्फलं भुङ्क्ते एवेत्यन्वयः॥ ४५॥

यावानितिशब्देन तावदितिशब्देन च धर्माधर्मरूपस्य फलस्य च सुखदुःखरूपस्य स्वरूपतस्त्रैविध्यं सूचितं तत्स्फुटयन्त्याहुः। यथेति। भूतेषु प्राणिषु गुणानां सत्वादीनां वैचित्र्यात्त्रैविध्यम् उत्तममध्यमाधमस्वजनकर्त्तृत्वमुपलभ्यते तथान्यत्र फलभोगकालेऽपि त्रैविध्यं त्रिविधफलभोक्तृत्वमनुमीयते॥ ४६॥

धार्मिकमधार्मिकं वा वर्त्तमानं जन्म पूर्वापरयोरपि जन्मनोर्धर्ममधर्मं च प्रायः ज्ञापयतीत्याहुः। वर्तमान इति। वर्तमानः वसन्तादिः कालः अन्ययोर्भूतभविष्यवसन्तादिकालयोः गुणाभिज्ञापकः पुष्पादिसमृद्धिसूचको यथा एवमेतद्वर्तमानजन्म अन्ययोः पूर्वपरयोः धर्माधर्मौ निदर्शयति ज्ञापयतीति धर्माधर्मनिदर्शनम्॥ ४७॥

परमेश्वरस्तु सर्वेषां सर्वदा सर्वं धर्मादिकं जानातीत्याहुः। पुरे तत्तत्प्राणिदेहे वर्त्तमानोऽजः तत्तत्पुरसम्बन्धिजन्मादिसंसर्गरहितः परमेश्वरः मनसैव स्वसङ्कल्पनेैव पूर्वरूपं धर्मादिकं विपश्यति तथा अपूर्वं धर्मादिकमनुमीमांसते स हि धर्मराजादिद्वारा धर्मादिफलं ददाति न तु तत्र विभङ्करोतीति भावः॥४८॥

जीवस्तु अनादिमायापरियुक्तरूपत्वात् स्वकृतं धर्मादिकं पूर्वमपरं च न जानाति प्राप्तमप्राप्तं धर्माधर्मफलं सेवते स्वकृतैः कर्मभिः स्वर्गनरकादौ भ्रमतीत्याहुः। यथाज्ञ इति षड्भिः। अज्ञः अनादितो मायया सङ्कुचितज्ञानः व्यक्तं वर्तमानमेव कर्मफलमुपास्ते निषेवते पूर्वभूतजन्मसम्बन्धि अपरं भविष्यजन्मसम्बन्धि न वेद यतो नष्टा जन्मना स्मृतिर्यस्य सः यथा तमसा निद्रया युक्तो व्यक्तं स्वप्ने दृष्टमेव सेवते न तु पूर्वं पूर्वरात्रिगतमपररात्रिगतं वेद तद्वत्॥ ४९॥

पञ्चशब्देन पञ्चभूतमयो देहोऽत्र गृह्यते तमाश्रित्येति शेषः पञ्चभिः कर्मेन्द्रियैः पाय्वादिभिः करणैः स्वार्थानादानादीन् कुरुते पञ्चभिः ज्ञानेन्द्रियैः श्रोत्रादिभिः करणैः स्वार्थान् शब्दादीन् वेद षोडशेन मनसा करणेन त्रीन् सुखं दुःखं मध्यमं च हर्षं शोकं भयस्वाश्नुते भुङ्क्ते अचेतनानां देहादीनां भोक्तृत्वासम्भवात्स्वयमित्युक्तं सप्तदशः तेभ्यो भूतेन्द्रियमनोभ्यो विलक्षणः एकस्तेषां स्वामी जीवः॥ ५०॥

तदेतत् पूर्वोक्तं षोडश कला अवयवा यत्र तल्लिङ्गशरीरं शक्तित्रयं शक्तीनां सत्वादीनां गुणानां त्रयं त्रिगुणमयमित्यर्थः तन्महद् दृढं पुंसि जीवे अन्वनु संसृतिं धत्ते योजयति जीवसंसृतौ निमित्तं भवतीत्यर्थः॥ ५१॥

अज्ञः अत एव अजितषड्वर्गः नेच्छन्ननिच्छन्नपि कर्माणि कार्यते लिङ्गदेहेनेति शेषः कर्मणा स्वकृतेन कोशकारः कीटविशेष इवात्मानमाच्छाद्य मुह्यति मुक्त्युपायहरिभजनं हित्वा संसृतिप्रापकाणि कर्माणि करोति॥ ५२॥

एतदेवाहुः। नहीति॥ ५३॥

अव्यक्तं भगवच्छक्तिभूतां प्रकृतिं लब्ध्वानादितोऽवलम्ब्य स्वभावेन वासनामयेन यथायोनि यथाबीजं मातृपितृसदृशं व्यक्तं मनुष्यादिरूपमव्यक्तं च सूक्ष्मकीटादिरूपं शरीरं भवति तत्तच्छरीरतादात्म्यं प्राप्नोति न त्वात्मानं विजानाति एवमनादितो जीवः संसारे भ्रमतीत्यर्थः॥ ५४॥

भाषा टीका।

इहांपर जिसने जितना जैसा धर्म किया होवे अथवा अधर्म किया होवे सोई पुरुष उसी प्रकार के उस पाप पुण्य के फलको परलोक मे भोगता है॥ ४५॥

हे देवश्रेष्ठ हो! इस लोक मे गुणोंकी विचित्रतासे जैसे तीनप्रकार दीखते हैं सबप्राणियोंमे तैसाही परलोकमे भी फलका अनुमान होता है॥ ४६॥

एष प्रकृतिसङ्गेन पुरुषस्य विपर्ययः ।
आसीत् स एव न चिरादीशसङ्गाद्विलीयते ॥ ५५ ॥
अयं हि श्रुतसम्पन्नः शीलवृत्तगुणालयः ।
धृतव्रतो मृदुर्दान्तः सत्यवान् मन्त्रविच्छुचिः ॥ ५६ ॥
गुर्वग्न्यतिथिवृद्धानां शुश्रूषुर्निरहङ्कृतः ।
सर्वभूतसुहृत्साधुर्मितवागनसूयकः ॥ ५७ ॥
एकदासौ वनं यातः पितृसंदेशकृद्द्विजः ।
आदाय तत आवृत्तः फलपुष्पसमित्कुशान् ॥ ५८ ॥
ददर्श कामिनं कञ्चिच्छूद्रं सह भुजिष्यया ।
पीत्वा च मधुमैरेयं मदाघूर्णितनेत्रया ॥ ५९ ॥
मत्तया विश्लथन्नीव्या व्यपेतं निरपत्रपम् ।
क्रीडन्तमनुगायन्तं हसन्तमनयान्तिके ॥ ६० ॥
दृष्ट्वा तां कामलिप्तेन बाहुना परिरम्भिताम् ।
जगाम हृच्छयवशं सहसैव विमोहितः ॥ ६१ ॥
स्तम्भयन्नात्मनात्मानं यावत्सत्वं यथाश्रुतम् ।
न शशाक समाधातुं मनो मदनवेपितम् ॥ ६२ ॥
तन्निमित्तस्मरव्याजग्रहग्रस्तो विचेतनः ।
तामेव मनसा ध्यायन् स्वधर्माद्विरराम ह ॥ ६३ ॥
तामेव तोषयामास पित्र्येणार्थेन यावता ।
ग्राम्यैर्मनोरमैः कामैः प्रसीदेत यथा तथा ॥ ६४ ॥

भाषा टीका ।

जैसे वर्तमान वसंतादि कालसे वीते तथा आनेवाले वसंतादि कालका पुष्पादिकों का अनुमान होता है तैसे ही वर्तमान जन्मसे भूत भविष्यत् जन्म का अनुमान होता है तैसे उहां के धर्माधर्मों का अनुमान होता है ॥ ४७ ॥

यम अन्तर्यामी देवतो अपने स्थानमे रहकर सब के धर्माधर्म पूर्वरूप को जान जाता है सो अज भगवान् पहिले ही मन से विचार कर लेता है ॥ ४८ ॥

जैसे एकही शरीरमे पशुआदि जीव वर्तमान कालको ही जानता है भूत भविष्यत् नहीं जानता है तैसे यह मनुष्य अपने जन्मों के स्मरण न रहने से दूसरे जन्म को नहीं जानता है ॥४९॥

सोलहमे मन- के सहित सतरह वां एक जीव पांच कर्मेन्द्रियों से गमनादि स्वार्थों को करता है पांच ज्ञानेन्द्रियोंसे पांच शब्दादिकों को जानता है कर्मेन्द्रिय ज्ञानेन्द्रिय मन इन के विषयों को इसी प्रकार भोगता है ॥ ५० ॥

यह इस प्रकार षोडश कला वाला तीन गुण शक्ति वाला अति कठिन यही लिंग शरीर पुरुष को हर्ष शोक भयदुःख देने वाले संसार को प्राप्त करता है ॥ ५१ ॥

जो जीव अज्ञानी है काम क्रोधादि षड्वर्ग को नहीं जीतता है तो नहीं इच्छा करता है तौ भी कर्म कराया जाता है जैसे कोशकार कीडा अपने आप से शरीर को ढांक कर मरता है तैसे कर्मोंसे यह जीव मोहित होकर बंध जाता है ॥ ५२ ॥

कोई भी किसी वखत मे कभीभी क्षण मात्र भी बिना काम किये नहीं रहता है परवश होने से स्वाभाविक गुणों से जबरदस्ती उसको कर्म करना पडता है ॥ ५३ ॥

पुण्य पाप रूप निमित को प्राप्त होकर बलवान स्वभाव से माता पिता के बीज योनि के सदृश स्थूलसूक्ष्मरूप को धारण करता है ॥ ५४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

संसारचक्रमुपसंहरन्तो मुक्तिप्रकारमाहुः । एष इति । ईशसङ्गात्परमेश्वरभजनात् ॥ ५५ ॥

तदेवं सामान्यतो धर्मादिनिर्णयमुक्त्वा प्रस्तुतस्याजामिलस्याधर्म

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रपञ्चयन्तो दण्डयत्वमाहुः । अयं हीति यावदध्यायसमाप्ति । तत्र द्वाभ्यां तत्पूर्ववृत्तान्तानुवादोऽन्यायातिरेकप्रदर्शनार्थः शीलं सुस्वभावो वृत्तं सदाचारो गुणाः क्षमादयस्तेषामालयः ॥ ५६ ॥

निरहङ्कृतो निरहङ्कारः ॥ ५७ ॥

तत आवृत्तो वनात्परावृत्तः ॥ ५८ ॥

भुजिष्यया भोगस्त्रिया दास्या मैरेयं मधु पैष्टीं सुरां पीत्वा मदेनाघूर्णिते नेत्रे यस्याः ॥ ५९ ॥

विशेषेण श्लथन्ती नीवी यस्यास्तया सह व्यपेतं स्वाचाराद्भ्रष्टम ॥ ६० ॥

कामेन कामोद्दीपकेन तदङ्गरागेण हरिद्रादिना लिप्तन ॥ ६१ ॥

सत्त्वं धैर्यं श्रुतं ज्ञानं तद्बलेन स्तम्भयन्नपि, मदनेन कम्पितं मनः समाधातुं नियमितुं शक्तोऽनाभूत् ॥ ६२ ॥

तद्दर्शनमेव निमित्तं यस्य स्मरव्याजग्रहस्य तेन ग्रस्तः विचेतनो गतस्मृतिः ॥ ६३ ॥

यावता समग्रेण ॥ ६४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रपञ्चितं संसरणप्रकारं तद्धेतुं चोपसंहरति । एष इति । पुरुषस्य जीवस्य प्रकृतिसङ्गेन यो विपर्ययः संसारः स एष एवम्विधः अथ संसरणनिस्तरणोपायमाहुः । असदिति । असदनभीऽचीनः स एवं विपर्यय एव । यद्वा । असदपुरुषार्थरूपः प्रकृतिकार्यरूपो वा परमार्थतो जीवेऽविद्यमानो वा विपर्ययस्य प्रकृतिसङ्गप्रयुक्तत्वस्यानुपदमेवोक्तत्वादीशसङ्गादीश्वरभक्त्या न चिराद् आशु विलीयते विलीनो भवति निवर्त्तत इत्यर्थः ॥ ५५ ॥

एवं प्रश्नात् परिहृत्य प्रकृतस्याजामिलस्य दण्ड्यत्वज्ञापनाय तद्वृत्तिं प्रपञ्चयन्ति । अयं त्वित्यादिना यावदध्यायम् । अयमजामिलः तावच्छ्रुतसंपन्नः वेदशास्त्राध्ययनसम्पन्नः शीलं सुस्वभावः वृत्तं सदाचारः गुणाः शान्त्यादयः एषामाश्रयः धृतं व्रतं स्त्रीसङ्गराहित्यात्मकब्रह्मचर्यरूपं येन मृदुः कोमलहृदयः दान्तो जितबाह्येन्द्रियः सत्यवागृतवादी मन्त्रवित्साविद्यादिमन्त्रोपासकः शुचिः सदा पवित्रः ॥ ५६ ॥

गुर्वादीनां शुश्रूषुः सेवकः अनहङ्कृतः । उक्तगुणकृताहङ्काररहितः सर्वभूतानां सुहृत्प्रियकारी साधुः परकार्यसाधकः मितवाग्यथोचितवक्ता अनसूयकः गुणेषु दोषानाविष्कारकः ॥५७॥

एवम्भूतोऽसौ द्विजः कदाचित्पितुर्निर्देशं पित्रा आदिष्टं प्रयोजनं करोतीति तथा वनं प्रति गतः ततो वनात्फलादीनादायावृत्तः ॥ ५८ ॥

पुनरागच्छन् तत्र वने भुजिष्यया दास्या सह वर्त्तमानं कञ्चित्कामिनं शूद्रं दृष्टवान् कथम्भूतया दास्या मैरेयं मधु पैष्टीं सुरां पीत्वा मदेन मैरेयमधुमदेनाघूर्णिते भ्रमन्ती नेत्रे यस्यास्तया ॥ ५९ ॥

मत्तयात एव विश्लथन्त्या विश्लथन्ती स्रंसमाना नीवी धृतवस्त्रग्रन्थिर्यस्यास्तया कथम्भूतं शूद्रं व्यपेतं सत्पथादपेतं बाह्यकमित्यर्थः अत एव निरपत्रपं निर्लज्जमेवम्भूतमनयोक्तविधया भुजिष्यया सहान्तिके समीप एव क्रीडादिकं कुर्वन्तं शूद्रम् ॥ ६० ॥

कामेन गर्वितेन शूद्रेण कर्त्रा बाहुना भुजेन परिरम्भितामालिङ्गितां तां दासीं च दृष्ट्वा हृच्छयस्य मनसिजस्य वशं जगाम प्राप कथम्भूतः सहसा बलाद्दैवेन स्वकीयदुरदृष्टेन विमोहितः ॥ ६१ ॥

यावत्सत्त्वं यावद्बलं यथाश्रुतं गुरुमुखाच्छ्रुतं मनोनिग्रहप्रकारमनतिक्रम्यात्मना विवेकेनात्मानं मनः स्तम्भयन्नियमयन्नपि मदनवेपितं मनः समाधातुं नियन्तुं न शशाक नाशक्नोत् ॥ ६२ ॥

सा दासी निमित्तं यस्य सः स्मर एव व्याजग्रहः कपटपिशाचस्तेन ग्रस्तः गृहीतः अत एव विचेतनः विगतपूर्वस्मृतिः तां दासीमेव मनसा चिन्तयन् स्वधर्मात्संध्योपासनादेर्विरराम धर्मं तत्याज हेति खेदे अहो एवम्भूतस्येदृशी दशा प्राप्तेति ॥ ६३ ॥

यावता कृत्स्नेन पित्र्येण पितृसम्बन्धिना अर्थेन वित्तेन तां दासीमेव तोषयामास तथा ग्राम्यैर्ग्रामेषु साधुभिरभिलषितैः कामैर्वस्त्राभरणादिभिर्यथा प्रीयेत सा तथा तां तोषयामास ॥ ६४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एवं संसारप्रसङ्गमुक्त्वा निवृत्त्युपायमाहुरित्याह । एष इति । य एषः पुरुषस्य विपर्ययः संसारः प्रकृतिसङ्गेनासीत् स एष ईश्वरसङ्गादीश्वरसेवालक्षणान्न चिरात्क्षिप्रं विलीयते समूलं विच्छिद्यते ॥ ५५ ॥

विद्वत्तादिगुणसम्पन्नत्वेन बुद्धिपूर्वकमेव पापकारित्वेन प्रायश्चित्तानधिकारित्वेन नाममात्रोच्चारणस्य प्रायश्चित्तत्वे सर्वेषामपि मुक्तिप्रसङ्गेन दण्डयजनाभावेन युष्मत्स्वाम्याज्ञाकारिणो यमस्याज्ञालङ्घनदोषप्रसक्त्याधिकारहानिलक्षणानर्थः स्यादित्यतो यमसकाशं गत्वायं तत्र दण्डेन शुद्धो भवत्वित्याहुरित्याह । अयं चेति । मन्त्रविद्वेदज्ञः ॥ ५६ ॥ ५७ ॥

आवृत्तो निवृत्तः ॥ ५८ ॥

भुजिष्यया दास्या मैरेयाख्यं मधुविशेषम् ॥ ५९ ॥

विश्लथन्ती नीवी वस्त्रग्रन्थिर्यस्याः सा तथा ॥ ६० ॥

स्वेदकम्पादिलक्षणजनकेन कामेन लिप्तेन वशीकृतेन हृच्छयः कामः तस्य वशम् ॥ ६१ ॥

यावत्सत्त्वं यथाशक्ति यथाश्रुतं "शूद्रयां योनौ पतेद्रेतः" इत्यादिशास्त्रश्रवणमनुसृत्य मदनवेपितं कामबीजावपनस्य क्षेत्रीभूतम्वा ॥ ६२ ॥

स्मर इति व्याजग्रहेण ग्रस्तः विचेतनः शास्त्रविरुद्धज्ञानः ॥ ६३ ॥

ग्राम्यैः कामभोगसाधनैः काम्यन्त इति कामाः विषयास्तैः ॥ ६४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एष इति । भयं द्वितीयाभिनिवेशतः स्यादितिवत् ॥ ५५ ॥

अत्र प्रकरणे तादृशस्वधर्मनिष्ठयापि पातान्न रक्षितोऽभूत्

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

किन्तु भक्त्याभासेनैव स रक्षित इति यमदूतवाक्यद्वारा श्रीशुकदेवस्याभिप्रायः ॥ ५६—६८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एष इति । प्रकृतिपुरुषयोः सङ्गाभ्यामेव बन्धमोक्षौ भवत इत्यर्थः ॥ ५५ ॥

तदेवं धर्माधर्मादिस्वरूपमुक्त्वा प्रस्तुतस्याजामिलस्य दयोऽयत्वज्ञापनायाधर्मं प्रपञ्चयन्ति । अयं हीत्यादिना । तत्रात्यन्तिशयानौचित्यं ज्ञापयितुं द्वाभ्यां धार्मिकत्वमाहुः । शीलं सुस्वभावः वृत्तं सदाचारः गुणाः क्षमादयः ॥ ५६—५८ ॥

भुजिष्यया दास्या सम्भुज्यमानया मैरेयं पैष्टं मधु मद्यं व्यपेतं लोकभयरहितमनया सह ॥ ५९ ॥ ६० ॥

कामलिप्तेन कामोद्दीपकहारिद्रसलिप्तेन ॥ ६१ ॥

आत्मानं मनः सत्त्वं धैर्यं श्रुतं ज्ञानम् ॥ ६२ ॥

विरराम हेति । तादृशस्वधर्मनिष्ठया ज्ञानेन च स तथा पतनाद्रक्षितुं शक्यो नाभूत् किन्तु नाम्न आभासेनापि तादृशाधःपातादपि रक्षित्वा वैकुण्ठं प्रस्थापयामास इति प्रकरणार्थेन धर्मज्ञानभक्तीनां प्रातिस्विकं बलं दर्शितम् ॥ ६३ ॥

यावता अर्थेन स्थितं तावतैव इति शेषः । सा यथा प्रसीदेत तथा अचेष्टतेति शेषः ॥ ६४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मुक्त्युपायमाहुः । एष उक्तप्रकारः पुरुषस्य जीवस्य विपर्ययः जन्ममरणलक्षणः संसारः ईशे भगवति यः सङ्ग आसक्तिर्भक्तिः तस्माद्विलीयते निवर्त्तते ॥ ५५ ॥

प्रस्तुतमाहुः । अयमित्यादिना । श्रुतसम्पन्नः गुरुमुखाच्छ्रुतेन शास्त्रेण संयुक्तः शीलं सुस्वभावः वृत्तं सदाचारः गुणाः क्षमादयस्तदालयः ॥ ५६ ॥

एवं बहुगुणाढ्योऽपि निरहङ्कृतः गताहङ्कारः ॥ ५७ ॥

ततो वनादावृत्तः परावृत्तः ॥ ५८ ॥

मैरेयं पैष्टं मधु मद्यं पीत्वा भुजिष्यया दास्या सह क्रीडन्तमनुगायन्तं हसन्तं कञ्चिच्छूद्रमन्तिके निकटे ददर्शेति अधोऽन्वयः मदेनाघूर्णिते नेत्रे यस्यास्तया ॥ ५९ ॥

विशेषतः श्लथन्ती नीवी यस्यास्तया अनया नयरहितया धर्ममर्यादारहितया कथम्भूतं व्यपेतं धर्ममर्यादातो भ्रष्टम् ॥ ६० ॥

कामलिप्तेन मदनाविष्टेन शूद्रेण कर्त्रा बाहुना करणेन परिरम्भितां दृष्ट्वा सहसैव विमोहितो हृच्छयवशं जगाम मदनाविष्टोऽभूत् ॥ ६१ ॥

आत्मना चित्तेन आत्मानं मनः यावत्सत्त्वं धैर्यं यथा श्रुतं यथोपदेशं स्तम्भयन्नपि मदनेन वेपितं कम्पितं मनः समाधातुं न शशाक ॥ ६२ ॥

तद्दर्शनान्निमित्तेन स्मरव्याजेन मदनमिषेण ग्रहेण ग्रस्तचेतनो नष्टस्मृतिः स्वधर्माद्विरराम विमुखोऽभूत् ॥ ६३ ॥

पित्र्येण पितृसम्बन्धिना अर्थेन वित्तेन ग्राम्यैः कामुकजनप्रियैः कामैर्वस्त्रालङ्कारादिभिर्यथा सा प्रसीदेत तथा तामेव तोषयामास ॥ ६४ ॥

भाषा टीका ।

प्रकृति के संग से जो यह पुरुष का विपर्यय होता है सोई थोडे काल में ईश्वर के संग से नष्ट होजाता है ॥५५॥

यह अजामिल वेद पढा था शील आचरण गुणों वाला था व्रतों का धारण करने वाला था कोमल चित्तवाला था इन्द्रियों को जीतने वाला सत्य बोलने वाला मन्त्रों को जानने वाला पवित्र था ॥ ५६ ॥

गुरु अग्नि अतिथि वृद्धों की सेवा करने वाला अहङ्कार रहित सर्व भूतों का सुहृत् साधु थोडे बोलने वाला निन्दा नहीं करने वाला था ॥ ५७ ॥

एक दिन यह पिता की आज्ञा से वनको गया फल फूल समिध कुशों को लेकर उहां से जब आता था तब ॥ ५८ ॥

मदिरा के पीने से मद के मारे जिसके नेत्र घूमरहे हैं ऐसी एक व्यभिचारिणी स्त्री के साथ क्रीडा करते हुये किसी शूद्र को रस्ते में इसने देखा ॥ ५९ ॥

नीचे का पहिरा वस्त्र जिसका खुलता सा था ऐसी मतवाली व्यभिचारिणी के पास में उसी के साथ क्रीडा करता था गाता था भ्रष्ट आचार वाला था निर्लज्ज था हसता था ऐसे शूद्रको इसने देखा ॥ ६० ॥

काम उद्दीपन करने वाले चन्दनादि से लिप्त भुजा में आलिंगन करी हुई उस स्त्री को देखकर मोहित होगया शीघ्रही काम के वश होगया ॥ ६१ ॥

जितना इसका शास्त्र सुनने का ज्ञान था जितनी बुद्धि थी तिससे मन से चित्तको बहुत रोका तो भी कन्दर्प से कंपित मनको नहीं समाधान कर सका ॥ ६२ ॥

उसके निमित्त से कन्दर्परूपी ग्रह से ग्रसित होगया चेतना नहीं रही मन से उसी नारी का ध्यान करने से अपने धर्म से निवृत्त होगया ॥ ६३ ॥

ग्राम्य मनोरम कामों से और पिता को जितना धन मिला तिस से जैसे उस का सन्तोष होवै तैसे उस नारी को सन्तुष्ट करता था ॥ ६४ ॥

विप्रां स्वभार्यामप्रौढां कुले महति लम्भिताम् ।
विससर्जाचिरात् पापः स्वैरिण्यापाङ्गविद्धधीः ॥ ६५ ॥
यतस्ततश्चोपनिन्ये न्यायतोऽन्यायतो धनम् ।
बभारास्याः कुटुम्बिन्याः कुटुम्बं मन्दधीरयम् ॥ ६६ ॥
यदसौ शास्त्रमुल्लङ्घ्य स्वैरचार्यार्यगर्हितः ।
अवर्तत चिरं कालमघायुरशुचिर्मलात् ॥ ६७ ॥
तत एनं दण्डपाणेः सकाशं कृतकिल्बिषम् ।
नेष्यामोऽकृतनिर्वेशं यत्र दण्डेन शुद्ध्यति ॥ ६८ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां षष्ठस्कन्धे
अजामिलोपाख्याने श्रीविष्णुयमपुरुषसम्वादे
प्रथमोऽध्यायः ॥ १ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

लम्भितामपरिणीताम् ॥ ६५ ॥ ६६ ॥

अघरूपमायुर्यस्य मलमेव तदीयमन्नादिकमस्तीति मलात् ॥६७॥

अकृतनिर्वेशमकृतप्रायश्चित्तम् अस्यैव च हितार्थं नेष्याम इत्याहुः । यत्रेति ।॥ ६८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अप्रौढामरजःप्रादुर्भावां प्रियां सुन्दरीं महति कुले सत्कुले लम्भितां लब्धां भार्यामचिरादाशु विससर्ज पापः पापाचारः स्वैरिण्याः कटाक्षापाङ्गेन करणेन विद्धा विनाशिता धीर्विवेको यस्य सः ॥ ६५ ॥

न्यायतोऽन्यायतो वा यतस्ततो धनमुपानिन्ये आनीतवान् मन्दधीरयमजामिलः कुटुम्बिन्याः पुत्रवत्याः कुटुम्बं पुत्रादिरूपं बभार पुपोष ॥ ६६ ॥

एवं तस्य वृत्तिमभिधायावश्यमस्य दण्डं प्रत्यर्हतास्तीत्याहुः । यद्यस्मादसावजामिलः शास्त्रपथमतिक्रम्य स्वेच्छाचारी आर्यैः शिष्टैर्गर्हितः अघायुः पापाभिवृद्धायुष्कः दासीसङ्गरूपान्मलान्निमित्तमशुचिः सन् चिरङ्कालमवर्त्तत ॥ ६७ ॥

ततः कृतं किल्बिषं पापं येन अकृतः निर्वेशः निष्कृतिर्येन तमेनं दण्डपाणेर्यमस्य सकाशं प्रति नेष्यामः प्रापयिष्यामः सकाशं विशिनष्टि । यत्र दण्डपाणेः सकाशे दण्डेन नरकानुभवरूपेण शुद्ध्यति ॥ ६८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

(१) अप्रौढामनवाप्तयौवनाम् ॥ ६५ ॥ ६६ ॥

स्वैरचारी निरङ्कुशत्वेन वर्तमानः अघायुः पापजीवनः मलाद्रागादिदोषात् ॥ ६७ ॥

अकृतनिर्वेशं यावता निर्वेशेन पापशुद्धिः स्यात्तावत्पापप्रायश्चित्तं न कृतवांस्तं यत्र नीतो यमभटकृतदण्डेन शुद्धो भवात ॥ ६८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

लम्भितां तस्याः पित्रा विचार्यैव दत्तामित्यर्थः । स्वैरिण्यापाङ्गेति सन्धिरार्षः ॥ ६५ ॥ ६६ ॥

अघरूपमघार्थं वा आयुर्यस्य सः । मलं वेश्योच्छिष्टमेवास्तीति सः अकृतप्रायश्चित्तं यत्र शुद्ध्यतीत्यस्योपकार एव प्रवर्त्तमानानस्मान् कथं वारयथेति भावः ॥ ६७ ॥ ६८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ॥
षष्ठस्य प्रथमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १ ॥

---

(१) अनाप्तयौवना प्रौढा विप्रा चाव्यभिचारिणीति प्रमाणम् ।

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अप्रौढां किशोरीं लम्भितां परिणीतां स्वैरिण्यपाङ्गेत्यत्र सन्धिरार्षः अपाङ्गेन विद्धा धीर्यस्य सः ॥ ६५ ॥

बभार पुपोष ॥ ६६ ॥

स्वैरचारी स्वेच्छाचारी अघरूपमायुर्यस्य सः मलं दास्या उच्छिष्टमन्नादिकमत्तीति मलाद्यतः अवर्तत ॥ ६७ ॥

ततो हेतोः अकृतनिर्वेशमकृतप्रायश्चित्तं दण्डपाणेः सकाशं नेष्यामः यत्र दण्डेन शुद्ध्यति पवित्रो भविष्यतीत्यर्थः ॥ ६८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

प्रथमोऽध्यायः ॥ १ ॥

भाषा टीका ।

ब्राह्मणी युवती अपनी भार्या जोकि उत्तम कुल मे प्राप्त है तिसको उस पापी ने व्यभिचारिणी के नेत्रों के देखने मे मन के फसजाने से छोडदिया ॥ ६५ ॥

इस कुबुद्धि ने इधर उधर से न्याय से अन्याय से धन लाकर उस कुटुंबवाली के कुटुंब को पोषण किया ॥ ६६ ॥

जिस हेतु से यह ब्राह्मण शास्त्र के मर्यादा को उल्लङ्घन करके सत्पुरुषों से निंदित होकर यथेच्छाचारी होगया पापी होकर बहुत काल पर्यन्त संसार मे रहा है ॥ ६७ ॥

तिस हेतु से पाप करने वाले इस को दण्ड पाणि यमराज महाराज के पास लेजांयगे इसने प्रायश्चित्त भी नहीं किया है तब उहां दण्ड से शुद्ध होजायगा ॥ ६८ ॥

इति श्रीभागवत षष्ठस्कन्ध प्रथम अध्यायका

भाषानुवाद लक्ष्मणाचार्यकृत

समाप्त ॥ १ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे प्रथमोऽध्यायः समाप्तः ॥ १ ॥

॥ द्वितीयोऽध्यायः ॥

—०:*:०—

श्रीशुक उवाच ।

(१) एवं ते भगवद्दूता यमदूताभिभाषितम् ।
उपधार्याथ तान् राजन् ! प्रत्याहुर्नयकोविदाः ॥ १ ॥

विष्णुदूता ऊचुः ।

अहो कष्टं धर्मदृशामधर्मः स्पृशते सभाम् (२) ।
यत्रादण्ड्येष्वपापेषु दण्डो यैर्ध्रियते वृथा ॥ २ ॥
प्रजानां पितरो ये च शास्तारः साधवः समाः ।
यदि स्यात्तेषु वैषम्यं कं यान्ति शरणं प्रजाः ॥ ३ ॥
यद्यदाचरति श्रेयानितरस्तत्तदीहते ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ ४ ॥
यस्याङ्के शिर आधाय लोकः स्वपिति निर्वृतः ।
स्वयं धर्ममधर्मं वा न हि वेद यथा पशुः ॥ ५ ॥
स कथं न्यर्पितात्मानं कृतमैत्रमचेतनम् ।
विश्रम्भणीयो भूतानां सघृणो द्रोग्धुमर्हति ॥ ६ ॥
अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि ।
यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः ॥ ७ ॥
एतेनैव ह्यघोनोऽस्य कृतं स्यादघनिष्कृतम् ।
यदा (३) नारायणायेति जगाद चतुरक्षरम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वितीये वैष्णवैर्यस्मान्नाममाहात्म्यमद्भुतम् ।
श्रावयित्वा द्विजो विष्णोर्लोकं नीत इतीर्यते ॥ १ ॥

नयकोविदाः न्यायनिपुणाः ॥ १ ॥

धर्मदृशां सतां सभामधर्मः स्पृशति तदाहुः । यत्र सभायां यैर्धर्मदृग्भिस्तेषां तां सभाम् ॥ २ ॥

पितरः पितृवत्पालकाः शास्तारोऽनुशिक्षकाः वैषम्यमदण्ड्यदण्डनम् ॥ ३ ॥

एतत्प्रवर्तितमधर्ममन्योऽपि करिष्यतीति महत्कष्टमभूदित्याहुः । यद्यदिति । श्रेयान् श्रेष्ठः ॥ ४ ॥

विश्वस्तघातादपीत्याहुः । यस्येति द्वाभ्याम् । निर्वृतो निश्चिन्तः ॥ ५ ॥

विश्वासेन नितरामर्पित आत्मा येन तं विश्रम्भणीयो विश्वसनीयः सघृणश्चेत् ॥ ६ ॥

नन्वस्य पापिनो दण्डे किमर्थमाक्रोशः क्रियते तत्राहुः । अयं हीति । यद्यस्माद्विवशोऽपि हरेर्नाम व्याजहारोच्चारितवान् न केवलम्प्रायश्चित्तमात्रं हरेर्नामापि तु स्वस्त्ययनं मोक्षसाधनमपि

"सकृदुच्चारितं येन हरिरित्यक्षरद्वयम् ।
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति" ॥

इति स्मृतेः ॥ ७ ॥

(१) एतच्च । (२) सताम् । (३) नारायणेति जगादेति श्रीविजय० ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु कर्मसाद्गुण्यकरं हरेर्नामेतियुक्तम् ।

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

इत्यादिवचनात् स्वातन्त्र्येण त्वघनिवर्तकं हरेर्नाम कथं स्यात्तत्राहुः । एतेनैवेति । अघोनः अघवतः मघवच्छब्दवद्रूपं यत् आ इति च्छेदः आंहिषदाभासमात्रं चतुरक्षरं यन्नाम जगाद एतेनैव केवलेन चतुरक्षरमित्यनेनाधिक्यं च दर्शितं कथं जगाद नारायण आय आगच्छ इत्येवं विक्रोशरूपेण पुत्राह्वानेन अयं भावः कर्माङ्गत्वेऽपि हरिनाम्नः खादिरत्वादिवत्संयोगपृथक्त्वेन सर्वप्रायश्चित्तार्थत्वं युक्तमेव तथा हि "अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः । पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव„इत्यादिभिः पुराणे तावत्सहस्रशो नाम्नः स्वातन्त्र्यमवगम्यते न चैतेऽर्थवादा इति शङ्कनीयं विधिशेषत्वाभावात् न च विध्यश्रवणादन्यशेषता कल्पनीया "यदाग्नेयोऽष्टाकपालो भवति" इत्यादिवदप्राप्तार्थत्वेन विधिकल्पनोपपत्तेः मन्त्रेषु च "मर्ता अमर्त्यस्य ते भूरिनाम मनामहे विप्रासो जातवेदसः । आस्य जानन्तो नामचिद्विवक्तन" इत्यादिषु नाम्नस्तपोदानादिसर्वधर्माधिक्यमवगम्यते उपपादितं च मन्त्रार्थवादानामपि स्वार्थे प्रामाण्यं देवताधिकरणे तस्मात्कृतिनारायणनामाभासमात्रेणैव सर्वाघनिष्कृतं कृतं स्यादिति ८

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं यमदूतैरुक्ता विष्णुदूता आहुरित्याह मुनिः । एवमिति । हे राजन् ! एवं यमदूतैर्विशेषेण भाषितमुपधार्य श्रवणेन मनसि धृत्वा न्यायनिपुणा भगवद्दूतास्तान् यमदूतान् प्रत्याहुः ॥ १ ॥

उक्तमेवाह । अहो इत्यादिना । "स वेद परमं गुह्यं धर्मस्य भगवान् यमः" इत्यन्तेन अहो कष्टं प्राप्तं किं तद्धर्मदर्शां सभामधर्मः स्पृशते कोऽधर्मस्तत्राहुः । यत्र यमस्य सभायामपापेष्वत एवादण्ड्येषु दण्डः यैर्भवादृशैर्ध्रियते कार्यतेऽयमेवाधर्म इति भावः ॥ २ ॥

धर्माधर्मविभागेन शास्तॄणां वैषम्यमनुचितमित्याहुः । प्रजानामिति । ये शास्तारो भवादृशाः ते समाः वैषम्यरहिताः साधवः दोषापाकरणरूपपरकार्यसाधका अत एव प्रजानां पितरः हितकारिणः यदि ईदृशेषु भवत्स्वेव वैषम्यं स्यात्तर्हि प्रजाः कं शरणं प्राप्नुवन्ति ॥ ३ ॥

युष्मादृशः श्रेष्ठः कृत्स्नविद्यद्यत्कर्माचरति तत्तदेव कर्मेतरोऽकृत्स्नविद्पीहते चेष्टते सः श्रेयान् यदेव शास्त्रं प्रमाणं कुरुते प्रमाणमिति मन्यते तदेवेतरो लोकोऽनुवर्त्तते अतः श्रेयसां स्वानुष्ठानेन धर्मप्रवर्तकानां वेदानुवर्त्तिनामिदमदण्ड्यदण्डनमनुचितमित्यर्थः ॥ ४ ॥

किञ्च सापराधलोकस्य दण्डयिता यमः न त्वपापिनामिति विश्वासविषय एव प्राकृतवद्वैषम्येणानपराधिनोऽपि दण्डयिता स्यात्तर्हि विश्वस्तघातकतादोषः प्रसज्यते तल्लोकपरिपाटीमुखेनाहुः । यस्येति । यस्य विश्वसनीयस्याङ्के उत्सङ्गे शिरः आधाय विन्यस्य यो लोको जनः निर्वृतः सुखितः स्वपिति तमेव लोकं स एव भूतानां विस्रम्भणीयः कृपावांश्च कथं द्रोग्धुमर्हतीत्यन्वयः निर्वृतो लोकः कथम्भूतः यथा पशुः तद्वत् स्वयं धर्ममधर्मं वा न वेद किन्तु केवलं ममायं हितकारीत्येवं वेदेति भावः ॥ ५ ॥

लोकं कथम्भूतं न्यर्पितात्मानं नितरामर्पितः समर्पितः आत्मा देहो येन कृतं मैत्रं विश्वासो येन अचेतनं न विद्यते चेतना विवेको यस्य अकेतनमिति पाठे न विद्यते केतनं शरणमन्यद्यस्य तम् ॥ ६ ॥

नन्वस्य पापिनो दण्डे किमर्थमाक्रोशः क्रियते तत्राहुः । अयं हीति । जन्मनां कोटिभिरर्जितानामंहसां पापानां कृतः निर्वेशः प्रायश्चित्तं येन तथाभूतोऽयं कोऽसौ निर्वेशः तत्राहुः विवशः परवशोऽपि हरेः स्वस्त्ययनं शुभावहं नाम व्याजहार जगादेति यदसावेव निर्वेश इत्यर्थः ॥ ७ ॥

ननु "नान्यः पन्था अयनाय विद्यते" इति न्यासोपासनव्यतिरिक्तोपायान्तरनिषेधात्कथं पारवश्यकृतस्य सङ्केतितनामोच्चारणस्याखिलांहसो निरसनद्वारेण मुक्तिसाधनत्वमित्यत्राहुः । एतेनैवेत्यादिना यतस्तद्विषया मतिरित्यन्तेन । यदा प्रयाणसमये नारायणायेत्येतच्चतुरक्षरं नाम जगादेति यदेतेनैवास्याघोनः अघानां निष्कृतं कृतं स्यात् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रीहरिनामसंकीर्तनमाहात्म्यमस्मिन्नध्याये वक्ति तदर्थं श्रीविष्णुदूता यमदूतान्प्रत्युपोद्घातं रचयन्तीत्याह । बादरायणिरिति (१) नयकोविदाः प्रायश्चित्तशास्त्रोक्तन्यायसूक्ष्मपण्डिताः ॥ १ ।२। ३।

यद्वाक्यं प्रमाणत्वेन करोति तद्वाक्यमनुसृत्य वर्तते लोको जनः ॥ ४ ॥

स्वयं परबोधमन्तरेण पशुः पूर्वापरादिदिगनभिज्ञः ॥ ५ ॥

सः प्रमाणभूतः पुरुषः आत्मन्यर्पित आत्मा सर्वस्वलक्षणो येन स तथा तम् अचेतनमज्ञानिनं विस्रम्भणीयो विश्वसनीयः "घृणा द्रवीभावे„ इति धातोः परक्लेशदर्शने यस्य चित्तं द्रवीभवति स सघृणः ॥ ६ ॥

अकृतनिर्वेशमित्यत्राहुरित्याह । अयमिति । यमदूतान्दृष्ट्वा पुत्रे साङ्केतितमपि नारायणनाम स्मृत्वास्य नाम्नो हरिरेव मुख्यार्थ इति प्राचीनपुण्यनिचयाक्रमादिति ज्ञानोदयादुत्पन्नभक्त्या विवश इतीममर्थं हिशब्दो वक्ति ॥ ७ ॥

विश्वासजननार्थं पुनरुक्तार्थं द्रढयति । एतेनेति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ यत्तु के यूयमित्यादिना यमदूतैः स्वप्रभोर्धर्मराजत्वाल्लोकपालत्वं दर्शितं तदभ्युपगमवादेन तदाक्षिपन्ति । अहो कष्टमित्यादिपञ्चभिः ॥ १—६ ॥

विवशोऽपि अस्तु तावदेनमेव पुत्रमुद्दिश्य पूर्वपूर्वस्फुटोच्चरितलब्धनाम्नो महिमेति भावः ॥ ७ ॥

ननु तर्हि तन्नामकरणे प्रथमतन्नाम्नैव जन्मकोट्यंहसां नाशोऽभूत्तदनन्तरं मुहुः कृतपापस्यास्य तत्समाप्तिरनेनैवाभूदिति वक्तुं युज्यते इत्याशङ्क्य पूर्ववाक्याभिप्रायं स्वयमेवाह । एतेनैवेति ।

(१) बादरायणिरुवाचेति मूलद्वयम् ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

यदि पूर्वं तन्नोच्चारितवान् तथाप्येतेनैव निष्कृतं कृतं स्यादिति हि तत्रार्थ इत्यर्थः। इत्यन्याङ्गत्वं सुतरां परिहृतम् ॥ ८ ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

द्वितीये नाममाहात्म्याद्यमदूताः पराहताः।

अजामिलस्य निर्वेदो वैकुण्ठारोह उच्यते ॥

नयकोविदा नीतिशास्त्रज्ञा यथा वदन्ति तथा ॥ १ ॥

अरे ज्ञाताः स्थ ज्ञाताः स्थ धर्मराजस्यैव किङ्कराः यूयमलं प्रलापैः किन्तु धर्मराजस्यैव धर्मराजता विपरीतलक्षणयैवेति जानीम इत्याहुः। अहो इत्यस्मत्कर्णपथमद्यावधि वार्तेयं नापतदिति भावः। कष्टमित्येतावता अन्यायेन लोकानां का गतिर्भविष्यतीति भावः। ननु के किमेवमाक्षिप्यन्ते तत्र किं ब्रूमः शृणुतरे शृणुतेत्याहुः। धर्मद्रष्टा धर्मदर्शिनामपि सभामधर्म एव स्पृशति धर्मेऽप्यधर्ममेव पश्यन्तीति भावः। यत्र सभायामपापेष्वपि जनेषु अपापत्वाददण्ड्येषु दण्डो ध्रियते इत्येषैवाधर्मदर्शितेति भावः ॥ २ ॥

शृणुतरे प्रजानां पितृत्वं शास्तृत्वं साधुत्वं साम्यञ्च युष्मत्स्वामिनां यत् श्रूयते तत् खलु किं सम्प्रत्यनृतमेवाभूदित्याहुः। प्रजानामिति। वात्सल्यात् पितरः धर्मशिक्षणात् शास्तारः सर्वत्र स्वसुखदुःखसाम्यदर्शनात् समाः। तेषु वैषम्यमिति पितरोऽपि प्रजापीडकाः शास्तारोऽपि स्वकिङ्करानपि धर्मं न शिक्षयन्ति साधवोऽप्यहितकारिणः समा अपि परदुःखानभिज्ञाः कं यान्तीति प्रजानां कष्टदर्शनमेतदस्माभिस्तु दुःसहमेवेति भावः ॥ ३ ॥

तदेवमचिरेण धर्ममार्ग एवोच्छन्नो भविष्यतीत्याहुः। यद्यदिति ॥ ४ ॥

किञ्च विश्वस्तघातादधिकं कमधर्मं ब्रूम इत्याहुः। यस्येति द्वाभ्याम् ॥ ५ ॥

विश्वासेन नितरामर्पित आत्मा येन तं कथं विश्वसिता इत्यत आहुः। भूतानां विश्वसनीयः सदयश्च ॥ ६ ॥

ननु परःसहस्रमहापापकृतमकृतप्रायश्चित्तमजामिलं शोधयितुमेव नरकं निनीषुभिरस्माभिरस्मत्स्वामिभिर्वा किमपराद्धं यदेवमाक्षिपथेति तत्राहुः। अयं हि निश्चितमेव कृतप्रायश्चित्त एव न केवलमेकजन्मकृतपापानामपि तु जन्मकोटीति यद्यस्माद्विवशोऽपि हरेर्नाम व्याजहार

नाम्नो हि यावती शक्तिः पापनिर्हरणे हरेः।
तावत् कर्त्तुं न शक्नोति पातकं पातकी नरः।

इति।

अवशेनापि यन्नाम्नि कीर्त्तिते सर्वपातकैः।
पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव।

इति स्मृतेः। न केवलं प्रायश्चित्तमात्रं हरेर्नाम अपि तु स्वस्त्ययनं मोक्षसाधनमपि

सकृदुच्चारितं येन हरिरित्यक्षरद्वयम्।
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति।

इति स्मृतेः ॥ ७ ॥

ननु हरेर्नामेति बुद्ध्या प्रायश्चित्तत्वेन नाम न गृहीतं किन्त्वस्मद्दर्शनोत्थभयेन स्वपुत्राह्वानमेव कृतमिति चेत् न जानीथ रे तत्त्वं बहिर्मुखा न जानीथेत्याहुः। एतेनैव हि निश्चितमेव अघोनः अघवतः मघवच्छाब्दवद्रूपं पुत्राह्वानेनैव अघनिष्कृतमपि कृतं स्यादघनिष्कृतानुसन्धानाभावेऽपीत्यर्थः। यदेति। इदानीन्तनेन पुत्राह्वानेन अघनिष्कृतं स्यादिति कियदेतत् किन्तु यदा पूर्वं नामकरणादिसमयेऽपि हे नारायण! आयस्व मातुरङ्कान्ममाङ्कमागच्छेत्यपभ्रंशभाषयापि जगाद तदैवाघनिष्कृतं कृतमभूदित्यर्थः। चतुरक्षरमिति नारायणनाम्न एकद्व्यक्षरेणापि सर्वपातकनाशो भवेदिति भावः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

भगवन्नाममाहात्म्यं निर्णीय भगवत्पार्षदा यमदूतेभ्योऽजामिलममूमुचन् स च कृतभगवदाराधनो भगवत्पदं गत इति वर्ण्यते द्वितीयेनाध्यायेन। नयकोविदाः सिद्धान्ताभिज्ञाः ॥ १ ॥

अहो आश्चर्यमिदं कष्टं दुःखं च तदेवाहुः। धर्मद्रष्टा धर्मदर्शिनामपि सभामधर्मः स्पृशते कां केषां यत्र सभायां यैरेभिरदण्ड्येषु वृथा दण्डो ध्रियते तां तेषाम् ॥ २ ॥

आश्चर्यं कष्टं च पुनर्दर्शयन्ति। प्रजानामिति। पितरः शास्तारः अनुशिक्षकाः साधवः शुभाचाराः समाः सर्वसुहृदश्च यदि तेषु वैषम्यम् अपितृवत् अशास्तृवत् असाधुवत् विषमवत् विपरीतकारित्वं स्यात्तदा कं शरणं रक्षितारं प्रजा यान्ति श्रेष्ठस्य श्रेष्ठाचारो लोकानां क्षेमकरः अन्यथाचारस्तु नाशहेतुरित्याहुः। यद्यदिति। श्रेष्ठेन धर्मराजेनादण्ड्यदण्डने कृते अन्येऽप्येवं करिष्यन्तीति महत्कष्टमिति भावः ॥ ३-४ ॥

अपापस्य दण्डनं धर्मराजोऽपि न कुर्यादित्याहुः। यस्याङ्क इति द्वाभ्याम्। यथा पशुः धर्ममधर्मं न जानाति तद्वत् स्वयं धर्ममधर्मं वा न वेद किन्तु अधर्मनाशार्थं गुर्वाद्युपदेशवर्जितो भवति एवंविधो लोकः यस्य लोकपालस्याङ्के शिर आधाय आत्मानं रक्षणीयतया तस्मिन् समर्प्येत्यर्थः। निर्वृतः सुखितः स्वपिति अस्मद्धर्माधर्मानुसारेण लोकपालः फलं यथार्थं दास्यतीति विश्वस्तो भवति ॥ ५ ॥

स भूतानां विश्रम्भणीयो लोकपालः सघृणः सदयः स्वर्पितात्मानं नितरामर्पित आत्मा रक्षणीयतया येन तं कृतमैत्रं कृतविश्वासमचेतनं पशुवत्स्वातन्त्र्येण धर्माधर्मविवेकहीनं कथं द्रोग्धुमर्हति न कथमपीत्यर्थः ॥ ६ ॥

अजामिलस्तु सर्वथा निष्पाप इत्याहुः। अयमिति षड्भिः। न जन्मकोटिपापनिराकरणमात्रेण चरितार्थं किन्तु स्वस्त्ययनं परमपुरुषार्थदम्।

सकृदुच्चारितं येन हरिरित्यक्षरद्वयम्।
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति

इति स्मृतेश्च ॥ ७ ॥

अघोनः अघवतः अस्य यत् आ ईषदाभासमात्रमपि नारायण! आय आगच्छेति पुत्राह्वानेन चतुरक्षरं जगाद एतेनैव अघनिष्कृतं स्यात् ॥ ८ ॥

स्तेनः सुरापो मित्रध्रुग्ब्रह्महा गुरुतल्पगः ।
स्त्रीराजपितृगोहन्ता ये च पातकिनोऽपरे ॥ ९ ॥
सर्वेषामप्यघवतामिदमेव सुनिष्कृतम् ।
नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥ १० ॥
न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा विशुद्ध्यत्यघवान् व्रतादिभिः ।
यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलम्भकम् ॥ ११ ॥
नैकान्तिकं तद्धि कृतेऽपि निष्कृते मनः पुनर्धावति चेदसत्पथे ।
तत्कर्मनिर्हारमभीप्सतां हरेर्गुणानुवादः खलु सत्त्वभावनः ॥ १२ ॥
अथैनं मापनयत कृताशेषाघनिष्कृतम् ।
यदसौ भगवन्नाम म्रियमाणः समग्रहीत् ॥ १३ ॥
साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥ १४ ॥
पतितः स्खलितो भग्नः संदष्टस्तप्त आहतः ।
हरिरित्यवशेनाह पुमान्नार्हति यातनाम् ॥ १५ ॥
गुरूणां च लघूनां च गुरूणि च लघूनि च ।
प्रायश्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः ॥ १६ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले हे राजन् ! श्रीभगवान् के दूत इस प्रकार से यमदूतों के भाषण को सुन कर नीति में बडे निपुण होने से इन वचनों को बोले ॥ १ ॥

विष्णुदूत बोले अहो बडे कष्ट की बात है कि धर्म जानने वालों के सभा में भी अधर्म का प्रवेश होता है जो लोग कि नहीं दंड ने योग निष्पापी पुरुषों के ऊपर दंड व्यर्थ धारण करते हैं ॥ २ ॥

जो कि प्रजों के पिता के तुल्य हैं शासन करने वाले हैं सम बुद्धि वाले साधु हैं उन्हीं में यदि वैषम्य होगा तो प्रजा किस के शरण जाँयगे ॥ ३ ॥

श्रेष्ठ पुरुष जिस जिस क्रिया का आचरण करते हैं दूसरा भी उसी क्रिया का आचरण करेगा श्रेष्ठ लोग जिसको प्रमाण मानते हैं उसी को सब लोग अनुवर्तन करते हैं ॥ ४ ॥

पशु जैसे अपने मालिक के पालन के विश्वास से रहता है तैसे सब लोक जिसके गोद में मस्तक रख कर निर्भय सोते हैं स्वयं धर्म या अधर्म नहीं जानते हैं वह श्रेष्ठ पुरुष सब के विश्वास करने के योग्य होकर कृपालु होकर अपने आत्मा को समर्पण कर देने वाले मित्रता करने वाले अज्ञानि प्रजों को कैसे पीडा देने को योग्य है ॥ ५ ॥ ६ ॥

इस अजामिलने तो कोटिन जन्मों के सब पापों का प्रायश्चित्त कर लिया है जो कि परवश होकर भी सर्व मंगल कारक श्री हरि के नाम को इसने उच्चारण किया है ॥ ७ ॥

जो कि इसने नारायण ऐसे चार अक्षर उच्चारण किये हैं इसीसे इस पापी के सब प्रायश्चित्त हो चुके अब कुछ पाप बाकी नहीं रहा है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु कामकृतानां बहूनां महापातकानां सहस्रश आवर्तितानां द्वादशाब्दादिकोटिभिरप्यनिवर्त्यानां कथमिदमेकमेव प्रायश्चित्तं स्यात्तत्राहुः । स्तेन इति द्वाभ्याम् ॥ ९ ॥

सुनिष्कृतं श्रेष्ठं प्रायश्चित्तमिदमेव तत्र हेतुः । यतो नामव्याहरणात्तद्विषया नामोच्चारकपुरुषविषया मदीयोऽयं मया सर्वतो रक्षणीय इति विष्णोर्मतिर्भवति ॥ १० ॥

श्रेष्ठत्वमेवोपपादयन्ति । नेति द्वाभ्याम् । ब्रह्मवादिभिर्मन्वादिभिरुक्तैर्व्रतादिभिर्निष्कृतैस्तथा न शुध्यति उदाहृतैरुच्चारितैर्यथा नामपदैरित्यनेन नमामीत्यादिक्रियायोगोऽपि नापेक्षित इति दर्शितं किञ्च तन्नामपदोच्चारणमुत्तमश्लोकस्य गुणानां चोपलम्भकं ज्ञापकं भवति न तु कृच्छ्रचान्द्रायणादिवत्पापनिवृत्तिमात्रोपक्षीणमित्यर्थः ॥ ११ ॥

नैकान्तिकं नात्यन्तशोधकं तन्निष्कृतं यस्मिन् कृतेऽप्यसत्पथे

श्रीधरस्वामिकृतभावार्थदीपिका ।

पापमार्गे मनो धावति चेत् कर्मणां पापानां निर्हारमात्यन्तिकं नाशमिच्छतां हरेर्गुणानुवाद एव प्रायश्चित्तं यतोऽसौ खलु सत्त्वभावनश्चित्तशोधकः ॥ १२ ॥

अथ तस्मादेनं मा अपमार्गेण नयत कृतमशेषाणामघानां निष्कृतं येन यद्यस्मात् समग्रहीतसम्पूर्णमुच्चारितवान् नामैकदेशेनाप्यलमिति भावः म्रियमाण इत्यनेन पुनः पापान्तरासम्भव उक्तो न तु तत्कालत्वमेव विवक्षितं तदानीं कृच्छ्रादिविधिवन्नामोच्चारणविधेरप्यसम्भवात् न च विधिं विना काकतालीयनामोच्चारणं पापापहमिति प्रमाणमस्ति ॥ १३ ॥

नन्वयं पुत्रनामाग्रहीन्न तु भगवन्नाम तत्राहुः । साङ्केत्यं पुत्रादौ सङ्केतितं पारिहास्यं परिहासेन कृतं स्तोभं गीतालापपूरणार्थं कृतं हेलनं किं विष्णुनेति सावज्ञमपि वा वैकुण्ठनामोच्चारणम् ॥ १४ ॥

ननु नायं सङ्कल्पपूर्वकं वैकुण्ठनामाग्रहीत्किन्तु पुत्रस्नेहपरवशः सन्तत्राहुः । पतित इति । अवशेनापि यो हरिरित्याह । स यातनां नार्हति पुमानित्यनेन नात्र वर्णाश्रमादिनियम इत्युक्तम् अवशत्वमेवाह । पतितः प्रासादादिभ्यः स्खलितो मार्गे भग्नो, भग्नगात्रः संदष्टः सर्पादिभिः तप्तो ज्वरादिना आहतो दण्डादिना ॥ १५ ॥

ननु महतः पापस्य महदेव प्रायश्चित्तं युक्तं नत्वल्पं नामग्रहणमात्रं पापतारतम्येन कृच्छ्रादितारतम्यवत् तत्राहुर्द्वाभ्याम् । गुरूणां पापानां गुरूणि प्रायश्चित्तानि लघूनां च लघूनि तारतम्यं ज्ञात्वा मन्वादिभिरुक्तानि अतस्तत्र तथैव व्यवस्था हरिनाम्नस्तु नेयं व्यवस्थोक्ता ।

"विष्णोः स्मरणमात्रेण मुच्यते सर्वपातकैः" इति वचनात् न च सुराबिन्दुपाने महापातकत्वस्मरणवन्नाम्नस्तत्प्रायश्चित्तत्वस्मरणस्यायमतिभारः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न केवलं प्रतिपदोक्तप्रायश्चित्तादिवदन्तिमं नामस्मरणं कतिपयपापानां निष्कृतं किन्तु महापातकोपपातकसंकीर्णादिरूपेण बहुविधानां सर्वेषामपीत्याहुः । स्तेन इत्यादिना । स्तेनः स्वर्णचोरः स्तेनादयो ये, महापातकिनः ये च मित्रध्रुग्यादिहन्तार उपपातकिनः अपरे च ये नानाविधाः पातकिनः ॥ ९ ॥

तेषां सर्वेषामप्यघवतामिदमन्तिमं विष्णोर्नामव्याहरणमेकमेव सुनिष्कृतमुत्कृष्टं प्रायश्चित्तं यतः विष्णोर्नामव्याहरणात्तद्विषया विष्णुविषया मतिर्भवति भगवद्विषयकमत्युत्पत्तिप्रतिबन्धिसकलवृजिननिरसनद्वारेण मत्युत्पादकं स्मरणं तत उत्पन्ना च मतिर्भगवत्प्राप्तिप्रतिबन्धकनिरसनद्वारा मुक्तिहेतुरिति "नान्यः पन्था" इत्यस्य न विरोध इति भावः । नन्वेवं नामोच्चारणेनैव मुक्तिसिद्धेरुपासनशास्त्रवैयर्थ्यम् । मैवम् । "यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम्" इत्युक्तन्यायेन तत्तदन्तिमस्मरणस्य तत्तद्भावापत्त्यापादकत्वाद्भगवत्स्मरणस्य भगवद्भावापत्त्यापादकत्वे स्थिते भगवदन्तिमस्मरणोपायतया प्रयाणपर्यन्तमुपासनं तत्कक्षाक्षेण विधीयते तदेव स्मरणं प्राचीनसंस्कारवशात्कस्माच्चिदूपरि गङ्गानिपतनन्यायेन पतितं चेत्तेनैव मुक्तिः सति जीवनहेतावन्तिमस्मरणपर्यन्ताया भक्तेर्नामोच्चारणमभ्यस्तं सत् कर्मज्ञानयोगादिवदनुग्राहकम् असति तु तादात्विकस्मरणस्य साक्षान्मुक्तिसाधनस्यानुग्राहकमिति न कोऽपि विरोधः । ननु जीवद्भिरसकृदावृत्तमपि नाम न भक्तिनिर्वर्तकत्वेन दृष्टमिति चेत्तर्हि तैरनुष्ठिताः कर्मयोगादयोऽपि तन्निष्पादकत्वेन न दृष्टाः अथ प्रबलप्रतिबन्धवशाद्भक्तियोगानधिकाराद्वा विच्छिन्नस्य तद्वदेव नरकपरिहारकत्वं पुनर्जन्मान्तरे भक्तियोगारम्भापादकत्वं च तदा भक्तियोगानुग्राहकत्वाभावेऽपि जन्मान्तरेषु प्राचीनसंस्कारवशादारभ्यमाणभक्तियोगनिष्पादकाः कर्मयोगादय इति चेत्तर्हि नामोच्चारणमप्येवमेवेत्यवधेयं कर्मयोगादीनामभिसंहितफलानामैश्वर्यकैवल्यादिसाधनत्वमनभिसंहितफलानां तु भक्तियोगनिर्वर्तकत्वं संयोगपृथक्त्वन्यायेन नामोच्चारणस्य तु सति जीवनहेतावसकृदावृत्तस्य भक्तियोगोत्पत्तिप्रतिबन्धनिरसनेनाभिसंहितफलकर्मादियोगवद्भक्तियोगानुग्राहकत्वम् । इयांस्तु विशेषः असति त्वन्तिमप्रत्ययजनने न स्वतन्त्रन्यासयोगवत्साक्षान्मुक्तिसाधनत्वमिति अलमतिविस्तरेण ॥ १० ॥

"सर्वेषामप्यघवतामिदमेव सुनिष्कृतम्" इत्यनेन कतिपयदुरितनिवर्तकात्प्रतिपदोक्तप्रायश्चित्तात्मकलदुरितनिवर्तकत्वेन नामोच्चारणस्योत्कृष्टत्वं सूचितं तदेव प्रतिपादयन्ति । नेति द्वाभ्याम् । ब्रह्मवादिभिर्मन्वादिभिरुदितैरुक्तैर्व्रतादिभिः प्राजापत्यकृच्छ्रचान्द्रायणादिव्रतादिभिः प्रायश्चित्तैरघवान् पुरुषस्तथा न शुध्येत् कथं यथोदाहृतैर्हरेर्भगवतो नामरूपैः नामपदैः शुद्ध्येत् तत्र हेतुः तदुत्तमश्लोकगुणानुलम्भकमिति तत्तन्नामपदोदाहरणमुत्तमश्लोकस्य भगवतः तद्गुणानां चोपलम्भकं ज्ञापकम् उत्तमश्लोकतद्गुणविषयकमत्युत्पादकमित्यर्थः जीवद्दशायामनभिसंहितफलकर्मयोगादिभक्तिरूपमत्युत्पादकमन्तिमदशायां तु साक्षान्मुक्तिसाधनान्तिमस्मरणरूपमत्युत्पादकमिति विवेकः ॥ ११ ॥

ब्रह्मवादिभिरुक्तं निष्कृतं नैकान्तिकं नात्यन्तशोधकं कुतः हि यतः निष्कृते तस्मिन् कृतेऽपि असत्पथे पापमार्गे पुनर्मनो धावति चेदित्येवकारार्थः निपातानामनेकार्थत्वाद्धावत्येवेत्यर्थः तत्तस्मात्कर्मणां पापानां निर्हारमात्यन्तिकं नाशमभीप्सतामभिलसतां भूतानां हरेर्गुणानुवादः स एव प्रायश्चित्तं गुणा अनूद्यन्ते येन स गुणानुवादः नामव्याहारः स हि सत्त्वभावनः सम्यग्ज्ञानहेतुभूतस्सत्त्ववर्द्धकः ॥ १२ ॥

अथ हे यमदूताः ! कृतमशेषाघनिष्कृतं येन तमेनं मापनयत माप्रापयत यमालयमिति शेषः कुतः यद्यस्मादसावजामिलः म्रियमाणो भगवतो नाम सम्यगग्रहीदुच्चचार ॥ १३ ॥

नन्वसौ पुत्रे सङ्केतितं नारायणेति पदमुच्चारितवानतः तत्पुत्रविषयकमत्युत्पादनद्वारा एनं संसारयेदेव ननु भगवद्विषयकमत्युत्पादनद्वारा मोचयेदित्यपेक्षायां यदृच्छया भस्मादिबुद्ध्या वास्पष्टस्याग्नेर्यदृच्छया पीतस्यौषधस्य दाहकत्वारोग्यजनकत्ववद्वस्तूनां विलक्षणस्वभावत्वात्सङ्केतितस्यासङ्केतितस्य वान्यादृशो भगवन्नाम्नः सर्वाघनिवर्तकत्वं भगवद्विषयकमत्युत्पादकत्वं च स्वाभाविको धर्म इत्याहुः । साङ्केत्यमित्यादिना मन्त्रोऽप्युदाहृत इत्यन्तेन ग्रन्थेन । साङ्केत्यं पुत्रादौ सङ्केतकृतं पारिहास्यमुच्चारणासमर्थजनपरिहासकृतं स्तोभं

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका

(१) निरालापकृतम् । यद्वा । भूताविष्टस्य मन्त्रशक्त्यादिभिरालापनं स्तोभस्तत्कृतमित्यर्थः । हेलनं स्वविरोधिजननिन्दाद्यन्तर्भूतम् । यद्वा । किं विष्णुनेति सावज्ञं हेलनरूपं वा अन्यदपि प्रकारान्तरमापन्नं वैकुण्ठस्य भगवतो नामग्रहणं निःशेषपापहरं विदुः नामसामर्थ्ययाथात्म्यविद इति शेषः ॥ १४ ॥

तथा पतितः प्रासादादेः मार्गे भगवदाज्ञारूपवर्णाश्रमधर्माद्वा स्खलितः भग्नः भग्नपाद्यवयवः संदष्टः सर्पादिभिः तप्तो ज्वरादिना आहतो दण्डादिना एतदन्यतमावस्थां प्राप्तः पुमान् यद्यवशेनापि हरिरित्याह । तर्हि यातनाः प्रति नार्हति ॥ १५ ॥

ननु महतः पापस्य महदेव प्रायश्चित्तं नत्वल्पं नामग्रहणं पापतारतम्येन प्रायश्चित्ततारतम्यस्य मन्वादिभिरुक्तत्वादन्यथा प्रायश्चित्तशास्त्रवैयर्थ्यं स्यादित्यन्तरा कस्यचिन्मन्दाशङ्कां निराकुर्वन्ति । गुरूणामिति । गुरूणां पापानां गुरूणि प्रायश्चित्तानि लघूनां लघूनि महर्षिभिर्यथावज्ज्ञात्वा यद्यप्युक्तानि ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

न केवलं दासाभङ्गप्राप्तपापहरं हरिनामकीर्तनं स्तैन्यादिप्राप्तसर्वपापक्षयकरमित्याहुरित्याह । स्तेन इति ॥ ९ ॥

यतस्तद्विषयेत्यनेन भक्तिपूर्वकत्वमाह ॥ १० ॥

ब्रह्मादिभिर्वेदवादिभिः तत्साम्न उदाहरणमुत्तमश्लोकस्य हरेः गुणानानन्दादीनुपलम्भयति तत्प्रतिबिम्बभूतान् प्रापयतीति तदुत्तमश्लोकगुणोपलम्भकम् ॥ ११ ॥

हरेर्नामसंकीर्तनेनैव पापनिर्मूलनं न तपआदिभिरित्येतदुपपादयति । नेति । निष्कृते पापप्रायश्चित्ते कृतेऽपि अघवतः मनः पुनरसत्पथे शास्त्रनिषिद्धमार्गे धावति चेत्तत्प्रायश्चित्तमैकान्तिकं नियतम् अव्यभिचारि न भवतीति यस्मात्तस्मात्कर्मनिर्हारमाकाङ्क्षमाणानां हरेर्गुणानामनुवादः ऐकान्तिक एवेत्यन्वयः ननु अनेनापि मनोदोषानाशे पूर्वस्मात्कोविशेषः स्यादिति तत्राह । सत्त्वेति । सत्त्वभावनोऽन्तःकरणशुद्धिहेतुः खलु ॥ १२ ॥

अथ तस्मात् ॥ १३ ॥

नन्वनेन न हरेर्नामाग्राहि किं तु पुत्रनामैवेति तत्राह । सांकेत्यमिति । पुत्रादिसङ्केतादिविषयत्वेन नारायणेत्यादिभगवन्नामसंकीर्तनमशेषाघहरम् तदुक्तमाचार्यैः नारायणोऽयमित्यन्यहेलनविषयत्वेनोक्तमघहरमिति भक्तिपूर्वकमेवोदाहृतं हरिनामाशेषाघहरमिति तात्पर्यमत्र बोद्धव्यमेतदप्युक्तं 'सर्वथाघहरं विष्णोर्नाम तद्भक्तिपूर्वकं अभक्त्योदाहृतं नैव फलदातृ भविष्यति । नाम स्वामितया तस्य स्मरणं जायते यतः । भक्तस्यातो नामकीर्तिः संकेताद्यपीरिता । अजामिलोऽपि स्मरणाद्भक्त्या मृत्योरमुच्यत' इति स्मरणप्राचुर्यदर्शनाय साङ्केत्यादिस्थलबाहुल्यकथनं संकेते रूढिमात्रेण व्यवहारनिर्वाहात्स्मरणासंभवेन परिहासे तस्मात्स्मरणं संभवति चित्तविकासोद्रेकव्यवहारात् ततोऽपि स्तोभे स्मरणं कोपजननाय नर्मवचनं स्तोभः मधुमक्षिकासूदनासमर्थस्त्वं किं मधुं सूदितवान् असौ हरिश्चेन्मधोर्वधान्मधुसूदन इत्युपपन्नमिति ततोऽपि हेलने नामस्वामिहरणं हरेरन्यं नारायणादिनाम्ना पित्रादिभिर्दत्तेनोपचरितं कञ्चनपुरुषं दृष्ट्वा निन्दयेत्साक्षात्पयोधिशयो नारायणः किलेति हरिद्वेषेण हरिनामकीर्तनमघहरं न स्यात् "अभक्त्योदाहृतं नैव फलदातृ भविष्यति„ इत्यादेश्च नामस्वामिस्मरणाभावे देवदत्ते नामपीडितार्थं भवति मधोः सूदनान्मधुसूदन इत्यर्थस्याभावात् हरौ तद्भावादतोऽजामिलेन भक्त्या नाम स्वामिनं स्मृत्वा नामकीर्तनं कृतमिति ज्ञातव्यं तदुक्तं च "नामस्वामितया तस्य स्मरणं जायते यतः" इत्यादि यानि यानि श्रीहरेर्नामानि तानि सर्वाणि पापहरणसामर्थ्योपेतानि भवन्तीति ज्ञापनाय वैकुण्ठनामेति अत्रैव हरिरित्यवशेनाह यः पुमानिति वक्ष्यति स्मरणं च ज्ञानपूर्वकमपेक्षितमित्यतो विदुरिति ॥ १४ ॥

संदष्टः सर्पादिना आहतो लकुटेन यातनां दुःखम् ॥ १५ ॥

ननु नामसंकीर्तनेन पापपरिहारे गुरुलघुपापपरिहारार्थं गुरुलघुप्रायश्चित्तविधानं व्यर्थमित्याशङ्क्य प्रायश्चित्तेन तत्तत्पापपरिहारेऽपि संसारहेतुभूतं पापसंस्कारव्यञ्जकं प्राकृतं लिङ्गं मनो भगवदनुग्रहेण लीयते नान्येनेत्याह । गुरूणामिति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

यत इति । तस्य विष्णोरनुभवोऽपि यतो भवतीत्यर्थो वा ॥ १० ॥

ब्रह्मवादिभिरिति । ब्रह्मात्र कर्मकाण्डमात्रं मुह्यन्त्याम्नायवादिनः इति वर्णनारूपैः पदैः एकस्य नाम्न एवावान्तरपदैः उत्तमःश्लोकस्य गुणानामुपलम्भकमनुभवहेतुश्च ॥ ११ ॥

न केवलं नामैव तादृक् किन्तु गुणा अपीत्याहुः । नैकान्तिकमिति । गुणानामनुवादोऽपि ॥ १२ ॥

अथैनमिति । म्रियमाणोऽपीत्यर्थः । साङ्केत्यमित्यादिवक्ष्यमाणबलाच्च तत्कालमात्रावश्यकत्वं विवक्षितमिति ॥ १३ ॥

पारिहास्यमिति । परिहासोऽत्र प्रीतिगर्भमल्पपरिभववचनं न तु निन्दागर्भं सत्युपहास एवोच्यते तस्मान्नर्मोपोद्बलकं यत् किञ्चिद्भगवन्नामोक्तमित्यर्थः । हेलनमत्र हेलया गिरिकृत इति वद्यत्नराहित्यमयमेवोच्यते न त्ववमानात्मकमिति ज्ञेयं तथा सति वेणोऽपि दोषावहत्वं न स्यात् नाम्नो दशापराध्यां चाश्रद्दधानादिकं प्रत्युपदेशेऽपि दोषः श्रूयते अपराधजननेऽपि प्राचीनपापक्षयः स्यादेवेति तु केचित् ॥ १४ ॥

न केवलं साङ्केत्यादिकन्तु प्रस्तुतदुःखहानीच्छयापि तादृशत्वमित्याहुः । अवशेनापीति । पूर्ववत् यातना इति बहुवचनं क्वचित् ॥ १५ ॥

गुरूणामिति । पद्यत्रयेणैव विवक्षितप्रतिपादने यानि प्रायश्चित्तान्युक्तानि तैस्तान्यघानि पूयन्ते एव किन्तु दुर्वासना तु ईशानुगत्यैव पूयते तस्मादुत्तमःश्लोकनाम तत्पुनरज्ञानात् ज्ञानाद्वा सङ्कीर्तितं सत् पुंसामस्याघमनल एध इव निःशेषमेव दहेदित्यर्थः ॥ १६—१८ ॥

---

(१) निरालापकृतमिति निरालापैः यथावद्वर्णोच्चारणासमर्थैः कृतमुच्चारितमित्यर्थः यथा नारायणेति वक्तव्ये नाना नेत्युक्तिः एतच्च श्रीरहस्यत्रयसारप्रमाणव्यवस्थाधिकारव्याख्यायां स्पष्टम् ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु भवतु नाम पातकानां नाशः किन्तु कामकृतानां बहूनां महापातकानां सहस्रश आवर्त्तितानां द्वादशाब्दकोटिभिरप्यनिवर्त्यानां कथमेकेनैव नामाभासेन प्रायश्चित्तं स्यादित्यत आहुः। स्तेनः स्वर्णस्तेयी इदमेव सुनिष्कृतं पापनिर्मूलीकरणाच्छ्रेष्ठं प्रायश्चित्तम् । ननु द्वादशाब्दादिकम् पापनाशकत्वेऽपि पापनिर्मूलनासामर्थ्यात् नाप्येतन्मात्रफलकं यतो नामव्याहरणात् तद्विषया नामोच्चारकपुरुषविषया मदीयोऽयं मया सर्वथा रक्षणीय इति विष्णोर्मतिर्भवतीति स्वामिचरणाः । स्वनाम श्रुत्वैव तदुच्चारकमजामिलं स्मृत्वैव तमानेतुमस्मानादिष्टवानिति किमुत सेव्यत्वेन विष्णुविषयामतिस्तस्य पुरुषस्य यदि स्यादिति भावः । अतः यमदूतान् साक्षाद्दर्शयितुमेवाजामिलस्य तदानींतनं नामव्याहरणं सर्वपापप्रायश्चित्तत्वेन विष्णुदूता ऊचुः । वस्तुतस्तु पुत्रनामकरणसमयमारभ्यैव पुत्राह्वानादिषु बहुशो व्याहृतानां नाम्नां मध्ये यत् प्रथमं तदेव सर्वपापप्रशमकमभूदन्यानि तु भक्तिसाधकानीति व्याख्येयम् । यद्व्याजहारेति परोक्षनिर्देशात् प्रथमं नामोद्दिश्यैवोक्तम् । विवश इति पुत्रस्नेहविवश इति व्याख्येयम् । नच पुनः पुनर्नामव्याहरणानन्तरमपि पुनः पुनरुत्पन्नानां वेश्याभिगमसुरापानादीनां सर्वेषां पापानां प्रशमनार्थमन्तिमसमयोत्थमेव नामव्याहरणमपेक्षितं यदनन्तरं पुनः पापानुत्पत्तिरिति वाच्यम् "वैकुण्ठनामग्रहणमशेषाघहरं विदुः" इत्यत्राशेषपदोपादानात् । "वर्त्तमानञ्च यत् पापं यद्भूतं यद्भविष्यति । तत् सर्वं निर्दहत्याशु गोविन्दानलकीर्त्तनात् इति । यन्नाम सकृच्छ्रवणात् पुल्कशोऽपि विमुच्यते संसारात् इति चित्रं विदूर विगतः सकृदाददीत. यन्नामधेयमधुना स जहाति बन्धम्" इत्यादिषु संसारबन्धादिप्रयोगाच्च तत्र तत्र समयविशेषनियमानभिधानाच्च प्रथमनामग्रहणेनैव सर्वपापानां तद्वासनायास्तन्मूलभूताविद्याया अपि नाशावगतेः पुनः पापप्ररोहासम्भवात् । ननु तर्हि प्रथमनामग्रहणानन्तरमेवाजामिलेन निर्विद्य ततः कथं नापसृतं पापप्ररोहाभावेऽपि तस्यामेव दास्यामासज्य तत्तदेव पापं तावत्कालपर्यन्तं प्रत्युत कृतम् उच्यते संस्कारवशाज्जीवन्मुक्तानां कर्मेव तस्यापि तावत्कालपर्यन्तं तत्तदेव पापं पुनः पुनरुत्पद्यमानमप्युत्खातदंष्ट्रोरगदंशवन्न फलजनकम् । किम्वा मतान्तरोत्थानाभावार्थं भगवतैव पापबीजाभावेऽपि पुनः पापे प्रवर्त्तनं भवेदित्येव व्याख्येयमन्यथा स्तुत्यर्थवादे कल्पनान्तरे वा व्याख्यायमाने "तथार्थवादो हरिनाम्नि कल्पनम्" इति पाद्मोक्तनामापराधप्रसक्तौ । "नाम्नोऽपि सर्वसुहृदो ह्यपराधात्पतत्यधः" इति । "अर्थवादं हरेर्नाम्नि सम्भावयति यो नरः । स पापिष्ठो मनुष्याणां निरये पतति स्फुटम्" । इति । "मन्नामकीर्त्तनफलं विविधं निशम्य न श्रद्दधाति मनुते यदुतार्थवादम् । यो मानुषस्तमिह दुःखचये क्षिपामि संसारघोरविविधार्त्तिनिपीडिताङ्गम् । इति श्रुतिस्मृतिपुराणेषु नाममाहात्म्यवादिषु । येऽर्थवाद इति ब्रूयुर्न तेषां निरयक्षयः" इति पाद्मकात्यायनसंहितादिपरःसहस्रवचनादधःपात एव स्यात् । अत एव श्रीविष्णुरातेन । "क्वचिन्निवर्त्ततेऽभद्रात् क्वचिच्चरति तत्पुनः । प्रायश्चित्तमथोऽपार्थं मन्ये कुञ्जरशौचवत् । इति पुनः पापप्रवृत्तिदर्शने प्रायश्चित्तमाक्षिपतापि भक्तिप्रसङ्गे भक्तानामपि कस्य कस्यचित् पुनः पुनः पापप्रवृत्तिदर्शनेऽपि नैवाक्षेपः कृतः । अपि च यथा नामाभासबलेनाजामिलो दुराचारोऽपि वैकुण्ठं प्रापितस्तथैव स्मार्त्तादयः सदाचाराः शास्त्रज्ञा अपि बहुशो नामग्राहिणोऽप्यर्थवादकल्पनादिनामापराधबलेन घोरसंसारमेव प्राप्यन्त इत्यतो नाममाहात्म्यदृष्ट्या सर्वमुक्तिप्रसङ्गोऽपि नाशङ्क्यः । तदेवं भगवन्नाम सकृत्प्रवृत्तमपि सद्य एव, समूलं पापं संहरदपि फलन्नपि वृक्षः काले एव फलतीतिन्यायेन प्रायः किञ्चिद्विलम्बत एव स्वीयफललिङ्गं लोके दर्शयित्वा बहिर्मुखशास्त्रमतोच्छेदाभावार्थं क्वचिन्न दर्शयित्वा च स्वव्याहर्त्तॄन् जनान् स्वापराधरहितान् भगवद्धाम नयतीति सिद्धान्तो वेदितः नन्वर्थवादादिनामापराधवतां नामापराधहेतुकोऽधःपातो भवतु नाम तत्र न विवदामहे । नामग्रहणहेतुकः सर्वपापक्षयो भवति न वा आद्ये कर्म्मिज्ञानियोगिभक्तानां तद्भिन्नानामपि नृणां मध्ये पारदारिकपरहिंसादिगम्येषु नरकेषु केनापि न गन्तव्यं द्वितीये कर्म्मिप्रभृतिभिरिव भक्तैरपि पापभोगार्थं नरकेषु गन्तव्यमेव । अत्रोच्यते यथा महाजनः स्वाश्रितानामाश्रयणतारतम्येन पालनतारतम्यं कुर्वन्नपि तानेव नैव पालयति यदि ते तदपराधिनः स्युरिति तस्याप्रसाद एव स्वाश्रितापालने कारणं न तु पालनासामर्थ्यं कल्पनीयम् । तेषामेवापराधक्षयतारतम्येन तेषु तस्य प्रसादतारतम्यञ्च ! सर्वापराधक्षये प्रसाद एव । एवमेव नामोपलक्षितां भक्तिदेवीं ये गुणीभावेनाश्रयन्ते कर्म्मादिफलसिद्ध्यर्थं तेषु गुणीभूताया भक्तेर्वैसमानत्वेऽपि प्राधान्येन व्यपदेशा भवन्तीति न्यायेन ते कर्म्मिज्ञान्यादिशब्देनाभिधीयन्ते । न तु वैष्णवशब्देन ते च स्वरूपत एवैकनामापराधवन्तः । यदुक्तम् । "धर्म्मव्रतत्यागहुतादिसर्वशुभक्रियासाम्यमपि प्रमादः" इति नाम्नो धर्म्मादिभिः साम्यमप्यपराधः किमुत धर्म्माद्यङ्गत्वेन गुणीभूतत्वमित्यर्थः । तदपि तादृशस्वाश्रयेण गुणलेशग्रहणमेवैषां कर्म्मयोगादयो मा विफला भवन्त्विति स्वीयदाक्षिण्येन स्वापकर्षं स्वीकृत्यापि भक्तिदेवी तेषां कर्म्माद्यङ्गभूतैव कर्म्मादिफलं निष्प्रत्यूहमुत्पादयति यथा तथैव तेषां पापमपि प्रायश्चित्ताङ्गभूतैव नाशयति नान्यथेत्यतस्तैरेवाकृतप्रायश्चित्तैस्तत्तत्पापफलभोगार्थं तेषु तेषु नरकेषु गन्तव्यमेव न तु वैष्णवैः यदि च ते पुनरन्यानर्थवादसाधुनिन्दादीन् नामापराधान् कुर्वाणा एव धर्म्मादिकमनुतिष्ठन्ति तदा धर्म्माद्यङ्गभूतापि न तत्तत्फलमुत्पादयति । "के तेऽपराधा विप्रेन्द्र ! नाम्नो भगवतः कृताः । विनिघ्नन्ति नृणां कृत्यम्" इत्यादिवचनेभ्यः । किञ्च । तेषामपि तत्तदपराधेभ्यो निवृत्य तदुपशमकनामकीर्त्तनादिपराणां नामापराधक्षयतारतम्येन कर्म्मफलप्राप्तितारतम्यं साधुसङ्गवशात् सर्व्वनामापराधक्षये तु भक्तिदेवीसम्यक्प्रसादेन । नामफलप्राप्तिरेव निर्विवादा । नन्वजामिलस्यापि "अयं हि श्रुतसम्पन्नः" इत्यादियमदूतवाक्यैः प्राक्तनं कर्म्मित्वमवगम्यते । सत्यं मदिरापानाद्ब्राह्मण्यमप्यस्य नष्टमेव किमुत कर्म्मित्वं यदुच्यते । "एवं स विप्लावितसर्व्वधर्म्मा दास्याः पतिः पतितो गर्ह्यकर्म्मणा" इति । कर्म्मोपगमक्षण एव भक्तेर्गुणीभावोऽप्यपगतः पुनश्च स्वपुत्राह्वानादौ नारायणनामोच्चारणनिबन्धना केवलान्यैव भक्तिरस्याभूदिति । ननु कर्म्मज्ञानाद्यङ्गत्वे भक्तिं कुर्वीतेति यदि विधिवाक्यमेवास्ति तर्हि कुतस्तेषां नामापराधः । उच्यते भक्त्यैव सर्व्वेऽपि धर्म्माः सम्यगेव सिद्ध्यन्ति भक्तिलेशेनापि महापातकान्यपि नश्यन्तीत्यादिपरःशतशास्त्रवाक्यैरप्यविश्वसतां कर्म्मज्ञानयोरेव श्रद्धालूनां

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भक्तिबहिर्मुखानामशुद्धकुटिलचित्तानामप्यनेनैव प्रकारेण भक्तिर्भवत्विति दयामयमेव वेदशास्त्रं धर्म्मज्ञानाद्यङ्गत्वेन भक्तिं विधत्त इत्यतो न शास्त्रवाक्यमुपालम्भनीयमिति ततश्च वैधपशुहिंसाकृतो विधिबलात् स्वर्गप्राप्तावपि यथा तद्धिंसादोषानपगमस्तथैव भक्तिगुणीभावकरणरूपापराधवतो विधिबलात् कर्म्मफलप्राप्तावपि तदपराधानपगम एव ज्ञेय इति । अथ ये नामापराधिनो वैष्णव्या दीक्षया वैष्णवमेव गुरूकृत्य भक्तिदेवीं कैवल्येन प्राधान्येन वाश्रयमाणाः नामकीर्त्तनादिभिर्भगवन्तं भजन्ते । तेषामपि वैष्णवशब्देनाभिधीयमानानां भक्तितारतम्येनैवापराधक्षयतारतम्यं भक्तेर्मुख्यफलोदयतारतम्यञ्च भक्तिदेव्याः प्रसादतारतम्येनैव । यदुक्तं भगवतैव ।—"यथा यथात्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः । तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवाञ्जनसम्प्रयुक्तम् इति । भक्तिः परेशानुभवो विरक्तिः" इत्यादि च "शृण्वतां स्वकथाः कृष्णः पुण्यश्रवणकीर्त्तनः । हृद्यन्तःस्थो ह्यभद्राणि विधुनोति सुहृत् सताम्" इत्यादिवचनव्यज्यमानचतुर्द्दशभूमिकारोहश्च क्रमेणैव तेषां ज्ञेयः । एतदर्थमेव तत्र तत्र श्रद्धावृत्त्यादिविधानम् । अत्रापि प्रकरणे" गुणानुवादः खलु सत्त्वभावन" इति अतस्तेषां क्षीणसर्वापराधत्वे सत्येव भगवन्तं प्राप्तानां न पुनर्भवः निरपराधानान्तु भगवत्प्राप्तौ नास्ति विलम्बस्तेषां हि भगवन्नामग्रहणं वैकुण्ठारोहणञ्चेति । द्वे एव भूमिके यथा अजामिलादीनां यदुक्तम् । "न वासुदेवभक्तानामशुभं विद्यते क्वचित् । जन्ममृत्युजराव्याधिभयं वाप्युपजायते इति स्वधर्म्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चितामेति ततः परं हि माम् । अव्याकृतं भागवतोऽथ वैष्णवं पदं यथाहं विबुधाः कलात्यय„ इति निरपराधानामपि केषाञ्चित् प्रेमविशेषलिप्सावयिष्णूणां भगवत्प्राप्तौ किञ्चिद्विलम्बोऽपि । यथैवादिभरतस्य जन्मत्रयमभूत् । किञ्च । सापराधानां मध्ये यदि केचिद्भजनाभ्यासाभावादक्षीणप्राचीनपापाः क्रियमाणपापनामापराधाश्च स्युस्तदपि तैर्देहत्यागानन्तरं नरकेषु न गन्तव्यं "स्वपुरुषमभिवीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले । परिहर मधुसूदनप्रपन्नान् प्रभुरहमन्यनृणां न वैष्णवानाम् इति नैषां वयो नच वयं प्रभवाम दण्ड„ इत्यादियमवचनेभ्यः । "प्राहास्मान् यमुनाभ्राता सादरं हि पुनः पुनः । भवद्भिर्वैष्णवस्त्याज्यो विष्णुश्चेद्भजते नर" इति पाद्ममाघमाहात्म्यीयदेवदूतवचनाच्च । किञ्च । नह्यङ्गोपक्रमे ध्वंसो मद्धर्म्मस्योद्धवाण्वपि इति भगवद्वाक्यात् किञ्चिद्भक्त्यङ्कुरस्याप्यनश्वरस्वभावात् पापादिभिर्दुरतिक्रमत्वादमोघत्वाच्चावश्यमेव जनिष्यमाणपत्रपुष्पाद्यर्थमेव तेषां जन्मभवेन्नतु नश्वरदुःखस्थपापपुण्यनिबन्धनम् यदुक्तम् । "न कर्मबन्धनं जन्म वैष्णवानाञ्च विद्यत„ इति । अतो जन्मान्तरे तेषां प्राचीनभक्तिसंस्कारोत्थैर्नामकीर्त्तनाद्यैः पापापराधक्षयान्तभक्तिदेव्याः प्रसादेन भगवत्प्राप्तिः । यदुक्तम् "नवै जनो जातु कथञ्चनाव्रजेन्मुकुन्दसेव्यन्यवदङ्ग । संसृतिम् । स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रहो जन"इति अत्रान्यवदिति कर्म्मिजनादिवत् संसृतिं पुण्यपापफलभोगमयीं नाप्नोति किन्तु भगवद्दत्तां सुखसंसृतिं प्राप्नोतीत्यर्थः । यदुक्तं श्रुत्या । "त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयानिति" तेषां यावन्नामापराधक्षयाभावस्तावदनष्टानि पापानि अभुक्तफलान्येव तिष्ठन्ति भक्तिवृद्ध्या तदभ्यासेन नामापराधक्षये सति सद्य एव समूलपापक्षयात् भगवन्तं प्राप्नोतीत्यतो भक्तिवृद्ध्यर्थमेकद्वित्रिजन्मानि वैष्णवा अपि प्राप्नुवन्ति । तेषां दृश्यमानानि वैषयिकसुखानि भक्तिधर्म्मोत्थानि यदुक्तम् । "धर्म्मस्य ह्यापवर्गस्य नार्थोऽर्थायोपकल्पते । नार्थस्य धर्म्मैकान्तस्य कामो लाभाय हि स्मृतः । कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता" इति दुःखानि तु कानिचित् स्वभक्तभक्तिवर्द्धनचतुरेण भगवता लङ्घनकटुकौषधपायनादिभिः क्षुधावृद्धिप्रतिपादकेन भिषजेव दत्तानि "यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः" इति तदुक्तेः । कानिचित्तु प्रबलनामापराधफलानि यतो दशसु नामापराधेषु मध्ये अर्थवादार्थान्तरकल्पनशुभकर्मसाम्यानीनि त्रयः साक्षाद्वैष्णवताया एव व्याघातकाः । तेभ्योऽन्येषु तु मध्ये द्वावतिप्रबलौ महदपराधनामबलहेतुकपापप्रवृत्ती यतः ख्यातिं यातं कथमु सहते तद्विगर्हामिति "नाम्नो बलाद्यस्य हि पापबुद्धिर्न विद्यते तस्य यमैर्हि शुद्धिः" इति विशेषविभीषिकोक्तेस्तस्तौ समुचितदुःखभोगसहितसन्ततनामकीर्त्तनेनैवोपशाम्यतो नान्यथा । अन्ये नामापराधास्तु सन्ततनामकीर्त्तनादिभिरेव शाम्यन्तीति ये च नामापराधिनः कर्म्मज्ञानादिरहिताः श्रवणकीर्त्तनादिभक्तिमन्तः किन्त्वनाश्रितगुरुचरणत्वाददीक्षितास्तेऽपि वैष्णवशब्देनैवाभिधीयन्ते । तथा हि वैष्णव इति "सास्य देवता" इतिसूत्रेण "भक्तिः" इति सूत्रेण च सिद्ध्यत्यतो ये दीक्षया देवनीकृतविष्णवो ये च भजनते भजनीयीकृतविष्णवस्ते उभये अपि व्यपदेशान्तरराहित्याद्वैष्णवा एवेति तेषामपि न श्वापरकपातादि पूर्ववदिति केचिदाहुः । नैतत् सुसङ्गतम् । "यतो नृदेहमाद्यम्"इत्यादौ गुरुकर्णधारमित्युक्तेर्गुरुं विना न भगवन्तं सुखेन प्राप्नुवन्ति अतस्तेषां भजनप्रभावेणैव जन्मान्तरे भक्त्या भगवत्प्राप्तिर्नान्यथेत्याचक्षते । अथ चानाश्रितगुरोरप्यजामिलस्य सुखेनैव भगवत्प्राप्तिर्दृश्यत एव तस्मादियमत्र व्यवस्था । ये गोगर्द्दभादय इव विषयेष्वेवेन्द्रियाणि सदा चारयन्ति को भगवान् का भक्तिः को गुरुरिति स्वप्नेऽपि न जानन्ति तेषामेव नामाभासादिरीत्या गृहीतहरिनाम्नामजामिलादीनामिव निरपराधानां गुरुं विनापि भवत्येवोद्धारः । हरिर्भजनीय एव भजनं तत्प्रापकमेव तदुपदेष्टा गुरुरेव गुरूपदिष्टा भक्ता एव पूर्व्वे हरिं प्रापुरिति विवेकविशेषवत्त्वेऽपि नो दीक्षां नच सत्क्रियां नच पुरश्चर्यां मनागीक्षते मन्त्रोऽयं रसनास्पृगेव फलति श्रीकृष्णनामात्मक इति प्रमाणदृष्ट्या अजामिलादिदृष्टान्तेन च किं मे गुरुकरणश्रमेण नामकीर्तनादिभिरेव मे भगवत्प्राप्तिर्भाविनीति मन्यमानस्तु गुर्वज्ञालक्षणमहापराधादेव भगवन्तं न प्राप्नोति किन्तु तस्मिन्नेव जन्मनि जन्मान्तरे वा तदपराधक्षये सति श्रीगुरुचरणाश्रित एव प्राप्नोतीति । देवतान्तरभक्तानां पापापराधयोः कर्म्मिणामिव व्यवस्थेत्येके । भक्तिदेव्या आश्रयणसामान्याभावात्ततोऽपि ते न्यूनकक्षायां निविष्टा इत्यपरे । यदुक्तम् । "येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयान्विताः । तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् । अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च नतु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते" इति । ये तु केवलमपराधिन एव तेषां नैवोद्धारः । यदुक्तं "तानहं द्विषतः क्रूरान् संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु । आसुरीं

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव कौन्तेय ! ततो यान्त्यधमां गतिम्" इति । ये तु तेषामपि मध्ये कंसादयस्तेषाम्

कामाद्द्वेषाद्भयात् स्नेहाद्यथा भक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥

इत्यादिवचनबलाद्भगवदावेशेनैव नामापराधक्षयान्मुक्तिरिति केचित् । नामान्येव हरन्त्यघमित्युपलक्षणं ध्यानादीनामप्यतो ध्यानपौनः पुन्यमेवावेश इत्यन्ये । कृष्णावतारत्वे तदनैकान्तिकं यतः केचिदावेशरहिता अपि नरकबाणादिकौरवादिसैन्यगतास्तत्क्षणमरणप्रभावात् केचिद्दर्शनमात्रस्यापि प्रभावाच्च प्रापुरिति पूर्वत्रैवोक्तमित्यपरे ॥ ९ ॥ १० ॥

सर्वमहापातकप्रायश्चित्तत्वेऽपि नाम्नः परमवैशिष्ट्यमाहुः । नेति द्वाभ्याम् । ब्रह्मवादिभिर्मन्वादिभिर्नामपदैः साङ्केत्यादिना नाम्नश्चिह्नमात्रैः । यद्वा । नारायणादिनाम्नः एकेनापि पदेन सुबन्तशब्दमात्रेणापि बहुत्वं गौरवेण अर्थापेक्षापि नापेक्षितव्येति भावः उदाहृतैरुच्चारितैरिति मनोनिवेशोऽपि नापेक्षितव्य इति भावः । अघवान् कर्मिप्रभृतिभिन्न एव पापीत्युक्तयुक्त्या व्याख्येयम् । न च नाम समूलपापनिवृत्तिमात्र एवोपक्षीणमित्याहुस्तन्नाम उत्तमःश्लोकस्य गुणानैश्वर्यमाधुर्यसौन्दर्यादीनप्युपलम्भयति प्रेम्णा अनुभावयतीति तत् । यद्वा । ननु तपोव्रतादिमहाकृच्छ्रैर्यन्महापातकं निवर्त्यते तन्नाम्नः सुखोच्चारणमात्रेणैव कथं निवर्त्यतामित्यत आहुः । तदिति । उत्तमःश्लोकस्य महायशस्विनो हरेस्तदेव गुणस्य प्रभावस्य ज्ञापकं परमेश्वरस्यैयमप्येका परमेश्वरतेत्यर्थः ॥ ११ ॥

द्वादशाब्दादिप्रायश्चित्तानां ततो निकृष्टत्वमाहुः । नैकान्तिकं नात्यन्तशोधकं तत्प्रायश्चित्तं यस्मिन् कृतेऽपि असत्पथे पापमार्गे मनो धावति चेत् तस्मात् कर्मणां निर्हारमात्यन्तिकं नाशमभीप्सतां हरेर्गुणानुवादः नाम्नामिव गुणानामप्यनुवादोऽनुकथनं कस्यचिन्मुखाच्छ्रुतानां तेषां पश्चात्कथनं "पश्चात्सादृश्ययोरनु" इत्यमरः । सत्त्वभावनः वासनाया अपि नाशकत्वात् सत्त्वशोधकः । ननु मनः पुनर्धावतीति प्रायश्चित्तानन्तरं पुनः पापकरणं कथं निन्द्यते तस्यापि संस्काराधीनत्वादुत्खातदंष्ट्रोरगदंशसदृशत्वमस्माभिर्व्याख्येयमिति चेद् भ्रान्ताः स्थः तथा व्याख्यानमस्माकं नाम्नः सवासनपापनाशकत्वप्रतिपादकवचनानुरोधादेव न तु स्वकपोलकल्पितम् । भवतान्तु प्रायश्चित्तशास्त्रे तादृशवचनाभावात् कर्ममार्गे ह्यर्थवादजन्यप्रत्यवायस्याप्यश्रवणात्कथं तथा व्याख्यातुं शक्तिरिति प्रागेवोक्तम् ॥ १२ ॥

अथ यस्मादेवं तस्मादेनं मा अपनयत । कृताशेषेति पुत्रनामकरणसमये प्रथमेनैव नाम्नेत्यर्थः । एतेनाजामिलस्य प्राचीननामापराधराहित्यमवगम्यते । यद्यतो निष्पापत्वादेव म्रियमाणः सन्नाम सम्यगग्रहीत् पापसत्त्वे म्रियमाणस्य जिह्वायां कथं नाम प्रादुर्भवेदिति भावः । यदुक्तं गीतासु "येषां त्वन्तगतं पापम् इत्युपक्रम्य अन्तकाले तु मामेव स्मरन्मुक्त्वा कलेवरम् । यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः" इति । तेन मृत्युकाल एव नामाभावप्रादुर्भावाभ्यां नामापराधसद्भावासत्त्वे अनुमेये इति व्याचक्षते ॥ १३ ॥

कीदृशं नाम सर्वपापहरं स्यादित्यपेक्षायां कैमुत्येनाहुः । साङ्केत्यं पुत्रादौ सङ्केतः स्वार्थे ष्यञ् सर्वत्र तृतीयार्थे प्रथमा सङ्केतादिभिरपीत्यर्थः । पारिहास्यमिति प्रीतिगर्भमेव न तु निन्दागर्भम् । यथा भो विख्यातकीर्त्ते ! कृष्णनाम दृष्टा तव कीर्त्तिर्यतो मां नोद्धर्तुं समर्थकस्त्वमिति स्तोभं कथागीतालापादिपूरणार्थं कृतं हेलनमत्र हेलया गिरिरुद्धृत इति वद्यत्नराहित्यमेवोच्यते यथा आहारविहारनिद्रादावप्यवहेलया एव यावन्ति कृष्णनामान्ययं गृह्णाति न तावन्त्यन्ये प्रयत्नेनापि ग्रहीतुं शक्नुवन्तीति न तु निन्दावज्ञादिकम् । तथा सति "निन्दां भगवतः शृण्वन्" इत्यादिभंगवतो निन्दके किम्वा विष्णुनेति तदवमन्तरि वेणादावपि दोषावहत्वं न स्यादशेषाघहरं वासनापर्यन्तसर्वपापनाशकम् ॥ १४ ॥

साङ्केत्यादिभ्योऽन्यस्य पञ्चमस्य वैवश्यप्रभेदानाह । पतितः प्रासादादिभ्यः स्खलितो मार्गेण भग्नो भग्नगात्रः संदष्टः सर्पादिभिः तप्तो ज्वरादिना आहतो दण्डादिना पुमान् कर्मिप्रभृतिभ्योऽन्य इति व्याख्यातयुक्त्या ज्ञेयम् ॥ १५ ॥

ननु पापतारतम्येन कृच्छ्रादितारतम्यं शास्त्रे दृश्यते कथमेक एव नामाभासः सर्वमहापातकानि विनाशयेदित्यत आहुः । गुरूणामिति । तेषां परिमितशक्तित्वात्तथा तथैव व्यवस्था नाम्नस्त्वविचिन्त्यमहाशक्तेरेकस्यैव महापातकपुञ्जसंहर्तृत्वमेकांशेनैव यथा साम्बमोचने प्रवृत्तस्य बलभद्रस्यैकस्यैव दुर्योधनादिसर्वकौरवसंहारक्षमत्वमनायासेनैवेति भावः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अपरे हीनप्रतिज्ञत्यक्तव्रतकृतघ्नप्रभृतयः ॥ ९ ॥

सुनिष्कृतं सुष्ठु प्रायश्चित्तं नामव्याहरणात्तद्विषया मतिः नामोच्चारकरक्षणविषया मतिर्हरेर्भवतीत्यर्थः । यद्वा । हरिनामोच्चारकस्य तद्विषया हरिस्वरूपगुणादिविषया मतिर्भवतीत्यर्थः ॥ १० ॥

ब्रह्मवादिभिर्हरेर्नामरूपैः पदैरुदाहृतैरघवान् यथा विशुद्ध्यति तथा कृच्छ्रादिव्रतादिभिर्निष्कृतैः प्रायश्चित्तैः सदुदितैः स न शुद्ध्यति तद्धरिनामोच्चारणम् उत्तमकीर्त्तेर्हरेः गुणानामुपलम्भनं ज्ञापकं भवति हरिनामोच्चारणेन निखिलपापनिर्नाशपूर्वकं हरिनामोच्चारकः सर्वपुरुषार्थं लभते यदि हरिनामोच्चारकस्यापि सर्वपुरुषार्थदं हरिप्रावण्यं न भवत्यपि तु पापकर्मप्रावण्यं भवति तदा तस्य हरिनाम्नि अर्थवादादिकल्पनया नामापराधित्वं ज्ञेयम्

अर्थवादं हरेर्नाम्नि सम्भावयति यो नरः ।
स पापिष्ठो मनुष्याणां निरये पतति स्फुटम् ॥
मन्नामकीर्तनफलं विविधं निशम्य
न श्रद्दधाति मनुते यदुतार्थवादम् ।
यो मानुषस्तमिह दुःखचये क्षिपामि
संसारघोरविविधार्तिनिपीडिताङ्गम् ।

इत्यादिपुराणान्तरेभ्यः नामापराधनिवृत्तिरपि नामोच्चारणावृत्त्या भवति ।

नामापराधयुक्तानां नामान्येव हरन्त्यघम् ।
अविश्रान्तप्रयुक्तानि तान्येवार्थकराणि च ॥

इति वचनात् ॥ ११ ॥

तैस्तान्यघानि पूयन्ते तपोदानजपादिभिः ।
नाधर्मजं तद्धृदयं तदपीशाङ्घ्रिसेवया ॥ १७ ॥
धर्मो योऽयमुपन्यस्तः परमस्तु सनातनः ।
क्रियतेऽहरहः शुद्धिरात्मनो वाससो यथा ॥ ० ॥ (१)
नैकान्तशुद्धिः स्यात् कर्तुः क्रियया ऽकर्तृता यतः ।
अकर्तुरात्मनस्तस्माद्व्रजेतानीहया हरिम् ॥ ० ॥
अज्ञानादथवाज्ञानादुत्तमश्लोकनाम यत् ।
सङ्कीर्तितमघं पुंसो दहेदेधो यथाऽनलः ॥ १८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

यस्मिन्निष्कृतेऽपि मनः असत्पथे पापमार्गे धावति तन्निष्कृतमात्यन्तिकमत्यन्ततः शोधकं न भवति तत्तस्मात् कर्मनिर्हारमभीप्सतां हरेर्गुणानुवाद एव सत्त्वभावनः अन्तःकरणशोधकः मुख्यं निष्कृतमित्यर्थः ॥ १२ ॥

तदेवं धर्मराजनये निष्पापदण्डनासम्भवादस्य च सर्वथा निष्पापत्वात् "तत एनं दण्डपाणेः सकाशं कृतकिल्बिषं नेष्याम" इत्येवं मृषावादिनो यूयमेवैनं नेतुं पापित्वभ्रमात्प्रवृत्ताः अतो माऽपनयत ॥ १३ ॥

ननु पुत्रोद्देशेनोच्चारितं तन्नाम कथं निष्पापत्वकारणमत्राहुः । साङ्केत्यमिति । साङ्केत्यमन्यसङ्केतेन कृतं पारिहास्यं परिहासार्थं कृतं स्तोभं गीतालापपूर्त्यर्थं कृतं हेलनं सावज्ञङ्किंविष्णुनेत्येवं "वैकुण्ठनामग्रहणमशेषाघहरं विदुः

अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः ।
पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥

इत्यादिस्मृतयः तन्मूलभूताः श्रुतयश्च "मर्ता अमर्त्यस्य ते भूरि नाम मनामहे । विप्रासो जातवेदसः आस्य जानन्तो नाम चिद्विवक्तन" इत्याद्याः ॥ १४ ॥

नन्वनेन अवहिततया सङ्कल्पपूर्वकं नामग्रहणं न कृतमतो यातनार्होऽयमित्यत्राहुः । पतित इति । पुमानित्युपलक्षणं स्त्र्यादीनाम् पतितः उच्चस्थानात् स्खलितः पिच्छिलस्थानादियोगतः भग्नः खड्गादिना खण्डिताङ्गः संदष्टो वृश्चिकादिना तप्तः ज्वरादिना आहतो दण्डादिभिः एवमवशेन अनवहितत्वेन हरिरिति य आह स यातनाः नार्हति ॥ १५ ॥

अत्र यातनाप्रापकाप्रापकाधर्मजहृदयशुद्धिर्हरिनामोच्चारणादिकपेशाङ्घ्रिसेवयैव भवतीति हेतुमाहुः । गुरूणामिति द्वाभ्यां गुरूणां महतां लघूनामल्पानां पापानां महर्षिभिः ज्ञात्वा तत्तदनुरूपतया निश्चित्य गुरूणि लघूनि च प्रायश्चित्तानि यान्युक्तानि ॥ १६ ॥

भाषा टीका ।

सुवर्णादि चोरी करने वाला मदिरा पान करने वाला मित्रद्रोही ब्राह्मणघाती गुरुस्त्रीगामी स्त्री को मारने वाला पिता को मारने वाला राजा को मारने वाला और भी जो पातकी हैं संपूर्ण पाप वालों को यही एक उत्तम प्रायश्चित्त है जो कि भगवान् के ध्यान पूर्वक श्रीविष्णु भगवान् के नाम का उच्चारण किया जाय ॥ ९ ॥ १० ॥

मन्वादिकों के कहे हुये प्रायश्चित्तोंसे पापी पुरुष तैसा पवित्र नहीं होता है जैसा कि उत्तमश्लोक विष्णु भगवान के गुणों के प्रकाश करने वाले नामों के उच्चारण करने मात्र से पवित्र होता है ॥ ११ ॥

वे सब प्रायश्चित्त अत्यन्त शोधक नहीं हैं क्यों कि प्रायश्चित्त करने पीछे भी मन असत् मार्गों मे जाता है तब तो पापों के नाश करने की इच्छा वाले पुरुषों को भगवान् का गुणानुवाद ही करना उत्तम है क्योंकि उसके करने से भगवान् अन्तःकरणको शुद्ध करदेते हैं तब फिर मन खोटेमार्ग मे नहीं जाता है ॥ १२ ॥

इससे इसको मत लेजाओ क्यों कि इसने सब पापों का प्रायश्चित्त करलिया है जिससे कि इसने मरते समय मे भगवान् के नामका ग्रहण किया है ॥ १३ ॥

किसी दूसरे वस्तुके संकेत से अथवा परिहास से अथवा गानके ध्रुवपदादि मे अवलम्ब लेनेको अथवा किसी प्रकार की अवज्ञासे ग्रहण किया जो भगवान् का नाम वही सब पापों का नाश करनेवाला है ऐसा नाम माहात्म्य जानने वाले पुरुष कहते हैं ॥ १४ ॥

गिरने से ठोकरके लगने से शरीर भङ्ग होने से किसी जन्तुके काटने से ज्वरादि ताप होने से दण्डादि आघात होने से परवश होकर भी जो पुरुष हरि ऐसे दो अक्षर को कहता है सो पुरुष मात्र कोई होवे कभी यम दण्ड को नहीं प्राप्त होता है ॥ १५ ॥

छोटे बडे पापों के दूर करने के वास्ते छोटे बडे प्रायश्चित्त महर्षिजनोंने जान कर निरूपण किये हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च । तैस्तपोदानादिभिस्तान्यघान्येव पूयन्ते नश्यन्ति अधर्मजातं मलिनं तु तस्य पापकर्तुर्हृदयम् । यद्वा । नेषामघानां हृदयं

(१) श्लोकौ सटीकौ श्रीविजयध्वजतीर्थपादे ।

यथाऽगदं वीर्यतममुपयुक्तं यदृच्छया ।
अजानतोऽप्यात्मगुणं कुर्यान्मन्त्रोऽप्युदाहृतः ॥ १९ ॥
पतिं वः पृच्छत भटा ! धर्मेऽस्मिन् यदि संशयः । (१)
स वेद परमं गुह्यं धर्मस्य भगवान् यमः ॥ ० ॥

॥ श्रीशुक उवाच ॥

त एवं सुविनिर्णीय धर्मं भागवतं नृप ! ।
तं याम्यपाशान्निर्मुच्य विप्रं मृत्योरमूमुचन् ॥ २० ॥
इति प्रत्युदिता याम्या दूता यात्वा यमान्तिके ।
यमराज्ञे यथा सर्वमाचचक्षुररिन्दम ! ॥ २१ ॥
द्विजः पाशाद्विनिर्मुक्तो गतभीः प्रकृतिं गतः ।
ववन्दे शिरसा विष्णोः किङ्करान् दर्शनोत्सवः ॥ २२ ॥
तं विवक्षुमभिप्रेत्य महापुरुषकिङ्कराः ।
सहसा पश्यतस्तस्य तत्रान्तर्दधिरेऽनघ ! ॥ २३ ॥
अजामिलोऽप्यथाकर्ण्य दूतानां यमकृष्णयोः ।
धर्मं भागवतं शुद्धं त्रैविद्यं च गुणाश्रयम् ॥ २४ ॥
भक्तिमान् भगवत्याशु माहात्म्यश्रवणाद्धरेः ।
अनुतापो महानासीत् स्मरतोऽशुभमात्मनः ॥ २५ ॥
अहो मे परमं कष्टमभूदविजितात्मनः ।
येन विप्लावितं ब्रह्म वृषल्यां जायतात्मना ॥ २६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सूक्ष्मं रूपं संस्काराख्यं न शुध्यति तदपीशाङ्घ्रिसेवया कीर्तनादिना शुध्यतीत्यर्थः । अयम्भावः । महान्त्यपि पापानि सकृदुच्चारितेनैव नाम्ना नश्यन्ति सकृत्प्रवर्तितेन दीपेनेव गाढध्वान्तानि तदावृत्त्या तु पापान्तरस्यानुत्पत्तिः दीपधारणा इव तमोऽन्तरस्य ततश्च वासनाक्षयाद्धृदयशुद्धिः एतदर्थमेव तत्र तत्रावृत्तिविधानम् "पापक्षयश्च भवति स्मरतां तमहर्निशम्' इत्यादिषु तदेवात्राप्युक्तम् "गुणानुवादः खलु सत्त्वभावनः तदपीशाङ्घ्रिसेवया" इति च अतोऽस्य हरिनाम्नैव सर्वपापक्षयो वासनाक्षयस्तु महापुरुषदर्शनादिभिरिति ॥ १७ ॥

तथापि पापप्रायश्चित्तमिदमिति ज्ञात्वा नोच्चारितमिति चेत्तत्राहुः । अज्ञानादिति । बालकेनाज्ञानादपि प्रक्षिप्तोऽग्निर्यथा काष्ठराशिं दहति तद्वत् ॥ १८ ॥

नन्विदमपि सर्वज्ञनुपदिष्टं श्रद्धाहीनं च कथं प्रायश्चित्तं स्यात्तत्राहुः । यथेति । अगदमौषधं वीर्यवत्तममिति वक्तव्ये वीर्यतममित्युक्तं यदृच्छया श्रद्धाविहीनमुपयुक्तं भक्षितं पर्यन्मुखादजानतोऽपि स्वगुणमारोग्यं कुर्यान्मन्त्रोऽपि नामात्मकस्तथा स्वकार्यं कुर्यादेव न हि वस्तुशक्तिः श्रद्धादिकमपेक्षते इत्यर्थः । तदुक्तं विष्णुधर्मेषु ।

हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ।
अनिच्छयाऽपि संस्पृष्टो दहत्येव हि पावकः ॥

इति ॥ १९ ॥

तं विप्रममूमुचन्मोचयामासुः ॥ २० ॥

प्रत्युदिता निराकृताः सन्तो यात्वा गत्वा यमराजाय यथावत्कथयामासुः ॥ २१ ॥

दर्शनेनोत्सवो यस्य ॥ २२ ॥

विवक्षुं वक्तुमिच्छन्तं ज्ञात्वा ॥ २३ ॥

त्रैविद्यं वेदत्रयप्रतिपाद्यं गुणाश्रयं यमदूतानां धर्मं कृष्णदूतानां च भागवतं भगवत्प्रणीतं शुद्धं निर्गुणं धर्ममाकर्ण्येति योज्यं भक्तिमानासीदित्युत्तरस्यानुषङ्गः ॥ २४ ॥ २५ ॥

अनुतापं प्रपञ्चयति । अहो इति चतुर्भिः । येनात्मना मया

(१) अयं सटीकः श्रीवीरराघवश्रीविजयध्वजतीर्थयोः पाठे ।

श्रीधरस्वामिकृतभावार्थदीपिका

वृषल्यां पुत्रतया जायमानेन ब्रह्म ब्राह्मणजातिर्विप्लावितं नाशितम् ॥ २६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथापि तैस्तैः तपआदिभिः प्रायश्चित्तैरघानि प्रतिनियतनिवर्त्यानि पूयन्ते निवर्त्यन्ते न त्वधर्मजमधर्मं जनयतीत्यधर्मजं हृदयं मनश्चित्तशुद्धिर्न जायत इत्यर्थः तर्ह्यधर्मस्य निमित्तं हृदयं केन शुद्ध्यतीत्यत्राहुः । तदपीति । तद्धृदयमपीश्वराङ्घ्रिसेवया नामस्मरणादिरूपया भगवत्सेवया शुद्ध्यतीत्यर्थः ॥ १७ ॥

तत्तस्माज्ज्ञानादिदं भगवन्नामाशेषाघनिवर्त्तकमिति ज्ञानादथवा अज्ञानात्सङ्केतपरिहासादिनिमित्ताद्वा सङ्कीर्तितमुत्तमश्लोकस्य भगवतो नाम पुंसः पापिनोऽघं दहत्येव निवर्त्तयत्येव यथानलोऽग्निः ज्ञानादज्ञानाद्वा स्पृष्टो दहति तद्वदित्यर्थः ॥ १८ ॥

यथा च वीर्यवत्तमगदमौषधं यदृच्छया ज्ञानादज्ञानाद्वा उपयुक्तं भक्षितं सदारोग्यं जनयतीति शेषः तथा भगवन्नामात्मको मन्त्रोऽपि आत्मनः स्वस्य गुणं नाम्नः सामर्थ्यमजानतापि पुरुषेणोदाहृतः उच्चारितः सन्नघं दहत्येवेति पूर्वेणान्वयः वस्तूनां विलक्षणस्वभावत्वादिति भावः ॥ १९ ॥

यद्यस्मदुक्तार्थे युष्माकं सन्देहस्तर्हि स्वपतिं यमं पृच्छतेत्याहुः । पतिमिति हे भटाः ! हे दूताः ! यद्यस्मिन्नस्मदुक्ते धर्मे यदि संशयस्तर्हि वो युष्माकं पतिं यमं पृच्छत स तु धर्मं सूक्ष्मं जानातीत्याहुः । स इति । स भगवान् ।

> उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।
> वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥

इत्युक्तविधः यमः धर्मस्य भगवद्धर्मस्य गुह्यं रहस्यमत एव परमं श्रेष्ठं वेद जानातीत्यर्थः ॥ ० ॥

एवमुक्त्वा यमदूताः विप्रं मुमुचुरित्याह मुनिः । त इति । हे नृप! ते यमभटा एवमुक्तविधं भागवतं भगवन्नामोच्चारणरूपं धर्मं विनिर्णीय निःशेषदुरितक्षपणसमर्थं विनिश्चित्य तं विप्रं याम्यपाशान्निर्मुच्य विमुक्तं कृत्वा मृत्योरमूमुचन् मोचितवन्तः मृत्योरमूमुचन्नित्यस्यायमभिप्रायः आयुः क्षयकरात्पापाधिक्यात्तस्य मृत्युः प्रसक्तः तत्समये च तमानेतुं याम्याः पुरुषा आजग्मुः तस्मिन्नाधिके पापे अन्तिमनामोच्चारणेनाकस्मादापतितेन समूलं विनष्टे सति मृत्योरपि निवृत्तिरित्यत एवं "स एव वर्तमानोऽज्ञो मृत्युकाल उपस्थिते । मतिं चकार तनये" इति पूर्वग्रन्थस्य "द्विजः पाशाद्विनिर्मुक्तो गतभीः प्रकृतिं गतः" इत्युत्तरग्रन्थेन सह न विरोधः अन्यथा प्रसक्तमृत्योर्निवारणासम्भवात्पुनर्जीवनकथनं भक्तियोगोपसंहारकथनं च विरुध्येतेति ॥ २० ॥

ततो यमदूता द्विजो विष्णुदूताश्च किमकार्षुस्तत्राह । इतीत्थं प्रत्युदिताः प्रत्याख्याताः याम्या दूताः यमसमीपं यात्वा गत्वा यमराज्ञे यमराजाय समासविधेरनित्यत्वान्न टच् आर्षत्वाद्वा हे अरिन्दम ! यथासर्वमुक्तं सर्वमनतिक्रम्याचचक्षुः कथितवन्तः इति ॥ २१ ॥

द्विजो यमपाशाद्विनिर्मुक्तः गतभीर्निर्भयः प्रकृतिं पूर्वावस्थां गतः प्राप्तः पुनर्जीवितवानित्यर्थः विष्णोः किङ्करान् दर्शनेनोत्सवो हर्षो यस्य तादृक् शिरसा ववन्दे नमस्कृतवान् हे अनघ ! ॥ २२ ॥

तं द्विजं विवक्षुं किञ्चिद्वक्तुमिच्छुमभिप्रेत्यालक्ष्य महापुरुषस्य भगवतः किङ्कराः सहसा आशु तस्य द्विजस्य पश्यतः सतः अन्तर्दधिरेऽन्तर्हितवन्तः अस्य भगवत्प्राप्त्यपेक्षाजननायान्तर्द्धानम् ।

> सर्वज्ञोऽपि हि सर्वेशः सदा कारुणिकोऽपि सन् ।
> संसारतन्त्रवाहित्वाद्रक्षापेक्षामपेक्षते ।

इतिह्युक्तम् ॥ २३ ॥

अथ तदन्तर्द्धानानन्तरमजामिलः यमकृष्णयोर्दूतानां शुद्धं भागवतं धर्ममाकर्ण्य भगवन्माहात्म्यश्रवणाद्भगवद्भक्तिमानासीदित्युत्तरेणान्वयः । तत्र यमदूतानां त्रैविध्यं गुणाश्रयं धर्ममाकर्ण्य कृष्णदूतानां शुद्धं भागवतं धर्ममाकर्ण्येत्यन्वयः त्रिविधो वेदः ऋग्यजुःसामात्मकत्वात्तद्विहितं त्रैविध्यं पूर्वभागविहितं कर्म गुणाश्रयं गुणत्रयवश्यजनाधिकारं शुद्धं सत्त्वगुणप्रधानजनाधिकारं भागवतं भगवतः सम्बन्धिनं भगवत्पार्श्वेति पाठे आसीदिति क्रियापदाध्याहारः आकर्ण्येत्यस्याकर्णितं मनस्येवधार्येत्यर्थः अन्यथा तिरोधानात्पूर्वमेवाकर्णितत्वादथेत्यनेन सह विरोधापत्तेः अथेत्यस्य नन्विति वार्थः ॥ २४ ॥

आत्मनः स्वस्याशुभं पापं स्मरतस्तस्य महाननुतापः परितापः आसीत् ॥ २५ ॥

तस्यानुतापप्रकारमेवाह । अहो इति । अविजित आत्मा मनो येन तस्य मे मम महत्कष्टमहो अभूत्किं तद्वृषल्यां शूद्रायां जायमानेन येनात्मना मया ब्रह्म ब्रह्मत्वं विप्लावितं विनाशितम् इति यत् "तज्जाया जाया भवति यदस्यां जायते पुनः" इति श्रुत्यर्थमभिप्रेत्य जायतात्मनेत्युक्तम् ॥ २६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हृदयं लिङ्गं मनः ॥ १७ ॥

अजामिलस्यापि सकृन्नामकीर्तनेन वृषलीसङ्गावाप्तपापहारेण देहवियोगलक्षणमृत्योर्मुक्तिः न तु संसारात्तदर्थं तन्नामोच्चारणादिसेवाहरहः कर्तव्येति विधीयते । धर्म इति । धर्मो नामसङ्कीर्तनलक्षणः आत्मनः शुद्धिः अचिन्मनोनाशेन चिन्मनसः कैवल्यलक्षणा शुद्धिर्भवति वासनो निर्योजनेनेति शेषः ॥ ० ॥

नन्वीश्वरसेवया यथा मनःशुद्धिस्तथा निरन्तरप्रायश्चित्तक्रिययापि सा किं न स्यादिति तत्राह । नैकान्तशुद्धिरिति । अकर्तुः स्वकर्तृतारहितस्यात्मनः जीवस्य प्रायश्चित्तकर्मकर्तुः प्रायश्चित्तक्रियया एकान्तशुद्धिर्मनःशुद्धिपूर्विका शुद्धिर्न स्यात् अकर्तृता स्वतन्त्रकर्तृत्वं नास्तीति यतः तस्मादनीहया निषिद्धकर्माकरणेन निरन्तरहरिनामकीर्तनलक्षणक्रियया हरिं भजेतेत्यन्वयः ॥ ० ॥

नामसङ्कीर्तनस्य कर्तव्यतामर्थवादरूपेणोपसंहरति । अज्ञानादिति । अज्ञानादित्यनेन सर्वात्मना ज्ञानाभावोऽपि न विवक्ष्यते किन्तु अरविरुद्धत्वान्नाराः गुणाः तेषामाश्रयो नारायणः इत्याद्यर्थविषयवेदनाभावः अन्यथा हरेः सर्वशब्दवाच्यत्वेन घटपटादीनां तन्नामत्वेऽपि तान्विहाय नारायणादिनामकीर्तनानुपपत्तेः अत उपचारमात्रमिदमिति ज्ञातव्यम् ॥ १८ ॥

सर्वशब्दानां भगवन्नामत्वेऽपि (१) तदावृत्त्यापि फलानुदयात्

(१) घटादिनाम्नामावृत्त्या ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नारायणादिनाम्ना तदुदयोपलम्भादुभयेषां विशेषः कस्मादित्याशङ्क्य मन्त्रोऽगदवदित्याहुरित्याह । यथेति । अजानत इत्यत्रापि उपदेशादिना सामान्यज्ञानमस्त्येव सूपयुक्तमित्यस्योपदेशापेक्षितत्वाद्यथेतरस्तम्बमूलशब्दमात्रेभ्यः मन्त्रौषधयोः वैशिष्ट्यफलत्वं चेश्वरक्लृप्तदेवतासन्निधानात्तथात्रापीति भावः ॥ १९ ॥

भवद्भिरस्मदुक्तार्थो विस्रम्भणीयः युष्मत्पृष्टस्वाम्युक्तार्थस्यैकत्वोपपत्तेरित्याशयेनाहुरित्याह । पति व इति ॥ ० ॥

मृत्योर्देहवियोगलक्षणात् ॥ २० ॥

विष्णुदूतैः सदुत्तरीकृताः याम्याः पुनः किमकुर्वन्निति तत्राह । इतीति ॥ २१ ॥

अजामिलेन मुक्तमृत्युना पुनः किमकारीति तत्राह । द्विज इति । प्रकृतिं गतः सात्त्विकावस्थां प्राप्तः ॥ २२ ॥

मर्त्यदेहस्थेन तेन द्विजेन संल्लापायोगाद्विष्णुदूतैः किं कृतमत्राह । तं विवक्षुमिति ॥ २३ ॥

प्रकृतिं गत इत्युक्तं विवृणोति । अथेति । त्रैविद्यं त्रिवेदविहितं धर्ममेतदेव स्पष्टयति । गुणाश्रयमिति ॥ २४ ॥

स्वर्गादिविषयं श्रुत्वा पथिकवदुदासीनोऽभूत्किमत्राह । भक्तिमानिति । अभूदिति शेषः कृतदोषप्रायश्चित्ताभावे हरौ भक्तिः सुदृढा न स्यादित्यतस्तत्प्रायश्चित्तक्रियाप्रकारमाह । अनुताप इति ॥ २५ ॥

ब्रह्म ब्राह्मण्यं विप्लावितं विनाशितं जायता रेतोरूपेण जायमानेन ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथागदमिति । मन्त्रशब्देनात्र नामोक्तिः मन्त्रस्य तथा प्रभावे श्रद्धाद्यपेक्षत्वादस्य तु तदनपेक्षत्वादत्रैव मन्त्रशब्दस्य मुख्या प्रवृत्तिरित्यभिप्रायेण ज्ञेया । पूर्वपद्यस्य दृष्टान्तान्तरमेव वा सर्वं पद्यम् ॥ १९ ॥

सुविनिर्णीयेति । यद्यपि यमदूतास्तदानीं तत्र मन्त्ययंयुद्धवन्तस्तथाप्यात्ममध्ये सुष्ठु विनिर्णीयानुवादं कुर्वन्नित्यर्थः । अत्र साङ्केत्यमित्यादौ सकृन्नामाभासेनापि यन्निःशेषाघधूननोक्त्या वासनापर्यन्तमघ उच्यते । गुणानुवाद इत्यादौ तु भक्त्यावृत्त्यैवेति यत्तत्तु यथाक्रमं नामापराधशून्यतद्युक्तभजनापेक्षया ज्ञेयम् ।

नामापराधयुक्तानां नामान्येव हरन्त्यघम् ।
अविश्रान्त प्रयुक्तानि तान्येवार्थकराणि यत् ॥

इति पाद्मात् तदेवं नाम्नः सर्वत्र स्वातन्त्र्येऽपि कर्मादेः पूर्णार्थं तदङ्गत्वेन कृतमप्यपराध एव तुनादिसर्वशुभक्रियासाम्यमपि पाद्मदशापराधेषु गणितं तस्मात् तदपीशाङ्घ्रिसेवयेत्येतदपि तादृशापराधशान्त्यर्थमेव ज्ञेयम् । नन्वेवं चेन्म्रियमाणोऽयं नामाग्रहीत्तर्हि कथं सद्य एव पार्षदैर्वैकुण्ठं न निन्ये श्रूयते हि

यस्यावतारगुणकर्मविडम्बनानि
नामानि येऽसुविगमे विवशा गृणन्ति ।

तेऽनेकजन्मशमलं सहसैव हित्वा
संयान्त्यपावृतमृतं तमजं प्रपद्ये ।

इति । अत्रोच्यते श्रीभगवन्नामग्रहणं खलु द्विधा भवति केवलत्वेन स्नेहसंयुक्तत्वेन च । तत्र पूर्वेणापि प्रापयत्येव सद्यस्तल्लोकं तन्नाम । परेण च तत्सामीप्यमपि प्रापयति । "मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते । दिष्ट्या यदासीन्मत्स्नेहो भवतीनां मदापन" इति तद्वाक्यात् । किन्तु "नाहं तु सख्यो भजतोऽपि जन्तून् भजाम्यमीषामनुवृत्तिवृत्तये" इति तद्वाक्यदिशा विलम्बेन प्रापयति । स्नेहस्त्वमीषामनुवृत्तिर्मदनुसेवैव वृत्तिर्जीवनहेतुस्तदर्थमित्यभिप्रायो दर्शितः । तदेवं सत्यजामिलेऽप्ययमारोपिततन्नाम्नः पुत्रस्य संबन्धेन तन्नाम्नापि स्निग्धतिस्म तस्मिंश्च स्वनाम्नि श्रीभगवतोऽप्यभिमानसान्द्रो दृश्यते । यतस्तद्विषया मतिरित्यत्र । यतः पार्षदानामपि महानेव तत्रादरो दृष्टः तस्मात् स्नेहसंवलनया गृहीतस्वनाम्नि तस्मिन्नुत्कण्ठापूर्वकसाक्षान्निजकीर्त्तनादिद्वारा साक्षान्निजस्नेहं प्रकृष्टं कृत्वा नेतुमिच्छति प्रभुरिति ज्ञात्वा सहसानागमिष्यस्तं नीतवन्त इति सर्वं समञ्जसम् ॥ २०-२२ ॥

तं विवक्षुमिति । तेन सहसम्भाषणमुत्कण्ठां वर्द्धयित्वा सम्यग्भक्तत्वापादनार्थं तदर्थमेव हि त्यागो बुध्यते ॥ २३ ॥ २४ ॥ २५ ॥

उत्कण्ठापूर्वकसाक्षात्तद्भजनमेव दर्शयति । अहो इत्यादिना धास्ये मनो भगवति शुद्धं तत्कीर्त्तनादिभिरित्यन्तेन ॥ २६—२८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

किञ्च तैस्तथाविधैरपि पूयन्ते नश्यन्ति पूञ् विनाशे अधर्मजातं अघानां हृदयं मूलं सूक्ष्मं रूपं तु न पूयते न नश्यति तदपि ईशाङ्घ्रिसेवया हरिचरणयोर्भक्त्या नवानां भक्तीनां मध्ये एकया प्राकरणिकया कीर्त्तनरूपयापि वासनापर्यन्तपापक्षयात्तदपि शुद्ध्यति ॥ १७ ॥

तथापि प्रायश्चित्तमिदमिति ज्ञात्वा नोच्चारितमिति चेत्तत्राहुः । अज्ञानादिति । बालकेनाज्ञानादपि प्रक्षिप्तोऽग्निर्यथा काष्ठराशिं दहति तद्वत् ॥ १८ ॥

न केवलमघदहनमेव करोति नाम किन्तु भगवत्प्रेमनाम्नि-ध्यादिकञ्चेत्यतो दृष्टान्तान्तरमाहुः । यथा अगदमौषधं वीर्यवत्तममिति वक्तव्ये वीर्यतममित्युक्तम् मतुप्लोपार्षः अर्थशब्दोऽयं आद्यजन्तो वा यदृच्छया अकस्मादज्ञानेनापि इत्यर्थः उपयुक्तं भक्षितं सदात्मगुणं नैरुज्यं बलपुष्ट्यादिकञ्च करोति मन्त्रोऽपि जाग्रद्रूपस्तथैव नामेत्यर्थः । यद्वा । नामात्मकोऽयं मन्त्रस्तथा स्वकार्यं कुर्यादेव न हि वस्तुशक्तिर्ज्ञानादिकमपेक्षत इत्यर्थः ॥ १९ ॥ २० ॥

प्रत्युदिताः प्रत्याख्याता यमराजे यमराजाय ॥ २१ ॥ २२ ॥

अन्तर्दधिरे इति । तस्यायुःशेषसत्त्वेऽपि पापैरेव यथाशास्त्रमायुः क्षयं ज्ञात्वा यमदूतैराकर्षणोपक्रमः कृत इति स एव समयो मरणकालत्वेनोपचरितः वस्तुतः पापक्षयादायुर्भङ्गाभावादिति ज्ञेयम् ॥ २३ ॥

यमदूतानां कृष्णदूतानाञ्च धर्ममाकर्ण्य कृष्णदूतानां धर्मं शुद्धं गुणातीतं भागवतं भगवत्प्रणीतं यमदूतानान्तु वैदं वेदत्रयप्रतिपाद्यं गुणाश्रयमशुद्धम् ॥ २४ ॥ २५ ॥

धिङ्मां विगर्हितं सद्भिर्दुष्कृतं कुलकज्जलम्।
हित्वा बालां सतीं योऽहं सुरापामसतीमगाम् ॥ २७ ॥
वृद्धावनाथौ पितरौ नान्यबन्धू तपस्विनौ।
अहो मयाधुना त्यक्तावकृतज्ञेन नीचवत् ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

आत्मना मया वृषल्यां जायता पुत्रतया जायमानेन ब्रह्म ब्राह्मणत्वं विप्लावितं नाशितम् ॥ २६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तैस्तपआदिभिः तान्येवाघानि पूयन्ते अधर्मजमधर्माज्जातं मलिनं तेषामघानां हृदयं सूक्ष्मरूपं तु नो पूयते न शुद्धयति तदपीशाङ्घ्रिसेवया हरिकीर्त्तनादिना शुद्धयतीत्यर्थः ॥ १७ ॥

ज्ञानिना अज्ञानिना वा कृतं हरिनामकीर्त्तनादिरूपं हरिसेवनं स्वभावत एव सफलम्भवतीति सदृष्टान्तमाहुः। अज्ञानादिति द्वाभ्याम्। अजानता वा केनचित्प्रक्षिप्तोऽनलः एधो दहेदेव तद्वत् ॥ १८ ॥

यथा वीर्यतमम् अमृतरसायनादि अगदमौषधं यदृच्छयोपयुक्तं सेवितमजानतोऽप्यात्मगुणं कुर्यात्तथा मन्त्रोऽपि हरये नम इत्यादिः आत्मगुणं सर्वपापनिर्णाशपूर्वकं परानन्दप्राप्तिलक्षणं मोक्षं कुर्यादेवेत्यर्थः ॥ १९ ॥

भागवतं धर्मं भगवन्नामोच्चारणादिरूपं धर्मं सुष्ठु विनिर्णीय तं याम्यपाशान्निर्मुच्य मृत्योः अमूमुचन् मुक्तो भविष्यतीति सङ्कल्पमात्रेण जन्ममरणादिप्रवाहलक्षणात् संसारान्मोचयामासुरित्यर्थः ॥ २० ॥

प्रत्युदिताः प्रत्याख्याताः यमयति नरान् इति यमस्तस्य सम्बोधने हे यम! हे नृप! राज्ञे धर्माय आर्षत्वाद्दृजभावे तु यमराज्ञे इत्येकं पदं यमान्तिके यात्वा यथावत् कथयामासुः ॥ २१ ॥

प्रकृतिं गतः स्वस्थः दर्शनेन तेषां दर्शनेनोत्सवो यस्य सः ॥ २२ ॥

विवक्षुं वक्तुमिच्छन्तमभिप्रेत्य तस्य पश्यतः अन्तर्दधिरे ॥ २३ ॥

यमदूतानां त्रैविध्यं विहितनिषिद्धमिश्रभेदात्त्रिविधं स्वार्थं यस्य स्वर्गादिफलकं गुणाश्रयं सत्त्वादिगुणाः आश्रयो निमित्तं यस्य तं गुणमयदेहाभिमानिजीवकर्त्तृकमित्यर्थः। कृष्णदूतानां शुद्धं शुद्धाधिकारिविषयं भागवतं भगवत्प्राप्तिफलकं च धर्ममाकर्ण्य भगवति भक्तिमानासीत् आत्मनः अशुभं स्मरंस्तस्यानुतापश्चासीत् ॥ २४—२५ ॥

अनुतापं तमेवैव प्रपञ्चयति। अहो इति चतुर्भिः। वृषल्याम् आत्मना पुत्ररूपेण जायता मया ब्रह्म ब्रह्मत्वं विप्लावितं लोपितम् ॥ २६ ॥

भाषा टीका।

उन तप दान जपादिकों के सेवन से पाप सब नष्ट हो जाते हैं परन्तु उन पापों का सूक्ष्म अंश नष्ट नहीं होता है सो भी परमेश्वर के नामोच्चारण चरणसेवनादि से नष्ट होजाताहै ॥ १७ ॥

जो यह परम सनातन धर्म कहा है इस से प्रति दिन आत्मा की शुद्धि होती है जैसे धोने से वस्त्र की शुद्धि होती है ॥ ० ॥

आत्मा जो स्वयं अकर्ता है उसकी अत्यंत शुद्धि केवल क्रिया मात्र से नहीं होती है इससे निष्काम होकर हरि का भजन करे ॥ ० ॥

अज्ञान से अथवा ज्ञानसे कीर्तनकिया जो भगवान् का नाम सोई पुरुष मात्र के पाप को नाश कर देता है जैसे कि अग्नि लकडी को जलदी जलाय देता है ॥ १८ ॥

जैसे कि उत्तम गुण कारक औषध किसी प्रकार भी सेवित हो जाने से नहीं जानने वाले पुरुष को भी अपना गुण दिखा देताहै जैसे गरुडादिकों का मंत्र सर्प विष को नाश करदेता है तैसेही नाम भी उच्चारण मात्र से अपने फल को कर देता है ॥ १९ ॥

हे दूतो हो यदि इस धर्म में संदेह हो तो तुमारे पति यमराज जी से पूंछो वे धर्मराज भगवान् धर्म के रहस्य को जानते हैं ॥ ० ॥

श्रीशुकदेवजी बोले हे नृप! उन विष्णु पार्षदोंने इस प्रकार से भागवत धर्म का निर्णय करके उस ब्राह्मण को यमपास से छुडा कर मरने से भी बचा दिया ॥ २० ॥

हे राजन् इस प्रकार से विष्णु दूतों के निषेध करने से यमके दूत यमराज के समीप में गये जाकर यमराज से जैसा हाल सब कहते भये ॥ २१ ॥

ब्राह्मण अजामिल तो पाशमे से छूट गया भय के निवृत्त होने से अपने होस में आगया विष्णु पार्षदों के दर्शन से उस को आनंद भया फिर उनको उसने नमस्कार किया ॥ २२ ॥

हे अनघ! विष्णुपार्षदों ने जब जाना कि यह कुछ कहना चाहता है तब उसके देखते ही वहीं पर अदृश्य होगये २३

अजामिलने भी श्रीकृष्ण के दूत तथा विष्णुके दूत इनके संवाद में यमदूतों से वैदिकत्रिगुणधर्म को सुना विष्णुदूतों से शुद्ध भागवत धर्म को सुना ॥ २४ ॥

फिर श्री हरि के माहात्म्य श्रवण करने से श्रीभगवान् मे उसकी भक्ति होगई और अपने अशुभों को स्मरण करने से उसको बडा भारी पश्चात्ताप हुआ ॥ २५ ॥

अहो मैने अपने मन को नहीं जीता अब बडा कष्ट और हानी करी जो कि मैने शूद्री में अपने को पुत्र रूप से उत्पन्न करके ब्रह्म तेज को नष्ट कर दिया ॥ २६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

दुष्कृतं दोषकर्त्तारं कुलस्य कज्जलं कलङ्कम् ॥ २७ ॥

नास्त्यन्यो बन्धुः पुत्रादिर्ययोः तपस्विनौ सन्तौ अधुना तत्क्षणमेव ॥ २८ ॥ २६ ॥

सोऽहं व्यक्तं पतिष्यामि नरके भृशदारुणे ।
धर्मघ्नाः (१) कामिनो यत्र विन्दन्ति यमयातनाः ॥ २९ ॥
किमिदं स्वप्न आहोस्वित् साक्षाद्दृष्टमिहाद्भुतम् ।
क याता अद्य ते ये मां व्यकर्षन् पाशपाणयः ॥ ३० ॥
अथ ते क गताः सिद्धाश्चत्वारश्चारुदर्शनाः ।
व्यमोचयन्नीयमानं बध्वा पाशैरधो भुवः ॥ ३१ ॥
अथापि मे दुर्भगस्य विबुधोत्तमदर्शने ।
भवितव्यं मङ्गलेन येनात्मा मे प्रसीदति ॥ ३२ ॥
अन्यथा म्रियमाणस्य नाशुचेर्वृषलीपतेः ।
वैकुण्ठनाम ग्रहणं जिह्वा वक्तुमिहार्हति ॥ ३३ ॥
क चाहं कितवः पापो ब्रह्मघ्नो निरपत्रपः ।
क च नारायणेत्येतद्भगवन्नाम मङ्गलम् ॥ ३४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इदानीं तस्य विमर्शपूर्वकं मोक्षक्रममाह । किमिदमित्यष्टभिः । साक्षात्प्रत्यक्षमिह जाग्रतैव दृष्टम् ॥ ३० ॥

ये मां व्यमोचयंस्ते च क गताः ॥ ३१ ॥

यद्यप्यहमस्मिन् जन्मनि दुर्भगः पापीयानथापि जन्मान्तरे नूनं पुण्यवानित्याह । विबुधोत्तमदर्शन इति निमित्तसप्तमी तेषां दर्शनार्थं पूर्वेण मङ्गलेन महता पुण्येन भवितव्यं येन दर्शनेन ॥ ३२ ॥

अन्यथा पूर्वपुण्यं विना कथम्भूतं वैकुण्ठनाम गृह्यते वशीक्रियते चित्तमनेनेति ग्रहणम् ॥ ३३ ॥

ब्रह्मघ्नो विप्रत्वनाशकः ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सद्भिरार्यैर्विशेषेण गर्हितं मां धिक् "उभसर्वतसोः कार्या धिगुपर्यादिषु" इति सम्बन्धसामान्ये षष्ठ्यपवादिका द्वितीया धिगिति निन्दाद्योतकमव्ययं मां मम धिक् निन्दा निन्द्योऽहमित्यर्थः कथम्भूतं मां दुष्कृतं दुष्टं कृतवान् दुष्कृतं कुलकज्जलं कुलकलङ्कं किञ्च सतीं विशुद्धां बालां योषां स्त्रियं हित्वा सुरापां सुरां पिबतीति तामत एवासतीमगामगच्छम् ॥ २७ ॥

वृद्धौ प्रवयसावनाथौ रक्षकरहितौ न विद्यतेऽन्यो बन्धुः पुत्रादिर्ययोस्तौ तपस्विनौ तपन्तौ पितरौ मातापितरावकृतज्ञेन कृतघ्नेन मयाधुना तत्क्षणमेव नीचेनेवाहो त्यक्तौ ॥ २८ ॥

स एवंविधोऽहं नूनं नितरां दारुणे नरके पतिष्यामि यत्र नरके धर्मघ्नाः यमादयः सन्ति कामिनो मादृशाश्च यमयातना विन्दन्ति लभन्ते ॥ २९ ॥

एवं तस्य परितापमनुवर्ण्येदानीं विमर्शपूर्वकं मुक्तिसाधनधर्मानुष्ठानक्रममाह । किमित्यादिना ब्रह्मण्यनुभवात्मनीत्यन्तेन । किमिदं यमकृष्णदूतागमनतत्सम्भाषणादिदर्शनं स्वप्नः आहोस्विदुत साक्षाज्जाग्रता मया महाद्भुतं दृष्टमद्याधुना दूताः क याताः ये पाशपाणयः सन्तो मामाकृष्टवन्तः ॥ ३० ॥

अथ ते चत्वारः प्रियदर्शनाः सुन्दराः सिद्धाः क गताः येपाशैर्बध्वाधो भुवः नरकान्प्रति नीयमानं मां मोचितवन्तः ॥ ३१ ॥

यद्यप्यहं मन्दभाग्यस्तथापि मे दुर्भगस्यापि विबुधोत्तमानां दर्शने निमित्तसप्तमी दर्शनेन निमित्तेनेत्यर्थः मङ्गलेन भवितव्यं किं तद्येन मङ्गलेन शुभकर्मणा ममात्मा मनः परमात्मा वा प्रसीदति ॥ ३२ ॥

अन्यथा यदि मङ्गलेन न भवितव्यं पुण्येन विनेत्यर्थः वृषलीपतेरत एवाशुचेर्म्रियमाणस्य मर्तुमुद्यतस्य मम जिह्वा वैकुण्ठस्य नाम ग्रहणं गृह्यते वशीक्रियते चित्तमनेनेति ग्रहणं नामरूपं ग्रहणं वक्तुं नार्हति ॥ ३३ ॥

कितवो मूर्खो ब्रह्मघ्नः विप्रत्वनाशकः ब्रह्मोज्झ इति पाठे त्यक्तवेदः निर्लज्जोऽहं क मङ्गलावहं नारायणेत्येतद्भगवन्नाम क ईदृशस्य ममान्तकाले तन्नामोच्चारणं पुण्येन विना कथं सम्भवेदित्यर्थः ॥ ३४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कुलकज्जलं ब्राह्मणकुलमषीभूतम् ॥ २७—३० ॥

भुवोऽधः नरकम् ॥ ३१ ॥

यत्किञ्चित्पुण्यमस्ति चेद्विष्णुदूतसंदर्शनसाधनं तत्स्यादिति प्रार्थ्यते । अथापीति । येन पुण्येनात्मा मनः ॥ ३२ ॥

अन्यथा पूर्वचीर्णपुण्याभावे ॥ ३३ ॥

ब्रह्मोज्झः त्यक्तब्राह्मण्यः ॥ ३४ ॥ ३५ ३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

सोऽहं व्यक्तं पतिष्यामीति । स्वदोषमात्रदृष्ट्यैव नाममाहात्म्यदृष्ट्या तु वक्ष्यते । अन्यथा म्रियमाणस्येति ॥ २९—३१ ॥

(१) धर्मज्ञा इति श्रीवीर०

सोऽहं तथा यतिष्यामि यतचित्तेन्द्रियानिलः ।
यथा न भूय आत्मानमन्धे तमसि मज्जये ॥ ३५ ॥
विमुच्य तमिमं बन्धमविद्याकामकर्मजम् ।
सर्वभूतसुहृच्छान्तो मैत्रः करुण आत्मवान् ॥ ३६ ॥
मोचये ग्रस्तमात्मानं योषिन्मय्यात्ममायया ।
विक्रीडितो ययैवाहं क्रीडामृग इवाधमः ॥ ३७ ॥
ममाहमिति देहादौ हित्वा मिथ्यार्थधीर्मतिम् ।
धास्ये मनो भगवति शुद्धं तत्कीर्त्तनादिभिः ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथापीत्यनेन प्राचीनास्य भक्तिरस्ति किन्तु केनाप्यपराधे-नावृत्ताभूदिति गम्यते ॥ ३२—३८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दुष्कृतं पापरूपं दोषकर्त्तारं वा ॥ २७ ॥

अधुना अत्र जन्मनि ॥ २८—३० ॥

भुवोऽधः नरकं प्रति नीयमानम् ॥ ३१ ॥

विबुधोत्तमानां दर्शने विषये कारणत्वेन केनापि मङ्गलेन तच्च कस्यचिद्भक्तस्य कारुण्यमेवानुमेयं तेन विना तत्र भक्तिबीजवप-नासम्भवात् । यत एव स्वपुत्रस्य नारायण इति नाम चकार ॥३२॥

वक्तुं कर्त्तुम् । यद्वा । वैकुण्ठनाम कीदृशं गृह्यते प्राप्यते अनेनेति वैकुण्ठप्रापकमित्यर्थः ॥ ३३—३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

दुष्कुलं दुष्कर्मणा कुलकज्जलं वंशदूषकम् ॥ २७ ॥

नान्यो बन्धुः पुत्रादिर्ययोस्तौ तपस्विनौ मन्निमित्ततापयुक्तौ अधुना अस्मिन् विवेकार्हजन्मनि नीचवदविवेकिवदवि-धिनेत्यर्थः त्यक्तौ ॥ २८ ॥

व्यक्तं निश्चितम् ॥ २९ ॥

अद्भुतं यमकृष्णपार्षददर्शनादिकं संस्मृत्याह । किमिदमिति । इद-मद्भुतं मया दृष्टं किं स्वप्नः आहोस्वित्साक्षाज्जाग्रतैव ये मां व्यकर्षन्कुष्टवन्तस्ते क्व याताः ॥ ३० ॥

ये भुवोऽधो नरकं नीयमानं मां व्यमोचयन् विमोचितव-न्तस्ते च क्व गताः ॥ ३१ ॥

अस्मिन् जन्मनि दुर्भगस्य पापीयसोऽपि मे विबुधोत्तमदर्शने जाते केनचिन्मङ्गलेन जन्मान्तरीयेण पुण्येन भवितव्यं येन दर्श-नेन मे आत्मा प्रसीदति ॥ ३२ ॥

अन्यथा जन्मान्तरीयपुण्याभावे वैकुण्ठनाम गृह्यते येन तद्वै-कुण्ठनामग्रहणं वाक्यम् अशुचेर्मे जिह्वा कथं वक्तुमर्हति ॥ ३३ ॥

ब्रह्मघ्नः विप्रत्वघातकः ॥ ३४ ॥

भाषा टीका ।

मै अपने कुलको काला लगाने वाला भया सत्पुरुष मेरी निंदा करते हैं मेरे को धिकार है जिस मैनेकि छोटी अवस्था वाली स्त्री को छोडके मद्य पान करने वाली दुष्ट स्त्री का संग किया ॥ २७ ॥

जिनके कोई बंधु नहीं थे ऐसे अनाथ पिता माता को मै अकृतज्ञ ने छोड दिया मेरे छोडने से इस वखत वे बड़े तपस्वी होकर भी दुखी होगये मै बडा नीच हूं ॥ २८ ॥

निश्चित है कि सो मै अति कठिन नरक में गिरूंगा जहाँ पर कि धर्म नाश करने वाले कामी पुरुष यम दंड को भोगते हैं ॥ २९ ॥

क्या आज यह स्वप्न मैने देखा है अथवा साक्षात् मैने यह क्या अद्भुत देखा जोतीन हाथ में पाश लेकर मो को खैंचते थे वे दूत कहां चले गये ॥ ३० ॥

और वे सुंदर दर्शन वाले चार सिद्ध कहां गये जिनोंने कि पाशों से बाँधकर पृथि के नीचे नरकमें लेजाते समय मेरे को छुटाया है ॥ ३१ ॥

तौ भी अब तो उन देवतों के दर्शन होने से मेरे को दुर्भागी होने पर भी मंगल ही होगा क्योंकी मेरा मन बडा प्रसन्न है ॥ ३२ ॥

यदि ऐसा न होता तो अति अपवित्र शूद्री का पति मेरे मरण समय मेरी जिव्हा कभी भी नारायण के नाम को कहने को योग्य न होती ॥ ३३ ॥

मै पापी ब्रह्मघाती निर्लज्ज कपटी कहां और सर्व मंगलरूप श्री भगवान् का नारायण ऐसा नाम कहां उसको मैने उच्चा रण किया तो भलाही होगा ॥ ३४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अभिध्याभूतेऽर्थे धीर्यस्य तथाभूतः सन् देहादौ ममाहमिति मतिं हित्वा मनो धास्ये ॥ ३८ ॥

श्रीशुक उवाच ॥

इति जातसुनिर्वेदः क्षणसङ्गेन साधुषु ।
गङ्गाद्वारमुपेयाय मुक्तसर्वानुबन्धनः ॥ ३९ ॥
स तस्मिन् देवसदन आसीनो योगमाश्रितः ।
प्रत्याहृतेन्द्रियग्रामो युयोज मन आत्मनि ॥ ४० ॥
ततो गुणेभ्य आत्मानं वियुज्यात्मसमाधिना ।
युयुजे भगवद्धाम्नि ब्रह्मण्यनुभवात्मनि ॥ ४१ ॥
यर्ह्युपारतधीस्तस्मिन्नद्राक्षीत् पुरुषान् पुरः ।
उपलभ्योपलब्धान् प्राग्ववन्दे शिरसा द्विजः ॥ ४२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मुक्तं सर्वमनुबन्धनं पुत्रादिस्नेहो येन सः ॥ ३९ ॥

प्रत्याहृत इन्द्रियग्रामो येन ॥ ४० ॥

गुणेभ्यो देहेन्द्रियादिभ्य आत्मानं वियुज्य विशोध्य आत्मसमाधिना चित्तैकाग्र्येण भगवतो धाम्नि स्वरूपे ॥ ४१ ॥

तस्मिन् भगवद्धाम्नि उपारता निश्चला धीर्यस्य स तस्मिन्काले ऽद्राक्षीदिति वा पुरः पुरतः ततश्च प्रागुपलब्धानेव तानुपलभ्य प्रत्यभिज्ञाय ववन्दे ॥ ४२ ॥ ४३ ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सोऽहं सिद्धदर्शनवैकुण्ठनामग्रहणादिसूचितधर्मयुक्तोऽहं यत्ताः नियमिताः चित्तादयो येन तथाभूतः सन् तथा यतिष्यामि यत्नं करिष्यामि कथं यथा भूयः पुनरात्मानमन्धे तमसि नरके न मज्जये मग्नं न कुर्याम ॥ ३५ ॥

किं कृत्वा अविद्या देहात्माभिमानमूलमज्ञानं कामः शब्दादिविषयाभिलाषः कर्म एभिर्जातं तमिमं बन्धं गर्भजन्माद्यवस्थापरिवृत्तिरूपं संसारं विमुच्यापोह्य कथम्भूतः सर्वेषु भूतेषु सुहृत् शान्तः निगृहीतान्तरिन्द्रियः करुणः सर्वभूतेषु कृपावानात्मवान् प्रशस्तमनस्कः ॥ ३६ ॥

योषिद्रूपया भगवन्मायया ग्रस्तमात्मानं मोचये तां विशिनष्टि । ययैवाहमधमो ज्ञानशून्यः क्रीडामृग इव क्रीडितः ॥ ३७ ॥

देहे आदिशब्दात्तदनुबन्धिन्यहंममेति या मिथ्यार्थधीर्मतिर्मिथ्याश्रयायाथार्थ्यधीर्देहाद्यर्थविषया धीस्तद्रूपा मतिस्ताम् । अनहमर्थदेहाद्यर्थविषयकाहंधियो विपरीतरूपत्वान्मिथ्यार्थधीरित्युक्तं मोहार्थधीरिति पाठान्तरं तत्रापि मोहात्मिकामहन्त्वेन देहादिरूपार्थधीरूपामित्येवार्थः हित्वा त्यक्त्वा भगवति तत्कीर्तनादिभिः शुद्धं मनो धास्ये आधास्ये ॥ ३८ ॥

इतीत्थं जात उत्पन्नः सुष्ठु नितरां निर्वेदो यस्य तादृशः साधुषु क्षणमात्रसङ्गेन मुक्तं सर्वानुबन्धनं पुत्रादिस्नेहो येन सः गङ्गाद्वारं हरिक्षेत्रम् उपेयायोपगतवान् ॥ ३९ ॥

सोऽजामिलः तस्मिन् देवसदने देवो भगवान् सीदति सन्निहितो भवत्यस्मिन् गङ्गाद्वारे उपविष्टः योगं भगवद्भक्तियोगमाश्रितः आरभतेत्यर्थः प्रत्याहृतः विषयेभ्यः इन्द्रियग्रामः अन्तर्बाह्येन्द्रियसङ्घो येन तादृशः प्रथममात्मानं प्रत्यगात्मानं गुणेभ्यः गुणपरिणामेभ्यः विविच्य पृथक्त्वेनानुसन्धाय तस्मिन्नात्मनि प्रत्यगात्मनि मनो युयुजे ॥ ४० ॥

तत आत्मनः जीवान्तर्यामिणः परमात्मनः समाधिना ध्यानेन तस्मिन् ब्रह्मणि स्वरूपेण गुणैश्च निरतिशयबृहत्यनुभवात्मनि ज्ञानस्वरूपे भगवद्धाम्नि भगवच्छब्दवाच्ये तेजसि युयुजे स्थिरीकृतचित्तः सन् यर्हि यदोपरता शब्दादिभ्यो निवृत्ता धीर्यस्य तादृशस्तस्मिन् काले पुरोऽग्रे पुरुषान् पूर्वदृष्टान् भगवत्पार्षदानद्राक्षीत्ततः प्रागुपलब्धान् प्राप्तान् पुरुषानुपलभ्य प्रत्यभिज्ञाय द्विजः शिरसा ववन्दे ॥ ४१ ॥ ४२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आत्ममायया हरेरधीनया लोकमोहनशक्त्या यथा यथावत् ॥ ३७ ॥ ३८ ॥

गङ्गाद्वारं नाम तीर्थविशेषम् ॥ ३९ ॥

प्रत्याहृतो वशीकृत इन्द्रियग्रामो येन स तथा तस्योपासितप्रकारं वक्ति । युयोजेति । आत्मनि हरौ ॥ ४० ॥

गुणेभ्यः शरीरेन्द्रियादिभ्यः आत्मानं स्वस्वरूपं भगवद्धाम्नि भगवत्स्वरूपे ब्रह्मणि व्याप्ते अनुभवात्मनि ज्ञानात्मनि ॥ ४१ ॥

यर्हि यस्मिन् काले उपारतधीः बाह्यविषयान्निवृत्य हरावेव निरतबुद्धिरभूत्तस्मिन् काले पुरः स्वस्याग्रभूमौ प्रागुपलब्धान् दृष्टान् ॥ ४२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एवं साधुसङ्गमपर्यन्तं नाम्नः फलमुक्त्वा साधुसङ्गस्य च फलविशेषमाह । इतीति । जातः सुष्ठु भगवद्भक्त्युत्पादनपूर्वत्वेन निर्वेदो यस्य सः ॥ ३९ ॥

हित्वा कलेवरं तीर्थे गङ्गायां दर्शनादनु ।
सद्यः स्वरूपं जगृहे भगवत्पार्श्ववर्त्तिनाम् ॥ ४३ ॥
साकं विहायसा विप्रो महापुरुषकिङ्करैः ।
हैमं विमानमारुह्य ययौ यत्र श्रियः पतिः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र सति धास्ये मन इत्यादिना यद्विचारितं तत्र कृतैस्तत्कीर्त्तनादिभिः शुद्धेन तल्लब्धस्फुरणविशेषेण च मनसा पुनरिदं विचारितम् । ईदृशस्यापि मनसो भगवत्पर्यन्ता गतिर्न स्यात् । "ब्रह्मणो हि प्रतिष्ठाहम्" इति न्यायेन परात् परा हि सविशेषावस्थितिः तस्मान्निर्विशेषतत्प्रकाशलक्षणब्रह्मानुभवार्थमेव प्रयतिष्ये । तदग्रिमवार्त्ता तु महाकृपालुना श्रीभगवतैव निर्वाहयिष्यते तदेतद्विचार्य तेन यत्कृतं तद्दर्शयति । स तस्मिन्निति द्वाभ्याम् ॥ ४० ॥

यर्ह्युपारतेत्यनेन ब्रह्मानुभवानन्तरमपि श्रीवैकुण्ठवैभवाविर्भाव इति समर्थ्यते ॥ ४१ ॥ ४२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यथैव क्रीडामृग इवाधमो लोको भवति तथैवाहमुत्तमो विप्रोऽप्यनया विक्रीडितः ॥ ३७ ॥

देहादौ मिथ्याभूता एवामी अर्था इति धीर्यस्य तथाभूतश्च सन् ममाहमिति मतिं हित्वा ॥ ३८ ॥

मुक्तसर्वानुबन्धनः त्यक्तस्त्रीपुत्रादावासक्तिः ॥ ३९ ॥

योगं भक्तियोगमात्मनि हरौ ॥ ४० ॥

गुणेभ्यो विषयेभ्यः वियुज्य वियुक्तीकृत्य आत्मसमाधिना विवेकाद्यन्येन भगवद्धाम्नि भगवत्स्वरूपे ॥ ४१ ॥

तस्मिन् भगवद्धाम्नि उपारतधीः निश्चलबुद्धिः पुरोऽग्र एव पूर्वपरिचितान् ॥ ४२—४५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ ममोद्धारार्थमुपायं करिष्यामीत्याह । सोऽहमित्यादिना । अन्धे तमसि संसारे यथा न मज्जये ॥ ३५ ॥

तमिमम् अविद्याकामकर्मजम् अज्ञानहेतुकसकामकर्मजं बन्धं देहादावहंममाभिमानं विमुच्य ॥ ३६ ॥

आत्मनः परमेश्वरस्य मायया योषिन्मय्या आत्मानं मोचये ॥ ३७ ॥

मिथ्या अर्थः अहं मनुष्योऽस्मि स्थूलोऽस्मि गृहादिकं ममैवेत्येवंभूतः विषयो यस्याः सा धीर्यस्य सः देहादौ देहे अहमिति गृहादौ ममेति च मतिं मिथ्यार्थां धियं हित्वा भगवदंशभूतः ज्ञानरूपः देहादिविलक्षणः भगवदीयमायामयदेहगेहादिभ्यो विरक्तः सन् भगवति तन्नामकीर्तनादिभिर्मनो धास्ये इत्यन्वयः ॥ ३८ ॥

तस्य कृत्यमाह । इतीत्यादिना । इत्येवं साधुषु क्षणसङ्गेन जातः सुष्ठु निर्वेदो देहगेहादौ वैराग्यं यस्य सः मती मुक्तं सर्वमनुबन्धनं पुत्रादिस्नेहो येन गङ्गाद्वारमुपेयाय ॥ ३९ ॥

तस्मिन् गङ्गाद्वारे देवसदने भगवदालये प्रत्याहृतः इन्द्रियग्रामो येन सः आत्मनि क्षेत्रज्ञे मनो युयोज ॥ ४० ॥

गुणेभ्यः विषयेभ्यः ततः क्षेत्रज्ञाख्य आत्मानं मनो वियुज्य भगवद्धाम्नि भगवत्स्वरूपे ब्रह्मणि बृहति अनुभवात्मनि परज्ञानस्वरूपे युयुजे ॥ ४१ ॥

यर्हि यदा तस्मिन् भगवत्स्वरूपे उपारता धीर्यस्य सः तदा पुरः अग्रे पुरुषान् अद्राक्षीत् तदनन्तरं प्रागुपलब्धानुपलभ्य प्रत्यभिज्ञाय शिरसा ववन्दे ॥ ४२ ॥

भाषा टीका ।

सो अब मैं मन इन्द्रिय प्राण को रोककर ऐसा यत्न करूंगा कि जिससे यह मेरा आत्मा नरक में न गिरने पावै ॥ ३५ ॥

अज्ञान काम कर्म से होने वाले इस बंध को मैं छोडूंगा सर्व भूतों का सुहृत शांत होकर मित्र करुणा वाला होकर आत्मज्ञानी होऊंगा ॥ ३६ ॥

स्त्री रूपी परमेश्वर की माया जो है जिसने मो अधम को क्रीडा मृगसा बनाकर मेरा आत्मा को ग्रस लिया है सो मैं अब छुटावूं गा ॥ ३७ ॥

मैं इसका मालिक हूं यह मेरी वस्तु है इस प्रकार से देहादि को मैं भूटी यथार्थ बुद्धि को छोडकर भगवान् के दर्शनादि को से शुद्ध करे मन को भगवान में लगाऊंगा ॥ ३८ ॥

क्षणमात्र भागवतों के संग होने से इस प्रकार सुंदर वैराग्यको प्राप्त होने से सब बंधनों से छूटकर हरिद्वारक्षेत्र को अजामिल चला गया ॥ ३९ ॥

शुकदेवजी बोले वह अजामिल उस देव स्थान मे स्थित होकर योगका आश्रय करके सब इंद्रियो को एकाग्र करके मन को परमात्मा में लगाता भया ॥ ४० ॥

तदनन्तर आत्मसमाधि द्वारा सब गुणों मे से मन को रोककर अनुभव स्वरूप परब्रह्म भगवत्स्वरूप में उसने संयुक्त किया ॥ ४१ ॥

उसी स्थान पर सब तरफ से उसकी चित्तवृत्ति जब रुक गई तब जिन विष्णु पुरुषों को पहिले देखा था उनको ही उसने फिर देखा तब उनको प्राप्त होकर उसने मस्तक से प्रणाम किया ॥ ४२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उपसंहरति । एवमिति द्वाभ्याम् । विप्लाविताः सर्वे धर्मा येन हतं व्रतं स्वदारनियमादि यस्य ॥ ४५ ॥

एवं स विप्लावितसर्वधर्मा दास्याः पतिः पतितो गर्ह्यकर्मणा ।
निपात्यमानो निरये हतव्रतः सद्यो विमुक्तो भगवन्नाम गृह्णन् ॥ ४५ ॥
नातः परं कर्मनिबन्धकृन्तनं मुमुक्षतां तीर्थपदानुकीर्तनात् ।
न यत् पुनः कर्मसु सज्जते मनो रजस्तमोभ्यां कलिलं ततोऽन्यथा ॥ ४६ ॥

य एवं परमं गुह्यमितिहासमघापहम् ।
शृणुयाच्छ्रद्धया युक्तो यश्च भक्त्यानुकीर्तयेत् ॥ ४७ ॥
न वै स नरकं याति नेक्षितो यमकिङ्करैः ।
यद्यप्यमङ्गलो मर्त्यो विष्णुलोके महीयते ॥ ४८ ॥
म्रियमाणो हरेर्नाम गृणन् पुत्रोपचारितम् ।
अजामिलोऽप्यगाद्धाम किं पुनः श्रद्धया गृणन् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
षष्ठस्कन्धेऽजामिलोपाख्याने
द्वितीयोऽध्यायः ॥ २ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कर्मनिबन्धस्य पापमूलस्य कृन्तनं छेदकमतःपरं नास्ति कस्मात्परं तीर्थपदस्यानुकीर्तनात् तत्र हेतुः यद्यतोऽनुकीर्तनात् ततोऽनुकीर्तनादन्यथा प्रायश्चित्तान्तरे रजस्तमोभ्यां कलिलं मलिनमेव तिष्ठति यत्तन्मनः कर्मसु पुनर्न सज्जते ॥ ४६ ॥ ४७ ॥

न वेक्षितो भवति ॥ ४८ ॥

म्रियमाणोऽवशत्वेन श्रद्धाविहीनोऽपि ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दर्शनादनु दर्शनादनन्तरं गङ्गायास्तीर्थे कलेवरं त्यक्त्वा गङ्गायामिति पाठे तीर्थे गङ्गाद्वारे क्षेत्रे गङ्गायां त्यक्त्वेत्यर्थः सद्यः भगवत्पार्श्ववर्तिनां पार्षदानां स्वरूपं तत्समानं रूपं जगृहे गृहीतवान् ॥४३॥

स विप्रोऽजामिलः महापुरुषकिङ्करैः साकं हैमं विमानमारुह्य विहायसा आकाशमार्गेणाचिरादिनेत्यर्थः ययौ गतः क्वेत्यत आह । यत्र श्रियः लक्ष्म्याः पतिरास्ते वैकुण्ठे इत्यर्थः भगवत्पार्श्ववर्तिस्वरूपग्रहणपूर्वक्रमेण वैकुण्ठगमनानन्तरं वेदितव्यं तत्र गतस्य तत्सायुज्यत्वादिति भावः ॥ ४४ ॥

उक्तमितिहासमुपसंहरन् भगवन्नामकीर्तनात्तद्विषयमत्यापादकमुपायान्तरमुत्कृष्टं नास्तीत्याह । एवमिति द्वाभ्याम् । एवमित्थं स द्विजः विप्लावितः विनाशितः सर्वः स्ववर्णाश्रमोचितः धर्मो येन दास्याः पतिरत एव पतितः स्वधर्माच्च्युतः गर्हितं निन्दितं कर्म यस्य हतं व्रतं अयं तु श्रुतसम्पन्नः शीलवृत्तगुणालय इत्यादिनोक्तं यस्य अत एव नरके निपात्यमानः यमभटैरिति शेषः तथाभूतोऽपि भगवन्नाम गृह्णन्नुच्चरन् सद्यः विमुक्तोऽभूदित्यर्थः ॥ ४५ ॥

मुमुक्षतां संसारबन्धनान्मोक्तुमिच्छतां तन्मूलकर्मरूपबन्धस्य निकृन्तनं कृत्यते छिद्यतेऽनेनेति कृन्तनमतस्तीर्थपदस्य भगवतोऽनुकीर्त्तनात्परमन्यन्नास्ति यद्यस्मादनुकीर्तनाद्रजस्तमोभ्यां कलिलं कश्मलं मनः कर्मसु संसृतिहेतुषु पुनर्न सज्जते न सक्तं भवत्यन्यथोपायान्तरेण न च न सज्जते इति न किन्तु संसृतिहेतुषु कर्मसु सज्जत एवेत्यर्थः ॥ ४६ ॥

अथेतिहासश्रवणादिफलमाह । य इति । परममतीव गुह्यं गोप्यमघापहं पापहरमिममितिहासं यः पुमान् श्रद्धया युक्तः शृणुयाद्यश्च भक्त्यानुकीर्त्तयेत्कथयेत् ॥ ४७ ॥

स पुमान्नरकं न याति नैव प्राप्नोत्येव यमकिङ्करैरीक्षितोऽपि न भवति यद्यप्यमङ्गलः पापवानपि मर्त्यः श्रवणादिकं कुर्वन्विष्णुलोके श्रीवैकुण्ठे महीयते पूज्यते भगवद्विषयकमत्युत्पत्तिद्वारा भगवल्लोकं प्राप्य तत्रत्यैर्बहुमन्यत इत्यर्थः ॥ ४८ ॥

एवं श्रवणकीर्त्तनादिभक्तियोगारम्भस्य कैमुत्यन्यायेन यमवश्यतापरिहारकत्वं वक्तुं कथितमितिहासमजामिलदृष्टान्तन्यायेन तद्वदनुपसंहरति । म्रियमाण इति । अजामिलो म्रियमाणः पुत्रोपचारेण अमुख्यया वृत्त्या प्रयुक्तमुपचारितमेव हरेर्नाम गृह्णन्

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

श्रीमं हरेः स्थानमगात् प्रासः किमुत श्रद्धया हरेर्गुणान् गुणाभिधायकनामानि गृणन् कीर्तयन्नित्यर्थः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

भगवत्पार्श्ववर्त्तिनां मुक्तानां स्वरूपं निर्दोषत्वादिलक्षणम् ॥ ४३ ॥ ४४ ॥

नामसङ्कीर्तने श्रद्धातिशयं जनयन्नुपसंहरति। एवमिति। दास्याःपतिरित्याक्रोशे षष्ठी अजामिलनाम मुक्त्वा दास्याः पतिरित्याहुर्यति लोक इत्यर्थः ॥ ४५ ॥

अन्यथा तीर्थपदानुकीर्तनं विना ॥ ४६ ॥ ४७ ॥

अमङ्गलो यद्यपि तथापि ॥ ४८ ॥

दासीसङ्गादवाप्तपापमुक्तिकरी अन्ते नारायणस्मृतिरिति ज्ञानन्नजामिलोऽपि मुक्तकर्मतयोपलब्धया नित्याभ्यासेन मरणसमयेऽपि नामस्मरणार्थं पुत्रोपचारितं कृत्वा श्रद्धया पुत्राह्वानव्याजेन कीर्तयन्मुक्तिमगात् नतु पुत्रस्नेहेन भगवति श्रद्धया "भक्तियोगो भवति तन्नामग्रहणादिभिः" इत्युत्तरत्र वक्ष्यमाणत्वात् पुत्रादिसाङ्केतिकं नाम उक्त्वा मुक्तकर्मत्वेन श्रीहरिनामकीर्तयन् किमुत श्रद्धयेत्युच्यते अस्य फलाधिक्यं च दर्शयितुं पृथगेवोक्तिरिति ज्ञातव्यम् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

द्वितीयोऽध्यायः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

सद्यो विमुक्तो जीवन्मुक्तो बभूव ॥ ४३ ॥ ४४ ॥

नामापराधयुक्तापेक्षयाह। य एवमिति द्वाभ्याम्। अमङ्गलो नामापराध्यपि ॥ ४५—४८ ॥

यतो म्रियमाण इति ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

यदनुकीर्त्तनात् कर्मसु मन एव न सज्जते अन्यथा प्रायश्चित्तान्तरैस्तु कलिलं मलिनमेव ॥ ४६—४८ ॥

प्रकरणमुपसंहृत्यापि पुनः सर्वथा प्रतीत्यर्थमेकेनैव वाक्येन नाममाहात्म्यसिद्धान्तमाह। म्रियमाण इति। म्रियमाणत्वादेव अश्रद्धयापि गृणन् किं पुनः श्रद्धयेति म्रियमाणोऽपि किं पुनर्जीवन्निति पुत्रोपचारितमपि किं पुनः साक्षादेव अजामिलो महापातक्यपि किं पुनर्निष्पाप इत्येवम्प्रकारचतुष्टयम् ॥ ४९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।

षष्ठस्कन्धे द्वितीयोऽयं सङ्गतः सङ्गतः सताम् ॥ २ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तस्य मुक्तिमाह। हित्वेति द्वाभ्याम् ॥ ४३ ॥ ४४ ॥

नामोच्चारणादिरूपया भगवद्भक्त्या पतितोऽपि मुक्तो भवतीति प्रकरणार्थमुपसंहरति। एवमिति द्वाभ्याम्। विप्लाविताः सर्वे धर्मा यस्य सः हतानि व्रतानि यस्य सः अतएव गर्ह्यकर्मणा पतितः निरये पात्यमानो भगवन्नाम गृह्णन् सद्यो विमुक्तः ॥ ४५ ॥

मुमुक्षतां मुक्तिमिच्छताम् अतः पूर्वत्र वर्णितप्रभावात् तीर्थपदस्य श्रीकृष्णस्यानुकीर्त्तनात् परमन्यत् कर्मरूपनिबन्धस्य कृन्तनं छेदकं नास्ति यत् यतः तीर्थपदानुकीर्त्तनात् मनः पुनः कर्मसु न सज्जते ततः तीर्थपदानुकीर्तनात् अन्यथा प्रायश्चित्तान्तरैः रजस्तमोभ्यां कलिलमेव तिष्ठति पुनः कर्मसु सज्जते इत्यर्थः ॥ ४६ ॥

अस्येतिहासस्य श्रवणादिफलमाह। य इति द्वाभ्याम् ॥ ४७ ॥

यमकिङ्करैरीक्षित एव न भवति नरकं न यातीति किमु वक्तव्यम्। किन्तु अमङ्गलो यद्यपि पूर्वं तथापि इतिहासश्रवणादिना सुमङ्गलो भूत्वा विष्णुलोके महीयते आद्रियते ॥ ४८ ॥

एतदेवाह। म्रियमाणः अस्वस्थमनस्कत्वेन श्रद्धाविहीनस्तत्रापि पुत्रोपचारितं हरेर्नाम गृह्णन् अजामिलोऽपि तद्धामागात् इतिहासश्रवणादिना जातया श्रद्धया गृणन् हरेर्नामोच्चारयन् विष्णुधाम यातीति किं वक्तव्यमित्यर्थः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

द्वितीयाध्यायार्थप्रकाशः ॥ २ ॥

भाषा टीका

उनके दर्शन मात्र ही से गङ्गाजी में उसने शरीर को त्याग दिया फिर शीघ्र ही भगवान् के पार्षदों के रूपको धारण किया ॥ ४३ ॥

तब वह ब्राह्मण दिव्य विमान पर बैठकर आकाश मार्ग में होकर उन विष्णु पार्षदों के सहित जाकर जहां पर लक्ष्मिकान्त भगवावान् हैं तहां पँहुँचा ॥ ४४ ॥

इस प्रकार सब धर्मों को नाश करने वाला वह दासी का पति निन्दित कर्म से पतित होकर भी व्रत के नाश होने से नरक मे गिराया जाता था सो भगवान् के नाम ग्रहण मात्र से छूट गया ॥ ४५ ॥

भाषा टीका।

मोक्ष चाहनेवाले को श्रीनारायण नाम कीर्तन से दूसरा उपाय कर्मबन्ध छुटाने वाला कोई नहीं है इस कीर्तन के करने से मन अन्यत्र नहीं लगता है और प्रायश्चित्तों के तो करने पर भी मन रजोगुण तमोगुण से लिप्त होजाता है ॥४६ ॥

जो पुरुष इस पापहारी इतिहास को सुनै अथवा श्रद्धा से सुनावे यत्नवान् होवे भक्तियुक्त होवे ॥ ४७ ॥

वह पुरुष कभी नरक मे नहीं जावैगा न यमपुरुष उसको देखेंगे यद्यपि पापी मनुष्य होवै तो भी विष्णु लोक मे प्रतिष्ठित होवेगा ॥ ४८ ॥

मरते समय मे पुत्र के निमित्त से हरिनाम ग्रहण करने से ऐसा पापी अजामिल भी हरिधाम को चला गया तो जो मनुष्य श्रद्धा से नाम लेंगे वे क्यों नहीं वैकुंठ को जाँयगे ॥ ४९ ॥

इति श्रीभागवत षष्ठस्कंध दूसरे अध्याय का भाषानुवाद लक्ष्मणाचार्यकृत समाप्त ॥ २ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे द्वितीयोऽध्यायः समाप्तः ॥ २ ॥

॥ तृतीयोऽध्यायः ॥

—○:*:○—

राजोवाच ।

निशम्य देवः स्वभटोपवर्णितं प्रत्याह किं तान् प्रति धर्मराजः ।
एवं हताज्ञो विहतान् मुरारेर्नैदेशिकैर्यस्य वशे जनोऽयम् ॥ १ ॥
यमस्य देवस्य न दण्डभङ्गः कुतश्चनर्षे ! श्रुतपूर्व आसीत् ।
एतन्मुने ! वृश्चति लोकसंशयं न हि त्वदन्य इति मे विनिश्चिम् ॥ २ ॥

श्रीशुक उवाच ।

भगवत्पुरुषै राजन् ! याम्याः प्रतिहतोद्यमाः ।
पतिं विज्ञापयामासुर्यमं संयमिनीपतिम् ॥ ३ ॥

यमदूता ऊचुः ।

कति सन्तीह शास्तारो जीवलोकस्य वै प्रभो ! ।
त्रैविध्यं कुर्वतः कर्म फलाभिव्यक्तिहेतवः ॥ ४ ॥
यदि स्युर्बहवो लोके शास्तारो दण्डधारिणः ।
कस्य स्यातां न वा कस्य मृत्युश्चामृतमेव वा ॥ ५ ॥
किं तु शास्तृबहुत्वे स्याद्बहूनामिह कर्मिणाम् ।
शास्तृत्वमुपचारो हि यथा मण्डलवर्तिनाम् ॥ ६ ॥
अतस्त्वमेको भूतानां सेश्वराणामधीश्वरः ।
शास्ता दण्डधरो नृणां शुभाशुभविवेचनः ॥ ७ ॥
तस्य ते विहतो दण्डो न लोके वर्त्ततेऽधुना ।
चतुर्भिरद्भुतैः सिद्धैराज्ञा ते विप्रलम्भिता ॥ ८ ॥
नीयमानं तवादेशादस्माभिर्यातनागृहान् ।
व्यमोचयन् पातकिनं छित्त्वा पाशान् प्रसह्य ते ॥ ९ ॥
तांस्ते वेदितुमिच्छामो यदि नो मन्यसे क्षमम् ।
नारायणेत्यभिहिते माभैरित्याययुर्द्रुतम् ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तृतीये तु यमेनापि वैष्णवोत्कर्षवर्णनैः ।
सान्त्वयित्वा स्वदूतास्ते वैष्णवे किङ्करीकृताः ॥ १ ॥

विष्णुदूतैर्निर्णीतं शास्त्रार्थं यममुखेन द्रढयितुं तृतीयाध्यायारम्भः । तत्र यदुक्तं यमराज्ञे यथा सर्वमाचचक्षुरिति ततः किं तत्र वृत्तमिति पृच्छति । निशम्येति । मुरारेर्नैदेशिकैः किङ्करै-

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं विहतान् अत एव हता आज्ञा यस्य । यस्य वशवर्त्ययं जनः सोऽपि तान् प्रति किमाह ॥ १ ॥

अत्याश्चर्यमेतदित्याह । यमस्येति । हे ऋषे ! यमस्य दण्डभङ्गः कुतश्चन कस्माच्चिदपि श्रुतपूर्वो नासीत् एतदेतस्मिन्नर्थे । यद्वा न श्रुतपूर्वः एतद्यमदूतनिराकरणं चासीत् अतः सर्वस्यापि लोकस्य संशयो वर्तते तं त्वत्तोऽन्यो न छिनत्तीति मे निश्चितमतः कथयेति शेषः ॥ २ ॥

भगवतः पुरुषैः प्रतिहत उद्यमो येषां ते याम्याः पुरुषाः ॥ ३ ॥

कति सन्तीत्याक्षेपोक्तिः त्रैविध्यं त्रिविधं स्वार्थे ष्यञ् । यद्वा त्रैविध्यं यथा भवति तथा कर्म कुर्वतः तथा कर्मफलस्याभिव्यक्तिहेतवः कति सन्तीति ॥ ४ ॥

सन्तु बहवः को बाधस्तत्राहुः । यदीति । मृत्युर्दुःखममृतं सुखं तेषां विप्रतिपत्तौ ते उभे अपि कस्य स्यातां न कस्यापि परस्परविरोधेनोभयोरपि प्रतिबन्धात् ऐकमत्ये तु कस्य वा न स्याताम् एकः सुखं कर्तुमिच्छति दुःखं चान्यः ऐकमत्ये च तयोः परस्परकार्यानुमोदनेनोभयोरपि प्राप्तेः कस्य वा ते उभे अपि न स्यातामित्यर्थः ॥ ५ ॥

ननु बहूनां कर्मिणां व्यवस्थया बहवः शास्तारो भवन्तु तथा सति नायं दोषः स्यात्तत्राहुः । बहूनां कर्मिणां व्यवस्थया शास्तृबहुत्वे शास्तृत्वं स्यात् घटेत किन्तु तदा यत्सर्वशास्तरि मुख्यं शास्तृत्वं तदेकदेशे उपचारमात्रमेव स्यात् यथा चक्रवर्तिन एव मुख्यं शास्तृत्वं मण्डलवर्तिनामुपचारमात्रं निरङ्कुशत्वाभावात् ॥ ६ ॥

यस्मादेवं शास्तृबहुत्वं न घटतेऽतस्त्वमेक एव शास्ता शुभाशुभे विविनक्तीति तथा ॥ ७ ॥

विप्रलम्भिता वञ्चिता लङ्घितेत्यर्थः ॥ ८ ॥

तदेवाहुः । नीयमानमिति ॥ ९ ॥

ते त्वत्तः यदि नोऽस्माकं क्षमं हितं मन्यसे अन्यथा अस्मत्तस्तदवज्ञाने तवाप्यनर्थः स्यात् अतर्क्यो हि तेषां प्रभावो यतो नारायणेति केवलमभिहिते माभयङ्कुर्विति वदन्तः शीघ्रमागताः ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमितिहासमुखेनाकर्णितभगवन्नाममाहात्म्यः राजा "पतिर्वः पृच्छत इति धर्मेऽस्मिन् यदि संशयः । स वेद परमं गुह्यं धर्मस्य भगवान् यम" इति भगवत्पार्षदैरासतमत्वेनाभिहितयममुखेन नाममाहात्म्यं प्रथयितुं पृच्छति द्वाभ्याम् । निशम्येति । एवमित्थं देवो धर्मराजः स्वभटैर्वर्णितं निशम्याकर्ण्य मुरारेर्भगवतो नैदेशिकैराज्ञाकारिभिः किङ्करैर्विहतान् निराकृतान् तान् किङ्करान् प्रति स्वयं विहता निराकृता आज्ञा यस्य तादृशः किमुक्तवान् धर्मराजं विशिनष्टि । यस्य धर्मराजस्य वशेऽयं जनः यद्वशवर्ती अयं सांसारिकजनः स किमाहेत्यर्थः ॥ १ ॥

हे ऋषे ! देवस्य यमस्य एतादृशो दण्डस्य भङ्गः कुतश्चिदासीदिति न श्रुतपूर्वः न श्रुत इत्यर्थः एतस्मिन्नर्थे सर्वस्यापि संशयो वर्तते इति शेषः हे मुने ! तमिमं लोकस्य मादृशस्य संदेहं त्वदन्यः न हि वृश्चति न छिनत्ति इति मे मया सुनिश्चितम् ॥ २ ॥

उत्तरमाह मुनिः । भगवत्पुरुषैरिति । हे राजन् ! भगवत्किङ्करैः प्रतिहतः उद्यमो येषां ते याम्या यमभटाः पतिमधिपतिं संयमिन्याः पुर्याः पतिं यमं प्रति विज्ञापयामासुः ॥ ३ ॥

विज्ञप्तिप्रकारमेवाह । कतीत्यादिना आययुर्द्रुतमित्यन्तेन । हे प्रभो ! यम इह लोके त्रैविध्यं त्रिविधमेव त्रैविध्यं स्वार्थे ष्यञ् पुण्यपापतदुभयमिश्ररूपेण त्रिविधं कर्म कुर्वतो जीवलोकस्य शास्तारः फलस्य सुखादिरूपस्य याभिव्यक्तिः प्रादुर्भावः तस्या हेतवः कति सन्तीत्याक्षेपः ॥ ४ ॥

सन्तु बहवः को बाधस्तत्राहुः । यदीति । बहवः यदि दण्डधारिणः शास्तारः दण्डरूपशासनकारिणः दण्डपूर्वकशिक्षाकारिणो वा बहवः स्युस्तर्हि मृत्युर्दुःखममृतं सुखं च कस्य वा न स्यातां कस्याप्युभं स्यातामित्यर्थः अयं भावः अन्योन्यविरोधिशास्तृबहुत्वे सति शास्त्रन्तराधीनस्य सुखदुःखादेः शास्त्रन्तरेण निवारणसम्भावनया कस्याप्युभे न स्यातां किन्तु भयपरिहारेणोदासीनो लोकः स्यादिति ॥ ५ ॥

परस्परविरोधिशास्तृबहुत्वे यद्यप्युभे स्यातां तथापि शास्तृत्वमुख्यं स्यादित्याहुः । किं त्विति । धर्मिणां कर्मिणां यत् शास्तृभिरापाद्यमानं सुखादि स्यादेव किन्तु शास्तृत्वमुपचारः तेषां शास्तृत्वममुख्यं हि स्याद्धि यथा मण्डलवर्त्तिनामल्पजनपदाधिपतीनां शास्तृत्वं यथा न मुख्यं निरङ्कुशत्वाभावात् ॥ ६ ॥

तस्य त्वच्छासनं तु निरङ्कुशं दृष्टमतः शास्तृबहुत्वं न घटेतेत्यभिप्रेत्य त्वमेक एव शास्ता त्वच्छासनं चेदानीं निहतमित्याहुः । शास्तेति । दण्डधरः पापिनां नृणां दण्डं धारयति कारयतीति तथा शास्ता हिताहितयोर्विविच्य ज्ञापयिता शुभाशुभे पुण्यापुण्ये विविनक्ति विभजतीति शुभाशुभविवेचकः । नन्द्यादित्वात्कर्तरि ल्युः ॥ ७ ॥

तस्यैवम्भूतस्य ते तव दण्डः शासनं लोके क्वाप्येतत्पर्यन्तं विहतो न वर्तते किन्त्वविहत एवाधुना त्वद्भुतरूपैश्चतुर्भिः सिद्धैस्ते तवाज्ञा विप्रलम्भिता वितथीकृता ॥ ८ ॥

कथं विप्रलम्भितेत्यत्राहुः । नीयमानमिति । तवादेशादस्माभिर्यातनागृहं नरकं प्रति नीयमानं पातकिनं ते सिद्धा व्यमोचयन् किं कृत्वा प्रसह्य बलात्ते पाशान् छित्वातः तान् सिद्धान्वेदितुं तद्बलतदभिप्रायतन्नामादिप्रभावादिकं सर्वं वेदितुमिच्छाम इत्यर्थः नोऽस्माकं क्षमं हितं यदि मन्यसे तर्हि कथयेति शेषः । तान्विशिंषन्ति । नारायणेत्येतस्मिञ्छब्देऽभिहिते उच्चारिते सति द्रुतमाश्वाययुराजग्मुः ॥ ९ ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भक्तिपूर्वकनामसङ्कीर्तनं मुक्तिसाधनमित्येतस्मिन्नध्यायेऽभिधीयते तत्र राजा पृच्छति । निशम्येति । हता आज्ञा यस्य स हताज्ञः । मुरारेर्नैदेशिकैराज्ञाकारिभिः किङ्करैरित्यर्थः विहतान् प्रतिहतान् स्वामिनिर्देशकरणाशक्त्या पीडितानित्यर्थः अयं जनो यस्य यमस्य वशे वर्तते ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दण्डभङ्गः आज्ञाभङ्गः वृश्चति छिनत्ति ॥ २ ॥

"वाचं यमे प्रेतपतौ यमने च यमः स्मृतः" इत्यभिधानात् संशयनिराकरणाय संयमनीपुरमिति ॥ ३ ॥

फलाभिव्यक्तिहेतवः फलदातारः कति सन्तीत्यस्यायमर्थः । किमेकः शास्ताऽथवा बहवः । तत्रापीयन्त इति नियमोऽस्ति किं वा नेति ॥ ४ ॥

द्वितीयं प्रत्याहुरित्याह । यदि स्युरिति । इयन्त इति सङ्ख्याना बहवः मृत्युमृतयोः दानसमार्थी उत न न द्वितीय इत्याहुरित्याह । कस्येति । मृत्युलक्षणो बन्धः अमृतलक्षणो मोक्षश्च कस्य स्यातामिति वक्तव्यं न कस्यापि स्यातां दातृत्वे सामर्थ्याभावात् प्रथमं परिहरन्तीत्याह । न चेति । तौ कस्य न स्यातां सर्वेषामपि स्यातां सामर्थ्यात् ॥ ५ ॥

नचैतद्युक्तमसम्भवात् मिथो विरोधापातादित्याहुरित्याह । किंत्विति । मण्डलवर्तिनां भूमण्डलेश्वराणाम् ॥ ६ ॥

यत एवं बहुत्वे दोषः अतः एकः शास्ता सचैकस्त्वमेवेति प्रथमपक्षोऽभिमत इत्याहुरित्याह । अत इति । शुभाशुभविवेचनः शुभाशुभविवेककर्ता ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

लोकसंशयमिति । स्वस्य तु न संशय इति भावः ॥ १—९ ॥

अथ तेषां ज्ञानाय किञ्चिद्बुद्धिकमुत्पन्नं तत्राहुः । नारायणेति ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तृतीये तु यमं प्राहुर्दूतास्ते स्वावमाननम् ।
स च तान् शिक्षयामास भक्तेरैश्वर्यमद्भुतम् ॥
कृष्णभक्तैः स्वभक्तैश्च यमो यद्यपि धिक्कृतः ।
न चुकोप प्रत्युत स्वाशिक्षणादनुतप्तवान् ॥ ०

विष्णुदूतैर्निर्यातितं स्वाज्ञाभङ्गं यममुखेनापि द्रढयितुं तृतीयाध्यायमारभते । तत्र यदुक्तं यमराजे यथासर्वमाचचक्षुरिति तत्र ततः किं वृत्तमिति पृच्छति । निशम्येति । नैदेशिकैर्दूतैराज्ञाकारिभिरेवं विहतान् तान् स्वयञ्च हताज्ञः ॥ १ ॥

कुतश्चन हे ऋषे ! कस्मादपि न श्रुतपूर्वः एतत् एतम् ॥ २ ॥ ३ ॥

सर्वलोकपराभवप्रदा वयमप्येवं पराभवं सहामहे तदद्य तेषां चतुर्णां चतुर्भुजानां शास्तिं कारयित्वा तमेवाजामिलं नरकमेवानेष्यामः यद्यानेतुं न शक्नुमस्तर्ह्यस्य सद्योतस्य तुल्यमेवातः परं न कुर्म इत्यन्तःकोपगद्गदाक्षरं साक्षेपमाहुः । कतीति । त्रैविध्यं त्रिविधम् ॥ ४ ॥

सन्तु बहवस्तत्र को बाध इत्यत आहुः । यदीति । कर्मफलं हि द्विविधं मृत्युर्नरकममृतं स्वर्गः तयोर्द्वयोरेव स्वत्वमारोपयितुमिच्छतां तेषां मध्ये कस्य ते द्वे स्यातामपि तु विरोधे सति न कस्यापीत्यर्थः । दैवादेकमत्येन तेषामविरोधे सति कस्य वा न स्यातामपि तु ते द्वे अपि सर्वस्य स्यातां नत्वेकं विनिगमनाभावादिति पुनर्विरोध एव भवेदिति भावः ॥ ५ ॥

ननु बहूनां कर्मिणां व्यवस्थयैव बहवः शास्तारो भवन्तु तथा सति नायं दोषः स्यात्तत्राहुः । किन्त्विति । सर्वशास्तर्येव शास्तृत्वं मुख्यमेकदेशे तूपचार एव । यथा चक्रवर्तिनः एवं मुख्यं शास्तृत्वं मण्डलवर्तिनां कर्मिणां त्वौपचारिकं निरङ्कुशत्वाभावात् ॥ ६ ॥ ७ ॥

विप्रलब्धिता वञ्चिता खण्डितेत्यर्थः ॥ ८ ॥

केन प्रकारेणोत्यत आहुः । नीयमानमिति । तेन तानत्रानीय यदि तद्धृष्टयोर्दण्डं दातुं त्वं पारयिष्यसि तदैव त्वं शास्ता अस्माकमपि दुःखाग्निर्निर्वातीति भावः ॥ ९ ॥

ननु ते स्वप्रभुस्थानं गताः सम्प्रति के तानत्रानयन्तु यतो दण्डयामीति चेत्तत्राहुः । तांस्ते त्वत्तो महासर्वज्ञत्वात् वेदितुमिच्छामः कस्य ते दूताः क्व वसन्तीति आनेष्यामस्तु बलाद्वयमेवेति भावः । यदि नः परमं हितं मन्यसे अन्यथा पराभवासहिष्णुतया वयं मरिष्याम एवेति भावः । तान् ज्ञातुं तेषां चेष्टितं किमपि ब्रूथेति चेदहो हृतात्भुतं तेषां चेष्टितमित्याहुः । नारायणेतीति । मा भैर्मा भैषीरिति वादिनमप्यूचुरहो अन्याय इति भावः ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हरिपार्षदवाक्यैर्भगवद्भक्तेः सर्वपापनिवर्तकत्वं सर्वपुरुषार्थदत्वं चोक्तवान् श्रीशुकः यममतेन स्वमतेन च श्रीभगवद्भक्तेः सर्वपापनिष्कृतित्वं सर्वपुरुषार्थप्रदत्वं चाह तृतीयेनाध्यायेन । यमराजे तथा सर्वमाचचक्षुरित्युक्तं तदनन्तरं यमराजः किमुक्तवानिति पृच्छति । यस्य वशे अयं सर्वोऽपि जनः स एवमुक्तप्रकारेण मुरारेर्नैदेशिकैः हता आज्ञा यस्य सः स्वभटोपवर्णितं श्रुत्वा मुरारेर्नैदेशिकैर्विहतान् स्वभटान् प्रति किं प्रत्याह प्रत्युत्तरमाह ॥ १ ॥

हे ऋषे ! यमस्य दण्डभङ्गः कुतश्चन कस्मादपि श्रुतपूर्वो नासीत् एतदेव मे मम सर्वस्य लोकस्य च संशयं त्वदन्यो न हि वृश्चति छिनत्ति अतः कथयेति शेषः ॥ २ ॥

प्रतिहतः उद्यमो येषां ते ॥ ३ ॥

त्रैविध्यं त्रिविधं स्वार्थे ष्यञ् विहितं निषिद्धं मिश्रं कर्म कुर्वतः जीवलोकस्य फलानां सुखादीनामभिव्यक्तेर्निष्पत्तेर्हेतवः शास्तारः शिक्षकाश्च कति सन्ति ॥ ४ ॥

एवं क्षुभिताः कति शास्तारः सन्तीत्याक्षिप्य किञ्चिद्धैर्यमवलम्ब्य बहुशास्त्रसम्भवकथनपूर्वकमेकस्यैव धर्मराजस्य शास्तृत्वं स्वयमेवाहुः । यदीति त्रिभिः । यदि बहवः शास्तारः लोके स्युः तर्हि मृत्युर्मरणममृतं जन्मचेत्युभे कस्य शास्तृत्वाज्ञया वा स्यातां कस्य वा नैव स्यातामित्यन्वयः लोके यदा बहूनां शास्तृणां पृथक् पृथक् बुद्धयः बहूनि च प्राणिकर्माणि तत्र कस्य चिच्छास्तुः किञ्चित्कर्मविशेषमवलम्ब्य प्राणिजननमरणे कस्मिंश्चिद्देशे काले संमते अन्यस्यान्यत्कर्मविशेषमवलम्ब्यान्यस्मिन् देशे काले संमते तत्र कस्याज्ञया ते स्यातां कस्य नेत्यर्थः अतो बहवः शास्तारो न सम्भवन्त्येक एव सम्भवतीति भावः ॥ ५ ॥

किंतु इह कर्मलोके बहूनां कर्मिणां शास्तृबहुत्वे शास्तृत्वमुपचार औपचारिकं स्यात् मुख्यं तु शास्तृत्वमेकस्यैव सम्भवति यथा मण्डलवर्तिनामौपचारिकं सार्वभौमस्य मुख्यं शास्तृत्वं सुप्रसिद्धम् ॥ ६ ॥

॥ श्रीशुक उवाच ॥

इति देवः स आपृष्टः प्रजासंयमनो यमः ।
प्रीतः स्वदूतान् प्रत्याह स्मरन् पादाम्बुजं हरेः ॥ ११ ॥

॥ यम उवाच ॥

परो मदन्यो जगतस्तस्थुषश्च ओतं प्रोतं पटवद्यत्र विश्वम् ।
यदंशतोऽस्य स्थितिजन्मनाशा नस्योतवद्यस्य वशे च लोकः ॥ १२ ॥
यो नामभिर्वाचि जनान्निजायां बध्नाति तन्त्यामिव दामभिर्गाः ।
यस्मै बलिं त इमे नामकर्मनिबन्धबद्धाश्चकिता वहन्ति ॥ १३ ॥
अहं महेन्द्रो निर्ऋतिः प्रचेताः सोमोऽग्निरीशः पवनोऽर्को विरिञ्चिः ।
आदित्यविश्वे वसवोऽथ साध्या मरुद्गणा रुद्रगणाः ससिद्धाः ॥ १४ ॥
अन्ये च ये विश्वसृजोऽमरेशा भृग्वादयोऽस्पृष्टरजस्तमस्काः ।
यस्येहितं न विदुः स्पृष्टमायाः सत्त्वप्रधाना अपि किं ततोऽन्ये ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अतो हेतोः सेश्वराणाम् ईश्वरैर्नानानियन्तृभिः सहितानां त्वमेक एव शास्ता नियन्ता ॥ ७ ॥

अधुना ते आज्ञा विप्रलम्भिता लङ्घिता ॥ ८ ॥

ते प्रसह्य बलात् पाशान् छित्वा पातकिनं व्यमोचयन् विमोचितवन्तः ॥ ९ ॥

यदि नो चमं योग्यं तद्वेदनं मन्यसे तर्हि ते त्वत्तो वेदितुमिच्छामः ॥ १० ॥

भाषा टीका ।

राजा बोले जिस यमराज के वशमे यह सब जनमात्र है नारायण के दूतों ने जब उनके दूतों को हटा दिया तब यमराजकी आज्ञा भग्न होगई फिर अपने दूतों के वचनों को सुन कर धर्मराज ने उन दूतों से क्या कहा सो आप मेरे से कहिये ॥ १ ॥

हे महर्षिजी ! यमदेव के दंड का भंग होना कभी कहीं किसी से नहीं सुना था हे मुने ! लोक के इस संशय को आप के विना दूसरा कोई दूर नहीं कर सकता है यह वात मेरे को निश्चित है सो आप कहिये ॥ २ ॥

श्री शुकदेव जी बोले हे राजन् ! भगवान् के पार्षदों ने जब यमराज के दूतों का उद्यम नष्ट कर दिया तब अपने मालिक संयमिनी पुरी के पति को यमदूतों ने उस वात का निवेदन किया ॥ ३ ॥

यमदूत बोले हे प्रभो ! जीव लोक के शासन करनेवाले कितने पुरुष हैं जो कि तीन गुणों के किये कर्मों के फल के प्रगट करने वाले हैं ॥ ४ ॥

यदि लोक मे बहुत से दंडधारी शासन कर्ता होंगे तब तो किस पुरुष को सुखदुःख नरक स्वर्ग होगा किस को न होगा ॥ ५ ॥

और भी बहुत दंड देने वाले होंगे तो कर्म करने वाले मनुष्यों का शासन करने मे किसी दंडधारी को छोटा मानना होगा जैसे कि चक्रवर्ति के नीचे छोटे राजा होते हैं ॥ ६ ॥

इस से सब देवादिकों के भी ईश्वर आप एकही हो शासन करने वालें मनुष्यों के शुभाशुभ विवेचन करने वाले हो ॥ ७ ॥

तिन आपका दंड इस वखत नष्ट होगया लोक में नहीं है क्यों कि चार अद्भुत सिद्धों ने तुम्हारी आज्ञा को आज लङ्घन कर दिया है ॥ ८ ॥

आपकी आज्ञा से हम जब एक पुरुष को दंडस्थान को ले आने लगे तब उन चारों ने आकर हमारे पाशों को काट कर उस पापी को भी छुटा लिया ॥ ९ ॥

यदि आप हमसे कहने का उचित समुझैं तो उनको आपसे जानना चाहते हैं जो कि चार पुरुष नारायण कहतेमात्र शीघ्रही आगये थे ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रजाः संयमयतीति तथा ॥ ११ ॥

मत्तोऽन्यो जगतस्तस्थुषश्च परोऽधीश्वरोऽस्ति । अहं तु जङ्गमानामेव तत्रापि नृणामेव तत्रापि पापिनामेव तत्किङ्करः सर्वेश्वरः स तु सर्वेश्वरः कोऽसौ यत्र यस्मिन्विश्वमोतं प्रोतं चोर्ध्वतिर्यक्तन्तुषु पटवत् यस्य स्वांशेभ्यो विष्णुब्रह्मरुद्रेभ्योऽस्य स्थित्यादयो भवन्ति यस्य च वशे लोको वर्तते नासि नासिकायां प्रोतबलीवर्दवत् ॥ १२ ॥

एतत्प्रपञ्चयति । ब्राह्मणादिनामभिर्वाचि निजायां तन्त्यां दामन्यां जनान् यो बध्नाति दामभिर्गा बलीवर्दानिव त इमे जीवाः

यं वै न गोभिर्मनसासुभिर्वा हृदा गिरा वासुभृतो विचक्षते ।
आत्मानमन्तर्हृदि सन्तमात्मनां चक्षुर्यथैवाकृतयस्ततः परम् ॥ १६ ॥
तस्यात्मतन्त्रस्य हरेरधीशितुः परस्य मायाधिपतेर्महात्मनः ।
प्रायेण दूता इह वै मनोहराश्चरन्ति तद्रूपगुणस्वभावाः ॥ १७ ॥
भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिङ्गानि महाद्भुतानि ।
रक्षन्ति तद्भक्तिमतः परेभ्यो मत्तश्च मर्त्यानथ सर्वतश्च ॥ १८ ॥
धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुरृषयो नापि देवाः ।
न सिद्धमुख्या असुरा मनुष्याः कुतश्च विद्याधरचारणादयः ॥ १९ ॥
स्वयम्भूर्नारदः शम्भुः कुमारः कपिलो मनुः ।
प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयम् ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नामकर्मभिर्निबन्धैर्दृढबन्धसाधनैर्बद्धा यस्मै बलिं वहन्ति यदधीनाः कर्म कुर्वन्तीत्यर्थः ॥ १३ ॥

यस्य च लीला दुर्विभाव्येत्याह । महामिति द्वाभ्याम् ॥ १४ ॥

न स्पृष्टं रजस्तमश्च यैः ईहितमभिप्रेतं चेष्टितं वा न विदुः स्पृष्टमाया मायया स्पृष्टाः ततस्तेभ्योऽन्ये न विदुरिति किं पुनर्वक्तव्यम् ॥ १५ ॥

तन्मायया विमोहितत्वान्न जानन्तीत्युक्तमविषयत्वाच्च तस्येत्याह । यमिति । गोभिरिन्द्रियैर्हृदा चित्तेन न विचक्षते न पश्यन्ति । "यद्वाचानभ्युदितं यं मनो न मनुते" इत्यादिश्रुतेः आत्मनां जीवानामात्मानं कृष्टारम् आकृतयो रूपाणि चक्षुर्यथा कर्मभूतं न जानन्ति ततः परमाकृतीनां प्रकाशकं न हि प्रमाता प्रमाणस्य विषय इति भावः एवम्भूतः परमेश्वरो मदन्योऽस्तीति पूर्वेणान्वयः ॥ १६ ॥

भवत्वेवं भूतोऽन्यः परमेश्वरो ये पुनरस्मानभिभूयैवं पापिनं रक्षितवन्तस्ते के तानाह । तस्येति द्वाभ्याम् । तस्येव रूपं गुणाः प्रभावादयः स्वभावो भक्तवात्सल्यादिर्येषान्ते ॥ १७ ॥

विष्णोर्भूतानि भृत्याः दुर्दर्शानि द्रष्टुमशक्यानि लिङ्गानि रूपाणि येषां तानि तद्भक्तिमतो विष्णुभक्तान् परेभ्यः शत्रुभ्यः मत्तः सर्वतोऽन्यादिभ्यश्च रक्षन्ति ॥ १८ ॥

ननु विष्णुभक्ताश्चेत्कथमधर्मपक्षपातं कृतवन्तस्तत्राह । धर्ममिति । ऋषयो भृग्वादयः ॥ १९ ॥

ननु केऽपि चेन्न जानन्ति तस्य सर्वं किं प्रमाणं तत्राह । स्वयम्भूरिति । कुमारः सनत्कुमारः वयमित्यात्मानमेव बहुमन्यमानो निर्दिशति ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

एवमापृष्टो यमस्तान् प्रत्याह प्रत्याह मुनिः । इतीत्थमापृष्टः प्रजानां संयमनः संयमयति शास्तीति तथा । कर्तरि ल्युः यमो देवः प्रीतः सुप्रदेनम् हृष्टः हरेः पादाम्बुजं स्मरन् स्वदूतान् प्रत्याह ॥ ११ ॥

उक्तिमेवाह । पर इत्यादिना पुरुषाय भूम्न इत्यन्तेन । मन्मत्तः परः उत्कृष्टोऽन्योऽस्ति न केवलं मत्तः परः किन्तु जगतः जङ्गमात्तस्थुषः स्थावराच्चराचरात्मकादाब्रह्मस्तम्बपर्यन्ताज्जगतः उत्कृष्टोऽन्योऽस्तीत्यर्थः अतो भवन्त इव तच्छासनकारित्वाद्स्माकं मुख्यं प्रशास्तृत्वमिति भावः कोऽसौ यत्र यस्मिन्निदं विश्वं तन्तवः पट इवोतं प्रोतमायामतो विस्तरतश्च स्यूतं सर्वतो व्याप्तमित्यर्थः यस्य चांशतः अंशादेवास्य जगतः जन्मादयो भवन्ति नस्योतवन्नासिकायामोतवत् प्रोतबलीवर्दवद्यस्य वशेऽयं लोकः यद्वशवर्त्ययं लोक इत्यर्थः ॥ १२ ॥

एवं सर्वाभ्यधिकत्वसर्वव्यापकत्वसर्वजन्मादिकारणत्वसर्वप्रशास्तृत्वधर्मयुक्तो भगवानन्योऽस्तीत्युक्तम् अथान्यांश्च भगवतो धर्मान् प्रपञ्चयति । य इति । यो भगवान्निजायां वाचि वेदात्मिकायां तन्त्यां दामन्यां नामभिर्वर्णाश्रमनामभिर्जनं दामभिप्रन्थिमद्रज्जुभिः स्थूलतन्त्यां गाः बलीवर्दानिव बध्नाति नामभिरित्यनेन ब्राह्मणब्रह्मचार्यादिवर्णाश्रमनामनिर्देशपूर्वकं वेदोक्ता वर्णाश्रमधर्माः विवक्षिताः तेऽीश्वराज्ञारूपायां तदुल्लङ्घने दण्डनापादिकायां वाचि बध्नाति वागधीनानि करोतीति यावत् । यस्मै च तं इमे नामकर्मभिर्निबन्धः कृतः बन्धो येषां तादृशाः प्रतिनियतनामकर्माणः चकिता बिभ्यतः बलिं पूजां वहन्ति कुर्वन्तीत्यर्थः ॥ १३ ॥

अहं यमः प्रचेता वरुणः ईशानो रुद्रः अर्कः सूर्यः अब्जयोनिर्ब्रह्मा आदित्या अदितेः पुत्रा विश्वविसुप्रभृतयः उपदेवाः विश्वसृजः दक्षादयः अस्पृष्टं रजस्तमश्च यैः सत्त्वप्रधाना अपि यस्येहितमभिप्रायं न विदुः ततः उक्तेभ्योऽन्ये न विदुरिति किं वक्तव्यम् । अवेदने हेतुः स्पृष्टा माया येस्ते मायामोहितत्वादित्यर्थः ॥ १४ ॥ १५ ॥

असुभृतः प्राणभृतः यं गोभिरिन्द्रियैर्मनसासुभिः प्राणायामैर्हृदा चित्तेन गिरा वा कौशल्येन यं न विचक्षते न पश्यन्ति न जानन्तीत्यर्थः । कथम्भूतमात्मनां जीवानामात्मानमन्तरात्मानमन्तर्हृदि सन्तं न विचक्षते तत्र दृष्टान्तः । चक्षुरिति । आकृतयः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रूपाणि ततः परमाकृतिभ्यो विलक्षणमाकृतीनां प्रकाशकं चक्षुरिन्द्रियं न विचक्षते तद्वदिति ॥ १६ ॥

एवं सर्ववशित्वसर्वाराध्यत्वसर्वाविज्ञाताभिप्रायत्ववाङ्मनसागोचरापरिच्छिन्नस्वरूपस्वभावत्वसर्वान्तरात्मत्वादयो धर्मा उक्ताः एभिरन्यैश्च कल्याणगुणैश्चिदचिदात्मकजगतो विलक्षणस्य स्वतन्त्रस्य मायाधिपतेरधीशितुः सर्वेश्वरस्य महात्मनो निरतिशयप्रभावस्य हरेर्मनोहराः दूताः भगवत इव गुणरूपस्वभावा येषां तादृशा, इह लोके चरन्ति ॥ १७ ॥

विष्णोर्भूतानि किङ्करात्मकानि भूतानि सुरैर्ब्रह्मादिभिः पूजितानि दुर्दर्शान्युज्ज्वलानि लिङ्गानि स्वरूपाणि येषां तानि महाद्भुतानि दृष्टविसजातीयानि भगवद्भक्तिमतो जनान् मत्तो मृत्योश्चान्येभ्यश्च सर्वेभ्यः रक्षन्ति ॥ १८ ॥

तद्भक्तिमतो रक्षन्तु नामायं त्वजामिलो निरतिशयदुष्कृद्भक्तिशून्यश्चेति कथमेनं रक्षितवन्तस्तत्राह ॥ धर्ममिति । साक्षाद्भगवता प्रणीतमभिहितं धर्ममृषिप्रभृतयस्ते विदुर्भागवतधर्मप्रभाव ईदृश इति भावः ॥ १९ ॥

यदि केऽपि न विदुस्तर्हि स्तद्धर्मः शशविषाणवदसत्कल्पः स्यात्तत्राह । स्वयम्भूरिति । वयमहम् "अस्मदो द्वयोश्च" इति बहुवचनमेकत्वे वेदितव्यम् । स्वयम्भूर्ब्रह्मा शम्भुः रुद्रः कुमारः सनत्कुमारः मनुः स्वायम्भुवः वैयासकिः शुकः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यमः स्वदूतान् प्रति वक्तीत्याह । इतीति ॥ ११ ॥

यदुक्तं भवद्भिस्त्वमेक एव शास्तेति तदनालोच्य कथितं मदन्यस्यास्त्युत्तमस्य सत्त्वादित्याह । पर इति । मदन्यो जगतो जङ्गमस्य तस्थुषः स्थावरस्य च शास्तास्ति स क इत्यत उक्तम् । पर इति "परोऽरिपरमात्मनोः" इत्यभिधानात् स शास्ता परः परमात्मा तस्य लक्षणमाह । ओतमिति । अयमर्थः पटवद्यथा कन्था पटः सूत्रे तन्तौ दीर्घतया ओतः तिरश्चीनतया प्रोतः तन्त्वाधारत्वेन स्थितः तथेदं विश्वं यत्र परमात्मनि ओतप्रोतधर्मेण तदाधारत्वेन स्थितं "यस्मिन्निदं सं च विचैति सर्वं" यथा (१) कन्था पटाः सूत्र ओताः प्रोताश्च संस्थिताः एवं विष्णाविदं विश्वमोतं प्रोतं च संस्थितमित्यादिश्रुतिस्मृतिबलादेतल्लक्षणमव्याप्त्यतिव्याप्त्यादिदोषरहितं यद्यस्य धारको न स्यात्तर्हि पतिष्यति वेगाख्यसंस्काररहितत्वादित्यादितर्कोपेत लक्षणान्तरं चाह । यदंशत इति । यस्यांशतो वासुदेवादिस्वरूपांशैर्भिन्नांशैर्ब्रह्मादिभिरस्य जगतः स्थितिजन्मसंहाराः भवन्तीति शेषः "यतो वा इमानि भूतानि जायन्त" इत्यादिश्रुतेः ।

> यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
> अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।

इत्यादेरवतारूपेणापि धारकत्वं तस्यैवेति निश्चयाय चशब्देन पुनर्ग्रहणं जन्मनाशादेव वक्षणान्तरे इति ज्ञातपक्षपति-

(१) कन्थानिर्माणाय छिन्नाः पटाः यथा त्रिगुणीकृतसूत्रे ओताः प्रोताश्च तथा ब्रह्मणि विश्वम् ओतप्रोतम् । तथा च सूत्रे पटशब्देन त्रिगुणीकृतसूत्रस्य विवक्षितत्वेनभेदाशङ्का नास्ति ॥

त्वात् पुनरस्याधीतं न स्यादिति नेत्याह । नसीति । नसि नासिकायामोता गाव इति च ॥ १२ ॥

हरेः शास्तृत्वं नाम दण्डधरस्य दण्डेनैव न किन्तु वेदलक्षणया वाचेत्याह । य इति । य ईशः निजायां स्वस्मादभिव्यक्तायां वाचि वेदलक्षणायां नामभिर्ब्रह्मादिलक्षणैर्बध्नाति "निजमात्मीयनित्ययोः" इत्यभिधानं बन्धनेन किं प्रयोजनमत्राह । यस्मा इति । नामकर्मणामानन्त्यप्रकटनाय बहुवचनमन्यथा नामकर्मभ्यामित्यलं दृढं बन्धो निर्बन्धस्तेन बद्धाः ॥ १३ ॥

लोकतः सर्वज्ञानामस्माकं स्वविषयज्ञानजनकत्वमाहात्म्यं च श्रीहरिलक्षणमित्याह । अहमित्यादिना ॥ १४ ॥

न स्पृष्टा रजस्तमोभ्यामस्पृष्टरजस्तमस्काः शुद्धसात्त्विका इत्यर्थः ततो भृग्वादिभ्यो अन्ये मन्वादयः सत्त्वप्रधाना इत्यनेन सत्त्वं प्रचुरमन्ये रजस्तमसी च किञ्चित् स्त इति ज्ञायते कुत इत्यत उक्तं स्पृष्टेति ईहितमिच्छाविषयमभिप्रायम् ॥ १५ ॥

तत्प्रसादमन्तरेणादृष्टलक्ष्यवेधवच्चक्षुरादीन्द्रियाविषयत्वेन तद्विषयं ज्ञानं दुष्करमित्याह । यं वा इति । गोभिश्चक्षुरादीन्द्रियैः असुभृतो जीवाः आत्मनां जीवानामात्मानमन्तर्यामिणं स्वरूपान्तरं चाह अन्तर्हृदि सन्तं अथवात्मनामन्तर्हृदि सन्तम् आकृतयो रूपाणि स्वप्रकाशं चक्षुरिन्द्रियमनेन निकटवर्तिनां चक्षुरादीन्द्रियाभिमानिनां देवानामपि तद्विषयज्ञानाभाव उक्त इति ज्ञातव्यं स्वरूपत्वेन नाकृतयः पश्यन्तीति चेत्तत्राह । तत इति । ततः आकृतिभ्यः परं विलक्षणं भिन्नमित्यर्थः इदमपि हरिलक्षणं स पर इति पूर्वेणान्वयः ॥ १६ ॥

तांस्तु वेदितुमिच्छाम इत्यस्योत्तरमाह । तस्येति । मायाधिपतेः लक्ष्मीपतेः आत्मतन्त्रत्वलक्ष्मीपतित्वे पूर्वोक्तलक्षणसाधके इति ज्ञातव्यं प्रायेणेति कथितार्थनिर्धारणाय तस्य हरेः रूपं श्यामवर्णं गुणाः विप्रप्रियत्वादयः स्वभावो नित्यनिर्दोषत्वं येषां ते तथा ॥ १७ ॥

तेषां किं कृत्यमिहेति तत्राह । भूतानीति । विष्णोर्भूतानि पार्षदा दुर्दर्शलिङ्गानि दर्शनायोग्यलक्षणानि तद्भक्तिमतः विष्णुभक्तिमतः ॥ १८ ॥

विष्णुदूताश्चेत्तर्हि पातकिनं किमित्युदमूमुचन्निति तत्राह । धर्ममिति । तुशब्दात्सूक्ष्मज्ञानं युष्माकं नास्तीत्याह ॥ १९ ॥

तर्हि के विदुरिति तत्राह । स्वयम्भूरिति ॥ २० ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

प्रीत इति । श्रीनारायणपुरुषत्वनिर्णयात् पूर्वं स्वमद्दीयस्वज्ञाने दुःखं जातमासीदिति ॥ ११—१५ ॥

यं वै इति । श्रीमगवद्रूप एव वागाद्यगोचरतया श्रुतिमिर्वर्ण्यत इति व्यज्य तस्य स्वप्रकाशत्वं व्यञ्जितम् न विचक्षते न विषयीकुर्वन्ति ॥ १६-२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

स्मरन् प्रीत इति । नारायणनामश्रवणमात्रादेवेति भावः ॥ ११ ॥

किमरे अपराधिनः । अत्रपथ तत्त्वं शृणुतेत्याह । पर इति । यं मां लोकशास्तारं जानीथ तस्मान्मत्तोऽपि मदुपलक्षितेभ्य इन्द्रादिभ्योऽपि

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

परः श्रेष्ठोऽधीश्वरोऽस्ति । अहन्तु जङ्गमानामेव-तत्रापि पापिनामेव तत्रापि तत्किङ्करः सन्नीश्वरः सन्तु सर्वेश्वरः । कोऽसौ यत्र यस्मिन् विश्वमोतं प्रोतञ्च । ऊर्ध्वतिर्यक्तन्तुषु पटवत् । यदंशेभ्यो विष्णु-ब्रह्मरुद्रेभ्यः नस्योतवक्षसि प्रोतबलीवर्दवत् ॥ १२ ॥

एतदेव प्रपञ्चयति । य इति । वाचि वेदलक्षणायां नामानि ब्राह्म-णादीनि कर्माणि यजनादीनि तैरेव विबन्धैर्निबन्धकैर्बद्धाः ॥ १३ ॥

न केवलं स मद्विधेभ्यः पर एव किन्तु वयं विरिञ्चिपर्यन्ताः सर्वेऽपि स कदा किं कुर्यादित्यपि न विद्म इत्याह । अहमिति । ईहितं चिकीर्षितं यदुक्तं । "नह्यस्य कर्हिचिद्राजन् ! पुमान् वेद विधि-त्सितम् । यद्विजिज्ञासया युक्ता मुह्यन्ति कवयोऽपि हि,, इति ॥१४॥

अस्पृष्टरजस्तमस्का अपि स्पृष्टा सत्त्वमयी माया यैर्यतः सत्त्व-प्रधानाः ॥ १५ ॥

तस्यातीन्द्रियत्वात् सुतरामेव न जानीम इत्याह । यमिति । गोभि-र्ज्ञानेन्द्रियैः मनसा सविकल्पतया असुभिः कर्मेन्द्रियैः हृदा चित्तेन निर्विकल्पतया च न विचक्षते न जानन्ति आत्मनां जीवाना-मनेकेषाम् एकमेवात्मानमन्तर्यामिणमाकृतयो रूपाणि चक्षुर्यथा कर्मभूतं ततः प्रकाश्येभ्यः परं प्रकाशकम् ॥ १६ ॥

ननु भवत्स्वेव भूतः परमेश्वरस्तं न जिज्ञासामहे ये त्वस्मान्नि-र्मत्स्य पातकिनं ररक्षुस्ते के इत्यत आह । तस्येति । प्रायेण मनोहरा इति युष्माकन्तु न मनोहरा इति भावः ॥ १७ ॥

सुरपूजितानीति । रे मूर्खास्तान् अपूजितवन्तो यूयमपराधिन एवेति भावः । तद्भक्तिमतो विष्णुभक्तान् मत्तश्चेति यूयं के वराका इति भावः ॥ १८ ॥

नन्वेवञ्चेत्तर्हि ते कथमधर्मपक्षपातिन इति चेद्धर्मतत्त्वं युष्म-द्विधा मूढाः कुतो ज्ञास्यन्ति, महाविद्वांसो मुनयोऽपि न जानन्ती-त्याह । धर्ममिति ॥ १९ ॥

ननु केऽपि चेन्न जानन्ति तर्हि तस्य सत्त्वे किं प्रमाणं तत्राह । स्वयम्भूरिति । विजानीम इति । ननु निजकृतस्मृतिशास्त्रेष्वपि स्पष्टं कथयाम इत्यर्थः । तत्र हेतवः गुह्यं परमतत्त्वत्वात् संवृत्यैव स्थाप्यं राजविद्याराजगुह्याध्याये "सर्वगुह्यतमं भूयः शृणु मे" इत्यत्र हेतोरेव दृष्टत्वात् विशुद्धं गुणातीतं सगुणस्मृतिशास्त्रेषु वक्तुम-नर्हत्वात् दुर्बोधं कर्मिभिरर्थवादादिदोषकलितान्तःकरणैर्दुर्ज्ञेय-त्वात् ॥ २० ॥ २१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इत्येवं हरिस्मारकवाक्येन पृष्टः अत एव हरेः पादाम्बुजं स्मरन् प्रीतः प्रसन्नः सन् संयमयतीति संयमनः स्वदूतान् प्रत्याह ॥ ११ ॥

जगतो जङ्गमतस्तस्थुषः स्थावरात् परः श्रेष्ठः यतः सर्वो-पादानरूपो हेतुरित्याह । यत्रोर्ध्वतिर्यक्तन्तुषु पटवत् विश्वमोतं प्रोतं च यस्यांशेभ्य इन्द्रब्रह्मरुद्रेभ्यः अस्य स्थित्यादयः यस्य च वशे नसि नासिकायामोतपशुवत् सर्वोऽपि लोकः स सर्व-कारणकारणः सर्वेश्वरः मदन्यः अहमपि तदधीन इत्यर्थः ॥१२॥

दामभिरिव बलीवर्दानिव नामभिर्ब्राह्मणादिशब्दैः तिजायां वेदात्मिकायां वाचि तन्त्यां जनं बध्नाति त इमे जनाः नाम-कर्मभिर्निबन्धबद्धा बलिं स्वस्वाधिकारानुरूपाम् वहन्ति यस्मै स मदन्य इति पूर्वेण सम्बन्धः ॥ १३ ॥

ये बलिं वहन्ति ते के इत्याकाङ्क्षायां तान् वदन् सर्वे एते तस्य चेष्टितं न जानन्तीत्याह । अहमिति द्वाभ्याम् ॥ १४ ॥

येऽस्पृष्टरजस्तमस्काः सत्त्वप्रधाना यस्येहितं न विदुः ततस्तेभ्यः सत्त्वप्रधानेभ्योऽन्ये रजस्तमःप्रधानाः स्पृष्टमायाः क्षुद्राधिकारिणो न विदुरिति किं वाच्यम् ॥ १५ ॥

आत्मनामखिलजीवानामात्मानमन्तर्हृदि सन्तम् "अन्तः प्रविष्टः शास्ता जनानाम्" इति श्रुतेः गोभिर्वाग्भिः मनसा च असुभिर-न्यैरिन्द्रियैश्च न विचक्षते कार्त्स्न्येन नैव पश्यन्ति इयत्तान-वच्छिन्नत्वात् "यद्वाचा नभ्युदितं यन्मनो न मनुते" यस्यामतं तस्य मतं मतं यस्य न वेद सः" इत्यादिश्रुतेः हेतुगर्भितं विशे-षणं ततः परं गवादिभ्यः परं चक्षुः प्रकाशकं तत्प्रकाश्या-कृतयो यथा न विचक्षते तद्वत् सर्वथा निषेधस्तु नास्ति "तं त्वौपनिषदं पुरुषं पृच्छामि मनसैवानुद्रष्टव्यः सदा पश्यन्ति सूरयः" इत्यादिश्रुतिभ्यः स मदन्य इति पूर्वेणान्वयः ॥ १६ ॥

भवतु त्वदन्यः सर्वेश्वरः सर्वनियन्ता ये पाशान् छित्वा पापिनं विमोचितवन्तस्ते के इत्यतस्तानाह । तस्येति द्वाभ्याम् । तस्य आत्मतन्त्रस्य स्वतन्त्रस्य तद्रूपगुणस्वभावाः तस्येव रूपं गुणाः स्वभावश्च येषां ते इह चरन्ति ॥ १७ ॥

भूतानि पार्षदरूपाणि दुर्दर्शानि द्रष्टुमप्यशक्यानि लिङ्गानि रूपाणि येषां तानि तद्भक्तिमतः विष्णुभक्तियुक्तान् ॥ १८ ॥

ननु यदि ते विष्णुपार्षदास्तर्ह्यधार्मिकरक्षां कुतः कृतवन्त-स्तत्राह । धर्ममिति । ऋष्यादयोऽपि यदा न विदुस्तर्हि असुरादयः कुतो विदुः ॥ १९ ॥

एते तु भगवदनुग्रहतो जानन्तीत्याह । स्वयम्भूरिति ॥ २० ॥

भाषा टीका ।

श्रीशुकदेवजी बोले कि प्रजाओंके नियम न करने वाले यमराज देव से जब इस प्रकार दूतों ने पूछा तब यम धर्मराज बड़े प्रसन्न होकर श्रीहरिचरणारविन्द को स्मरण करके अपने दूतों के प्रति यह वचन बोले ॥ ११ ॥

यमराज बोले स्थावर जङ्गम सब लोक से और मेरे से भी बड़े ईश्वर और हैं जिन मे यह सब जगत् जैसे सूतों मे कपड़ा सीधा तिरछा पुहा रहता है तैसे पोहा है जिनके अंश से इस जगत की स्थिति नाश होती है और सब लोक जिस परमात्मा के वश मे हैं ॥ १२ ॥

जो भगवान् निज वेद लक्षण निज वाणी रूप बड़ी रस्सी मे ब्राह्मणादि नाम रूप छोटी रस्सियों से गऊसरी के जीवों को बाँधे रहते हैं वे सब जीव चकित होकर नाम कर्म बन्ध नियम से बंधे हुये जिन भगवान् को भेट पूजा समर्पण करते हैं ॥ १३ ॥

हम महेन्द्र निर्ऋति वरुण सोम अग्नि महादेवजी पवन सूर्य ब्रह्माजी आदित्य देवतागण विश्वे देव वसु साध्य मरुद्गण रुद्रगण सिद्धगण ॥ १४ ॥

और जो संसार की सृष्टि करने वाले देवेश रजोगुण तमोगुण से रहित जो भृगु आदिक माया स्पर्श होने से सत्व गुण वाले होकर भी जिन भगवान् के कर्तव्य को नहीं जानते हैं तो तिन से दूसरे तो कैसे जान सकते हैं ॥ १५ ॥

द्वादशैते विजानीमो धर्मं भागवतं भटाः ! ।
गुह्यं विशुद्धं दुर्बोधं यं ज्ञात्वाऽमृतमश्नुते ॥ २१ ॥
एतावानेव लोकेऽस्मिन् पुंसां धर्मः परः स्मृतः ।
भक्तियोगो भगवति तन्नामग्रहणादिभिः ॥ २२ ॥
नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः ! ।
अजामिलोऽपि येनैव मृत्युपाशादमुच्यत ॥ २३ ॥
एतावताऽलमघनिर्हरणाय पुंसां सङ्कीर्तनं भगवतो गुणकर्मनाम्नाम् ।
विक्रुश्य पुत्रमघवान् यदजामिलोऽपि नारायणेति म्रियमाण इयाय मुक्तिम् ॥ २४ ॥
प्रायेण वेद तदिदं न महाजनोऽयं देव्या विमोहितमतिर्बत माययाऽलम् ।
त्रय्यां जडीकृतमतिर्मधुपुष्पितायां वैतानिके महति कर्मणि युज्यमानः ॥ २५ ॥
एवं विमृश्य सुधियो भगवत्यनन्ते सर्वात्मना विदधते खलु भावयोगम् ।
ते मे न दण्डमर्हन्त्यथ यद्यमीषां स्यात् पातकं तदपि हन्त्युरुगायवादः ॥ २६ ॥
ते देवसिद्धपरिगीतपवित्रगाथा ये साधवः समदृशो भगवत्प्रपन्नाः ।
तान्नोपसीदत हरेर्गदयाऽभिगुप्तान्नैषां वयं (१) न च वयः प्रभवाम दण्डे ॥ २७ ॥
तानानयध्वमसतो विमुखान् मुकुन्दपादारविन्दमकरन्दरसादजस्रम् ।
निष्किञ्चनैः परमहंसकुलैरसङ्गैर्जुष्टाद्गृहे निरयवर्त्मनि बद्धतृष्णान् ॥ २८ ॥
जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविन्दम् ।
कृष्णाय नो नमति यच्छिर एकदाऽपि तानानयध्वमसतोऽकृतविष्णुकृत्यान् ॥ २९ ॥
तत्क्षम्यतां स भगवान् पुरुषः पुराणो नारायणः स्वपुरुषैर्यदसत्कृतं नः ।
स्वानामहो न विदुषां रचिताञ्जलीनां क्षान्तिर्गरीयसि नमः पुरुषाय भूम्ने ॥ ३० ॥

भाषा टीका ।

जिन भगवान् को प्राणिमात्र मन वचन कर्म से हृदय से प्राणों से भी सब आत्माओं के आत्मा होकर हृदय में रहने पर भी नहीं जानते हैं जैसे कि घट पटादि रूपादिक वस्तु को नहीं देखते हैं तिस प्रकार सब से परे होने से उन परमात्मा को कोई नहीं जानता है ॥ १६ ॥

वे परमात्मा हरि स्वतन्त्र हैं सब के अधीश सब से परे हैं माया के अधिपति हैं महात्मा हैं उनके दूत उनके ही स्वभाव रूप गुणवाले इस जगत् में प्रायः करके विचरते रहते हैं ॥ १७ ॥ कोई जिनके स्वरूप को देख नहीं सकता है देवतों से जो सदा पूजित हैं वे महा अद्भुत ऐसे श्रीविष्णु भगवान् के भृत्यजन विचरते हुये भगवद्भक्तिमान् मनुष्यों को अन्यपुरुषों से तथा मेरे दंड से भी रक्षा करते हैं ॥ १८ ॥

साक्षात् भगवान् ने प्रवृत्त किया जो धर्म है तिसको ऋषि अथवा देवता उत्तम सिद्ध असुर सिद्ध चारणादिक भी नहीं जानते हैं तो मनुष्य तो कहां से जान सकेंगे ॥ १९ ॥

ब्रह्माजी नारदजी श्रीमहादेवजी सनत्कुमारजी मनुजी प्रह्लादजी जनकजी भीष्मजी बलि महाराज श्रीशुकदेवजी हम ॥ २० ॥

। श्रीधरस्वामिकृतभावार्थदीपिका ।

हे भटाः ! ॥ २१ ॥

तमेव धर्ममाह । एतावानिति ॥ २२ ॥

न चात्र प्रमाणं वक्तव्यं दृष्टत्वादित्याह । नामोच्चारणेति । येनैव केवलेन सकृदुच्चारितेन ॥ २३ ॥

ननु नामाभासेन कथं सर्वपापक्षयः स्यात् । अत्राभक्त्याद्युच्चारेरपि विधानात् तथाहि "सायंप्रातर्गृणन् भक्त्या दुःखग्रामाद्विमुच्यते" इति अत्युक्तिमिममाक्षेप्तुं श्रयणमिति । "श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः । जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितम्" । इत्यादिरूपमेव पुराणे तत्र तत्र पठ्यते पुराणान्तरे च "पापक्षयश्च भवति स्मरतां तमहर्निशम्" इति ।

(१) मयामिति श्रीवीरर० ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत्रैव च ।

तस्मात्सङ्कीर्तनं विष्णोर्जगन्मङ्गलमंहसाम् ।
महतामपि कौरव्य ! विद्ध्यैकान्तिकनिष्कृतम् ।

इत्यादिना सम्यक्कीर्तनादेव मुच्यते । किञ्च । तथा सति किमिति मन्वादयो द्वादशाब्दादीनि स्मरेयुः तस्मादिदमनुपपन्नमिव तत्राह । एतावतेति । भगवतो गुणानां कर्मणां च नाम्नां च सम्यक्कीर्तनमिति यदेतावता पुंसामघनिर्हरणाय पापक्षयमात्राय अलमुपयोगो नास्ति अलंशब्दोऽत्र वारणे । यथाहामरसिंहः "अलं भूषणपर्याप्तिशक्तिवारणवाचकम्" इति । उपयोगाभावमेवाह । अजामिलो महापातक्यपि नारायणेति विक्रुश्य न तु सम्यक्कीर्तयित्वा तच्च पुत्रं विक्रुश्य न तु हरिं स्मृत्वा मद्यपानशुचिरपि म्रियमाणोऽस्वस्थचित्तोऽपि मुक्तिमवाप न त्वघनिर्हरणमात्रमतो नामाभासेनापि सर्वपापक्षय इत्येव तत्त्वम् आवृत्तिश्रद्धादिविषयस्तु पापवासनाक्षयार्था इत्युक्तमेव हरेर्गुणानुवादः खलु सत्त्वभावन इत्यत्र ॥ २४ ॥

यत्तूक्तं व्यर्थं तर्हि द्वादशाब्दादिस्मरणमिति तत्राह । प्रायेणेति । महाजनो मन्वादिः । अयम्भावः । यथा मृतसञ्जीवनौषधिमजानन्तो वैद्या रोगनिर्हरणाय त्रिकटुकनिम्बादीनि स्मरन्ति तथा स्वयम्भूशम्भुप्रमुखद्वादशव्यतिरेकेणायं महाजनोऽतिगुह्यमिदमजानन् द्वादशाब्दादिकं स्मरतीति । किञ्च । मायया देव्या अलं विमोहितमतिरयं जनो मधु मधुरं यथा भवत्येवं पुष्पितायां पुष्पस्थानीयैरर्थवादैर्मनोहरायां त्रय्यां जडीकृता अभिनिविष्टा मतिर्यस्य अतो महत्येव कर्मणि अश्वमेधादौ युज्यमानो नाल्पे प्रवर्तते दृश्यते हि प्राकृतस्य लोकस्य महति मन्त्रादौ श्रद्धा अल्पे चाश्रद्धा तस्मादस्य ग्राहको नास्तीति तैर्नोक्तम् । यद्वा । स्वाधीनः सिंहोऽस्त्येतावता श्वसृगालादिनिवारणाय तं यथा न प्रयुङ्क्ते तथाऽतितुच्छत्वात्पापस्य न तन्निरसनाय परममङ्गलं हरेर्नाम स्मरन्ति । यद्वा । नाममाहात्म्यज्ञाने सर्वमुक्तिप्रसङ्गादित्येषा दिक् ग्रन्थविस्तरभयात्तु नातिप्रपञ्च्यते ॥ २५ ॥

सावयोर्मं भक्तियोगममीषां पातकं न स्यादेव यदि स्यात् उरुगायस्य वादः कीर्तनम् ॥ २६ ॥

तदेवं धर्मतत्त्वं निर्णीय भृत्याननुशास्ति । त इति । ये भगवन्तं प्रपन्नास्ते देवैः सिद्धैश्च परिगीतपवित्रगाथा वर्णितपवित्रकथा अतस्तान्नोपसीदत तत्समीपमपि न गच्छत यथः कालोऽपि न प्रभवति ॥ २७ ॥

के तर्हि दण्डार्थमानेया इत्यत्राह । तानिति द्वाभ्याम् । असतो दुष्टान् तानेवाह । मुकुन्दपादारविन्दयोर्यो मकरन्दरूपो रसस्तस्माद्विमुखान् कथम्भूतात् निष्किञ्चनैर्व्रजैर्जुष्टात् तेषां ज्ञापकमाह । निरयवर्त्मनि स्वधर्मशून्ये गृहे बद्धा तृष्णा यैस्तान् ॥ २८ ॥

किञ्च । जिह्वेत्यादि । येषां जिह्वेत्याद्यन्वयः न कृतं विष्णुकृत्यं भगवद्व्रतं यैः ॥ २९ ॥

भगवन्तं क्षमापयति । तदिति । अयं भावः । नः स्वपुरुषैरस्मदीयत्वेन स्थितैः स्वीयैरेव पुरुषैर्यस्मादसद्भव्यवायं कृतं तस्मात्स्वयमेव क्षम्यतां महतां स्वानां स्वीयानां भक्तानां नोऽस्माकं न विदुषामज्ञानाम् । अहो गरीयसि तस्मिन् प्राञ्जलियुक्तैव । मह इति पाठे स्वीयानां माहात्म्यमविदुषां नः क्षमां करोत्वित्यर्थः ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एते वयं द्वादश हे भटाः ! भागवतं धर्मं जानीमः तत्प्रभावं जानीम इत्यर्थः कथम्भूतं गुह्यं गोप्यं विशुद्धं केवलसत्त्वप्रधानाधिकारं दुर्बोधमितरैर्दुर्विज्ञेयं यं धर्मं ज्ञात्वाऽमृतं मुक्तिमश्नुते प्राप्नोति ॥ २१ ॥

कोऽसावीदृशो धर्मः कियान् वा तत्राह । एतावानेवेति । भगवति तन्नामग्रहणादिभिरनुगृहीतो यो भक्तियोगः स एव पुंसां लोके परः उत्कृष्टो धर्मः लोके पुरुषैः साध्य उत्कृष्टो धर्मः भगवद्भक्तियोग एव स चैतावानेवाविच्छिन्नप्रेमपूर्वानुध्यानपर्यन्त एव "प्रेमपूर्वमनुध्यानं भक्तिरित्यभिधीयते" इति वचनार्थमभिप्रेत्य भक्तिशब्देनैवार्थलाभादेतावानेवेत्युक्तम् ॥ २२ ॥

आस्तां भगवद्भक्तियोगप्रभावस्तावन्नामोच्चारणप्रभावमेव पश्यतेत्याह । नामेति । हे पुत्रकाः ! हरेर्नामोच्चारणमाहात्म्यं पश्यत येन नामोच्चारणमाहात्म्येनाजामिलोऽपि अपिशब्दस्तस्य सुतरां मुक्त्यनर्हतां सूचयति । मृत्युपाशात् संसारपाशान्मुक्तोऽभूत् ॥ २३ ॥

अतः पुंसामघस्य निर्हरणाय निःशेषक्षपणाय एतावतैवालं कियता भगवतो गुणकर्मप्रतिपादकनाम्नां सङ्कीर्तनमितीयता कुतः यद्यस्मादघवान् पाप्यपि अजामिलो म्रियमाणः पुत्रं नारायणेति विक्रुश्याहूय मुक्तिमुपेत्यगादित्यर्थः ॥ २४ ॥

नन्वेवं विधं नाममाहात्म्यादिकं स्वयम्भ्वादिवदन्येऽप्यधीतशास्त्रा अपि किं न जानीयुस्तत्राह । प्रायेणेति । महाजनः शास्त्रज्ञोऽप्ययं जनः तदिदं नाममाहात्म्यादिकं प्रायशो न वेद तत्र हेतुः देवदेवस्य भगवतः सम्बन्धिन्या मायया अमर्त्यैर्विमोहिता मतिर्यस्य तादृशः तं प्रति खिद्यति बतेति । किञ्च । मधुपुष्पितायां मधु मधुरं यथा भवति तथा पुष्पितायां पुष्पस्थानीयक्षुद्रस्वर्गादिफलप्रकाशकार्थवादैर्मनोरमायामित्यर्थः एवम्भूतायां त्रय्यां जडीकृताभिनिविष्टा मतिर्यस्य अत एव वैतानिके महत्येव कर्मणि युज्यमानः भगवन्मायामोहितत्वादर्थवादाश्रयणात् कर्मासक्तचित्तत्वाच्च न वेदेत्यर्थः ॥ २५ ॥

एवं विदित्वा ये भगवन्तं भजन्ति न तेषामस्मद्दण्ड्यतेत्याह । एवमिति । सुधियः कुशलाः ये जना एवं नाममाहात्म्यादिकं विमृश्यानन्ते त्रिविधपरिच्छेदरहिते षाड्गुण्यपूर्णे भगवति भावयोगं भक्तियोगं विदधते कुर्वते खलु ते मम दण्डं प्रति नार्हन्ति तेषां पातकाभावादित्यर्थः यदि किञ्चित्तेषां पातकं स्यात्तर्हि तदपि पातकमुरुगायस्य भगवतो वादः गुणानुवादात्मकनामग्रहणादिरूपो हन्ति क्षपयति ॥ २६ ॥

एवमाक्षेपस्योत्तरमभिधायाधुना स्वदूताननुशास्ति । त इति त्रिभिः । ये जनाः साधवः साधुगुणयुक्ताः समदृशः समं भगवदात्मकत्वेन सर्वं पश्यन्तीति तथा भगवत्प्रपन्नाः उपायोपेयभावेन भगवन्तं शरणं गताः ते देवैः सिद्धैश्च परितो गीताः पवित्राश्च गाथा येषां तादृशास्तान्नोपसीदत न तत्समीपं गच्छतेत्यर्थः तत्र हेतुं वदंस्तान्विशिनष्टि । हरेर्गदयाभितो गुप्तान् रक्षितानत एवैषां भयं संसृतिभयं नास्ति नच

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तेषां दण्डे वयं प्रभवामः समर्था भवेम ॥ २७ ॥

तर्हि क आदेयास्तत्राह । तानिति । तानानयध्वं फानजस्रं सन्ततं निष्कामैः परमहंसानां ज्ञानिनां कुलैः सङ्घैः रसज्ञैः जुष्टात् सेवितान्मुकुन्दस्य पादारविन्दयोर्मकरन्दतुल्यो रसः तस्मा- द्विमुखानत एवासतः पापिष्ठान्नरकद्वारे गृहे बद्धतृष्णान् कृता- भिलाषान् ॥ २८ ॥

किञ्च । येषां जिह्वा चेतः शिरांसि भगवन्नामधेयचरणा- रविन्दवचनस्मरणनमस्कारान्न कुर्वन्ति तानानयध्वमित्याह । जिह्वेति । भगवतो गुणप्रतिपादकं नामधेयं यस्य जिह्वा न वक्ति यस्य चेतः भगवतश्चरणारविन्दं न स्मरति यस्य च शिरः सकृदपि श्रीकृष्णाय नो नमति तांश्च कृतं विष्णोः कृत्यमाराधनं यैस्तानत एवासतः दुष्टानानयध्वम् ॥ २९ ॥

एवं स्वदूतानादिश्य दूतकृतापराधभिया भगवन्तं क्षमा- पयति । तदिति । स्वपुरुषैरस्मद्भटैर्यद्वसत्कृतमपराद्धं तत्पुराणः पुरुषो भगवान्नारायणः क्षाम्यतां दिवादित्वात्कर्त्रर्थे सार्वधातुके श्यन् स्वानां स्वभक्तानामज्ञानां कृताञ्जलीनां नोऽस्माकं क्षान्तिरस्मद्विषया क्षान्तिरित्यर्थः अहो गरीयसी गुरुतरा बहुला भगवति वर्त- त इतिभावः तस्मै भूम्ने सर्वान्तर्यामिणे नमः "अञ्जलिः परमा मुद्रा क्षिप्रं देवः प्रसीदति" इत्युक्ततत्प्रसादनिमित्ताञ्जलिबन्धनेन नमस्करोतीति भावः ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किञ्च । धर्मस्वरूपं निवेदयतु भवानित्याशङ्क्य उत्तमं धर्मं वदामीत्यभिप्रायेणाह । एतावानिति । तस्य हरेर्नामग्रहणादिभिर्भ- गवति यो भक्तियोगः एतावानुत्तमः परो धर्मः स्मृत इत्यन्वयः "एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः" इति स्मृतावुक्तम् ॥ २२ ॥ २३ ॥

नारायणेत्यादिगुणनाम्नां मधुसूदनेत्यादिकर्मनाम्नां गुणानां कर्मणां नाम्नां वा यत्सङ्कीर्तनमेतावता पापनिर्हरणायालं सा- धनान्तरं नापेक्षितमित्यन्वयः आक्रुश्य आहूय ॥ २४ ॥

देव्या बहुविधविलासोपेतया मधुपुष्पितायां स्वर्गादिपुष्पप्रका- शिकायां वैतानिके वेदविहिते यज्ञसम्बन्धिनि वा युज्यमानः प्रेयं- माणः ॥ २५ ॥

भावयोगं भक्तियोगमुरुगायवादः भगवन्नामकीर्तनम् ॥ २६ ॥

गाथाः सङ्कीर्तनानि वेदादिभिर्नित्यगीतसङ्कीर्तनाः गदया कौमो- दक्या ॥ २७ ॥

असतः लोकनिन्दितकर्मनिरतान् निरयवर्त्मनि नरकद्वारे गृहे भार्यादौ ॥ २८ ॥

अकृतविष्णुकृत्यान् अननुष्ठितविष्णुपादार्चनादिकर्मणः ॥२९॥

[1]कृष्णाङ्घ्रिपद्ममधुलिट् कृष्णपादारविन्दमकरन्दं संसेवमानः पुमान् स्वकर्मनिर्मितेषु मायागुणेषु विषयेषु न रमते पुरुषार्थबुद्धिं न करोति यतः कर्मणः पुनः रजः रागः स्यात्तादृशं कर्म तुच्छेन कर्दमजलेन कर्दमप्रक्षालनमिवेति दर्शयति ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

विजानीम एव नतु निजस्मृत्यादौ स्पष्टं कथयाम इत्यर्थः तत्र हेतुः । गुह्यं लोकमर्यादारक्षणाय गोप्यम् । किञ्च । साधारणजनै- र्दुर्बोधञ्च । दुर्बोधत्वे हेतुः विशुद्धं नह्यशुद्धाः शुद्धं ज्ञातुमर्हन्तीति गुह्यत्वे हेतुविशेषः । यमिति । हे भटा ! इति तस्माद्यूयं तु सुतरां न जानीथेत्यर्थः ॥ २१ ॥

लोकेऽस्मिन्निह जगतीत्यर्थः तन्नामग्रहणादिभिरिति तृतीया प्रकृत्याभिरूप इतिवत् ॥ २२ ॥ २३ ॥

एतावतेत्यस्य टीकायां पापवासनाक्षयार्थो इत्यत्र तथापि मह- दपराधाद्यालम्बनेन तिष्ठति या पापवासना तस्याः क्षयार्थो इत्यर्थः मरणे तु निरपराधस्यैव सतो मुखे नामाविर्भावः स्यादिति भावः । इत्थमेव द्वितीये "एतावान् साङ्ख्ययोगाभ्याम्" इत्यत्र व्याख्यातम् । अन्ते तु परमो लाभ इति । तदुक्तम् । कृष्णः कृष्णः कृष्ण इत्यन्तकाले जल्पन् जन्तुर्जीवितं यो जहाति । आद्यः शब्दः कल्पते तस्य मुक्त्यै व्रीडानम्रौ तिष्ठतोऽन्यावृणस्थौ" इति । मुक्तिमियायेति जीवन्मुक्त्य- पेक्षया ॥ २४ ॥

महाजनो द्वादशेतरमुन्यादिः । स एव देव्या विमोहितमति- रित्यादिलक्षणः ॥ २५ ॥

एवं पूर्वोक्तभगवद्भक्तिमहिमप्रकारम् । सर्वात्मनेति । नित्यनैमि- त्तिकपरित्याग उक्तः तथापि दण्डं नार्हन्ति । तत्र यदि दैवाक्षि- प्तदुराचरणेन पातकं स्यात्तदपि यथा कथञ्चित्तत्कीर्तनमात्रं हन्तीत्यर्थः ॥ २६ ॥

तेषामेव माहात्म्यानुवादपूर्वकं शिक्षयति । ते देवेति । नोपसी- दतेति । तन्निकटे पातकयमिच्छेदपि सदापीति भावः ॥ २७ ॥ २८ ॥

अस्तु तावत्तेषां वार्त्ता यतो जिह्वा नवक्तीति । यदस्य जिह्वापि श्रीभगवतो गुणाश्च नामधेयञ्च वा एकदा जन्ममध्ये यदा कदापि न वक्ति जिह्वाया अभावे चेतश्च तच्चरणारविन्दमेकदापि न स्मरति चेतसो विक्षिप्तत्वे शिरश्च कृष्णाय कृष्णं लक्ष्यीकृत्य नो नमति । "शाठ्येनापि नमस्कारं कुर्वतः शार्ङ्गधन्वने । शतजन्मार्जितं पापं तत्क्षणादेव नश्यति" इति स्कान्दोक्तमहिमानं नमस्कारं न करोति तानानयध्वम् । तत्र हेतुः असतः असत्त्वे हेतुः । अकृतविष्णुकृत्यान् । यथा च स्कान्दे रेवाखण्डे श्रीब्रह्मोक्तौ । स कर्त्ता सर्वधर्माणां भक्तो- यस्तव केशव ! । स कर्त्ता सर्वपापानां यो न भक्तस्तवाच्युत ! । पापं भवति धर्मोऽपि तवाभक्तैः कृतो हरे । निःशेषधर्मकर्त्ता वाप्यभक्तो नरके हरे । सदा तिष्ठति भक्तस्ते ब्रह्महापि विमुच्यते । श्रीपाद्मे मन्निमित्तं कृतं पापमपि धर्माय कल्पते । मामनादृत्य धर्मोऽपि पापं स्यान्मत्प्रभावत" इति । युक्तञ्च तत् । श्रवणं कीर्तनञ्चास्येत्या- दिना सर्वेषां मदुपासनमित्यादिना सर्वे विधिनिषेधाः स्युरित्या- दिना च परमनित्यत्वादिप्रतिपादनात् एवं सङ्कीर्तनादीनां श्रया- णामति सुकराणामभावे परेषां सुतरामेवाभावो भवेदिति सामा- न्येनैव विष्णुकृत्यरहितत्वमुक्तम् । जिह्वादीनां करणभूतानामपि कर्तृत्वेन निर्देशः । पुरुषानिच्छयापि यथोचितकीर्तनादिकमायत्ते चरणारविन्दमिति विशेषाङ्गनिर्देशः धर्मस्य भक्तिव्यापक एव नतु तन्मात्रस्मरणनियामकः अभक्तानामानयनेन भक्तानाम- नानयनमेव विधीयते "आनयनस्योत्सर्गसिद्धत्वात्" "वैवस्वतं संयमनं न जानाम्" इति श्रुतेः "सकृन्मनः कृष्णपदारविन्दयोः" इत्यादौ तद्गुणरा-

---

(१) इतः परमध्यायसमाप्तिपर्यन्तं श्रीधरस्वामिपाठापेक्षया श्लोकानां क्वचित्संख्यावैपरीत्यं विद्यते ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गीति विशेषणं तु तेषां तद्दृष्टिपथगमनसामर्थ्यस्यापि घातकं तादृशतत्स्मरणस्य प्रभावविशेषमेव बोधयतीति ज्ञेयम् । यथैव नारसिंहे ।

अहममरगणार्चितेन धात्रा यम इति लोकहिताहिते नियुक्तः ।
हरिगुरुविमुखान् प्रशास्मि मर्त्यान् हरिचरणप्रणतान् नमस्करोमि ।

इति । तथैवामृतसारोद्धारे स्कान्दवचनम् ।

न ब्रह्मा न शिवाग्नीन्द्रा नाहं नान्ये दिवौकसः ।
शक्तास्तु निग्रहं कर्त्तुं वैष्णवानां महात्मनाम् ।

इति ॥ २६ ॥

स्वपुरुषैर्द्वारभूतैर्यन्नोऽस्माभिरसत्कृतम् ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तर्हि तमेव धर्ममस्मान् सेवकान् शिक्षयित्वा त्रायस्वेत्यत आह । एतावानेव । प्रभेदबाहुल्येऽपि वस्तुतस्त्वयानेवेति भावः । पर इति । परशब्दविशेष्यत्वेनोच्यमानः तन्नामग्रहणादिभिरिति कर्मार्पणलक्षणः सगुणयोगो व्यावृत्तः एतदेव श्रीभागवतस्याभिधेयं तत्त्वम् । यदुक्तं शास्त्रारम्भ एव "धर्मः प्रोज्झितकैतवोऽत्र परम" इति "स वै पुंसां परो धर्म" इति ॥ २२ ॥

न चात्र प्रमाणमन्वेष्टव्यं साक्षाद्दृष्टत्वादित्याह । नामेति ॥ २३ ॥

ननु सकृदुच्चरितेनैव नामाभासेन कथं सर्वपापक्षयः । तन्नामग्रहणादिभिरिति त्वयाप्यादिपदोपादानात् कीर्त्तनश्रवणाद्यङ्गकभक्तियोगेन परमधर्मेण सर्वपापक्षयपूर्वकमोक्षप्राप्तिरित्युक्तत्वादित्यत आह । एतावतेति । भगवतो गुणानां कर्मणां नाम्नाञ्च सम्यक् कीर्त्तनमित्येतावता पुंसामघनिर्हरणाय पापनाशनमात्राय अलमुपयोगो नास्ति अलंशब्दोऽत्र वारणे नामादीनामेकतरस्यापि असम्यक् कीर्त्तनादपि सर्वाघनिर्हरणसिद्धेरिति भावः यद्यतो विक्रुश्यैव नतु सम्यक् कीर्त्तयित्वा तच्च नारायणेति नाम्ना पुत्रं विक्रुश्य नतु हरिम् अघवानशुचिरपि नतु शुचिः सन् अजामिलोऽप्यतिप्रसिद्धमहापातक्यपि नत्वन्यः क्षुद्रपापी म्रियमाणो मरणदुःखविवशोऽपि नतु सुस्थचित्तः मुक्तिमियाय प्राप नतु पापनिर्हरणमात्रं तस्मात्तन्नामग्रहणादिभिरिति "श्रवणं कीर्त्तनं ध्यानं हरेरद्भुतकर्मणः । जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितम्" इति "तस्मात् सङ्कीर्त्तनं विष्णो"रिति "अनुदिनमिदमादरेण शृण्वन्" इत्यादिषु भक्तेरनेकेषामङ्गानां अङ्गावृत्तिसम्यक्त्वादेरपि यद्विधानं तन्निरपराधानां प्रेमवृद्ध्यर्थं नामापराधवतां तु नामापराधक्षयार्थञ्च । "श्रद्धामृतकथायां मे" इत्युपक्रम्य "एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम् । मयि सञ्जायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते" इति अत्र भक्तिशब्देन प्रेमैवोक्तः कोऽन्य इत्यनेन मोक्षस्य निराकरणात् "नामापराधयुक्तानां नामान्येव हरन्त्यघम् । अविश्रान्तिप्रयुक्तानि तान्येवार्थकराणि च" इति । "पापक्षयश्च भवति स्मरतां तमहर्निशम्" इत्यत्रतु चकाराज्जामापराधक्षयः प्रेमभक्तिश्चेति व्याख्येयमिति पापतद्वासनासम्मूलभूताविद्याक्षयः सायुज्यसालोक्यादिकन्तु नामाभासस्यैकस्यापि फलमित्येतदुपाख्यान एव दृष्टम् ॥ २४ ॥

नन्वेवमखिलधर्मश्रेष्ठं मुक्तिसाधनमतिसुगमं नामसंकीर्त्तनादि भगवद्भजनं प्रायेणानुपदिशन्तः किमिति विद्वांसः कर्मयोगमेवोपदिशन्ति कुर्वते च तत्राह । प्रायेणेति । महाजनो जैमिन्यादिरिदं न वेद ननु शास्त्रकृत् कथं न वेद तत्राह । देव्या परमेश्वर्या । अविदुषो मोहने खलु न किमप्यैश्वर्यमतो विद्वांसमधिकं मोहयेदिति भावः अत एव मधु मधुरं यथा स्यात्तथा पुष्पितायामर्थवादैः पुष्पाणि सञ्जातानि यस्यास्तस्यां त्रय्यां जडीकृता अत्यभिनिवेशाद्विवेकरहितीकृता मतिर्यस्य सः । अत एव वैतानिके द्रव्यानुष्ठानमन्त्रादिविस्तारवन्ति कर्माणि महति दर्शपौर्णमासादियागे च बहायासवति लौकिकप्रतिष्ठादिहेतौ युज्यमानो युक्तोऽल्पायासे नाम कीर्त्तनादौ न रज्यतीत्यर्थः ॥ २५ ॥

अथापि ते देव पदाम्बुजद्वयप्रसादलेशानुगृहीत एव हि "जानाति तत्त्वं भगवन्महिम्नो न चान्य एकोऽपि चिरं विचिन्वन्" इति ब्रह्मोक्तेः शास्त्रज्ञा अपि भगवत्तत्त्वानभिज्ञाः स्युरनधीतशास्त्रा अपि भगवदनुगृहीताः शुद्धबुद्धयः सन्तो विवेकिनो भगवन्तं भजन्त्येवेत्याह । एवमिति । सर्वात्मना सर्वेणैव मनसा नतु नित्यनैमित्तिककर्माद्यनुष्ठानार्थम् । मनसः कमप्यंशं परित्यज्येत्यर्थः । दण्डं नित्यकर्माकरणप्रत्यवायजनितम् । यदि दैवात् पातकं निषिद्धाचरणलक्षणं स्यादुरुगायवादः कीर्त्तनम् ॥ २६ ॥

तस्मादेतावद्दिनपर्यन्तं यत्कृतं तत्कृतमेव भाग्येनैव रक्षिता अभूत अतः परन्तु यदि यदुपदिशामि तच्छृणुतेत्याह । ते इति । गाथाः कथाः समदृशः स्वस्य परस्य च सुखदुःखादिकं समं पश्यन्तः गदयाभिगुप्तानिति सकृदद्यतनो युष्माकमपराधो विष्णुदूतैः सान्त इत्यहं मन्ये यदि पुनरपि भक्तानां समीपं यास्यथ तदा हरेरेव गदया तेषां हस्तस्थितया चूर्णीभविष्यथेति भावः यूयं खलु वराकाः के तावत् वयं मत्सहिता ब्रह्माद्या अपि वयः कालो ब्रह्मादेर्नियन्तापि ॥ २७ ॥

तर्हि कीदृशानानेष्याम इत्यत्राह । तानसतः असाधून् असाधूनां लक्षणमाह । मुकुन्दपादारविन्दयोर्मकरन्दरसात् तत्प्राप्तिसाधनात् भक्तियोगाद्विमुखान् तादृशभक्तियोगमकुर्वाणानित्यर्थः । ननु तेषां वैमुख्यादेव स खलु मकरन्दरसो न लिप्सनीय इत्यतो मकरन्दरसं विशिनष्टि । निष्किञ्चनैः केवलभक्तिमद्भिः परमहंसकुलैश्च प्रधानीभूतभक्तिमद्भिर्ज्ञानात् सेवितात् अत एव निरयवर्त्मनि नरकप्रापके गृहे बद्धतृष्णान् ॥ २८ ॥

किञ्च । मुकुन्दस्य सकृदपि कीर्त्तनस्मरणादिकं तत्प्राप्तिसाधनं भवतीति तद्धन्तोऽपि सच्छब्देनाभिधीयन्त इत्यसतस्ताञ्जिह्वा एवानेतव्याः इत्याह । जिह्वेति । जिह्वाया अभावे चेतश्चेत्यादि चेतसो विच्छित्वे कृष्णायेत्यादि एकदापीति सर्वत्रान्वेति तान् कैवल्येन प्राधान्येन वा अकृतविष्णुकृत्यान् विष्णोः किमपि कृत्यमकृतवन्तः अत एव असतः अवैष्णवान् । अत्र जन्ममध्ये वर्षमध्ये दिनमध्ये वेति यथा स्वमतं व्याचक्षते इत्यर्थः ॥ २९ ॥

भृत्यापराधेन स्वामिनो दण्ड इति न्यायेन स्वस्यापराधित्वं भावयन् सविनयं प्रणमति । तत्तस्मात् क्षम्यतां क्षाम्यतु नः स्वपुरुषैः सुष्ठु अपुरुषैः कुपुरुषैरित्यर्थः । असत् अन्याय्यं कृतं नः कीदृशानां स्वानां तत्किङ्कराणामहो इत्याश्चर्यं तदपि न विदुषाम् अतोऽज्ञत्वादेव रचिताञ्जलीनाम् । ननु दण्डयितुं समर्था एव क्षमन्ते तत्राह । क्षान्तिर्गरीयसि महामहत्तमे तदपि त्वमेव युक्ता स्वानां मह इति पाठे सिष्णुदूतानां यन्महो माहात्म्यं तदजानताम् ॥ ३० ॥

तस्मात् सङ्कीर्तनं विष्णोर्जगन्मङ्गलमंहसाम् ।
महतामपि कौरव्य ! विद्ध्यैकान्तिकनिष्कृतम् ॥ ३१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भागवतं धर्मम्यो्ऽहं भवदनुग्रहादेव विजानीमः ॥ २१ ॥

यतस्तस्य विष्णोर्नामग्रहणादिभिरङ्गैः सहिता भक्तिर्भवति एतावान् धर्मः तथोक्तम् "प्रथमे स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे" इति ॥ २२ ॥ २३ ॥

भगवतो गुणानां कर्मणां नाम्नां च सङ्कीर्तनं पुंसामघनिर्हरणाय दुरितक्षयमात्राय भवतीति एतावता एतावन्मात्रेण फलकथनेन अलं वारणं फलसङ्कोच इत्यर्थः अलं वारणे "अलं भूषणपर्याप्तिशक्तिवारणवाचकम्" इति कोशात् यद्यतः अघवान् अजामिलः नारायणेति पुत्रं विक्रुश्य मुक्तिमिथाय अवाप ॥ २४ ॥

भगवन्मायामोहिताः महाजनत्वेन प्रसिद्धाः अपीदं न जानन्तीत्याह । प्रायेणेति । त्रय्यां कर्मप्रतिपादकवेदत्रय्यां मधुरं यथा भवति तथा पुष्पितायां पुष्पं तत्तुल्यैरर्थवादैः "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इत्यादिवाक्यैर्मनोहरायां जडीकृताभिनिविष्टा मतिर्यस्य सः अत एव वैतानिके वेदप्रोक्ते महति कर्मणि युज्यमानः अयं कर्मनिष्ठो महाजनः इदं भगवन्नामकीर्तनादिरूपायाः भक्तेर्माहात्म्यं प्रायेण न वेद यतो देव्या देवमाययालमत्यर्थं विमोहितमतिस्तस्मात् प्राचीनबर्हिर्वत्केचिन्महदुपदेशेन जानन्त्यपीति प्रायेणेत्युक्तम् ॥ २५ ॥

भावयोगं भक्तियोगं विदधते कुर्वते उरुगायस्य बहुधा गीयमानस्य भगवतो वादो नामकीर्त्तनादिरूपो हन्ति यदि किञ्चित्पातकं स्यात्कुतस्तत्तु तेषां तन्नास्तीत्यर्थः ॥ २६ ॥

भृत्यान् प्रति धर्मतत्त्वमुपदिश्यादण्ड्यान् दण्ड्यांश्चाह । त इति त्रिभिः । तान्नोपसीदत तत्समीपं न गच्छत वयं कालश्च न प्रभवति ॥ २७ ॥

परमहंसानां कुलैः समूहैर्जुष्टात् सेवितान्मुकुन्दपादारविन्दयोः मकरन्दरसस्तद्भक्तिरसस्तस्मादजस्रं सततं नित्यं विमुखास्तद्भक्तियोगरहितास्तान् ॥ २८ ॥

तानेवाह । जिह्वेति । यद्येषाम् ॥ २९ ॥

भगवन्तं क्षमापयति । नः स्वपुरुषैः अस्मदीयैः सुष्ठु अपुरुषैर्निर्विवेकिभिर्यद्सत्कृतमयुक्तं कृतं ततस्तदिनवत्सलत्वेन प्रसिद्धो भगवान् क्षमतां सहतामहो नामसंकीर्त्तनादिमाहात्म्यं न विदुषामविदुषां स्वानां रचिताञ्जलीनां भृत्यानां विषयिणी क्षान्तिर्गरीयसि स्वामिनि युक्तैवेति शेषः सर्वमङ्गलभाय प्रणमति । नम इति ॥ ३० ॥

भाषा टीका ।

हे दूत हौं यह वारह भक्त अति गुप्त विशुद्ध दुर्बोध भागवत धर्म को जानते हैं जिस धर्म को कि जान कर मनुष्य मुक्ति कों प्राप्त हो जावै ॥ २१ ॥

इस जगत् मे इतनाही पुरुषों का परम धर्म है भगवान् के नारायण आदि नाम को ग्रहणादि करके भगवान् मे भक्ति-योग होता है ॥ २२ ॥

हे पुत्रो ! नारायण के नामोच्चारण के माहात्म्य को आप लोग देखो, ऐसा पापी अजामिल भी जिससे मृत्यु पास मे से छूट गया ॥ २३ ॥

मनुष्यों के पापों के नाश करने को इतनाही बहुत है जोकि भगवान् के गुण कर्म नामों का कीर्तन करना है जिन भगवान् के संबंध से ऐसा पापी अजामिल भी अपने पुत्र के पुकारने में नारायण ऐसा कह कर मुक्ति को प्राप्त हो गया ॥ २४ ॥

प्राय करके भगवान् की माया देवी से अत्यंत मति के मोहित हो जाने से यह जीव खोटी पुष्प सरी की वेद की वाणी से जड़ होकर बड़े भारी यज्ञादि कर्म में लग जाता है सो भक्ति नहीं करता है ॥ २५ ॥

इस प्रकार विचार करके बुद्धिमान् लोग सब प्रकार से भगवान् में परम भाव से नाम संकीर्तनादिक करते हैं, वे पुरुष मेरे दण्ड के योग्य नहीं होते हैं यदि उनके कोई पातक भी होवै तो भगवान् का गुणानुवाद ही उस पातक को नाश करदेता है ॥ २६ ॥

जो समदृष्टि वाले हैं भगवान् के भक्त हैं वे साधु हैं देवता सिद्ध जन उनकी पवित्र कथाओं को गाते हैं श्री हरि के गदा से वे रक्षित रहते हैं उनके पास तुम लोग मत जाना उनके दण्ड देने में हम ब्रह्मादिक तथा काल कोई समर्थ नहीं है ॥ २७ ॥

उन पुरुषों को तुम ले आओ जोकि नरक के मार्ग घर में तृष्णा को बांधे हैं तथा निष्किञ्चन परमहंस रसज्ञों के समूह से सेवित जो मुकुन्द भगवान् का चरण-कमल रस तिस से निरन्तर विमुख हैं ॥ २८ ॥

और उनको ले आओ जिनकी जिह्वा भगवान् के गुण नामधेयको नहीं कथन करती है जिन का चित्त कभी भगवान् के चरणारविन्द को नहीं स्मरण करता है जिन का मस्तक एक वार भी श्रीकृष्णचरण मे नम्र नहीं होता है इसप्रकार जो विष्णु भगवान् के सेवा नहीं करने वाले हैं तिन असत्पुरुषों को तुम ले आओ ॥ २९ ॥

अपने नौकरों के द्वारा जो हमने भगवान् का अपराध किया है सो हम नहीं जानते थे अब हाथ जोड़ते हैं वे श्रीनारायण पुराण पुरुष भगवान् हमारे ऊपर क्षमा करैं श्रेष्ठ पुरुषों में तो क्षमा रहती है इसी से हम उन भूमा पुरुष के अर्थ नमस्कार करते हैं ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्मादित्यादिः शुकोक्तिः जगतोऽपि मङ्गलरूपम् ॥ ३१ ॥

शृण्वतां गृणतां वीर्याण्युद्दामानि हरेर्मुहुः ।
यथा सुजातया भक्त्या शुद्ध्येन्नात्मा व्रतादिभिः ॥ ३२ ॥
कृष्णाङ्घ्रिपद्ममधुलिण्न पुनर्विसृष्टमायागुणेषु रमते वृजिनावहेषु ।
अन्यस्तु कामहत आत्मरजः प्रमार्ष्टुमीहेत कर्म यत एव (१)रजः पुनः स्यात् ॥ ३३ ॥
इत्थं स्वभर्तृगदितं भगवन्माहित्वं संस्मृत्य विस्मितधियो यमकिङ्करास्ते ।
नैवाच्युताश्रयजनं प्रतिशङ्कमाना द्रष्टुं च बिभ्यति ततः प्रभृति स्म राजन् ! ॥ ३४ ॥
इतिहासमिमं गुह्यं भगवान् कुम्भसम्भवः ।
कथयामास मलय आसीनो हरिमर्चयन् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पारमहंस्यां संहितायां
वैयासिक्याम् अजामिलोपाख्यानं नाम
तृतीयोऽध्यायः ॥ ३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ऐकान्तिकत्वमेवाह । शृण्वतामिति । व्रतादिभिस्तथा न शुद्ध्येत ॥ ३२ ॥

एतदुपपादयति । कृष्णाङ्घ्रिपद्मयोर्मधु लेढि आस्वादयतीति तथा मधुलिट्तातितुच्छत्वेन विसृष्टा ये मायागुणा विषयास्तेषु पुनर्न रमते अन्यस्तु तन्मध्वास्वादरहितोऽत एव कामाभिभूतः सन्नात्मनो रजः पापं प्रमार्ष्टुमपि कर्मैव प्रायश्चित्तरूपमीहेत यतः कर्मणः पुनरपि रजः पापं स्यादेव कुञ्जरशौचवत् सत्त्वशोधकत्वाभावात् ॥ ३३ ॥

नैव विस्मितधियो बभूवुः किं तु संत्रस्तमुक्तामिलेव मेनिरे ततः प्रभृति प्रतिशङ्कमाना अस्मानेवैष हन्यादिति शङ्कां वहन्तस्तं द्रष्टुमपि बिभ्यति स्म पाठान्तरे तु विस्मितधियो जाताः ते च ततः प्रभृति बिभ्यति स्मेत्यर्थः ॥ ३४ ॥

कुम्भसंभवोऽगस्त्यो मलये पर्वते आसीनोऽव्यग्रो हरिमर्चयन् पुनः पुनर्विश्वासार्थं हरेः पादौ स्पृशन्नित्यर्थः ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं प्रत्याह किं तान् प्रति धर्मराज इति पृष्टां यमोक्तिमभिधाय तामुपसंहरिष्यमाणोऽन्तरा राज्ञः प्रश्नस्य यथैव नरकान्नरः नानोपयातना नैयादित्यस्योत्तरं सङ्गमयति मुनिः । तस्मादिति त्रिभिः । हे कौरव्य ! तस्मादितिहासमुखेन नाममाहात्म्यस्य श्रुतत्वादमोक्त्या सम्पादितत्वाच्च विष्णोः सङ्कीर्त्तनं जगतो मङ्गलावहं महतां विपुलानामप्यंहसां पापानामैकान्तिकनिष्कृतिं मुख्यं प्रायश्चित्तं विद्धि जानीहि ॥ ३१ ॥

व्रतादिकं तु न मुख्यमित्याह । शृण्वतां हरेरुद्दामानि विपुलानि वीर्याणि यशांसि मुहुर्मुहुः शृण्वतां गृणतां कथयतां चात्मा चित्तं भगवति श्रवणादिना सञ्जातया भक्त्या यथा शुद्ध्यति तथा व्रतादिभिर्न शुद्ध्यति ॥ ३२ ॥

कृष्णस्याङ्घ्रिपद्मयोर्यन्मधु रसस्तं लेढ्यास्वादयतीति तथा पुनर्वृजिनावहेषु दुरितापादकेषु विसृष्टेषु प्रकृतिकार्यगतशब्दादिषु न रमते न सज्जते अन्यस्तु कृष्णाङ्घ्रिपद्ममध्वनभिज्ञस्तु कामैः शब्दादिभिर्हतोऽभिभूतः आत्मनः स्वस्य रजः पापं प्रमार्ष्टुमपनेतुं कर्म प्रायश्चित्तरूपमीहेत कुर्यादित्यर्थः कर्म विशिनष्टि । यतः कर्मणोऽनन्तरं पुनः रजः पापं स्यात् सन्धावेत पुना इति रेफलोपे दीर्घः ॥ ३३ ॥

यमोक्तिमुपसंहरति । इत्थमिति । हे राजन्नित्थं भर्त्रा यमेन गदितं "कर्तृकरणे" इति समासः भगवतो महित्वं माहात्म्यं संस्मृत्य प्रत्यभिज्ञाय विष्णुदूतोक्तिरीत्या एवं ज्ञात्वा विस्मिता धीर्येषां ते यमकिङ्कराः तेन यमशासनेनाच्युताश्रयजनं प्रति शङ्कमानाः तत्समीपगमनेनास्माकं भर्तृदण्डनं स्यादिति शङ्कमानाः तत आरभ्य तं द्रष्टुं च बिभ्यति भयं प्राप्नुवन्तीत्यर्थः ॥ ३४ ॥

उक्तस्य प्रामाण्यज्ञापनाय तस्याप्तप्रणीततामाह । इतिहासमिति । मलये पर्वते आसीनो भगवान् कुम्भसम्भवोऽगस्त्यः हरिमाराधयन्निमं गुह्यमितिहासं कथयामास कथितवान् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
तृतीयोऽध्यायः ॥ ३ ॥

---

(१) पुनारजः स्यात् इतिश्रीवीर० ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यत् खपुरुषैरसत्कृतं नोऽस्माकं तत् क्षन्तव्यमित्यन्वयः न विदुषां हरेर्माहात्म्यमजानताम् । ननु चान्यथा को दण्ड इति तत्राह । राज्ञेति । किमनेनानायासेनेति तत्राह नम इति । द्रव्यादिलक्षणादण्डमन्तरेण कथं क्षान्तिरिति तत्राह । क्षान्तिरिति । वरीयसि वरतरे परतमे पुरुषाय नमः इत्येतावता द्रव्यादिदानाधिकेन क्षान्तिर्भवतीति शेषः "भूयिष्ठान्ते (१) नम उक्तिं विधेम" इति श्रुतेः सर्वदा सन्निहिता सन्तिष्ठते महति क्षमेति सप्तमी ३१।३२

अंहसां पापानामैकान्तिकनिष्कृतं नियतं प्रायश्चित्तं न केवलं स्त्रीशूद्रादीनां नामसङ्कीर्तनं विधीयते अन्येषामपीति भावेनाह । महतामिति ॥ ३३ ॥

सर्वाणि साधनान्यनुष्ठीयमानान्यपि भक्तिसहितानि फलवन्तीत्यभिप्रेत्याह । शृण्वत इति ॥ ३४ ॥

कुम्भसम्भवोऽगस्त्यः मलये पर्वते ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमद्विजयध्वजकृतपदरत्नावल्याम् ॥ ६ ॥

तृतीयोऽध्यायः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तस्मादित्यादिश्रीशुकोक्तिः तस्मात् सङ्कीर्तनन्तु जगतां सापराधनिरपराधानां सर्वेषामेव महतामंहसामपराधपर्यन्तानाम् ॥३१॥

सुष्ठु जातया रतिरूपया भक्त्या तु यथा मुक्तिपर्यन्तस्य किमुत पापमात्रस्य वासनाक्षयप्रकारेणात्मा मनः शुद्ध्येत् तथा व्रतादिभिर्नेत्यर्थः ॥ ३२ ॥

तदेव व्यनक्ति । कृष्णाङ्घ्रीति । अन्यः भक्तिमात्रहीनः ॥३३।३४॥

कुम्भसम्भवोऽगस्त्योऽपीत्यर्थः संहिताध्ययने श्रीद्वैपायनाच्छ्रुतत्वात् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विष्णुदूतानां यमस्य च वाक्यप्रामाण्येन यदि यत्किञ्चित् कीर्तनेनैव सर्वपापक्षयस्तदा किमुत सम्यक्कीर्तनेनेत्याह । तस्मादिति श्रीशुकः ॥ ३१ ॥

श्रवणकीर्तनाद्यभ्यासवतां भक्तानां सापराधानामपि भक्तिरेव पूर्णा स्यादथ युक्तनामापराधयुक्तानां नामान्येव हरन्त्यघम् । अविश्रान्तिप्रयुक्तानि तान्येवार्थकराणि इति । तस्यां सत्यान्तु जीवात्मैव शुद्ध्येत् । किं पुनर्मन इत्याह । शृण्वतामिति । आत्मा जीवः अविद्यामालिन्याद्यथा शुद्ध्यति न तथा व्रतादिभिः कर्मकृतैः प्रायश्चित्तैः पापक्षये सत्यपि पापबीजस्याविद्यात्मनः किञ्चिन्मात्रमेवापगमात् शुद्ध्यतीत्यर्थः । तेन भो राजन् । "प्रायश्चित्तमथोऽपार्थं मन्ये कुञ्जरशौचवत्" इति यत्प्रायश्चित्तं तत् सत्यमेव मूलपापक्षयो भक्तानां भक्त्यैव तेषामेव नरकगमनाभावो भगवत्प्रीतिश्च तदभावात् कर्मिणान्तु पापपुण्यवशात्स्वर्गनरकगमनायातं पुनः पुनरित्युपाख्यानेन सिद्धान्तः प्रतिपादित इति द्योतितम् ॥ ३२ ॥

तदेवं सापराधा निरपराधा वा भक्ता भक्तिमेव कुर्वीरन् न तु प्रायश्चित्तं भक्तानां किमस्तीत्याह । कृष्णाङ्घ्रीति । पद्मादिकृतकर्कशमतयः प्रायश्चित्तमेव । ननु नामकीर्तनमित्यतः प्रायश्चित्तशास्त्रमपि सार्थकमित्याह । कृष्णाङ्घ्रिपद्ममधुलिड्भ्रमरः स यथा योगन्धादिभिः सुवासैरपि न्यस्तो म्रियमाणोऽपि न त्रिपज्जते तथैव भक्तः पूर्वदशायां दुर्विषयरतोऽपि भक्तत्वे सति विसृष्टा ये मायागुणास्तेषु न रमते यद्यपि कनिष्ठभक्तस्तान् सेवते तदपि "जुषमाणश्च तान् कामान् दुःखोदर्कांश्च गर्हयन्" इत्युक्तरीत्या तेषु नैव रमते । अन्यः स्मार्तस्तु आत्मनो रजः पापं प्रमार्ष्टुं कर्म इहेतैव प्रायश्चित्तं कुर्वीतेव यत एव रजः पापं कुञ्जरशौचवत् पुनः स्यादेव नामापराधवत्त्वादिति भावः ॥ ३३ ॥

अच्युताश्रयजनं प्रति नैव गच्छन्तीति शेषः । तेनाच्युतेति पाठे ते विस्मृतधियो बभूवुः पुनस्ते च विश्वसितीति ॥ ३४ ॥

कुम्भसम्भवोऽगस्त्यो मलयपर्वते आसीनोऽयमपि हरिमर्चयन् पुनः पुनर्विश्वासार्थं हरेः पादौ स्पृशन्नित्यर्थं इति श्रीस्वामिचरणाः ॥ ३५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठस्कन्धे तृतीयोऽयं सङ्गतः सङ्गतः सताम् ॥ ३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

जगतां मङ्गलं सर्वपुरुषार्थप्रदं विद्धि महतामंहसां महापापानामप्यैकान्तिकनिष्कृतिं च विद्धि ॥ ३१ ॥

संकीर्तनादिरूपाया भक्तेः सर्वांहसामैकान्तिकनिष्कृतित्वमाह । शृण्वतामिति । हरेर्वीर्याणि शृण्वतां सुजातया भक्त्या यथा आत्मा सर्वपापमूलरूपवासनायुक्तं मनः शुद्ध्येत्तथा व्रतादिभिः कृच्छ्रचान्द्रायणादिव्रतैः आदिना तपोयज्ञादिभिश्च नेत्यर्थः ॥ ३२ ॥

मनसः शुद्धिर्निर्वासनत्वं तत् कृष्णभक्त्यैव भवति नान्यथेत्याह । कृष्णेति । कृष्णाङ्घ्रिपद्मयोर्यन्मधु रसस्तल्लेशस्यास्वादयतीति स तथा कृष्णभक्तः वृजिनावहेषु दुःखप्रदेषु मायागुणकार्येषु विषयेषु विसृष्टेषु त्यक्तेषु पुनर्न रमते तद्वासनारहितमनस्कत्वादन्यस्तु कृष्णभक्तस्तु आत्मनो मनसः रजः विषयवासनात्मकं रागं प्रमार्ष्टुं प्रक्षालयितुं यतः पुनः राग एव स्यात्तत् कर्म यज्ञतपोव्रतादिकमीहेतेत्यन्वयः ॥ ३३ ॥

तदनन्तरं यमदूतानां चेष्टितमाह । इत्थमिति । इत्थं स्वभर्तृगदितं भगवन्महित्वं संस्मृत्य सत्यमेवोक्तमिति मत्वा नैव विस्मृतधियस्मि ततः प्रभृति प्रतिशङ्कमानाः आत्मानं प्रति विष्णुपार्षदादिभ्यो भयं

(१) वयं ते तुभ्यं भूयिष्ठां महतीं नम इत्युक्तिं विधेम न तु स्वत्प्रीतिं कर्तुं शक्नुम इति ।

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

शङ्कमानाः अच्युताश्रयं जनं द्रष्टुं च बिभ्यति स्म ॥ ३४ ॥

कुम्भसम्भवोऽगस्त्यः ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
तृतीयाध्यायार्थप्रकाशः ॥ ३ ॥

भाषा टीका।

तिस हेतु से हे परीक्षितजी! जगत् का मङ्गलकारिक तथा बडे अपराधों का नाशक श्रीविष्णु के नाम संकीर्तन सब पापों का अत्यन्त प्रायश्चित्त है ऐसा जानो ॥ ३१ ॥

और श्रीहरिके मनोहर चरितों के वारम्वार सुनने वालों के कथन करने वालों के हृदय मे अच्छी उत्पन्न हुई भक्ति से आत्मा शुद्ध हो जाता है व्रतादिकों से तैसा शुद्ध नहीं होता है ॥ ३२ ॥

श्रीकृष्ण चरण कमल का भ्रमर पुरुष तो स्वयं छोडे हुये पाप दुःखके देने वाले माया कृत गुणों मे रत नहीं होता है अन्य पुरुष तो कामनाओं से हत होने से आत्मा के रजको दूर करने को प्रायश्चित्तादि कर्म की चाहना करता है जिस के कि करने से फिरभी रजोगुण ही उत्पन्न हो जाता है ॥ ३३ ॥

हे राजन्! इस प्रकार से अपने पति का कहा भगवान् का जो माहात्म्य तिसको स्मरण करके बुद्धि से विस्मित होकर ये यमराज के किंकर उस दिन से शंका कर के नारायण भक्त के प्रति नहीं जाते हैं भगवद्भक्तों को देखकर भी डरजाते हैं ॥ ३४ ॥

इस पवित्र इतिहास को अगस्त्य भगवान् ने मलयाचल पर्वत के ऊपर भगवान् की पूजा करते समय में हमसे कहा है ॥ ३५ ॥

इति श्रीभागवत षष्ठस्कन्ध तीसरे अध्याय का
भाषानुवाद लक्ष्मणाचार्यकृत
समाप्त ॥ ३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे तृतीयोऽध्यायः समाप्तः ॥ ३ ॥

॥ चतुर्थोऽध्यायः ॥

राजोवाच ।

देवासुरनृणां सर्गो नागानां मृगपक्षिणाम् ।
सामासिकस्त्वया प्रोक्तो यस्तु स्वायम्भुवेऽन्तरे ॥ १ ॥
तस्यैव व्यासमिच्छामि ज्ञातुं ते भगवन् ! यथा ।
अनुसर्गं यया शक्त्या ससर्ज भगवान् परः ॥ २ ॥

सूत उवाच ।

इति संप्रश्नमाकर्ण्य राजर्षेर्बादरायणिः ।
प्रतिनन्द्य महायोगी जगाद मुनिसत्तमाः ! ॥ ३ ॥

श्रीशुक उवाच ।

यदा प्रचेतसः पुत्रा दश प्राचीनबर्हिषः ।
अन्तःसमुद्रादुन्मग्ना ददृशुर्गां द्रुमैर्वृताम् ॥ ४ ॥
द्रुमेभ्यः क्रुद्ध्यमानास्ते तपोदीपितमन्यवः ।
मुखतो वायुमग्निं च ससृजुस्तद्दिधक्षया ॥ ५ ॥
ताभ्यां निर्दह्यमानांस्तानुपलभ्य कुरूद्वह ! ।
राजोवाच महान् सोमो मन्युं प्रशमयन्निव ॥ ६ ॥
मा द्रुमेभ्यो महाभागाः ! दीनेभ्यो द्रोग्धुमर्हथ ।
विवर्द्धयिषवो यूयं प्रजानां पतयः स्मृताः ॥ ७ ॥
(१) अहो प्रजापतिपतिर्भगवान् हरिरव्ययः ।
वनस्पतीनोषधीश्च ससर्जोर्जमिषं विभुः ॥ ८ ॥
अन्नं चराणामचरा ह्यपदः पादचारिणाम् ।
अहस्ता हस्तयुक्तानां द्विपदां च चतुष्पदः ॥ ९ ॥
यूयं च पित्रान्वादिष्टा देवदेवेन चानघाः ! ।
प्रजासर्गाय हि कथं वृक्षान्निर्दग्धुमर्हथ ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्थादित्रिभिर्विश्वरूपजन्मविवक्षया ।
प्रचेतःसुतदक्षस्य वंशस्तावत् प्रतन्यते ॥ १ ॥
चतुर्थे तु प्रजासृष्ट्यै दक्षेणाराधनं हरेः ।
तपसा हंसगुह्याख्यस्तोत्रेण च निरूप्यते ॥ २ ॥
प्रसक्तानुप्रसक्तेन स्वायम्भुवसुतान्वये ।
नामप्रभावमाकर्ण्य वंशव्यासं बुभुत्सते ॥ ३ ॥

देवासुरेति द्वाभ्याम् । सामासिकः संक्षिप्तो यः प्रोक्तस्तृतीयस्कन्धे ॥ १ ॥

---

(१) आद्यो प्रजापतिरिति श्रीवीर० श्रीविजय० ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

व्यासं विस्तारं ते त्वत्तो यया शक्त्या यथा ससर्ज तां शक्तिं तत्प्रकारं च ज्ञातुमिच्छामि अनुसर्गमनुवृत्तं सर्गम् ॥२॥३॥

वृक्षादिरूपेण ससर्जेति वक्तुं दक्षजन्मप्रकारमाह । यदेति । प्राचीनबर्हिषः पुत्रा यदा समुद्रमध्यादुन्मग्ना निर्गतास्तदा गां पृथ्वीं द्रुमैर्वृतां ददृशुः नारदोपदेशतः प्राचीनबर्हिषो निवृत्त्या अराजके सति कृष्याद्यभावात् ॥ ४ ॥

तपसा दीपितो मन्युर्येषां ते तेषां द्रुमाणां दग्धुमिच्छया ॥५ ॥

ताभ्यां वाय्वग्निभ्यां दह्यमानांस्तान् द्रुमान् वनस्पतीनां राजा सोम उवाच मा द्रुमेभ्य इति नवभिः ॥ ६ ॥

हे महाभागाः ! विवर्धयिषवो विशेषेण वर्धयितुमिच्छवः ॥ ७ ॥

प्रजापतीनां तद्भक्ष्यभोज्यदाहोऽनुचित इत्याह । अहो इति त्रिभिः । ऊर्जं भक्ष्यम् इषमन्नम् ॥ ८—१० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमाकर्णितस्वायंभुवतत्पुत्रोत्तानपादप्रियव्रतसंततिचरित्रस्तत्प्रसंगात्पृष्टभूगोलभगोलेषु तत्संस्थानतत्प्रसंगात्पृष्टनरकानिस्तारोपायः श्रुतपरिहारश्च पूर्वं संक्षेपेण श्रुतं मनुसर्गं विस्तरेण बुभुत्सुः पृच्छति राजा । देवासुरेति द्वाभ्याम् । स्वायंभुवे मन्वन्तरे खलु देवादीनां सर्गः सामासिकः संक्षिप्तः त्वया प्रोक्तः ॥ १ ॥

हे भगवन्मुने ! तस्यैव सर्गस्य व्यासं विस्तरं त्वत्तो ज्ञातुमिच्छामि । कोऽसौ विस्तरस्तत्राह । भगवान् परः सृज्यमानप्रकृतिपुरुषविलक्षणः यया शक्त्या यथानुसर्गं यं यं व्यष्टिसर्गं ससर्जाकरोत् ॥ २ ॥

एवमापृष्टो मुनिराहेत्याह सूतः । इतीति । हे मुनिसत्तमाः इतीत्थं राजर्षेः परीक्षितः तं प्रश्नमाकर्ण्य प्रतिनन्द्य साधुपृष्टमिति प्रतिनन्द्य बादरायणिर्महायोगी जगाद ॥ ३ ॥

गदितमेवाह । यदेत्यादिना । तत्र भगवान् बादरायणिर्विस्तरेण पृष्टं मनुसर्गं विवक्षुस्तावच्चतुर्थस्कन्धान्तोक्तं प्राचीनबर्हिषः पुत्राणां चरित्रमुपोद्घातत्वेन प्रस्तौति । यत आपूरितात्मन इत्यन्तेन । प्रचेतसः प्राचीनबर्हिषो दश पुत्राः यदा अन्तःसमुद्रात् समुद्रमध्यादुन्मग्नाः निर्गतास्तदा गां भूमिं ददृशुः कथंभूतां द्रुमैर्वृतां नारदोपदेशात् प्राचीनबर्हिषो निवृत्त्याऽराजके कृष्याद्यभावात् द्रुमैर्वृतामिति भावः ॥ ४ ॥

द्रुमेभ्यः क्रुध्यमानास्तपसा उद्दीपितः मन्युः क्रोधो येस्तादृशास्तेषां वृक्षाणां दिधक्षया दग्धुमिच्छया मुखाद्वायुमग्निं च ससृजुरुत्पादितवन्तः ॥ ५ ॥

ताभ्यां वाय्वग्निभ्यां नितरां दह्यमानांस्तान् द्रुमानुपलभ्य दृष्ट्वा हे कुरूद्वह ! महान् सन् सोमो राजा चन्द्रः मन्युं तत्क्रोधं शमयन्निव प्रशमयितुमित्यर्थः उवाच बोधितवान् ॥ ६ ॥

किमुवाचेत्यपेक्षायां तदेवोक्तमाह । मा द्रुमेभ्यः इत्यादिना प्रतिगृह्यतामित्यन्तेन । हे महाभागाः ! दीनेभ्यो द्रोग्धुं मार्हथ कुतः यतो यूयं विवर्द्धयिषवः लोकान् वर्द्धयितुमिच्छवः प्रजानां पतयश्च स्मृताः उक्ताः विवर्द्धयिषूणां प्रजापतीनामिदं वनस्पतिदाहनमनुचितमिति भावः ॥ ७ ॥

सत्यं विवर्द्धयिषवः प्रजापतयश्च किं द्रुमैः प्रयोजनमित्यत्राह । आदाविति । प्रजापतीनां ब्रह्मादीनामपि पतिर्विभुर्हरिखिलद्रुमेष्वन्तरात्मा तथाप्यव्ययः असंस्पृष्टतद्गतविकारः भगवान् हरिरादौ जगदादिकाले वनस्पतीनोषधीश्च ससर्ज तान् ताश्च विशिनष्टि । ऊर्जमिषमिति । ऊर्जं पितॄनुद्दिश्य दीयमानमन्नम् इषं देवानुद्दिश्य दीयमानम् इषोर्जरूपा वनस्पतय इत्यर्थः । अयं भावः । देवपितृयज्ञावशिष्टान्नेन प्रजानां जीवनं विहितम् "यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः" इति स्मरणात् भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्" इति यज्ञानवशिष्टान्नभक्षणनिन्दनाच्च एवं देवाद्युपजीव्यान्नरूपेण परिणममानान् वनस्पत्यादीन्निद्रोग्धुं मार्हथेति ॥ ८ ॥

एतदेवोपपादयति । अन्नमिति । यावत् पादचारिणां चराणां भूतानामपादचारिणोऽचराः अन्नमद्याः अचरेषु भूतेष्वद्यात्तृभावो नास्ति किंतु तेषामुपभोग्यत्वाकार एक एवेति भावः चरेषु त्वाकारद्वयमस्तीत्याह । अहस्ता इति । हस्तयुक्तानां द्विपदामहस्ताः चतुष्पदः अन्नमदनीयाः सामान्याभिप्रायकमेकत्वं क्लीबत्वं च । चरेषूभयाकारकथनं व्यतिरेकदृष्टान्तार्थम् । यथा चरेषु केषाञ्चिदत्तृत्वमन्येषामदनीयत्वं न तथाचरेषु किं त्वदनीयत्वमेवेति सर्वोपभोग्यत्वान्निरपराधत्वाच्च तद्द्रोहः न कार्य इति तात्पर्यम् ॥ ९ ॥

किञ्च । हे अनघाः ! यूयं पित्रा प्राचीनबर्हिषा देवदेवेन तपसा तोषितेन भगवता च प्रजासर्गाय निर्दिष्टाः हि यतः एवमतः कथं वृक्षान्निर्दग्धुमर्हथ ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मुह्यन्ति सूरय इत्यत्र यं यदुक्तं ब्रह्माद्यज्ञेयमाहात्म्यं हरेस्तज्जन्माद्यस्य यत इत्यत्र च यः सर्गविशेषः प्रतिज्ञातः सोऽपि भगवदेकनिष्ठ इति प्रतिपाद्यतेऽस्मिन्नध्याये । तत्र तृतीयादौ कथितः सर्गो भगवदेकनिष्ठ उतान्यनिष्ठः आहोस्विदन्यनिष्ठोऽपि भगवत्प्रसादायत्त इत्यभिप्रेत्य राजोक्तार्थमनूद्य तद्विस्तरं ब्रूहीत्याह । देवेति । सामासिकः संक्षिप्तः ॥ १ ॥

व्यासं प्रपञ्चं ते तव सकाशादनुसर्गम् अवान्तरसर्गम् ॥ २ ॥

शुकेन राजप्रश्नमादृत्य परिहार उक्त उतानादृत्यान्यकथान्तरमवादि श्रुत्वा विस्मत्वा तूष्णीं स्थितं किमिति शौनकादीनां हार्दं प्रश्नं परिहरति सूत इत्याह । इतीति । अनेन सूतशौनकसंवादो न समाप्तः किञ्च । शौनकादिप्रश्नोऽप्ययमेव अयमेव परिहारोऽपीति ध्वनितम् ।३।

भगवत्प्रसादायत्तत्वान्मन्वादृष्ट्याप्यन्यनिष्ठत्वप्रतीयमानोऽपि तदेकनिष्ठ इति वक्तव्यस्य नातिव्याप्तिरिति दर्शयितुं प्रकृतार्थानुवादपूर्वकमुपक्रमते । यदेति । प्रचेतस इति । तुल्यनामानः प्राचीनबर्हिषः दश पुत्राः यदान्तःसमुद्रादुत्थिताः द्रुमैर्वृतां गां भूमिं ददृशुः ॥४॥

तदा मुखतो वायुमग्निं च ससृजुरित्यन्वयः । तेषां वृक्षाणां दिधक्षया दहनेच्छया ॥ ५ ॥

तत्र चन्द्रेण तत्कोपशान्तिप्रकारं कथयति । ताभ्यामिति । ताभ्याम् अग्निवायुभ्याम् ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

किमाहेति तत्राह । मा द्रुमेभ्य इति । क्रुधदुर्हृत्यादिना चतुर्थी तत्र हेतुमाह । विवर्धयिषवो इति । विवर्धयिषवः प्रजावृद्धिं करिष्यावः यूयं पतयः पालकाः स्मृता इति यदतो द्रुमेभ्यो द्रोग्धुं नार्हथेत्यन्वयः ॥ ७ ॥

इहे नारायणानुग्रहदूरत्वं भवतां स्यादित्यभिप्रेत्याह । आदाविति । ऊर्जे पित्रन्नम् हव्यं देवान्नम् ॥ ८ ॥

वनस्पत्योषधीनामूर्जोयोगत्वं कथमत्राह । अन्नमिति । अचराश्चराणामन्नम् इत्याद्यन्वितार्थम् ॥ ९ ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

सामासिकः षष्ठादिमन्वन्तरजातविस्ताराकथनात् ॥ १ ॥

व्यासं तन्मन्वन्तरजातदक्षानन्तरशाखोपशाखारूपम् ।

पूर्वसर्गस्य केनचित् कारणेन नष्टप्रायत्वादनुसर्गम् ॥ २ ॥ ३ ॥

यदेति । उत्तानपादवंशान्तमारभ्य कथनं तस्यैवान्तिमराज्यत्वात् ॥ ४—८ ॥

ऊर्जसन्नातिरिक्तं भक्ष्यम् । अन्नमिति सर्वेषां दुर्वेद्यानामप्युद्भिदित्यर्थः ॥ ९—२२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पुनश्च पोषणं वाच्यमिन्द्रस्याचार्यघातिनः ।
सचाचार्यो विश्वरूपो दक्षकन्यासुतोद्भवः ॥ १ ॥
दक्षस्यातश्चतुर्थान्ते संक्षेपेणोक्तजन्मनः ।
कथाव्यासमयेणेह स्कन्धे वाच्या सविस्तरम् ॥ २ ॥
राज्ञापि पृष्टेः प्रस्तावे स्वायम्भुवसुतान्वयौ ।
सप्रसङ्गौ समाकर्ण्य भूयः पप्रच्छ तत्पुनः ॥ ३ ॥
चतुर्थे तु प्रचेतोभ्यः जातो दक्षः प्रजाः सृजन् ।
हंसगुह्यस्तवेनेशं तुष्टावेति निरूप्यते ॥ ४ ॥

देवासुरेति द्वाभ्याम् । सामासिकः संक्षिप्तः यः प्रोक्तस्तृतीयस्कन्धे व्यासं विस्तारम् । ते त्वत्तः अनुसर्गमनुवृत्तं सर्गम् । यया शक्त्या यथा ससर्ज तां शक्तिं तं प्रकारञ्च परो ब्रह्मा ॥ १—३ ॥

दक्षादिरूपेण ससर्जेति वक्तुं रुद्रापराधाच्छागमुखस्य दक्षस्यापमानदुःखेन देहे त्यक्तवतः पुनर्जन्मप्रकारमाह । यदेति । गां पृथ्वीं द्रुमैर्वृतां ददृशुः । नारदोपदेशतः प्राचीनबर्हिषि विरज्य वनं गते सत्यराजकादेव कृष्याद्यभावात् ॥ ४ ॥

तपोदीपितेति । तपसः क्रोधाधिष्ठानत्वात् ॥ ५ ॥

सोमो वृक्षाधिष्ठाता स एव वृक्षाणां राजा प्रशमयन्निवेति प्रथमं सान्त्वोपायेन मन्योरपगमसम्भवादिति भावः ॥ ६ ॥ ७ ॥

ऊर्जमन्नातिरिक्तं फलादि भक्ष्यं वनस्पतिहेतुकम् । हव्यमन्नं गोधूमाद्योषधिहेतुकम् । चराणां पचाभ्यां चरतां भ्रमरादीनाम् अचराः पुष्पलताद्या एवान्नम् । पादचारिणां पद्भिश्चरतां गोमहिषादीनाम् अपदो घासाद्या एवान्नं तेष्वेव हस्तयुक्तानां व्याघ्रादीनाम् अहस्ताः गवादयः द्विपदां पद्भ्यां चरतां मनुष्याणां चतुष्पदो हरिणाद्याः चकारात् अचरा धान्यगोधूमाद्याश्च ॥ ८—१० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं पापकारिणो रक्षणमुक्त्वाथ चतुर्थे दक्षजन्मानुवादपूर्वकं दक्षकर्तृकं भगवदाराधनं वर्णयन् पुण्यकारिणो दक्षस्येष्टसम्पादनेन रक्षणं वर्णयति । तत्र तावत् संक्षेपतः उक्तां देवादिसृष्टिं श्रुत्वा तां विस्तरतो बुभुत्सुः राजर्षिः पृच्छति । देवेति द्वयेन । सामासिकः संक्षिप्तस्तृतीये स्कन्धे त्वया यः प्रोक्तः ॥ १ ॥

हे भगवन् ते त्वत्तः तस्यैव सर्गस्य व्यासं विस्तरं वेदितुमिच्छामि को विस्तर इत्यत्राह । भगवान् मुख्यो विश्वहेतुः यया शक्त्या येन नियोज्यकर्त्रा यथा अनुसर्गमनुकृतं ससर्ज तथा श्रोतुमिच्छामीति योजना ॥ २ ॥ ३ ॥

दक्षेण नियोज्यकर्त्रानुसर्गमकरोदिति वक्तुं तज्जन्मानुवदति । यदेत्यादिना । उन्मग्ना निर्गताः गां भुवम् ॥ ४ ॥

तद्दिधक्षया द्रुमाणां दग्धुमिच्छया ॥ ५ ॥

हे कुरूद्वह ! परीक्षित् वनस्पतीनां राजा सोमः ताभ्यां वाय्वग्निभ्यां नितरां दह्यमानान् तान् द्रुमानुपलभ्य ज्ञात्वा मन्युं प्रचेतसां क्रोधमुपशमयन्नुवाच ॥ ६ ॥

तदुक्तिमेवाह । मेति नवभिः । हे महाभागाः ! द्रुमेभ्यः द्रोग्धुं द्रोहं कर्तुं मार्हथ यतो यूयं विवर्द्धयिषवः प्रजाः वर्द्धयितुमिच्छवः प्रजानां पतयः स्मृताः ॥ ७ ॥

प्रजावृद्धिकामानां प्रजापतीनां तद्भक्ष्यभोज्यनाशो न कार्य इत्याह । अहो इति त्रिभिः । ऊर्जं भक्ष्यमिषमन्नं ससर्ज ॥ ८ ॥ ९ ॥ १० ॥

भाषा टीका ।

राजा परीक्षितजी बोले देवता असुर मनुष्य नाग मृग पक्षी इनों की सृष्टि संक्षेप से आपने कही है जोकि स्वायंभुव मन्वन्तर में भई है ॥ १ ॥

हे भगवन् ! उसीका विस्तार मैं सुनने चाहता हूं पर भगवान् ने अनुसर्गको जैसे जिस शक्ति से सृजा है सो भी मैं सुनने चाहता हूं ॥ २ ॥

श्रीसूतजी बोले राजर्षि परीक्षित के ऐसे प्रश्न को श्रवण करके मुनिसत्तम बादरायण पुत्र श्री शुकदेवजी परीक्षितजी की प्रशंसा करके फिर बोले ॥ ३ ॥

श्रीशुकदेवजी बोले जिस समय में प्राचीन बर्हि राजाके पुत्र दश प्रचेतस समुद्र में से निकले तब उन्होंने सब पृथिवी को पेडों के मारे भरी हुई देखा ॥ ४ ॥

अन्नके न होने से वे बडे क्रोध से दीपित होगये वृक्षों पर उनने बडा कोप किया तब उन वृक्षों के जलाने की इच्छा से मुखमें से अग्नि तथा वायु दोनों को पैदा किया ॥ ५ ॥

हे कुरूद्वह परीक्षित् जी ! उन अग्नि वायु से वृक्षों को जलते देखकर उनके क्रोधको शान्त करने को सोम राज प्रचेतों से बोलते भये ॥ ६ ॥

आतिष्ठत सतां मार्गं कोपं यच्छत दीपितम् ॥
पित्रा पितामहेनापि जुष्टं वः प्रपितामहैः ॥ ११ ॥
तोकानां पितरौ बन्धू दृशः पक्ष्म स्त्रियाः पतिः ।
पतिः प्रजानां भिक्षूणां[(१)] गृह्यज्ञानां बुधः सुहृत् ॥ १२ ॥
अन्तर्देहेषु भूतानामात्मास्ते हरिरीश्वरः ।
सर्वं तद्धिष्ण्यमीक्षध्वमेवं वस्तोषितो ह्यसौ ॥ १३ ॥
यः समुत्पतितं देह आकाशान्मन्युमुल्बणम् ।
आत्मजिज्ञासया यच्छेत् स गुणानतिवर्तते ॥ १४ ॥
अलं दग्धैर्द्रुमैर्दीनैः खिलानां शिवमस्तु वः ।
वार्क्षी ह्येषा वरा कन्या पत्नीत्वे प्रतिगृह्यताम् ॥ १५ ॥
इत्यामन्त्र्य वरारोहां कन्यामाप्सरसीं नृप ! ।
सोमो राजा ययौ दत्त्वा ते धर्मेणोपयेमिरे ॥ १६ ॥
तेभ्यस्तस्यां समभवद्दक्षः प्राचेतसः किल ।
यस्य प्रजाविसर्गेण लोका आपूरितास्त्रयः ॥ १७ ॥
यथा ससर्ज भूतानि दक्षो दुहितृवत्सलः ।
रेतसा मनसा चैव तन्ममावहितः शृणु ॥ १८ ॥
मनसैवासृजत् पूर्वं प्रजापतिरिमाः प्रजाः ।
देवासुरमनुष्यादीन्नभस्थलजलौकसः ॥ १९ ॥
तमबृंहितमालोक्य प्रजासर्गं प्रजापतिः ।
विन्ध्यपादानुपव्रज्य सोऽचरद्दुष्करं तपः ॥ २० ॥

भाषा टीका ।

हे महाभाग प्रचेता हो दुखित वृक्षोंपर कोप मतकरो तुमतो प्रजाओं के पतिहो प्रजावृद्धि करने वालेहो ॥ ७ ॥

अहो प्रजापतियों के पति भगवान् ईश्वर ने वनस्पति ओषधियोंको पितरों का अन्न देवतों का अन्न रूप सृजा है ॥ ८ ॥

चर जीवों के अचर जीव आहार हैं पादचारी जीवों के आहार विना पादचारी जीव हैं विना हाथवाले जीव हाथ वालों के आहार हैं चार पांव वाले जीव दो पांववालों के आहार हैं ॥ ९ ॥

हे अनघ हो भगवान् ने और आप के पिताने तो आप लोगों को सृष्टि के वास्ते आज्ञादिया है आप लोक कैसे वृक्षों का द्रोह करते हो ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत आतिष्ठत आश्रयत सतां मार्गमुपशमं पित्रादिभिर्जुष्टम् ११ प्रजानां प्रजापतिरेव बन्धुरतस्तज्जीविकानाशो न कर्तव्य इति दृष्टान्तपञ्चकेनाह । तोकानां बालानां मातापितरौ अज्ञानां ज्ञानदो बुध एव सुहृत् ॥ १२ ॥

ईश्वराधिष्ठानत्वाच्च भूतद्रोहो न युक्त इत्याह ॥ अन्तर्देहेष्विति । वो युष्माभिः ॥ १३ ॥

आकाशाद्देहे समुत्पतितमाकस्मिकमित्यर्थः । आत्मविचारेण यो नियच्छेत् ॥ १४ ॥

खिलानां शेषाणां वो युष्माकं च शिवमस्तु वृक्षरक्षणार्थं तदीयां कन्यां ददाति वार्क्षी वृक्षैः पालिता ॥ १५ ॥

आमन्त्र्य सान्त्वयित्वा आप्सरसीमप्सरसः प्रम्लोचायाः सुताम् ॥ १६ ॥ १७ ॥

दुहितृवत्सल इति । तस्य कन्यावंश एवेत्युक्तं मम मत्तः ॥ १८ ॥

प्रजापतिर्दक्षः ॥ १९ ॥

अबृंहितमसंवृद्धं विन्ध्यस्य पादान् सन्निहितपर्वतान् ॥ २०-२१ ॥

---

(१) गुह्यज्ञानामिति श्रीवीरराघवः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सतां साधूनां मार्गमातिष्ठताश्रयत । कथंभूतं वः युष्माकं पित्रा प्रचेतसा पितामहेन तत्पित्रा ये च वः युष्माकं प्रपितामहादयः तैश्च जुष्टं सेवितम् । पित्राद्याचरितमेव सन्मार्गमाश्रयतेत्यर्थः । दीपितं कोपं यच्छत उपसंहरत ॥ ११ ॥

किञ्च । भगवतः सर्वरक्षकस्य शरीरत्वाद्वनस्पतिषु क्रोधोऽयुक्त इत्याह । तोकानामिति । तोकानां बालानां पितरौ यथा बन्धू रक्षकौ यथा दृशः पक्ष्म बन्धुः यथा च स्त्रियाः पतिर्बन्धुः तथा प्रजानां नृपः यथा च भिक्षूणां भिक्षेत्यध्याहारः यथा गुह्यज्ञानां प्रयोगकुशलानां बुधः मीमांसाभिज्ञः तथा भगवान् रक्षकः सुहृच्च भूतानामन्तर्देहेषु हृदयेष्वात्मेश्वरः अन्तः प्रविश्य नियन्ता हरिरास्तेऽतः सर्वं जगत् अस्य भगवतो धिष्ण्यमेवमीक्षध्वं योऽसौ भगवान् वः युष्माकं तोषितो भवति । यद्वा । प्रतिनियतरक्षकत्वव्यवस्थामुल्लङ्घ्य कथं द्रोग्धुमर्हथेत्याह । तोकानामिति । पित्रादय इव प्रजानां चराचरात्मकानां नृपः बन्धुः रक्षकः सुहृच्च । किञ्च । भगवच्छरीरत्वाच्च न द्रोहः कार्य इत्याह । अन्तर्देहेष्विति । इक्त एवार्थः गुह्यज्ञानामिति भिक्षुविशेषणं वा गुह्यं रहस्यभूतं परमात्मस्वरूपादिकं ज्ञातुमिच्छूनां बुध इव तदुपदेष्टा विद्वानिवेत्यर्थः रक्षणं च सर्वत्रानिष्टपरिहारेष्टप्रापणात्मकमेव ॥ १२ ॥ १३ ॥

किञ्च । क्रोधोपशमस्याभ्युदयहेतुत्वाच्च तमुपसंहरतेत्याह । य इति । देहे आकाशात् समुत्पतितं यदृच्छयोत्पन्नमित्यर्थः । यद्वा । देहे आकाशाद्धृदयविवरात् समुत्पतितमुल्बणं दुःसहं मन्युं क्रोधमात्मजिज्ञासया स्वात्मपरमात्मयाथात्म्यविचारणेन यच्छेदुपसंहरेत् स पुमान् गुणान् सत्त्वादीनतिवर्त्तते क्रमेण संसारबन्धान्मुक्तो भवतीत्यर्थः ॥ १४ ॥

अतो दग्धैरत एव दीनैः द्रुमैरलं दीनद्रुमदाहेनालमित्यर्थः खिलानामवशिष्टानां द्रुमाणां वः युष्माकं च शिवमस्तु । वार्क्षी वृक्षैः पालिता एषा वरा सुलक्षणा कन्या मारिषाख्या पत्नीत्वेनेत्यर्थः । प्रतिगृह्यतां युष्माभिरिति शेषः ॥ १५ ॥

इतीत्थमामन्त्र्य सान्त्वयित्वाप्सरसमप्सरोदेहादाविर्भूतामृषिवीर्यसंसूतां वरारोहां वरैरारोढुमुद्वोढुं योग्यां कन्यां तेभ्यो दत्वा सोमो राजा ययौ गतः ततस्ते प्रचेतसः सर्वे धर्मेण तामुपयेमिरे विवाहितवन्तः । धर्मेणेत्यनेन "अपृथग्धर्मशीलानां सर्वेषां वः सुमध्यमा । अपृथग्धर्मशीलेयं भूयात् पत्न्यर्पिताशया" इति भगवतोक्तत्वाद्बहुभिरेकस्याः पाणिग्रहो दोषावह इति शङ्का न कार्येति सूचितम् ॥ १६ ॥

तेभ्यः प्राचेतसेभ्यः तस्यामाप्सरस्यां हे राजन् । दक्षः प्रजापतिः प्राचेतसोऽभूदुत्पन्नः पूर्वं ब्रह्मणोऽङ्गुष्ठाज्जातो दक्षाध्वरे रुद्रापराधवशात्तं देहं विहायास्यां मारिषायां प्राचेतसनामाजायतेत्यर्थः तथाचोक्तं चतुर्थे "यस्यां महदवज्ञानादजन्यजनयोनिजः" इति प्राचेतसं विशिनष्टि । यस्येति । यस्य प्राचेतसस्य दक्षस्य प्रजासर्गेण त्रयो लोका आपूरिताः त्रयाणां लोकत्रयस्थाः प्रजास्तत्सन्तानरूपा इत्यर्थः ॥ १७ ॥

दक्षः प्राचेतसः दुहितृषु वात्सल्ययुक्तः रेतसा वीर्येण मनसा सङ्कल्पेन चेमाः प्रजाः ससर्ज काः देवादीस्तथा नभ एव स्थलं येषां जलमेवौकः स्थानं येषां तान् ॥ १९ ॥

तमेवं मनसा क्रियमाणं प्रजासर्गमबृंहितमवृद्धमालोच्य स प्रजापतिः प्राचेतसः विन्ध्यस्य पादान् प्रत्यन्तपर्वतानुपब्रज्य उपागत्य दुश्चरमितरैः कर्त्तुमशक्यं तप आचरत् कृतवान् ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मार्गं विशिनष्टि । पित्रेति ॥ ११ ॥

अनन्यशरणानां वृक्षाणां दाहे शरणागतवधदोषोऽपि युष्माकं स्यादित्याशयवानाह । तोकानामिति । तोकानां बालानां पितरौ मातापितरौ बन्धू इत्येतत् सर्वत्रान्वेतव्यं गृही गृहस्थः भिक्षूणाम् अज्ञानां ज्ञानदानाख्यजीवनेन ॥ १२ ॥

किञ्चानेनेश्वरद्रोहोऽपि स्यादित्याशयवानाह । अन्तरिति । भूतानामिति विशेषणाद्वृक्षदाहेनेश्वरदाहः कथं स्याद्भूतदाहाकरणादिति तत्राह । सर्वमिति । तस्य हरेर्धिष्ण्यं निवासस्थानम् अनेन किं फलं स्यात्तत्राह । एवमिति । असौ हरिः ॥ १३ ॥

इतोऽपि कोपो न कार्य इत्याह । यः समुत्पतितमिति । देहे आकाशाद्धृदयाकाशादुत्पतितमुज्ज्वलितं मन्युं यो यच्छेत् कथमात्मनः परमात्मनः जिज्ञासया विचारेण "अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः" इति श्रुत्यर्थपर्यालोचनया भूतद्रोहेण श्रीनारायणद्रोह एव स्यादिति चिन्तया स पुमान् गुणान् संसारहेतुभूतांस्तरतीत्यन्वयः ॥ १४ ॥

वार्क्षीं वृक्षदुहिता वरा वरणीया ॥ १५ ॥

वरः श्रेष्ठः आरोहो नितम्बप्रदेशो यस्याः सा तथा ताम् आप्सरसीम् अप्सरोजातिमतीम् ॥ १६ ॥

यस्य दक्षस्य ॥ १७ ॥ १८ ॥

पूर्वमादिसृष्टौ इमाः प्रजाः मनसैवासृजत् प्रजापतिर्ब्रह्मा ॥ १९ ॥

यो ब्रह्मणा कृतः प्रजासर्गः तमबृंहितमपूर्णं दृष्ट्वा ब्रह्मानुज्ञया विन्ध्यगिरेः पादान् प्रत्यन्तपर्वतानुपगम्य तपोऽचरत् स प्राचेतसो दक्षः यो मनसासृजत् स तपोऽचरदित्येकवाक्यं वा ॥ २० ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पित्रादिभिर्जुष्टं सतां मार्गम् । उपशममातिष्ठत ॥ ११ ॥

यूयं हि प्रजापालकाः द्रुमादयः प्रजाः प्रजोपजीव्याश्चेत्येतान् पालयत । नहि पालकानां नाशकत्वं दृष्टमित्यत्र दृष्टान्तपञ्चकमाह । तोकानां बालानां स्त्रियाः पतिर्भर्त्ता प्रजानां पतिर्नृपः ॥ १२ ॥

ईश्वराधिष्ठानत्वाच्च भूतद्रोहो न युक्त इत्याह । अन्तरिति । यो युष्माभिरेवं सर्वभूतदययैव असावीश्वरस्तोषित इति किं न स्मरथेति भावः ॥ १३ ॥

ननु कोपकाले कुत एतावान् विचारस्तत्राह । य इति । आकाशादिव देहे समुत्पतितमाकस्मिकमित्यर्थः । आत्मनो जिज्ञासया विचारेण यच्छेत् उपशमयेत् स गुणानिति अन्यथा यूयं गुणैरेव ग्रस्ता भविष्यथेति सामोक्त्या भेदश्च ध्वनितः ॥ १४ ॥

भेदेनाप्युपशमाभावमालक्ष्य दानमाह । अलमिति । खिलानां शेषाणां वार्क्षी वृक्षैः पालितत्वाद्वृक्षकन्या ॥ १५ ॥

तत्राघमर्षणं नाम तीर्थं पापहरं परम् ।
उपस्पृश्यानुसवनं तपसाऽतोषयद्धरिम् ॥ २१ ॥
अस्तौषीद्धंसगुह्येन भगवन्तमधोक्षजम् ।
तुभ्यं तदभिधास्यामि कस्यातुष्यद्यतो हरिः ॥ २२ ॥

॥ प्रजापतिरुवाच ॥

नमः परायावितथानुभूतये गुणत्रयाभासनिमित्तबन्धवे ।
अदृष्टधाम्ने गुणतत्त्वबुद्धिभिर्निवृत्तमानाय दधे स्वयम्भुवे ॥ २३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आप्सरसीम् अप्सरसः प्रम्लोचायाः सुताम् ॥ १६ ॥

समसर्वाक्षिति इत्यस्य स्वायम्भुवमनुवंश्यत्वात् स्वायम्भुवे मन्वन्तरे जन्म यस्य प्रजाविसर्गेणेति प्रजाविसर्गस्त्वस्य चाक्षुष एव

चाक्षुषे त्वन्तरे प्राप्ते प्राक्सर्गे कालविद्रुते ।
यः ससर्ज प्रजा इष्टाः स दक्षो दैवचोदितः ॥

इति चतुर्थोक्तेः । तस्मान्मध्ये मन्वन्तरपञ्चकमभिव्याप्यास्य तप एव पौर्वकालिकैश्वर्यप्राप्त्यर्थकमवगम्यते ॥ १७ ॥

दुहितृवत्सलः इति पुत्रवंशाभावः सूचितः ॥ १८ ॥ १९ ॥

प्रजापतिर्दक्षः विन्ध्यस्य पादान् प्रत्यन्तपर्वतान् ॥ २० ॥ २१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वो युष्माकं पित्रादिभिर्जुष्टं सेवितं सतां मार्गमुपशमात्मक-मातिष्ठत आश्रयत दीपितं कोपं यच्छतोपसंहरत ॥ ११ ॥

लोकानां बालानां बन्धुः सहायः सुहृत् सखा ॥ १२ ॥

भगवत्परितोषार्थं सर्वेषु भगवदधिष्ठितेषु सहायभाव एव कर्तव्यो न द्रोह इत्याह । अन्तरिति । वो युष्माभिः ॥ १३ ॥

यः आकाशाद्धृदयाकाशात् देहे समुत्पतितं मन्युं नियच्छेदुपसंहरेत् स आत्मजिज्ञासया परमेश्वरोपासनया गुणान् अतिवर्तते त्रिगुणं प्रपञ्चमतिक्रम्य मुक्तो भवतीत्यर्थः ॥ १४ ॥

खिलानामवशिष्टानां वो युष्मत्तः शिवमस्तु वार्क्षी वृक्षैः पालिता युष्माभिः पत्नीत्वे प्रतिगृह्यताम् ॥ १५ ॥

इत्येवमामन्त्र्य सान्त्वयित्वा आप्सरसीं प्रम्लोचासुतां दत्वा ययौ स्वस्थानमगात् ॥ १६ ॥ १७ ॥

रेतसा वीर्येण मनसा सङ्कल्पमात्रेण मम मत्तः ॥ १८ ॥

प्रजापतिर्दक्षः पूर्वं मनसैवासृजत् ॥ १९ ॥

तं प्रजासर्गमबृंहितमसंवृद्धमालोक्य विन्ध्यस्य पादान् अवयवभूतान् पर्वतान् ॥ २० ॥

भाषा टीका ।

सत्पुरुषों के मार्गमे स्थिति करो प्रदीपित कोपको शान्तकरो तुमारे पिता पितामह प्रपितामहने जिस मार्ग का सेवन किया है तिसी मार्ग को तुम सेवन करो ॥ ११ ॥

बालकों के बन्धु मातापिता होते हैं नेत्रके बन्धु पखुना होते हैं स्त्री का बन्धु पति होता है प्रजाओं का बन्धु नृप होता है भिक्षुकों का बन्धु गृहस्थ होता है अज्ञानियोंका बन्धु ज्ञानी होता है ॥ १२ ॥

सब देहों के भीतर मे ईश्वर हरि आत्मा हैं सब जीवों को भगवान् का स्थान जानोगे तव भगवान् सन्तुष्ट हो जांयगे ॥ १३ ॥

जो पुरुष देह आकाश के मध्यमे से उत्पन्न भये क्रोध को आत्मज्ञान से निवारण करदेता है उस के तीनों गुणो के दोष छूट जाते हैं ॥ १४ ॥

अब इन वृक्षों को मत जलाओ ये अतिदुखी हैं बांकी जो बचे हैं इन से आप का भी कल्याण होगा इन वृक्षों की एक सुन्दर कन्या है तिसको तुम पत्नी रूप से ग्रहण करो ॥ १५ ॥

हे नृप ! इस प्रकार से उनको कहकर उत्तम रूपवती अप्सरा की कन्या को उन्हे देकर सोम राजा चले गये उनने धर्मकी रीति से उसका विवाह किया ॥ १६ ॥

उन प्रचेतों मे से तिस कन्या मे दक्ष नामक पुत्र उत्पन्न भया जिसके प्रजासृष्टि करने से तीनों लोक भर गये ॥ १७ ॥

जिस प्रकार से पुत्रियों के प्रेमी दक्ष ने सब भूतों को पैदा किया वीर्य से या मन से तिसको तुम सावधानता से सुनो ॥ १८ ॥

प्रजापति ने पहिले मनहीं से इन प्रजाओं को सृजा है देवता असुर मनुष्य आकाशचारी पृथिवीचारी जलचर इन सबों को पैदा किया है ॥ १९ ॥

प्रजापतिने उस प्रजा की सृष्टि को नहीं बढती हुई देख कर विन्ध्य पर्वत के नीचे स्थल मे जाकर अतिकठिन तप का प्रारंभ किया ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हंसगुह्याख्येन स्तोत्रेण कस्य दक्षस्य ॥ २२ ॥

पराय सर्वोत्तमाय नमो दधे नमनं करोमि । परत्वे हेतुः । अवितथा अनुभूतिश्चिच्छक्तिर्यस्य अतो गुणत्रयाभासो जीवो निमित्तं माया च तयोर्बन्धवे नियन्त्रे एवमपि गुणेषु तत्त्वबुद्धिर्येषां तैर्जीवैरदृष्टं धाम स्वरूपं यस्य । तत्र हेतुः । निवृत्तं मानं यस्मात् पाठान्तरे निवृत्तं निरस्तं मानमवधिश्च यस्मात्

न यस्य सख्यं पुरुषोऽवैति सख्युः सखा वसन् संवसतः पुरेऽस्मिन् ।
गुणो यथा गुणिनो व्यक्तदृष्टेस्तस्मै महेशाय नमस्करोमि ॥ २४ ॥
देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः परं यत् ।
सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे ॥ २५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तर्हि कथं तस्य सिद्धिरत आह । स्वयम्भुवे स्वप्रकाशाय ॥ २३ ॥

अदृष्टधामत्वं दर्शयन्नाह । नेति । पुरुषः सखा जीवोऽस्मिन् पुरे देहे वसन्नप्यत्रैव संवसतः सख्युर्यस्य सख्यं करणप्रवर्तकत्वादिकं नावैति न जानाति तस्मै कुतः व्यक्तदृष्टेः प्रपञ्चद्रष्टुः न हि द्रष्टा दृश्यो भवतीति । प्रथमान्तपाठे व्यक्ते प्रपञ्च एव दृष्टिर्यस्य सः गुणो विषयो गुणिनो विषयिण इन्द्रियादेः सख्यं प्रकाशकत्वं यथा न वेत्ति तद्वत् ॥ २४ ॥

ननु गुणो जडत्वान्न जानातीति जीवस्तु चेतनः किमिति न जानात्यत आह । देह इति । देहश्चासवश्च प्राणा अक्षाणीन्द्रियाणि मनवश्चान्तःकरणानि भूतानि च मात्राश्च तन्मात्राण्येतान्नात्मानं स्वरूपं दृश्यसन्यमिन्द्रियवर्गं तयोः परं दैवतावर्गं च न विदुः पुमान् जीवस्तु सर्वमेतत्त्रयं वेद गुणांश्च तन्मूलभूतान् वेद तज्ज्ञोऽपि सन् यं सर्वज्ञं न वेद तमनन्तमीडे स्तौमि ॥२५॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र विन्ध्यपादेषु त्रिकालमघमर्षणाख्यं पापहरं पुण्यं तीर्थमुपस्पृश्य तत्र स्नात्वेत्यर्थः तपसा हरिमतोषयदाराधितवान् ॥२१॥

तथा भगवन्तमधोक्षजं हंसगुह्याख्येन स्तोत्रेणास्तौषीत्तदेव स्तोत्रं तुभ्यमभिधास्यामि स्तोत्रं विशिनष्टि । यतो येन स्तोत्रेण हरिः कस्य प्रजापतेर्दक्षस्यातुष्यत्तुष्टोऽभूत् । प्रसन्नोऽभूदित्यर्थः ॥ २२ ॥

हंसगुह्याख्यं स्तोत्रमुपदिशति । नमः परायेत्यादिना । स ईश्वरो मे कुरुतान्मनोरथमित्यन्तेन ग्रन्थेन । तत्र प्रथमं प्रकृतिपुरुषविलक्षणं सत्यसङ्कल्पं प्रकृतेर्नियन्तारमपरिच्छिन्नं प्रमाणाशून्यावधिं सर्वकारणं नमस्करोति । पराय चिद्विलक्षणाय तावच्चिदचिद्व्यावर्त्तकधर्मयोगमाह । अवितथानुभूतये इति । अवितथाऽमोघाऽनुभूतिः सङ्कल्परूपात्मकं ज्ञानं यस्य सत्यसङ्कल्पायेत्यर्थः । जीवस्त्वसत्यसङ्कल्प इति ततः तेनास्य व्यावृत्तिः अचिद्व्यावर्त्तकधर्ममाह । गुणत्रयाभासनिमित्तबन्धवे गुणत्रयाभासः सत्त्वादिगुणत्रयोन्मेषस्तस्य निमित्तं कारणं प्रकृतिः तस्या बन्धवे आश्रयभूताय प्रकृतिशरीरकाय तन्नियन्त्रे इत्यर्थः अनेनाचितोऽस्य व्यावृत्तिः एवं पदद्वयेन चिदचिद्व्यावृत्तिः । नन्वयं प्रजापतिवाक्योदितानिर्मूलसत्यसङ्कल्पः प्रकृतिविमुक्तः किं मुक्तो जीवः नेत्याह । गुणतत्त्वबुद्धिभिर्गुणात्मककार्यभूतपृथिव्यादितत्त्वविषयबुद्धिभिरदृष्टमनुपलक्षितं धाम स्वरूपं यस्य मुक्तस्तु संसारदशायां पृथिव्यादिसङ्घातपरिणामभूतशरीरविषयबुद्धिभिर्देवोऽयं मनुष्योऽयमित्युपलक्षित इति ततोऽस्यतनैव व्यावृत्तिः तर्हि किं नित्यसिद्धः नेत्याह । निरुक्तं मानं यस्मात्तिरुत्तमानः तादृशोऽवधिरियत्ता यस्य स तथोक्तः प्रमाणाशून्यावधये त्रिविधपरिच्छेदरहितस्वरूपायेत्यर्थः । नित्यसिद्धस्तु जीवः स्वरूपतः परिच्छिन्नः इति ततः तेनास्य व्यावृत्तिः स्वयम्भुवे स्वयं कारणान्तरशून्याय सर्वकारणायेति भावः ॥ २३ ॥

गुणत्रयाभासनिमित्तबन्धवे इत्यनेनाचिदाश्रयत्वमुक्तमथ चेतनबन्धुत्वमाह । न यस्येति । पुरे देहे संवसतः जीवान्तरात्मतया वसतः सख्युर्हितैककारिणः । यस्य परमात्मनः सख्यं तच्छेषभावं पुरुषो नावैति । गुणिनो रूपादिर्गुणा इव प्रभादिवत् अपृथक्सिद्धप्रकारभूतो वसन् तद्वार्यत्वेन वसन् सखा तद्गतातिशयाधानैकस्वरूपतया मित्रमयं पुरुषः नावैति नानुसन्धत्ते इत्यर्थः । तत्र हेतुरव्यक्तदृष्टिः । देहगोचरज्ञानः तस्मै सख्ये परमपुरुषाय नमस्करोमि । "द्वा सुपर्णा" इति श्रुत्यर्थोऽत्र विवक्षितः ॥ २४ ॥

नावैतीत्येतत् प्रपञ्चयति । देह इति । देहश्चासव इन्द्रियाणि प्राणा वा मनसः मनोवृत्तयः ज्ञानेन्द्रियाणि वा भूतानि पृथिव्यादीनि मात्रा गन्धादीनि तद्ग्राहकाणि कर्मेन्द्रियाणि वा एताः आत्मानं स्वस्वरूपं परं स्वेभ्यः विलक्षणमन्यं जीवात्मानं न विदुः पुमान् जीवस्तु यत् सर्वं देहादिकं तद्वेद जानातीत्यर्थः एवं तत्तज्ज्ञो देहाद्यभिज्ञोऽपि जीवः देहादिकं स्वगुणान् स्वात्मानं च जानाति तं भगवन्तं सर्वज्ञं तद्गुणांश्च न वेद तमनन्तमपरिच्छिन्नमीडे स्तौमि देहादयो दृष्टान्तार्थमुपात्ताः यथा देहादयः स्वस्वरूपं तस्माद्विलक्षणं जीवात्मानं च न विदुरेवं पुमान् देहाद्यभिज्ञोऽपि सर्वज्ञं तद्गुणांश्च न वेदेत्यर्थः ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नाम्ना हंसगुह्येन स्तोत्रेण कस्य दक्षस्य यतो येन ॥ २२ ॥

सर्वनामसंज्ञाभावाल्लोकवैलक्षण्यप्रदर्शनाय पराय नम इत्यन्वयः परत्वमुपपादयति । अवितथेत्यादिना । अवितथा यथार्था कालप्रतिहतानुभूतिर्यस्य स तथा तस्मै सत्यज्ञानाय "सत्यं ज्ञानम्" इति श्रुतेः गुणत्रयेणाभासः सृष्टिस्तन्निमित्तयोः प्रकृतिपुरुषयोर्बन्धुभूताय तत्र स्थित्वा ताभ्यां सृष्टौ प्रवर्तमानाय गुणत्रयप्रतीतिनिमित्ताऽव्यक्ताश्रयाय वा [१] "सतो बन्धुमसति निरविन्दन्" इति श्रुतेः गुणेषु शब्दादिविषयेषु यथार्थबुद्धिर्येषां ते तथा तैर्बहिर्मुखैरदृष्टधाम्ने ऽज्ञातस्वरूपाय "न चक्षुषा पश्यति कश्चिदेनम्" इति श्रुतेः निवृत्तो मानावधिः परिमाणलक्षणोपसा यस्मात् स तथा तस्मै "अनन्तं ब्रह्म" इति श्रुतेः जन्मादिमतः कथमनन्तत्वमिति तत्राह । स्वयंभुव इति । स्वयम्भुवे स्वतः सिद्धाय "स भगवान् कस्मिन् प्रतिष्ठित इति स्वे महिम्नि" इति श्रुतेः ॥२३॥

[१] सतः मुख्यप्रमाणस्य बन्धुं हरिं असतिप्रलये नितरां आपुरिति श्रुत्यर्थः ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गुणतत्त्वबुद्धिभिरदृष्टधाम्न इत्येतदुपपादयति । न यस्येति । अयं पुरुषो यस्य सख्यं न वेत्ति तस्मै महेशाय शिवादस्युत्तमाय नमस्करोमीत्यन्वयः । कीदृशस्य अस्मिन् पुरे शरीरे सवसतः स्वयं च सहैव वसन् "तद्दूरे तदन्तिके„ इतिश्रुतेः सख्युः सखेत्येतदेकस्मिन् पुरे वर्तमानत्वादुभयोः समम् । "द्वा सुपर्णा सयुजा सखाया समानं वृक्षम्" इति श्रुतेः । अत्र दृष्टान्तमाह । गुण इति । यथा कश्चित्पुरतःस्थितोऽपि गुणभूतो भृत्यः गुणिनः प्रधानभूतस्य राज्ञो ममासौ सखेति गम्भीरेण राज्ञा चिन्तितं सख्यं न वेत्ति । कुतोऽत्राह । अव्यक्तेति । अस्पष्टदृष्टिः भृत्यस्य स्थूलज्ञानत्वात् राज्ञः । सूक्ष्मदृष्टित्वादित्यर्थः गुणो रूपादिर्गुणिनो द्रव्यस्य सम्बन्धं यथा न वेत्ति । कुतः अव्यक्तदृष्टिः दृष्टिरहितत्वाज्जडत्वादित्येतदपव्याख्यानम्

यथा राज्ञः प्रियत्वं तु भृत्यो वेद न चात्मनः ।
तथा जीवो न यत्सख्यं वेत्ति तस्मै नमोऽस्तु ते ॥

इत्यनेनापहस्तितमिति ज्ञातव्यम् ॥ २४ ॥

मुह्यन्ति यं सूरय इति यदुक्तं तदधुना स्पष्टयति । देह इति । "ता आप ऐक्षन्त" इत्यादिवद्देहादीनां जडानां ज्ञातृत्वादिधर्मानुपपत्त्या तद्व्यतिरिक्तः कश्चित् ज्ञानाश्रयोऽङ्गीकर्तव्यः जीवस्य ज्ञानाश्रयत्वेऽपि सम्यक्स्वपरवेदनासामर्थ्यस्य प्रत्यक्षत्वेन परस्य हरेस्तज्ज्ञानाविषयत्ववर्णनेन माहात्म्यमाविर्भूतं न स्यादिति कश्चिद्विशिष्टः सर्वज्ञोऽपेक्षितस्तस्य सर्वज्ञत्वविशिष्टान्यसद्भावे घटते तेनान्यैश्च सम्भूयाप्यवेद्यमहिमा हरिरित्यनेन हरेर्निरतिशयमाहात्म्यं विज्ञातं स्यादिति तदर्थं देहादिशब्देन तदभिमानित्वेन ते लक्ष्यन्ते संबन्धात्तथाहि प्रधानाभिमानित्वाद्वैश्रवणादयो देहादय इति समानाधिकरण्येनोच्यन्ते नतु तादात्म्यात् देहः अभिमानी वैश्रवणः असवः प्राणाभिमानिनो मरुतः अक्षा इन्द्रियाणि तदभिमानिनः इन्द्राग्निवरुणादय मनश्च इति मनसोऽन्तःकरणस्य वृत्तिबाहुल्याद्बहुवचनं तस्याभिमानी रुद्रः भूतानामभिमानिनः पृथिव्याद्याः सुपर्णाद्याः वा मात्राः शब्दादयः तद्देवताः रुद्रसूनवः सौपर्णाद्या वा इत्येते देवाः वैश्रवणाद्याः आत्मानं स्वस्वरूपमन्यं स्वव्यतिरिक्तं प्रपञ्चं न विदुः यदुभयस्मात् परमुत्तमं ब्रह्म तन्न विदुरिति किमुत तत्प्रसादमन्तरेणेति शेषः पुमान् जीवाभिमानी ब्रह्मा स्वात्मानं प्रपञ्चं चेति सर्वं वेद न केवलं तावदेव किन्तु तत्तद्वस्तुसमवेतगुणांश्च शब्दांस्तद्विशेषांश्च क्रियादींश्च वेद तर्हि परमात्मानं वेद किं नेत्याह । तज्ज्ञ इति । तानि सर्वाणि जानातीति तज्ज्ञोऽपि ब्रह्मा तं सर्वज्ञं हरिं न वेद यथासौ हरिः स्वात्मानं स्वव्यतिरिक्तं सर्वं वेत्ति तथेति शेषः तर्ह्यसौ स्वपरिच्छेद्यत्वेन परिमितः किं नेत्याह । अनन्तमिति । अनन्तमात्मानमपरिच्छेद्यत्वेन ज्ञातारं तस्य ज्ञानस्य यथार्थत्वादतः स एव सर्वमुख्यः सर्वज्ञो न ब्रह्मेति "तद्ब्रह्मावेत् अहं ब्रह्मास्मि" इति श्रुतिः विष्णोर्नु कं वीर्याणि इति श्रुतिश्च एवंविधं परमात्मानमीड इत्यन्वयः एतत् सर्वं

(१) देहा भिमानी वैश्रवणो मरुतः प्राणमानिनः ।
इन्द्राद्या इन्द्रियात्मानो रुद्रोऽन्तःकरणात्मकः ।

नैते विदन्ति स्वात्मानं परं चापि विमोहिताः
जीवाभिमानी ब्रह्मा तु सर्वं वेद प्रजापतिः ।
सोऽपि वेद हरिं नैव सम्यक्सैव हि सर्ववित् ।

इत्यनेन सिद्धम् ॥ २५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

परापरकामेन निष्कामेण वा परमेश्वर एव भजनीयो नान्यस्तस्य मायाजीववशीकारिशक्तित्वादन्यस्य तन्मायाधीनतुच्छशक्तित्वादिति । स्ववाञ्छासिद्धिकैमुत्यं दर्शयंस्तदर्थं स्तुतिविशेषेणोपतिष्ठते । नम इति । अवितथेत्यव्यभिचारज्ञानेच्छाशक्ती दर्शिते । गुणत्रयेति । तादृशक्रियाशक्तिर्दर्शिता जीवमायानियन्तृत्वात्तासां तादृशशक्तीनां तत्तद्गतत्वेन स्वरूपभूतत्वं च तथापि गुणेषु सत्त्वादिष्वेव तत्त्वबुद्धिः कारणज्ञानं येषां तैरदृष्टं तर्कयितुमशक्यं किमुतानुभवितुमशक्यं धाम तादृशशक्तिप्रकाशोऽपि किमुत स्वरूपतत्पूर्णशक्ति यस्य तस्मै सर्वत्र हेतुः स्वप्रकाशायेति । गुणत्रयस्याभासः स्वाज्ञानेनारोपो यस्मिन् स जीव इति जीवस्य चिद्रूपत्वे तद्वदज्ञानस्पृष्टत्वाभासतो निकर्ष एव व्यक्तीकृतः । रश्मिस्थानीयत्वात्तस्य ॥ २३—२४ ॥

देहेति । अन्यं देवतावर्गं परं पुमांसञ्च ॥ २५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

हंसगुह्येन स्तोत्रेण पूर्वसिद्धेनैव निगमेन न तु दक्षकृतेनेत्यर्थः कस्य दक्षस्य ॥ २२ ॥

पराय जीवमायोभायिकेभ्य इत्यर्थः । कुतः अवितथानुभूतये सत्यानुभवाय गुणत्रयाभासो जीवः निमित्तं माया तयोर्बन्धवे एवमपि गुणेषु तत्त्वबुद्धिर्येषां तैर्जीवैरदृष्टस्वरूपाय । तद्भिन्नैरपि सम्यगनवगम्यधामेत्याह निवृत्तो मानावधिः परिमाणसीमा यस्य तस्मै नह्येतावद्गुणरूपैश्वर्यकः परमेश्वर इति कोऽपि वक्तुं शक्नोतीति भावः । यदुक्तं ब्रह्मणा "गुणात्मनस्तेऽपि गुणान् विमातुं हितावतीर्णस्य क ईशिरेऽस्य" इति । निवृत्तमानाय दधे इति पाठे मानो ज्ञानं दधे करोमि तदा नम इति कर्म पदं तर्हि कथं तस्य सिद्धिस्तत्राह । स्वयम्भुवे स्वप्रकाशाय ॥ २३ ॥

अदृष्टधामत्वमुपपादयति । नेति । यस्य परमात्मनः सख्यं करणप्रवर्त्तकत्वादिकं पुरुषो जीवो नावैति न जानाति अस्मिन्नेव पुरे देहे वसतोऽपि सख्युरपि आत्मारामत्वेऽपि सख्यादेव तत्कामितान् विषयान् भोजयितुः स्वयं सखापि तस्य तत्तत्सख्यमनुभवन्नपि अत्रैव देहे वसन्नपि नैव वेद व्यक्तदृष्टेरिति षष्ठ्यन्तपाठे बुद्धीन्द्रियादिप्रकाशादेव यद्विषयकं ज्ञानं व्यक्तमेव तस्यापीश्वरस्य प्रथमान्तपाठे तस्मादेव हेतोर्यत्कर्तृकं ज्ञानं व्यक्तमेव सोऽपि जीवः गुणाः शब्दस्पर्शादिर्यथा गुणिनः श्रोत्रादेरिन्द्रियस्य सख्यं स्वमाधुर्यादिज्ञापनलक्षणं न वेत्ति तद्वत् ॥ २४ ॥

ननु गुणो जडत्वान्न जानातु जीवस्तु चेतनः कथं न जानाति तत्र सर्वत्र चेतनोऽपि परमेश्वरे त्वचेतन एवेत्याह । देहश्च तत्रस्था असवः प्राणाश्च अक्षा इन्द्रियाणि च मनश्चान्तःकरणानि च भूतानि पृथिव्यादीनि च मात्राः शब्दादयश्च आत्मानं

---

(१) देहादयो न विदुरित्यत्र देहादीनां जडत्वेन तत्र ज्ञानप्रसक्तेरभावान्न विदुरिति असङ्गतमित्यतोऽत्र देहादिशब्दविवक्षितार्थप्रमाणेनाह । देह मानीत्यादिना ।

यद्योपरामो मनसो नामरूपरूपस्य दृष्टस्मृतिसंप्रमोषात्।
य ईयते केवलया स्वसंस्थया हंसाय तस्मै शुचिसद्मने नमः ॥ २६ ॥
मनीषिणोऽन्तर्हृदि संनिवेशितं स्वशक्तिभिर्नवभिश्च त्रिवृद्भिः।
वह्निं यथा दारुणि पाञ्चदश्यं मनीषया निष्कर्षन्ति गूढम् ॥ २७ ॥
स वै ममाशेषविशेषमायानिषेधनिर्वाणसुखानुभूतिः।
स सर्वनामा स च विश्वरूपः प्रसीदतामनिरुक्तात्मशक्तिः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

स्वस्वरूपम् आत्मनां मध्ये अन्यमन्यस्वरूपम आत्मभ्यः सर्वेभ्य एव परं जीवस्वरूपञ्च न विदुः। पुमान् जीवस्तु चेतनत्वात् सर्वम् आत्मानं देहादीन् गुणान् सत्त्वादीन्मूलभूतांश्च वेद जीवन्मुक्तत्वदशायां तं परमात्मानञ्च जानातीति तज्ज्ञः। तदपि सर्वज्ञं परमेश्वरं न वेद। ननु तज्ज्ञ इति ब्रूषे तदपि न वेदेति कुतस्तत्राह। अनन्तम् अप्राकृतगुणानामनन्तानामज्ञानात्तदप्यज्ञानमेव यदुक्तम् "द्युपतय एव ते न ययुरन्तमनन्ततया" इति ॥ २५ ॥

आत्मानं स्वस्वरूपं न विदुः अन्यं स्वविलक्षणं परं देहेन्द्रियादिभ्यः श्रेष्ठं ज्ञानस्वरूपं यत्तत्त्वं जीवाख्यं तत्कुतो विदुः अचेतनत्वान्नैव विदुरित्यर्थः। पुमान् गुणतत्त्वबुद्धिर्नित्यबद्धो जीवः यतो ज्ञः ज्ञाता तत्तत्सर्वं सुखदुःखादिकं गुणान् विषयांश्च वेद अनन्तं परमात्मानं न वेद अहो तस्याभाग्यम् ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

तत्र विन्ध्यपादेषु ॥ २१ ॥

तद्धंसगुह्याख्यं स्तोत्रं यतो येन स्तोत्रेण कस्य दक्षस्य अतुष्यत्तुष्टोऽभूत् ॥ २२ ॥

पराय चेतनाचेतनेभ्यो विलक्षणाय नमः तत्राचेतनेभ्यः प्रकृतिकालादिभ्यः वैलक्षण्यमाह। गुणत्रयाभासनिमित्तबन्धवे इति। गुणत्रयस्य आभास उन्मेषो यस्मात्तत् प्राधानं निमित्तं कालस्तयोः प्रकृतिकालयोर्बन्धवे नियन्त्रे अणुपरिमाणकेभ्यश्चेतनेभ्यो वैलक्षण्यमाह। निवृत्तमानावधये इति। निवृत्तो मानावधिः स्वरूपगुणपरिमाणसीमा यस्मात्तस्मै मुमुक्षुभ्यो ज्ञानप्रदोऽयमित्याह। अवितथा सत्यफला अनुभूतिरुपासकस्य यस्मात्तस्मै "ददामि बुद्धियोगन्तं येन मामुपयान्ति ते" इति श्रीमुखवचनात् नित्यबद्धानां बुभुक्षूणां दुर्ज्ञेयोऽयमित्याह। गुणतत्त्वबुद्धिभिः गुणाः विषया एव तत्त्वमिति बुद्धिर्येषां तैरदृष्टधाम्ने दुर्ज्ञेयस्वरूपाय अनन्यसिद्धत्वमाह। स्वयम्भुवे इति ॥ २३ ॥

बुभुक्षुजीवस्य कृतघ्नत्वमाह। पुरुषो भगवद्बहिर्मुखो जीवः पुरे देहे वसन्नपि यस्य अस्मिन्नेव पुरे सख्यग् वसतः सख्युर्हितकारिणः सख्यं हितकारित्वं स्थितिप्रवृत्त्यादिप्रदत्वं नावैति तस्मै नमस्करोमि कुत इत्यत्र हेतुगर्भविशेषणं व्यक्तदृष्टिः व्यक्ते संसारे एव दृष्टिर्यस्य सः यथा गुणो गुणकार्य्यो देहः गुणिनः देहिनः धारकत्वप्रकाशकत्वादिकं नावैति तद्वदयं भावः यथा देहस्य जडत्वाज्जीवस्वरूपगुणादिज्ञाने सर्वदायोग्यता तथा नित्यबद्धस्य संसारासक्तस्य जीवस्य चेतनत्वेऽपि भगवत्स्वरूपगुणादिज्ञानेऽयोग्यतेति ॥ २४ ॥

एतदेव वर्णयन्नित्यबद्धजीवदुर्ज्ञेयं भगवन्तं सर्वज्ञतया स्तौति। देह इति। सर्वज्ञमीडे स्तौमि असवः इन्द्रियाणि मनवः मनोबुद्धिचित्ताहङ्काराः भूतान्याकाशादीनि मात्राश्च शब्दादितन्मात्राणि।

भाषा टीका।

वहां पर पाप नाश करने वाला अघमर्षणनामक तीर्थ है तीनों काल वहां स्नानादि करके तपस्या से दक्षजी ने भगवान् का स्तुति किया ॥ २१ ॥

अधोक्षज भगवान् को हंसगुह्य स्तोत्र से उनने स्तुति किया सो हम तुमसे कहेंगे जैसें कि भगवान् दक्ष प्रजापति पर सन्तुष्ट भये हैं ॥ २२ ॥

दक्ष प्रजापति बोले यथार्थ ज्ञानवाले तीनों गुणों के आभास निमित्त जीव माया इनों के बन्धु आपके अर्थ नमस्कार है गुणविषयो में यथार्थ बुद्धि रखने वाले आपके स्वरूप को नहीं जानते हैं आप सब परिमाणों से रहित हैं आप स्वयंभू हैं आपके अर्थ नमस्कार है ॥ २३ ॥

इस शरीर में निवास करने वाला सखा जीव जिस परमेश्वरसखा के सखाभाव को नहीं जानता है जैसें कि रूपादिक प्रकाशक चक्षु आदि के प्रकाशकपन को नहीं जानते हैं जो प्रपंच के देखने वाले हैं तिन आपके अर्थ नमस्कार है ॥ २४ ॥

देह प्राण इंद्रिय अंतःकरण पंचभूत तन्मात्रा ए सब अपने को भी नहीं जानते हैं दूसर को भी नहीं जानते हैं पुरुष जीव तो इन सबों को जानता है परंतु वह जीव भी जिनको नहीं जानता है तिन सर्वज्ञ अनंत आपको मै स्तुति करता हूं ॥ २५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अदृष्टधामत्वमुक्त्वा स्वप्रकाशत्वमाह। यदा मनस उपरामः समाधिर्न तु सुषुप्तविवक्षयो न च जाग्रत्स्वप्नयोरिव विक्षेपः तदाह। नामरूपे रूप्येते येन तत्तथा तस्य उपरामे हेतुः दृष्टं दर्शनं स्मृतिश्च तयोः सम्प्रमोषान्नाशात् तदा यः केवलेन स्वरूपज्ञानेन प्रतीयते तस्मै हंसाय शुद्धाय शुचि शुद्धं मनः सद्म प्रतीतिस्थानं यस्य तस्मै नमः ॥ २६ ॥

एवम्भूतः केषां प्रतीयत इत्यपेक्षायामाह। मनीषिण इति।

यद्यन्निरुक्तं वचसा निरूपितं धियाक्षभिर्वा मनसा वोत यस्य ।
माभूत् स्वरूपं गुणरूपं हि तत्तत् स वै गुणापायविसर्गलक्षणः ॥ २९ ॥
यस्मिन् यतो येन च यस्य यस्मै यद्यो यथा कुरुते कार्यते च ।
परावरेषां परमं प्राक् प्रसिद्धं तद्ब्रह्म तद्धेतुरनन्यदेकम् ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

क्षाभ्याम् । विवेकिनो यं निष्कर्षन्ति विविच्य ध्यायन्ति स निर्वाणसुखानुभूतिर्मम प्रसीदतामिति द्वयोरन्वयः । एवं निष्कर्षतां प्रतीयत इति भावः । किमिति निष्कर्षन्ति स्वशक्तिभिर्गूढमप्रकाशमानं कतिभिर्नवभिः पुनश्च त्रिवृद्धिः त्रिगुणाभिः सप्तविंशत्युपाधिभिर्गूढमष्टाविंशं निष्कर्षन्तीत्यर्थः । यद्वा नवभिः प्रकृतिपुरुषमहदहङ्कारपञ्चतन्मात्ररूपाभिः । त्रिवृद्धिस्त्रिगुणात्मिकाभिः चकारात्षोडशविकाररूपाभिश्च । कथम्भूतं निष्कर्षन्ति मनीषयान्तर्हृदि सन्निवेशितं निश्चलीकृतं पाञ्चदश्यं पञ्चदशसामिधेनीमन्त्रैः प्रकाश्यमलौकिकं वह्निमिवाहङ्कारास्पदादात्मनोऽन्यं परमात्मानं निष्कर्षन्तीत्यर्थः ॥ २७ ॥

अशेषा विशेषा यस्यास्तस्या मायाया निषेधेन निर्वाणसुखेऽनुभूतिर्यस्य अप्रसक्तनिषेधासम्भवात्प्रसक्तिमाह । स एव सर्वनामा स एव विश्वरूप इति । तद्रूपत्वेऽपि वास्तवत्वाभावान्निषेधः सम्भवतीत्याह । अनिरुक्ता आत्मनि शक्तिर्माया यस्य सः ॥२८॥

ननु यदि केवलया स्वसंस्थया प्रतीयते तर्हि सर्वनामत्वं विश्वरूपत्वं चानुपपन्नं वागाद्यगोचरत्वादित्याशङ्क्य सर्वैर्नामभिर्वाच्यं प्रत्यक्षादिदृश्यं च तस्य स्वरूपं वस्तुतो माभूत्तथापि मायया घटत इति श्लोकत्रयेणोपपादयन्नमस्करोति । यद्यदिति । यद्यद्वचसा निरुक्तमभिहितं धिया निरूपितं व्यवसितमक्षभिर्वा इन्द्रियैर्निरूपितं गृहीतमुतापि मनसापि निरूपितं सङ्कल्पितं यस्य स्वप्रकाशत्वं तस्य तत्स्वरूपं माभूत् स्वरूपत्वाभावे हेतुः हि यस्मात्तत्तद्गुणानामेव रूपं पाठान्तरे गुणैर्वर्धितम् स तु गुणव्यतिरिक्तः । यतो गुणानामपायविसर्गाभ्यां प्रलयोत्पत्तिभ्यां लक्ष्यत इति तथा चेतनाधिष्ठानं विना तयोरसम्भवात् । यद्वा । यस्य स्वरूपं माभून्न भवति तस्मै नम इति तृतीयेनान्वयः॥२९॥

तदेवं वस्तुतो गुणस्वरूपत्वाभावमङ्गीकृत्यानिरुक्तात्मशक्तिरित्यनेन द्योतितं मायया सर्ववाच्यत्वेन विश्वरूपत्वमाह । यस्मिन्नधिकरणे यतोऽपादानाद्येन करणेन यस्य सम्बन्धि यस्मै सम्प्रदानाय यदीप्सिततमं यः कर्ता कुरुते स्वतन्त्रः कार्यते चान्येन प्रयोज्यकर्त्रा तद्ब्रह्मेति प्रत्येकं सम्बन्धः अत्र च सप्तभिर्यच्छब्दैः सप्तविभक्त्यर्था दर्शिताः यथेति च क्रियाकारकसम्बन्धप्रकारवाचिनामव्ययानामर्थाः कुरुते कार्यते चेति स्वार्थपरार्थक्रियान्वयश्च सर्वेषां दर्शितः । चशब्देन भावकर्मादिविहितप्रत्ययार्थाः सङ्गृहीताः । तद्ब्रह्मैवेति कुतस्तत्राह । तद्धेतुस्तेषां कारणं तत्कुतः सर्वेभ्यः प्राक्प्रसिद्धम् । ननु ब्रह्मादयस्तद्धेतवः श्रूयन्तेऽवरे च दृश्यन्ते तत्कथं ब्रह्मैव तद्धेतुस्तत्राह । परेषामवरेषां च हेतूनां परमं कारणम् । ननु सर्वकारणत्वे तस्य किं नाम सहकारि भवेत्तदानीमन्यस्याभावात् सत्यं निरपेक्षमेव तत्कारणमित्याह । अनन्यद्विजातीयशून्यम् एकं सजातीयशून्यं च तस्मै नम इत्युत्तरेणान्वयः ॥ ३० ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

सर्वज्ञमित्यनेनाभिप्रेतं परमात्मनः सर्वज्ञत्वं जीवस्य परमात्मना संश्लेषदशायामपि तदनभिज्ञतां चोपपादयति । यदेति । नामरूपरूपस्य देवमनुष्यब्राह्मणादिनामरूपकस्य मनसो यदादृष्टिस्मृतिसंप्रमोषाद्दृष्टस्य स्मृतिः स्मरणं स्वप्नावस्थोच्यते तस्याः संप्रमोषान्निवृत्त्योपरामः सुषुप्तिः तदा यः परमात्मा ईयते प्राप्यते जीवेन समन्वितो भवति "प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चनवेद नान्तरम् एष सुप्तेषु जागर्त्ति" इति श्रुत्यर्थोऽत्र विवक्षितः जीवस्याप्रबोधेऽपि परमात्मा प्रबुद्ध इत्यर्थः सर्वथा दुर्ज्ञेयत्वेऽनुपास्यत्वं स्यादिति शङ्कां वारयति । यदेति । केवलया इत्यनुषज्जते यश्च केवलया रागादिकालुष्यरहितया स्वसंस्थया स्वाभाविकज्ञानेनेयतेऽवगम्यते प्राप्यते वा तस्मै हंसाय शुद्धाय शुचिसद्मने शुद्धान्तःकरणसद्मने उपासनविशुद्धान्तःकरणे संनिहितायेत्यर्थः । यद्वा । केवलया स्वसंस्थया हंसाय विशुद्धाय रागाद्यकलुषितेनापरिच्छिन्नानन्दरूपविषयकामित्यासङ्कुचितापरिच्छिन्नधर्मभूतज्ञानेन विशुद्धायास्पृष्टचिदचिद्धर्माय शुचिसद्मने उपासनया परिशुद्धमन्तःकरणं सद्म अभिव्यक्तिस्थानं यस्य तस्मै इत्यर्थः "हंसः शुचिषत्" इति श्रुत्यर्थोऽत्राभिप्रेतः ॥ २६ ॥

शुचिसद्मन इत्येतदेव प्रपञ्चयति । मनीषिण इति । त्रिवृद्भिः त्रयाणां वृद्वर्त्तनं यत्र तास्त्रिवृतस्त्रिकामित्यर्थः तद्रूपाभिस्त्रिकत्रयमापन्नाभिरिति यावत् नवभिः शक्तिभिः । "श्रिया पुष्ट्या गिरा कान्त्या कीर्त्या तुष्ट्येलयोर्जया । विद्ययाविद्यया शक्त्या मायया च निषेवितम्" इति वक्ष्यमाणाभिः शक्तिभिः कार्योपयोग्यपृथक्सिद्धविशेषणरूपाभिः शक्तिभिः सहान्तर्हृदि संनिवेशितं स्वेच्छया संनिविष्टं गूढं बाह्यैः करणैरग्राह्यम् अनेन "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् । अध्यात्मयोगाधिगमेन देवं मत्वा" इति श्रुत्यर्थोऽत्र विवक्षितः दुर्दर्शं मनसा ग्रहीतुमशक्यं गुहायां हृदये निहितं गह्वरे जीवे तिष्ठतीत्यन्तरात्मतयेति तथा यं मनीषिणः परमात्मयाथात्म्यविवेचनकुशलाः मनीषया योगपरिशुद्धया धिया निष्कर्षन्ति प्रकृतिपुरुषाभ्यां विविच्य पश्यन्तीत्यर्थः यथा मथना मथनसाधनेनोत्तरारणिना दारुण्यधस्तनारणौ पाञ्चदश्यमग्निं निष्कर्षन्ति तद्वत्पाञ्चदश्यं पञ्चदशीयकर्मसंबन्धिनं दर्शपूर्णमासानुष्ठानं हि पञ्चदश्युपक्रमसामिधेन्यामपीति वैदिकोऽग्निः पाञ्चदश्य इत्युच्यते यं निष्कर्षन्ति स वा इत्युत्तरेणान्वयः ॥ २७ ॥

एवमुक्तविधं परमात्मानमन्यैश्च तदसाधारणैर्धर्मैर्विशिष्टस्तदनुग्रहं प्रार्थयते । स वा इति । स वै उक्तविधो भगवानशेषाः सर्वे विशेषा विकारा यस्यास्तस्या मायायाः निवृत्त्या याकेवी-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

णासुखं दुःखासंभिन्नं मोक्षसुखं तस्मिन्ननुभूतिरनुभवो यस्य मुक्तानामनुभवविषय इत्यर्थः य ईदृशः स एव सर्वनामा सर्वैः शब्दैर्वाच्य इत्यर्थः सर्वशब्दनाम यस्येति वा "सर्वः शर्वः शिवः स्थाणुः"इतिनाम पाठात् सर्वशब्दप्रवृत्तिनिमित्तपौष्कल्याभय इत्यर्थः सर्वनामत्वे हेतुः स च विश्वरूप इति विश्वशरीरकत्वात् सर्वशब्दवाच्य इति भावः। विश्वान्तर्गतवस्तुवाचिनः शब्दास्तच्छरीरं तमेवाभिदधति शरीरवाचिनां शब्दानां शरीरिपर्यन्तबोधनशक्तेः यद्वा। सर्वशब्दस्य कृत्स्नजगद्वाचित्वात् तस्य च तच्छरीरत्वात्प्रवृत्तिनिमित्तपौष्कल्येन तमेवाभिधत्त इति भावः। ननु विश्वरूपत्वं परगतधर्मासंस्पर्शनं चेति कथमुभयं तत्राह। अनिरुक्तात्मशक्तिः वाङ्मनसापरिच्छेद्याः स्वाभाविक्यः शक्तयो यस्य सः विचित्रशक्तित्वात्तदुभयोपपत्तिरिति भावः। एवंभूतो भगवान् मम प्रसीदतां मामनुगृह्णात्वित्यर्थः॥ २८॥

ननु यदि विश्वं तस्य शरीरं न तु स्वरूपं तर्हि केन लक्ष्यते इत्यत्राह। यद्यदिति। यद्यद्वचसा निरुक्तं शब्देनाभिहितं जातिगुणादिकं प्रवृत्तिनिमित्तीकृत्य शब्देन बोधितं तथा धिया निरूपितं व्यवसितमक्षभिरिन्द्रियैर्गृहीतमुतापि मनसा निरूपितं सङ्कल्पितं यद्यपि यस्य स्वरूपं माभून्न भवति किन्तु शरीरमेवेति भावः। वचआदिभिर्निरुक्तादेस्तत्स्वरूपत्वाभावे हेतुः गुणरूपहेत्विति गुणरूपाः सत्त्वादिगुणात्मका हेतवो यस्य तद्गुणरूपहेतु सत्त्वादिगुणत्रयकार्यं सत्त्वादिगुणगतमेव न तु तत्स्वरूपगतोऽसाधारणो धर्मो येन तदुपलक्ष्यं परमात्मस्वरूपं स्यात् गुणरूपं हि तदिति पाठे हि यस्मात्तद्गुणानामेव रूपं गुणरूपं वर्द्धितमिति पाठान्तरे गुणरूपैः सत्त्वादिगुणगतैरसाधारणाकारैर्वर्धितमारब्धमित्यर्थः तथाप्यसौ परमात्मा गुणापायविसर्गलक्षणः गुणकार्यभूतप्रपञ्चस्य संहारसर्गौ लक्षणं यस्य तथोक्तः अपायविसर्गाभ्यां स्थितिरपि लक्ष्यते यद्यपि कार्यात्मकं जगन्न परमात्मनो लक्षणं तथापि कार्यप्रपञ्चगतोत्पत्तिस्थितिप्रलयकारणत्वं परमात्मनोऽसाधारणो धर्म इति तेन तत्स्वरूपमुपलक्ष्यते इत्यर्थः। प्रपञ्चजन्मादिकारणत्वमपि न परमात्मनः स्वरूपविशेषणतया लक्षणं कारणत्वस्य चिदचिद्विशिष्टब्रह्मनिष्ठत्वेन विशेष्यभूतब्रह्मस्वरूपनिष्ठत्वाभावात्। किं तु चन्द्रादेः शाखाग्रादिवत्तदुपलक्षणतया लक्षणमिति बोध्यम्॥ २९॥

ननु देवमनुष्यादिशरीरनिर्वर्त्यं कर्म तदात्मभूतजीवकर्तृकं तद्बन्धकं च दृष्टं यत्तस्य सुखदुःखादिवच्चेतनधर्मत्वादेवं कृत्स्नं चिदचिदात्मकं जगत् परमात्मनः शरीरञ्चेत्तद्व्यापारोऽप्यनेककारकनिर्वर्त्यः परमात्माश्रय एव स्यादिति तथा सति स बध्येत तथा च "निष्क्रियं निष्कलम्"इत्यादिश्रुतिविरोधः। किञ्चैकस्य चेतनस्यैकदैकमेव शरीरं दृष्टमतः कथमेकस्य परमात्मनो देवमनुष्याद्यनेकानि शरीराणीति न विश्वरूपत्वं परमात्मनः सम्भवति यद्यसौ कारणत्वात् कार्यभूतविश्वरूपः कार्यकारणयोरभेदादित्युच्यते तर्हि वचआदिभिर्निरुक्तादिकं तस्य स्वरूपमेव स्यात् परिणामिकारणस्याधिष्ठात्रपेक्षत्वदर्शनात्तस्याप्यधिष्ठात्रपेक्षेति पूर्वोक्तपरत्वविरोध इत्याद्याशङ्कां निराकरोति। यस्मिन्निति। तावदनेककारकनिर्वर्त्यस्य व्यापारस्य परमात्मायत्तत्वमभ्युपगम्यत एवेति न तच्चोदनीयमित्याह। यस्मिन्निति पूर्वार्धेन। तत्र यस्मिन्नित्यादिभिर्विभक्तिभिरधिकरणोपादानकरणसम्प्रदानकर्मकर्तृशक्तयो विवक्षिताः यस्येति षष्ठ्या तु सम्बन्धसामान्यं कुरुते इति प्रयोजककर्तृशक्तिः कार्यत इति प्रयोज्यकर्तृशक्तिः यदेत्यनेन कालः उक्तशक्तीनां कालोपाधिकत्वात्। यथेति पाठे तूक्तकारकशक्तिगताः प्रकारविशेषा विवक्षिताः क्रियते कार्यते चेति कृञ्धातुना तत्कारकनिष्पाद्या क्रिया विवक्षितेति तत्तत्कारकाश्रयत्वकृताः क्रियागतविशेषा वा निर्दिश्यन्ते यस्मिन्नित्यादीनां तु तदित्युत्तरेणान्वयः सप्तम्यादिविभक्तिप्रकृतिभूतैर्यच्छब्दैस्त्वधिकरणादिकारकशक्त्याश्रयाणि वस्तूनि विवक्षितानि कुरुते कार्यते चेत्यत्र लकारेण प्रयोज्यप्रयोजककर्तृशक्त्याश्रयं द्रव्यमपि विवक्षितं लकाराणां कृतिमत्येव शक्तिरित्यन्यत्र विस्तरः। सुप्तिङन्तस्थले च प्रकृत्यर्थविशेष्यकः शाब्दबोधः। एवं च तत्तद्व्यापारनिर्वर्तकाधिकरणादिशक्त्याश्रयाणि द्रव्याणि सम्बन्धसामान्याश्रयत्वं च तद्ब्रह्मेत्यर्थः शक्त्याश्रयवस्तूनां परमात्मशरीरत्वेन विशेषणत्वात्तस्यैव मुख्यत्वेन कारकशक्त्याश्रयत्वादाधारशक्त्याश्रयत्वात् सर्वस्य व्यापारस्य तदायत्तत्वमुपपन्नमिति भावः। नन्वेवं कारकशक्त्याश्रयत्वप्रयुक्तं परमात्मनः सक्रियत्वं तत्प्रयुक्तं कार्यत्वं तत्प्रयुक्तमनित्यत्वं च प्रसज्येत तथा च "निष्क्रियं निष्कलं नित्यं विभुम्" इत्यादिश्रुतिविरोधः अत आह। प्राक् प्रसिद्धमिति। हेतुरिति च। हेतुः प्राक्प्रसिद्धमित्यनेन कार्यावस्थायाः पूर्वं कारणत्वेनावस्थितत्वमुच्यते। अयं भावः। तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत् अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति"इत्यादिप्रमाणवशात् कार्यस्य जगतः चिदचिदीश्वरात्मकत्वमभ्युपेत्य कार्यसजातीयत्वाच्च कारणस्य तदपि तत्त्वत्रयात्मकमेव युक्तिबलात् "सदेव सोम्येदमग्र आसीत् प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि" इत्यादिप्रमाणबलाच्चाभ्युपगन्तव्यं तत्र कार्यावस्थायां कारणावस्थायां च "यः आत्मनि तिष्ठन् यः पृथिव्यां तिष्ठन् योऽक्षरमन्तरे सञ्चरन् यस्याक्षरं शरीरं योऽव्यक्तमन्तरे सञ्चरन् यस्याव्यक्तं शरीरम्"इत्यादिप्रमाणबलादात्मत्वेन परमात्मनो विशेष्यत्वं चिदचितोः शरीरत्वेन विशेषणत्वं चेषितव्यम्। एवं च कारणत्वेनावस्थितं ब्रह्म सूक्ष्मचिदचिद्विशिष्टं कार्यावस्थायां स्थूलचिदचिद्विशिष्टत्वेनावस्थितमिति कारकशक्त्याश्रयत्वस्य तस्य तस्मिन् शरीरभूतचिदचिदात्मकत्वात्तत्प्रयुक्तं सक्रियत्वादिकमपि सद्वारकमेवेति विशेष्यभूते तस्मिन्न तस्य साक्षात् प्रसङ्गः निष्क्रियत्वादिश्रवणं तु विशेष्यभूतब्रह्मस्वरूपाभिप्रायकमिति न तद्विरोधः। कार्यावस्थकारणावस्थयोस्तस्य चिदचिच्छरीरकत्वादेव विश्वरूपत्वमप्युपपन्नम्। "एषोऽणुरात्मा" इति श्रुतिवशाज्जीवस्याणुपरिमाणत्वावगमात्तस्यैकदानेकशरीरान्तःप्रवेशासम्भवेऽपि "सत्यं ज्ञानमनन्तं ब्रह्म"इत्यादिश्रुत्या तत्स्वरूपस्यापरिच्छिन्नत्वावगमात्तस्यानेकशरीरेषु जीवान्तःप्रवेशेन नियमनं सम्भवतीत्यनेकशरीरकत्वोपपत्तिः कार्यावस्थायां कारणावस्थायां च चिदचिच्छरीरकत्वाद्विश्वरूपत्वमपि तस्योपपन्नम्। ननु विश्वरूपत्वं नाम विश्वं रूपं शरीरं यस्य तस्य भावस्तत्त्वमिति न विवक्षितं तथा सति "सर्वं खल्विदं ब्रह्म ऐतदात्म्यम्" इत्यादिजगद्ब्रह्मतादात्म्यश्रवणविरोधापत्तेः। किं तु विश्वरूपत्वं नाम विश्वानन्यत्वमेव एवं च नमः परायेत्युपक्रान्तपरत्वविरोधस्तत्राह। अनन्यदिति। विश्वानन्यदित्यर्थः विश्वरूपत्वस्य विश्वानन्यात्मकत्वेऽपि न विरोधः। यत्प्राक् प्रसिद्धं कारणं सूक्ष्मचिदचिद्विशिष्टं तदेव कार्यावस्थायां स्थूलचिदचिद्विशिष्टमित्येकस्यैवावस्थाद्वययोगित्वेन कारणावस्थकार्यावस्थयोरैक्यद्रव्यग-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्रैव विश्वानन्यत्वोपपत्तेः अनेनासत्कार्यवादव्युदासः तथाच शारीरकं सूत्रम् । तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ २ ॥ १ ॥ १४॥ इति ।

उपक्रान्तं परत्वं तत्प्रयुक्तं निःसमाभ्यधिकत्वं च विशेष्यनिष्ठमित्यभिप्रायेण परमं परावरेषामिति चोक्तं परावरेषां ब्रह्मादिजीवानामपि परं कारणमात्रस्याधिष्ठातृत्वेनत्वशङ्कां वारयति। एकमिति । निस्समाभ्यधिकमेकमेव प्राक्प्रसिद्धमित्यर्थः इदं चैकत्वं स्वरूपनिष्ठमिति विशेष्याकारेण निमित्तत्वं विशिष्टाकारेण उपादानत्वमित्युक्तं भवति। लोके मृत्कुलालबीजेऽङ्कुरादिसर्वशक्तित्वाच्च तयोर्निमित्तोपादानयोर्भेदः परमात्मनस्तु चिदचिद्विशिष्टस्य सर्वशक्तित्वाज्जगदाकारेण परिणामस्य सर्वज्ञत्वान्निमित्तत्वस्य चोपपत्तिरित्यभिप्रायः । यद्वा । तद्धेतुरित्यनेन निमित्तकारणत्वमुच्यते एकमित्यनेनैकमेवाद्वितीयमित्यादाविविभक्तनामरूपसूक्ष्मचिदचिद्विशिष्टत्वमुच्यते प्रपञ्चस्यानेकाकारकात्मत्वेन बहुत्वस्य पूर्वमुक्तत्वात्तस्य च नामरूपविभागनिबन्धनत्वात्तत्प्रतिसम्बन्धिनामरूपविभागाभावनिबन्धनैकत्वस्यैकपदग्राह्यत्वौचित्यात् तथाचैकमविभक्तनामरूपत्वेन सूक्ष्मचिदचिद्विशिष्टं ब्रह्म प्राक्प्रसिद्धमित्यर्थः ब्रह्मेत्यनेन निमित्तत्वोपादानत्वोपयुक्तसार्वज्ञ्यसत्यसङ्कल्पत्वादिगुणानन्त्यरूपनिरतिशयबृहत्त्वमुच्यते ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनुमानतोऽपि तज्ज्ञानं सुकरमित्याह । यदेति । यदा स्वप्नसुषुप्त्यादौ नामरूपरूपस्य नामरूपात्मकप्रपञ्चापादकस्य मनसो दृष्टिस्मृतिसंप्रमोषाच्चाक्षुषस्मरणलक्षणज्ञाने प्रमुष्णापह्नत्योपरामः निर्व्यापारावस्था तदा यः केवलया स्वसंस्थया ईयते जीवस्याज्ञातत्वात् स्वप्नावबोधादिदर्शनाच्च जीवेच्छाराहित्येन शुद्धया स्वरूपसत्तया स्वप्नादिनिबामकत्वेन जीवादन्य ईश्वरोऽस्तीति ज्ञायत इत्यन्वयः । तस्मै हंसाय नित्यशुद्धाय श्वासरूपाय वा नम उपाधिनिर्विशेषाधिष्ठानेन च भात्वेति अतस्तद्भावमाह । शुचिसद्मन इति । शुचिर्वैकुण्ठं सद्म निवासस्थानं यस्य स तथा तस्मै नामरूपात्मकप्रपञ्चविषये जीवस्य चाक्षुषमानसाज्ञानापहाराद्वा ।

> सर्वोपरामो मनसः स्वप्नसुप्तिलयादिषु ।
> तदावस्थाप्रबोधादिकारणत्वेन केशवः ॥
> अस्वातन्त्र्यात्तु जीवस्य विद्यतेऽन्यो नियामकः ।
> जीवप्रवृत्त्यनुकूल्याज्ज्ञायतेऽसौ सदा विभुः ॥

इत्येतत्प्रमाणानुगृहीतव्याप्तिकत्वाल्लिङ्गमव्यभिचारीति भावः ॥२६॥

विद्वत्प्रत्यक्षानुगृहीतत्वाच्च लिङ्गं बलिष्ठमित्याशयेनाह । मनीषिण इति । मनोनियमनसमर्थाः मनीषिणः मनीषयान्तर्हृदि सन्निवेशितं भगवन्तं निष्कर्षन्ति निष्कृष्य जानन्तीत्यन्वयः कथमिव अग्निविदो दारुणि गूढं वह्निं निर्मथ्य जानन्ति यथा तथा इह जीवराशिशरीरेऽन्तर्हितमिति शेषः । त्रिवृद्भिः इच्छाज्ञानक्रियात्मना त्रिधा वर्तमानाभिर्नवभिर्विमलोत्कर्षणाज्ञानक्रियेत्यादिनवत्वसंख्याविशिष्टाभिः स्वरूपभूताभिः शक्तिभिर्लक्षितमिति शेषः । दशेन्द्रियमनोबुद्धिप्राणप्रधानात्वानि चतुर्दशतत्त्वानि तेषु उत्तमत्वेन पञ्चदशाश्रयत्वात्पाञ्चदश्यं मनोबुद्ध्यहङ्कारचित्तचेतनभेदेन तत्प्रेरकतया स्थितत्वाद्वा । तदुक्तम् "इच्छादित्वेन त्रिविधा विमलाद्यास्तु शक्तयः" इति चशब्दात्तद्भिन्नास्तज्जाताश्चान्याः सन्तीति ग्राह्यं तदप्युक्तम्—

> विष्णोः स्वरूपभूतायास्ताभ्यस्तन्नामिकाः पराः ।
> जायन्ते तत्प्रसादेन ताश्च पीठेऽभिपूजयेत् ॥
> तद्भिन्नजीवास्तस्यैव प्रसादात्तत्समीपगाः ।

इति अनेन नवभिः नवद्वाराभिव्यक्ताभिः त्रिवृद्भिः गुणत्रयात्मभिरित्येतन्निरस्तम् । दशेन्द्रियाद्याश्रयत्वेन पाञ्चदश्य इति व्याख्याते तत्र किं मानमितीयमाशङ्का ।

> दशेन्द्रियाणि च मनोबुद्धिप्राणप्रधानकाः ।
> चतुर्दशैषां परमः पाञ्चदश्यो हरिः स्मृतः ॥
> बुद्धिभेदेन चैतेषु पाञ्चदश्योऽथ संस्थितः ।

इत्यनेन परिहर्तव्या । अनेन पञ्चदशेति सङ्ख्यातिथौ वर्तमानत्वात्पाञ्चदश्यमित्येतदपव्याख्यानं निरस्तमिति ज्ञातव्यम् ॥ २७ ॥

यो मनीषिभिर्निर्मथ्य ज्ञातः स हरिर्मम प्रसीदतामित्यन्वयः किमन्येभ्यो विशिष्य अस्य प्रसादः प्रार्थ्यते "प्रजापते [1] न त्वदेतान्यन्य" इत्यादिश्रुतेः अन्येषामप्यतिशयितमाहात्म्यप्रतीतेरित्याशङ्क्य "एष ह्येव शतानन्दः" इत्यादिश्रुतेः इतरेषामानन्दादेरियत्ताविशिष्टत्वात् "एतस्यानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति न ते विष्णो । जायमानः" इत्यादिश्रुतेः । अस्यापरिच्छिन्नानन्दानुसस्वरूपत्वादित्याह । अशेषेति । अशेषो विशेषः इयत्ताख्यः अशेषविशेषः स च मायाप्रकृतिश्च ते अशेषविशेषमाये तयोर्निषेधो यस्य तत्तथा तच्च निर्वाणमशरीरभोग्यं च यत् सुखं तस्याशेषविशेषमायानिषेधनिर्वाणसुखस्यानुभूतिः एतादृशानन्दोऽहमिति स तथा अपरिमितमप्राकृतशरीरभोग्यानन्दानुभवरूप इत्यर्थः ।

> इयत्ता तु विशेषः स्यादानन्दादौ तदुज्झितः ।
> सर्वैर्विशेषै रहित उच्यते हरिरव्ययः ॥
> अप्राकृतस्वरूपत्वान्निर्मायश्चेति कथ्यते ।

इति अतोऽयमेवार्थ इति ज्ञायते प्रजापत्यादिशब्दमुख्यार्थोऽपि अयमेवेति भावेनाह । स सर्वनामेति । अनेनोपन्यस्ता (१) श्रुतिः सावकाशेति ज्ञातव्यम् "यो देवानाम्" इति श्रुतेश्च नीरूपस्य सर्वनामत्वं कथमित्यत उक्तं स चेति विश्वानि रूपाणि यस्य स तथा विश्वस्य रूपमिव रूपं यस्येत्यत्र विश्वरूपसदृशो विश्वरूप इति अन्यथा योज्यम् । ननु प्रतीतार्थं परित्यज्य अप्रसिद्धार्थकल्पने किं कारणमित्यतश्चशब्दसूचितायाः ।

> तद्रूपसदृशं रूपं यतः सर्वस्य सर्वदा ।
> सर्वरूपो यतः शब्दमुख्यार्थः सर्वनामकः ॥

इति स्मृतेः समाख्यानं कारणं स स इति तच्छब्दद्वयेन तत्तच्छब्दयुक्तसर्वनामत्वसर्वरूपत्वे परामृशति । नन्वदृष्टत्वादेकस्य सर्वनामत्वादि कथं युज्यते न च श्रौतत्वाद्युक्तिमत् । श्रुतीनामनन्तत्वेनैकवाक्यत्वयोक्तिसम्भवादिति तत्राह । अनिरुक्तेति । "विचित्रशक्तिः पुरुषः पुराणः" इति श्रुतेः "गतिसामान्यात्" इति सूत्रेण श्रुतीनामेकविषयत्वेन ज्ञानोत्पादनधर्मत्वस्य निर्णीतत्वात् । ननु हरेः सर्वनामत्वे "अवचनेनैव प्रोवाच" इत्यादिश्रुतेः का गतिरित्यतो वाह । अनिरुक्तेति । सर्वात्मनेति शेषः । अनिर्वाच्या स्वकीया ज्ञानशक्तिः ।

---

(१) प्रजापते न त्वदित्यादि ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

इत्येतच्छ्रुतेर्गुणाविर्भावलक्षणायाः दोषाविष्कारोक्त्यसम्भवेना-सङ्गतं स्यादिति अलौकिकत्वान्नो विष्णुरनिरुक्तो निरूपितः तथापि वेदेषूक्तत्वादुक्तो रूपी स एवं चेतिवाक्याविरुद्धत्वाच्चोक्त एवार्थः ॥ २८ ॥

स च विश्वरूप इति विश्वरूपोक्तिं विशदयति। यद्यदिति। वचसा घटत इति निरुक्तं धियाऽक्षभिर्मनसा निरूपितं यद्यत्तत्तदस्य हरेः स्वरूपं माभून्न भवति कुतः (१) सत्त्वादिगुणसमूहेन वर्धितत्वात्तर्हि स कीदृश इति तत्राह। स वा इति। सत्त्वादिगुणानामपायः राहित्यमेव निसर्गलक्षणं स्वाभाविकलक्षणं यस्य स तथा वा इत्यनेन "केवलो निर्गुणश्च" इति श्रुतिं प्रमाणयति अनेन जगद्रूपं त्रिगुणात्मकं भगवद्रूपमप्राकृतमिति निरणायि माभूदित्यनेन जगत् साक्षाद्भगवद्रूपं न जानीहीत्यर्थोऽपि सूचित इति ज्ञातव्यम् ॥ २९ ॥

कालकारणत्वं च ब्रह्मणः स्वरूपलक्षणमित्याह। यस्मिन्निति। यस्मिन्नधिकरणभूते काले इदं वर्तते यतो यस्मादपादानभूतात्कालादुद्भवेन कारणभूतेन कालेन जायते यस्य सम्बन्धभूतस्य कालस्याधीनमिदं यस्मै संप्रदानभूताय कालाय कल्पते यं कर्मभूतं कालं प्रतीक्षते यः कर्तृभूतः कालः प्रेरयति यथा येन प्रकारेण पुरुषः कर्म कुरुते स्वयं चापरेण कार्यते तत्तस्य सप्तविभक्त्यर्थस्य कालस्य प्रकाराणां प्रेरकस्य च यत् परावरेषां ब्रह्मादीनां सकाशात् प्राक्पूर्वं स्वसिद्धं कार्यकारणात्मकप्रपञ्चव्यतिरिक्तत्वेन स्वत एव सिद्धम्। अत एव परममत्युत्तमम् अनन्यदन्यसादृश्यरहितम्। एकमवतारादिरूपाभिन्नं तद् ब्रह्म हेतुः कारणमित्यन्वयः। तत्तत्कालस्य सदातनसत्ताप्रदत्वमस्यैव नान्यस्येति द्योतनाय सप्तविभक्त्यर्थत्वेन कालो विशेषितः। अन्यथा कालस्य कारणं ब्रह्मेति कुतं स्यादिति तदुक्तम् "सर्वसत्ताप्रदत्वतः" इति तत्तत्कालीनसर्ववस्तुसत्ताप्रदत्वाद्वा कुतस्तत्कल्प्यत इति चेत् विभक्त्यर्थस्य कालस्य प्रकाराणां च कारणम्। एक एव परो विष्णुः" इति स्मृतेः अयमेवार्थो न तु यस्मिन्नित्यादिना क्रियमाणकारकफलरूपेण ब्रह्मैवावस्थितमिति "अनन्यः सदृशाभावादेको रूपाद्यभेदतः" इति वचनादनन्यदेकशब्दयोरुक्त एवार्थः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

स्वसंस्थया स्वरूपशक्त्या ॥ २६ ॥

मनीषिण इति युग्मकम्। निवृत्तवशक्त्यतीतत्वे सति कथं स्वतो निःशक्तिक एवाहं नेत्याह। अशेषेति। अनुभूतिरवश्यं मन्तव्या तां विना पुरुषार्थत्वासिद्धेः। तस्यां च मन्तव्यायां तल्लक्षणाखण्डापि स्वरूपशक्तिः सिद्धयत्येवेति भावः। तथैवाह। प्रसीदतामिति। ननु ताभ्यो निष्कृष्टश्चेत् कथं तन्मयसर्वनामरूपः तत्राह। अनिरुक्तेति। अचिन्त्यशक्तित्वादित्यर्थः ॥ २७ ॥ २८ ॥

ननु मम यन्निर्वाणसुखैकरूपं ब्रह्माख्यं स्वरूपं तस्यानुभूतिकमेव भवतीति निवृत्तशक्तिकं भवतु। यत्तु गुणरूपबृंहितं स्वरूपं तत्तु तन्मयमेव भवेत्। जगत् सादृश्यात्तत्राह। यद्यदिति त्रिकेण। गुणैरूपैश्च बृंहितम् असमोऽर्द्धवृद्धचमं यत् स्वरूपं तदपि। वचनादिगोचरो यद्यद्वस्तु तत्र भवति तत्र हेतुः। स वै इति। सगुणरूपबृंहितस्वरूपस्त्वं गुणप्रलयसृष्टिभ्यां लक्ष्यते तर्क्यत एव न त्वनुभूयत इति। यद्वा। गुणानामपायोऽपगमो यस्मात्तस्मिन् विगतसर्गे नित्यसिद्धे वैकुण्ठे लक्ष्यते तदधिष्ठातृत्वेन दृश्यत इति ॥२९॥

तदेव दर्शयति। यस्मिन्निति। यदिति यत्र विवदमानानां मृत्युताञ्च वादिनां तत्तद्भावेऽपि तादृशवस्तुतर्कतच्छक्तय एव कारणत्वेनोपस्थिता इत्याह। यच्छक्तय इति। अत एवानन्तगुणत्वं भूमत्वं च तस्येत्यर्थः ॥ ३० ॥ ३१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

ननु तज्ज्ञोऽपि न वेदेति यदुक्तं तत्र तदेव वेद्यं वस्तु द्विविधं सुज्ञेयं दुर्ज्ञेयं च। तत्र सुज्ञेयं निर्विशेषस्वरूपमाह। यदेति। यदा मनस उपरामः उपरामातिशयः समाधिः। नतु सुषुप्ताविव लयः। नच जाग्रत्स्वप्नयोरिव विक्षेपः कीदृशस्य नामरूपे रूप्येते येन तस्य। उपरामातिशये हेतुः दृष्टं दर्शनं स्मृतिश्च तयोः सम्प्रमोषात् सम्यक्तयैव नाशात् तदा यः केवलया स्वस्य संस्थयैव निर्विशेषज्ञानगम्यतया वस्तुमात्रत्वेनेत्यर्थः। ईयते प्रतीयते तस्मै हंसाय शुद्धाय शुचि शुद्धं चित्तं सद्म प्रतीतिस्थानं यस्य तस्मै। एतत् स्वरूपस्य सुज्ञेयत्वमुक्तं ब्रह्मणा यथा। "तथापि भूमन् महिमाऽगुणस्य ते विबोद्धुमर्हत्यमलान्तरात्मभिः" इति ॥ २६ ॥

दुर्विज्ञेयं सविशेषस्वरूपमाह। मनीषिणः शुद्धभक्ताः गूढम् अन्तर्हृदि सन्निवेशितं "प्रविष्टः कर्णरन्ध्रेण स्वानां भावसरोरुहम्" इत्युक्तरीत्या श्रवणभक्त्या अन्तर्हृदि प्रवेशितं पुनर्मनीषया प्रेमभक्त्युत्थया निष्कर्षन्ति। अन्तर्हृदयान्निष्कृष्य चक्षुरादिभिरिन्द्रियैः सौन्दर्यादिमाधुर्यमास्वादयन्तीत्यर्थः। कीदृशं सन्तं निष्कर्षन्ति स्वशक्तिभिश्चिच्छक्तिभिः सहितं कतिभिर्नवभिर्विमलाद्याभिस्तत्रापि त्रिवृद्भिश्चिच्छक्तेरेव तिसृभिर्वृत्तिभिः ह्लादिनीसन्धिनीसम्विद्भिश्च सहितम्। यदुक्तम्। विष्णुपुराणे "ह्लादिनी सन्धिनी सम्वित् त्वय्येका सर्वसंश्रये। ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते" इति। यथा दारुणि काष्ठे पाञ्चदश्यं पञ्चदशसामिधेनीमन्त्रैः प्रकाश्यमलौकिकं वह्निं निष्कर्षन्ति स प्रसीदतामित्युत्तरेणान्वयः। अस्य सविशेषस्वरूपस्याप्राकृतानन्तगुणस्य दुर्विज्ञेयत्वं भक्तिहीनैरनुभवितुमशक्यत्वात् भक्तैरनुभूयमानत्वेऽपि माधुर्यैश्वर्ययोः पाराज्ञानात्। यदुक्तं ब्रह्मणैव। "गुणात्मनस्तेऽपि गुणान् विमातुं हितावतीर्णस्य क ईशिरेऽस्य। कालेन यैर्वा विमिताः सुकल्पैर्भूपांशवः खे मिहिका द्युभासः" इति ॥ २७ ॥

यत्तु तस्य मायिकं सविशेषं रूपं तद्व्यतिरिक्तमेव ममोपास्यमित्याह। स मम प्रसीदताम्। अशेषा विशेषा यस्यास्तस्या मायाया निषेधेन यन्निर्वाणसुखं वाणा ह्लादिदारका आध्यात्मिकादिदुःखशराः केऽपि न सन्ति यत्र तस्मिन्नेव सुखे अनुभूतिर्यस्य सः "ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते" इति वैष्णवोक्तेः। अप्रसक्तनिषेधासम्भवात् प्रसक्तिमाह। स एव सर्वनामा स एव विश्वरूप इति ब्रह्मादितृणान्तानां यानि नामरूपाणि तानि तस्यैवेत्यर्थः। मायायास्तच्छक्तित्वेन मायिकविश्वस्यापि तद्रूपत्वात् तस्य स्वरूपभूता शक्तिस्तु मायाशक्तेर्मायिकाद्विश्वस्माच्चान्यैवेत्याह। अनिरुक्ता मायिकवाङ्मनसाभ्यामनिरुक्तिविषयीभूता आत्मभूता शक्तिर्यस्य सः ॥ २८ ॥

---

(१) हेतुगर्भविशेषणमित्यभिप्रायः।

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वाग्बुद्ध्यादिकन्तु सर्वं मायिकमेव तेन निरूपितमपि सर्वं मायिकमेव भवेत् । तत्तु न तत्स्वरूपमित्याह । यद्यदिति । यद्यद्वचसा निरुक्तमभिहितं धिया निरूपितं व्यवसितम् अक्षभिर्वा इन्द्रियैर्निरूपितं गृहीतम् उत अपि मनसापि निरूपितं सङ्कल्पितं तत्तत् सर्वं यस्य स्वरूपं माभूत् न भवति तस्मै नम इति तृतीयेनान्वयः । हि यतस्तद्गुणानामेव रूपम् गुणबृंहितं हि तादिति पाठे गुणैर्वर्द्धितं स तु गुणव्यतिरिक्त इत्यर्थः । यतः गुणानाम् अपायविसर्गाभ्यां प्रलयोत्पत्तिभ्यां लक्षणं यस्य सः । यः सृष्टिप्रलयौ करोति स ईश्वर इत्यतः सृष्टेः पूर्वत्र प्रलयात् परत्र च तस्य सत्त्वसिद्धेः । अत्र "दृश्यते त्वग्र्यया बुद्ध्या" इति "मनसैवानुद्रष्टव्य" इति । "तमेव विदित्वा अतिमृत्युमेति" इति "आत्मा वा अरे मन्तव्यः" इत्यादि "तस्मात् सर्वात्मना राजन्! भगवान् हरिरीश्वरः । श्रोतव्यः कीर्त्तितव्यश्च" इति परस्सहस्रश्रुतिस्मृतिवाक्यविरोधादीश्वरानुगृहीतैरेव वचआदिभिरिति व्याख्येयम् । अत एव श्रुतावग्र्ययेति विशेषणम् । "अतः श्रीकृष्णनामादि न भवेद्ग्राह्यमिन्द्रियैः । सेवोन्मुखे हि जिह्वादौ स्वयमेव स्फुरत्यदः" इत्यभियुक्तवचनं च । केचित्तु कात्स्न्र्येन निरूपणाभावान्न निरूपितमित्याहुः । "यतोऽप्राप्य निवर्त्तन्ते वाचश्च मनसा सह" इत्यत्रापादाननिर्देशात् वाङ्मनसागम्यत्वं निवर्त्तन्त इति अन्तालाभाद्वाङ्मनसागम्यत्वञ्चेति यावत् ॥ २६ ॥

ननु गुणमयं रूपं यदि तत्स्वरूपं न भवति तर्हि तस्यापूर्णत्वं प्रसज्जेतेत्यत आह । यस्मिन्नधिकरणे यतोऽपादानाद्येन करणेन यस्य सम्बन्धिनः यस्मै सम्प्रदानाय यदीप्सिततमं यः कर्त्ता कुरुते स्वतन्त्रः कार्यते वा अन्येन प्रयोज्यकर्त्ता तद्ब्रह्मेति प्रक्षेकमन्वयः । अत्र सप्तभिर्यच्छब्दैः सप्तविभक्त्यर्था दर्शिताः । यथेति क्रियाकारकसंबन्धप्रकारवाचिनामव्ययानामर्थाः कुरुते कार्यते चेति स्वार्थपरार्थक्रियान्वयश्च दर्शितः । चशब्देन च भावकर्मादिविहितप्रत्ययार्थाश्च संगृहीताः । तद्ब्रह्मैवेति कुतस्तत्राह । तद्धेतुस्तेषां कारणम् । कारणत्वं कुतः । प्राक्प्रसिद्धम् । ननु ब्रह्मादयस्तद्धेतवः श्रूयन्ते अवरे च दृश्यन्ते तत्राह । परेषामवरेषां च परमं तेषां कारणानामपि कारणत्वात् परमं कारणमित्यर्थः । ननु सर्वकारणत्वे तस्य किं नाम सहकारि भवेत्तत्राह । एकम् अन्यनिरपेक्षमेव तत् कारणमित्यर्थः । ननु चिच्छक्तीनां विमलाद्यानां नवविधानां चिच्छक्तिवृत्तीनां ह्लादिन्यादीनां त्रिविधानां तद्विलासानां वैकुण्ठतत्पार्षदादीनां वासुदेवसङ्कर्षणादीनां च नित्यसिद्धत्वश्रवणात् कालमायाजीवादृष्टानान्तु जगत्कारणत्वस्य च श्रवणात् कथमेकमित्युच्यत इत्यत आह । अनन्यत् न विद्यते अन्यद्यतस्तच्छक्तीनां तद्विलासानां च तत्स्वरूपभूतत्वाद्वासुदेवादीनां तदंशत्वात् । कालमायादीनामस्वरूपभूतत्वेऽपि तच्छक्तित्वात्तदनन्यत्वमित्यर्थः ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

मुमुक्षूणां तु सुज्ञेय इत्याह । यदेति द्वाभ्याम् । नामरूपरूपस्य नामरूपाणि देवमनुष्यादीनि रूप्यन्ते चिन्त्यन्ते अनेनेति तथा । तस्य दृश्यस्मृतेः दृष्टोपलक्षितदृष्टश्रुतमायिकपदार्थस्मृतेः प्रमोषात् त्यागाद्यदा उपरामः भगवत्स्वरूपगुणादिध्यानसुखसमाधिः तदा केवलया निरतिशयया स्वकीयया संस्थया

ईयते मुमुक्षुभिर्ज्ञायते यस्तस्मै हंसाय शुचिसद्मने शुद्धचित्तालयाय अप्राकृतलोकाय वा नमः ॥ २६ ॥

एतदेव स्पष्टयत्याह । मनीषिण इति । यथा पाञ्चदश्यं पञ्चदशसामिधेनामन्त्रैः प्रकाश्यं दारुणि गूढं वह्निं निष्कर्षन्ति उपायतः प्रत्यक्षं कुर्वन्ति तद्वन्मनीषिणः विमलबुद्धयस्त्रिवृद्भिः धारणाध्यानसमाधिभिरुपायैः नवभिः स्वशक्तिभिः सह अन्तर्हृदि सन्निवेशितं सम्यक् स्थापितं मनीषया निष्कर्षन्ति । चराचरपदार्थविलक्षणतया यं पश्यन्तीत्यर्थः । तमीडे इति पूर्वेणान्वयः । नवशक्तयस्तु "श्रिया पुष्ट्या गिरा कान्त्या कीर्त्या तुष्ट्येलयोर्जया । विद्ययाऽविद्यया शक्त्या मायया च निषेवितम्" इति वक्ष्यमाणा ज्ञेयाः । यद्वा । अस्तीति बुद्धिरूपया मनीषया अन्तर्हृदि सन्निवेशितम् । स्वशक्तिभिः स्वानुष्ठिताभिर्भक्तिरूपाभिः शक्तिभिः । त्रिवृद्भिस्त्रिगुणाभिः नवभिः श्रवणादिरूपाभिर्निष्कर्षन्ति प्रत्यक्षं कुर्वन्तीत्यर्थः ॥ २७ ॥

बुभुक्षूणां दुर्ज्ञेयत्वेन मुमुक्षूणां सुज्ञेयत्वेन यो वर्णितः स मम प्रसीदताम् । कथंभूतः । अनिरुक्ताः असङ्ख्याताः स्वरूपतश्च वक्तुमशक्याः आत्मशक्तयः स्वकीयाः शक्तयः नत्वागन्तुका यस्य सः । स्वाभाविकानन्तशक्तौ प्रसन्ने सति ममेष्टसिद्धिः स्यादेवेति भावः । चेतनाचेतनात्मकं सर्वं विश्वं तदीयचिदचिच्छक्तिमयतया तदनतिरिक्तमतस्तदनुग्रहकामेन सर्वत्र स्पर्द्धासूयादिदोषत्यागवता विश्वाकारतयापि भजनीय इत्याशयेनाह । स सर्वनामा स च विश्वरूप इति । स्वरूपतस्तु विश्वविलक्षणः परमानन्दरूप इत्याह । अशेषाः निखिला विशेषाः महदादिसृष्ट्यन्ता विकारा यस्या मायायाः निषेधे नेति नेतीति निराकरणे सति अन्ते यत् प्रोक्तमानन्दमयं निर्वाणं निर्गताः वाणा बाणवद्दाहिताः सर्वे आध्यात्मिकाद्यस्तापाः यस्मात् । तस्मिन् सुखे अनुभूतिर्यस्य सः विश्वविलक्षणपरमानन्दस्वरूप इत्यर्थः ॥ २८ ॥

पूर्वश्लोकस्यार्थः प्रपञ्च्यते । यद्यदिति द्वयेन । तत्र अशेषविशेषमायानिषेधनिर्वाणसुखानुभूतिरित्येतस्य प्रपञ्चः । यदिति । यत् वचसा निरुक्तं वर्णितं धियाक्षिभिरिन्द्रियैः उत मनसा निरूपितं विषयीकृतं तत्सर्वं हि निश्चितं यस्य रूपं माभूत् न भवति । स प्रसीदतामित्यन्वयः । "सत्यं ज्ञानमनन्तं ब्रह्म" "तं त्वौपनिषदं पुरुषं पृच्छामि सर्वे वेदा यत्पदमामनन्ति नमाम सर्ववचसां प्रतिष्ठा यत्र शाश्वती" इत्यादिवचसा निरुक्तस्य "दृश्यते त्वग्र्यया बुद्ध्या सदा पश्यन्ति सूरयः मनसैवानुद्रष्टव्यः" इत्यादिषु बुद्ध्यादिषु विषयीकृतस्य स्वरूपस्य व्यावृत्त्यर्थमाह । गुणबृंहितं प्रकृतिगुणमयमित्यर्थः । यतः गुणानामपायविसर्गाभ्यां संहारोद्भवाभ्यामुपलक्षणमेतत् स्थितेरपि विश्वसृष्टिस्थितिसंहारैर्लक्षणं यस्य सः । लक्षणं तु विश्वजन्मादिहेतुत्वे सति प्रकृतितद्गुणविलक्षणत्वे सति सत्यत्वादिमत्त्वं ब्रह्मत्वम् इति ॥ २९ ॥

स सर्वनामा स च विश्वरूप इत्येतस्य प्रपञ्चः । यस्मिन्निति । यस्मिन्नधिकरणे यतोऽपादानात् येन करणेन यस्य सम्बन्धि यस्मै संप्रदानाय यदीप्सिततमं यः कुरुते कार्यते चेति प्रयोजकप्रयोज्यभेदेन द्विविधः कर्त्ता । अत्र षड्भिर्यच्छब्दैः षट् कारकाणि दर्शितानि यस्येत्यनेन संबन्धसामान्यं दर्शितं कुरुते कार्यते चेति स्वार्थपरार्थक्रियान्वयो दर्शितः । यथेति च क्रियाकारकसंबन्धप्रकारवाचिनामव्ययानामर्थाः सङ्गृहीताः । चशब्देन भावकर्मादिविहितप्रत्ययार्थाः सङ्गृहीताः यतस्तद्धेतुस्तेषां कारणं यत

यच्छक्तयो वदतां वादिनां वै विवादसम्वादभुवो भवन्ति ।
कुर्वन्ति चैषां मुहुरात्ममोहं तस्मै नमोऽनन्तगुणाय भूम्ने ॥ ३१ ॥
अस्तीति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः ।
अवेक्षितं किञ्चन योगसाङ्ख्ययोः समं परं ह्यनुकूलं बृहत्तत् ॥ ३२ ॥
योऽनुग्रहार्थं भजतां पादमूलमनामरूपो भगवाननन्तः ।
नामानि रूपाणि च जन्मकर्मभिर्भेजे स मह्यं परमः प्रसीदतु ॥ ३३ ॥
यः प्राकृतैर्ज्ञानपथैर्जनानां यथाशयं देहगतो विभाति ।
यथानिलः पार्थिवमाश्रितो गुणं स ईश्वरो मे कुरुतान्मनोरथम् ॥ ३४ ॥

॥ श्रीशुक उवाच ॥

इति स्तुतः संस्तुवतः स तस्मिन्नघमर्षणे ।
आविरासीत् कुरुश्रेष्ठ ! भगवान् भक्तवत्सलः ॥ ३५ ॥
कृतपादः सुपर्णांसे प्रलम्बाष्टमहाभुजः ।
चक्रशङ्खासिचर्मेषुधनुष्पाशगदाधरः ॥ ३६ ॥
पीतवासा घनश्यामः प्रसन्नवदनेक्षणः ।
वनमालानिवीताङ्गो लसच्छ्रीवत्सकौस्तुभः ॥ ३७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्राक्प्रसिद्धं यतः परेषां प्रकृतिपुरुषकालादीनामवरेषां महदादीनां च ब्रह्मादीनां च परममाश्रयमनन्यत् विजातीयशून्यं एकं सजातीयशून्यं स्वगतभेदस्त्वस्त्यतो हि स्वभावत एव द्वैताद्वैतमित्यर्थः । तद्ब्रह्म प्रसीदतामिति सम्बन्धः ॥ ३० ॥

भाषा टीका ।

जिस दशा में दर्शन स्मरण दोनों के नाश होनेपर मन की भी निवृत्ति होजाती है उस समय पर भी केवल स्वसंस्था से जो स्थित रहते हैं ऐसे जो शुद्ध मनके मध्य में निवास करने वाले आप तिनके अर्थ नमस्कार है ॥२६॥

मनके नियमन करनेमे समर्थ विवेकी योगी जन तीन गुणों-वाली शक्तियों से सहित अपने हृदय में विराजमान जिनको पृथक् करते हैं जैसे कि याज्ञिक लोग अरणि में स्थित पञ्चदश सामिधेनी मंत्र से प्रकाश करने योग्य गुप्त अग्निको मथनसे प्रघट करते हैं ॥ २७ ॥

अनेक विशेष वाली जो माया तिसके निषेध होने से निर्वाण सुख अनुभव रूप जो हैं सब नामों वाले हैं विश्व-रूप हैं जिनकी शक्ति आत्मा में कथन नहीं करी जाती हैं वे परमेश्वर मेरेपर प्रसन्न होवैं ॥ २८ ॥

जो कुछ पदार्थ वचन से निरूपण किया जाता है बुद्धि सें इन्द्रियों से मनसे जो निरूपण किया जाता है वह सब सत्वादि गुणों का विस्तार है वह आप का स्वरूप नहीं है सो आप गुणों की उत्पत्ति स्थिति नाश से वर्जित होते हो ॥ २९ ॥

जिस आधार में जिस अपादान से जिस करण करके जिस-का संबन्धि जिस संप्रदान के अर्थ जिसका कर्म किया जाता है और जो कर्ता है कार्य कारण सब से जो पूर्व है और परम प्रसिद्ध है सो ब्रह्म उन सबों का कारण सदश द्वितियरहित एक ही परब्रह्म है सो आपहो ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वेवं ब्रह्म चेद्विश्वस्य हेतुस्तर्हि न कदाचिदनीदृशं जगदिति वन्दतो मीमांसकाः कुतोऽत्र विवदन्ते तैश्चान्ये स्वभाववादिनः सम्वदन्ते ते च ते च तत्त्वविद्भिर्बोधिता अपि कुतः पुनः पुन-र्मुह्यन्ति तत्राह । यस्य मायाविद्याद्याः शक्तयो विवादस्य क्वचित्सम्वादस्य भुवः स्थानानि भवन्ति तस्मै नमः ॥३१॥

ननु किन्तद्ब्रह्म यस्य शक्तयो विवादादिभुवो भवन्ति तत्राह । अस्तीति । योग उपासनाशास्त्रं तत्र हि विराड्रूपेणोपासनायां पातालपादादिकमस्तीत्युपास्यत्वेन विधीयते । नास्तीति साङ्ख्यं ज्ञानशास्त्रं तत्र ह्यपाणिपादः अचक्षुरश्रोत्रमिति च पादादि नास्तीति निषिध्यते तयोर्योगसाङ्ख्ययोर्यत्किञ्चित्सममनुवर्त्त-मानमवेक्षितं प्रतीतं तद् बृहद् ब्रह्म विवादास्पदं ब्रह्मेत्यर्थः। विवादं स्फुटयति । भिन्नावस्ति नास्तीत्येवम्भूतौ विरुद्धौ धर्मौ ययो-स्तयोर्भिन्नविषयत्वेऽपि विरोधो न स्यादित्येकस्थयोरित्युक्तमेक-विषययोः । कुतो वस्तुनिष्ठयोः पादादिविधिप्रतिषेधयो-रेकवस्तुनिष्ठत्वात । समत्वे हेतुः । परं हि यतो विधिप्रतिषेधयोर-विषयस्तयोः पादादिविषयत्वात । तथा तद्विषयस्य सद्भावे

महाकिरीटकटकः स्फुरन्मकरकुण्डलः ।
काञ्च्यङ्गुलीयवलयनूपुराङ्गदभूषितः ॥ ३८ ॥
त्रैलोक्यमोहनं रूपं बिभ्रत्त्रिभुवनेश्वरः ।
वृतो नारदनन्दाद्यैः पार्षदैः सुरयूथपैः ।
स्तूयमानोऽनुगायद्भिः सिद्धगन्धर्वचारणैः ॥ ३९ ॥
रूपं तन्महदाश्चर्यं विचक्ष्यागतसाध्वसः ।
ननाम दण्डवद्भूमौ प्रहृष्टात्मा प्रजापतिः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किं प्रमाणं तदाह । अनुकूलमधिष्ठानं विना पादादिकल्पनायोगात् ॥ अवधिं विना तन्निषेधायोगाच्च । तयोरुपपादकत्वेन सिद्धमित्यर्थः । तस्मै नम इति पूर्वस्यानुषङ्गः ॥ ३२ ॥

ननूदासीनस्य समस्य नमस्कारे को लाभस्तत्राह । य इति । पादमूलं भजतामनुग्रहार्थं प्राकृतनामरूपरहितोऽपि जन्मभिरवतारैर्विशुद्धोर्जितसत्त्वानि रूपाणि कर्मभिर्नामानि च यो भेजे । तत्कुतः । भगवानचिन्त्यैश्वर्यः स मह्यं प्रसीदतु ॥ ३३ ॥

ननु त्वादृशाः सकामा गणेशादीन् प्रार्थयन्ते त्वं तु तान्विहाय किमिति भगवन्तमेव प्रार्थयसे तत्राह । प्राकृतैरर्वाचीनैर्ज्ञानपथैरुपासनामार्गैर्यथाशयं तत्तद्वासनानुसारेण यो देहगतोऽन्तर्यामी तत्तद्देवतारूपेण विविधो भाति यथा वायुः पार्थिवं गुणं चम्पकादिगन्धभेदमाश्रित्य नानागन्धवान्विभाति रेणोर्गुणं धूम्रत्वादिकमाश्रित्य नानारूपवान् प्रतीयते तद्वत्तस्यैव तत्तद्देवतारूपेण फलदातृत्वात् स ईश्वर एव मे मनोरथं सत्यं करोतु । किमन्तर्गतबहुभिर्देवतान्तरैरित्यर्थः । तदुक्तं गीतासु ।

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥
स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान् मयैव विहितान् हि तान् इति ॥
ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।

इति चेति ॥ ३४ ॥

संस्तुवतो दक्षस्य स भगवान् प्रत्यक्षोऽभूत् ॥ ३५ ॥

तं वर्णयति सार्धैश्चतुर्भिः । सुपर्णस्यांसे स्कन्धे कृतौ पादौ येन । प्रलम्बा अष्टौ महान्तो भुजा यस्य । चक्राद्यष्टायुधधरः ॥ ३६ ॥

प्रसन्नं वदनमीक्षणे च यस्य । वनमालया निवीतं कण्ठादिपादान्तव्याप्तमङ्गं यस्य । लसन्तौ श्रीवत्सकौस्तुभौ यस्य ॥ ३७ ॥

महान्ति किरीटकटकानि यस्य । स्फुरती मकरकुण्डले यस्य । काञ्च्यादिभिर्विभूषितः । वलयमत्र पादभूषणं पृथक्त्वं कटकस्योक्तत्वात् ॥ ३८ ॥

त्रैलोक्यमोहनं श्रीपुरुषोत्तमाख्यं सुरयूथपैर्लोकपालैः ॥ ३९-४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु विश्वं परमाणुकारणकमीश्वरस्तु निमित्तमिति वैशेषिकादयः । प्रधानकारणकं पुरुषातिरेकेणेश्वरः स्यान्न वा पुरुषस्तु निमित्तमात्रमिति साङ्ख्यादयो वदन्ति । किञ्च । सर्वमपि वस्तु नित्यमनित्यं च भिन्नमभिन्नञ्चेति । तथा सदसत् सदसदात्मकञ्चेति वदन्ति । अतः कथं कृत्स्नस्य जगतः ब्रह्मैककारणत्वं तदनन्यत्वञ्चोच्यते इतीमां शङ्कां परिहरन्नमस्करोति । यच्छक्तय इति । वदतां ग्रन्थनिबन्धनेन स्वशास्त्रमुपदिशतामित्यर्थः । वादिनां वादं कुर्वतां वैशेषिकादीनां यस्य परमात्मनः शक्तयः पृथिव्यादयः विवादसंवादयोः परस्परविरुद्धाविरुद्धयोः वादयोः भुवः विषयभूता भवन्ति । शक्तिशब्देन पृथिव्यादय उच्यन्ते । तेषां भगवतः कार्योपयोग्यपृथक्सिद्धविशेषणत्वात्तथा च भगवान् पराशरः "एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा । परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत्" इति जगदात्मकान् पृथिव्यादीन् शक्तिशब्देन व्यपदिष्टवान् । ननु सर्वैरपि पृथिव्यादिस्वरूपाभ्युपगमात्कथमनेकविवादभुवस्तत्राह । कुर्वन्तीति । यस्य शक्तयः पृथिव्यादयः आत्ममोहं स्वविषयकमोहं तेषां वादिनां कुर्वन्ति । पृथिव्यादिस्वरूपाभ्युपगमेऽपि परमाणुकारणकत्वनित्यानित्यत्वभिन्नाभिन्नत्वसदसत्त्वादिप्रकारविप्रतिपत्तिं कुर्वन्ति । प्रधानकारणकत्वविप्रतिपत्तिविषयप्रकारवत्यः शक्तयो भवन्ति इत्यर्थः । तस्मै अनन्तगुणायासङ्ख्येयकल्याणगुणगणाय भूम्ने स्वरूपतोऽपि बृहते नमः । यद्यप्येवं वादिनां विवादास्तथापि पृथिव्यादीनां परमात्मशरीरत्वतत्कारणकत्वयोः पृथिव्याद्यवस्थाया अनित्यत्वेऽपि द्रव्यस्य नित्यतायाः तस्य सततपरिणामित्वेनासदात्मकत्वानादेश्च श्रुतिस्मृत्यादिबहुप्रमाणप्रतिपन्नत्वेनावैदिकानां केवलं विप्रतिपत्तिरेवेति भावः । श्रुतयस्तु "यस्यात्मा शरीरं यस्य पृथ्वी शरीरं यस्याक्षरं शरीरं यस्याव्यक्तं शरीरमात्मन आकाशः सम्भूतः तोयेन जीवान् विससर्ज भूम्यां नासदासीन्नो सदासीत्तदानीं तम आसीत्" इत्यादयः स्मृतयश्च "विष्णोः सकाशादुद्भूतम् अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा । यदम्बु वैष्णवः कायस्ततो विप्र ! वसुन्धरा । पद्माकारा समुद्भूता पर्वताब्ध्यादिसंयुता । तदेतदक्षयं नित्यं जगत् स्थावरजङ्गमम् । प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि । सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत्" इत्यादयोऽनुसन्धेयाः । अनन्तगुणायेत्यनेन निर्गुणत्ववादो भ्रममूलक इति सूचितम् । "यः सर्वज्ञः सर्ववित्" इत्यादिबहुश्रुतिभिः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कल्याणगुणाकरत्वस्य सम्प्रतिपन्नत्वात् । भूम्न इत्यनेन जीवानाममूर्तत्वं ज्ञापितम् । एवं पृथिव्यादिस्वरूपाभ्युपगमेऽपि तत्प्रकाराविप्रतिपत्तिरुक्तेति ॥ ३१ ॥

इदानीं परमात्मरूपप्रतिपत्तिं वदन् वादिविप्रतिपत्तीनां शास्त्रानुसारेण परिहार्यत्वमाह । अस्तीति । घटपटादिवस्तुनिष्ठावस्तित्वनास्तित्वधर्मौ दृष्टौ योगसाङ्ख्ययोर्मतयोः । तावेकस्थावीश्वरविषयौ चेद्विरुद्धौ स्याताम् । एवमस्तित्वनास्तित्वयोर्भिन्नयोर्विरुद्धयोर्धर्मयोरध्यवह्रियमाणयोः सतोरप्यकिञ्चनापेक्षितं वेदान्तवाक्यमपेक्षितम् । अतीन्द्रियेश्वरविषयकास्तित्वनास्तित्वयोः प्रमाणजिज्ञासायामनादिनिधनाविच्छिन्नसम्प्रदायासम्भाव्यमानदोषगन्धं वेदान्तवाक्यमेव प्रमाणमपेक्षितमित्यर्थः । तच्च वेदान्तवाक्यं "सत्यं ज्ञानम्" इत्यादि । तद्गम्यं च सममेकरूपमनुकूलमानन्दरूपं परं सर्वविलक्षणं बृहदपरिच्छिन्नमतो वेदान्तवाक्यरूपं प्रमाणं विहाय केवलास्तित्वनास्तित्वविवादो भ्रममूलो व्यर्थ इति भावः । यद्वा । अनन्तगुणमित्यनेन गुणा न सन्तीति वादो भ्रममूल इति सूचितम् । तदेवोपपादयति । अस्तीति । "यः सर्वज्ञ" इत्यादिभिर्गुणजातमस्तीत्यवगम्यते । निष्क्रियं निष्कलमित्यादिभिर्नैर्गुण्यं तौ चास्तित्वनास्तित्वधर्मावुभावेकवस्तुनिष्ठौ चेद्विरुद्धौ । तयोश्च भिन्नाधिकरणयोर्विरुद्धयोर्धर्मयोर्वस्तुनिष्ठयोरेकस्थयोः सतोरेकस्मिन् वस्तुनि तयोर्विरोधे सतीत्यर्थः । तत्रान्यतरव्यवस्थापकं किञ्चिद्ब्रह्मस्वरूपबोधकं वेदान्तवाक्यं प्रमाणमपेक्षितम् । एवं साङ्ख्ययोगयोरपि समं तुल्यं तयोरपीश्वरस्वरूपसद्भावाभावयोर्विरोधे सत्यन्यतरव्यवस्थापकं किञ्चित्प्रमाणमपेक्षितमित्यर्थः । तच्च वाक्यं "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिकं तद्वाक्यप्रतिपन्नं च वस्तु परमनुकूलं बृहच्च । परत्वानुकूलत्वबृहत्त्वादिगुणयुक्तमिति निर्गुणवादो निरीश्वरवादश्च भ्रममूलक इति भावः । योगसाङ्ख्ययोरिति दृष्टान्तार्थं तयोर्मध्ये यथा निरीश्वरवादस्तथा गुणासत्त्ववादोऽपीति । अत्र परशब्देन प्रकृतिपुरुषविलक्षणवाचिना सत्यशब्दार्थो विवक्षितः । अनुकूलशब्देन ज्ञानशब्दार्थो व्याख्यातः । आनन्दरूपज्ञानस्यैवानुकूलत्वात् बृहत्पदेनानन्तशब्दार्थः । स्वरूपेण गुणैश्चापरिच्छिन्नं हि बृहच्छब्दार्थः । सङ्कोचकप्रमाणाभावात् ॥ ३२ ॥

एवं वादिनां विप्रतिपत्तिविषयत्वेन ब्रह्मस्वरूपतद्गुणतच्छक्तीनां दुर्ज्ञेयत्वमुक्तम् । अथैवं दुर्ज्ञेयस्वरूपगुणशक्तिरप्याश्रितसुलभ इति वदन् तदनुग्रहं प्रार्थयते । यो भगवान् स्वपादमूलं भजतामनुग्रहार्थं स्वयमनामरूपः । कर्मकृतनामरूपरहितोऽपि जन्मकर्मभिरवतारचेष्टितैः सह नामानि दुरितक्षपणक्षमाणि रामकृष्णादिनामानि रूपाणि स्वेच्छोपात्तान्यप्राकृतानि शरीराणि च भेजे आत्मानं दर्शयितुं परिगृहीतवान् । स परमः निःसमाभ्यधिकः मह्यं प्रसीदताम् ॥ ३३ ॥

एवं स्वेच्छोपात्ताप्राकृतदिव्यमङ्गलविग्रहविशिष्टो भक्तानुग्रहार्थं मवतीर्णस्तैरुपलभ्यत इत्युक्तम् । विश्वरूपेणापि तैरुपलभ्यत इत्याह । यः प्राकृतैरिति । प्राकृतार्थगोचरैर्ज्ञानपथैरिन्द्रियैर्यथाशयं मनोवृत्त्यनुगुणमिन्द्रियाणां मनोवृत्त्यनुगुणप्रवृत्तेः देहगतः स्वदेहभूतविविधवस्तुगतो विभाति प्रकाशते । अयमर्थः । यथा राजशरीरे दृष्टे राजा दृष्टो भवति एवं जगतः परमात्मशरीरत्वात् जगद्याथात्म्यविद्भिर्जगद्दर्शने सति परमात्मा दृष्टो भवतीति । जगद्विलक्षणस्याप्यस्य विशिष्टतया प्रकाशे दृष्टान्तमाह । यथाऽनिल इति । स्वयं पृथिवीविलक्षणो वायुः पार्थिवगुणमाश्रितः पार्थिवपुष्पपरागसंस्पृष्टो गन्धवह इति प्रकाश्यते । तद्वज्जगद्विलक्षणोऽपि जगच्छरीरकत्वात्तन्मात्ररूपभाक्तया परमात्मावभासत इत्यर्थः । "काठिन्यवान् यो बिभर्ति तस्मै भूम्यात्मने नमः" इति ह्युक्तम् ॥ ३४ ॥

एवं तुभ्यमुपदिष्टेनानेन स्तोत्रेणाभिष्टुतो भगवान् प्राचेतसस्य प्रसन्नोऽभूदित्याह मुनिः । इतीति । हे कुरुश्रेष्ठ ! इतीत्थं स्तुतो भगवान् तस्मिन्नघमर्षणे तीर्थे संस्तुवतो दक्षस्य प्रादुरासीत् प्रत्यक्षोऽभूत् पुरत इतिशेषः । तत्र हेतुः भक्तवत्सलः ॥३५॥

प्रादुर्भूतं भगवन्तं वर्णयति । कृतपाद इति । सुपर्णस्य गरुत्मतोंऽसे स्कन्धयोः कृतौ विन्यस्तौ पादौ येन । प्रलम्बा आजानुलम्बिनः अष्टौ महाभुजा यस्य । शङ्खाद्यायुधधरः । तत्रासिः खड्गः चर्म खेटः ॥ ३६ ॥

पीते वाससी यस्य सः । घन इव श्यामः प्रसन्नं वदनमीक्षणं च यस्य सः । वनमालया निवीतमङ्गं यस्य सः । लसन् श्रीवत्सः कौस्तुभश्च यस्य सः ॥ ३७ ॥

महान्ति किरीटं स्फुरन्ती कटके च यस्य सः । मकराकारे कुण्डले यस्य काञ्च्यादिभिर्भूषितः अलङ्कृतः । तत्र काञ्ची कटिमेखला वलयमत्र पादभूषणं कटकस्योक्तत्वात् ॥ ३८ ॥

त्रैलोक्यं मोहयतीति त्रैलोक्यमोहनं नन्द्यादित्वाल्ल्युः । श्रीपुरुषोत्तममन्त्रोपास्यं श्रीपुरुषोत्तमाख्यं तद्रूपं बिभ्रत् त्रिभुवनेश्वरः । नारदादिभिः पार्षदैः सुरश्रेष्ठैश्च परिवृतः । अनु पृष्ठतो गायद्भिः सिद्धादिभिरनुवृतः अनुसृतः एवम्विधः प्रादुरासीदिति पूर्वेणान्वयः ॥ ३९ ॥

तन्महदाश्चर्यं भगवतो रूपमवलोक्य गतसाध्वसः वीतभयः प्रजापतिः प्राचेतसः प्रहृष्टचित्तो भूमौ दण्डवन्नमस्कृतवान् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनिरुक्तात्मशक्तिरित्येतद्विवृणोति । यच्छक्तय इति । विवादसम्वादभुवः विप्रतिपत्तिसंप्रतिपत्त्योर्भुवो विषयाः वदतां वादं कुर्वतां वादिनां मतमज्ञाननिमित्तमित्याह । कुर्वन्तीति ॥ ३१ ॥

विवादसम्वादौ च कथंकारं स्यातामिति तत्राह । अस्तीति । यद्भिन्नयोर्विरुद्धयोर्धर्मयोरपेक्षितं विषयः किमाकारयोर्मध्ये ईश्वरोऽस्ति नास्तीति वादिभिः प्रतिपाद्यमानयोः । भिन्नत्वाविरुद्धत्वे कथमत्राह । वस्त्विति । भिन्नवस्तुनिष्ठत्वात् एकस्मिन्वस्तुनि स्थितयोरित्यङ्गीकारे विरुद्धयोः । यद्यप्येकस्य स्वरूपेण सत्त्वं परस्वरूपेणासत्त्वमिति द्वौ धर्मौ स्तः तथापि नैतादृशौ एते सत्त्वासत्त्वे स्वरूपस्यैवेति यत इति द्योतनायेति पदद्वयं यच्च किञ्चनालौकिकं यच्च साङ्ख्ययोगयोः समं कर्मानुष्ठानलक्षणयोगप्रतिपादककर्मकाण्डे तत्फलदातृत्वेन प्रतिपाद्यं साङ्ख्ये च यथार्थज्ञानसाधनं वेदान्ते विचारितं तच्चानुकूलं सर्वेषां प्रियतमं तत्तद्वादिनां तत्तद्बुद्धिजनकत्वेन तत्तदनुरूपफलदातृत्वेन वर्तमानं वा तत्परं बृहत् परं ब्रह्म प्रपद्य इति वाक्यशेषः सर्वदा वर्धमानं न कदाप्यन्यथा

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भूममित्यतो बृहदिति । अस्तित्वपक्ष एव श्रेयान् त्वितरः । तस्य मुख्यत्वादिति विशदीकरणाय साङ्ख्ययोगयोरिति विशेषणं "सर्वे वेदा यत्पदमामनन्ति" इति श्रुतिं हिशब्देन सूचयति । अस्ति द्वैतं वस्त्विति निष्ठा साङ्ख्ययोगयोः नास्ति तद्द्वैतं वस्त्वद्वैतमेवेति निष्ठासुरीत्यतो वा हीति । तदुक्तम् "मदन्यो नास्ति सर्वेश इति विद्ध्यासुरं मतम् । अस्तीति दैवमुभयोर्हरिरेव ह्यपेक्षितः । निषेधविध्योर्विषयः फलदाता च केशवः । तादृग्बुद्धेः कारणं च स्थानयोश्चोच्चनीचयोः" इति (१) ॥ ३२ ॥

इतोऽपि मदन्य ईश्वरोऽस्तीति पक्ष एव श्रेयानित्यभिप्रेत्याह । अनुग्रहार्थमिति । योऽनन्तो भगवान् पादमूलं भजतामनुग्रहार्थं जन्मकर्मभिर्नामानि रूपाणि च भेजे स परमो मह्यं प्रसीदतामित्यन्वयः । अलौकिकत्वेन तं विशिनष्टि । अनामरूप इति । देवदत्तकर्मवदीशकर्मणामप्रत्यक्षत्वाद्गुणाभिन्नरूपवदीशरूपाणामदर्शनाद् - नामरूपः । न तु स्वरूपकर्मोज्झितत्वात् "यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशम् अथैनमाहुः सत्यकर्मेति सर्वकर्मा सर्वनामा सर्वरूपः" इत्यादिश्रुतेः अवतारनामकर्मणां दर्शनाच्च । तदुक्तं "तत्कर्मणामदृष्टत्वादनामा चाप्यदर्शनात् । अरूपस्त्ववतारेषु रूपकर्माणि वर्णयन् । नित्यरूपो नित्यकर्मा चाव्यक्तत्वमवेक्ष्य तत् । अरूपकर्मेत्युदितो रूपकर्मोज्झितेस्तु" इति । किञ्च । भगवद्व्यतिरिक्तपुरुषानुपपन्नार्थवाचिनाम यस्य सोऽनामा यथा मुक्तानां परमा गतिः कमलाकान्त इति कंसादिनिग्रहादिवाचकं कंसारिः मुरारिरित्यादिवाच्यार्थसमत्वात् सर्वं नाम मूलरूपस्यानन्तमव्यक्तत्वादरूपः अनामासोऽधिकार्थत्वादव्यक्तत्वादरूपकः । कंसारित्वादिसाम्यार्थो व्यक्तरूपोऽवतारगः" इति "लोकदृष्ट्याधिकार्थानि मूलनामानि केशवे । अथ दामोदरादीनि लोकदृष्ट्या समानि तु ।

आनन्दोऽव्यक्तरूपस्तु मूलरूपमुदाहृतम् ।
स एव व्यक्तिमापन्नः प्रादुर्भाव उदाहृतः ॥

इति अनेन उक्तस्मृत्यर्थोऽपि स्पष्टीकृत इति ज्ञातव्यम् ॥ ३३ ॥

यथाधिकारं स्वविषयज्ञानस्य तारतम्यजनकत्वेन प्रमाणसिद्धत्वान्मदन्यो नास्तीश्वर इति मतमासुरमित्याशयेनाह । यः प्राकृतैरिति । यो भवान् प्राकृतैर्ज्ञानपथैर्जनानां स्वबुद्ध्यनुसृतसिद्धान्तेन विभाति स ईश्वरो मे मनोरथं कुर्यादित्यन्वयः । क इव इत उक्तम् । देहेति । अयं भावः । अधमानां जनानां जीवदेहगतो जीवः तद्भिन्न इति प्रतीयते । अहं ब्रह्मास्मीति मध्यमानां जनानां देहगतः सन् देहगतोऽनिर्णीत इति यावज्जीवस्तत्त्वतो वा हरिरिति उत्तमानां जीवानां प्रकर्षेणाप्राकृतेनोत्पादितेन ज्ञानेन देहगतो देहगाज्जीवाद्भिन्न इति शेषः । ईश्वरः पूर्णानन्दादिगुण इति प्रकाशते तत्रोदाहरणम् । यथेति । यथाऽनिलो वायुः पार्थिवं पृथिवीकार्यं गुणं सुखदुःखभोगसाधनं शरीरमाश्रितः प्रकृतिविकृतैर्ज्ञानसाधनैरिन्द्रियैः । प्राकृतानां श्वास इति मध्यमानां शारीरः प्राण इति अप्राकृतानामुत्तमानां सर्वदेवोत्तमः सूत्रात्मेति प्रतिभाति तथेति । "स्वदेहस्थं हरिं प्राहुरधमा जीवमेव तु । मध्यमाश्चाप्यनिर्णीतं जीवाद्भिन्नं जनार्दनम् । पूर्णानन्दादिगुणकं सर्वजीवविलक्षणम् । उत्तमास्तु हरिं प्राहुस्तारतम्येन तेषु च । बुद्धिशुद्ध्यनुसारेण यथा प्राणं शरीरिणाम् । श्वासमात्रं जनाः प्राहुरनिर्णीतं च मध्यमाः । देवदेवेश्वरं सूत्रमानन्दं प्राणवेदिनः" इति स्मृतिसमाख्यासिद्धत्वात्रैविध्येनार्थकथनं युक्तमिति भावः ॥ ३४ ॥

नेयं स्तुतिर्जिह्वाग्रगुडवत् स्तुत्ये चित्तद्रवविकारहेतुरिति भावेनाह । इतीति ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

नेदं रूपं मायाकल्पितं किन्तु निजमेव अर्थक्रियाकारित्वादित्याशयेनाह । रूपमिति ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र विवादावसरे तादृशगुणरूपबृंहितस्वरूपमपि सिद्ध्यतीत्याह । अस्तीति । योगः स्थूलोपासनाशास्त्रम् । तत्र हि भगवतो नामरूपित्वं श्रूयते । तत्र दृष्टकल्पनालाघवात् घटपटादिलक्षणाखिलनामधेयत्वं पातालपादादिकत्वं चेति विधीयते । नास्तीति साङ्ख्यं ज्ञानशास्त्रम् तत्र हि निषेधश्रुतिभिस्तस्य नामरूपित्वं यन्निषिध्यते तत् प्रापञ्चिकनामरूपित्वस्य कल्पितत्वात् सर्वथैव नास्तीति निश्चीयते । तदुक्तमुभयमेतमस्यैव प्राक् । "स सर्वनामा स च विश्वरूप" इत्यादिना । "यथानिरुक्तं वचसा निरूपितम्" इत्यादिना च । अस्तीति नास्तीति वस्तुनिष्ठा ययोः । तमेव विवादं स्फुटयति भिन्नौ अस्तीति नास्तीत्येवम्भूतौ विरुद्धौ धर्मौ ययोस्तयोः । नन्वास्तामनयोर्विभिन्नविषयत्वं नेत्याह । एकस्थयोः समानविषययोः तदेवं विवादे सति तयोर्यत्किञ्चित् समं समञ्जसत्वेनैव । अवेक्षितं प्रतीतं वस्तु तद्द्वयोरपि बृहत् । बृहदनुकूलं भवति । किं तत् समञ्जसं यत् परं नाम रूपादस्पृष्टं तदभावाच्च विलक्षणं यत्र युगपन्नामरूपित्वमनामरूपित्वमपि वक्तुं शक्यते तद्विलक्षणं किमपि नामरूपलक्षणमेव वस्त्वित्यर्थः । एतदुक्तं भवति । एकस्मिन्नेव वस्तुनि नामरूपित्वविधिनिषेधाभ्यां परस्परं श्रुतयः पराहतार्थाः स्युः । अत्र तु परत्वेनोभयत्रापि प्राक्तनयुक्त्या समञ्जसमप्राकृतनामरूपित्वमेव विधिनिषेधश्रुतितात्पर्यगोचरत्वात् इति तत्सम्मतं विवादमात्रम् । इत्थमेव श्रीध्रुवेण निर्विवादत्वमुक्तम् । तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिः परिचितं सदसद्विशेषम् । रूपं स्थविष्ठमज ते महदाद्यनेकं नातः परं परम वेद्मि न यत्र वादः" इति ॥ ३२ ॥

तदेव व्यनक्ति । यो नाम रूपरहित एव नामानि रूपाणि भेजे प्रकटितवान् । जन्मकर्मभिः सहितानि च प्रकटितवानित्यर्थः । व्यतिरेके दोषमाह । अनन्तः यदि तस्मिन्नामरूपित्वादिकं नास्ति तर्हि तच्छक्तिमत्त्वं प्रति सान्तत्वमेव प्रसज्जयेतेति । तदुक्तं प्रचेतोभिः ।

नह्यन्तो यद्विभूतीनां सोऽनन्त इति गीयते इति ।

तत्तत् प्रकाशने हेतुः । भगवान् भगाख्यशक्तिमान् तस्याः शक्तेर्मायात्वं निषेधति । परमः पराख्यशक्तिरूपा मा लक्ष्मीर्यस्मिन् । अन्यथा परत्वव्याघातः स्यादिति भावः । "तस्मान्न मायया सर्वं सर्वमैश्वर्यसम्भवम् । अमायो हीश्वरो यस्मात्तस्मात्

(१) अस्तीति नास्तीति श्लोकस्यायमर्थः । भिन्नविरुद्धधर्मयोः भिन्नविरुद्धधर्मप्रतिपादकयोः । एकस्थयोः एकवस्तुविषयकयोः अस्तीति नास्तीति च वस्तुनिष्ठयोः मदन्यदिति शेषः मदन्यदीश्वराख्यं वस्तु अस्तीति दैवं मतं तादृशं वस्तु नास्तीति आसुरं मतं तयोर्मतयोरित्यर्थः अपेक्षितं तन्मतं विषयः किञ्चन लोकविलक्षणसमभुक्तानन्दस्यानयोर्यथायोग्यफलप्रदम् अनुकूलं तादृशमतभेदेन द्विविधबुद्धिजनकं साङ्ख्ययोगयोः ज्ञानयोगकर्मयोगयोः परं मुख्यतात्पर्यविषयं यत् तत् बृहत् ब्रह्मेति

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

परमं विदुः" इत्युक्तेः । ननु सर्वेषामविश्वरूपत्वे तद्ग्राहित्वे च स-न्त्येव तानुपासकाः ममाणाम् । अत्र के स्युरित्याकाङ्क्षायामाह । पादमूलं भजतामनुग्रहार्थमिति । योगसांख्ययोस्तत्त्वं न सम्यक् प्रका-शते किन्तु भक्तावेव "भक्तिरेवैनं दर्शयति" इत्यादिश्रुतेः । तस्मात्त-दुक्तं तयोर्विवादमात्रत्वमिति भावः । अत एव लक्ष्यतेऽनन्तरमेव इतीत्थं प्रादुरासीत् कुरुश्रेष्ठ । भगवान् भक्तवत्सलः । कृतपादः सुपर्णांस इत्यादि । पादमूलं भजतामित्यनेन तान् प्रति रूप-प्राकट्यात् पूर्वमपि रूपमस्त्येवेति व्यञ्जितम् "चरणं पवित्रं विततं पुराणम्" इत्यादिश्रुतेः । भेज इत्यतीत निर्देशः प्रामाण्यदार्ढ्यार्था-नादित्वं बोधयति । अनन्तपदस्य च नामानि रूपाणि चानन्तान्ये-वेति भावः । अत्र प्राकृतनामरूपरहितोऽपीति टीका च ॥ ३३ ॥

ननु विभूतिकामस्य तत्तद्विभूतिसम्बन्धितगणपत्यादुपा-धित्वेनैव ममोपासना युक्ता कथं सर्वात्मना निरुपाधित्वेन स्तौषि । तत्राह । यः प्राकृतैरिति । तत्र तत्रानित्यवत् स्वकार्यकरत्वं भवत एव नतूपाधेरिति स्थिते किमुपाधिना धन्येति भावः ॥ ३४ ॥

स्तवीति सार्द्धपञ्चकम् ॥ ३५—४२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नन्वत्र सर्वे सजातीयविजातीयस्वगतभेदराहित्यवादोऽन्ये-ऽद्वैतवादिनो विवदन्ते तैश्चान्ये नैयायिकाः षोडशपदार्थवादि-त्वात् द्वैतवादिनो विवदन्ते तैश्चान्ये वैशेषिकाः सम्वदन्ते । तैः सर्वैश्चान्ये न कदाचिदनीदृशं जगदिति वदन्तो मीमांसका विव-दन्ते तैश्चान्ये स्वभाववादिनः सम्वदन्ते ते च तत्त्वविद्भिर्बोधिता अपि कुतः पुनर्मुह्यन्तीति तत्राह । यच्छक्तयः । यस्य मायाशक्ति-वृत्तयो वदतां समादधतां वादिनां तत्राक्षेपकृतां विवादस्य कचित् सम्वादस्य च भुव उत्पत्तिहेतवो भवन्ति प्रयोजनमाह । आत्म-मोहमिति । आत्मानं जिज्ञासमानानामपीत्यर्थः । मुहुरिति । तत्राति-रेकः सूचितः । अनन्तगुणायेत्यनन्तशब्दस्यानेकार्थत्वेनाना-शवाचित्वात् गुणानामनश्वरत्वं निःसीमत्वं चोक्तम् "इमे चान्ये च भगवन्नित्या यत्र महागुणाः" इति पृथिव्युक्तौ नित्या इति पदेन "नान्तं गुणानामगुणस्य जग्मुर्योगेश्वरा ये भवपाद्ममुख्याः" इति सूतोक्तौ च अगुणस्येति योगेश्वरा इति पदाभ्याम् "ज्ञानशक्तिबलै-श्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गु-णादिभिः" इति पराशरोक्तौ च विना हेयैरित्युपन्यासेन च तदीय-गुणानामप्राकृतत्वावगमेऽप्यवाहृतत्वमाचक्षाणास्तेऽपराधिनः कथ-मविद्यया न मुह्यन्तीति भावः ॥ ३१ ॥

ननु ते शास्त्रज्ञाः किमिति निन्द्यन्ते शास्त्राणामैक्यमत्या-भावेन परस्परविरोधादिति चेन्मैवं वादीरित्याह । अस्तीति । योगसाङ्ख्ययोः योगो भक्तियोगशास्त्रं साङ्ख्यं ज्ञानशास्त्रं तयोस्तत् प्रसिद्धं परं सर्वोत्कृष्टं ब्रह्म समम् अनुकूलं च यथा-स्यात्तथा समीक्षितम् । परस्परविरुद्धयोस्तयोर्द्वयोरेव शास्त्रयोरव-यवे किमपि वैषम्यं प्रातिकूल्यं च नास्तीत्यर्थः । तयोः कथम्भू-तयोः अस्तीति नास्तीति भिन्नविरुद्धधर्मयोः । योगशास्त्रे हि "कृष्णं पिशङ्गाम्बरमम्बुजेक्षणं चतुर्भुजं शङ्खगदाद्युदायुधम्" इत्या-दिना नामरूपगुणपाणिपादाद्यङ्गोपाङ्गपार्षदधामादि अस्ती-त्युपास्यत्वेन विधीयते । साङ्ख्यशास्त्रे ज्ञानरूपगुणाम-पाणिपादमचक्षुरश्रोत्रमकर्माद्वितीयमपि नामरूपादिकं नास्तीति निरूप्यते इत्येवं भूतौ भिन्नौ परस्परविरुद्धौ च धर्मौ ययोस्तयो-र्विषयत्वे विरोधो न स्यादित्येकस्थयोः एकस्मिन् ब्रह्मण्येव तिष्ठत इत्येकं ब्रह्मैव विषयीकुर्वतोरित्यर्थः । ननु तर्हि कथमवैष-म्यमप्रातिकूल्यं वा तत्राह । वस्तुनिष्ठयोः वस्तुनि वास्तववस्तु-न्येव निष्ठा प्रतिपादकत्वलक्षणा ययोः । तेन भक्तिशास्त्रविहितां वास्तवं वस्त्वेव प्रतिपादयति नत्ववास्तवम् । तथा ज्ञानशास्त्रम-पि निषेधेन वास्तवं वस्त्वेव प्रतिपादयति नत्ववास्तवम् । तेन भक्ति-शास्त्रेण परमेश्वरस्य नामरूपादिविभूतिर्नामरूपादिकमनु-प्रतिपाद्यते सिद्धे ज्ञानशास्त्रमपि स्वस्य वस्तुनिष्ठत्वादेव तस्य नामरूपादिकं नैव निषेधति किन्तु तस्य मायिकमूर्त्त्यादि-राज एव अत एव पुनर्भक्तिशास्त्रमपि ज्ञानशास्त्रोक्तविषयं विधा-तुरूपभूमानुपपन्नत्वेन नोपादत्ते । यदुक्तम् ।

> अस्तुनी अरूपरूपे मया ते ह्यनुवर्णिते ।
>
> उभे अपि न गृह्णन्ति मायासृष्टे विपश्चितः ॥

इति विधदूषकत्वापि धारणासमुपादानं तु कस्यचिदेवोपासनया-यामेव चिन्तयत्वर्थमेव ननु सर्वोपासनार्थमिति भक्तिज्ञानशा-स्त्रयोर्वस्तुतत्त्वाविरोध एवेति शास्त्राविरोधेऽपि विवदमानाः शास्त्र-तात्पर्यमविद्वांसो दार्शनिका एव निन्दिता इति भावः ॥ ३२ ॥

अतो नामरूपादिविधिनिषेधाभ्यां शास्त्रद्वयाविरोधं व्यञ्जी-यन् भक्तवत्सलस्य भगवतः स्वस्मिन्ननुग्रहं प्रार्थयते । य इति । भक्तानामरूपः प्राकृतनामरूपादिरहितोऽपि जन्मभिरवतारैर्विष्णु-गोजिनामरूपाणि कर्मभिर्नामानि च भेजे इति स्वामि-चरणाः । भेजे प्रपञ्चे प्रकटीचकार ॥ ३३ ॥

तदेवं न यस्य सख्यमित्यनेन "सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे" इत्यनेन च जीवेश्वरयोः स्वरूपतत्त्वसर्व-ज्ञत्वाभ्यां वास्तवमेव पार्थक्यमवधारितमेव । ततश्च "यदोपरमो मनस" इत्यनेन मनीषियोऽन्तर्हित इत्यनेन च तस्यैवेश्वरस्यैकस्या-पत्तोपिकनिर्विशेषसविशेषत्वमनामत्वेन निर्विशेषं सवि-शेषस्वरूपञ्च यथामति व्यञ्जितम् । पुनश्च स वै ममाशीषेति श्लेषेण मायिकवस्तूनां तद्रूपत्वेऽपि तत्स्वरूपभूतत्वाभाव उक्तः । पुनरस्तीति नास्तीति द्वयेन भक्तिशास्त्रज्ञानशास्त्रयोरविरोधो गूढोऽपि स्पष्टीकृतः । इदानीं ये जीवेश्वरयोः पार्थक्यमुपाधि-कृतमेव न वास्तवमित्याचक्षते तेषां ज्ञानिमानिनामसमञ्जस-पथगामित्वं व्यञ्जयन् स्वमनोरथसिद्धिं प्रार्थयते । यः प्राकृतैर-त्वादीनैर्ज्ञानिमार्गैर्जनानां हृद्गतः यथाशयम् आशयमन्तःकरणं दुष्टं शिष्टं वा अनतिक्रम्य तत्तद्धर्माक्रान्त एव विभाति जीवरूपेण भासते यथा वायुः पार्थिवं दुष्टं शिष्टं वा गन्धमाश्रितो नाना गन्धवान् भवति नतु वस्तुतः ॥ ३४ ॥

संस्तुवतो दक्षस्य ॥ ३५—३६ ॥

कटकः पादकटकः वलयं हस्तवलयम् ॥ ३७—४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु ब्रह्मैव विश्वहेतुश्चेत्तर्हि ब्रह्मकारणवादिभिः सह प्रधान-परमाणवादिकारणवादिनः कुतो विवदन्ते इत्यत्राह । यदिति । यस्य ब्रह्मणः शक्तयः प्रकृत्याद्याः अज्ञाततया वादिनां पूर्वपक्षिणां साङ्ख्यादीनां विवादस्य पूर्वपक्षस्य जातत । च वदतां

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वेदान्तिनां सिद्धान्तिनां सम्वादस्य सिद्धान्तस्यापत्तस्य भुवो भूमयः निमित्तानि भवन्ति । एषां वादिनां भगवच्छक्त्यनभिज्ञानां मुहुरात्ममोहं च कुर्वन्ति तस्मै भूम्ने अप्रमेयाय नमः । अथ प्रधानादिविश्वहेतुत्वे अयोग्यतां ब्रह्मणस्तत्र योग्यतां च दर्शयति । अनन्तगुणायेति । सृज्यमानविश्वे तस्य सृजननियमनधारणपालना-अनन्ता अवाच्याः नित्या गुणा यस्मिन् तस्मै । ते च "अनन्तकल्याणगुणात्मकोऽसौ" इत्यादिश्रुतिषु प्रसिद्धाः "ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः । इति श्रीपराशरेणोक्ताश्च । अत्रापि "इमे चान्ये च भगवन्नित्या यत्र महागुणाः" इत्यादिषु प्रसिद्धाः । अचेतनानां प्रधानादीनामीश्वरवादिगुणहीनानां न जगत्कारणत्वमिति भावः ॥३१॥

तेषां मोहितत्वं दर्शयन् वेदप्रमाणकं ब्रह्मैव विश्वकारणमित्याह । अस्तीति । एकस्थमीश्वरभावनिष्ठं योगशास्त्रम् नास्तीति एकस्थमीश्वरसाङ्ख्यशास्त्रम् । एकस्थं च एकस्थं च एकस्थे तयोः भिन्नविरुद्धधर्मिणोः अन्योऽन्यभिन्नौ विरुद्धौ च धर्मौ प्रतिपाद्यौ पदार्थौ ययोस्तयोः वस्तुतः तदभिमतं जगत्कारणं तन्निष्ठयोः योगसाङ्ख्ययोः किमवेक्षितमहो किं विचारितं न च किमपीत्यर्थः । अयमर्थः । साङ्ख्ये लोकमीश्वरो नास्ति प्रधानमचेतनस्य जगतः कारणं न अस्तीति तदयुक्तम् "यतो वा इमानि भूतानि जायन्ते" इत्युपक्रम्य "तद् ब्रह्म तद्विजिज्ञासस्व" इति श्रुतिविरुद्धत्वात् योगे लोकमीश्वरोऽस्ति निमित्तमात्रं जगदुपादानकारणं तु प्रधानमिति तदप्ययुक्तं "तदात्मानं स्वयमकुरुत तदैक्षत बहु स्याम्" इत्यादिश्रुतिविरोधात् । तस्मात् द्वयोरेव परं जगत्कारणमनुकूलं स्यात्तयोः स्थितं भवति । यतः सम सर्वात्मभूतमित्यर्थः "कारणं तु ध्येयम्" इति श्रुतेः सर्वात्मभूतब्रह्मध्यानेनैव मुक्तिर्भवति न प्रधानाद्यनात्मध्यानेनेति फलितोऽर्थः । एतेन सर्वे वेदविरुद्धवादिनो भगवन्मायामोहिता इति बोधितम् ॥३२॥

एवं मायामोहितैरज्ञातोऽपि यः पादमूलं भजतामनुग्रहार्थं जन्मभिः रूपाणि मूर्तीः कर्मभिर्नामानि च भेजे स मह्यं प्रसीदताम् । तानि रूपाणि नामानि चाप्राकृतानीति द्योतयितुं नामरूपे व्याकरवाणीति श्रुतिप्रसिद्धेः अखिलप्राकृतनामरूपसंबन्धाभावं भगवत आह । अनामरूप इति ॥३३॥

एवं परत्वाविततथानुभूतये इत्यादिना परत्वसर्वात्मत्वमायामोहितजनदुर्ज्ञेयत्वविभुत्वसर्वान्तरात्मत्वसर्वप्राकृतनामरूपविलक्षणत्वादिभिर्गुणैः स्वरूपतो जीवविलक्षण एव भगवानित्युक्तम् । अत्र भ्रान्तास्तु देहे जीवः स एवेति जानन्तीत्याह । प्राकृतैः प्रकृतिमोहितजीवप्रवर्तितैः ज्ञानमार्गैः जनानां यथाशयमाशयमन्तःकरणमनतिक्रम्य यो देहगतो विभाति जीवधारकोऽपि जीवो विभाति न तु स जीवः "अन्तः प्रविष्टः शास्ता जनानां द्वा सुपर्णा सयुजा सखाया" इत्यादिश्रुतिगणव्याकोपात्तत्र दृष्टान्तमाह । यथा पार्थिवं गुणं गन्धं अितः तत्कारकः न तु पार्थिवगुणस्वरूपः अनिलः तथापि गन्धोऽयमिति जनानां विभाति तद्वदित्यर्थः । स मे मनोरथं कुर्वतात् मामिष्टार्थदानेन रक्षतु ॥ ३४ ॥

इत्येवमुक्तप्रकारेण संस्तुवतो दक्षस्य स भगवानाविः प्रत्यक्ष आसीत् ॥३५॥ ३६ ॥ ३७ ॥

भवन्ति किरीटकटकानि शिरश्चरणगतानि यस्य सः काञ्च्या विभ्रमितश्च वलयं हस्तभूषणं कटकस्याकरत्वात् ॥ ३८ ॥३९॥ आगतसाध्वसः । अभिरत्कातिशयाज्जातसंभ्रमः ॥ ४० ॥

भाषा टीका ।

जिन परमेश्वर की अनेक विचित्र शक्तियों को देखकर शास्त्रज्ञ लोगों के परस्पर मे अनेक वाद विवाद उत्पन्न होते हैं फिर भी वे कुछ निर्णय नहीं कर सकते हैं उनको मोह ही वारंवार होता है उन अनन्त गुण वाले व्यापक परमात्मा के अर्थ नमस्कार है ॥ ३१ ॥

परमात्मा एक वस्तु मे गुणादिकों का निषेध करने वाला साङ्ख्यशास्त्र है गुणादिकों का विधान करने वाला योग शास्त्र है इन दोनों में एक वस्तु मे कथन किया जो अस्ति नास्ति ये विरुद्ध धर्म प्रतीत होता है सो भी उसके विचार से देखने पर विरोध नहीं होता है क्यों कि निषेध प्राकृत गुणों का है विधान दिव्यगुणों का है इस प्रकार धर्म वाले सर्वत्र व्याप्त सबके अनुकूल समरूप परब्रह्म हैं ॥ ३२ ॥

जो परमात्मा प्राकृत नाम रूप रहित भी हैं तौ भी चरण कमल भजने वालों के अनुग्रह से अनन्त भगवान् होनेसे दिव्य जन्म कर्मों को करके नाम रूपो को धारण करते हैं वे परम ईश्वर मेरे अर्थ प्रसन्न होवें ॥ ३३ ॥

जो ईश्वर सब प्राणी मात्र के देह गत होने पर भी प्राकृत बुद्धि के अनुसार अनेक ज्ञान मार्गों से अनेक देवतादिरूप प्रतीत होते हैं जिस प्रकार से धूली को उडाने वाला पवन धूली के वर्ण से गिना जाता है ऐसी जिन की महिमा है सो ईश्वर मेरे मनोरथ को पूरा करें ॥ ३४ ॥

श्रीशुकदेवजी बोले हे कुरुश्रेष्ठ ! इस प्रकार स्तुति करने से उस अघमर्षण तीर्थमें भक्तवत्सल भगवान् स्तुति करने वाले दक्ष के सन्मुख प्रगट भये ॥ ३५ ॥

श्रीभगवान् गरुडजी के कांधे पर विराजे हैं उनके लंबायमान महा आठ भुजा हैं चक्र शङ्ख तलवार ढाल बाण धनुष पाश गदा इन आयुधों को भगवान् ने धारण किया है ॥ ३६ ॥

पीत पीतांबर को धारण किये हैं मेघ सरी के श्यामहैं मुखार विन्द औ नेत्र भगवान के अति प्रसन्न हैं वनमाला से शरीर भूषित है श्रीवत्स कौस्तुभ से अति शोभायमान हैं ॥ ३७ ॥

बडे भारी किरीट कङ्कण इन से शोभित हैं मकरकुण्डल प्रकाशमान हो रहे हैं कटि मेखला मुद्रिका कडा नूपुर बाजूबन्द इनों से भूषित हैं ॥ ३८ ॥

तीनों भुवनों के ईश्वर भगवान् तीनों लोकों के मोहन करने के रूप को धारण किये हैं नारदजी नन्दादी देवतों के यूथपति पार्षदों से भगवान सेवित हैं ॥ ३९ ॥

गान करते हुये सिद्ध चारणादिक भगवान के गान करते हैं और करते हैं बडे आश्चर्य युक्त ऐसे रूप को दर्शन करते मात्र भय भीत सा होकर नमस्कार दक्ष करने लगे ॥ ४० ॥

न किञ्चनोदीरयितुमशकत्तीव्रया मुदा ।
आपूरितमनोद्वारैर्ह्रदिन्य इव निर्झरैः ॥ ४१ ॥

तं तथावनतं भक्तं प्रजाकामं प्रजापतिम् ।
चित्तज्ञः सर्वभूतानामिदमाह जनार्दनः ॥ ४२ ॥

॥ श्रीभगवानुवाच ॥

प्राचेतस ! महाभाग ! संसिद्धस्तपसा भवान् ।
यच्छ्रद्धया मत्परया मयि भावं परं गतः ॥ ४३ ॥

प्रीतोऽहं ते प्रजानाथ ! यत्तेऽस्योद्बृंहणं तपः ।
ममैष कामो भूतानां यद्भूयासुर्विभूतयः ॥ ४४ ॥

ब्रह्मा भवो भवन्तश्च मनवो विबुधेश्वराः ।
विभूतयो मम ह्येता भूतानां भूतिहेतवः ॥ ४५ ॥

तपो मे हृदयं ब्रह्मंस्तनुर्विद्या क्रिया कृतिः ।
अङ्गानि क्रतवो जाता धर्म आत्मासवः सुराः ॥ ४६ ॥

अहमेवासमेवाग्रे नान्यत् किञ्चान्तरं बहिः ।
संज्ञानमात्रमव्यक्तं प्रसुप्तमिव विश्वतः ॥ ४७ ॥

मय्यनन्तगुणेऽनन्ते गुणतो गुणविग्रहः ।
यदासीत्तत एवाद्यः स्वयम्भूः समभूदजः ॥ ४८ ॥

स वै यदा महादेवो मम वीर्योपबृंहितः ।
मेने खिलमिवात्मानमुद्यतः सर्गकर्मणि ॥ ४९ ॥

अथ मेऽभिहितो देवस्तपोऽतप्यत दारुणम् ।
नव विश्वसृजो युष्मान् येनादावसृजद्विभुः ॥ ५० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आपूरितानि मनोद्वाराणि इन्द्रियाणि तैः । यथा ह्रदिन्यो नद्यो निर्झरैरापूर्यन्ते तथा महानन्दपूर्णत्वेन।वृत्तिकत्वाद्रागादीनां न किञ्चिद्वक्तुं शक्तोऽभूदित्यर्थः ॥ ४१ ॥

यद्यप्यसौ नावोचत्तथाऽपि चित्तज्ञ इदं वक्ष्यमाणमाह ॥ ४२ ॥

भावं भक्तिं गतः प्राप्तः ॥ ४३ ॥

यद्यतस्ते तपोऽस्य विश्वस्योद्बृंहणं वृद्धिकरमतस्तेऽहं प्रीतः मत्तपसो लोकसमृद्ध्यर्थत्वे त्वत्प्रीतेः किं कारणं तत्राह। ममेति । भूतानां विभूतयः समृद्धयो भूयासुरिति यदेष एव मम कामः अतो मत्कामपूरणादेवाहं प्रीतोऽस्मीत्यर्थः ॥ ४४ ॥

भूतिविस्तारप्रयत्नश्च तवोचित एवेत्याह । ब्रह्मेति । भवन्तः प्रजापतयः भूतसमृद्धस्य हेतवः ॥ ४५ ॥

विश्वसमृद्ध्यर्थेन त्वत्तपसाहं प्रीत इत्युक्तं तदेव तपः स्तुवन् प्रसङ्गादन्यान्यपि लोकवृद्धिकराणि विद्यादीनि स्तौति । तपो यमनियमादिसहितं ध्यानं मे हृदयम् विद्या साङ्गमन्त्रजपः ध्यानं तनोतीति तनुर्देहः क्रिया ध्यानादिविषयः पुण्यापायो भावनाशब्दवाच्यस्तेन हि ध्यानादिकमाक्रियत इत्याकृतिः । जाताः सुनिष्पन्नाः क्रतवोऽङ्गानि शिरो वा "एतद्यत्प्रवर्ग्यः ग्रीवा उपसदश्चक्षुषी आज्यभागौ" इत्यादिश्रुतेः धर्मः कृत्याद्यपूर्वमात्मा मनः हृदयाश्रयत्वात् । सुरा यज्ञभुजस्त एवासवः प्राणाः सन्तर्पणीयत्वात् ॥ ४६ ॥

तपसः सन्तानवृद्धिहेतुत्वं वर्णयितुं द्वितीयतृतीयोक्तमितिहासमाह चतुर्भिः । अहमेवेति । वस्त्वन्तरव्यावृत्तिः आसमेवेति क्रियान्तरव्यावृत्तिः आन्तरं ग्राहकं बहिर्ग्राह्यं संज्ञानमात्रं चैतन्यमात्रमव्यक्तमिन्द्रियवृत्तिभिरनभिव्यक्तम् अत एव प्रसुप्तमिव विश्वतः सर्वत्र ॥ ४७ ॥

गुणतो मायातः गुणमयो विग्रहो ब्रह्माण्डं ततस्तत्रैव अजोऽयोनिजः ॥ ४८ ॥

खिलमसमर्थमिव ॥ ४९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मे मया तप तपेत्यभिहितः सन् । येन तपसा ॥ ५० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तीव्रया निरतिशयया मुदा आपूरितानि मनोद्वाराणीन्द्रियाणि तैर्यथा ह्रादिन्यो नद्यो निर्झरैरापूर्यन्ते तथा महानन्दापूर्णत्वान्मनोद्वाराणां तैर्युक्तो न किञ्चिदपि मनीषितं कर्तुं शक्तोऽभूदित्यर्थः ॥ ४१ ॥

तथा निरतिशयया मुदा स्वमनीषितविज्ञानेऽप्यशक्तमवनतं नम्रीभूतं प्रजाः कामयमानं भक्तं प्रजापतिं दक्षं प्रति सर्वेषां सत्त्वानां भूतानां चित्तज्ञः अभिप्रायज्ञो भगवान् जनार्दनः इदं वक्ष्यमाणमुवाच ॥ ४२ ॥

उक्तमेवाह । प्राचेतस इति । हे महाबुद्धिमन् । प्राचेतस । भवान् तपसा संसिद्धः । यत् यस्मात् परया श्रद्धया मयि परमुत्कृष्टं भावं भक्तिं गतः प्राप्तवान् ॥ ४३ ॥

हे प्रजानाथ । ते तुभ्यमहं प्रीतः । कुतः । यस्मात्ते तव तपः अस्य जगत उद्बृंहणं वर्द्धकं जगद्वर्द्धकत्वात्तपसस्तेनाहं प्रीत इति भावः । एतदेवोपपादयति । ममेत्यर्द्धेन । ममायमेव कामः कोऽसौ कामस्तत्राह । यद्भूतानां भूतयः समृद्धयो भूयासुः भवेयुरिति यस्तन्मन्मनीषितं जगद्वृद्धिकरत्वात्त्वत्तपसस्तेनाहं प्रीत इत्यर्थः ॥ ४४ ॥

ब्रह्माद्यनुभवेन भूतिविस्तारप्रयत्नश्च तवोचित एवेत्याह । ब्रह्मेत्येकेन श्लोकेन । ब्रह्मा चतुर्मुखः भवो रुद्रः भवन्तः प्रजापतयः मनवः स्वायम्भुवादयः विबुधेश्वरा इन्द्रादयश्च ये ते सर्वे मम विभूतयः अंशाः । भूतानां भूतिहेतवः समृद्धिहेतवः पाति हेतव इति पाठे पतयश्च हेतवश्चेत्यर्थः ॥ ४५ ॥

विश्ववृद्धिकरत्वात्तपसाहं प्रीत इत्युक्तं तदेवस्तुवन् प्रसङ्गात्स्वान्यपि लोकवृद्धिकराणि स्तौति । तप इति । हे ब्रह्मन् तपः ध्यानं मम हृदयं विद्या मन्त्रजपः तनुः शरीरं क्रियाः स्मार्त्तक्रिया आकृतिः संस्थानं क्रतवो यज्ञाश्च ममाङ्गान्यवयवाः । सोमसाध्या यज्ञाः क्रतवश्च पुरोडाशादिसाध्या यज्ञा इति भेदः । क्रतवो ज्ञाता इति पाठे क्रतवो ममाङ्गानि ज्ञाता इत्यर्थः । धर्मः स्मार्तो दानादिरूपः आत्मा मनः असवः प्राणाः । तपआदीनां स्वहृदयत्वेन रूपणं तत्स्तुत्यर्थं स्वस्य जगदुत्पत्तिस्थितिलयहेतुत्वाज्जगत्कारणस्वावयवत्वेन रूपणे हि तपआदीनां स्तुतिः सम्पन्ना भवति । यद्वा । हृदयतन्वाकृत्यङ्गात्मासूनां लोके प्रीतिविषयत्वदर्शनात्स्वस्य तपआदयो नितरां प्रीतिविषया इति ज्ञापनाय हृदयाद्यभिभावेन रूप्यन्ते ॥ ४६ ॥

भगवतस्तपोपबृंहितत्वमेव वक्तुं तावज्जगदुत्पत्तेः प्राक्कारणस्य वस्तुनोऽवस्थानप्रकारमाह । अहमेवेति । अग्रे सृष्टेः प्रागहमेवासम् । अहमेव एवाविभक्तनामरूपचिदचिच्छरीरकोऽवस्थित इत्यर्थः । तदेवोपपादयति । अन्यदान्तरं चिद्रूपं बहिः अचिद्रूपं किञ्चिन्नासीत् कार्यावस्थापन्नं चिदचित्तत्त्वं किञ्चिन्नासीदित्यर्थः । तदा जीवप्रकृतिस्वरूपनाशशङ्काव्यावृत्त्यर्थमाह । संज्ञानमात्रमिति । सं जानातीति संज्ञानं नन्द्यादित्वात् कर्तरि ल्युः । तदेव तन्मात्रं मात्रशब्देन देवमनुष्यादिनामरूपविभागव्यावृत्तिः । नामरूपविभागरहितं ज्ञानं तथा विश्वतः कार्त्स्न्येन प्रसुप्तं प्रलीने सूक्ष्ममव्यक्तं प्रधानं च प्रसुप्तमिवेतीव शब्देन तस्य लीनत्वेऽपि जगदाकारमना परिणामशक्तिस्तस्यानपगतेति सूच्यते ॥ ४७ ॥

अनन्तकल्याणगुणाकरे स्वरूपतोऽप्यनन्ते मयि आसीदिति क्रियापदविपरिणामेनान्वयः । मयि शरीरत्वेनावस्थितमासीदित्यर्थः । एवं सूक्ष्मचिदचिच्छरीरकत्वेनावस्थितस्य मम शरीरभूताद्गुणत्रयात्मकप्रधानात्महदादिक्रमेण गुणविग्रहः त्रिगुणपरिणामरूपो ब्रह्माण्डात्मको विग्रहो मम देहः यदासीत्तदा ततो गुणविग्रहादेवाद्यः समष्टिपुरुषः स्वयम्भुरयोनिजः अजो ब्रह्मा आसीत् ॥ ४८ ॥

स वै महादेवो ब्रह्मा मम वीर्येण सङ्कल्परूपज्ञानेन उपबृंहितः अनेन जीवेनात्मनानुप्रविश्येत्युक्तरीत्या सङ्कल्परूपज्ञानेन व्याप्त इत्यर्थः । तदा सर्गकर्मणि जगत्सृष्टिकर्मणि उद्युक्तोऽपि खिलमसमर्थमिवात्मानं स्वात्मानं मेनेऽमन्यत ॥ ४९ ॥

अथासमर्थत्वेनात्मनो मनसो मननानन्तरं मे मयाभिहितः तप तपेत्यभिहितः दारुणं दुष्करं तपोऽतप्यताकरोत् । स च तप्ततपा विभुर्ब्रह्मा येन तपोबलेन विश्वसृजः प्रजापतीन् युष्मान् दक्षादीनसृजदतस्तप एव विश्वस्योपबृंहणमित्यभिप्रायः ॥ ५० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ह्रादिन्यः ह्रादिनीभवाः जलनिर्गमः ॥ ४१ ॥

इदमपि निजरूपत्वसाधकमित्याशयेनाह । तं तथेति ॥ ४२ ॥

भावं भक्तिम् ॥ ४३ ॥

बृंहणं प्रजापूरणयोजनं कामोऽभिप्रायः ॥ ४४ ॥

विभूतयः मम विशेषेण सन्निधानस्थानभूताः । "विशेषव्यक्तिपात्रत्वाद्ब्रह्माद्यास्तु विभूतयः । तदन्तर्यामिणश्चैव मत्स्याद्या विभवा इति" इति वचनात् ॥ ४५ ॥

ब्रह्म पूर्णं तपो मे हृदयं प्रियं कुतस्तपोऽभिमानी रुद्रः मम हृदयाज्जातः तदाश्रितश्चेत्येवं व्याख्येयं विद्या मम तनुः स्वरूपं विद्याभिमानिन्युमा तनोर्जाता तदाश्रिता क्रियाभिमानी त्विन्द्रो हरेराकृतेः शृङ्गाराद्याकाराज्जातस्तदाश्रितश्च क्रतवो यज्ञाः सङ्कल्पा वा तदाश्रिताश्च अभिमानी च पूर्वोक्त एव । धर्मो धर्मराजः हरेरात्मा मध्यदेहाज्जातः तदाश्रितश्च । सुराः सुरोऽममानमेव राः (१) कुल्यानं यस्य स सुराः वायुस्त्रिसगतः हरेरतिप्रियः असवो हरेः प्राणाज्जातस्तदाश्रितश्च । असव इति बहुवचनमप्शब्दवत् (२) । प्राणाद्याः सुराश्च हरेरसुशब्दवाच्येभ्यः श्रोत्रादीन्द्रियेभ्य उत्पन्नाः तदाश्रिताश्चेति द्विरावृत्त्या व्याख्येयम् ।

तपोऽभिमानी रुद्रश्च विष्णोर्हृदयमाश्रितः ।
विद्यारूपा तथा चोमा विष्णोस्तनुमुपाश्रिता ॥
शृङ्गाराद्याकृतिगतः क्रियात्मा पाकशासनः ।
अङ्गेषु क्रतवः सर्वे मध्यदेहे च धर्मराट् ॥
प्राणो वायुस्त्रिसगतो प्राणाद्याः स्वेषु देवताः ।

---

(१) राशब्दस्य कुल्याशब्दवाचित्वात्कुल्यानामित्युक्तम् कुल्यानं ज्ञातव्यकुलयोग्यानाम् ।

(२) अप्शब्दवदित्यनेन अप्शब्दो नित्यं बहुवचनान्त इति सूच्यते "पुंसि भूम्न्यसवः प्राणा" इत्यभिधानम् सुराः सुरायां सुराय इति रूपम् ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

इतिवचनादुक्त एवार्थो ग्राह्यः। रुद्रादीनां हरेरस्त ईशशब्दवाच्यत्वम् "यदाश्रयं यद्भवति तत्तन्नामकमीरितम्" इत्यभिधानात् सिद्धम्॥४६॥

अत्राद्वैतवादिनो निर्गुणं वाङ्मनसागोचरं जगत्कारणं सगुणमिति द्विविधं कल्पयन्ति तन्मतनिराकरणायाह। अहमेवेत्यादिना। "सप्तसु प्रथमा" इति सूत्रात्। अहं मम यदिदं स्वरूपं त्वया तपसा दृष्टं तदेवाग्रे सृष्टेः प्राक् लये आस अन्यद्वाङ्मनसागोचरं नास "सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा" इतिश्रुतेः। असति प्रलये कीदृशमन्तर्बहिः सर्वान्तः स्थितं सर्वस्माद्बहिरपि स्थितम् "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति श्रुतेः। तपसा दृष्टं प्राकृतं चेदुक्तार्थानुपपत्तिरित्यत उक्तं संज्ञानमात्रमिति। समित्यनेन ज्ञानस्य स्वरूपाभेदं ध्वनयति मात्रशब्देन प्रकृतिप्राकृतरूपराहित्यमवतारूपाणां च तदात्मत्वं सूचयति "सत्यं ज्ञानम्" इति श्रुतेः। अत एवाव्यक्तमतिसूक्ष्मम् "तदव्यक्तमाह हि" इति सूत्रात्। हरेः स्वापवचनमपि लोकव्यामोहनायेति भावेनाह। प्रसुप्तमिवेति। कृतचक्षुर्निमीलनमात्रं नत्वज्ञानात्मकनिद्रया युतं श्रियं विनावस्थितं स्वापावस्थाभागित्यर्थः। सर्वं हरौ लीनं चेन्मुख्यतस्तदविशेष एव किं न स्यादित्यत उक्तं विश्वत इति। विश्वस्माद्भिन्नमिति शेषः। अनेन हरेर्नानावर्णत्वं तथा करचरणाद्यवयवत्वं श्रियमन्तरेणावस्थानं ध्वनितं तत्कथं युज्यत इतीयमाशङ्का "नानावर्णो हरिस्त्वेको बहुशीर्षभुजोरुपात्। आसील्लये तदन्यस्तु सूक्ष्मरूपं श्रियं विना। असुप्तः सुप्त इव च मीलिताक्षो भवेद्धरिः। अन्यत्रानादराच्छ्रीश्च विष्णौ लीनेव कथ्यते। सूक्ष्मत्वेन हरौ स्थानाल्लीनमन्यदपीष्यते"। इत्यनेन परिहर्तव्येति। सृष्टौ स्वीकृतनानावर्णं ज्ञानात्मकावयवं यद्रूपं दृष्टं तदेव प्रलये स्वोदरलीनप्रपञ्चं नित्यप्रबुद्धमपि स्वलीनवत्स्थितं श्रीतत्त्वेन मीलिताक्षमपरिच्छिन्नं श्रीहरिरूपमिति भावः॥४७॥

जयमुक्त्वा सृष्टिमाह। मयीति। मयि मत्सम्बन्धिनाभेः यत्पद्ममासीत् ततः पश्चादेव स्वयम्भूः समभूदित्यन्वयः। कोऽसौ स्वयम्भूरित्यत उक्तमज इति "अजा विष्णुहरच्छागा" इत्यतः कथं निर्णय इत्यत उक्तमाद्य इति। जगदादौ भूतश्चतुर्मुख एवेत्यर्थः। "अजः पितामहो ब्रह्मा" इत्यभिधानाच्च। कीदृशे मयि अनन्तगुणे असङ्ख्यातज्ञानादिगुणे गुणतोऽनन्ते प्रत्येकशोऽप्यसङ्ख्याते अनन्तविग्रहे असङ्ख्यातरूपे "प्रत्येकशो गुणानां तु निःसीमत्वमुदीर्यते। अनन्तत्वं तु गुणतस्तेष्वानन्ता हि संख्यया। अतोऽनन्तगुणो विष्णुर्गुणतोऽनन्त एव च" इति वचनं चात्र मानम्॥४८॥

महादेवः देवेभ्यो महानुत्तमः। स ब्रह्मा अकल्पमशक्तं स्रष्टुमिति शेषः॥४९॥

अथ तदा मे मया येन तपसा॥५०—५२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तीव्रया नितान्तया मुदा स्वात्मस्थितत्प्रेमरूपया। आपूरितैः सर्वेणाप्यंशेन पूरितैः सद्भिर्मनोद्वारैः ज्ञानेन्द्रियैरिति तत्तदावेशात् स्वात्मनः सर्वांशेन पूरितैर्निश्चलैर्जलनिर्गमैर्द्वारैरिव इवेति॥४१—४४॥

नन्वकामस्य तव कथम्भूतविभूतिकामना। उच्यते। भक्तसम्बन्धात्तद्वात्सल्येनेत्याह। भक्तेति। अस्माद्यो भक्ता हि मनवः मम विभूतयः ते आत्मेषां भूतिहेतव इति॥४५॥

यतो भक्तिः खलु ममान्तरङ्गा शक्तिरित्याह। तप इति॥४६॥

तत्र भक्त एव मम सृष्ट्यादिसम्बन्धे हेतुरिति दर्शयितुमाह। अहमिति। पद्यमिदं जगदाधिकृत्य नतु वैकुण्ठमधिकृत्येति ज्ञेयम्॥४७॥

भक्तमेव दर्शयति। मयीति॥४८॥

वायोपबृंहितः वायोर्जातः॥४९॥

तस्य च भक्तिं दर्शयति। अथेति। तस्माद्भवतोऽपि भूतिविभूतिहेतुत्वं भक्तत्वादेवेति॥५०—५२॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

यथा कृल्याभिर्नद्यो निर्झरैरापूर्यन्ते तथा मुदा आनन्देन आपूरितानि मनोद्वाराणि चक्षुरादीन्द्रियाणि तैर्हेतुभिः किञ्चन उदीरयितुं वक्तुं द्रष्टुं श्रोतुं वा नाशकत्॥४१—४२॥

परमात्मानं परं साक्षात् परमात्मैवायमिति श्रेष्ठा भावनाम्॥४३॥

अस्य विश्वस्य उद्बृंहणां वृद्धिकरं यत्तत्तपोऽभूत् एव समैव कामः मदिच्छयैव तव तपः सिद्धं बभूवेत्यर्थः। ननु किमाकारस्ते कामस्तत्राह। भूतानां विभूतयः समृद्धयो भूयासुरिति यदेष एवेति॥४४॥

ननु भवादृशा निकृष्टा एवेत्याह। अहोति॥४५॥

कर्मयोगे समुचितं मे रूपं शृण्वित्याह। तपः यमनियमादिकं मे हृदयम्। विद्या साङ्गमन्त्रजपो मे तनुः। क्रिया नित्यनैमित्तिकाद्या ममाकृतिः आकारः। क्रतवो ममाङ्गानि शिरो वा "एतद्यत् प्रवर्ग्य उपसदश्चक्षुषी आज्य भागौ" इत्यादि श्रुतेः। जाता अभूवन्। धर्मः क्रत्वाद्यपूर्वं ममात्मा मनः। ममासवो देवाः सच्चिदानन्दस्वरूपस्य मम हृदयादिविभूतयस्तपआदयः॥४६॥

भक्तियोगे समुचितं मे स्वरूपं शृण्वित्याह। अहमेव त्वया दृश्यैतत्स्वरूपवस्त्रालङ्कारायुधवाहनपार्षदादिविशिष्टं एवाग्रे सृष्टेः पूर्वमासमेव। तथैवाग्रे महाप्रलयानन्तरमपि भविष्याम्येवेत्यग्रे इत्यस्य पूर्वापरकालवाचित्वाल्लभ्यते। साम्प्रतं त्वस्म्येवेत्यस्य स्वत एव प्राप्तिरिति स्वस्य त्रैकालिकी सत्ता दर्शिता। किञ्च। ममान्तरं बहिश्च अन्यत् किमपि नास्ति। परिच्छिन्नस्यापि मत्स्वरूपस्य व्यापकत्वादिव्यचिन्त्यशक्तिमत्त्वञ्च दर्शितम्। यद्वक्ष्यते "न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरम्। पूर्वापरं बहिश्चान्तर्जगतो यो जगच्च यः। तं मत्वात्मजमव्यक्तं मर्त्यलिङ्गमधोक्षजम्। गोपिकोलूखले दाम्ना बबन्ध प्राकृतं यथा" इति। ज्ञानयोगे समुचितं स्वरूपं शृण्वित्याह। संज्ञानमात्रं चैतन्यमात्रम्। अव्यक्तमिन्द्रियवृत्तिभिरग्राह्यं विश्वतः सर्वत्र॥४७॥

स्वस्वरूपसत्त्वमुपदिश्य सृष्टौ प्रवर्त्तयितुमितिहासमाह। मयीति। गुणतो मायातः। गुणविग्रहो महालक्ष्मीब्रह्माण्डं ततस्तन्मध्य एव स्वयम्भूर्युष्माकमाद्यः॥४८॥

खिलमसमर्थमिव॥४९॥

मे मया तप तपेत्युक्तः सन् येन तपसा॥५०॥

एषा पञ्चजनस्याङ्ग दुहिता वै प्रजापतेः ।
असिक्नी नाम पत्नीत्वे प्रजेश प्रतिगृह्यताम् ॥ ५१ ॥
मिथुनव्यवायधर्मस्त्वं प्रजासर्गमिमं पुनः ।
मिथुनव्यवायधर्मिण्यां भूरिशो भावयिष्यसि ॥ ५२ ॥
त्वत्तोऽधस्तात् प्रजाः सर्वा मिथुनीभूय मायया ।
मदीयया भविष्यन्ति हरिष्यन्ति च मे बलिम् ॥ ५३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

निर्भरैर्ह्रदिन्यो नद्य इव मुदा आपूरितमतोद्वारैरानन्दितान्तःकरणबहिरिन्द्रियः किञ्चनाप्युदीरयितुं नाशकत् ॥४१॥ ४२ ॥

भावं भक्तिम् ॥ ४३ ॥

यत् यस्मात्ते तपः अस्योद्बृंहणं वृद्धिकरमतस्ते तुभ्यं प्रीतोऽहं प्रीतिमेव दर्शयति । भूतानां विभूतयः समृद्धयो भूयासुर्भवेयुरिति यदेष ममैव कामः ॥ ४४ ॥

भूतिहेतवो विभूतिवृद्धिकराः तपसेति शेषः ॥ ४५ ॥

प्रस्तुतं स्वप्रीतिजनकं तपः स्तवंस्तद्वृद्धियादीन्यपि स्वप्रीतिजनकानि स्तौति । तप इति । हृदयं मनः । तनुरीहः क्रिया सदाचारः । आकृतिः आकारः । जाताः स्वनुष्ठिताः क्रतवः मखानि आत्मा स्वरूपम् ॥ ४६ ॥

ननु यस्तपसा प्रीतोऽभूत् यस्य च ब्रह्मादयो विभूतयः स त्वं कः कुतश्च ते तव विभूतय इत्यत्र अहं सर्वहेतुर्ब्रह्मादयो मत्कार्यत्वान्मद्विभूतय इति सूचयन् पुनस्तपस्तौति । अहमिति चतुर्भिः । अग्रे सृष्टेः पूर्वम् अहं सर्वबीजभूतं ब्रह्मैव आसमेव अन्यत्तत् प्रथमान्तरं सौकृतं बहिर्भोग्यवस्तु किञ्चन किञ्चनापि नासीत् । सर्वस्य सूक्ष्मरूपेण मदन्तर्गतत्वात् । कथम्भूतम् । संज्ञातमात्रं स्वरूपम् ज्ञानमात्रं ज्ञेयस्य विश्वस्य स्वस्मिन्नुपसंहृतत्वादित्यर्थः । अत एवाव्यक्तं विश्वाकारं व्यक्तावस्थारहितम् । विश्वतः सर्वतः प्रसुप्तमिव ॥ ४७ ॥

गुणात्मनः शक्तिगुणेभ्यः । गुणविग्रहो ब्रह्माण्डाख्यो मम देहः । ततस्तदनन्तरम् आद्यः प्रजानां पूर्वः अजोऽयोनिजः ॥ ४८ ॥

स महादेवो ब्रह्मा मम वीर्येणोपबृंहितः उत्पादितः । सर्गकर्मणि उद्यतः आत्मानं खिन्नमसमर्थमनाथमिव मेने नाथे मयि विद्यमानेऽपीति द्योतयितुमिवशब्दः ॥ ४९ ॥

दारुणं दुष्करं विभुर्विपुलबोधः ॥ ५० ॥

भाषा टीका ।

दक्ष प्रजापतिने पृथिवी मे दंड की नाई गिरकर भगवान् को प्रणाम किया बड़े भारी आनन्द के होने से मुख से वचन निकालने से समर्थ नहीं होसके ॥ ४१ ॥

जैसे झरनाओं से नदी भरजाती हैं तैसे प्रजापति के मन इन्द्रियद्वार सब आनन्द से भरगये स्तोत्र के फलरूप प्राप्त परमात्मा को नमस्कार करते रहेगये ॥ ४२ ॥

प्रजाओं की कामना करने वाले तिस प्रकार से नम्र प्रजापति को देखकर सब के चित्त की जानने वाले जनार्दन भगवान् इस वचन को बोले ॥ ४३ ॥

श्रीभगवान् बोले हे महाभाग ! प्राचेतस ! तुम अब तपस्य से सिद्ध होगये जिससे कि परमश्रद्धा से मेरे में परम प्रेम को करते हो ॥ ४४ ॥

हे प्रजानाथ ! मै तुमारे ऊपर प्रसन्न हूं जो तुमने प्रजा-वृद्धिके लिये तप किया है सो हमारे को भी अभिमत है क्योंकि हम चाहते हैं कि संसार में सबकी विभूति बढ़ै ॥ ४५ ॥

ब्रह्मा महादेवजी आप मनु लोग इन्द्र यह सब हमारी विभूती हैं जोकि प्रजाओं की विभूतियों के हेतु हैं ॥ ४६ ॥

सृष्टिके पूर्वकालमें केवल मैंही रहा और भीतर अन्तःकरण से बाहिर चक्षु आदि को से जानने लायक कुछ नहीं था सब जगत् सोया सरीका होगया था केवल ज्ञानमात्र ही था ॥ ४७ ॥

अनन्तगुणवाले अनन्त मेरे विषै गुणों से सत्वादि गुणरूप भारी गुणोंकी मूर्तिवाला सबका आद्यस्वयम्भू अज ब्रह्मा भया ॥ ४८ ॥

वह ब्रह्मा जब हमारे वीर्यसे वृद्धिको प्राप्त भया तब भी सृष्टि के कर्म मे उद्यत होने पर अपने को ब्रह्माने असमर्थ समुझा ॥ ४९ ॥

तब उस देव ब्रह्माने मेरे कथन से अति कठिन तप किया जिस तपके करने से समर्थ होकर ब्रह्माने आरंभे आप दक्षादि नौ प्रजापतियों को सृजा है ॥ ५० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सन्ततिवृद्ध्युपायमाह । एषेति । अङ्ग ! हे दक्ष ! पञ्चजनाख्यस्य प्रजापतेः ॥ ५१ ॥

मिथुनस्य यो व्यवायो रतिः स एव धर्मो यस्य स त्वम् तथाभूतायां तस्याम् ॥ ५२ ॥

॥ श्रीशुक उवाच ॥

इत्युक्त्वा मिषतस्तस्य भगवान् विश्वभावनः ।
स्वप्नोपलब्धार्थ इव तत्रैवान्तर्दधे हरिः ॥ ५४ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां षष्ठस्कन्धे प्रचेतसां दक्षोत्पत्ति-
वर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मायया निमित्तभूतया । स्त्रिया सह मिथुनीभूय भविष्यन्ति पुत्रादिरूपेणोत्पत्स्यन्ते ॥ ५३ ॥ ५४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सन्ततिवृद्ध्युपायमाह । एषेति । अङ्ग हे दक्ष ! पञ्चजनस्य प्रजापतेर्याऽसिक्नी नाम दुहिता सैषा हे प्रजेश ! पत्नीत्वे भार्यात्वेनेत्यर्थः । प्रतिगृह्यतां त्वयेति शेषः ॥ ५१ ॥

मिथुनस्य यो व्यवायो रतिः स एव धर्मो यस्य सः त्वं मिथुनव्यवायधर्मिण्यामसिक्न्यामिमं प्रजासर्गं भूरिशो भावयिष्यसि वर्द्धयिष्यसीत्यर्थः । उभयोरपि मिथुनव्यवायधर्मविशेषणं परस्परसानुकूल्यसूचनार्थम् ॥ ५२ ॥

त्वत्तोऽधस्तादर्वाचीनाः प्रजाः सर्वाः मदीयया मायया मत्सङ्कल्पेन मिथुनीभूय भविष्यन्ति । मिथुनीभूता भविष्यन्ति मिथुनकर्मणोत्पत्स्यन्त इत्यर्थः । त्वत्तोऽधस्तात् प्रजा इत्यनेन प्राचेतसात्पूर्वं केवलसङ्कल्पादिभिरपि प्रजानामुत्पत्तिरस्ति सूचितम् । तथा मे मह्यं च बलिं हरिष्यन्ति । मदाराधनरूपं यज्ञादिकर्म करिष्यन्तीत्यर्थः ॥ ५३ ॥

इतीत्थमुक्त्वा विश्वस्य भावन उत्पादको भगवान् हरिस्तस्य प्राचेतसस्य मिषतः पश्यतः सतः स्वप्नोपलब्धार्थ इवेति विस्मयनीयत्वे विपद्दर्शित्वे च दृष्टान्तः । यथा "रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम्" इति ॥ ५४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्र-
चन्द्रिकायां चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मदीयया मत्सृष्ट्या मायया स्त्रीरूपिण्या अधस्तादर्वाचीनाः । बलिं मे हरिष्यन्ति दास्यन्ति ॥ ५३ ॥

मिषतः पश्यतः ॥ ५४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मिथुनीभूयेति केवलं मिथुनीभूयैवेत्यर्थः ॥ ५३—५४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

त्वमपि सर्वरूपे पैतृके धर्मे वर्त्तस्वेत्याह । एषेति ॥ ५१ ॥

मिथुनस्य स्त्रीपुंसयोर्यो व्यवायः रतिः स एव धर्मो यस्य स त्वम् । तथा भूतायां तस्यामिति तादृशहंसगुह्यस्तवेन स्तुतेनापि दत्तनिजश्रीमूर्त्तिदर्शनप्रसादेऽपि उपदिष्टनिजतत्त्वोऽपि दक्षो भगवता यत् कर्ममार्गगम्ये विषयभोगे निःसीमके निक्षिप्तो नतु स्वप्रेमामृतसिन्धौ । तत्खलु स्वमहाभक्तश्रीरुद्रापराधशेषस्याभङ्गुरत्वेन हेतुना इति गम्यते । अतएवानन्तराध्याये श्रीमुनीन्द्रेणापि विष्णुमायोपबृंहित इत्याख्यास्यमानो दक्षो नारदमप्यावेक्ष्यतीति पुनरप्यस्य महदपराधः फलिष्यति । न च कर्द्दमोऽपि भगवता विषयभोग एव निक्षिप्त इति वाच्यम् । तस्यैतत्सकामत्वमालक्ष्यैव भगवता सावधिक एव विषयभोगवरोदत्तः । नतु निरवधिक एव । यदुक्तं तत्रैव "त्वञ्च सम्यगनुष्ठाय निदेशं मे उशत्तमः । मयि तीर्थीकृताशेषक्रियार्थो मां प्रपत्स्यसे" इति । स च कर्द्दमोऽपि अनुग्रहायास्त्वयीत्यादिना भक्तिमेवान्ते प्रार्थयामास । एवं सकामा अपि सर्व्वे एव भक्ता ध्रुवादयो भक्तिमेवाकाङ्क्षुरेव दक्षस्त्वजं भक्तिं नाकाङ्क्षति स्म भगवानपि तां नददावित्येतदेवापराधशेषस्यास्तित्वे लक्षणमिति ॥ ५२ ॥

भविष्यन्ति पुत्रादिरूपेण जनिष्यन्ते ॥ ५३-५४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठस्कन्धे चतुर्थोऽयं सङ्गतः सङ्गतः सताम् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

कुरुतान्मे मनोरथमिति तद्वाञ्छितं प्रजावृद्ध्युपायमाह । एषेति । ॥ ५१ ॥

मिथुनस्य स्त्रीपुरुषयुग्मस्य यो व्यवायो रतिः स एव धर्मो यस्य । स त्वं तथाभूतायां प्रजासर्गं भूरिशः बहुप्रकारं भावयिष्यसि ॥ ५२ ॥

अधः अधस्तात्पश्चात् । मिथुनीभूय द्वन्द्वीभूय भविष्यन्त्यपत्यरूपैस्त्वत्परस्यन्ते ॥ ५३ ॥

मिषतः पश्यतः ॥ ५४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे चतुर्थोध्यायार्थप्रकाशः ॥ ४ ॥

भाषा टीका ।

अब हे प्रजेश ! दक्ष ! यह पञ्चजन प्रजापति की पुत्री असिक्री नाम की है इसको तुम पत्नी रूपसे ग्रहण करो ॥ ५१ ॥

स्त्रीपुरुष के सङ्गसे रति करनेवाले तुम होवो यह भी मिथुन धर्मवाली है इसमें तुम फिर बहुत प्रजाओंकी उत्पत्ति करोगे ॥५२॥

हमारी माया से तुमारे से नीचे के सब प्रजा मैथुन धर्मवाले होकर पैदा होंगे और मेरी सेवा करेंगे ॥ ५३ ॥

श्रीशुकदेवजी बोले विश्वपालक भगवान् हरि इस प्रकार कहकर दक्ष के देखते ही देखते स्वप्नमे मिले पदार्थ सरीके उसी ठिकाने अन्तर्धान होगये ॥ ५४ ॥

इति श्रीभागवत षष्ठस्कन्ध चौथे अध्यायका भाषानुवाद ब्रह्मण्याचार्यकृत समाप्त ॥ ४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे चतुर्थोऽध्यायः समाप्तः ॥ ४ ॥

॥ पञ्चमोऽध्यायः ॥

॥ श्रीशुक उवाच ॥

तस्यां स पाञ्चजन्यां वै विष्णुमायोपबृंहितः ।
हर्यश्वसंज्ञानयुतं पुत्रानजनयद्विभुः ॥ १ ॥

अपृथग्धर्मशीलास्ते सर्वे दाक्षायणा नृप ! ।
पित्रा प्रोक्ताः प्रजासर्गे प्रतीचीं प्रययुर्दिशम् ॥ २ ॥

तत्र नारायणसरस्तीर्थं सिन्धुसमुद्रयोः ।
सङ्गमो यत्र सुमहन्मुनिसिद्धनिषेवितम् ॥ ३ ॥

तदुपस्पर्शनादेव विनिर्धूतमलाशयाः ।
धर्मे पारमहंस्ये च प्रोत्पन्नमतयोऽप्युत ॥ ४ ॥

तेपिरे तप एवोग्रं पित्रादेशेन यन्त्रिताः ।
प्रजाविवृद्धये यत्तान् देवर्षिस्तान् ददर्श ह ॥ ५ ॥

उवाच चाथ हर्यश्वाः ! कथं स्रक्ष्यथ वै प्रजाः ।
अदृष्ट्वान्तं भुवो यूयं बालिशा बत पालकाः ॥ ६ ॥

तथैकपुरुषं राष्ट्रं बिलं चादृष्टनिर्गमम् ।
बहुरूपां स्त्रियं चापि पुमांसं पुंश्चलीपतिम् ॥ ७ ॥

नदीमुभयतोवाहां पञ्चपञ्चाद्भुतं गृहम् ।
क्वचिद्धंसं चित्रकथं क्षौरपव्यं स्वयं भ्रमिम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पञ्चमे नारदेनाथ वाचःकूटैस्तु नाशितान् ।
सुतानाकर्ण्य दक्षोऽमुं शशापेति निरूप्यते ॥ १ ॥ १ ॥

अपृथग्धर्मशीला एकाचारस्वभावाः ॥ २ ॥

तत्र प्रतीच्यां दिशि सिन्धोर्नद्याः समुद्रस्य च यत्र सङ्गमस्तत्रस्थं नारायणसरोनाम तीर्थं प्रययुरित्यन्वयः । सुमहदतिविस्तीर्णम् ॥ ३ ॥

विनिर्धूतो मलो रागादिर्यस्मात् स आशयो येषाम् ॥ ४ ॥

तान् शुद्धसत्त्वानपि पित्रादेशजाड्येन प्रजाविवृद्धये यत्तान् युक्तान् ददर्श ॥ ५ ॥

अहो कष्टं मोक्षमार्गाधिकारिणः सन्त एते प्रवृत्तिनिष्ठैः कर्मभिर्नश्येरन्निति कृपया तान्निगूढार्थैर्वाक्यैरुपादिशति स्म । तदाह । उवाचेति चतुर्भिः । पालकाः सन्तोऽपि बालिशा अज्ञा यूयं कथं प्रजाः स्रक्ष्यथ । बतेति खेदे । पालका इति पाठे बालिशत्वे हेतुः ॥ ६ ॥

एक एव पुरुषो यस्मिंस्तद्राष्ट्रमदृष्ट्वेत्यनुषङ्गः । बिलञ्चेत्यादिद्वितीयान्तानामविज्ञाय कथं सर्गं करिष्यथेति तृतीयेनान्वयः ॥ ७ ॥

पञ्च पञ्चानां पञ्चविंशतेरद्भुतं गृहं क्षौरपव्यं क्षुरैः पविभिर्वज्रैश्च निर्मितमिवातितीक्ष्णं दृढं चेत्यर्थः । स्वयं स्वतन्त्रं भ्रमिं भ्रमणस्वभावम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः प्राचेतसः किमकरोदित्यत्राह मुनिः । स इति । विष्णुमायोपबृंहितः भगवत्सङ्कल्पेन व्याप्तः स विभुर्दक्षः तस्यां पाञ्चजन्यां पञ्चजनस्य दुहितरि हर्यश्वसंज्ञानयुतं पुत्रानजनयत् ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तान्विशिनष्टि । हे नृप ! सर्वे दाक्षायण्याः दक्षस्य पुत्र्याः । अनन्तरापत्ये फगार्षः । अपृथग्धर्मशीलाः समानधर्माचरणशीलाः । प्रजासर्गे निमित्ते पित्रा प्राचेतसेन प्रोक्ताः आदिष्टाः प्रतीचीं दिशं प्रययुः ॥ २ ॥

क सिन्धुसमुद्रयोर्यत्र सङ्गमः यत्र नारायणसरआख्यं सुमहत्पुण्यमत एव मुनिभिः सिद्धैश्च निषेवितं तीर्थं वर्त्तते तत्र ययुरित्यर्थः ॥ ३ ॥

तस्य तीर्थस्योपस्पर्शनादेव विनिर्धूतमलः निरस्तमल आशयोऽन्तः करणं येषां तादृशास्ते । पारमहंस्ये धर्मे । परमहंसानां ज्ञानिनां कर्म पारमहंस्यं तस्मान्निवृत्तिधर्मे प्रोत्पन्ना मतिर्येषां तादृशाश्चाभवन् ॥ ४ ॥

एवंभूता अपि पित्रादेशेन प्राचेतसाज्ञया यन्त्रिता वशीकृताः उग्रं तप एव तेपिरे चक्रुः । पारमहंस्यधर्मपरा अपि पित्रादिष्टप्रजावृद्धिविधानोपयुक्तं तप एव चक्रुरित्यर्थः । एवं प्रजाभिवृद्धये यत्तान् प्रजाभिवृद्ध्युपयुक्तयत्नं कुर्वाणांस्तान् हर्यश्वान् देवर्षिः श्रीनारदो ददर्श । हेति देवर्षेर्दर्शनस्य दौर्लभ्यं द्योतयति ॥ ५ ॥

हर्यश्वान् प्रत्युवाच उक्तमेवाह । कथमित्यादिना सर्गं करिष्यथेत्यन्तेन । हे बालकाः ! यूयं बालिशा अज्ञाः सन्तः प्रजाः कथं स्रक्ष्यथ भवतामेवाह । अदृष्ट्वेति । भुवोऽन्तमदृष्ट्वा कथं स्रक्ष्यथेत्यन्वयः यद्यपि भुवोऽन्तदर्शनादिकं सृष्ट्युपयोगीव प्रतिभाति तथापि न तत्सृष्ट्युपयोगित्वेनोच्यते । तस्य भूः क्षेत्रमित्यादिभिः सृष्टिप्रतिक्षेपकत्वावगमात् । किन्त्वदृष्ट्वा सर्गं कर्तुमुद्यताः दृष्ट्वा तु भवन्तः सर्गोद्योगान्निवृत्ता एव भवेयुरित्यत्रोच्यते । कथंशब्देन भुवोऽन्तज्ञानाद्यभावे सर्गोद्योगस्य सम्भावना द्योत्यते । अविज्ञाय कथं चित्सर्गं कर्तुमुद्यताः विज्ञाय सुतरां तदुद्योगान्निवृत्ता भवन्तः भवेयुरित्यर्थः । भुवः पार्थिवस्य देहस्यान्तमवसानमदृष्ट्वा नालोच्येत्यर्थः ॥ ६ ॥

एकः पुरुष ईश्वरो यस्मिंस्तद्राष्ट्रम् ईश्वरनियाम्यं जगत् राष्ट्रादीनां द्वितीयान्तानामविज्ञायेत्यनेनान्वयः । अदृष्टनिर्गममविज्ञातनिर्गमोपायं जीवात्मस्वरूपस्याविष्ठानं हृदयबिलं बहुरूपामनेकरूपां स्त्रियं बुद्धिरूपां पुंश्चल्या व्यभिचारिण्याश्चपलाया बुद्धेः पतिं तत्संसृष्टजीवस्वरूपम् ॥ ७॥

उभयतोवाहां सृष्ट्युपप्लवकरीं नदीं मायारूपां पञ्चपञ्चाद्भुतं पञ्चविंशतितत्त्वात्मकं गृहं सजीवशरीररूपम् । चित्रकथं चित्रपक्षं हंसं बन्धमोक्षोत्पादनात्मककथारूपाभ्यां विचित्रपक्षाभ्यां युक्तमीश्वरमिति भावः । क्षौरपव्यम् क्षुरैः पविभिर्वज्रैश्च निर्मितं तीक्ष्णं दृढं चेत्यर्थः । एवं विधं स्वयं भ्रमणशीलं कालचक्रमिति भावः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ज्ञानमन्तरेण केवलकर्मणां परमश्रेयःसाधनत्वं निषिध्यतेऽस्मिन्नध्याये । तत्रोपोद्घातं रचयति । तस्यामिति । पाञ्चजन्यां पञ्चजनतनयः प्रजापतेः पुत्रान् विष्णुमायया विष्णुमाहिम्ना ॥ १॥२ ॥

तत्र प्रतीच्यां सिन्धुसमुद्रयोः सङ्गमोऽस्ति यत्र सङ्गमे नारायणसरोनाम तीर्थं चास्ति सुमहान्तो मुनयश्च सिद्धाश्च सुमहन्मुनिसिद्धाः तैर्निषेवितम् ॥ ३ ॥

तस्य तीर्थजलस्य स्नानाचमनादिना विनिर्धूतमलः आशयो येषां ते तथोक्ताः ॥ ४ ॥

यत्तान् सन्नद्धान् ॥ ५ ॥

हे हर्यश्वाः ! सर्जनलक्षणं कर्म प्रयोजनेन (१) भवितव्यं (२) तत्कथं सेत्स्यति न कथमपि (३) ज्ञानाभावात् । तच्चात्मानात्मविवेकलक्षणं वा इत्यनेन सूचयति "परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः" इति श्रुतेः । इतरेषां दुर्बोधाय हर्यश्वानामौत्सर्गिकज्ञानसद्भावप्रकटनाय च परोक्षवचनेन ज्ञानाभावं दर्शयति । अदृष्ट्वेति । यस्माद्बालकाः अतएव च बालिशा इत्युपचारमात्रवचनम् ॥ ६ ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

उवाच चेति चतुष्कम् । पञ्च गुणिताः पञ्च आश्रयरूपा यत्र तद्गृहमाश्रयरूपमद्भुतम् ॥ १—१४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वाचः कूटेन हर्यश्वानन्यांश्चाकृत वैष्णवान् ।
पञ्चमे नारदः शप्तः स दक्षेणेति वर्ण्यते ॥ १—२ ॥

तत्र । दिशि नारायणसरस्तीर्थं महद्वर्त्तते । यत्र सिन्धोर्नद्याः समुद्रस्य च सङ्गमः ॥ ३—४ ॥

यत्तान् । उद्यतान् ॥ ५ ॥

शुद्धान्तःकरणा अतो मोक्षधर्माधिकारिणः । अनुरोधात् पितुः कस्मादत्र मज्जन्ति कर्म्मणि । तानिमान् मोक्षाय तत्त्वमुपदिश्यैव गूढवाक् । इति कारुणिको वाचः कूटांस्तानाह नारदः । हे हर्यश्वाः ! भुवोऽन्तमदृष्ट्वा प्रजाः कथं स्रक्ष्यथ व्याख्यास्येषां स्वयमेवाग्रे करिष्यत इति न व्याख्यायन्ते । तस्मात् यूयं बालिशा मूर्खा एव यतो बालकाः पालका इति पाठे प्रजानां पालका अपि यूयं बालिशा एव । बतेति विस्मये । एक एव पुरुषो यत्र तद्राष्ट्रमित्यादिद्वितीयान्तानामविज्ञाय कथं सर्गं करिष्यथेति तृतीयेनान्वयः । उभयतोवाहाम् । उभयदिक्प्रवाहवतीं पञ्चपञ्चानां पञ्चविंशतितत्त्वानामद्भुतं गृहं विष्णु परमसायुज्यप्रदत्वात् भक्तानां तानि तत्रैव स्थातुमर्हन्तीति भावः । क्षुरैः पविभिर्वज्रैश्च निर्मितमतितीक्ष्णं किमपि वस्तु । विपश्चितः सर्वज्ञस्य ॥ ६-९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

पञ्चमे श्रीनारदरूपिणा हरिणा हर्यश्वादिपोषणं कृतमित्युच्यते विभुर्विपुलप्रभावः ॥ १ ॥

अपृथक्धर्मः शीलं स्वभावश्च येषां ते ॥ २ ॥

---

(१) ज्ञानाख्यप्रयोजनेन । (२) तत् सर्जनम् ।
(३) ज्ञानाख्यप्रयोजनाभावात् ।

कथं स्वपितुरादेशमविद्वांसो विपश्चितः ।
अनुरूपमविज्ञाय अहो सर्गं करिष्यथ ॥ ९ ॥

श्रीशुक उवाच ॥

तन्निशम्याथ हर्यश्वा औत्पत्तिकमनीषया ।
वाचः कूटं तु देवर्षेः स्वयं विममृशुर्धिया ॥ १० ॥
भूः क्षेत्रं जीवसंज्ञं यदनादिनिजबन्धनम् ।
अदृष्ट्वा तस्य निर्वाणं किमसत्कर्मभिर्भवेत् ॥ ११ ॥
एक एवेश्वरस्तुर्यो भगवान् स्वाश्रयः परः ।
तमदृष्ट्वाभवं पुंसः किमसत्कर्मभिर्भवेत् ॥ १२ ॥
पुमान्नैवैति यद्गत्वा बिलस्वर्गं गतो यथा ।
प्रत्यग्धामाविद इह किमसत्कर्मभिर्भवेत् ॥ १३ ॥
नानारूपात्मनो बुद्धिः स्वैरिणीव गुणान्विता ।
तन्निष्ठामगतस्येह किमसत्कर्मभिर्भवेत् ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तत्र प्रतीच्यां दिशि यत्र सिन्धोर्नद्याः समुद्रस्य च सङ्गमः तत्र सुमहन्नारायणसरस्तीर्थं प्रययुरिति पूर्वेणान्वयः ॥ ३ ॥

तस्मिन् सरसि उपस्पर्शनात् स्नानात् विनिर्धूतमल आशयोऽन्तःकरणं येषां ते ॥ ४ ॥

पित्रादेशेन प्रजाविवृद्धये सन्तानपि पारमहंस्ये धर्मे प्रोत्पन्नमतितया मोक्षाधिकारिणो ज्ञात्वा देवर्षिस्तान् ददर्श ॥ ५ ॥

अथ दर्शनानन्तरमुवाच मोक्षोपायं दशभिर्गूढार्थैर्वाक्यैस्तान् प्रत्युपदिष्टवान् । हे हर्यश्वाः हे पालकाः ! प्रजापतिपुत्राः भुवोऽन्तमदृष्ट्वा अतएव बालिशाः अज्ञा यूयं कथं प्रजाः स्रक्ष्यथ ॥ ६ ॥

तथा राष्ट्रादिकमविज्ञाय अहो कथं सर्गं करिष्यथेति त्रयाणामन्वयः ॥ ७ ॥

पञ्चपञ्चानां पञ्चविंशतितत्त्वानामद्भुतं गृहमाश्रयम् । क्षुरैः प्रविभिन्न निर्मितम् ॥ ८ ॥

भाषा टीका

श्रीशुकदेवजी बोले उन दक्षजी ने विष्णु की माया से संयुक्त होकर उस पांच जनी भार्या मे हर्यश्व नामक दश हजार पुत्रों को उत्पन्न किया ॥ १

हे नृप दक्ष प्रजापति के वे पुत्र सब एक स्वभाव वाले थे उनको पिता ने प्रजा सृजने की आज्ञा दी तब वे सब पश्चिम दिशा को चले गये ॥ २ ॥

उस पश्चिम दिशा मे सिंधु नाम की नदी तथा समुद्र के संगम मे जहां सिद्धों से सेवित बडा भारी नारायण सरोवर नाम का तीर्थ है ॥ ३ ॥

तहां उस तीर्थ मे स्नान पान करते मात्र उनके मनके कल्मष सब दूर होगये तिस से उन सबों की परम हंस धर्म मे बुद्धि उत्पन्न होगई ॥ ४ ॥

पिता की आज्ञा के परवश होकर प्रजाओं की वृद्धि के निमित्त उग्रतपस्या को करने लगे उन को उस प्रकार यत्न युक्त होने पर देवर्षि नारदजी ने जाकर देखा ॥ ५ ॥

उन से नारदजी बोले हे हर्यश्वो हो तुम जगत् पालक होने पर भी अज्ञानी हो क्योंकि पृथवी के अन्त को न देखकर कैसे प्रजाओं की सृष्टि करोगे ॥ ६ ॥

तैसे ही एक पुरुष वाले राज्य को न देखकर पैठे पीछे नहीं निकलने लायक बिलको न देखकर बहुत रूप वाली स्त्री को न देखकर पुंश्चली स्त्री के पति पुरुष को न देखकर दोनों तरफ को वहने वाली नदी को न देखकर पच्चीस वस्तुओं के अद्भुत घरको न देखकर विचित्र कथा वाले हंसको न देखकर छुराओं से वज्रों से बने हुये घूमने वाले पदार्थ को न देखकर कैसे सृष्टि करोगे ॥ ७ ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विपश्चितः । सर्वज्ञस्य स्वपितुरादेशमात्मनोऽनुरूपमविद्वांसोऽजानन्तः पूर्वोक्तं चैकपुरुषं राष्ट्रमित्याद्यविज्ञायाहो कथं सर्गं करिष्यथेत्यन्वयः ॥ ९ ॥

वाचः कूटम् परोक्षवादेनार्थान्तरमिव प्रतीयमानं वचनम् । औत्पत्तिकी सहजा मनीषा विचारशक्तिर्येषां तया धिया स्वयमेव विममृशुर्विचारितवन्तः ॥ १० ॥

तत्सङ्गभ्रंशितैश्वर्यं संसरन्तं कुभार्यवत् ।
तद्गतीरबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १५ ॥
सृष्ट्यप्ययकरीं मायां वेलाकूलान्तवेगिताम् ।
मत्तस्य तामविज्ञस्य किमसत्कर्मभिर्भवेत् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नारदोक्तदशवाक्यानां तैर्विमृश्य निर्णीतानर्थानाह दशभिः । अदृष्ट्वान्तं भुव इत्यत्र भूशब्दार्थमाह । भूरिति । क्षेत्रं तच्चात्र जीवसंज्ञं लिङ्गशरीरं यन्निजबन्धनमात्मनो बन्धकारणम् । अन्तशब्दार्थमाह । निर्वाणं नाशम् । असद्भिर्मोक्षानुपयोगिभिः कर्मभिः किं भवेन्न किमपि ॥ ११ ॥

एकपुरुषमित्यस्यार्थमाह । एक एवेति । तुर्यः सर्वसाक्षी । स्वाश्रयः स्वाधारः । अभवं नित्यमुक्तम् । असद्भिरीश्वरासमर्पितैः कर्मभिः ॥ १२ ॥

बिलञ्चादृष्टनिर्गममित्यस्यार्थमाह । पुमान् यद्गत्वा प्राप्य बिलस्वर्गं पातालं गत इव नैवैति नावर्तते तत् प्रत्यग्धाम ज्योतीरूपं ब्रह्माविदोऽविदुषोऽसद्भिर्नश्वरस्वर्गादिसाधनैः कर्मभिः ॥ १३ ॥

बहुरूपां स्त्रियमित्यस्यार्थमाह । नानारूपेति । स्वैरिणीव पुंश्चलीव विमोहकैः रजआदिगुणैरन्विता । तन्निष्ठां तस्या अवसानं विवेकमगतस्याप्राप्तस्य । असद्भिरशान्तैः ॥ १४ ॥

पुमांसं पुंश्चलीपतिमित्यस्यार्थमाह । तस्याः सङ्गेन भ्रंशितमैश्वर्यं स्वातन्त्र्यं यस्य । कुत्सिता भार्या यस्य तद्वत् । तस्या गतीः सुखदुःखलक्षणाः । संसरन्तं गच्छन्तं जीवमबुधस्याजानतः । असद्भिर्दुःखविवेकप्रापैः ॥ १५ ॥

नदीमुभयतोवाहामित्यस्यार्थमाह । सृष्ट्यप्ययौ करोतीत्युभयतः प्रवाहो दर्शितः । वेलाकूलं प्रवाहपतितानां निर्गमस्थानं तपोविद्यादि तस्यान्ते समीपे वेगितां निर्गमप्रतिबन्धाय क्रोधाहङ्कारादिभिः कृतवेगां मत्तस्य तद्वेगेन विवशस्यात एव तां तथाभूतामविज्ञस्याविचारयतः । असद्भिर्मायिकैः । यद्वा । वेलाकूलं समुद्रस्य व्यवहारस्थानं तस्य समीपे समुद्रवृद्धिह्रासाभ्यां यथोभयतोऽन्तर्बहिः कृतवेगा नदी भवत्येवं समुद्रतुल्यस्यात्मनो व्यवहारस्थाने देहे जन्ममरणादिभिः कृतवेगामित्यर्थः । वेगिनीमिति पाठे वेगवतीम् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विपश्चितः। सर्वज्ञस्य स्वपितुरनन्तजन्मसु हितोपदेशेन रक्षकस्य शास्त्रस्यादेशमनुशासनमनुकूलमविद्वांसो यूयं कथंचित्सर्गं करिष्यथ विज्ञाय तु न यतिष्यथेति भावः ॥ ॥ ६ ॥

एवमन्यापदेशरूपाणि देवर्षेर्वचांस्याकर्ण्य तानि श्रुत्वा तदर्थं विममृशुरित्याह मुनिः । तदिति । तद्देवर्षेर्वचो निशम्याकर्ण्य हर्यश्वा औत्पत्तिकमनीषया स्वभावसिद्धा मनीषा विचारशक्तिर्येषां तया बुद्ध्या । देवर्षेर्वाचः कूटं कूटमयोघनस्तद्वत् दुर्भेद्यं वाचः कूटं प्रच्छन्नाभिप्रायं वाक्यमित्यर्थः । विममृशुः विचारपूर्वकमभिप्रायं निश्चितवन्तः ॥ १० ॥

कथं विममृशुरित्यपेक्षायां तैर्विमृश्य निर्णीतानर्थानाह । भूरित्यादि दशभिः । तावद्भूशब्दार्थमाह । भूः क्षेत्रमिति । जीवति प्राणान् धारयतीति जीवः सप्राणः । स एव संज्ञा यस्य तत्सप्राणशब्दवाच्यमित्यर्थः । यद्वा । जीवः प्रत्यगात्मैव तेन सम्यग्ज्ञायते इति तज्जीवसंज्ञं बाहुलकात्कर्मणि कः । जीवेन ज्ञेयमित्यर्थः । "एतद्यो वेत्ति तम्" इति शरीरस्य जीवेन ज्ञेयत्वगानात् । अनादिनिजबन्धनमनादिपुण्यपापकर्मनिबन्धनं यत्क्षेत्रं तद्भूशब्दार्थ इति विममृशुरित्यर्थः। अन्तशब्दार्थं तैर्निर्णीतं वदन् समुदायाभिप्रायमाह । अदृष्ट्वेति । तस्य भूशब्दस्य विवक्षितस्य क्षेत्रस्य निर्वाणमन्तशब्दविवक्षितं प्रकृतौ देहस्य प्रलयमदृष्ट्वाऽनालोच्यासत्कर्मभिः किं भवेत् जन्मजरामरणादिमद्देहापादककर्मनिबन्धमनिवर्त्तयद्भिः प्रत्युत संसृत्यापादकैः कर्मभिः न कोऽपि पुरुषार्थोऽस्तीत्यर्थः । अत्र सर्वत्र विचारश्लोकेषु किमसत्कर्मभिर्भवेदिति चतुर्थः पादो ज्ञेयः ॥ ११ ॥

तथैकपुरुषं राष्ट्रमित्यस्य तैर्निश्चितमर्थमाह । एक इति । तुर्यः जाग्राद्यवस्थात्रयातीतः स्वाश्रयः अनन्याधारः परः प्रकृतिपुरुषविलक्षणः भगवान् षाड्गुण्यपूर्णो निरस्तनिखिलदोष एक एवेश्वरः अन्तः प्रविश्य धारणेन नियन्ता तमेवं भूतमभवं भवप्रतिभटमविदित्वानुपास्य । एक एवेश्वर इत्यनेन पुरुषशब्दार्थ उक्तः । अनेनैवेश्वरप्रतिसम्बन्धीशितव्यं जगद्राष्ट्रमिति फलितम् । ईशितव्यानामीश्वरानुवर्तनस्यैवोचितत्वादाराध्येश्वराननुरूपैरीश्वरवैमुख्यापादकैः कर्मभिः किमित्यर्थः ॥ १२

बिलं चादृष्टनिर्गममित्यस्यार्थमाह । पुमानिति । बिलस्वर्गं पातालं गत इव पुमान् जीवः यद्गत्वा यद्धृदयबिलं प्राप्य "हृद्ययमात्मा प्रतिष्ठितः" इतिवचनान्नैवैति नावगच्छति । यथा बिलस्वर्गं गतो नितरां भोगासक्तो मदान्धः स्वस्वरूपादिकं न विविनक्ति ततो न निर्गच्छति च तथा प्रत्यगात्मस्वरूपं प्रकृतिवियुक्तं यत्र हृदयदेशे स्थितं नावगच्छति तज्जीवस्वरूपस्याधिष्ठानं हृदयं बिलं चादृष्टनिर्गममित्यनेन विवक्षितमित्यर्थः । समुदायाभिप्रायमाह । प्रत्यग्धाम हृदयबिलस्थं प्रत्यक् स्वप्रकाशं धाम ज्योतिः जीवात्मस्वरूपमविदुषः अजानतः असत्कर्मभिः देवमनुष्यादिशरीरहृदयबिलावस्थापादकैः कर्मभिः किं भवेत् किमपि श्रेयो नास्ति प्रत्युतानर्थ एवेति भावः ॥ १३ ॥

बहुरूपामित्यस्यार्थमाह । नानेति । आत्मनो जीवस्य या नानारूपा बहुवृत्तिमती स्वैरिणीव पुंश्चलीव रागादिभिर्गुणैरन्विता बुद्धिः सैव बहुरूपां स्त्रियामित्यनेनाभिप्रेतेत्यर्थः । तस्या निष्ठामवसानं विवेकमगतस्याप्राप्तस्येह लोकेऽसत्कर्मभिः किं भवेत् प्रत्युत संसाररूपानर्थ एवेति भावः ॥ १४ ॥

पुमांसं पुंश्चलीपतिमित्यस्यार्थमाह । तत्सङ्गेति । तस्याः सङ्गेन पारवश्येन भ्रंशितमैश्वर्यमकर्मवश्यत्वं यस्य तमत एव कुत्सिता

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भार्या यस्य। तेन तुल्यं कुभार्यवत्। भार्याभिलषितवस्त्राभरणाद्यर्जनायासदुःखिनमिव सरन्तं जन्मजरामरणादिपरिवृत्तिरूपसंसारमनुभवन्तं संसृष्टजीवस्वरूपम्। तद्गतीः। बुद्ध्यायत्तस्वर्गनरकादिगतीश्चाबुधस्याजानतः। असत्कर्मभिः स्वर्गनरकादिगत्यापादकैः कर्मभिः किं भवेन्न किमपि श्रेयः सम्भवति। प्रत्युत दुःखमेव स्यादिति भावः ॥ १५ ॥

नदीमुभयतोवाहामित्येताद्विवृणोति । सृष्टयप्ययकरीमिति । जन्ममरणकरीमनेनोभयतः प्रवाहो दर्शितः। वेलाकूलशब्दौ तीरद्वयपरौ तयोरन्तेऽवसाने वेगितां संजातवेगाम्। इहलोकपरलोकौ वेलाकूलत्वेन रूपितौ । वेगेनेहलोकपरलोकप्राप्तिकरीमित्यर्थः । एवम्विधां मायां तदविज्ञस्य तत्त्वेनाविज्ञस्य तथाभूतामविज्ञस्याविचारयतः। तत्र हेतुः । मत्तस्य मायापरवशस्यासत्कर्मभिरिहपरलोकप्राप्तिहेतुभिः कर्मभिः किं भवेन्न किमपि प्रत्युतानर्थतः स्थावरत्वादिप्राप्तिरूपोऽनर्थ एवेति भावः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनुरूपमात्मानात्मविवेकलक्षणम् ॥ ९ ॥

औत्पत्तिकमनीषया स्वाभाविकज्ञानसम्पन्नया धिया विचारविशुद्धया बुद्ध्या वाचः कूटं वचनसमूहं गुह्यभाषात्मकत्वेन कूटमिव प्रतीयमानं वा अल्पबुद्धिभिर्दुर्बोधं वा स्वयं परोपदेशं विना विमसृशुः विचार्यालोच्य निश्चितवन्त इत्यर्थः । "मनस्का मनीषा स्याज्ज्ञानं बुद्धिर्मतिस्तथा"इत्यभिधानम् । "कूटं तु कैतवं क्षेत्रं समूहो मेलनं तथा"इति च औत्पत्तिकमनीषया निरूप्योक्तं धिया विमसृशुरिति वा ॥ १० ॥

कथं निश्चिक्युरिति तत्राह । भूः क्षेत्रमिति । भुवोऽन्तमित्यत्र भूशब्देन क्षेत्रं सूक्ष्मशरीरं लिङ्गशब्दवाच्यमुच्यते । कस्य विद्यमानमत्राह। बीजेति बीजसंज्ञस्य जीवस्य यच्छरीरमनादिकालमारभ्य जीवं नितरां बध्नातीति अनादिनिबन्धनम्। अस्मिन् काले प्रारब्धमित्यनियमादनादि (१)अनेन लिङ्गशरीरस्य भूशब्दवाच्यत्वं युक्तम् "भूसत्तायाम्"इति धातोः सत्तावास्तथात्वात् (२) तस्य शरीरस्यान्तं निर्वाणं सर्वात्मना मोक्षमदृष्टानेनोपायेन नाशो भवतीत्यज्ञात्वासत्कर्मभिरात्मानात्मविवेकाजनकैः सर्जनलक्षणैः कर्मभिः किं फलं न किमपीत्यर्थः ॥ ११ ॥

तथैकपुरुषं राज्यमित्यस्य विमृष्टार्थमाह। एक एवेति। तुर्योऽवस्थात्रयातीतः। अभवं न भवः संसारः उत्पत्तिर्वा यस्य स तथा तं नित्यमुक्तमित्यर्थः । अदृष्टाविज्ञाय पुरुषस्य पशुहिंसालक्षणैः भगवदर्पणबुद्धिशून्यैः यागादिकर्मभिः किं नित्यं फलं भवेन्न स्यादित्यर्थः। पुंसोऽभवं मुक्तिप्रदं वा ॥ १२ ॥

बिलं चादृष्टनिर्गममित्यस्याभिप्रेतार्थमाह। पुमानिति। पुमान् यत्प्रत्यगात्मना सर्वात्मनानुगतं ब्रह्मस्वरूपं गत्वा नापैति तदतिशयितबलात्मकत्वाद्बिलशब्दवाच्यं ब्रह्माविदोऽजानतः पुंस इह जीवलोके नित्यनैमित्तिकाद्यसत्कर्मभिः इतरविषयैः बिलं स्वर्गेति व्यतिरेकदृष्टान्तः। अनेन अदृष्टनिर्गममित्यस्य पुनरावृत्तिशून्योऽर्थः इतरत्रानिष्क्रमणार्थ इति सूचितम् ॥ १३ ॥

बहुरूपामित्यस्य युक्तार्थमाह। नानारूपेति। आत्मनो जीवस्य या बुद्धिः चिदचिदात्मिका सत्त्वादिगुणैरुपरक्ता विकृता वा अत एव नानारूपा"अजामेकां लोहितशुक्लकृष्णाम्"इति श्रुतेः। नानाविधसंस्काराभिवासितत्वात्स्वैरिणी स्वच्छन्दवर्तिनी स्त्रीव तन्निष्ठां तस्याः बुद्धेश्चेतनायाः निष्ठां भगवत्परतामचिदात्मिकायाः नाशमगतस्य भगवद्भक्त्यादिसामग्रीमकुर्वतः पुरुषस्य बुद्धिदोषनाशासमर्थैः दानादिलक्षणैः कर्मभिः ॥ १४ ॥

पुमांसं पुंश्चलीपतिमित्यस्य विवक्षितार्थमाह। तत्सङ्गेति। तस्याः रजस्तमःप्रकृतेर्बुद्धेः सङ्गेन वशवर्तिलक्षणेन भ्रंशितं विस्रस्तं नष्टमैश्वर्यं भगवज्ज्ञानलक्षणशमदमादिलक्षणं वा यस्य स तथा तम्। अत एव संसरन्तं सुखदुःखे भुञ्जानं जीवं तद्गतीः तस्य जीवस्य गतीः स्वर्गनरकादिलक्षणाश्चाबुधस्याजानतः पुंसः। असद्भिः भगवदनुद्देशेन प्रसक्तैः कर्मभिः तीर्थस्नानादिलक्षणैः दुःखनिवृत्तिः फलं भवेत् किम्। कुत्सिता शास्त्रलोकनिन्दिता भार्या पुंश्चली यस्य। स तथा तस्य वा नरकादिगतिः तद्वत् अनेन पुंश्चलीपतिशब्दार्थं उक्तः ॥ १५ ॥

नदीमुभयतोवाहामित्यस्याभिमतार्थमाह। सृष्टीति। वेलाकूलशब्दाभ्यां सृष्टिसंहारौ लक्ष्येते। तयोरन्तयोर्वाहशब्दोपलक्षितवेगयुक्तां स्थितौ शनैः प्रवर्तमानां तयोक्तां(२)क्रमंमुत्क्रमतः उभयतो वाहत्वम् एवम्विधामीश्वरमायां मत्तस्य विषयरागेण विस्मृतस्य अत एव तद्विज्ञानात्तद्विषयज्ञानाभावादसद्भिः कर्मभिः अश्रद्धया कृततपआदिलक्षणैः मायाविनिवर्तकं फलं प्रसिद्धनद्यां च वृद्धिह्रासाभ्यामुभयतो वाहत्वं सिन्धुसङ्गमे दृष्टं नदीमातृके देशे सस्यादिसंहारे च ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तत्सङ्गभ्रंशितैश्वर्यमिति। जीवस्य स्वज्ञानादिरूपं स्वरूपसामर्थ्यं दर्शितम् ॥ १५-१६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

वाचः कूटं परोक्षवादेनार्थान्तरमिव प्रतीयमानं वचनम् ॥ १० ॥

नारदोक्तानि दश वाक्यानि सुखबोधार्थं स्वयमेव व्याचष्टे दशभिः। तत्र अदृष्टान्तं भुव इति व्याचष्टे। भूरिति। क्षेत्रं तदत्र जीवसंज्ञं लिङ्गशरीरमनादि आदिशून्यं निजस्य जीवात्मनो बन्धनं यतस्तत्तस्य निर्वाणम् अन्तं ज्ञानेन नाशमित्यर्थः। असत्कर्मभिः अवासवैः कर्ममार्गैस्तैः कर्मनिर्वाणमेव प्रत्युत यतध्वमिति भावः ॥ ११ ॥

तथैकपुरुषं राष्ट्रमित्येतद्व्याचष्टे। एक इति। तुर्यः विश्वतैजसप्राज्ञेभ्यो भिन्नश्चतुर्थः। राष्ट्रं जगदिति ज्ञेयम्। अभवं न विद्यते

---

(१) अनादिशब्देन।

(२) अनादित्वात् ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भवः संसारो भक्तानां यतस्तम् । अदृष्ट्वा भजनैरप्रत्यक्षीकृत्य । तेन तमेव भजतेति भावः ॥ १२ ॥

बिलञ्चादृष्टनिर्गममिति व्याचष्टे । पुमानिति । यत् प्रत्यग्धाम प्रतीचो भगवतो धाम वैकुण्ठं गत्वा प्राप्य न पुनरेति न पुनरावर्त्तते । बिलस्वर्गं पातालं गतो यथा तत्रैवासज्य तिष्ठतीत्यर्थः । अविदः अविदुषो जनस्य तेन वैकुण्ठप्राप्तये यतध्वमिति भावः ॥ १३ ॥

बहुरूपां स्त्रियमित्येतद्व्याचष्टे । नानेति । स्वैरिणीव कुविषयोन्मुखी न तु कृष्णविषयोन्मुखी गुणाः सौन्दर्य्यवैदग्ध्यादयः । पाण्डित्यादयश्च तैरन्विता । तस्यां निष्ठां भद्राभद्रप्रवृत्तिमगतस्य अजानतः अविचारयत इत्यर्थः । अतो विवेकेन बुद्धिं कृष्णोन्मुखीं कुरुतेति भावः ॥ १४ ॥

पुमांसं पुंश्चलीपतिमिति व्याचष्टे । तदिति । कुत्सितभार्य्यं गृहस्थमिव संसरन्तं जीवमबुधस्य अजानतः षष्ठ्यभाव आर्षः । तस्य गतीः स्वर्गनरकाद्या अप्यजानतः तेनात्मानमात्मनैवोद्धरतेति भावः ॥ १५ ॥

नदीमुभयतो वाहामिति व्याचष्टे । सृष्ट्यप्ययौ करोतीति । तां सृष्टिकाले पूर्व्वपूर्व्वतस्तत्त्वानि निःसरन्ति अप्ययकाले उत्तरोत्तरतः पूर्वं पूर्वं प्रविशन्तीत्युभयतः प्रवाहो दर्शितः । वेलाकूलस्यान्तं समीपं "वेला स्यात्तीरनीरयोः" इत्यभिधानात् । संसारप्रवाहपतितानां निर्गमस्थानं तपोविद्यादि तत्रैव वेगिनीं निर्गमप्रतिबन्धाय तपोविद्यादिमत्सु दृष्टैः क्रोधाहङ्कारादिभिः कृतवेगां वेगितामिति च पाठः । मत्तस्य तत्तद्वेगेन विवशस्य । अत एव तां तथाभूतामविज्ञस्य अविचारयतः । तेन लौकिकप्रतिष्ठादिकमपि परित्यज्य पारं व्रजतेति भावः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विपश्चितः । सर्वज्ञस्य आदेशमाज्ञामविद्वांसः अजानन्तः ॥ ९ ॥

औत्पत्तिकी स्वाभाविकी मनीषा यथावदर्थचिन्तनरूपा बुद्धिवृत्तिस्तया धिया वाचः कूटं गूढार्थं वाक्यं विममृशुः विचारितवन्तः ॥ १० ॥

ते कथं विममृशुरित्याकाङ्क्षायां श्रीनारदोक्तदशकूटानां तैर्विमृश्य निर्णीतानर्थानाह । भूरिति दशभिः । तत्र तावत् अदृष्टान्तं भुव इत्यस्यार्थमाह । क्षेत्रं संसारप्रापककर्मोदयस्थानं जीवति प्राणान् धारयतीति जीवः । स एव संज्ञा यस्य तज्जीवसंज्ञं लिङ्गशरीरम् । तस्य निर्वाणं बाधोपायमदृष्ट्वा असद्भिः क्षुद्रैः पितृलोकादिफलकैः मोक्षप्रतिबन्धकैः कर्मभिः किं स्यात् ॥ ११ ॥

तथैकपुरुषं राष्ट्रमित्यस्यार्थमाह । एक इति । तुर्यो जागराद्यवस्थात्रयरहितः । ननु अवस्थात्रयसाक्षी जीवः किमित्यत आह । स्वाश्रयः स्वतन्त्रः परः क्षराक्षरभिन्नस्वरूपः । नास्ति भवः संसारो यस्मात्तमदृष्ट्वा अनर्थं असद्भिस्तदर्चनानुपयोगिभिः कर्मभिः किं भवेन्न किमपीत्यर्थः ॥ १२ ॥

बिलं चादृष्टनिर्गममित्यस्यार्थमाह । पुमानिति । बिलस्वर्गं पातालं गतो यथा नैति तथा यद्गत्वा ज्ञात्वा नैवैति देहादिकमात्मत्वादिना नैव जानाति तत्प्रत्यग्जीवाख्यं धाम स्वरूपमविद् अजानतः । असद्भिः प्रत्यक्त्वस्मरणानुपयोगिभिः ॥ १३ ॥

बहुरूपां स्त्रियं चापीत्यस्यार्थमाह । नानेति । गुणान्विता त्रिगुणान्विता तन्निष्ठां तस्याः निष्ठां संसारप्रदां ब्रह्माणि तत्साधर्म्यप्रदामगतस्य अजानतः असद्भिः संसारप्रापकैः ॥ १४ ॥

पुमांसं पुंश्चलीपतिमित्यस्यार्थमाह । तदिति । तस्या बुद्धेः सङ्गात् भ्रंशितमैश्वर्यं ज्ञानं यस्य तं तस्याः बुद्धेर्गतीः संसारप्रापकान् मार्गान् । संसरन्तं सम्यगनुसरन्तमात्मानमबुधस्य असद्भिः बुद्धिपारवश्यकृतैः ॥ १५ ॥

नदीमुभयतो वाहामित्यस्यार्थमाह । सृष्ट्यप्ययकरीमिति । सृष्टिसंहारकरीत्यनेनोभयतः प्रवाहो दर्शितः । वेलाकूलं जलनिधेः प्राप्तिकरं तटं तद्वदिह वेलाकूलं परमानन्दनिधेः प्राप्तिकरं भजनं तस्मिन् अन्तो निष्ठा यस्य । तस्माद्गरुडादूव्यालीव वेगितां विद्रुतामविज्ञस्य असत्कर्मभिः भगवद्भजनानुपयोगिभिः मायाप्रापकैः ॥ १६ ॥

भाषा टीका ।

विद्वान् अपने पिता की अपने अनुकूल योग्य आज्ञाको न जानकर अहो किस प्रकार तुम सृष्टिकरोगे ॥ ९ ॥

श्रीशुकदेवजी बोले वे हर्यश्वगण नारदजी की उस अप्रकट वाणी को सुनकर स्वभावसिद्ध अपनी बुद्धि से उस वाणी के अर्थ को विचारने लगे ॥ १० ॥

उस के अर्थ को कहते हैं कि अपना जो लिङ्गशरीर है सोई भूमी है वही जीव के बन्धन का कारण है उस शरीर को छुटा कर मोक्ष होने का उपाय नहीं जाना तो असत् कर्मोंसे क्या होगा ॥ ११ ॥

जाग्रत् आदि अवस्थाओं से परे एक ईश्वर पर अपने ही आश्रय रहने वाला है अजन्माहै उस ईश्वर को नहीं जानने से पुरुषको असत्कर्मों से क्या काम होगा ॥ १२ ॥

जहां जाने पीछे पाताल को गया सरीका पुरुष फिर नहीं आसक्ता है उस ज्योतिरूपस्थानको न जान ने से असत् कर्मों से मनुष्यको क्या होगा ॥ १३ ॥

जीवकी बुद्धि गुणों से युक्त होने से नाना रूपवाली व्यभिचारिणी स्त्री सरीकी होजातीहै उसको यथार्थ जाने विना असत्कर्मों के करने से पुरुष को क्या होगा ॥ १४ ॥

इस बुद्धि के सङ्ग से जिसका दिव्यज्ञानादि ऐश्वर्य नष्ट होगया है खोटी स्त्री वाले की नाईं दुःख पाताहै संसार मे घूमता है उस बुद्धिकी गतियों को जाने विना असत्कर्मों से इस पुरुषको क्या होगा ॥ १५ ॥

उत्पत्ति संहार करने वाली मोक्ष को जाने वालों को भुला कर रोकने वाली भगवान् की मायाको न जानकर प्रमाद से रहने वाले पुरुषको असत्कर्मों से क्या प्रयोजन सिद्ध होगा ॥ १६ ॥

पञ्चविंशतितत्त्वानां पुरुषोऽद्भुतदर्पणम् ।
अध्यात्ममबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १७ ॥
(१) ऐश्वरं शास्त्रमुत्सृज्य बन्धमोक्षानुदर्शनम् ।
विविक्तपदमज्ञाय किमसत्कर्मभिर्भवेत् ॥ १८ ॥
कालचक्रं भ्रमितीक्ष्णं सर्वं निष्कर्षयज्जगत् ।
स्वतन्त्रमबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १९ ॥
शास्त्रस्य पितुरादेशं यो न वेद निवर्तकम् ।
कथं तदनुरूपाय गुणविस्रम्भ्युपक्रमेत् ॥ २० ॥
इति व्यवसिता राजन् ! हर्यश्वा एकचेतसः ।
प्रययुस्तं परिक्रम्य पन्थानमनिवर्त्तनम् ॥ २१ ॥
स्वरब्रह्मणि निर्भातहृषीकेशपदाम्बुजे ।
अखण्डं चित्तमावेश्य लोकाननुचरन्मुनिः ॥ २२ ॥
नाशं निशम्य पुत्राणां नारदाच्छीलशालिनाम् ।
अन्वतप्यत कः शोचन् सुप्रजस्त्वं शुचां पदम् ॥ २३ ॥
स भूयः पाञ्चजन्यायामजेन परिसान्त्वितः ।
पुत्रानजनयद्दक्षः सवलाश्वान् सहस्रशः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पञ्चपञ्चेत्यस्यार्थमाह। पञ्चविंशतितत्त्वानां पुरुषोऽन्तर्यामी अद्भुतदर्पणमाश्चर्यरूप आश्रयः अध्यात्मं कार्यकारणसंघाताधिष्ठातारं तमबुधस्य। असद्भिर्मिथ्याश्वातन्त्र्यकृतैः ॥ १७ ॥

क्वचिद्धंसामित्यस्यार्थमाह। ऐश्वरमीश्वरप्रतिपादकं विविक्तं पदं चिज्जडरूपं वस्तु येनेति हंसपदव्याख्यानम्। बन्धमोक्षावनुदर्शयतीति तथा। अनेन चित्राः कथा यस्येति व्याख्यातं तदुत्सृज्यानभ्यस्य अज्ञायाविदुषः। असद्भिर्बहिर्मुखैः ॥ १८ ॥

क्षौरपव्यमित्यस्यार्थमाह। कालचक्रमिति। भ्रमिर्भ्रमणात्मकम्। तीक्ष्णमिति निष्कर्षयादिति च क्षौरपव्यपदं व्याख्यातम्। तदबुधस्यातएव फलस्य नित्यबुद्ध्या काम्यकर्मानुष्ठाने वैगुण्यबाहुल्यादसद्भिः ॥ १९ ॥

स्वपितुरादेशमित्यस्यार्थमाह। शास्त्रस्य स्वपितुर्द्वितीयजन्महेतोः। तदनुरूपाय(२)निवृत्त्यनुरूपाय निवर्तकमादेशं यो न वेद स कथं गुणविश्रम्भी गुणमयप्रवृत्तिमार्गविश्वासवान् सन्नुपक्रमेत् सृष्ट्यादौ प्रवर्तेत। "मोक्षशास्त्रबुद्धीनां जीवमायान्तरात्मनाम्। शास्त्रकालोपदेशानामज्ञाने किमु कर्मभिः" इति वाचः कूटसंग्रहश्लोकः ॥ २० ॥

इति व्यवसिता एवं निश्चितवन्तः। एकचेतस ऐकमत्ययुक्ताः। तं नारदं प्रदक्षिणीकृत्यापुनरावृत्तिमार्गं प्रययुः ॥ २१ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निर्भातः साक्षात्कृतो यो हृषीकेशस्तस्य पदाम्बुजे अनुकरदन्वचरदित्यर्थः ॥ २२ ॥

नाशमदर्शनं स्वधर्मभ्रंशं वा। शीलेन शालन्ते शोभन्त इति तथा तेषाम्। को दक्षः। सुप्रजस्त्वं सत्पुत्रवत्त्वं शुचां शोकानां स्थानम् २३

अजेन ब्रह्मणा। सहस्रशः सहस्रसंख्यान् ॥ २४ ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पञ्चपञ्चाद्भुतगृहमित्येतद्विवृणोति। पञ्चविंशतीति। पञ्चविंशतितत्त्वानां जीवपर्यन्तानां सङ्घातरूपं यत्पुरुषस्य परमपुरुषस्याद्भुतं वर्ष्म शरीरमात्मन्यध्यात्मं परमपुरुषधार्यत्वेनावस्थितमबुधस्याविचारयतः। असत्कर्मभिर्देहात्मभ्रमस्वतन्त्रात्मभ्रमापादकैः कर्मभिः किं भवेन्न किमपि प्रत्युत देहात्मादिभ्रमप्रयुक्तोऽनर्थ एवेति भावः ॥ १७ ॥

क्वचिद्धंसं चित्रकथमित्येतद्व्याचष्टे। ईश्वरमिति। अनेन हंसशब्दार्थ उक्तः। हन्ति दोषानिति हंसः निरस्तानिखिलदोषः। तमीश्वरं शास्त्रं शास्त्रैकवेद्यं बन्धमोक्षानुदर्शनं बन्धमोक्षावनुदर्शयति बन्धमोक्षहेतुप्रवृत्तिनिवृत्तिधर्मानुष्ठापनेन तौ दर्शयतीति तथा कर्त्तरि ल्युः। अनेन चित्रकथशब्दार्थ उक्तः। विविक्तं पदं यस्य तं विविक्तस्थानवर्त्तिनं हृदयकुहरे स्थितमित्यर्थः। अनेन क्वचिच्छब्दार्थ उक्तः। उत्सृज्य त्यक्त्वा अज्ञाय उक्तविधं तमनालोच्य

---

(१) ईश्वरम् इति श्रीवीरराघवाचार्यपाठः।

(२) निवृत्त्यनर्हायेति तैलङ्गपाठः।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

ऐश्वरं शास्त्रमिति पाठान्तरम् । तत्रैश्वरमीश्वरप्रतिपादकमध्यात्मशास्त्रमुत्सृज्यानधीत्य बन्धमोक्षानुदर्शनं विविक्तपदमीश्वरमविज्ञायानुपास्येत्यर्थः । ऐश्वर्यमिति पाठे तु ईश्वरस्य सम्बन्धि ऐश्वरं ईश्वरावेदकं तदेवैश्वर्यं स्वार्थे ष्यञ् । ईश्वरस्वरूपरूपगुणप्रतिपादकमित्यर्थः । अत्रापि परशब्देन हंसशब्दार्थ उक्तः । असत्कर्मभिरीश्वरवैमुख्यापादकैः कर्मभिः किमपि न अपित्वात्मतारूपोऽनर्थ एवेति भावः ॥ १८ ॥

क्षौरपव्यमित्येतद्व्याचष्टे । कालचक्रमिति । यत्सर्वमाब्रह्मस्तम्बपर्यन्तं जगन्निष्कर्षयन्निष्काषयत्त्रोटयदित्यर्थः । अनेन पव्यशब्दार्थ उक्तः । तीक्ष्णं गर्भजन्मजरामरणादिनिमित्तत्वेन दुःसहमनेन क्षौरशब्दार्थ उक्तः । भ्रमत्परिवर्त्तमानं स्वतन्त्रमपरवशं कालचक्रं तदबुधस्याविचारयतः असत्कर्मभिः कालवश्यतापादकैः न किमपि प्रत्युत तापत्रयाभिहतिरेवेति भावः ॥ १९ ॥

स्वपितुरादेशं विवृणोति । शास्त्रस्य पितुः शास्त्रमेव हि सर्वस्य पिता हितोपदेष्टृत्वात्तस्यादेशं विविच्य ज्ञापनरूपमनुशासनं निवर्त्तकं प्रवृत्तिधर्मानुष्ठाननिवृत्तिज्ञापकं यः पुमान्न वेद स गुणविस्रम्भी गुणमयशब्दादिविषयविश्वासवान् । तदनुरूपाय उक्तादेशानुकूलाय कथं सृष्ट्यादावुपक्रमेत् । सृष्ट्याद्युपक्रमस्य पित्रादेशप्रतिकूलत्वात्तदुपरम एव । तदादेशानुकूलः पित्रादेशानुवर्ती न सृष्ट्यादौ यततेति भावः ॥ २० ॥

एवं वाचः कूटं विमृश्य किमकुर्वन्नित्यत्राह मुनिः । इतीति । हे राजन्नितीत्थं व्यवसिताः निश्चयवन्तः । व्यवसायो व्यवसितं भावे क्तः सोऽस्त्येषामिति व्यवसिताः अर्शआदित्वान्मत्वर्थीयोऽच् हर्यश्वाः सर्वे एकचेतसः एकमतयः तं नारदं परिक्रम्यानिवर्त्तनं न विद्यते निवर्त्तनं निवृत्तिः यस्मात्तं पन्थानं प्रययुः परब्रह्मोपासनेन मुक्तिं भगवन्तं प्रापुरित्यर्थः ॥ २१ ॥

मुनिर्नारदस्तु स्वरब्रह्मणि ब्रह्मसान्निध्यापादकवल्लकीस्वरे निर्भातः साक्षात्कृतो यो हृषीकेशः तस्य पदाम्बुजे चित्तमस्खलमविच्छिन्नं यथा तथावेश्य लोकाननुचरत् अन्वचरत् अडभाव आर्षः ॥ २२ ॥

ततः को दक्षः । शीलशालिनां सुशीलानां पुत्राणां नारदान्नाशं निशम्य सृष्ट्युद्योगनिवृत्तिपूर्वकमुक्तिं निशम्याकर्ण्य शोचन्नन्वतप्यतादुःख्यत् । सुप्रजास्त्वं शुचां पदमिति लोकोक्तिप्रकारः सुप्रजस्त्वं सत्पुत्रवत्त्वं शोकानां स्थानमिति हि किं वदन्तीत्यर्थः । अत्र प्रजाशब्देन प्रजाविपत्तिरुपलक्ष्यते ॥ २३ ॥

स दक्षोऽजेन ब्रह्मणा परिसान्त्वितः समाहितः पुनः पाञ्चजन्यायां सबलाश्वसंज्ञान् सहस्रसंख्याकान् पुत्रानजनयत् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पञ्चपञ्चत्यस्य विमर्शप्रकारमाह । पञ्चेति । पञ्चविंशतितत्त्वानामद्भुतत्वेन दृश्यत इत्यद्भुतदर्शनः गृहस्थानीयो यः पुरुषस्तमध्यात्ममात्मानमधिकृत्य वर्तमानमिन्द्रियं चाबुधस्याजानतः पुरुषस्यासत्कर्मभिः "ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्" इतिस्मृतिविहिताविषयैर्योगाभ्यासादिलक्षणैः वायुप्रसादादिः फलम् । अनेन पञ्चपञ्चेत्यत्र पञ्चकत्रयं ग्राह्यमिति सूचितम् ॥ १७ ॥

क्वचिद्धंसं चित्रकथमित्यस्यार्थं दर्शयति । ऐश्वरमिति । ईश्वरप्रतिपादकं समाध्यादिभाषात्रयेण चित्राः कथाः यस्मिंस्तत् बन्धमोक्षावनुदर्शयतीति बन्धमोक्षानुदर्शनम् । अत एव हंसं विविक्तपदं विविक्तं सर्वतः सारभूतं पद्यते प्राप्नोति अनेन पुरुष इति । हंसो यथा सारं क्षीरमेव गृह्णाति तथेदमिति लुप्तोपमम् । एवंविधं भारतादिशास्त्रमुत्सृज्याज्ञात्वासत्कर्मभिर्बौद्धादिशास्त्रश्रवणलक्षणैः ज्ञानलक्षणं फलम् ॥ १८ ॥

क्षुरान्तं स्वयं भ्रमिमित्यस्यानुरूपार्थमाह । कालचक्रमिति । भ्रमिमित्यनूद्य सर्वं जगन्निष्कर्षयेदिति व्याख्याति "भ्रामयन्सर्वभूतानि" इति स्मृतेः । क्षुरान्तमित्यस्यार्थस्तीक्ष्णमिति । क्षुरान्तः क्षुरधारा तद्वत्तीक्ष्णमित्यर्थः । स्वयमित्यस्यार्थः स्वतन्त्रमिति । एतैरर्थैः किं लक्ष्यत इति तदाह । कालचक्रमिति । द्वादशमासादिदलाद्यन्वितत्वाच्चक्रव्यपदेशः । तत्स्वरूपमप्यजानतः पुंसस्तत्तत्कालविहिताविषयैः कालजयलक्षणं फलम् ॥ १९ ॥

कथं स्वपितुरादेशमित्यस्यानुगुणार्थमाह । शास्त्रस्येति । "मातेव रक्षति पितेव हिते नियुङ्क्ते" इति वचनात् पितेव हितोपदेष्टृत्वात् पितृशब्देन शास्त्रमुपलक्ष्यते "प्रातरुत्थाय यथा सन्ध्यामुपासीत" इत्यादेः अनुरूपं संसारनिवर्तकं शास्त्रलक्षणं पितुरादेशं यो न वेद स गुणविस्रम्भी गुणविश्वासी पुरुषस्तदनुरूपाय शास्त्रविधानानुगुणाय कथं सत्कर्म उपक्रमेदज्ञानादिति शेषः ॥ २० ॥

इति ऋषेरभिप्रायं व्यवसिताः निश्चितवन्तः एकमेधसः एकबुद्धयः । अनिवर्तकं पन्थानं संन्यासलक्षणं मार्गं संन्यासानन्तरं पुनराश्रमान्तराभावादनिवर्तकं वा न निवर्तकं यस्य स तथा तम् ॥ २१ ॥

स्वरब्रह्मणि षड्जादिस्वरलक्षणब्रह्मणि गान्धर्वे नितरां भाते प्रकाशिते यथा अखण्डं निरन्तरं भवति तथा निर्भातमितिपाठे चित्तविशेषणं निष्णातमित्यर्थः ॥ २२ ॥

को दक्षः । सुप्रजास्त्वं शोभनसन्ततिमत्त्वं शुचां शोकानां पदं स्थानमिति सञ्चिन्त्य । सुप्रजास्त्वमङ्गिरसो वो अस्त्विति छन्दोऽनुकारिप्रयोगः ॥ २३ ॥

सहस्रं सङ्ख्यैषामस्तीति सहस्रिणः ॥ २४-२६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

लोहानामिव पञ्चविंशतितत्त्वानां सङ्घातरूपः पुरुषोऽद्भुतो दर्पणः आत्मनः आभास आश्रयो मुखादेरिव । ऐश्वरं भगवल्लीलात्मकं । चित्रकथमित्युक्तत्वात् । विविक्तानि पदानि सर्वेऽप्यर्था यस्मात् ॥ १७-१९ ॥

तदनुरूपाय निवृत्त्यनुरूपाय ज्ञानाय । तदवेदने तत्रैव बध्येतेति भावः ॥ २०—२१ ॥

नारदस्य च चेष्टेयं सर्वतदुन्मुखीकरणेच्छामयेन श्रीभगवदनुरागेणैवेत्याह । स्वरब्रह्मणीति । उत्तमस्वरजातिस्वभावोऽयम् । यः सामान्यतः स्वस्वोत्कण्ठाविषयं स्मारयति विशेषतो भक्तानां भगवन्तमित्यनुभवः ॥ २२-२६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पञ्चपञ्चाद्भुतं गृहमित्येतद्व्याचष्टे । पञ्चेति । पुरुषो विष्णुः अद्भुतदर्पण इति । भक्ता हि स्वचित्तादीनि पञ्चविंशतितत्त्वानि विष्णावेवार्पयन्ति तानि च विष्णुगतानि भूत्वा निर्म्मलान्यप्राकृतानि नित्यानि प्रतिबिम्बतां परित्यज्य विष्णुरूपदर्पणधर्म्मार्पयेव भवन्तीति विष्णुरूपदर्पणस्याद्भुतत्वम् । अन्यदर्पणगतं मुखादिकन्तु यथास्थितरूपं यत्तत् प्रतिबिम्बमेव भवेन्न तु दर्पणगतनैर्म्मल्यग्राहीत्यर्थः । तं पुरुषं विष्णुम् अध्यात्म आत्मन्येव वर्त्तमानम् । अबुधस्य सेव्यत्वेनाजानतः । तस्मादेहादात्मानौ हरये समर्पयतेति भावः ॥ १७ ॥

क्वचिद्धंसं चित्रकथमिति व्याचष्टे । ऐश्वरमीश्वरप्रतिपादकं बन्धमोक्षौ विचित्राभिः कथाभिरनुदर्शयतीति । चित्रकथमिति व्याख्यातं क्षीरनीरमिव विविक्तमात्मानात्मवस्तु येनेति हंसपदं व्याख्यातम् । विविक्तानि विचारयुक्तान्येव पदानि सुप्तिङन्तानि यत्रेति तत्रैवास्तिक्यमुचितमतो मोक्षार्थमीश्वरं भजतेति भावः ॥ १८ ॥

चौरपव्यं स्वयं भ्रमीति व्याचष्टे । कालचक्रमिति । क्षुरपविश्यामिव निवृत्तमिति, भयप्रदत्वात् चौरपव्यं भ्रमणात्मकत्वाद्भ्रमि । तीक्ष्णत्वात्तीक्ष्णं निष्कर्षयत् विनाशयत् । तेन श्वः परश्वो वा मरिष्यथ किमिति हरिं न भजथेति भावः ॥ १९ ॥

कथं स्वपितुरादेशमविद्वांस इति व्याचष्टे । शास्त्रस्येति । तद्धाधानकर्त्तैव पिता किन्तु शास्त्रमेव तस्य पितुरादेशोऽपि निवर्त्तक एव न तु प्रवर्त्तकः । अतो यद्यादेशं निवर्त्तकं न वेद तदा तदनुरूपाय आदेशानुरूपं कर्त्तुं कथमुपक्रमेत् । यतोऽयं गुणे प्रवृत्तिमार्ग एव विस्रम्भी अयमेवादेश इति विश्वासवान् अतः शास्त्रस्य शास्त्रानुसारिणः पितुश्च निवृत्तिधर्म्मे या आज्ञा सेवा वास्तवी तामेव पालयेदिति ध्वनिः । अतः शास्त्रतात्पर्य्यप्रतिकूलमादिष्टुर्द्दक्षस्य पितृत्वाभावात्तदाज्ञाया अपालने वो नास्ति प्रत्यवाय इत्यनुध्वनिः । तस्मान्मत्त एव विष्णोर्मन्त्रं गृहीत्वा क्वचिदेकान्त उपविश्य तं विष्णुमेव भजतेति सर्व्वानुध्वनिः ॥ २० ॥

इति विशेषेण अवसितं निश्चितं यैस्ते एकचेतसः ऐकमत्यवन्तः परिक्रम्येति । गुरुकरणचरणामृतग्रहणादण्डवत्प्रणामनादयोऽप्युपलक्ष्यन्ते ॥ २१ ॥

हन्त हन्त एतावन्तो जीवा नरकादुद्धृतास्तत् प्रभोर्यश उपवीणयामीति नारदस्यानन्दसमुद्रे निमज्जनमाह । स्वराः षड्जादय एव ब्रह्म तत्र निर्मातस्य लीलागानेन साक्षात् कृतस्य हृषीकेशस्य सर्व्वेन्द्रियाकर्षकस्य कृष्णस्य चरणकमले ॥ २२ ॥

नारो वैष्णवत्वमेव गृहस्थानां मते नाशत्वम् । को दक्षः । अन्वतप्यत । हन्त हन्त तादृशा मे पुत्रा नारदेन भ्रंशिता इति विषादात् सुप्रजस्त्वं सत्पुत्रवत्त्वं शुचां पदं शोकानां स्थानं शोकदुःखादृष्टवन्त एव लोकाः सुप्रजसो भवन्तीति विललाप ॥ २३ ॥

सबलाश्वान् सबलाश्वसंज्ञान् सहस्रिणः सहस्रसङ्ख्यातान् ॥ २४ ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पञ्चपञ्चाद्भुतं गृहमित्यस्यार्थमाह । पञ्चेति । पञ्चविंशतितत्त्वानां जीवसहितस्य चतुर्विंशतिप्राकृतपदार्थमयस्य देहस्येत्यर्थः । पुरुषः अन्तर्यामी अद्भुतदर्पणः सर्वधारकत्वेऽपि सर्वदोषास्पृष्टत्वेनाश्चर्य्यरूपः आश्रयः तमध्यात्मं सर्वप्रेरकतयात्मनि तिष्ठन्तमपि अबुधस्य नियन्तृत्वेनाजानतः असद्भिः मयैव स्वातन्त्र्येण कृतानीति वृथास्वातन्त्र्यकृतैः ॥ १७ ॥

क्वचिद्धंसं चित्रकथमित्यस्यार्थमाह । ऐश्वरमिति । ऐश्वरमीश्वरसम्बन्धि शास्त्रमुत्सृज्य अत एव तदर्थभूतं विविक्तपदं कार्यकारणप्रकृतिभिन्नं पदं स्थानं मुक्तगम्यं स्वरूपं वाविज्ञाय असद्भिस्तत्पदाप्रापकैः कर्मभिः किं भवेत् ॥ १८ ॥

चौरपव्यमित्यस्यार्थमाह । कालचक्रमिति । भ्रमि स्वयं भ्रमणशीलं तीक्ष्णं क्षुरवत् स्वतन्त्रं वज्रवदुर्निवारं निष्कर्षयत् विनाशयदबुधस्यासद्भिस्तन्निवारणानर्हैः ॥ १९ ॥

स्वपितुरादेशमविद्वांस इत्यस्यार्थमाह । शास्त्रस्येति । पितुः हितोपदेष्टुः शास्त्रस्यादेशं विधिवाक्यं निवर्त्तकं निषेधवाक्यं च यो न वेद स तदनुरूपाय स्वानुकूल्याय कथमुपक्रमेत् । हिते अहिते वा केन प्रकारेण प्रवृत्तो निवृत्तो वा भवेत् । यतः स्वभावतो बालवत् गुणविस्रम्भी इन्द्रियार्थेषु विश्वासवान् विषयार्थं कर्म कुर्वन् संसारे भ्रमेन्न तु मुक्तो भवेदिति भावः ॥ २० ॥

इत्येवं विशेषतो अवसितं निश्चितं यैस्ते तं श्रीनारदं परिक्रम्य नास्ति निवर्तनं संसारे पुनः पतनं यस्मात्तं भावद्भावापत्तिप्रदं पन्थानं प्रययुः ॥ २१ ॥

"स्वतो रञ्जयति श्रोतुश्चित्तं स स्वर उच्यते" इत्येवं लक्षणाः षड्जादिस्वर एव ब्रह्मदृष्ट्योपास्यमानत्वात् तस्मिन्वल्लकया प्रवर्त्यमाने निर्मातो गुणगानेन साक्षात्कृतो यो हृषीकेशस्तस्य पदाम्बुजमखण्डमविच्युतम् अनुस्मरन् .... ॥ २२ ॥

को दक्षः । शीलेन घ्नन्ति शीमन्ते इति तथा तेषां नारदाद्धेतुभूतात् नाशं प्रवृत्तिमार्गभ्रंशं निशम्य श्रुत्वा शोकेनान्वतप्यत । तत्र हेतुमाह । सुप्रजस्त्वमिति शुचां शोकानां पदं स्थानं किं पुनर्दुष्प्रजस्त्वमिति भावः ॥ २३ ॥

सहस्रशः सहस्रसङ्ख्याकान् ॥ २४-२५ ॥

भाषा टीका ।

पच्चीस तत्वों का अन्तर्यामी पुरुष है सो आश्चर्य रूप है इस अध्यात्म को जो नहीं जानता है उस के असत् कर्मों के करने से क्या होगा ॥ १७ ॥

बन्ध मोक्षके जगाने वाले अध्यात्म शास्त्रको जड चेतन के भेदको न जानने से असत्कर्मों से क्या होगा ॥ १८ ॥

सब जगत् के खैंचने वाले भ्रमण करने वाले स्वतन्त्र काल चक्रको नहीं जानने वाले को असत्कर्म से क्या होगा ॥ १९ ॥

शास्त्र रूपी पिताकी निवर्त्तनकी आज्ञाको जो नहीं जानताहै सो गुणों का विश्वास करने वाला निवृत्ति मार्गको कैसे प्राप्त होगा ॥ २० ॥

तेऽपि पित्रा समादिष्टाः प्रजासर्गे धृतव्रताः ।
नारायणसरो जग्मुर्यत्र सिद्धाः स्वपूर्वजाः ॥ २५ ॥
तदुपस्पर्शनादेव विनिर्धूतमलाशयाः ।
जपन्तो ब्रह्म परमं तेपुस्तेऽत्र महत्तपः ॥ २६ ॥
अब्भक्षाः कतिचिन्मासान् कतिचिद्वायुभोजनाः ।
आराधयन्मन्त्रमिममभ्यस्यन्त इडस्पतिम् ॥ २७ ॥
ओं नमो नारायणाय पुरुषाय महात्मने ।
विशुद्धसत्त्वधिष्ण्याय महाहंसाय धीमहि ॥ २८ ॥
इति तानपि राजेन्द्र ! प्रतिसर्गधियो मुनिः ।
उपेत्य नारदः प्राह वाचःकूटानि पूर्ववत् ॥ २९ ॥
दाक्षायणाः ! संशृणुत गदतो निगमं मम ।
अन्विच्छतानुपदवीं भ्रातॄणां भ्रातृवत्सलाः ॥ ३० ॥
भ्रातॄणां प्रायणं भ्राता योऽनुतिष्ठति धर्मवित् ।
स पुण्यबन्धुः पुरुषो मरुद्भिः सह मोदते ॥ ३१ ॥
एतावदुक्त्वा प्रययौ नारदोऽमोघदर्शनः ।
तेऽपि चान्वगमन्मार्गं भ्रातॄणामेव मारिष ! ॥ ३२ ॥

भाषा टीका ।

हे राजन् ! वे हर्यश्व ऐसा निश्चय करके नारदजी को परिक्रमा करके भगवत्मार्ग को चले गये ॥ २१ ॥

श्रीनारदजी स्वर ब्रह्म मे प्रकाशमान जो हृषीकेशभगवान् तिन के चरणकमल मे मन को लगाकर लोकों मे विचरने लगे ॥ २२ ॥

सुन्दर स्वभाव वाले पुत्रों का विरक्त होकर नाश होजाना सुनकर दक्षप्रजापति ने बहुत शोच किया क्योंकि सुन्दर पुत्रों का होना शोच का हेतु है ॥ २३ ॥

उनके पीछे ब्रह्माजीने उनको शान्त किया तव फिर दक्षजीने पांचजनी भार्या में शवलाश्व नाम के हजार पुत्रों को उत्पन्न किया ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

परमं ब्रह्म प्रणवं वक्ष्यमाणमन्त्रं वा ॥ २६ ॥

इडस्पतिं वाचां मन्त्राणां पतिं विष्णुमाराधयामासुः ॥ २७ ॥

विशुद्धसत्त्वाश्रयाय परमहंसाय नमो धीमहि ॥ २८ ॥

प्रतिसर्गे धीर्येषां तान् । वाचःकूटानि अदृष्टान्तंभुव इत्यादीनि पूर्वोक्तानि प्राह ॥ २९ ॥

हे दाक्षायणाः ! संशृणुतेत्यादि पुनरन्यदपि प्राह । निगममुपदेशम् । अन्विच्छतावलोकयत ॥ ३० ॥

प्रायणं प्रकृष्टं गमनम् । पुण्यमेव बन्धुर्यस्य मरुद्भिर्भ्रातृवत्सलैर्देवैः ॥ ३१ ॥

अमोघं दर्शनं यस्य हे मारिष ! आर्य ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तेऽपि सबलाश्वाः पित्रा दक्षेण प्रजासर्गे निमित्ते समगादिष्टाः धृतं व्रतं पित्रादेशकारणरूपं यैस्ते नारायणसरआख्यं तीर्थं ययुः । यत्र नारायणसरसि स्वपूर्वजाः हर्यश्वाः सिद्धा बभूवुः ॥ २५ ॥

तस्य नारायणसरस्तीर्थस्योपस्पर्शनादेव विनिर्धूतं निरस्तं मनसो मलं वासनारूपं येषां तादृशाः परममुत्कृष्टं ब्रह्म प्रणवं जपन्तः महत्तपस्तेपुश्चक्रुः । ब्रह्मशब्दो वक्ष्यमाणमन्त्रस्याप्युपलक्षकः । तस्य प्रणवघटितत्वादिति भावः ॥ २६ ॥

महत्तप एव प्रपञ्चयति । अब्भक्षा इति । अप एव भक्षयन्तीति तादृशाः कतिचिन्मासान् कतिचिच्च मासान् वायुं भुञ्जन्तीति वायुभोजनाः कर्त्तरि ल्युः । इमं वक्ष्यमाणं मन्त्रमभ्यस्यन्तः इडस्पतिमीड्यते स्तूयतेऽनेनेतीडो मन्त्रः । आर्षत्वाद्ध्रस्वः पारस्करादित्वात्सुट् । तस्य पति-

सध्रीचीनं प्रतीचीनं परस्यानुपथं गताः ।
नाद्यापि ते निवर्तन्ते पश्चिमा यामिनीरिव ॥ ३३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मधिदैवतं भगवन्तमाराधयामासुः आङ्पूर्वाद्राधयतेर्लेङ् आङाटोः सवर्णदीर्घः ॥ २७ ॥

मन्त्रमाह । ओमिति । नारस्य जीवसमूहस्यायनाय प्राप्याय प्रापकाधाराय च पुरुषाय हृदयकमलस्थाय परमात्मनेऽन्तः-प्रविश्य नियन्त्रे विशुद्धमुपासनेन निर्मलं सत्त्वमन्तःकरणं धिष्ण्यमभिव्यक्तिस्थानं यस्य । यद्वा । शुद्धं रजस्तमोभ्यामननुविद्धं सत्त्वं धिष्ण्यं स्थानं यस्य तस्मै । परमव्योमनिलयायेति भावः । महांश्चासौ हंसस्तस्मै महाकल्याणगुणैर्महान् हंसो निरस्त-निखिलदोषः । एवंभूताय नमः उक्तविधं धीमहि ध्यायेम ॥ २८ ॥

इतीत्थं मन्त्रं जपतः प्रजासर्गे धीर्येषां तान् सबलाश्वानपि हे राजेन्द्र ! मुनिर्नारद उपेत्य पूर्ववद्वाचः कूटान्यदृष्टान्तं भुवो यूयमित्यादीनि प्राहोक्तवान् ॥ २९ ॥

पूर्वोक्तात् किञ्चिद्विशेषमाह । हे दाक्षायणाः ! गदतो ब्रुवतो मम निगममुपदेशं संशृणुत भ्रातृणामग्रजानामनुपदवीं मार्गानु-सरणमन्विच्छत । अनुगता पदवी अनुपदवी "कुगतिप्रादय" इति समासः । यतो यूयं भ्रातृषु वत्सलाः ॥ ३० ॥

भ्रातृणां प्रायणं प्रकृष्टमनुवर्त्तनं भ्राता धर्मविदनुतिष्ठति करोति स पुण्यमेव बन्धुर्यस्य तादृशो मरुद्भिर्देवैः सह मोदते ॥ ३१ ॥

अमोघं दर्शनं यस्य स परमार्थदर्शी नारदः । एतावदिय-दुक्त्वा प्रययौ । तेऽपि मारिषा दाक्षाः मारिषेति पाठे दक्षः सम्बो-धनं मारिष इति तस्य नामान्तरं भ्रातृणामग्रजानामेव मार्गं परब्रह्मोपासनरूपमन्वगमन्ननुसृतवन्तः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अभ्यसन्तः अभ्यस्यन्तः । इडस्पतिं इलापतिम् ॥ २७ ॥

विशुद्धसत्त्वधिष्ण्याय विशुद्धसत्त्वगुणाश्रयाय निर्दोषबल-ज्ञानस्वरूपाय वा महाहंसाय सारग्राहिश्रेष्ठाय ॥२८॥२९॥३०॥

प्रायणं प्रयाणमाश्रमप्राप्तिलक्षणं पुण्यमेव बन्धुर्यस्य स तथा मरुद्भिर्देवैः ॥ ३१-३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ब्रह्म परमं वक्ष्यमाणं मन्त्रम् ॥ २८—२९ ॥

निगममुपदेशम् ॥ ३० ॥

प्रायणं अनुवर्त्य मरुद्भिर्भ्रातृवत्सलैर्देवैः । अयं दृष्टान्त एवोक्तः । यूयं तु वैकुण्ठगामिभिरग्रजैः सह मोदिष्यध्वे इति भावः ॥ ३१ ॥

मारिष हे आर्य ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

ब्रह्म वक्ष्यमाणं मन्त्रम् ॥ २६ ॥

इडस्पतिं मन्त्राणां पतिं भगवन्तमाराधयामासुः ॥ २७ ॥

मन्त्रमाह । ओमिति ॥ २८ ॥

प्रजासर्गे धीर्येषां तान् । अलुक् समासः । पूर्ववत् वाचः कूटानि अदृष्टान्तं भुव इत्यादीनि प्राह ॥ २९ ॥

अन्यदपि प्राह । हे दाक्षायणाः ! गदतो मम निगममुपदेशं शृणुत भ्रातृणामनुपदवीमन्विच्छत अवलोकयत ॥ ३० ।

प्रायणं प्रकृष्टमयनमनुवर्तनम् ॥ ३१ ॥

मारिष ! हे आर्य ! ॥ ३२ ॥

भाषा टीका ।

वे पुत्र भी पिता की आज्ञा पाकर दृढ व्रत को धारण करते उहां गये जहां कि अपने से पूर्वजसिद्ध भये हैं ॥ २५ ॥

उस नारायण सरोवर के स्नान पान करने से उनके मन के मल नष्ट हो गये तब वे परं ब्रह्म प्रणव को जप करके भारी तप को करने लगे ॥ २६ ॥

कितनेक महिनों तक जल पान करके रहे कितने महिने वायु भोजन करके रहे इस मंत्र का जप करके भगवान का आराधन करते रहे ॥ २७ ॥

उस मंत्र का अर्थ यह है कि पुरुष महात्मा विशुद्ध सत्त्व के स्थान महा हंस श्रीमन्नारायण आप के अर्थ नमस्कार है ॥ २८ ॥

हे राजेंद्र ! इस प्रकार से रहते हुये उन दक्ष पुत्रों को प्रति सर्ग के मनोरथी जान कर नारदजी पासमें आकर पहिले सरी के कूट वचनों को कहने लगे ॥ २९ ॥

नारदजी बोले हे दक्ष पुत्र ! हो कहने से मेरी आज्ञा को तुम श्रवण करो तुम तो भ्राताओं के प्रीति करने वाले हो तो भ्राताओं की पदवी का अनुसरण करो ॥ ३० ॥

जो धर्मज्ञ भ्राता अपने भ्राताओं के मार्ग का अनुष्ठान करता है वह पुरुष पुण्यवान् होता है देवतों के सहित आनंद करता है ॥ ३१ ॥

इतना कह कर सफल दर्शन देने वाले नारदजी चले गये हे श्रेष्ठ राजन् ! वे कुमार भी अपने बडे भ्राताओं के मार्ग में चलने लगे ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सध्रीचीनं सम्यचीनम् । प्रतीचीनम् । प्रत्यग्वृत्तिलभ्यं अनुपथ मनुगुणं पन्थानम् । पश्चिमा यामिनीर्गता रात्रय इव ॥ ३३-३४ ॥

एतस्मिन् काल उत्पातान् बहून् पश्यन् प्रजापतिः ।
पूर्ववन्नारदकृतं पुत्रनाशमुपाशृणोत् ॥ ३४ ॥
चुक्रोध नारदायासौ पुत्रशोकविमूर्छितः ।
देवर्षिमुपलभ्याह रोषाद्विस्फुरिताधरः ॥ ३५ ॥

॥ दक्ष उवाच ॥

अहो असाधो ! साधूनां साधुलिङ्गेन नस्त्वया ।
असाध्वकार्यर्भकाणां भिक्षोर्मार्गः प्रदर्शितः ॥ ३६ ॥
ऋणैस्त्रिभिरमुक्तानाममीमांसितकर्मणाम् ।
विघातः श्रेयसः पाप ! लोकयोरुभयोः कृतः ॥ ३७ ॥
एवं त्वं निरनुक्रोशो बालानां मतिभिद्धरेः ।
पार्षदमध्ये चरसि यशोहा निरपत्रपः ॥ ३८ ॥
ननु भागवता नित्यं भूतानुग्रहकातराः ।
ऋते त्वां सौहृदघ्नं वै वैरङ्करमवैरिणाम् ॥ ३९ ॥
नेत्थं पुंसां विरागः स्यात्त्वया केवलिना मृषा ।
मन्यसे यद्युपशमं स्नेहपाशनिकृन्तनम् ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पुत्राणां पारमहंस्यनिष्ठामुपश्रुत्य दक्षोऽपि प्रायशो विरक्तः स्यादिति तदनुग्रहार्थं देवर्षिस्तत्पार्श्वं गतस्तदा तमुपलभ्य दक्ष आह ॥ ३५ ॥

साधोरिव लिङ्गं वेषो यस्य तेन त्वया नोऽस्मदीयानामर्भकाणामसाध्वकारि कृतं तदेवाह । साधूनां स्वधर्मे प्रवृत्तानां भिक्षोर्यो मार्गः स प्रदर्शितः ॥ ३६ ॥

ननु सन्न्यासिनो मार्गः साधुरेव मोक्षहेतुत्वात् । सत्यम् । ऋणत्रयापाकरणं विना तु महाननर्थ एवेत्याह । ऋणैरिति । "जायमानो वै ब्राह्मणस्त्रिभिरृणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी वासि" इतिश्रुतेः । ऋणैरमुक्तानां न मीमांसितानि न विचारितानि कर्माणि यैः तेषां तावदृणविमोको नास्ति तदुत्तरकालभावित्वाच्च पुत्रोत्पादनयज्ञानुष्ठानयोरभावेन पितृदेवर्षिऋणाद्विमुक्तिश्च नास्ति । अतो हे पाप ! विषयभोगत्यागादिह लोके श्रेयसो विघातः कृतः । मोक्षानधिकारित्वाच्च परलोकेऽपि श्रेयसो विघातः कृत इत्यर्थः । तथा च मनुः ।

"ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः" ॥

इति ॥ ३७ ॥

बालानां मतिं पुत्रादिविषयां भिनत्तीति तथा एवं निरनुक्रोशो निर्घृणो हरेर्यशोनाशकः सन्तत्पार्षदानां मध्ये कथं चरसि ॥ ३८ ॥

निर्लज्जत्वमेवाह । नन्विति । ननु त्वामृते भागवताः सर्वे भूतानुग्रहपरवशास्त्वं तु भूतविप्रियं कुर्वन् कथं न लज्जस इति भावः ३९ ॥

ननु वैराग्यादुपशम उपशमाच्च भूतस्नेहपाशच्छेदनं भवति न च विरक्तस्य ऋणत्रयापाकरणमावश्यकम् "यदहरेव विरजेत्तदहरेव प्रव्रजेत यदिवेतरथा ब्रह्मचर्यादेव प्रव्रजेत्" इत्यादि श्रुतेः । अतो वैराग्योपदेशेन तेषां मयानुग्रह एव कृत इति चेत्तत्राह । नेति । यद्यपि त्वमेवं मन्यसे तथापि मृषा केवलिना ज्ञानं विनावधूतवेषेण त्वयेत्थं मतिचालने कृतेऽपि पुंसां विरागो नैव स्यात् । नच विरागं विनोपशमो न च तेन विना स्नेहपाशनिकृन्तनमित्यर्थः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततस्ते सध्रीचीनं सहाञ्चति गच्छतीति सध्र्यङ् आतिवाहिकैः सह गन्ता जीवः तेन गम्यं सध्रीचीनं प्रतीचीनं स्वस्मै भासमानेन ब्रह्मात्मकस्वात्मयाथात्म्यसाक्षात्कारवता गम्यं प्रतीचीनं परस्य परमपुरुषस्यानुबन्धमनुकूलमर्चिरादिमार्गं गता अद्यापि न निवर्त्तन्ते न पुनरावर्त्तन्ते "एतं देवयानं पन्थानमापद्य न पुनरावर्त्तन्त" इति श्रुत्यर्थोऽत्र विवक्षितः । न पुनरावृत्तौ दृष्टान्तः । यामिनीरिव पश्चिमा इति । पश्चिमा अतीता यामिनीर्यामिन्योरात्रयो यथा न पुनरावर्त्तन्ते तथेत्यर्थः ॥ ३३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एतस्मिन् काले । नारदोपदेशेन सबलाश्वानां मुक्तिप्राप्तिकाले प्रजापतिर्दक्षः बह्वनुत्पातान्पुत्रनाशप्रयुक्तानपश्यत्ततः पूर्ववन्नारदोपदेशकृतं पुत्राणां नाशमुपाशृणोत् ॥ ३४ ॥

पुत्राणां निवृत्तिधर्मनिष्ठया मुक्तिमुपश्रुत्य दक्षोऽपि प्रायशो विरक्तः स्यादिति तदनुग्रहार्थं देवर्षिस्तत्पार्श्वं गतः । तदासौ दक्षो देवर्षिमुपलभ्य पुत्रनाशाग्निमित्ताद्विमूर्च्छितः उत्थाय नारदाय चुक्रोध क्रुद्धवान् ॥ ३५ ॥

क्रोधमेवाह । अहो इति । साधोरिव लिङ्गं वेषो यस्य तेन त्वया नोऽस्मदीयानामर्भकाणामसाध्वकारि कृतं तदेवाह । स्वधर्मे प्रवृत्तानां यः संन्यासिनां मार्गः स प्रदर्शितः ॥ ३६ ॥

ननु संन्यासिनां मार्गः साधुरेव मोक्षहेतुत्वात्सत्यम् । ऋणत्रयानपनोदनं पितुर्महदनर्थं एवेत्याह । ऋणैरमुक्तानां न मीमांसितान्यविचारितानि कर्माणि यैस्तेषामृणेभ्यो विमोचनं नास्ति तदुत्तरकालभावित्वाच्च पुत्रोत्पादनयज्ञानुष्ठानयोरभावेन पितृदेवऋणमुक्तिश्च नास्त्यतः हे पाप ! विषयभोगत्यागादिह लोके श्रेयसो विघातः विषयभोगपूर्वकस्य भोगस्याभावान्मोक्षानाधिकारित्वात्परलोकेऽपि श्रेयसो विघातः कृतः इत्यर्थः ॥ ३७ ॥

बालानां मतिभिद्बुद्धिविचालकः एवं निरनुक्रोशो निर्घृणः हरेर्यशोनाशकः सन् तत्पार्षदानां मध्ये निर्लज्जः कथं चरसि ॥ ३८ ॥

निर्लज्जत्वमाह । नन्विति । ननु हे नारद ! अवैरिणां वैरकरं सौहृदघ्नं त्वां विना भागवताः सर्वे भूतानुग्रहपरवशाः त्वं तु भूतविप्रियं कुर्वन् कथं न लज्जसे इति भावः ॥ ३९ ॥

न विषयभोगाद्विराग उत्पद्यते किन्तु विषयभोगस्य हेयत्वोपदेशेनैवेत्यत आह । नेत्थमिति । यद्यपि त्वं विषयभोगस्य हेयत्वोपदेशेन स्नेहपाशनिकृन्तनं विषयासक्तिरूपस्नेह एव पाशस्तस्य निकृन्तनं छेदकमुपशमं विरागं मन्यसे । तथापि मुधा मृषा केवलेन ज्ञानं विना साधुवेषेण त्वयेत्थं मतिचालने कृतेऽपि पुंसां विरागो नैव स्यादित्यर्थः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सध्रीचीनं शोभनं प्रतीचीनमाभिमुख्येन वर्तमानं परस्य परमात्मनः अनुपथमनुगुणं पन्थानं पश्चिमाः यामिनीः यामिन्यः अतीता रात्रय इव ॥ ३३ ॥

प्रजापतिर्दक्षः ॥ ३४ ॥ ॥ ३५ ॥

साधोरिव लिङ्गं जटायज्ञोपवीतशमदमादिलक्षणं यस्य स तथा तेन त्वया नः साधूनामर्भकाणां भिक्षोः संन्यासिनः मार्गः प्रदर्शित इति यदतोऽसाध्वमङ्गलमकारीत्यन्वयः ॥ ३६ ॥

ननु भिक्षुमार्गस्य "संन्यासेन तनुं त्यजेत्" इत्यादिना विहितत्वात्कथममङ्गलं कृतमित्युच्यत इति तत्राह । ऋणैरिति । "ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः" इति श्रुतेः । त्रिभिः ऋणैरमुक्तानामननुष्ठानादिति शेषः । अमीमांसितानि अविचारितानि कर्माणि यैस्तथा तेषां पुत्राणामुभयोर्लोकयोरवाप्तितोः श्रेयसो विघातो विघ्नः कृत इत्यन्वयः । रोषनिमित्तं हे पापेति सम्बोधनं न तु तदर्थयुक्तत्वात् ॥ ३७ ॥

एवं विचार्यमाणे सति बालानां कृत्याकृत्यविवेकज्ञानशून्यानां मतिभिद्बुद्धिभेदकृद्यशसो हानिर्यस्मात्स तथा यशो नाशं कृतवान् वा निरनुक्रोशः निर्गता अनुकम्पा यस्मात्स तथेति ॥ ३८ ॥

एतदेवाह । नन्विति । सौहृदघ्नमित्यस्य विवरणं वैरङ्करमिति खश्प्रत्ययेन दक्षस्य कोपोद्रेकं दर्शयति । एतदेव विस्फुरिताधर इत्यनेनाप्यसूचि ॥ ३९ ॥

विषयप्रसक्त्या रागोद्रेकसम्भवेन संसारानिवृत्तिः स्यादतो वैराग्याय मयाहितमुपादेशीति तत्राह । नेत्थमिति । केवलेन सन्ध्योपासनादिकर्मशून्येन भागवताभिमानिना त्वया विना इत्थं बोधनेन पुंसो विरागो न स्यादित्यन्वयः । ननु विषयस्नेहाद्रागः उपशमात् स्नेहनिवृत्त्या रागनिवृत्तिरिति चेत्तत्राह । मन्यस इति । यद्युपशमं स्नेहनिवर्तकं मन्यसे तथापि स व्यर्थ इति मन्य इति शेषः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

श्रीनारदे दक्षापराधोऽयं प्राचीनशिवापराधदुःसंस्कारेण ॥ ४०—४४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सध्रीचीनं समीचीनं प्रतीचीनं प्रत्यग्वृत्तिलभ्यं परस्य परमेश्वरस्य अनुपथम् अनुकूलं भक्तिमार्गं पश्चिमा यामिनीर्गता रात्रय इव ॥ ३३ ॥ ३४ ॥

देवर्षिमुपलभ्येति । स्वायम्भुवस्य मनोर्वंशाः प्रियव्रतोत्तानपादध्रुवादयः सर्वे मद्द्वारैव भगवता आत्मसात्कृताः । महाकर्मजडः प्राचीनबर्हिरप्युद्धृतः । तस्य पुत्रा दश प्रचेतसः पौत्रा दशसहस्राणि हर्यश्वाः सहस्रं सबलाश्वाश्चोत्तीर्णाः । कथमेकस्तन्मध्यवर्त्ती दक्ष एव गृहान्धकूपे खेलतीति तमप्युद्दिधीर्षामीति विमृश्य साम्प्रतञ्च पुत्राणां पारमहंस्यनिष्ठां श्रुत्वा स्वयमेव शोचन् दक्षः प्रायो गृहे निर्विण्ण एव वर्त्तते तत्तमनुग्रहीतुमयमेव समयः साधुः । यद्यपि साम्प्रतमपि स मां नान्विष्यति तदप्यहमेव तस्य गृहं यामीति विचार्य तत्रागतवन्तं नारदमुपलभ्याह ॥ ३५ ॥

साधोरिव लिङ्गं वेशो यस्य तेन त्वया महादाम्भिकेनेत्यर्थः । साधूनामस्माकमिति गौरवेण बहुवचनम् । मम साधोस्तव वैरं स्वप्नेऽप्यकुर्वतस्त्वया असाधु अभद्रमकारीत्येतावता कालेन तव महदपराधो जात इति भावः । ननु किमसाध्वकारीति तत्राह । अर्भकाणां मद्बालकानां गार्हस्थ्यसुखभोगमसहमानेन मत्सरेण त्वया भिक्षोर्भिक्षुकलोकस्य । अर्भकाणामित्यर्भकत्वादेव ते सरलास्तव कपटिनोऽप्युपदेशं जगृहुरिति भावः । अत्र न विद्यते साधुर्यतः हे तथाभूत । साधुलिङ्गेन साधूनि लिङ्गानि चिह्नान्यपि यस्य तेन न विद्यते साधुर्यतस्तथाभूत यथा स्यात्तथा दर्शित इति सरस्वत्यभिप्रेतोऽप्यर्थो ज्ञेयः । एवमग्रिमेषु श्लोकेष्वपि किञ्च विस्तरभयान्न विवृतः ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु भिक्षोर्मार्ग एव संसारतारणक्षमो न तु गृहस्थानां युष्माकमिति चेत्तत्राह । ऋणैरिति । "जायमानो ह वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते । ब्रह्मचर्य्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी वासि" इत्यादिश्रुतेः । ऋणैरमुक्तानां न मीमांसितानि न विचारितानि कर्म्माणि यस्तथा तावदृषिऋणविमोचो नास्ति तदुत्तरकालभावित्वाच्च पुत्रोत्पादनयज्ञानुष्ठानयोरभावेन पितृदेवर्णाद्विमुक्तिश्च नास्ति अतः हे पाप ! हे विश्वस्तघातिन् ! विषयभोगत्याजनादिहलोके श्रेयसः विघातः । मोक्षानधिकारेऽपि वैराग्यप्रवर्त्तनात् परलोकेऽपि विघातः कृत इत्यर्थः । तथा च मनुः ।

> ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
> अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥

इति ॥ ३७ ॥

त्वां दुष्टं किं ब्रवीमि त्वया सेवकैत भागवतोऽपि दुर्यशोऽजनीत्याह । एवमिति । निरनुक्रोशो निर्दयः । मतिं शास्त्रविहितकर्म्मनिष्ठां बुद्धिं भिनत्सीति सः । हरेर्यशोहा त्वमभूस्तेन हरावपि तवापराधः पार्षदमध्ये इति वैष्णवेष्वपीत्येवमस्मद्विधेषु महत्सु भगवति भागवतेषु च तवापराधो जातो दुर्वार एव विश्वस्तघातित्वादीनां दुष्कृतानान्तु वार्त्ता दूरे एवेति भावः ॥ ३८ ॥

किञ्च मत्सम्मुखमायातस्त्वं कीदृशं मुखं दर्शयितुमतो धिक् त्वां निर्लज्जमित्याह । नन्विति । ननु त्वामिति त्वन्तु भूतमात्रद्रोहीति भावः । सौहृदघ्नमिति सौहृदकारिणामप्यस्माकमिति भावः । वैरङ्करमित्यस्माकं प्रकटमेव वैरं कृत्वापि पुनः केन मुखेन प्रत्यक्षीभवसीति सत्यं निरपत्रप एवासि कति पुनरहं त्वां न लज्जयामीति भावः ॥ ३९ ॥

ननु मत्प्रवर्त्तिताद्वैराग्यादेव तेषामुपशमस्तस्माच्च स्नेहपाशनिकृन्तनं वृत्तमेव । अद्यापि तव पितुरपि पार्श्वानागमनादेवानुमितं तत्कथं तेषां मोक्षेऽनधिकारः न च विरक्तस्य ऋणत्रयापाकरणमेवावश्यकम् । "यदहरेव विरज्येत तदहरेव प्रव्रजेत् यदि वेतरथा ब्रह्मचर्य्यादेव प्रव्रजेत्" इत्यादिश्रुतेः । अतो वैराग्योपदेशेन तेषां मयानुग्रहः कृत एवेति चेत् तत्राह । नेति । सत्यं महापुरुषाणां करुणया विरागः स्यादेव त्वया तु मृषा केवलिना ज्ञानशून्यावधूतेन अनन्यवैष्णवम्मन्येन वा इत्थं मतिचालने कृतेऽपि सत्सङ्गवासनात् विरागो भवन्नपि नान्तरो वास्तवो विरागः स्यात् । यद्यपि त्वमुपशमं मन्यसे तदपि नैव स्यात् तव महापुरुषत्वाभावादिति भावः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सध्रीचीनं मुक्तिमार्गत्वात्समीचीनं प्रतीचीनं प्रतीच्या अन्तर्वृत्तिमता भगवद्ध्याननिष्ठेन लभ्यम् । परस्य मुक्तगम्यस्य भगवतोऽनुपथमनुगुणमर्च्चिरादिमार्गम् । पश्चिमा यामिनीः गता रात्रय इव अद्यापि न निवर्त्तन्ते "एतं देवयानं पन्थानमापद्य न पुनरावर्त्तन्ते" इति श्रुतेः ॥ ३३ ॥ ३४ ॥

सर्वज्ञो भगवान् देवर्षिः दक्षशान्त्यर्थं तत्समीपमागतस्तमुपलक्ष्य समीपगं दृष्ट्वा आह ॥ ३५ ॥

"यदहरेव विरजेत्तदहरेव प्रव्रजेत् किं प्रजया किं धनेन त्यागेनैकेनामृतत्वमानशुः" इत्यादि प्रसिद्धम्

"कौमारं आचरेत्प्राज्ञः धर्मान् भागवतानिह ।

देवर्षिभूताप्तनृणां पितॄणां न किंकरो नायमृणी च राजन् ! सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृत्य कर्त्तम् । इति वक्ष्यमाणमुत्तमाधिकारिविषये श्रीनारदादिमतं प्रजासृष्ट्यभिनिवेशेन त्यक्त्वा

> ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
> अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥

इति मन्वादिवाक्यं मन्दाधिकारिविषयं गृहीत्वा श्रीनारदं निन्दति । अहो इत्यादिना । हे असाधो ! साधुलिङ्गेन त्वया साधूनामभंकाणां यद्भिक्षोर्मार्गः प्रदर्शितस्तदिदमसाधु अयुक्तमकारि ॥ ३६ ॥

न मीमांसितानि कर्माणि यैस्तेषाम् । अर्थाद्वेदाध्ययनपुत्रोत्पादनयज्ञानुष्ठानरहितानामत एव ऋषिपितृदेवानामृणैरमुक्तानां "पुत्रेणायं लोकः" इति श्रुतेः पुत्राद्युत्पादनेनेह लोके कर्मानाचरणान् पितृलोके श्रेयसो विघातः हे पाप ! त्वया कृतः ॥ ३७ ॥

निरनुक्रोशो निर्दयः । तत्र हेतुः । बालानां मतिमुभयलोकसुखदकर्माचरणपुत्रोत्पादनादिबुद्धिं भिनत्सीति तथा । विरपत्रपो निर्लज्जः । तत्र हेतुः । हरेर्यशोहापि तत्पार्षदानां मध्ये चरसि ॥ ३८ ॥

हरियशोहत्वमुपपादयति । त्वां सौहृदघ्नवैरिणां वैरंकरमृते भागवताः नूनं निश्चितं भूतानुग्रहे कातरा व्यग्राः ॥ ३९ ॥

विषयसेवनेन विषयेषु भूय आसक्तिः स्यादतः "त्यागेनैकेनामृतत्वम्" इति इति श्रुतेः प्रथमत एव विषयान् सोपायान् परित्यजेन्मुक्तिकामः इति देवर्षिमतमनादृत्य भुक्तेभ्यो विषयेभ्यो दृष्टदोषेभ्यो वैराग्यं संभवति नान्यथेत्याह । नेत्थमिति द्वाभ्याम् । स्नेहपाशस्य विषयासक्तेर्निकृन्तनमुपशमं वैराग्यं यन्मन्यसे तदित्थं मृषा केवलिना मिथ्याविरक्तेन त्वया कारितः पुंसां विरागो न स्यात् ॥ ४० ॥

भाषा टीका ।

सब के अन्त मे प्राप्त होने लायक अति सुन्दर मार्ग को वे चले गये सो आज पर्यन्त नहीं लौटे हैं जैसे कि पिछली रात नहीं लौटती है ॥ ३३ ॥

इतने ही काल मे प्रजापति ने अपशकुन से बहुत उत्पात देखे फिर पहिलेसरीके नारदजी के किये पुत्रों के नाश को सुना ॥ ३४ ॥

पुत्रों के शोक मे युक्त होकर दक्षप्रजापति ने नारदजी के ऊपर बडा कोप किया इतने मे नारदजी दक्ष के पास गये तब क्रोध के मारे ओठों को फरका कर दक्ष बोले ॥ ३५ ॥

दक्ष बोले अहो तू बडा असाधु है तैंने साधुओं के

नानुभूय न जानाति पुमान् विषयतीक्ष्णताम् ।
निर्विद्यत स्वयं तस्मान्न तथा भिन्नधीः परैः ॥ ४१ ॥
यन्नस्त्वं कर्मसन्धानां साधूनां गृहमेधिनाम् ।
कृतवानसि दुर्मर्षं विप्रियं तव मर्षितम् ॥ ४२ ॥
तन्तुकृन्तन ! यन्नस्त्वमभद्रमचरः पुनः ।
तस्माल्लोकेषु ते मूढ ! न भवेद्भ्रमतः पदम् ॥ ४३ ॥

श्रीशुक उवाच ।

प्रतिजग्राह तद्बाढं नारदः साधुसम्मतः ।
एतावान् साधुवादो हि तितिक्षेतेश्वरः स्वयम् ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां षष्ठस्कन्धे नारदशापोनाम
पञ्चमोऽध्यायः ॥ ५ ॥

भाषा टीका ।

चिन्ह को धारण करके बडा असाधु पना किया जो कि बालकों को भिक्षुक मार्ग दिखादिया ॥ ३६ ॥

हे पापी ! जिन बालकों ने देवऋण पितृऋण ऋषिऋण को नहीं दूर किया हैं जिनोंने कर्म का विचार नहीं किया है उन के दोनों लोकके पुण्य सुखका तैंने नाश करदिया ॥ ३७ ॥

तू इस प्रकार का निर्दयी है बालकों की मति विगाडने वाला है यश के नाश करने वाला है निर्लज्ज है श्रीहरि के पार्षदों के मध्यमे घूमता है ॥ ३८ ॥

क्यों रे भक्तजन तो निखद्दी लोगों के अनुग्रह करने मे व्यग्र रहते हैं एक तूही विना वैर वालों से वैर करने वाला सुहृदपन के नाश करने वाला है ॥ ३९ ॥

विना ज्ञान के विरक्त होने वाले तेरे कहने से इस प्रकार से झूंठ से किसी को वैराग्य नहीं होगा जो कि तू जानता है स्नेह रूपी पास छूट जाय और शान्ति होजाय सो नहीं होना है ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इत्थं विरागो न स्यादित्यत्र हेतुमाह । नानुभूयाननुभूय विषयाणां तीक्ष्णतां दुःखहेतुत्वं न जनाति । तस्माद्विषयानुभवेन तीक्ष्णत्वज्ञानात् ॥ ४१ ॥

अतस्त्वयास्माकमप्रियमेव कृतं तथापि वयं न कुर्म इत्याह । यदिति । कर्मसन्धानां कर्ममर्यादानाम् । कर्तुमन्धानामिति पाठे विप्रियं कर्तुमजानतामित्यर्थः । दुःसहं यत्वं कृतवानसि तन्मर्षितं सोढम् ॥ ४२ ॥

तथापि तवाभद्रं भविष्यत्येवेत्याह । तन्तुकृन्तन ! सन्तानच्छेदक । यद्यस्मादभद्रं पुत्राणां स्थानभ्रंशमचरस्तमात्तव लोकेषु भ्रमतः पदं स्थानं न भवेदिति सुवुच्छलेन शापः ॥ ४३ ॥

बाढं तथेति स्वीकृतवान् । ईश्वरोऽपि प्रतिकर्तुं समर्थोऽपि तितिक्षेत सहेतेति यदेतावानेव ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कुतः । यतः पुमान्ननुभूय अननुभूय विषयाणां तीक्ष्णतामन्ततो दुःखरूपतां न जानाति । यथा विषयाननुभूय स्वयमेव तस्माद्विषयान्निर्विद्येत विरज्येत । तथा परैर्भिन्नधीभ्रामितधीर्न निर्विद्येत ॥ ४१ ॥

यत्त्वं कर्मसन्धानां कर्मण्यासक्तचित्तानां कर्तुमन्धानामिति पाठे प्रातिविप्रियं कर्तुमजानतां गृहस्थानां साधूनामस्माकं दुर्मर्षं सोढुमशक्यं विप्रियं कृतवानसि तदप्रियममर्षितमस्माभिरिति शेषः । न मृष्यतेऽस्माभिरित्यर्थः ॥ ४२ ॥

एवं नारदाय क्रुद्धवान् दक्षः शशाप । तन्त्विति । हे तन्तुकृन्तन ! सन्तानच्छेदक ! यस्मात्त्वमभद्रं पुत्रविनाशमचरः कृतवानसि चरतेर्लङ् मध्यमैकवचनं हे मूढ ! तस्मात्सर्वेषु लोकेषु भ्रमतस्तव पदं स्थानं न भवेत्काचिदपि भवान् चिरमवतिष्ठेतकिन्तु भ्राम्यत्विति शापः ॥ ४३ ॥

तं च शापं साधूनां सम्मतो नारदो बाढं तथैवास्त्विति प्रतिजग्राह स्वीकृतवान् । कुतः हि यस्मादीश्वरोऽपि स्वयं प्रति-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कर्तुं समर्थोऽपि तितिक्षेत सहेतेति यदेतावानेव साधूनां वादः न तु प्रतिशापप्रदानवाद इति भावः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कुतो व्यर्थ इति तत्राह । नेति । नानुभूयानुभूय विषयसेवामकृत्वेत्यर्थः । विषयतीक्ष्णतां संसारोत्पादनपटुताम् । तज्ज्ञानाद्वैराग्यं स्यात्किमिति तत्राह । निर्विद्येत इति । यथा विषयभोगेन तत्तीक्ष्णत्वं ज्ञात्वा स्वयं परोपदेशमन्तरेण तस्माद्विषयग्रामान्निर्विद्यते विरक्तो भवति तथा परैर्भिन्नधीः प्रबोधितबुद्धिः न विरक्तो भवति अज्ञातविषयतीक्ष्णत्वादिति शेषः ॥ ४१ ॥

गालीवचनमन्तरेण क्रोधफलमाह । यदिति । त्वं दुर्मर्षं दुःसहं विरोधं कृतवानसीति यत्तन्मर्षितं सोढमेवेत्यन्वयः ॥ ४२ ॥

तर्हि किं मर्षितमिति तत्राह । तन्त्विति । हे मूढ ! अस्मदभिमतविरुद्धबोधक ! तन्तुकृतां सन्ततिकराणां नः तनयानामभद्रमैहिकसुखानुभवविरोधिरूपमचरः । पुनः यस्मात्तस्माल्लोकेषु भ्रमतस्ते पदमेकत्र निवासलक्षणं स्थानं न भवेदित्यन्वयः ॥ ४३ ॥

स्वयं शोभनदेवो नारद ईश्वरः प्रतिशप्तुं समर्थोऽपि न शशाप दक्षशापं तितिक्षेत सहेत हि यदेतावान् साधूनां वादः स्वभावलक्षणः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तस्मात्त्वमनभिज्ञो राजमार्गे मत्तः शृणिवत्याह । नेति । विषयाणां तीक्ष्णतां दुःखप्रदत्वमननुभूय न जानाति । अतस्तस्माद्विषयभोगादेव तदीयतीक्ष्णत्वज्ञानात् स्वयमेव निर्विद्येत यथा न तथा परैस्त्वादृशैर्भिन्नधीः विदीर्णमतिः ॥ ४१ ॥

एवं त्वया यथा मम निर्हेतुकं वैरं कृतं तस्य प्रतिफलमहमपि तच्चतुर्गुणितं स्वयमेव दातुं शक्नोम्येव तथापि न ददामीति पश्य गृहस्थानामप्यस्माकं तितिक्षामित्याह । यदिति । कर्मण्येव कर्ममार्गे एव सन्धा मर्य्यादा येषां तेषां कर्त्तुमन्धानामिति पाठे परेषां विप्रियं कर्त्तुमजानतामित्यर्थः । दुर्मर्षं दुःसहमपराधमेव ज्ञानभक्तिमर्य्यादाभ्रंशस्य परं विप्रियं कर्त्तुं बद्धुमतः । असाधोः परमहंसाश्रमिणः मर्षितं क्षान्तम् ॥ ४२ ॥

तथापि तवाभद्रन्तु भविष्यत्येवेत्याह । तन्तुकृन्तन ! सन्तानच्छेदक ! अभद्रं मत्पुत्राणां स्थानभ्रंशम् अचरः । भ्रमतः पदं स्थानम् ॥ ४३ ॥

प्रतिजग्राह । बाढं तथेति स्वीचकार साधूनां सम्मत इति । साधव एवमेव सहन्त इत्यर्थः । प्रसिद्धस्य साधुवादशब्दस्यार्थ्येव निरुक्तिरित्याह । एतावानिति । ईश्वरः प्रतिशप्तुं समर्थोऽपि । ननु दक्षमनुग्रहीतुमागतो नारदो दक्षेण बहुशस्तिरस्कृतस्तत्र तांस्तिरस्कारान् श्रुत्वा नारदेन तत्समीपात् कथं नापसृतम् । उच्यते । नारदस्यायमभिप्रायः । क्रोधवशोऽयं बहुशस्तिरस्कारानपि करोतु शापञ्च ददातु । ततश्च "क्रोधस्यैतत्फलोदयात्"इत्युक्तेर्यदा क्रोधः शाम्येत् माञ्च प्रति तिरस्कारादिकमकुर्वाणं सर्व्वमेव सहमानमालोक्य हन्त हन्त भगवद्भक्तोऽयं तिरस्कृतः शप्तश्चेति वैकुण्ठगतानां सनकादीनामिवानुतापश्च यदा भविष्यति तदा भक्तिबीजवपनयोग्यक्षेत्रीभूतेऽस्मिन् शुद्धभक्तिबीजमुप्त्वा यास्यामीति बुद्ध्या तावत्क्षणपर्य्यन्तमपि स्थितम् । दक्षस्य तु तत्तदृष्ट्वा अहो चन्द्रार्द्धमौलेरपराधशेषप्राबल्यमिति स्मृत्वा ततोऽपसृतम् ॥ ४४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

षष्ठस्य पञ्चमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नानुभूय विषयानुभवमकृत्वा विषयाणां तीक्ष्णतां दुःखोदर्कतां न जानाति तस्माद्विषयानुभवेन तत्तीक्ष्णत्वज्ञानात्स्वयमेव निर्विद्येत विषयेभ्यो विरज्येत परैस्त्वादृशैर्भिन्नधीरतु तथा न विरज्येत ॥ ४१ ॥

कर्मणि कर्ममार्गे सन्धा निष्ठा येषां नोऽस्माकं दुःसहमप्रियं कृतवानसि यत्तत्तव मर्षितं क्षान्तं मया ॥ ४२ ॥

इदं तु तव मत्प्रियकारिणः भविष्यत्येवेत्याह । हे तन्तुकृन्तन ! वंशघ्न ! यद्यतस्त्वं नोऽस्माकमभद्रमप्रियमचरस्तस्मात्ते भ्रमतः पदं स्थानं न भवेत् ॥ ४३ ॥

तच्छापं बाढं तथास्त्विति प्रजिजग्राह स्वीकृतवान् । ईश्वरोऽपि प्रतिशप्तुं समर्थोऽपि तितिक्षेतेति यदेतावानेव साधुवादः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

पञ्चमाध्यायार्थप्रकाशः ॥ ५ ॥

भाषा टीका ।

पुरुष विना अनुभव किये विषय की तीक्ष्णताको नहीं जान सकता है जानने से स्वयं उससे निवृत्त हो जायगा तैसा दूसरों के बुद्धि भेदन से नहीं निवृत्त होगा ॥ ४१ ॥

वैदिक कर्म के सङ्कल्प वाले गृहस्थ साधु हम लोगों का बड़ा दुःसह अप्रिय तैंने किया है सो हमने एक वखत सह लिया ॥ ४२ ॥

हे सन्ताननाशक ! तैंने जो हमारा फिर भी बुरा किया है हे मूर्ख ! तिस से तेरे को संसार में घूमते घूमते कहीं ठिकाना नहीं मिलेगा ॥ ४३ ॥

श्रीशुकदेवजी बोले साधुओं के सम्मान्य श्रीनारदजी ने उस शाप को तथास्तु करके ग्रहण कर लिया जो कि समर्थ होकर भी सह लेना है इतनाहीं साधुका साधुपना है ॥ ४४ ॥

इति श्रीभागवते षष्ठस्कन्ध पांच मे अध्यायका
भाषानुवाद-लक्ष्मणाचार्यकृत
समाप्त ॥ ५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पञ्चमोऽध्यायः समाप्तः ॥ ५ ॥

॥ षष्ठोऽध्यायः ॥

श्रीशुक उवाच ।

ततः प्राचेतसोऽसिक्न्यामनुनीतः स्वयम्भुवा ।
षष्टिं सञ्जनयामास दुहितॄः पितृवत्सलाः ॥ १ ॥
दश धर्माय कायेन्दोर्द्विषट् त्रिणव दत्तवान् ।
भूताङ्गिरःकृशाश्वेभ्यो द्वे द्वे तार्क्ष्याय चापराः ॥ २ ॥
नामधेयान्यमूषां त्वं सापत्यानां च मे शृणु ।
यासां प्रसूतिप्रसवैर्लोका आपूरितास्त्रयः ॥ ३ ॥
भानुर्लम्बा ककुब्जामिर्विश्वा साध्या मरुत्वती ।
वसुर्मुहूर्ता सङ्कल्पा धर्मपत्न्यः सुताञ्छृणु ॥ ४ ॥
भानोस्तु देवऋषभ इन्द्रसेनस्ततो नृप ।
विद्योत आसील्लम्बायास्ततश्च स्तनयित्नवः ॥ ५ ॥
ककुभः सङ्कटस्तस्य कीकटस्तनयो यतः ।
भुवो दुर्गाणि जामेयः स्वर्गो नन्दिस्ततोऽभवत् ॥ ६ ॥
विश्वेदेवास्तु विश्वाया अप्रजांस्तान् प्रचक्षते ।
साध्यो गणस्तु साध्याया अर्थसिद्धिस्तु तत्सुतः ॥ ७ ॥
मरुत्वांश्च जयन्तश्च मरुत्वत्यां बभूवतुः ।
जयन्तो वासुदेवांश उपेन्द्र इति यं विदुः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षष्ठे दक्षेण सृष्टायां कन्याषष्ट्यां प्रकीर्तिताः ।
पृथग्वंशा यतो जातो विश्वरूपोऽदितेः सुतात् ॥१॥

नारदात्पुत्राणां नाशमाशङ्कमानो दुहितॄर्जनयामास ॥१॥

काय कश्यपाय द्विषट् द्विगुणाः षट् द्वादश यासु ताः । त्रयोदशेत्यर्थः । इन्दोः सोमाय त्रिणव सप्तविंशतिं तार्क्ष्याय नामान्तरं प्राप्ताय कश्यपायैव अपरा अवशिष्टाश्चतस्रः ॥ २ ॥

सापत्यानामपत्यसहितानाम् । मे मत्तः शृणु । प्रसूतिप्रसवैः पुत्रपौत्रादिभिः ॥ ३ ॥ ४ ॥

ततो देवऋषभात् ॥ ५ ॥

यतः कीकटाद्भुवो दुर्गाणि दुर्गाभिमानिनो देवाः । जामेयो जाम्याः पुत्रः स्वर्गस्ततः स्वर्गान्नन्दिः पुत्रोऽभवत् ॥ ६ ॥

तत्सुतः । साध्यानां सुतः ॥ ७ ॥ ८ ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नारदात्पुत्रनाशमाशङ्कमानो दक्षः पुत्रोत्पादनप्रयत्नाद्विरम्य तूष्णीमवस्थितो ब्रह्मणा परिसान्त्वितस्ततो दुहितॄरजनयदित्याह मुनिः । तत इति । प्राचेतसो दक्षः स्वयम्भुवानुनीतः अनुसान्त्वितोऽसिक्न्यां भार्यायां दुहितॄः पितृवत्सलाः षष्टिसङ्ख्याकाः सञ्जनयामास ॥१॥

तासां मध्ये दश कन्यकाः भानुलम्बाद्याख्या धर्मायादात् काय कश्यपाय द्विषडेकां च त्रयोदशेत्यर्थः । अदितिदितिदनुकाष्ठारिष्टासुरसेलामुनिक्रोधवशाताम्रासुरभीसरमातिमय इति कश्यपभार्याख्या अदात् । इन्दवे सोमाय त्रिणव त्रयाणां नवानां समाहारस्त्रिणवं सप्तविंशतिसङ्ख्याकाः कृत्तिकारोहिण्याद्याख्या नक्षत्ररूपा अदात् । भूतो रुद्रः भूताङ्गिरःकृशाश्वेभ्यः त्रिभ्यः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

द्वे द्वे कन्ये अदात्तत्र रुद्रस्य स्वरूपा अन्या च प्रसिद्धेति द्वे भार्ये अङ्गिरसस्तु स्वधा सती चेति द्वे कृशाश्वस्य त्वर्चिर्भीषणा चेति द्वे इति विवेकः । अपरावशिष्टाश्चतस्रो दुहितॄः तार्क्ष्याय तार्क्ष्यो नाम कश्चिद्देवः तस्मै अदादित्यर्थः ॥ २ ॥

अमीषां दक्षस्य दुहितॄणां सापत्यानां पुत्रपौत्रादिसहितानां नामधेयानि मे मत्तः शृणु ताः विशिनष्टि । यासां दक्षकन्यानां प्रसूतिप्रसवैः पुत्रपौत्रादिभिः त्रयो लोका आपूरिताः ॥ ३ ॥

तावद्धर्मस्य दश भार्या निर्दिशति । भानुरिति । भान्वादयः सङ्कल्पान्ताः दश धर्मस्य भार्याः तासां सुतान् क्रमेण शृण्वित्यर्थः ॥ ४ ॥

तत्रैकैकस्याः सन्तानं क्रमेणाह । भानोस्त्विति । भानोर्धर्मभार्यायां देवः ऋषभ इति द्वौ पुत्रौ तत ऋषभादिन्द्रसेनः हे नृप ! लम्बायां विद्योतः पुत्र आसीत्ततो विद्योतात्स्तनयित्नवः विद्युत्स्तनयित्नुशब्दौ तदभिमानिदेवतापरौ ॥ ५ ॥

ककुभः भार्यायाः कीकटस्तनयः यतः कीकटात्सङ्कटः तनयोऽभवदित्यन्वयः । जामेयाः जाम्याः पुत्राः भूमेर्दुर्गाणि दुर्गाभिमानिनो देवाः ततः आमेयेभ्यः स्वर्गो नन्दिश्चाभवत् ॥ ६ ॥

विश्वायां धर्मस्य भार्यायां विश्वेदेवाख्याः पुत्रा बभूवुः । तान् विश्वेदेवानप्रजानपुत्रान् प्रचक्षते कथयन्ति । साध्यायां साध्यगणाः बभूवुः तत्सुतः साध्यगणसुतस्त्वर्थसिद्धोऽभूत् ॥ ७ ॥

मरुत्वत्यां तु मरुत्वान् जयन्तश्चेति द्वौ पुत्रौ बभूवतुः । तत्र जयन्तो वासुदेवस्य भगवतोऽशभूतः यं जयन्तमुपेन्द्र इति विदुः वसोर्वंशस्य भूयस्त्वादन्ते निर्देशः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सदसज्जनतारतम्यज्ञानं च भगवन्माहात्म्यज्ञानोपयोगीत्याभिप्रेत्य दक्षपत्न्यासिक्निप्रसूतिप्रसरं प्रपञ्चयत्यस्मिन्नध्याये । ततः प्राचेतस इत्यादिना ॥ १ ॥

कालस्य नयने ज्ञापने युक्ताः योग्याः सप्तविंशतिं ददाविति शेषः अपराः षट्पञ्चाशत्सङ्ख्या ताभ्यः शिष्टाश्चतस्रः कन्यास्तार्क्ष्याय ददाविति शेषः ॥ २ ॥

सापत्यानामपत्यतदपत्यादिभिः सहितानां प्रसूतिप्रभवैः पुत्रपौत्रादिभिः भान्वादीनां सपुत्राणां नामधेयं मे मम सकाशाद्विति शेषः ॥ ३ ॥ ४ ॥

ततो वेदऋषभात् । ततः । इन्द्रसेनात् ॥ ५ ॥

यतः सङ्कटात् जामीपुत्राः जामेयाः । दुर्गाण्यगम्यस्थानाभिमानिनः ॥ ६ ॥

अप्रजान् पुत्ररहितान् । तत्सुतः साध्यगणसुतः ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

धर्मादयोऽप्येते पूर्वदक्षजामातृभ्योऽन्ये इति ज्ञेयाः ॥ १–९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

षष्ठे दक्षस्य कन्यानां वंशाः पृथगुदीरिताः ।
यत्रादितेः सुतात्त्वष्टुर्विश्वरूपोऽभ्यजायत ॥

पुत्रशोकेन निर्विण्णः पुनर्ब्रह्मवचनाद्गार्हस्थ्यं कुर्वन् नारदो मयि वैरं न हास्यतीति मत्वा तस्मात् पुत्राणां नाशमाशङ्कमानः कन्या एव जनयामासेत्याह । तत इति । असिक्न्यां भार्यायाम् ॥ १ ॥

काय कश्यपाय द्विषट् द्विगुणिताः षट् द्वादशेति न्यूनसङ्ख्या व्यवच्छिन्ना तेन त्रयोदश इत्यर्थः । इन्दवे सोमाय त्रिणव त्रिगुणिता नव सप्तविंशतिं द्वे द्वे इति । भूताय द्वे अङ्गिरसे द्वे कृशाश्वाय द्वे । अपरा अवशिष्टाश्चतस्रः तार्क्ष्याय तार्क्ष्यनाम्ने कश्यपायैव ॥ २–५ ॥

यतः । कीकटात् भुवो दुर्गाणि दुर्गाभिमानिनो देवाः यामेयः यास्याः पुत्रः स्वर्गः ॥ ६ ॥

तत्सुतः । साध्यानां सुतः ॥ ७ ॥

यं विदुरित्यदित्याः पुत्र उपेन्द्र इव जयन्तोऽप्युपेन्द्रसंज्ञ इत्यर्थः ॥ ८–११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ दक्षकन्योद्भवेन्द्रादिपोषणं वक्तुं दक्षकन्यावंशानाह । षष्ठेनाध्यायेन । ततस्तदनन्तरमनुनीतः सान्त्वितः ॥ १ ॥

ता भर्तृभिर्योजितवानित्याह । दुहितॄः धर्माय काय कश्यपाय द्विषड् द्विगुणाः षड् द्वादश यासुताः त्रयोदश । इन्दोश्चन्द्रस्य त्रिणव सप्तविंशतिं भूतादिभ्यो द्वे द्वे । अपराः शेषाः चतस्रः तार्क्ष्याय नामान्तरं गताय कश्यपायैव दत्तवान् ॥ २ ॥

मे । मत्तः प्रसूतिप्रसवैः पुत्रपौत्रादिभिः ॥ ३ ॥

ततो वेदऋषभतः ॥ ५ ॥

दुर्गाणि । तदभिमानिनो देवाः ॥ ६ ॥

तत् । तेषां साध्यानाम् ॥ ७ ॥ ८ ॥ ९ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले—तिसके पीछे ब्रह्माजी के समझाने से दक्षप्रजापति ने असिक्नी भार्या में पिता के बडे प्रेम करने वाली साठ पुत्री उत्पन्न कीनी ॥ १ ॥

तिन में से दश तो धर्मदेव को दी तेरा कन्या कश्यपजी को दी सत्ताईस चन्द्रमा को दीनी भूतको अङ्गिरा को और कृशाश्व को दो दो दी बाकी जो बची सो कश्यप ही को देदीनी ॥ २ ॥

अब पुत्र सन्तानों के सहित इन सब कन्याओं के नामों को तुम सुनो जिनके सन्तान के होने से तीनो लोक भरगये ॥ ३ ॥

भानु लम्बा ककुप जामि विश्वा साध्या मरुत्वती वसु मुहूर्ता सङ्कल्पा ए दश धर्म की पत्नी हैं अब इन के सन्तानों को सुनो ॥ ४ ॥

मौहूर्तिका देवगणा मुहूर्तायाश्च जज्ञिरे ।
ये वै फलं प्रयच्छन्ति भूतानां स्वस्वकालजम् ॥ ९ ॥
सङ्कल्पायाश्च सङ्कल्पः कामः सङ्कल्पजः स्मृतः ।
वसवोऽष्टौ वसोः पुत्रास्तेषां नामानि मे शृणु ॥ १० ॥
द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वसुर्विभावसुः ।
द्रोणस्याभिमतेः पत्न्या हर्षशोकभयादयः ॥ ११ ॥
प्राणस्योर्जस्वती भार्या सह आयुः पुरोजवः ।
ध्रुवस्य भार्या धरणिरसूत विविधाः पुरः ॥ १२ ॥
अर्कस्य वासना भार्या पुत्रास्तर्षादयः स्मृताः ।
अग्नेर्भार्या वसोर्धारा पुत्रा द्रविणकादयः ॥ १३ ॥
स्कन्दश्च कृत्तिकापुत्रो ये विशाखादयस्ततः ।
दोषस्य शर्वरीपुत्रः शिशुमारो हरेः कला ॥ १४ ॥
वसोराङ्गिरसी पुत्रो विश्वकर्माकृतीपतिः ।
ततो मनुश्चाक्षुषोऽभूद्विश्वे साध्या मनोः सुताः ॥ १५ ॥
विभावसोरसूतोषा व्युष्टं रोचिषमातपम् ।
पञ्चयामोऽथ भूतानि येन जाग्रति कर्मसु ॥ १६ ॥

भाषाटीका

हे नृप ! भानु के देव ऋषभ दो पुत्र भये उन के इन्द्रसेन भया लम्बा के विद्योत भया तिस के मेघ भये ॥ ५ ॥

ककुभ के सङ्कटभया उस का पुत्र कीकट भया तिस से पृथिवी के दुर्ग स्थानों के अभिमानी देवता भये जामि का पुत्र स्वर्ग भया तिस से नन्दी भया ॥ ६ ॥

विश्वा के विश्वेदेवा भये वे विश्वेदेवा अपुत्रही रहगये साध्या के साध्यगण भये उन साध्यों का पुत्र अर्थ सिद्धिनामक भये ॥ ७ ॥

मरुत्वती के मरुत्वान् जयन्त दो पुत्र भये जयन्त वासुदेव का अंश है जिस को उपेन्द्र कहते हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वसोर्वंशस्य भूयस्त्वादन्ते निर्देशः । मे मत्तः ॥ १० ॥

अभिमतिर्नाम पत्नी तस्या हर्षादयः पुत्राः ॥ ११ ॥

सहश्चायुश्च पुरोजवश्च पुत्राः । पुरः पुराणि ॥ १२ ॥ १३ ॥

स्कन्दश्च कृत्तिकासुतोऽग्नेः पुत्रः षाण्मातुर इत्यग्निभूरिति च प्रसिद्धः । ततः स्कन्दात् ॥ १४ ॥

आकृतीपतिः शिल्पाचार्यः । ततो विश्वकर्मणश्चाक्षुषो मनुरासीत् ॥ १५ ॥

विभावसोरुषानाम भार्या । अथ आतपात्पञ्चयामो दिवसो जातः । अत एव रात्रिस्त्रियामा प्रदोषप्रत्यूषयोर्दिवसस्यावयवत्वात् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मुहूर्तायां भार्यायां मौहूर्तिका मुहूर्ताभिमानिनो देवगणा उद्बभूवुः । तान् विशिनष्टि । ये वै मौहूर्तिकाः स्वस्वमुहूर्तकालजं सुखदुःखादिरूपं फलं भूतानां देहिनां प्रयच्छन्त्यर्पयन्ति ॥ ९ ॥

सङ्कल्पायाः सङ्कल्पस्तनयोऽभूत् । कामस्तु सङ्कल्पाज्जात इति स्मृतः । वसोः पुत्रास्त्वष्टौ वसवः । तेषां नामानि मे मत्तः शृणु ॥ १० ॥

द्रोणादयो विभावस्वन्ता अष्टौ वसवः । तत्र द्रोणादीनां सन्तानमाह क्रमेण । द्रोणस्येति । द्रोणस्याभिमितिः पत्नी तस्या हर्षादयस्तनया बभूवुः ॥ ११ ॥

प्राणस्य तु ऊर्जस्वती भार्या तस्याः पुत्रा आयुःसहपुरोजवाः ध्रुवस्य धरणिर्भार्या सा च विविधाः पुरः पुराणि पुराभिमानिनो देवानसूत ॥ १२ ॥

अर्कस्य तु भार्या वासना तस्यास्तर्षादयः पुत्राः । अग्नेस्तु भार्या वसोर्धारा तस्यास्तनयास्तु द्रविणकादयः ॥ १३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्कन्दः कुमारस्त्वग्नेरेव कृत्तिकासु जातः षाण्मातुर इत्यग्निभूरिति च प्रसिद्धेः । ये विशाखादयस्ते तनः स्कन्दाज्जाताः दोषस्य तु भार्या शर्वरी तस्याः पुत्रः शिशुमारः । स च हरेः कलांशभूतः ॥ १४ ॥

वसोराङ्गिरासी भार्या तस्याः पुत्रो विश्वकर्मा स च कृतीपतिः शिल्पाचार्यः ततो विश्वकर्मणः चाक्षुषाख्यो मनुरभून्मनोश्चाक्षुषस्य विश्वे साध्याः सुता बभूवुः ॥ १५ ॥

विभावसोर्भार्या उषा सा च व्युष्टं रोचिषं चातपं च पुत्रानसूत प्रसूतवती अथातपात्पञ्चयामः दिवसः । अत एव रात्रिस्त्रियामा प्रदोषप्रत्यूषयोः पूर्वोत्तरदिवसावयवत्वात्पञ्चयामशब्दः तदभिमानिदेवपरः । तं विशिनष्टि येन पञ्चयामेन भूतानि प्राणिनः कर्मसु स्वस्वव्यापारेषु जाग्रति जागरूकाणि भवन्तीत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मौहूर्तिकाः मुहूर्ताभिमानिनः । यथाफलं यथोचितं फलं स्वस्वमुहूर्तजम् ॥ ९ ॥ १० ॥

अभिमतिः अभिमानदेवता हर्षादयः हर्षाद्यन्तःकरणदेवताः ॥ ११ ॥

सह्मायुःप्रभृतयः पुत्राः । पुरः पुराभिमानिदेवताः ॥ १२ ॥

वसोः पुत्रस्याग्नेर्भार्या धारा स्वाहापदपर्याया द्रविणकादय इतत्पुत्राः ॥ १३ ॥

स्कन्दश्चाग्निपुत्रः धात्रीत्वेन कृत्तिकापुत्रः उपचारमात्रमेतत् मुख्यतस्तु सदाशिवपुत्रः ये विशाखादयस्ते ततः स्कन्दाज्जाताः । दोषभार्या शर्वरी तत्पुत्रः शिशुमारः । कोऽसाविति तत्राह । हरेरिति ॥ १४ ॥

वसोर्भार्याङ्गिरसी तत्पुत्रः विश्वकर्मा कृतिपतिः कृतीनां शिल्पानाम् इरिच्छा तस्याः पतिः शिल्पिनां कुलाचार्य इत्यर्थः । कृत्याः देव्याः पतिरिति वा ततो विश्वकर्मणः ॥ १५ ॥

अथ पञ्चयामो दिवसाभिमानी आतपाज्जात इति शेषः । येन पञ्चयामेन ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वसोर्वंशस्य भूयस्त्वादन्ते निर्देशः मे मत्तः ॥ १० ॥

अभिमतिर्नाम पत्नी तस्या हर्षादयः ॥ ११–१४ ॥

ततो मनुरित्यर्द्धकम् । अयं ध्रुववंशेऽपि पूर्वं जातोऽपि दक्षवशिष्ठादिवत् पुनरत्र जात इति गम्यते ॥ १५–४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ऊर्जस्वतीति सप्तम्यर्थे प्रथमा ॥ १२ ॥

कृत्तिकाश्चाग्नेर्भार्या ॥ १३ ॥ १४ ॥

आकृत्याः पतिः ततो मनुश्चाक्षुष इति ध्रुववंशजोऽप्यसौ दक्षवशिष्ठादिवदत्रापि जात इति गम्यते ॥ १५ ॥

अथ आतपात् पञ्चयामः । प्रदोषप्रत्यूषयोर्दिवसावयवत्वात् पञ्चयामो दिवसः । अत एव रात्रिस्त्रियामा ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मे मत्तः ॥ १० ॥

अभिमतिः पत्नी तस्याः ॥ ११ ॥

प्राणस्योर्जस्वती भार्या सहआदयः सुताश्च ॥ १२ १३ ॥

कृत्तिकापुत्रः कृत्तिकासु जातः स्कन्दश्चाग्नेः पुत्रः ततः स्कन्दात् दोषस्य शर्वरीपुत्रः शर्वर्यां जातः शिशुमारः पुत्रः ॥१४॥

वसोराङ्गिरसीपुत्रः आङ्गिरस्यां जातो विश्वकर्मा स च कृतीपतिः शिल्पाचार्यः ततो विश्वकर्मणश्चाक्षुषो मनुरभूत् मनोर्विश्वे साध्याः पुत्राः अभूवन् ॥ १५ ॥

विभावसोः सकाशादुषा व्युष्टादीन् त्रीनसूत तत्रातपात् पञ्चयामो दिवसो जातः । प्रदोषप्रत्यूषयोः रात्रिगतयोरपि स्नानादिक्रियार्थे दिवसे गृहीतत्वादतो रात्रिस्त्रियामेति वस्तुतस्तु "यामाश्चत्वारश्चत्वारो मर्त्यानामहनी उभे" इति मुख्यो व्यवहारः प्राक् प्रदर्शित एव ॥ १६ ॥

भाषा टीका ।

मुहूर्तो के मौहूर्तिक देवगण भये जोकि सब भूतों को अपने अपने काल के फल को देते हैं ॥ ९ ॥

सङ्कल्पा के सङ्कल्प भया सङ्कल्प मे से काम भया वसु के पुत्र आठ वसु भये अब उन वसुओं के नाम मेरे से सुनो ॥ १० ॥

द्रोण प्राण ध्रुव अर्क अग्नि दोष वसु विभावसु । द्रोण की भार्या अभिमति के हर्ष शोक भय आदिक भये ॥ ११ ॥

प्राणकी ऊर्जस्वती भार्या भई उसके सह आयु पुरो जब तीन पुत्र भये ध्रुवकी भार्या धरणी भई उसने नानापुराभिमानी देवतों को पैदाकिया ॥ १२ ॥

अर्क की भार्या वासना भई उस के पुत्र तर्षादिक भये अग्नि की भार्या वसुधारा भई उस के पुत्र द्रविणकादिक भये ॥ १३ ॥

अग्नि से कृतिका का पुत्र स्कन्द उस के विशाखादि पुत्र भये । दोष की भार्या शर्वरी है उस का पुत्र शिशुमार है सो श्रीहरिका अंश है ॥ १४ ॥

वसु का आङ्गिरसी मे विश्वकर्मा पुत्र भया उस की भार्या आकृती है उस से चाक्षुष मनु भया मनु के पुत्र विश्वे और साध्य हैं ॥ १५ ॥

सरूपासूत भूतस्य भार्या रुद्रांश्च कोटिशः ।
रैवतोऽजो भवो भीमो वाम उग्रो वृषाकपिः ॥ १७ ॥
अजैकपादहिर्बुध्न्यो बहुरूपो महानिति ।
रुद्रस्य पार्षदाश्चान्ये घोरा भूतविनायकाः ॥ १८ ॥
प्रजापतेरङ्गिरसः स्वधा पत्नी पितॄनथ ।
अथर्वाङ्गिरसं वेदं पुत्रत्वे चाकरोत् सती ॥ १९ ॥
कृशाश्वोऽर्चिषि भार्यायां धूम्रकेशमजीजनत् ।
धिषणायां वेदशिरो देवलं वयुनं मनुम् ॥ २० ॥
तार्क्ष्यस्य विनता कद्रूः पतङ्गी यामिनी इति ।
पतङ्ग्यसूत पतगान् यामिनी शलभानथ ॥ २१ ॥
सुपर्णासूत गरुडं साक्षाद्यज्ञेशवाहनम् ।
सूर्यसूतमनूरुं च कद्रूर्नागानेनकशः ॥ २२ ॥
कृत्तिकादीनि नक्षत्राणीन्दोः पत्न्यस्तु भारत ! ।
दक्षशापात् सोऽनपत्यस्तासु यक्ष्मग्रहार्दितः ॥ २३ ॥
पुनः प्रसाद्य तं सोमः कला लेभे क्षये दिताः ।
शृणु नामानि लोकानां मातॄणां शङ्कराणि च ॥ २४ ॥

भाषा टीका

विभावसुकी भार्या ऊषा भई उसने व्युष्ट रोचिष आतप-तीन पुत्रों को पैदा किया। आतप से पञ्चयामदिवसाभिमानी देवता भया जिस से सब प्राणि कामों मे जाग्रत रहते हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

भूतस्य द्वे भार्ये तयोर्वंशमाह। सरूपेति ॥ १७ ॥

महानित्येवमेकादशरूपस्य रुद्रस्य पार्षदाः प्रेतादयोऽन्येऽन्यस्यां जाताः ॥ १८ ॥

आङ्गिरसः स्वधा सती चेति द्वे भार्ये तयोर्वंशमाह। प्रजापतेरिति। स्वधा नाम पत्नी पितॄन् पुत्रत्वेऽकरोत्। अथ सती चाथर्वाङ्गिरसं नाम वेदम् ॥ १९ ॥

कृशाश्वस्यार्चिर्धिषणेति द्वे भार्ये तयोर्वंशमाह। कृशाश्व इति ॥ २० ॥ २१ ॥

सुपर्णा विनता अनूरुमरुणाम् ॥ २२ ॥

रोहिण्यामेव प्रेमातिशयेनान्यासामुपेक्षणात्कुपितस्य दक्षस्य शापाद्यक्ष्मग्रहार्दितः क्षयरोगपीडितः संस्तास्वनपत्योऽभूत् ॥ २३ ॥

तं दक्षं प्रसाद्य केवलं कला एव लेभे न त्वपत्यानि। कथम्भूताः क्षये कृष्णपक्षे दिताः खण्डिताः सतीः पाठान्तरे क्षये सति पुनरेधितास्तेनैव वर्धिताः सतीः ॥ ॥ २४ ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवं धर्मभार्याणां सन्तानमभिधायाथ कश्यपसोमयोः सन्तानं भूयस्त्वाद्वक्ष्यमाणो भूतस्य तावत्सन्तानमाह। सरूपेति चतुर्भिः। भूतस्य शम्भोर्भार्या सरूपा सा च रुद्रान् कोटिशः असूत प्रसूतवती। तत्र प्रधानानेकादश रुद्रान् गणनायकानाह। रैवत इति सार्द्धेन। यद्वा। रैवतादिरूपेणैकादशधाभिन्नस्य रुद्रस्य पारिषदा घोररूपा प्रेतादिरूपेणानेकविधा अन्येऽन्यस्यां भार्यायां च बभूवुरित्यन्वयः ॥ १७ ॥ १८ ॥

अथाङ्गिरसः सन्तानमाह। प्रजापतेरिति। आङ्गिरसः प्रजापतेः पत्नी स्वधा सती च। तत्र स्वधा पितॄन् सती त्वथर्वाङ्गिरसं नाम वेदं वेदाभिमानिनं पुरुषं पुत्रत्वेनाकरोत् ॥ १९ ॥

अथ कृशाश्वसन्तानमाह। कृशाश्वः अर्चिषि भार्यायां धूम्रकेशं पुत्रमजीजनत्। धिषणायां पत्न्यां तु वेदशिरसं देवलञ्च वयुनं मनुं चेति पुत्रानजीजनत्॥ २० ॥

अथ तार्क्ष्यस्य सन्तानमाह। तार्क्ष्यस्य विनताद्याश्चतस्रो भार्याः। तत्र पतङ्गी पतगान् पक्षिणः असूत। यामिनी तु शलभानसूत ॥ २१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

सुपर्णेति। विनताया एव नामान्तरम्। सा तु साक्षाद्यज्ञेशस्य विष्णोर्वाहनभूतं गरुडं सूर्यस्य सूतमनूरुमरुणं चासूत कद्रूस्त्वनेकशो नागान् सर्पानसूत ॥ २२ ॥

अथ सोमस्य पत्नीराह। इन्दोः सोमस्य पत्न्यस्तु कृत्तिकादीनि नक्षत्राणि सप्तविंशतिः हे भारत! स च इन्दुः दक्षशापात् रोहिण्यामेव प्रेमातिशयेनान्यासूपेक्षारूपान्निमित्ताद्दक्षस्य शापाद्यक्ष्मग्रहेण राजयक्ष्मरोगेण पीडितः सन् तासु कृत्तिकादिष्वनपत्योऽभूत् ॥ २३ ॥

तं दक्षं पुनः प्रसाद्य प्रसन्नं कृत्वा केवलं कला एव लेभे न त्वपत्यानि। कथम्भूताः क्षये कृष्णपक्षे आर्दिताः खण्डिताः क्षयैधिता इति पाठे क्षये सति पुनरेधिता वर्द्धिताः। अथ लोकमातॄणां कश्यपपत्नीनां लोकस्य शं सुखं कुर्वन्तीति तथा तानि नामानि शृणु लोकानां मातृत्वे हेतुः इदं जगच्चराचरं याभिः कश्यपपत्नीभिः प्रसूतम्। ता निर्दिशति। अदितिरिति। ॥ २४ ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

भूतस्य सन्ततिमाह। भूतस्य भार्या नाम्ना भूता भार्या एकादश रुद्रानसूत तस्यान्या सुरूपा भार्या कोटिशो रुद्रानसूत तथा रुद्राणां पार्षदानसूत। तथा प्रेतान् विनायकांश्च प्रधानरुद्ररूपाणां नामान्याह। रैवत इति ॥ १७ ॥ १८ ॥

आङ्गिरसः प्रजापतेः नाम्ना स्वधा पत्नी पितॄनसूत। अथ तस्यैवान्या भार्या अथर्वाङ्गिरसं वेदं पुत्रत्वेऽकरोत् ॥ १९ ॥

वेदशिरा इति कृशाश्वस्य नामान्तरम् ॥ २० ॥

पुत्राणां जातिभेदसूचनाय यामिनी इति सन्धिकार्याभावः ॥ २१ ॥

अनूरुम्। ऊरुरहितमरुणमित्यर्थः ॥ २२ ॥

यक्ष्मग्रहार्दितः क्षयरोगार्तः। कीदृश्यः कलाः कृष्णपक्षे क्षयाः क्षीणाः शुक्लपक्षे एधिताः वर्धिताः वृद्ध्यभावः छान्दसः। अथ एधवृद्धाविति धातोः अथवा इन्धिदीप्ताविति धातुः निष्ठायां नुमो लोपे इधिता इति रूपं सिद्ध्यति। तस्य गुणः। शङ्कराणि सुखकराणि ॥ २३ ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

भूतस्य द्वे भार्ये तयोर्मध्ये सरूपा ॥ १७ ॥

रैवताद्य एकादश रुद्राः महानिति विशेषणम्। अन्ये रुद्रस्य पार्षदा अन्यस्यां भार्यायाम् ॥ १८ ॥

आङ्गिरसः स्वधा सती चेति द्वे भार्ये तयोर्मध्ये स्वधा ॥ १९ ॥

कृशाश्वस्यार्चिर्धिषणेति द्वे भार्ये तयोर्मध्ये आर्चिषि ॥ २० ॥

तार्क्ष्यस्य तार्क्ष्यनाम्नः कश्यपस्य ॥ २१ ॥

सुपर्णा विनता अनूरुमरुणम् ॥ २२ ॥

रोहिण्यामेव प्रीत्यतिशयेनान्यासामुपेक्षणात् कुपितस्य दक्षस्य शापात्। यक्ष्मग्रहार्दितः क्षयरोगपीडितः सन् तास्वनपत्योऽभूत् ॥ २३ ॥

कला एव लेभे न त्वपत्यानि। कीदृशीः क्षये कृष्णपक्षे दिताः खण्डिताः सतीः। क्षयैधिता इति पाठे क्षये सति पुनरेधितास्तेनैव वर्द्धिताः सतीः ॥ २४ ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

धर्मपत्नीवंशमुक्त्वा भूतपत्नीवंशमाह। सरूपेति। तत्र मूलभूता रैवताद्यः सप्त। अजैकपादष्टमः अहिर्बुध्न्यो नवमः बहुरूपो दशमः एकादशो महानित्येकादश रुद्राः। अन्ये अन्यस्यां जाताः रुद्रस्य पार्षदाः ॥ १७ ॥ १८ ॥

आङ्गिरसो भार्यावंशमाह। स्वधा पितॄन् पुत्रत्वे सती च अथर्वाङ्गिरसं नाम वेदं पुत्रत्वे अकरोत् ॥ १९ ॥

कृशाश्वभार्यासन्ततिमाह। कृशाश्व इति ॥ २० ॥

तार्क्ष्यपत्नीवंशमाह। तार्क्ष्यस्येत्यादिना ॥ २१ ॥

सुपर्णा विनता सूर्यसूतम्। अपकाण्डभेदेन अनूरुमरुणं तदनन्तरं बहुकालपकाण्डभेदेन कनिष्ठं साक्षात् यज्ञेशवाहनं गरुडं चासूतोत्पादितवती ॥ २२ ॥

चन्द्रपत्नीसन्तत्यभावमाह। कृत्तिकादीनीति। स चन्द्रः सर्वासु समो भवेति दक्षेणोक्तोऽपि रोहिण्यामत्यन्ततः प्रीतिमान् सुतन्निमित्ताद्दक्षशापात् यक्ष्मग्रहार्दितः क्षयरोगपीडितः तासु अनपत्योऽभूत् ॥ २३ ॥

क्षयैधिताः क्षये सति एधिताः तेनैव वर्द्धिताः सतीः कलाः लेभे अथ कश्यपपत्नीनां शङ्कराणि कल्याणकराणि नामानि शृणु। यतः याभ्यः इदं जगत् प्रसूतमुत्पन्नम् ॥ २४ ॥ २५ ॥

भाषा टीका।

भूत की भार्या सरूपा ने कोटिन रुद्रों को पैदा किया। रैवत अज भव भीम वाम उग्र वृषाकपि ॥ १७ ॥

अजएकपाद अहिर्बुध्न्य बहुरूप महान् एग्यारह रुद्र हैं रुद्रजी के पार्षद और भी प्रेत भूत विनायक हैं ॥ १८ ॥

प्रजापति अंगिरा की स्वधा पत्नी है उस ने पितरों को पैदा किया अथर्वांगिरस वेद को उनकी सती ने पैदा किया ॥ १९ ॥

कृशाश्व ने अर्चि भार्या मे धूम्रकेश को पैदा किया धिषणा भार्या ने वेदशिरा देवल वयुन मनु इन पुत्रों को पैदा किया ॥ २० ॥

तार्क्ष्य की भार्या विनता कद्रू पतङ्गी यामिनी ए चार भई तिनों मे पतङ्गी ने पतिङ्गन को पैदा किया यामिनी ने शलभों को पैदा किया ॥ २१ ॥

सुपर्णा ने गरुडजीको पैदा किया जोकि साक्षात् विष्णु भगवान् के वाहन हैं। और सूर्य के सारथि अनूरु को भी सुपर्णा ने पैदा किया। कद्रू ने अनेक नागों को पैदा किया ॥ २२ ॥

हे भारत! चन्द्रमा की पत्नी कृत्तिकादिक हैं सो चन्द्रमा की रोहिणी मे आसक्त होने से दक्ष ने शाप दिया तब

अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत् ।
अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला ॥ २५ ॥
मुनिः क्रोधवशा ताम्रा सुरभिः सरमा तिमिः ।
तिमेर्यादोगणा आसन् श्वापदाः सरमासुताः ॥ २६ ॥
सुरभेर्महिषा गावो ये चान्ये द्विशफा नृप ! ।
ताम्रायाः श्येनगृध्राद्या मुनेरप्सरसां गणाः ॥ २७ ॥
दन्दशूकादयः सर्पा राजन् ! क्रोधवशात्मजाः ।
इलाया भूरुहाः सर्वे यातुधानाश्च सौरसाः ॥ २८ ॥
अरिष्टायाश्च गन्धर्वाः काष्ठाया द्विशफेतराः ।
सुता दनोरेकषष्टिस्तेषां प्राधानिकाञ्छृणु ॥ २९ ॥
द्विमूर्धा शम्बरोऽरिष्टो हयग्रीवो विभावसुः ।
अयोमुखः शङ्कुशिराः स्वर्भानुः कपिलोऽरुणः ॥ ३० ॥
पुलोमा वृषपर्वा च एकचक्रोऽनुतापनः ।
धूम्रकेशो विरूपाक्षो विप्रचित्तिश्च दुर्जयः ॥ ३१ ॥
स्वर्भानोः सुप्रभां कन्यामुवाह नमुचिः किल ।
वृषपर्वणस्तु शर्मिष्ठां ययातिर्नाहुषो बली ॥ ३२ ॥

भाषा टीका ।

चन्द्रमा को क्षयरोग की पीड़ा भई तिस से उन नक्षत्रों मे कोई संतान नहीं भये ॥ २३ ॥

फिर चन्द्रमा ने दक्ष को प्रसन्न किया तब जो कला नष्ट होते थे सो लब्ध होगये । अब लोकों के माताओं के नामों को तुम सुनो जो कि मनुष्यों के कल्याण करने वाले हैं ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अल्पत्वेन सुगमत्वाद्यथायथं व्युत्क्रमेण तासां वंशानाह । तिमेरित्यादिना ॥ २६ ॥ २७ ॥

सौरसाः सुरसायाः पुत्राः ॥ २८ ॥

प्राधानिकान् मुख्यानष्टादश शृणु ॥ २९—३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अल्पत्वेन सुगमत्वाद्यथायथं व्युत्क्रमेण तासां वंशानाह । तिमेरिति । तिमेः कश्यपस्य भार्यायाः यादोगणाः आसन् । सरमायाः सुताः श्वापदाः श्वानः व्याघ्रमार्जारादयश्चासन् । सुरभेः पुत्रास्तु महिषा गावश्चान्ये द्विशफाश्चासन् । हे नृप ! ताम्रायाश्च पुत्राः श्येनाः गृध्राः आदिशब्देन श्येनादिसदृशा बलिनः पक्षिणो विवक्षिताः । मुनेः सुतास्त्वप्सरसां गणाः हे राजन् ! क्रोधवशाया आत्मजास्तु दन्दशूकादयः दंशनस्वभावादयः सर्पा आसन् । इलायास्तु सर्वे भूरुहाः आत्मजाः । सौरसाः सुरसायाः अपत्यानि सर्वे यातुधानाः । अरिष्टायास्त्वात्मजा गन्धर्वाः । काष्ठायास्तु द्विशफेतराः एकशफाः अश्वगर्दभाः बभूवुः । दनोः सुतास्त्वेकषष्टिस्तेषां मध्ये प्राधानिकानष्टादश पुत्रान् शृणु ॥ २८ ॥ २९ ॥

द्विमूर्धा च शम्बरश्च अरिष्टश्च हयग्रीवश्च विभावसुश्च अयोमुखश्च शङ्कुशिराश्च स्वर्भानुश्च कपिलश्चारुणश्च पुलोमा च वृषपर्वा च एकचक्रश्च सुतापनश्च धूम्रकेशश्च विरूपाक्षश्च विप्रचित्तिश्च दुर्जयश्चैतेऽष्टादश ॥ ३० ॥ ३१ ॥

एषां मध्ये स्वर्भानुः नमुचेः कन्यां दुहितरं सुप्रभामुवाह उपयेमे स्वर्भानुरत्रान्यो दनुजः न तु राहुः तस्योत्पत्तेर्वक्ष्यमाणत्वात् । वृषपर्वणस्तु कन्यां शर्मिष्ठां नाहुषो नहुषात्मजो बलवान् ययाती राजोवाह ॥ ३२ ॥

वैश्वानरसुता याश्च चतस्रश्चारुदर्शनाः ।
उपदानवी हयशिरा पुलोमा कालका तथा ॥ ३३ ॥
उपदानवीं हिरण्याक्षः क्रतुर्हयशिरां नृप ! ।
पुलोमां कालकां च द्वे वैश्वानरसुते तु कः ॥ ३४ ॥
उपयेमेऽथ भगवान् कश्यपो ब्रह्मचोदितः ।
पौलोमाः कालकेयाश्च दानवा युद्धशालिनः ॥ ३५ ॥
तयोः षष्टिसहस्राणि यज्ञघ्नांस्ते पितुः पिता ।
जघान स्वर्गतो राजन्नेक इन्द्रप्रियङ्करः ॥ ३६ ॥
विप्रचित्तिः सिंहिकायां शतं चैकमजीजनत् ।
राहुज्येष्ठं केतुशतं ग्रहत्वं य उपागतः ॥ ३७ ॥
अथातः श्रूयतां वंशो योऽदितेरनुपूर्वशः ।
यत्र नारायणो देवः स्वांशेनावतरद्विभुः ॥ ३८ ॥
विवस्वानर्यमा पूषा त्वष्टाथ सविता भगः ।
धाता विधाता वरुणो मित्रः शक्र उरुक्रमः ॥ ३९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्रापि मिथो वैलक्षण्यद्योतनाय सन्धिकार्याभावः ॥ २५ ॥

सूचीकटाहन्यायेन प्रातिलोम्येन सन्ततिमाह । तिमेरिति । ॥ २६ ॥ २७ ॥

भूरुहाः वृक्षाः । सुरसायाः पुत्राः सौरसाः ॥ २८ ॥

द्विशफेतराः एकशफाः । प्राधानिकं प्रधानविषयसङ्ख्यानम् ॥ २९ ॥ ३५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सूचीकटाहक्रमेण तासां वंशानाह । तिमिरित्यादिना । ॥ २६—३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तासां संततीर्वर्णयति । तिमेरित्यादिना । यादोगणाः जलचरगणाः ॥ २६ ॥ २७ ॥

सौरसाः सुरसासुताः ॥ २८ ॥

प्राधानिकान् मुख्यान् शृणु ॥ २९ ॥ ३१ ॥

प्राधानिकानुक्त्वा तन्मध्ये केषाञ्चिद्वंशानाह । स्वर्भानोरिति ॥ ३२ ॥

भाषा टीका ।

जोकि कश्यपजी की पत्नी हैं जिनसे यह सब जगत् पैदा भया है, अदिति दिति दनु काष्ठा अरिष्टा सुरसा इला ॥ २५ ॥

मुनि क्रोधवशा ताम्रा सुरभी सरमा तिमि तिमि से यादोगण भये सरमा के सुत श्वापद भये ॥ २६ ॥

सुरभी के गऊभैंस भये हे राजन् ! और भी जो दो खुर वाले हैं वेभी सुरभी के भये । ताम्राके श्येन गृध्र आदि भये मुनीके अप्सरा गण भये ॥ २७ ॥

हे राजन् दन्द शूकादिक क्रोध वशाके पुत्र हैं इलाके सब वृक्षादिक भये सुरसा के सब यातुधान गण भये ॥ २८ ॥

अरिष्टा के गन्धर्व भये काष्ठा से एक खुर वाले जीव भये दनु के सुत एक षाठि हैं तिनों मे प्रधानों को सुनो ॥ २९ ॥

द्विमूर्धा, शंवर अरिष्ट हय ग्रीव विभावसु अयोमुख शंकुशिरा स्वर्भानुः कपिल अरुण ॥ ३० ॥

पुलोमा वृष पर्वा एक चक्र अनुतापन धूम्रकेश विरूपाक्ष विप्रचिति दुर्जय ये हैं ॥ ३१ ॥

स्वर्भानु की सुप्रा नामकी कन्या को नमुची ने विवाहा वृष पर्वा की कन्या शर्मिष्ठा से नहुष के पुत्र ययाति ने विवाह किया ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वैश्वानरो दनोः पुत्रस्तस्य सुताः ॥ ३३ ॥

कः । प्रजापतिः कश्यपः उपयेम इत्यन्वयः ॥ ३४ ॥

विवस्वतः श्राद्धदेवं संज्ञासूयत वै मनुम् ।
मिथुनं च महाभागा यमं देवं यमीं तथा ।
सैव भूत्वाथ वडवा नासत्यौ सुषुवे भुवि ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दानवीपरिणयने हेतुः । ब्रह्मणा चोदित इति ॥ ३५ ॥

तयोः षष्टिसहस्राणि निवातकवचाः पुत्रा जातास्तांश्च स्वर्गतः संस्ते पितामहोऽर्जुनो जघान ॥ ३६ ॥

राहुर्ज्येष्ठो यस्य ॥ ३७—३८ ॥

असूयताजनयत् । भुवि वर्तमाना ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उपदानवीहयशिरापुलोमाकालिकाख्याः ॥ ३३ ॥

तासां मध्ये उपदानवीं हिरण्याक्ष उदवहत् हयशिरां तु क्रतुः प्रजापतिः द्वे वैश्वानरस्य सुते पुलोमाकालकाख्ये तु कः कश्यपः उपयेमे दानवीपरिणयने हेतुः । ब्रह्मणा चोदित इति । तयोः पुलोमाकालकयोः षष्टिसहस्राणि पौलोमास्तेषामेव निवातकवचा इति नामान्तरम् । तथा कालकेयाश्च युद्धशालिनो दानवा जाताः तांश्च दानवान् यज्ञघ्नान् ते तव पितुः पितार्जुनः कदाचिदेकः स्वर्लोकं गतः इन्द्रस्य प्रियङ्करो भूत्वा जघान हतवान् ॥ ३४—३६ ॥

विप्रचित्तिः सिंहिकायां भार्यायां शतं चैकमेकशतं दानवानजीजनत् तेष्वेकशतमध्ये राहुर्ज्येष्ठः इतरे शतं तु केतवः राहुज्येष्ठामिति पाठे राहुर्ज्येष्ठो यस्य तत्केतुशतमित्यर्थः । कोऽसौ राहुर्यं ज्येष्ठमजीजनतत्राह । यो ग्रहत्वमुपागतः प्राप्तः स्वयं दानवाधमोऽपि भगवदनुग्रहवशात् ग्रहत्वमुपागत इत्युक्तं पञ्चमे ॥ ३७ ॥

अथ तिम्यादीनां वंशश्रवणानन्तरमतस्तासां वंशस्य श्रुतत्वाददितेर्वंशः श्रूयताम् । मया कथ्यमान इति शेषः । दितेर्वंशस्त्वष्टादशाध्याये वक्ष्यते । अदितेर्वंशं विशिनष्टि । यत्र वंशे विभुर्नारायणो देवः स्वांशेनावतरत् ॥ ३८ ॥

विवस्वदादयः पुत्रास्तत्रोरुक्रमो भगवान् साक्षादवतीर्णः ॥ ३९ ॥

तत्र विवस्वतः भार्या संज्ञाख्या श्राद्धदेवं यमं यमीं चेति मिथुनं च यमयमीरूपं च मिथुनमसूयत असूत । हे महाभाग! सैव संज्ञैव वडवा भूत्वा भुवि वर्तमाना नासत्यावश्विनौ सुषुवे ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ते तव पितुरभिमन्योः पितार्जुनः ॥ ३६—३९ ॥
भुवि वर्तमानेति शेषः । नाम्ना वडवा ॥ ४०—४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वैश्वानरो दनोः पुत्रस्तस्य सुताः ॥ ३३ ॥ ३४ ॥

दानवीपरिणये हेतुर्ब्रह्मणा चोदित इति ॥ ३५ ॥

तयोः षष्टिसहस्राणि निवातकवचा जाताः । तांश्च स्वर्गं गतः सन् तव पितामहोऽर्जुनो जघान ॥ ३६-३९ ॥

नासत्यावश्विनीकुमारौ ॥ ४० ॥ ४१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

या वैश्वानरस्य दनुपुत्रस्य सुतास्ताः श्रृणुवेति शेषः ॥ ३३ ॥ ॥ ३४ ॥

दनुपुत्रकन्यास्वीकारे कारणमाह । ब्रह्मणोदित इति । तयोः पुलोमाकालिकयोः षष्टिसहस्राणि यज्ञघ्ना असुरा जाता इति शेषः । ते च पौलोमाः कालिकेयाश्च दनुदौहित्रत्वाद्दानवाः । तांश्च ते पितुरभिमन्योः पिता अर्जुनः जघान । इन्द्रस्य गुरोः विद्यासमाप्तौ दानवबधेन प्रियङ्करः । असूयत अजनयत् विवस्वद्भयात् वडवा भूत्वा तत एवाश्वरूपिणः शकाशात् नासत्यौ सुषुवे ॥ ३५—४० ॥

भाषा टीका ।

वैश्वानर जो दनु का पुत्र है तिसके चार पुत्री उत्तम रूपवाली भई उपदानवी हय शिरा पुलोमा कालका ये चार हैं ॥३३॥ उपदानवीको हिरण्याक्ष ने व्याहा क्रतु ने हय शिरा को व्याहा पुलोमा कालका दोनो वैश्वार की पुत्रियों को ब्रह्मा जी के कहने से भगवान कश्यप जी ने विवाह किया पुलोमा कालका के पुत्र पौलोम कालकेय बडे युद्धशाली भये सो साठ हजार हैं यज्ञों के नाश करने वाले हैं हे राजन् उनों को तुमारे पिता ने स्वर्ग मे जाकर इन्द्र के प्रीति के वास्ते मारा है ॥ ३४ ॥ ३५ ॥ ३६ ॥

सिंहिका मे विप्रचि ने एकसौ एक पुत्र उत्पन्न किये तिस मे सौ तो केतु भये जेष्ठ राहु भया जोकि ग्रह होगया है ॥ ३७ ॥

अब क्रमसे अदिति के वंश को सुनो जहां पर नारायण विभु अंश सहित अवतीर्ण भये हैं ॥ ३८ ॥

विवस्वान् अर्यमा पूषा त्वष्टा सविता भग धाता विधाता वरुण मित्र शक्र उरुक्रम ए अदिति के पुत्र भये ॥ ३९ ॥

विवस्वान् से संज्ञाने श्राद्धदेव मनुको पैदा किया और उस महाभागी ने यम और यमुना दोनों को उत्पन्न किया उसीने फिर एवडवा होकर अश्विनीकुमारों को पृथिवी मे पैदा किया ॥ ४० ॥

छाया शनैश्चरं लेभे सावर्णिं च मनुं ततः।
कन्यां च तपतीं या वै वव्रे सम्वरणं पतिम् ॥ ४१ ॥
अर्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः।
यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता ॥ ४२ ॥
पूषानपत्यः पिष्टादो भग्नदन्तोऽभवत् पुरा।
योऽसौ दक्षाय कुपितं जहास विवृतद्विजः ॥ ४३ ॥
त्वष्टुर्दैत्यानुजा भार्या रचना नाम कन्यका।
सन्निवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्यवान् ॥ ४४ ॥
तं वव्रिरे सुरगणा दौहित्रं द्विषतामपि।
विमतेन परित्यक्ता गुरुणाङ्गिरसेन यत् ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पारमहंस्यां संहितायां
वैयासिक्यां प्रियव्रतवंशानुकीर्तनं नाम
षष्ठोऽध्यायः ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

ततो विवस्वतः ॥ ४१ ॥

चर्षणयः कृताकृतज्ञानवन्तः पश्यतिकर्मत्वेन निघण्टावुक्तेः। यत्र येषु आत्मानुसन्धानविशेषेण मानुषीजातिश्चोपकल्पिता तथाच श्रुतिः "पुरुषत्वेचाविस्तरामात्मा" इति ॥ ४२ ॥

कुपितं हरमितिशेषः। विवृतद्विजः प्रकटितदन्तः सन् ॥ ४३ ॥ ४४ ॥

यद्यदा विमतेनावज्ञातेन बृहस्पतिना परित्यक्तास्तदा द्विषतां शत्रूणां भागिनेयमपि विश्वरूपं पौरोहित्ये वृतवन्तः ॥४५॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तथा छाया भूत्वा शनैश्चरं सावर्ण्याख्यं मनुश्रेष्ठं च लेभे सुषुवे। तथा तपतीं तपत्याख्यां च लेभे। या कन्या संवरणं पतिं वव्रे ॥ ४१ ॥

अथार्यम्णो वंशमाह। अर्यम्णः पत्नी मातृकाख्या तयोरर्यममातृकयोः कर्त्तरि षष्ठी ताभ्यामित्यर्थः। चर्षणयः कर्मशीलाः जनाः कृता उत्पादिताः। के ते चर्षणयस्तत्राह। यत्र येषु मानुषी जातिर्ब्रह्मणोपकल्पिता मानुषजात्याश्रयाहि सदा ऽऽपारिणो भवन्तीत्यतस्ते चर्षणयः कृषेरौणादिक इनिप्रत्ययः ॥४२॥

पूषात्वनपत्यः अपुत्रः पूर्वं भग्नदन्तः पिष्टादः पिष्टभुगभवत् भग्नदन्तत्वे हेतुं वदंस्तं विशिनष्टि। योऽसौ पूषा दक्षाय कुपितं रुद्रं विवृतद्विजः प्रकटितदन्तः सन् जहास प्रहसितवान्। चतुर्थे चैतद्वृत्तान्तः अभिव्यक्तः ॥ ४३ ॥

त्वष्टुर्दैत्यानामनुजा रचना नाम कन्यका भार्या तयोस्त्वष्टृरचनयोः संनिवेशात् समावेशाद्विश्वरूपो वीर्यवान् श्रेष्ठः जातः ॥ ४४ ॥

तं विश्वरूपं द्विषतां दैत्यानां स्वकीयं भागिनेयमपि देवाः यद्यदा विमतेनावज्ञानेनाङ्गिरसः पुत्रेण गुरुणा बृहस्पतिना परित्यक्तास्तदा वव्रिरे वृतवन्तः पुरोहितं कृतवन्तः इत्यर्थः ४५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्।
षष्ठोऽध्यायः ॥ ६

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

विवृतद्विजः प्रकाशितदन्तः दक्षाय कुपितं हरमिति शेषः ॥ ४३ ॥

तया रचनया त्वष्टुः सन्निवेशो नाम सुतो जज्ञे विश्वरूपश्चाभूदिति शेषः ॥ ४४ ॥

तं विश्वरूपं रचना देवानामपि स्वसा उभयेषां कश्यपपुत्रत्वेन मिथो भ्रातृत्वाद्देवानां स्वकीयं स्वसुः पुत्रं द्विषता-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

असुराणामपि स्वकीयमित्यर्थः। देवैः सहेन्द्रेण विमतेनावज्ञाते-नाङ्गिरसेन गुरुणा बृहस्पतिना परित्यक्ता अभूवन्निति यदतोऽसुरजयार्थं विश्वरूपं वव्रिरे इत्यर्थः ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

षष्ठोऽध्यायः ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

पुरा पूर्वजन्मनि ॥ ४३-४५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

तयोरर्य्यममातृकयोः चर्षणयः कृताकृतज्ञानवन्तः। यत्र येषु आत्मानुसन्धानविशेषवत्सु मानुषीजातिर्ब्रह्मोपकल्पिता। तथाच श्रुतिः "पुरुषत्वे चाविस्तरामात्मा" इति ॥ ४२ ॥

कुपितं रुद्रमिति शेषः। विवृतद्विजः प्रकटितदन्तः ॥४३॥

दैत्यात्मजा रचना नाम कन्या त्वष्टुर्भार्य्या। तयोस्ताश्याम॥४४॥

यत्। यदा विमतेनावज्ञातेन। बृहस्पतिना त्यक्तास्तदा प्रयान्तराभावात् द्विषतां दैत्यानां दौहित्रमपि पौरोहित्येन वव्रिरे ॥ ४५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।

षष्ठस्कन्धस्य षष्ठोऽयं सङ्गतः सङ्गतः सताम् ॥६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

छाया संज्ञानिर्मिता ततो विवस्वतः ॥ ४१ ॥

तयोरर्य्यममातृकयोः चर्षणयः कृताकृतविशेषज्ञानवन्तः सुताः। यत्र येषु "पुरुषत्वे चाविस्तरामात्मा" इति श्रुतेः परमात्मज्ञानोपयोगित्वेन ब्रह्मणा मानुषीजातिरुपकल्पिता ॥ ४२ ॥

यः पुरा दक्षाय कुपितं शिवं जहास स अनपत्योऽभूत् ॥४३॥

त्वष्टुर्भार्या रोचना नाम सा कन्यका दैत्यात्मजा तयोस्ताश्याम ॥ ४४ ॥

द्विषतां दैत्यानां दौहित्रं तं विश्वरूपं सुरगणाः पौरोहित्येन वव्रिरे। तत्र हेतुः। यद्यतः विमनेनावज्ञातेनाङ्गिरसेन आङ्गिरसः पुत्रेण गुरुणा त्यक्ताः ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

षष्ठाध्यायार्थप्रकाशः ॥ ६ ॥

भाषा टीका।

सूर्य की भार्या छायाने शनैश्चर को पैदा किया फिर सावर्णि-मनु को पैदा किया फिर तपती कन्या को पैदा किया उसने सम्वरण पति को वरण किया ॥ ४१ ॥

अर्यमा की मातृका पत्नी है उन दोनों के चर्षणी पुत्र भये जिनमें ब्रह्माजी ने मानुषीजाति कल्पना की है ॥ ४२ ॥

पूषा विना पुत्र का है सतुआके खाने वाला है जिसने पहिले दक्ष पर कोप करते महादेवजीको दांत खोलकर हंसाया वह बिना दांत का है ॥ ४३ ॥

दैत्यों की अनुजा त्वष्टा की भार्या है उसका नाम रचना है तिन दोनों में से सन्निवेश वीर्यवान् विश्वरूप भया ॥ ४४ ॥

वह यद्यपि शत्रुओं का भेवता है तो भी देवतों ने पुरोहित पना में उसको वरण किया था जबकी बडे रोष से बृहस्पति ने देवतों को छोड दिया था ॥ ४५ ॥

इति श्रीभागवत षष्ठस्कन्ध के छठे अध्याय का

भाषानुवाद लक्ष्मणाचार्यकृत

समाप्त ॥ ६ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे षष्ठोऽध्यायः समाप्तः ॥ ६ ॥

॥ सप्तमोऽध्यायः ॥

—○:*:○—

॥ राजोवाच ॥

कस्य हेतोः परित्यक्ता आचार्येणात्मनः सुराः ।
एतदाचक्ष्व भगवञ्छिष्याणामक्रमं गुरौ ॥ १ ॥

॥ श्रीशुक उवाच ॥

इन्द्रस्त्रिभुवनैश्वर्यमदोल्लङ्घितसत्पथः ।
मरुद्भिर्वसुभी रुद्रैरादित्यैर्ऋभुभिर्नृप ! ॥ २ ॥
विश्वेदेवैश्च साध्यैश्च नासत्याभ्यां परिश्रितः ।
सिद्धचारणगन्धर्वैर्मुनिभिर्ब्रह्मवादिभिः ॥ ३ ॥
विद्याधराप्सरोभिश्च किन्नरैः पतगोरगैः ।
निषेव्यमाणो मघवान् स्तूयमानश्च भारत ! ॥ ४ ॥
उपगीयमानो ललितमास्थानाध्यासनाश्रितः ।
पाण्डुरेणातपत्रेण चन्द्रमण्डलचारुणा ॥ ५ ॥
युक्तश्चान्यैः पारमेष्ठ्यैश्चामरव्यजनादिभिः ।
विराजमानः पौलोम्या सहार्धासनया भृशम् ॥ ६ ॥
स यदा परमाचार्यं देवानामात्मनश्च ह ।
नाभ्यनन्दत सम्प्राप्तं प्रत्युत्थानासनादिभिः ॥ ७ ॥
वाचस्पतिं मुनिवरं सुरासुरनमस्कृतम् ।
नोच्चचालासनादिन्द्रः पश्यन्नपि सभागतम् ॥ ८ ॥
ततो निर्गत्य सहसा कविराङ्गिरसः प्रभुः ।
आययौ स्वगृहं तूष्णीं विद्वान् श्रीमदविक्रियाम् ॥ ९ ॥
तर्ह्येव प्रतिबुध्येन्द्रो गुरुहेलनमात्मनः ।
गर्हयामास सदसि स्वयमात्मानमात्मना ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सप्तमे विश्वरूपोऽसौ पौरोहित्ये वृतः सुरैः ।
गुरुणा सम्परित्यक्तैः पौरोहित्यमथाकरोत् ॥ १ ॥

कस्य हेतोः कस्माद्धेतोरात्मनः शिष्याः सुराः परित्यक्ताः अक्रममपराधम् ॥ १ ॥

स इन्द्रो यदा सम्प्राप्तं वाचस्पतिं नाभ्यनन्दत नादृतवांस्तदा स आङ्गिरसस्ततो निर्गत्य तूष्णीं स्वगृहमाययाविति षण्णामन्वयः । अनादरे हेतुं मदं दर्शयितुं तं विशिनष्टि । त्रिभुवनैश्वर्यमदेनोल्लङ्घितः सतां पन्था येन सः ॥ २ ॥

परिश्रितः परिवृतः ॥ ३ ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आस्थानं सभा तस्मिन्नध्यासनं सिंहासनं तदास्थितः ॥ ५ ॥

पारमेष्ठ्यैर्महाराजचिह्नैः । आसनस्यार्धे स्थितया पौलोम्या सह विराजमानः सन् ॥ ६ ॥

प्रत्युत्थानादिना नाभ्यनन्दत नादृतवान् ॥ ७ ॥

न चोच्चचाल आसन एव स्थितोऽपि किञ्चिन्न चलितवान् ॥ ८ ॥

श्रीमदेन या विक्रिया तां विद्वान् जानन् ॥ ९ ॥

प्रतिबुध्यानुस्मृत्य ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

देवाः विमतेन गुरुणा परित्यक्ताः विश्वरूपं विवव्रिरे इत्युक्तं तदेव सप्रपञ्चं बुभुत्सुः पृच्छति राजा । कस्येति । कस्माद्धेतोराचार्येण गुरुणा आत्मनः शिष्याः सुराः परित्यक्ताः हे भगवन्मुने एतदाचक्ष्व कथय तथा शिष्याणां गुरौ विषये अक्रममपराधं चाचक्ष्व ॥ १ ॥

एवमापृष्टो मुनिर्देवानां गुरौ कृतमपराधं वक्तुमुपक्रमते । इन्द्र इति । इन्द्रो यदा सम्प्राप्तं वाचस्पतिं नाभ्यनन्दत नादृतवान् तदाङ्गिरसः ततो निर्गत्य तूष्णीं स्वगृहमाययौ इत्यग्रेतनान्वयः । अनादरहेतुं मदं दर्शयितुमिन्द्रं विशिनष्टि । त्रिभुवनैश्वर्यमदेनोल्लङ्घितः सतां पन्था येन । हे नृप ! मरुद्गणादिभिः परिश्रितः परिवृतः ब्रह्मवादिभिर्वेदान् पठद्भिर्मुनिभिः सिद्धादिभिश्च यथार्थं निषेव्यमाणः स्तूयमानश्च ॥ २ ॥ ३ ॥ ४ ॥

ललितं यथा तथोपगीयमानश्च भगवानिन्द्रः आस्थानं सभा तस्मिन्नध्यासनं सिंहासनं तदास्थितः अधिष्ठितः हे भारत ! चन्द्रमण्डलवच्चारुणा सुन्दरेण पाण्डुरेण श्वेतेनातपत्रेण छत्रेण ॥ ५ ॥

तथा पारमेष्ठ्यैर्महाराजचिह्नैश्चामरादिभिर्युक्तः । अर्धासनया आसनस्यार्धे स्थितया पौलोम्या शच्या सह नितरां विरोचमानः ॥ ६ ॥

स इन्द्रो यदा देवानामात्मनः स्वस्य च परमं पूज्यमाचार्यं सुरासुरवन्दितं मुनिश्रेष्ठं बृहस्पतिं सम्प्राप्तं प्रत्युत्थानासनादिभिर्नाभ्यनन्दत नादृतवान् न चचाल किं तु सभागतं पश्यन्नप्यासन एव स्थित इत्यर्थः ॥ ७ ॥ ८ ॥

तूष्णीं तदा कविर्विद्वान् प्रभुः समर्थ आङ्गिरसो बृहस्पतिः श्रीमदेन या विक्रिया तां विद्वान् जानन् तूष्णीं स्वगृहं प्रति ययौ ॥ ९ ॥

तर्ह्येव इन्द्र आत्मनः स्वस्य गुरुहेलनं प्रतिबुद्ध्यानुस्मृत्य आत्मना स्वेनैवात्मानं सदसि सभायां गर्हयामास निन्दितवान् ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गुरुद्वाराप्रसादकृदर्द्धं त्विति वचनाद्गुरुप्रसाद एव बलीयान् भक्तिज्ञानादिसमुद्रेकसिद्धये तदभावः सद्योऽनर्थपरम्पराहेतुरतो ज्ञानार्थिना पुरुषेण स्वप्नेऽपि गुरुर्नावमन्तव्यः । किन्तु निरन्तरं स बहुमानं प्रसादसमृद्धये निषेवणीय इत्येतस्मिन्नध्याये निरूप्यते । तत्र राजा पृच्छति । कस्येति । कस्य कस्य आत्मनः आचार्येण शिष्याणां पुत्राणामक्रममपराधम् ॥ १ ॥

राजप्रश्नं परिहर्तुमुपक्रमते । इन्द्र इति ॥ २ ॥ ३ ॥ ४ ॥

आस्थानं सभा तत्राध्यासनं सिंहासनमाश्रितः ॥ ५ ॥

पारमेष्ठ्यैः श्रेष्ठैः ॥ ६ ॥

नाभ्यनन्दत सन्तुष्ट्या नापूजयत् ॥ ७ ॥

प्रत्येकशः पूजाहेतव इति द्योतनाय वाचस्पत्यादिविशेषणबाहुल्यम् ॥ ८ ॥

श्रीनिमित्तमदस्य विक्रियां विकारम् ॥ ९ ॥

तर्ह्येव तदानीमेव गुरोर्हेलनमवज्ञानम् ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इन्द्र इति सार्द्धसप्तकम् ॥ १—२३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सप्तमे गुरुणा त्यक्तैर्देवैर्दैत्यपराजितैः ।
विश्वरूपो गुरुत्वेन वृतो ब्रह्मोपदेशतः ॥

आत्मनः शिष्याः सुराः ॥ १ ॥

इन्द्रो यदा सम्प्राप्तं वाचस्पतिं नाभ्यनन्दत तदा स स्वगृहमाययाविति तृतीयेनान्वयः ॥ २ ॥ ३ ॥ ४ ॥

आस्थाने सभा तस्मिन्नध्यासनं सिंहासनमाश्रितः ॥ ५ ॥

पारमेष्ठ्यैर्महाराजचिह्नैः । पौलोम्या शच्या । अर्द्धमासनमेवासनं यस्यास्तया सह मृगलोचनेति वदासनपदस्य वृत्तावन्तर्भावः ॥ ६ ॥

आचार्यं बृहस्पतिम् ॥ ७ ॥

अप्रत्युत्थानमेव स्पष्टयति । वाचस्पतिमिति । आसनादासनमारुह्य स्थितोऽपि किमपि न उच्चचाल न पस्पन्दे ॥ ८ ॥

ततः सभातः कविः एवं भविष्यतीति भाविकार्यविज्ञः प्रभुः शास्ता समर्थः । विद्वान् गुर्ववमानं हेतुत्वेन जानन् ॥ ९ ॥

प्रतिबुद्ध्य श्रीमदमदिरानिद्रात इत्यर्थः ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गुरुणा परित्यक्ताः सुरगणा विश्वरूपं वव्रिरे इत्युक्तं तत्प्रपञ्चं बुभुत्सुः पृच्छति । कस्येति । कस्येति षष्ठी पञ्चम्यर्थे । कस्माद्धेतोः आचार्येण आत्मनः स्वकीयाः सुराः परित्यक्ताः अस्वकीयाः कृताः एतत् एवम्भूतं गुरौ शिष्याणामक्रमं व्यतिक्रममाचक्ष्व कथयेत्यन्वयः ॥ १ ॥

अहो बत ममासाधु कृतं वै दभ्रबुद्धिना ।
यन्मयैश्वर्यमत्तेन गुरुः सदसि कात्कृतः ॥ ११ ॥
को गृध्येत् पण्डितो लक्ष्मीं त्रिविष्टपपतेरपि ।
ययाहमासुरं भावं नीतोऽद्य विबुधेश्वरः ॥ १२ ॥
ये पारमेष्ठ्यं धिषणमधितिष्ठन्न कञ्चन ।
प्रत्युत्तिष्ठेदिति ब्रूयुर्धर्मं ते न परं विदुः ॥ १३ ॥
तेषां कुपथदेष्टॄणां पततां तमसि ह्यधः ।
ये श्रद्दध्युर्वचस्ते वै मज्जन्त्यश्मप्लवा इव ॥ १४ ॥
अथाहममराचार्यमगाधधिषणं द्विजम् ।
प्रसादयिष्ये निशठः शीर्ष्णा तच्चरणं स्पृशन् ॥ १५ ॥
एवं चिन्तयतस्तस्य मघोनो भगवान् गृहात् ।
बृहस्पतिर्गतोऽदृष्टां गतिमध्यात्ममायया ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उत्तरमाह । इन्द्र इत्यादिना । इन्द्रः यदा देवानामात्मनश्च परमाचार्यं वाचस्पतिं प्रत्युत्थानादिभिः नाऽभ्यनन्दतेति तु किं वाच्यं सभागतं पश्यन्नपि आसनान्नोच्चचाल तदा प्रभुरपि तन्नाशं कर्त्तुं समर्थोऽपि ततः स्वगृहं तूष्णीमाययाविलक्षणा-नामन्वयः । त्रिभुवनैश्वर्यमदेनोल्लङ्घितः सतां पन्था येन सः ॥ २ ॥
परिश्रितः परिवृतः ॥ ३—४ ॥
आस्थाने सभायां यदच्चासनं सिंहासनं तदास्थितः ॥ ५ ॥
पारमेष्ठ्यैः महाराजचिह्नैर्युक्तः पौलोम्या पुलोम्नोऽपत्यभूतया अर्धे वामभागे आसनं यस्यास्तया सह विराजमानः ॥ ६ ॥ ७ ॥ ८ ॥
ततः । सभातः ॥ ९ ॥ १० ॥

भाषा टीका ।

राजा परीक्षितजी बोले बृहस्पतिजी ने अपने देवतों को किस हेतु से छोड़ा हे भगवन् ! इस बात को आपकहो जैसे कि शिष्यों ने गुरूका अपराध किया हो ॥ १ ॥
श्रीशुकदेवजी बोले त्रिभुवन के ऐश्वर्य के प्राप्त होने से इंद्र को मदभया तब उसने सत् मार्ग का त्याग कर दिया तब हे नृप ! उनचास पवन आठवसु एकादश रुद्र द्वादश आदित्य ऋभु देवता ॥ २ ॥
विश्वेदेवा साध्य अश्विनी कुमार सिद्ध चारण गंधर्व ब्रह्म-वादि मुनि इनों से इंद्र सहित थे ॥ ३ ॥
हे भारत ! विद्याधर अप्सरा किन्नर पतग उरग ए सब इंद्र की सेवा करते थे और स्तुति करते थे ॥ ४ ॥
बड़े ऊंचे सिंहासन पर इंद्र बैठे थे और सब उनका गान करते थे चंद्र के मंडल सरी का सफेद छत्र उनके मस्तक पर लगा था ॥ ५ ॥
और भी चामर पंखा आदि सब पदार्थों से सेवित थे अर्ध आसन में इंद्राणी बैठी थी इस प्रकार से विराज मान थे ॥ ६ ॥
तिसी समय पर सब देवतों के और अपने भी परमाचार्य देव दानवों के वंदनीय वाचस्पति मुनीश्वर को सभा मे आये हुये देखकर भी इंद्रने प्रत्युत्थान आसन आदि से सन्मान नहीं किया आसन से उठा भी नहीं ॥ ७ ॥ ८ ॥
तब तो बृहस्पति भगवान् शीघ्र ही उहां से निकल कर धनी के मद के विकार को जानकर चुप चुप अपने घर को चले आये ॥ ९ ॥
तिसी समय में इंद्र ने जब अपने से हुई गुरू की अवज्ञा को जाना तब उसी सभा के मध्य में अपने को आपही निंदा करने लगा ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मम कृतं कर्म अहो असाधु यद्यस्माद्दभ्रबुद्धिनाऽल्पमतिना मया कात्कृतः तिरस्कृतः ॥ ११ ॥
विबुधानां सात्त्विकानां देवानामीश्वरोऽप्यहम् ॥ १२ ॥
ननु सिंहासनस्थो राजाऽभ्युत्थानं न कुर्यादिति वृद्धा वदन्ति तत्राह । य इति द्वाभ्याम् । धिषणमासनम् ॥ १३ ॥
कुपथं दिशन्त्युपदिशन्तीति कुपथदेष्टारस्तेषां वचः । अश्ममयः प्लवो येषां ते यथा मज्जन्तं प्लवमनु मज्जन्ति तद्वत् ॥ १४ ॥
अगाधा गम्भीरा धिषणा यस्य तम् । निशठः शाठ्यहीनः सन् ॥ १५ ॥
अधिकया आत्ममायया ॥ १६ ॥

गुरोर्नाधिगतः संज्ञां परीक्षन् भगवान् स्वराट् ।
ध्यायन् धिया सुरैर्युक्तः शर्म नालभतात्मनः ॥ १७ ॥
तच्छ्रुत्वैवासुराः सर्व आश्रित्यौशनसं मतम् ।
देवान् प्रत्युद्यमं चक्रुर्दुर्मदा आततायिनः ॥ १८ ॥
तैर्विसृष्टेषुभिस्तीक्ष्णैर्निर्भिन्नाङ्गोरुबाहवः ।
ब्रह्माणं शरणं जग्मुः सहेन्द्रा नतकन्धराः ॥ १९ ॥
तांस्तथाभ्यर्दितान् वीक्ष्य भगवानात्मभूरजः ।
कृपया परया देव उवाच परिसान्त्वयन् ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

गुरोः संज्ञां ज्ञानोपायं परीक्षमाणोऽपि नाधिगतोऽप्राप्तः सन् ॥ १७ ॥

आततायिन उद्यतास्त्राः ॥ १८ ॥

निर्भिन्नान्यङ्गान्युत्तमाङ्गानि शिरांसि ऊरवो बाहवश्च येषाम् ॥ १९—२० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गर्हाप्रकारमाह । अहो इति पञ्चभिः । अहो बताहो मम कष्टं प्राप्तम् । असाधु कर्म मया कृतं वै यद्यस्माद्-अबुद्धिनाल्पमतिना ऐश्वर्यमत्तेन मया सदसि गुरुः न्यत्कृतः तिरस्कृतः ॥ ११ ॥

पण्डितो विद्वान्नित्यानित्यविवेकसम्पन्नश्चेदित्यर्थः । को वा पुमान् त्रिविष्टपपतेः त्रीँल्लोकान्पातीति त्रिविष्टपं तस्य पतेः सत्यलोकाधिपतेरपि लक्ष्मीं गृध्येदभिकाङ्क्षेत्किन्तु तुच्छं मन्येतेत्यर्थः । विबुधानां सात्त्विकानामीश्वरोऽप्यहमासुरं भावं मोहमिति यावत् नीतः प्रापितः ॥ १२ ॥

ननु सिंहासनस्थो राजा प्रत्युत्थानादिकं न कुर्यादिति वदन्ति वृद्धास्तत्राह । य इति द्वाभ्याम् । पारमेष्ठ्यं धिषणां परमेष्ठी महाराजस्तत्सम्बन्ध्यासनं धिषणां तदधितिष्ठन् कञ्चन प्रति नोत्तिष्ठेदिति ये ब्रूयुस्ते परं केवलं धर्मं न विदुः ॥ १३ ॥

किञ्च । तेषां कुपथदेष्टॄणां कुमार्गोपदेष्टॄणामत एवाधस्तमसि नरके पततां वचः ये जना श्रद्दध्युस्तेऽश्मप्लवाः वृहत्पाषाणप्लु-कप्लुवारूढा इव मज्जन्त्यधो यान्ति ॥ १४ ॥

अथातः अहममराणामाचार्यमगाधा धिषणा बुद्धिर्यस्य तं मत्कृतापराधमगणयन्तं द्विजं वाक्पतिं प्रसादयिष्ये प्रार्थये कथंभूतः निशठः निर्गतशाठ्यः सन् । तस्य गुरोश्चरणौ शीर्ष्णा स्पृशन् ॥ १५ ॥

एवं तस्य मघोन इन्द्रस्य चिन्तयतः सतः भगवान् बृहस्पतिरध्यात्ममायया योगप्रभावेण गूढाददृष्टां गतिं गतः अदृश्योऽभूदित्यर्थः । ततो भगवान् स्वराडिन्द्रः गुरोः संज्ञां दर्शनोपायं परीक्ष्य विचार्य्यापि नाधिगतः न प्राप्तः धिया ध्यायन् दर्शनोपायं चिन्तयन् शुचा शोकेन युक्तः आत्मनः स्वस्य शर्म सुखं नालभत न प्राप ॥ १६ ॥ १७ ॥

तदिन्द्रस्य गुर्वपराधप्रयुक्तक्लेशचिन्तादिकं श्रुत्वा तदैव औशनसम्मतमुशनसा मन्त्रितमाश्रित्य सर्वेऽसुराः दुर्मदा अनिवार्यमदाः आततायिनः जिघांसवः देवान् प्रत्युद्यमं युद्धोद्योगं चक्रुः ॥ १८ ॥

तैरसुरैर्विसृष्टैः प्रयुक्तैस्तीक्ष्णैरिषुभिर्निर्भिन्नान्यङ्गान्युत्तमाङ्गानि शिरांसि ऊरवो बाहवश्च येषां ते इन्द्रसहिता देवा नम्रशिरसो ब्रह्माणं शरणं ययुः ॥ १९ ॥

अभ्यर्दितान् तदा पीडितांस्तान् देवान् वीक्ष्य भगवानात्मभूः परमात्मजः अजो ब्रह्मा परयाधिकया कृपया युक्तस्तान् सान्त्वयन्नुवाच ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सदसीत्यनेनावज्ञानस्योद्रेकतामाह । दभ्रबुद्धिनाल्पबुद्धिना न्यत्कृतः धिक्कृतः ॥ ११ ॥

को गृध्येदिति "गृधु" अभिकाङ्क्षायाम् ॥ १२ ॥

राजयोग्यसिंहासनमधिष्ठितो न प्रत्युत्तिष्ठेदिति शास्त्रकारवचनात्कथमासुरं भावं नीत इति चेत्तत्राह । य इति । पारमेष्ठ्यधिषणां सिंहासनस्थानमधितिष्ठन् राजा कञ्चन नोत्तिष्ठेदिति प्रत्युत्थानं न कुर्यादिति ये पण्डितमन्या ब्रूयुस्ते परमं धर्मं न विदुरित्यन्वयः ॥ १३ ॥

तादृशानां वाक्ये विश्वासेन प्रवर्तमानस्यानर्थफलहेतुत्वाद्बुद्धिमता न कर्तव्यमित्यभिप्रेत्याह । तेषामिति । अश्मना कृताः प्लवाः नावोऽश्मप्लवाः ॥ १४ ॥

यत एवमनर्थोऽथ तस्मादगाधधिषणं गम्भीरबुद्धिम् ॥ १५ ॥

अध्यात्ममायया योगसामर्थ्येन अदृष्टां गतिमदृश्यलक्षणां स्थितिम् ॥ १६ ॥

संज्ञां स्वरूपविषयज्ञानं स्वराडिन्द्रः ॥ १७ ॥ १८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

निर्भिन्नान्यङ्गानि शरीराणि ऊरवश्च बाहवश्च येषां ते तथा ॥ १९ ॥

आत्मनः परमात्मनो भवतीत्यात्मभूः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कालकृतः तिरस्कृतः ॥ ११ ॥

स्वसम्पत्तिमेव तिरस्कारहेतुत्वेन ज्ञात्वा निन्दति । को गृध्येत् वाञ्छेत् ॥ १२ ॥

ननु "सिंहासनस्थो राजा कमपि नाभ्युत्तिष्ठेत्" इति नीतिशास्त्रज्ञा आहुः । सत्यं ते भ्रान्ता एवेत्याह । ये इति । पारमेष्ठ्यं धिषणं परमेष्ठिनोऽप्यासनम् ॥ १३ ॥

अश्ममयः प्लवो येषां ते यथा मज्जन्तं प्लवमनुमज्जन्ति तथेति राजनीत्युपदेष्टृषु पुंस्वसभ्येषु कोपो व्यञ्जितः ॥ १४ ॥

तस्मादस्यां विपत्तौ कः खलूपायः चरणौ विमृश्य स्वयमेवाह । अथाहमिति । निशठः शाठ्यहीनः सन् ॥ १५ ॥

चिन्तयतः । चिन्तयन्तमघवन्तमनादृत्य । अधिकया आत्मनो मायया ॥ १६ ॥

संज्ञां ज्ञानोपायं परीप्सन् परितः ईक्षमाणोऽपि नाधिगतः अप्राप्तः सन् ॥ १७-२१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

दभ्रबुद्धिना अल्पमतिना कालकृतः कदर्थीकृतः ॥ ११ ॥

गृध्येदभिकाङ्क्षेत् ॥ १२ ॥

पारमेष्ठ्यं महाराजसम्बन्धिधिषणमासनमधितिष्ठन् कंचन प्रति नोत्तिष्ठेदिति ये प्रयुः ते परं धर्मम् ।

आयान्तमग्रतो गच्छेत् गच्छन्तं तमनुव्रजेत् ।
आसने शयने वापि न तिष्ठेदग्रतो गुरोः ।

इत्यादि शास्त्रोक्तं न विदुः ॥ १३ ॥

कुपथं कुत्सितं मार्गं दिशन्त्युपदिशन्तीति कुपथदेष्टारस्तेषाम् अत एवाधस्तमसि नरके पतताम् ये वचः श्रद्दध्युः ते अश्मप्लवा इव अश्मा पाषाणः तन्मयः प्लवो येषां तद्वत् मज्जन्ति उपदेष्टृभिः सहिताः अधस्तमसि पतन्तीत्यर्थः ॥ १४ ॥

निशठः नितरां शठः कृतापराधः ॥ १५ ॥

एवं चिन्तयतः सतः अध्यात्ममायया अधिका या आत्मनो माया अन्तर्धानशक्तिस्तया ॥ १६ ॥

धिया ध्यायन् सुरैर्युक्तश्च परीक्षन् परितः ईक्षमाणोऽपि गुरोः संज्ञां दर्शनोपायं नाधिगतः अलभमानः सन् आत्मनः स्वस्य शर्म सुखं नालभत ॥ १७ ॥

औशनसं मतम् "आपदि शत्रुः सपदि धर्षणीयः" इति उशनसः शुक्रस्य नीतिम् । आततायिनः गृहीतशस्त्राः ॥ १८ ॥

निसृष्टैः क्षिप्तैर्निर्भिन्नान्यङ्गानि उत्तमाङ्गादीनि ऊरवो बाहवश्च येषां ते शरणं रचितारम् ॥ १९ ॥

अभ्यर्दितान् पीडितान् ॥ २० ॥

भाषा टीका ।

अहो मैं अल्प बुद्धि वाला हूं मैने बडा खोटा काम किया जो कि मैने ऐश्वर्य में मत्त होकर सभा में गुरू का अपमान किया ॥ ११ ॥

तीनों लोकों के पति की लक्ष्मी को पण्डित होकर कौन चाहना करैगा जिस लक्ष्मी ने देवेश्वर होने पर भी मेरे को असुर भाव को प्राप्त कर दिया ॥ १२ ॥

जो कोई पुरुष राजा के किसी स्थान को आश्रय करके सिंहासन में स्थित रहने वाला किसी के वास्ते नहीं उठे ऐसा कहते हैं वे लोग परमधर्म को नहीं जानते हैं ॥ १३ ॥

कुमार्ग दिखाने वाले उन लोगों के वचन पर जो श्रद्धा करते हैं वे लोग पत्थर की नौका में चढे सरी के डूब जाते हैं ॥ १४ ॥

अब मैं अमरों के गुरु अगाधबुद्धि वाले ब्राह्मण गुरूजी को प्रसन्न करूंगा कपट छोडकर उनके चरण का स्पर्श करूंगा ॥ १५ ॥

इस प्रकार से इन्द्र के विचारते तक बृहस्पति भगवान् अपनी विद्या के प्रभाव से अदृश्य गति को प्राप्त होगये ॥ १६ ॥

इंद्र भगवान् ने ढूंढने पर भी बृहस्पति का पता नहीं पाया देवतों के सहित बुद्धि से चिन्ता करते रह गये मन में शान्ति नहीं प्राप्त भई ॥ १७ ॥

इस बात को सुनते मात्र ही सब असुरों ने शुक्राचार्य के मत को आश्रय करके बडे अभिमान से शस्त्रधारी होकर देवतों के जीतने का उद्यम किया ॥ १८ ॥

उनके चलाये हुये तीक्ष्ण बाणों से देवतों के मस्तक जांघ बाहु कट गये तब इंद्र सहित सब देवता मस्तकों को नम्र करके श्रीब्रह्माजी के समीप में गये ॥ १९ ॥

आत्म भू अज भगवान् ब्रह्माजी ने देवतों को तिस प्रकार पीडित देखा तब ब्रह्म देव परम कृपा युक्त होकर उनके सांतन करते हुये यह वचन बोले ॥ २० ॥

ब्रह्मोवाच ।

अहो बत सुरश्रेष्ठाः ! ह्यभद्रं वः कृतं महत् ।
ब्रह्मिष्ठं ब्राह्मणं दान्तमैश्वर्यान्नाभ्यनन्दत ॥ २१ ॥
तस्यायमनयस्यासीत् परेभ्यो वः पराभवः ।
प्रक्षीणेभ्यः स्ववैरिभ्यः समृद्धानां च यत्सुराः ! ॥ २२ ॥
मघवन् ! द्विषतः पश्य प्रक्षीणान् गुर्वतिक्रमात् ।
सम्प्रत्युपचितान् भूयः काव्यमाराध्य भक्तितः ।
(१) आददीरन्निलयनं ममापि भृगुदेवताः ॥ २३ ॥
त्रिविष्टपं किं गणयन्त्यभेद्यमन्त्रा भृगूणामनुशिक्षितार्थाः ।
न विप्रगोविन्दगवीश्वराणां भवन्त्यभद्राणि नरेश्वराणाम् ॥ २४ ॥
तद्विश्वरूपं भजताशु विप्रं तपस्विनं त्वाष्ट्रमथात्मवन्तम् ।
सभाजितोऽर्थान्[२] स विधास्यते वो यदि क्षमिष्यध्वमुतास्य कर्म ॥ २५ ॥

श्रीशुक उवाच ।

त एवमुदिता राजन् ! ब्रह्मणा विगतज्वराः ।
ऋषिं त्वाष्ट्रमुपव्रज्य परिष्वज्येदमब्रुवन् ॥ २६ ॥

देवा ऊचुः ।

वयं तेऽतिथयः प्राप्ता आश्रमं भद्रमस्तु ते ।
कामः सम्पाद्यतां तात ! पितॄणां समयोचितः ॥ २७ ॥
पुत्राणां हि परो धर्मः पितृशुश्रूषणं सताम् ।
अपि पुत्रवतां ब्रह्मन् ! किमुत ब्रह्मचारिणाम् ॥ २८ ॥
आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः ।
भ्राता मरुत्पतेर्मूर्तिर्माता साक्षात्क्षितेस्तनुः ॥ २९ ॥
दयाया भगिनी मूर्तिर्धर्मस्यात्मातिथिः स्वयम् ।
अग्नेरभ्यागतो मूर्तिः सर्वभूतानि चात्मनः ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वो युष्माकं कृतं करणं महदभद्रम् । तदाह । ब्रह्मिष्ठमिति । नाभ्यनन्दत नाभिनन्दितवन्तः ॥ २१ ॥

परेभ्यः शत्रुभ्यो वः पराभव इति यदयं तस्यानयस्यान्यायस्य सम्बन्धी फलरूप आसीत् । उक्तं च

ब्राह्मणं कुलसम्पन्नं भक्तं विष्णोर्महात्मनः ।
आयान्तं वीक्ष्य नोत्तिष्ठेत्स दुःखैः परिभूयते ॥

इति स्वयमेव वैरिणो हन्तारो येषां तेभ्यः ॥ २२ ॥

गुरुतिरस्कारसत्कारावेवापचयोपचयकारणमित्यसुरदृष्टान्तेनाह । मघवन्निति । द्विषतः शत्रून् । काव्यं भार्गवं गुरुमेवासेव्योपचितान् । उपचितत्वमेवाह । आददीरन् गृह्णीयुः ॥ २३ ॥

अभेद्यो मन्त्रो येषाम् । अनुशिक्षितार्थाः शिष्याः । यतो विप्रा गोविन्दो गावश्चेश्वरा अनुग्राहका येषां तेषामेवाभद्राणि न भवन्त्यन्येषां तु भवन्ति ॥ २४ ॥

तत्तस्मात् । अथानन्तरमेव भजत । अस्य कर्मासुरपक्षपातम् ॥२५॥

उदिता उक्ताः ॥ २६—२७—२८ ॥

अतिथीनां पितॄणां च प्रशंसार्थमाहुः । आचार्य उपनीय वेदाध्यापकः । ब्रह्मणो वेदस्य मूर्तिः ॥ २९ ॥

---

(१) (अद्य श्वो वा परश्वो वा हतास्ते बलशालिनः) अत्रायमधिकः पाठः श्रीवीरराघवाचार्यमते । (२) स भावितार्थान् इति श्रीवि॰ र॰

श्रीधरस्वामिकृतभावार्थदीपिका ।

धर्मस्यात्मा मूर्तिरतिथिः । स्वयं साक्षात् । आत्मनः श्रीविष्णोः । यद्वा । आत्मनः स्वस्य सर्वभूतेष्वात्मदृष्टिः कर्तव्येत्यर्थः ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उक्तिमेवाह । अहो इत्यादिना क्षमिष्यध्वमुतास्य कर्मेत्यन्तेन । हे सुरश्रेष्ठाः ! अहो बत महत्कष्टं वः प्राप्तं महदभद्रमसाधु युष्माभिः कृतम् । किं तद्वरिष्ठमतिशयेन ब्रह्मज्ञानसंपन्नो ब्रह्मिष्ठस्तं ब्राह्मणं दान्तं जितेन्द्रियमैश्वर्यान्मदात्वाभ्यनन्दत नाभिनन्दितवन्तः ॥ २१ ॥

हे सुराः ! परेभ्यः शत्रुभ्यः पराभव इति यदयं तस्यानयस्य संबन्धी फलरूपः आसीत्कथम्भूतानां वः प्रक्षीणेभ्यः ऐश्वर्यरहितेभ्यः सपत्नेभ्यः समृद्धानां सम्पन्नानाम् ॥ २२ ॥

गुरुतिरस्कारसत्कारावेवापचयोपचयकारणामित्यसुरदृष्टान्तेनाह । मघवन्निति । हे मघवन् ! द्विषतः शत्रूनसुरान् गुर्वतिक्रमाद्धेतोः प्रक्षीणान् संप्रति तु काव्यं शुक्रं भक्तितः आराध्य उपचितान् समृद्धान् पश्य गुर्वाराधनाद्युष्मान् बाधन्त इति किं वक्तव्यम् । यतो मत्स्थानमपि गृह्णीयुरिति सम्भावयति । अद्येति । अद्यास्मिन्नहनि श्वः परस्मिन्नहनि परश्वः ततः परस्मिन्नहनि वा बलशालिनोऽत एव दृप्ताः गर्वितास्ते मम निलयनं मम स्थानमपि आददीरन् गृह्णीयुः यतस्ते भृगुः शुक्रः काव्य एव देवता येषां तादृशाः ॥ २३ ॥

अभेद्यो मन्त्रो येषां ते भृगूणां भृगुकुलप्रभवाणामनुशिक्षितार्थाः शिष्याः त्रिविष्टमपि किं गणयन्ति न गणयन्त्येवेत्यर्थः । विप्राः गोविन्दो भगवांश्च गावश्चेश्वरा अनुग्राहकाः पूज्या वा येषां तेषामेव अभद्राणि न भवन्ति इतरेषामीश्वराणामपि न भवन्तीति न किंत्वभद्राणि भवन्त्येवेत्यर्थः ॥ २४ ॥

तत्तस्मादधुनान्तरमेवाशु त्वष्टुः पुत्रमात्मवन्तं जितेन्द्रियं तपस्विनं विश्वरूपाख्यं द्विजं भजत यूयमनुवर्तध्वं तत्पौरोहित्ये वृणुतेत्यर्थः । स विश्वरूपो वः युष्मान् भावितार्थान् भावितः निष्पादितः अर्थोऽभिलषितं प्रयोजनं येषां तादृशान् विधास्यते करिष्यति । अस्य विश्वरूपस्य कर्म सुरपक्षपातादिरूपं यूयमुत क्षमिष्यध्वं यदि क्षमिष्यध्वे तर्हि सविधास्यते इत्यर्थः । यद्वा । उत अपि तु तस्य कर्म क्षमिष्यध्वं सर्वथा तस्य कर्म युष्माभिः क्षन्तव्यमित्यर्थः ॥ २५ ॥

एवमुक्ता विश्वरूपं प्रार्थयितुं देवा ययुरित्याह मुनिः । त इत्यादिना । हे राजन् ! ते देवा ब्रह्मणैवमित्थमुदिता उक्ता विगतः ज्वरः आधिर्येषां ते त्वाष्ट्रमृषिं विश्वरूपमुपव्रज्य उपेत्य परिष्वज्यालिङ्ग्य पुत्रत्वात् परिष्वज्येत्युक्तं न तु नमस्कृत्येति इदं वक्ष्यमाणमब्रुवन् ॥ २६ ॥

उक्तिमेवाह । वयमिति । वयं ते तवातिथयः प्राप्ताः ते तवाश्रमं भद्रमशून्यमस्तु आतिथ्याभावे आश्रमः शून्य इति व्यपदिश्यत इति भावः । तथा तव पितॄणामस्माकं समयोचितः तत्कालोचितः कामः इच्छाविषयोऽर्थः सम्पद्यतां त्वया संपन्नो भवतु ॥ २७ ॥

हे ब्रह्मन् ! पुत्रवतामपि सतां पुत्राणां पितृशुश्रूषणं परो धर्मः ब्रह्मचारिणां सतां पुत्राणां पितृशुश्रूषणं परो धर्म इति किमुत किमु वक्तव्यम् । त्वन्तु ब्रह्मचारी पुत्रश्चेति अस्मच्छुश्रूषणमत्यन्तोचितमिति भावः ॥ २८ ॥

किञ्चाचार्यो ब्रह्मणः परब्रह्मणो मूर्त्तिरीश्वरदृष्ट्या आचार्य आराधनीय इति भावः । पिता तु प्रजापतेर्विरिञ्चस्य मूर्त्तिः भ्राता तु मरुत्पतेरिन्द्रस्य मूर्त्तिर्माता साक्षात्क्षितेर्भूमेस्तनुर्मूर्त्तिः ॥ २९ ॥

भगिनी तु दयाया मूर्त्तिरात्मा स्वयं तु धर्मस्य मूर्त्तिरतिथिस्तु स्वयमेव स्वात्मनो मूर्त्तित्वेन द्रष्टव्यः । स्वशरीरत्वेन द्रष्टव्य इति यावत् । अभ्यागतस्त्वग्नेराहवनीयादेर्मूर्त्तिः सर्वभूतानि चात्मनो मूर्तिरात्मतुल्यत्वेन द्रष्टव्यानीत्यर्थः । यद्वा । परमूर्तिः ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

व इति षष्ठी तृतीयार्थे युष्माभिरित्यर्थः ॥ २१ ॥

तस्यानयस्यान्यायस्य परिपाकः कोऽसाविति तत्राह । परेभ्य इति ॥ २२ ॥

काव्यं शुक्रं निलयनं युष्मदधिकृतं स्वर्गमिति शेषः । भृगुरेव देवताः येषान्ते भृगुदेवताः जनः ममापि अभेद्यं निलयनमाददीरन् दारयन्तीति वा ॥ २३ ॥

अनुशिक्षितः सम्यक्साधितोऽर्थो यैस्ते तथा भृगूणां मन्त्राः त्रिविष्टपमभेद्यं गणयन्ति किं नैव ब्राह्मणशक्तिरचिन्त्यविभवेत्याह । न विप्रेति । विप्राश्च गोविन्दश्च गावश्च ईश्वराः येषां ते तथा तेषां विप्रभक्तिर्गोविन्दगोभक्त्यविनाभूतेति दर्शनाय सहैवोक्तं सापि तारतम्योपेता शुभदेत्यतो गणीति ॥ २४ ॥

तत्तस्मात्तपस्वित्वादिगुणाधिको गुणोऽप्यस्तीत्याह । अथेति । आत्मवत्त्वादपरः कल्याणगुणो नास्तीत्यतोऽथेति । नैक एवार्थोनेन किन्त्वपेक्षितान्येषार्थोऽप्यस्तीत्यतोऽर्थानिति नेदानीमुत्तरत्राप्ययमेवालमित्यतो विधास्यत इति । तत्रेतिकर्तव्यतामाह । क्षमीति । उतापर्थः ॥ २५ ॥

ते देवाः ॥ २६ ॥

पितॄणां नः समयोचितः एतत्कालयोग्यः । काम्यत इति कामोऽर्थः ॥ २७ ॥

सतां पुत्राणां ब्रह्मचारिणामपुत्रवतां पुत्राः उभयेषामपि शुश्रूषणं कुर्वन्तीत्यर्थः ॥ २८ ॥

पित्रादिशुश्रूषणेन रुद्रादिदेवताशुश्रूषणमपि कृतं स्यात्तेषां तेषु विशेषसन्निधानादित्याह । आचार्य इति । ब्रह्मणश्चतुर्मुखस्य मूर्तिः सन्निधानस्थानम् । प्रजापतेः रुद्रस्य"प्रजापतिः शिवः स्थाणुरुमेशो वृषवाहन"इत्याभिधानात् । मरुत्पतेरिन्द्रस्य अतिथिः स्वयं धर्मस्यात्मा मूर्तिः अभ्यागतः प्राघुणिकः । आत्मनः सर्वभूतानि मूर्तिः"एको देवः सर्वभूतेषु गूढः,, इति श्रुतेः ॥ २९ ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

त्रिविष्टपमिति । अत्र गोविन्देति दृष्टान्तेनोपन्यस्तम् ॥ २४--४०॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

परेभ्यः अन्येभ्यः सकाशात् केभ्यः स्ववैरिभ्यः ॥ २२ ॥

गुरुतिरस्कारसत्काराचेव विपत्सम्पदोः कारणमित्यसुर-दृष्टान्तेनैवाह । मघवन्निति । अद्यैषां तथा बलं दृश्यते यथा ममापि निलयनं सत्यलोकमाददीरन् । तत्र हेतुः । भृगुदेवताः गुरु-भक्ताः ॥ २३ ॥

अत्र सामदानदण्डा उपायाः न सम्भवन्तो दृश्यन्ते । भेदोऽप्यशक्य इत्याह । न भेद्यः मन्त्रो मन्त्रणा येषां ते सर्वत्र हेतुः । भृगूणां शुक्राचार्याणामनुशिक्षितमेव अर्थः पुरुषार्थत्वेनोपादेयो येषां ते । ननु तर्हि किं वयं मरिष्याम एवेति तत्र साश्वास-माह । न विप्रेति । विप्रा गोविन्दो गाव ईश्वरा अनुग्राहका येषां तेषाम् ॥ २४ ॥

तत्तस्मादयमेव सम्प्रत्युपाय इत्याह । विश्वरूपं गुरुत्वेन भजत । यदस्य विश्वरूपस्य कर्मासुरपक्षपातम् ॥ २५--२८ ॥

आचार्यो वेदाध्यापकः । ब्रह्मणो वेदस्य । मरुत्पतेरिन्द्रस्य अतिथिस्तु धर्मस्यात्मैव मूर्त्तिरिति किं वक्तव्यमिति भावः । आत्मनः परमेश्वरस्य ॥ २९--३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यो युष्माभिः महदभद्रममङ्गलं कृतं तदेवाह । ब्रह्मिष्ठं ब्रह्मसंपन्नं दान्तं ब्राह्मणमैश्वर्यात् प्रभुत्वमदात् नाभ्यनन्दत नाभिनन्दितवन्तः ॥ २१ ॥ २२ ॥

आदौ गुर्वतिक्रमात् प्रक्षीणान् सम्प्रति काव्यं गुरुमाराध्य भूय उपचितान् द्विषतः शत्रून् पश्य गुरुतिरस्कारसत्कारौ विपत्संपदोर्हेतुरित्यर्थः । यदि ममापि निलयनं स्थानमाददीरन् गृह्णीयुः यतो भृगुदेवताः भृगवः भृगुवंश्याः शुक्रतत्पुत्रादयो देवता येषां ते गुरुभक्ताः ॥ २३ ॥

तदा अभेद्यो मन्त्रो येषां ते तथा भृगूणामनुशिक्षितार्थाः शिष्याः त्रिविष्टपं किं गणयन्ति न किमपीत्यर्थः । अत्यन्ततो भीता-नामस्य तच्छरणं सूचयति । नेत्यर्धेन ॥ २४ ॥

विशेषतः आश्रयणीयमाह । तदिति । तत्तस्मात् सभाजितः सेवितः अस्य विश्वरूपस्य कर्म मातामहकुलपक्षपातं यदि क्षमिष्यध्वम् क्षमिष्यध्वे ॥ २५ ॥

ते देवा एवमनेन प्रकारेणोदिता उक्ताः उपव्रज्य तन्निकटं गत्वेदमब्रुवन् ॥ २६ ॥

समये अस्मिन्नापत्काले उचितः ॥ २७ ॥ २८ ॥

आत्मनोऽतिथित्वं पितृत्वं च तं प्रति निर्दिश्याथातिथीनां पितॄणां पूज्यत्वं बहुभिर्दृष्टान्तैराहुः । आचार्य इति द्वाभ्याम् ॥ २९॥

धर्मस्य आत्मा मूर्तिरतिथिः आत्मनो जगत्कारणस्य भगवतो मूर्तिः सर्वभूतानि ॥ ३० ॥ ३१ ॥

भाषा टीका ।

ब्रह्माजी बोले हे ! देवश्रेष्ठ हो तुम लोगों ने बडा बुरा काम किया जो कि इन्द्रियों को दमन करने वाले ब्राह्मण बृहस्पति का तुमने ऐश्वर्य के मारे सन्मान नहीं किया ॥ २१ ॥

तिसी अन्याय से तुमको शत्रुओं से पराभव भया है पहिले तुमारे वैरी क्षीण होगये थे तुम बलवान् होगयेथे अब उस अन्याय से तुमको दुःख की उत्पत्ती भई है ॥ २२ ॥

हे इन्द्र ! अपने शत्रुओं को तुम देखो गुरु के अतिक्रम करने से क्षीण होगये थे वेही असुर अब भक्तिपूर्वक शुक्राचार्य की आराधना करने से अब मेरे स्थान को भी लेने के लायक होगये हैं ॥ २३ ॥

भृगुओं के सिखाने से अभेद्य मंत्रवाले होगये हैं सो स्वर्ग को ए क्या गिनते हैं जो कोई भी ब्राह्मण गुरुगोविन्द को ईश्वर मानते हैं तिन पुरुषों को कभी अमङ्गल नहीं होता है ॥ २४ ॥

इस हेतु से अब तुम लोग त्वष्टाके पुत्र आत्मज्ञानी तपस्वी ब्राह्मण के शरण जाओ उसकी सेवा करके उसके असुर पक्षपात रूप कर्म को तुम सहते रहोगे तब वह विश्व रूप तुम्हारे सब मनोरथों को पूरा करदेगा ॥ २५ ॥

श्रीशुकदेवजी बोले इस प्रकार ब्रह्माजी के कहने से देवता शोक रहित होगये फिर विश्वरूप ऋषि के पास जाकर आलि-ङ्गन करके इस वचन को बोले ॥ २६ ॥

देवता बोले हम लोग तुमारे अतिथि होकर तुमारे आश्रम में आये हैं तुमारा कल्याण होगा हे तात ! हम पिता लोगोंके समय के अनुसार मनोरथ को पूरा करो ॥ २७ ॥

सत पुत्रों का परमधर्म यही है कि जो पिताओं की सेवा करना यदि पुत्र वालों का यही धर्म है तो फिर ब्रह्मचारियों का होवे इसमें क्या कहना है ॥ २८ ॥

आचार्य ब्रह्माकी मूर्ति है पिता प्रजापति की मूर्ति है बडा भ्राता इन्द्र की मूर्ति है माता तो साक्षात् पृथिवी की मूर्ति है ॥ २९ ॥

बहिन दया की मूर्ति है अतिथी धर्म की मूर्ति है पहिचान का जो अभ्यागत वह अग्नि की मूर्ति है सब भूत मात्र भगवान् की मूर्ति हैं ॥ ३० ॥

तस्मात्पितॄणामार्त्तानामार्तिं परपराभवम् ।
तपसापनयंस्तात ! सन्देशं कर्तुमर्हसि ॥ ३१ ॥

वृणीमहे त्वोपाध्यायं ब्रह्मिष्ठं ब्राह्मणं गुरुम् ।
यथाञ्जसा विजेष्यामः सपत्नांस्तव तेजसा ॥ ३२ ॥

न गर्हयन्ति ह्यर्थेषु यविष्ठाङ्घ्र्यभिवादनम् ।
छन्दोभ्योऽन्यत्र न ब्रह्मन् ! वयो ज्यैष्ठ्यस्य कारणम् ॥ ३३ ॥

ऋषिरुवाच ।

अभ्यर्थितः सुरगणैः पौरोहित्ये महातपाः ।
स विश्वरूपस्तानाह प्रसन्नः श्लक्ष्णया गिरा ॥ ३४ ॥

विश्वरूप उवाच ।

विगर्हितं धर्मशीलैर्ब्रह्मवर्च उपव्ययम् ।
कथं नु मद्विधो नाथा ! लोकेशैरभियाचितम् ।
प्रत्याख्यास्यति तच्छिष्यः स एव स्वार्थ उच्यते ॥ ३५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

परेभ्यः पराभव एवार्तिस्ताम् ॥ ३१ ॥

सन्देशमाहुः । वृणीमह इति ॥ ३२ ॥

ननूपाध्यायत्वे कनिष्ठस्य ममाभिवन्दनं करिष्यथ तच्च गर्हितं तत्राऽऽहुः । नेति । अर्थेषु प्रयोजननिमित्तं यविष्ठानामभिवादनं न निन्दन्ति । किञ्च । छन्दोभ्यो मन्त्रेभ्योऽन्यत्र वयो ज्यैष्ठ्यस्य कारणं न तु मन्त्रेषु अतोऽस्मभ्यं मन्त्रदातृत्वेन त्वमेव ज्येष्ठो भविष्यसि । यद्वा । छन्दोभ्योऽन्यत्र वेदान्विहाय वय एव ज्यैष्ठ्यस्य कारणं न भवति । किन्तु । वेदा एव मुख्यं कारणं तत्साम्ये तु वयः । वेदज्ञत्वाच्च त्वमेव ज्येष्ठ इत्यर्थः ॥ ३३—३४ ॥

निन्दितमपीदं युष्मद्याच्ञाभङ्गभयेन करिष्यामीत्याह सार्द्धेन । विगर्हितं पौरोहित्यं धर्मशीलैः अधर्महेतुत्वात् । किञ्च । ब्रह्मवर्चं उपव्ययं पूर्वसिद्धस्य ब्रह्मवर्चसो व्ययकरम् । प्रत्याख्यातुं च मादृशो नार्हतीत्याह । कथं न्विति । तेषां शिष्यः शिक्षणार्हः । स एव । प्रत्याख्यानाभाव एव हि शिष्यस्य स्वार्थ उच्यते ॥ ३५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्माद्धे तात ! त्वत्पितॄणामार्तानां पीडितानामस्माकं शत्रुभ्यः पराभवरूपामार्तिं तपसा तपःप्रभावेणापनयन्नस्माकं सन्देशं कर्तुमर्हसि योग्यो भवसि ॥ ३१ ॥

सन्देशमेवाहुः । वृणीमह इति । ब्रह्मिष्ठं ज्ञानिनं तत्रापि ब्राह्मणमत एव सर्ववर्णानां गुरुं त्वामुपाध्यायं वृणीमहे यथा येन प्रकारेणाञ्जसा सुखेनैव तव तेजसा ब्रह्मतेजसा सपत्नान् शत्रून्विजेष्यामः तथानुगृहाणेति शेषः ॥ ३२ ॥

ननूपाध्यायत्वे कनिष्ठस्य ममाङ्घ्र्यभिवादनं कथं करिष्यथ तत्तु गर्हितं तत्राहुः । न गर्हयन्तीति । स्वार्थेषु स्वप्रयोजननिमित्तं यविष्ठाङ्घ्र्यभिवादनं न गर्हयन्ति । हे ब्रह्मन् ! छन्दोभ्योऽन्यत्रैव वेदाध्ययनादेरन्यत्रैव कर्मणि वयः ज्यैष्ठ्यस्य कारणं छन्दोभ्यो मन्त्रेभ्योऽन्यत्र वयो ज्यैष्ठ्यस्य कारणं न तु मन्त्रेष्वतोऽस्मभ्यं मन्त्रदातृत्वेन त्वमेव ज्येष्ठो भवसीति वार्थः । यद्वा । छन्दोभ्योऽन्यत्र वेदान्विहाय वय एव ज्यैष्ठ्यस्य कारणं न भवति । किन्तु । वेदा एव मुख्यं कारणं तत्साम्ये तु वयः अतो वेदज्ञत्वात्त्वमेव ज्येष्ठ इत्यर्थः ॥ ३३ ॥

एवमुक्तो विश्वरूपो देवानुवाचेत्याह मुनिः । अभ्यर्थित इति । एवं सुरगणैः पौरोहित्यं पुरोहितस्य कर्म प्रति प्रार्थितः । स महातपाः विश्वरूपः प्रहसन् श्लक्ष्णया मृद्व्या गिरा तान् देवानाह ॥ ३४ ॥

उक्तिमेवाह सार्द्धैस्त्रिभिः । विगर्हितमिति । धर्मशीलैर्विगर्हितं तावद्धर्मशीलाः पौरोहित्यं विगर्हयन्तीत्यर्थः । किञ्च । तत्पौरोहित्यं ब्रह्मवर्चसस्य व्ययकरम् । आर्षत्वात् "ब्रह्महस्तिभ्यां वर्चसः,, इति समासान्ताभावः । एवं पौरोहित्यस्य विगर्हितत्वं स्वधर्मनाशकत्वं चाभिधायाधुना तदप्रत्याख्येयं चेत्याह । कथमिति । लोकेशैर्युष्माभिरभियाचितो मद्विधः पितृसेवकः कथं नु तत्प्रत्याख्यास्यति नाम न प्रत्याख्यास्यत्येवेत्यर्थः । मद्विध इत्यनेनाभिप्रेतं विशदयति । तच्छिष्य इति । तेषां शिष्यः शिक्षणार्हः शिष्योऽपि प्रत्या-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

चक्षते तत्राह । स एव । प्रत्याख्यानाभाव एव हि शिष्यस्य स्वार्थ उच्यते मद्विधो नाथं इत्येकवचनपाठे नाथो याचितनाथत्वेन रक्षकत्वेन याचितः स एव स्वार्थः इति लोकेशैः शिष्यैर्नियुज्यत इति यतः स एव स्वार्थः परमो लाभ इत्यर्थः ॥ ३५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्लोकवाक्यस्य कर्तव्यत्वे हेतुमुक्त्वा निगमयन्ति । तस्मादिति । परेभ्यः शत्रुभ्यः प्राप्तपराभवलक्षणामार्तिमपनयन् ॥ ३१ ॥

त्वा त्वाम् ॥ ३२ ॥

नन्वहं युष्मदुपाध्यायस्त्वेरकनिष्ठस्य मम पादाभिवन्दनं निन्दितं भवतामिति तत्राह । नेति । अर्थेषु प्रयोजनेषु यविष्ठस्य कनिष्ठस्य "आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापयति सर्वा देवता वेदविदि ब्राह्मणे निवसन्ति" इत्यादिश्रुतेः । वेदाभिज्ञानमेव ज्यैष्ठ्यस्य कारणं न वय इत्याह । छन्दोभ्य इति । अत्र छन्दोभ्य इत्यनेन तदभिज्ञानं लक्ष्यते । वेदाभिज्ञानमन्तरेण ज्यैष्ठ्यकारणं वयो न भवति तज्ज्ञानमेतत्त्वयास्ति तस्मात्त्वदङ्घ्रिवन्दनं न निन्दितं भीम्यादौ पाण्डवादीनां दृष्टत्वादित्यर्थः ॥ ३३ ॥ ॥ ३४ ॥

धर्मशीलैर्विगर्हितम् (१) पौरोहित्यमिति शेषः । कस्मादिति तत्राह । ब्रह्मेति । ब्रह्मवर्चसः उपव्ययो नाशो यस्मात्तथा पौरोहित्ये ब्रह्मवर्चः उपगतव्ययं प्राप्तनाशं स्यादिति यस्तस्माद्धर्मशीलैर्विगर्हितमिति वा योजना । तर्हि तत्र शक्यमित्युच्यतामितिचेत्तत्राह । कथं न्विति । हे नाथाः ! लोकेशैः अभियाचितो मद्विधो विप्रः कथं नु प्रत्याख्यास्यति कथमपि न निराकरोतीत्यर्थः । गुर्वाज्ञालङ्घने दोषापत्तेरित्यभिप्रेत्याह । तच्छिष्य इति । परकार्यत्वेन निराकार्यमिति तत्राह । स एवेति ॥ ३५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नन्वत्र धर्मोपदेशस्तुतिभ्यां विवक्षितं ब्रूतेत्यत आहुः । तस्मादिति ॥ ३१ ॥

त्वा त्वां गुरुं गुरुत्वेन वृणीमहे । प्रयोजनमाहुर्येनेति ॥ ३२ ॥

ननु मां गुरुं कुरुथेति चेत् भ्रातुष्पुत्रत्वेन कनिष्ठस्य कथं ममाभिवादनं करिष्यथेति तत्राहुः । नेति । छन्दोभ्योऽन्यत्र अन्येषु व्यावहारिककृत्येषु यविष्ठाङ्घ्र्यभिवादनं न गर्हयन्ति न अपि तु गर्हयन्त्येव । यतो वय एव ज्येष्ठत्वस्य कनिष्ठत्वस्य च कारणम् । अधिकवयस्त्वे ज्येष्ठः । अल्पवयस्त्वे कनिष्ठ इति । छन्दस्तु वैदिककृत्येषु ननु तत्र छन्दोज्ञत्वमेव ज्येष्ठत्वस्य कारणमित्यर्थः । तस्मात्त्वं वेदज्ञ-

(१) पौरोहित्यं चार्धकत्वं माठापत्यं तथैव च ॥ यः करोति स देवोऽपि श्वानयोनिं समश्नुत इतिकर्मविपाकोक्तेः ।

त्वाधिक्यात् त्वमेवास्माकं पौरोहित्यं कुर्वन् मन्त्रप्रदो गुरुर्भवेति भावः ॥ ३३ ॥ ३४ ॥

धर्मशीलैर्मुनिभिः पौरोहित्यं विगर्हितं यतो ब्रह्मवर्चसः ब्रह्मतेजस उपव्ययोऽधिकव्ययो यतस्तत् । किञ्च । तदपि सम्प्रति मम तत् कर्त्तव्यमेवाभूदित्याह । कथमिति । हे नाथाः ! लोकेशैर्युष्माभिः तच्छिष्यः तेषां युष्माकं शिष्यः । तस्मात् । स एव । प्रत्याख्यानाभाव एव शिष्यस्य स्वार्थः ॥ ३५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्वा त्वाम् ॥ ३२ ॥

हे ब्रह्मन् । छन्दोभ्योऽन्यत्र वेदाध्ययनादिव्यवहारव्यतिरिक्ते लौकिके व्यवहारे अर्थेषु प्रयोजनेषु यविष्ठाङ्घ्र्यभिवादनं न गर्हयन्तीति न अपि तु गर्हयन्ति हि यतः ज्यैष्ठ्यस्य कारणं वयो भवति वयसैव ज्येष्ठः लौकिकः स्यात् । वेदाध्ययनादिव्यवहारे तु यविष्ठाङ्घ्र्यभिवादनं न गर्हयन्ति अतः पितॄणामपि वैदिकव्यवहारनिर्वाहाय पुत्रोऽपि त्वं गुरुर्भवितुमर्हसीति फलितोऽर्थः ॥ ३३ ॥

अभ्यर्थितः प्रार्थितः श्लक्ष्णया बहुगुणयुक्तया ॥ ३४ ॥

ब्रह्मवर्च उपव्ययं ब्रह्मतेजोनाशकम् । स एव । प्रत्याख्यानाभाव एव शिष्यस्य स्वार्थ उच्यते ॥ ३५ ॥

भाषा टीका ।

हे तात ! तिस हेतु से पितर हम लोगों को पराये से पराभव होने से जो दुःख है तिसको तुम तपस्या के प्रभाव से दूर करने को हमारी आज्ञा को करने के योग्य हो ॥ ३१ ॥

अब हम लोग ब्रह्मिष्ठ ब्राह्मण तुमको उपाध्याय गुरु करके वरण करते हैं जिससे कि तुमारे तेज से शत्रुओं को जीतेंगे ॥ ३२ ॥

हे ब्रह्मन् ! छोटे के चरणका वन्दन सब व्यवहार कार्यों में निन्दित है तो भी वैदिक कर्मों में निन्दित नहीं है तुम वेद ज्ञानी उत्तम हो तिस से तुमारा चरण वंदन हम करेंगे ॥ ३३ ॥

ऋषि श्रीशुकदेवजी बोले इसप्रकार से पुरोहित कर्म में देवतों के वरण करने से बडे तपस्वी विश्वरूप प्रसन्न होकर सरल वाणी से बोले ॥ ३४ ॥

विश्वरूप बोले यद्यपि पुरोहित कर्म धर्मात्मा पुरुषों से निन्दित है क्योंकि उसमें ब्रह्म तेज का नाश होता है तो भी आपलोगों के वचन को मैं कैसे नहीं मानूंगा मैं तो आपका शिष्य हूं मेरे को तो यही स्वार्थ है ॥ ३५ ॥

अकिञ्चनानां हि धनं शिलोञ्छनं तेनेह निर्वर्त्तितसाधुसत्क्रियः ।
कथं विगर्ह्यं नु करोम्यधीश्वराः ! पौरोधसं हृष्यति येन दुर्मतिः ॥ ३६ ॥

तथापि न प्रतिब्रूयां गुरुभिः प्रार्थितं कियत् ।
भवतां प्रार्थितं सर्वं प्राणैरर्थैश्च साधये ॥ ३७ ॥

श्रीशुक उवाच ।

तेभ्य एवं प्रतिश्रुत्य विश्वरूपो महातपाः ।
पौरोहित्यं वृतश्चक्रे परमेण समाधिना ॥ ३८ ॥

सुरद्विषां श्रियं गुप्तामौशनस्यापि विद्यया ।
आच्छिद्यादान्महेन्द्राय वैष्णव्या विद्यया विभुः ॥ ३९ ॥

यया गुप्तः सहस्राक्षो जिग्येऽसुरचमूर्विभुः ।
तां प्राह स महेन्द्राय विश्वरूप उदारधीः ॥ ४० ॥

(यां प्रविश्यासुराञ्छश्वत् कक्ष्यां नारायणात्मिकाम् ।
अजैषीद्वृषभस्तात सिंहः क्षुद्रमृगानिव ॥ ० ॥)

इति श्रीमद्भागवते महापुराणे वैयासिक्यां पारमहंस्यां संहितायां
षष्ठस्कन्धे विश्वरूपोपाख्यानं नाम
सप्तमोऽध्यायः ॥ ७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु पौरोहित्येन धनलाभाद्धर्मः सिद्ध्येदन्यथा निर्धनस्य कुतो धर्मः । अत एव तेन लोको हृष्यति तत्राह । अकिञ्चनानां शिलोञ्छनं हि धनम् । क्षेत्रे स्वाम्युपेक्षितकणिशोपादानं शिलम् । हट्टादौ पतितव्रीह्यादिरुपादानमुञ्छनम् । इह गृहाश्रमे । तेनैव निर्वर्तिता साधूनां सत्क्रिया येन ॥ ३६ ॥

कियदेतत्प्रार्थितमल्पमेव । अभ्यधिकमपि करिष्यामीत्याह । भवतामिति ॥ ३७ ॥

परमेण समाधिना परमोद्यमेन ॥ ३८ ॥

वैष्णव्या श्रीनारायणकवचात्मिकया ॥ ३९ ॥

असुरचमूर्दैत्यसेनाः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु पौरोहित्ये धनलाभात्स्वधर्मः सिध्येदन्यथा निर्धनस्य कुतो धर्मः अत एव तेन लोको हृष्यतीत्यत्राह । अकिञ्चनानामिति । अकिञ्चनानां निष्कामानां शिलोञ्छनम् "उञ्छः कणश आदानं कणिशाद्यर्जनं शिलम्" एतदन्यतरवृत्तिसम्पाद्यमेव हि धनं तेनैव उक्तान्यतरेणैव निर्वर्तिताः निष्पादिताः सत्क्रियाः पञ्चमहायज्ञादिरूपाः क्रिया यैस्तादृशा भवन्ति यतो हे अधीश्वराः ! विगर्हितं पौरोहित्यं पुरोहितकर्माहं कथं नु करोमि येन पौरोहित्येन दुर्मतिर्मूर्खः तुष्यति पौरोहित्यं दुर्मतेस्तोषहेतुरकिञ्चनस्य तु शिलोञ्छनमेवेति भावः ॥ ३६ ॥

तथापि पौरोहित्यस्य गर्हितत्वेऽपि न प्रतिब्रूयां प्रत्याचक्षे यद्यस्माद्गुरुभिः पितृभिर्युष्माभिः प्रार्थितं कियदिति भावः । कियदेतत्प्रार्थितम् इतोऽधिकमपि करिष्यामीति भावः । अतो भवतां सर्वं प्रार्थितं धर्मैस्तपआदिभिः प्राणैश्च साधये प्राणपर्यन्तं यथा सामर्थ्यं साधय इत्यर्थः ॥ ३७ ॥

एवमुक्तैर्देवैर्वृतः पौरोहित्यमकरोद्विश्वरूप इत्याह मुनिः । तेभ्य इति । इतीत्थं तेभ्यो देवेभ्यः प्रतिश्रुत्य प्रतिज्ञाय महातपाः विश्वरूपः देवैर्वृतः पौरोहित्यं सावधानेन चित्तेन कृतवान् ॥ ३८ ॥

---

(१) अयमधिकः श्रीविजयध्वजतीर्थपाठेऽस्ति ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पौरोहित्यकरणमेवाह । सुरद्विषामिति । औशनस्या उशनसः सम्बन्धिन्या विद्यया गुप्तां रक्षितामपि सुरद्विषां श्रियं वैष्णव्या नारायणवर्मात्मिकया मन्त्रविद्यया आच्छिद्य तेभ्य आकृष्य विभुर्विश्वरूपः महेन्द्राय प्रादात् ॥ ३९ ॥

वैष्णव्या विद्यया आच्छिद्यादादित्येतदेवं विशदयति । ययेति । सहस्राक्ष इन्द्रो यया वैष्णव्या विद्यया गुप्तो रक्षितः अत एव विभुः समर्थो भूत्वासुरसेना जघ्ने हतवान् तां विद्यामुदारधीर्विपुलमतिर्विश्वरूपो महेन्द्राय प्राह विश्वरूपोपदिष्टवैष्णवविद्याभिरक्षितः शक्रः शत्रून्निहत्य श्रियं लब्धवानित्यर्थः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एतदेव स्पष्टमाह । अकिञ्चनानामिति । लूनसस्ये केदारे स्वामिना च परित्यक्ते एकैकावशिष्टमञ्जरीग्रहणं शिलं तादृशे क्षेत्रे एकैकव्रीहिग्रहणमुञ्छनं शिलं चोञ्छनं यस्तेनैव न प्रतिग्रहादिना निर्वर्तिताः साधूनां सत्यः क्रिया अग्निहोत्रलक्षणा यस्य स तथा एवंविधो विगर्हितं पौरोधसं कथं करोमि । दुर्मतिः दुःखितमतिः विषयाकृष्टचित्त इत्यर्थः । येन पौरोहित्येन प्राप्तेन हृष्टो भवति तदिति शेषः ॥ ३६ ॥

गुरुभिः प्रार्थितं कियदिति धिक्कृत्य न करोमीति न वच्मीति कथं तर्हि निर्णय इति तत्राह । भवतामिति ॥ ३७ ॥ ३८ ॥

औशनस्या उशनसः शुक्रस्य विद्यमाना औशनसी तया आच्छिद्य स्वीकृत्य विष्णुर्देवता अस्या इति वैष्णवी तया ॥ ३९ ॥ ४० ॥

कक्ष्यां कवचलक्षणां रक्षाम् ॥ ० ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् सप्तमोऽध्यायः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु पौरोहित्येन धनलाभाद्धर्मः सिद्ध्येत् । अन्यथा निर्धनस्य कुतो धर्मस्तत्राह । अकिञ्चनानां शिलोञ्छनमेव धनम् । क्षेत्रे स्वाम्युपेक्षितकणशोपादानं शिलम् । हट्टादौ पतितव्रीह्यादेरुपादानमुञ्छनम् । येन पौरोधसेन दुर्मतिः पुमानेव हृष्यति न तु सुमतिः । यद्वा । दुष्टा मतिरेव स्वानुकूल्यात् हृष्यति ॥ ३६ ॥

न प्रतिब्रूयां न प्रत्याख्यास्ये किमदेतत्तु प्रार्थितमत्यल्पमेव अभ्यधिकमपि करिष्यामीत्याह । भवतामिति ॥ ३७ ॥

समाधिना चित्तैकाग्र्येण ॥ ३८–३९ ॥

तां वैष्णवीं विद्याम् ॥ ४० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठस्य सप्तमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अकिञ्चनानां शिलोञ्छनं शिलं क्षेत्रे पतितकणशोपादानं उञ्छनं हट्टादिपतितव्रीह्याद्युपादानं च धनम् । तेनैव निर्वर्तिताः साधु सम्यक् सत्क्रिया येन सोऽहं कथं नु विगर्हितं पौरोधसं पौरोहित्यं करोमि येन पौरोहित्येन दुर्मतिर्हृष्यति धनलोभेन तुष्यति ॥ ३६ ॥ ३७ ॥

तैर्वृतः समाधिना चित्तैकाग्र्येण पौरोहित्यं चक्रे ॥ ३८ ॥ ३९ ॥

यया गुप्तः विभुः समर्थः सन्नसुरचमूः जिग्ये तां महेन्द्राय सहस्राक्षाय प्राह उदारधीरिति पदेन सा गोपनीयेति सूच्यते ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे सप्तमाध्यायार्थप्रकाशः ॥ ७ ॥

भाषा टीका ।

हे अधीश्वर हो ! अकिंचन ब्राह्मणों का धन तो खेतों में से वाल दूकानों में से दाना बीनना मात्र है उसीसे वह सुन्दर क्रियाओं को करता रहता है जिस पुरोहित पना में खोटे पुरुषको हर्ष होता है तिसको मैं कैसे करूंगा ॥ ३६ ॥

तौ भी गुरू लोगों के प्रार्थितको मै निषेध नहीं करूंगा क्योंकि यह कितनी बडी बात है आपके प्रार्थना किये हुये सब बातों को मैं प्राणों से और धनों से सिद्ध करूंगा ॥ ३७ ॥

श्रीशुकदेवजी बोले उस महातपस्वी विश्वरूप ने वरण करणे से सावधान से पौरोहित्यको स्वीकार किया ॥ ३८ ॥

देवतों के शत्रु असुरों ने शुक्राचार्य की विद्या से जो लक्ष्मी

भाषा टीका ।

संपादन की थी उस संपत्ति को वैष्णवी विद्या से जीत कर महेन्द्र को विश्व रूप ने दे दिया ॥ ३९ ॥

जिस विद्या से रक्षित होकर इंद्र ने असुरों की सेना को जीता था उसी विद्या को उदार बुद्धि वाले विश्वरूप ने महेंद्र के अर्थ कथन किया ॥ ४० ॥

जिसतारायण कवच नामकी कथ्या को धारण करके इन्द्रने जैसे सिंहश्रुद्रमृगोंको जीतता है तैसे असुरोंको जीत लिया था सो वही विद्या है ॥ ०॥

इति श्रीभागवत षष्ठस्कन्ध सातवें अध्याय का भाषानुवाद लक्ष्मणाचार्यकृत समाप्त ॥ ७ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे सप्तमोऽध्यायः समाप्तः ॥ ७ ॥

॥ अष्टमोऽध्यायः ॥

—○:*:○—

राजोवाच

यया गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् ।
क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ॥ १ ॥
भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम् ।
यथाततायिनः शत्रून् येन गुप्तोऽजयन्मृधे ॥ २ ॥

श्रीशुक उवाच

वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते ।
नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ ३ ॥

विश्वरूप उवाच

धौताङ्घ्रिपाणिराचम्य सपवित्र उदङ्मुखः ।
कृतस्वाङ्गकरन्यासो मन्त्राभ्यां वाग्यतः शुचिः ॥ ४ ॥
(१)नारायणमयं वर्म सन्नह्येद्भय आगते ।
(२) पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ॥ ५ ॥
मुखे शिरस्यानुपूर्व्यादोङ्कारादीनि विन्यसेत् ।
ॐ नमो नारायणायेति विपर्ययमथापि वा ॥ ६ ॥
करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया ।
प्रणवादियकारान्तमङ्गुल्यङ्गुष्ठपर्वसु ॥ ७ ॥
न्यसेद्धृदय ओङ्कारं विकारमनु मूर्द्धनि ।
षकारं तु भ्रुवोर्मध्ये णकारं शिखया दिशेत् ॥ ८ ॥
वेकारं नेत्रयोर्युञ्ज्यान्नकारं सर्वसन्धिषु ।
मकारमस्त्रमुद्दिश्य मन्त्रमूर्त्तिर्भवेद्बुधः ॥ ९ ॥
सविसर्गं फडन्तं तत् सर्वदिक्षु विनिर्दिशेत् ।
ॐ विष्णवे नम इति ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अष्टमे विश्वरूपस्तु वर्म नारायणात्मकम् ।
इन्द्राय प्राह येनेन्द्रो गुप्तो दैत्यानथाजयत् ॥ १ ॥
त्रिलोक्याः सम्बन्धिनीं श्रियम् ॥ १ ॥ २ ॥ ३ ॥

मन्त्राभ्यामष्टाक्षरद्वादशाक्षराभ्यां कृतः स्वाङ्गेषु करयोश्च न्यासो येन ॥ ४ ॥
नारायणमयं वर्म सन्नह्येद्बध्नीयात् । तत्राष्टाक्षरेण पादाद्यङ्गेषु न्यासमाह । पादयोरिति सार्धेन ॥ ५ ॥

---

(१) नारायणपरं वर्म) इति श्रीमच्छुकदेवपाठः ।
(२) दैवभूतात्मकर्मभ्यो नारायणमयः पुमान्) इति श्रीवीररा० श्रीविजयध्वज० मतेऽयमाधिकः पाठः ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रणवसम्पुटितमोङ्काराद्येकैकमक्षरं विन्यसेत् । विपर्ययं ; यथा भवत्येवं शिरआदिपादान्तं वा विन्यसेत् । उत्पत्तिन्यासं संहारन्यासं वा कुर्यादित्यर्थः ॥ ६ ॥

द्वादशाक्षरस्योद्धारः प्रणवादियकारान्तमिति । प्रणवसम्पुटितमेकैकमक्षरं दक्षिणतर्जनीमारभ्य वामतर्जनीपर्यन्तमङ्गुलीषु परिशिष्टमक्षरचतुष्टयमङ्गुष्ठयोराद्यन्तपर्वसु न्यसेत् ॥ ७ ॥

मन्त्रान्तरन्यासमाह । न्यसेदिति । षकारणकारयोर्विश्लेषेण षडक्षराणि हृदयादिषु न्यसेत् ॥ ८ ॥

मकारमस्त्रमुद्दिश्य ध्यात्वा ॥ ९ ॥

तन्मकारास्त्रं मः अस्त्राय फडित्येवं दिग्बन्धे विनिर्दिशेत् ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वैष्णवीं विद्यां जिघृक्षुः पृच्छति राजा । ययेति द्वाभ्याम् । सहस्राक्षो यया वैष्णव्या विद्यया गुप्तः वाहनैः सहितान् रिपूणां सैनिकान् क्रीडन्निव विनिर्जित्य त्रिलोक्याः सम्बन्धिनीं श्रियं बुभुजे अनुबभूव ॥ १ ॥

तन्नारायणात्मकं नारायणरूपं मन्त्रदेवतयोरभेदाध्यवसायेन नारायणात्मकमित्युक्तम् । यद्वा । नारायण आत्मा प्रतिपाद्यो यस्य सः । अर्थो हि मन्त्रस्यात्मा मम मह्यं हे भगवन् ! आख्याहि उपदिश येन वर्मजापेन यथा आततायिनो जिघांसून् शत्रून्मृधे युद्धेऽजयदिन्द्रः ॥ २ ॥

एवमुक्तो मुनिर्वर्मोपदेष्टुमुपक्रमते । वृत इति । त्वाष्ट्रो विश्वरूपः पुरोहितत्वेन देवैर्वृतः अनुपृच्छते इन्द्राय यन्नारायणाख्यं वर्म नारायणवर्माख्यं मन्त्रमाह उपदिदेश तद्वर्मैकमनाः समाहितचित्तस्त्वं शृणु उपदिशाम्यहमिति शेषः ॥ ३ ॥

उपदेक्ष्यमाणमन्त्रजपस्याङ्गभूतशौचन्यासकथनपूर्वकं विश्वरूपोपदिष्टक्रमेण मन्त्रमुपदिशति । धौतेति । शुचिः कृतस्नानादिकः धौताङ्घ्रिपाणिः प्रक्षालितपादपाणिः पुमान् सकर्मपवित्रकर उदङ्मुख उपविश्याचम्य वाग्यतः नियमितवाक् मन्त्राभ्यां नारायणाष्टाक्षरवासुदेवद्वादशाक्षराभ्यां मन्त्राभ्यां कृतः स्वस्याङ्गन्यासः करन्यासश्च येन तादृशः मन्त्राभ्यामिति विष्णुषडक्षरस्याप्युपलक्षणम् । तन्न्यासस्यापि वक्ष्यमाणत्वात् ॥ ४ ॥

दैवभूतात्मनां कर्मभ्य आधिदैविकाध्यात्मिकेभ्यो भये आगते सति स्वयं नारायणध्यानप्रचुरः नारायणमयं नारायणप्रतिपादनप्रचुरम् । यद्वा । नारायणादुपदेशक्रमेणागतं नारायणमयम् "तत आगत" इत्यधिकारे "मयट् च" इति मयट् । वर्म कवचं वर्मवद्रक्षकत्वाद्वर्मेत्युक्तम् । सन्नह्येदङ्गीयाङ्गपेदित्यर्थः । कृतस्वाङ्गकरन्यास इत्युक्ताबङ्गन्यासकरन्यासावाह । पादयोरिति । यद्यप्यत्र ऋषिच्छन्दोदैवतबीजानि नोक्तानि तथाप्यस्य वर्मणो नारायणमन्त्रस्याद्रष्टाक्षरसम्बन्धीन्येव तान्यूह्यानीति सम्प्रदायः ओमित्यादि योऽयं नारायणाष्टाक्षरो मन्त्रस्तस्योङ्कारादीन्यष्टाक्षराणि क्रमेण पादद्वयजानुद्वयोरुद्वयोदरहृदयोरःस्थमुखशिरःस्वष्टसु स्थानेषु सबिन्दुकानि प्रणवसम्पुटितानि नमोऽन्तानि विन्यसेत् अथापि वा । यद्वा विपर्ययं न्यसेच्छिरःप्रभृतिपादान्तेष्वष्टसु स्थानेषु क्रमेणोङ्कारादीन्यष्टौ न्यसेदित्यर्थः । यद्वा । अथापिवेति निपातसमुदायः पुनरर्थकः । प्रथमं यकारादीन्यष्टावक्षराणि पादादिशिरःपर्यन्तेषु स्थानेषु संहारक्रमेण विन्यस्य पुनः शिरःप्रभृतिषु पादान्तेष्वोङ्कारादीनि सृष्टिक्रमेण विन्यसेदित्यर्थः । एवमङ्गन्यासं विधाय ततः करन्यासं द्वादशाक्षरविद्यया कुर्यात् । द्वादशाक्षरस्य चतुर्थस्कन्धे उक्तत्वादुद्धारवत्स्वरूपानुक्तिः । कथं कुर्यात्करन्यासमित्यत्राह । प्रणवादीति । प्रणवादियकारान्तानि द्वादशाक्षराणि हस्तयोरङ्गुलिषु तर्जन्यादिषु चतुर्षु चतुर्षु अङ्गुष्ठयोर्द्वयोर्द्वयोः पर्वणोश्च न्यसेदित्यर्थः । तदित्थम् ओमों नमः तर्जन्या दक्षिणाङ्गुष्ठप्रथमपर्वणि । ओं नं नमः तदङ्गुष्ठान्त्यपर्वणि । ओं मो नमः तदङ्गुष्ठेन तर्जनीमध्यमपर्वणि । मन्त्राक्षरमाद्यन्तयोः पर्वणोस्तु प्रणवनमःपदे एवमुत्तरत्रापि द्रष्टव्यम् । ओं भं नमः मध्यमाङ्गुलौ । ओं गं नमः अनामिकाङ्गुलौ । ओं वं नमः कनिष्ठिकाङ्गुलौ । ओं तें नमः वामाङ्गुष्ठाद्यपर्वणि तत्तर्जन्या । ओं वां नमः तदन्त्यपर्वणि । ओं सुं नमः तर्जन्यां तदङ्गुष्ठेन । ओं दें नमः तन्मध्यमायाम् ओं वां नमः तदनामिकायाम् । ओं यं नमः तत्कनिष्ठिकायामिति यथाक्रमं सूह्यम् ॥ ५—७ ॥

अथ विष्णुषडक्षरन्यासमाह । न्यसेदिति । प्रत्येकं वर्णन्यासकथनेनैव मन्त्रस्वरूपमप्युक्तप्रायमिति पृथक्तदनुक्तम् । षकारणकारयोर्विश्लेषेण षडक्षराणि प्रणवादीनि नकारान्तानि तानि हृन्मूर्धभ्रूमध्यशिखानेत्रसर्वसन्धिस्थानेषु षट्सु विन्यसेत् ततोऽवशिष्टं मकारं सविसर्गं फडन्तम् ओं नमः फडिति कृत्वा सर्वदिक्षु प्रागाद्यष्टसु दिक्षु ऊर्ध्वाधरयोश्च विनिर्दिशेत् तर्जन्यङ्गुष्ठयोश्छोटिकया दिक्षु न्यसेदित्यर्थः । एवंविधे न्यासे कृते सति बुधो मन्त्रजापकः मन्त्रमूर्तिर्मन्त्रावृत्तियोग्यदेहो भवतीत्यर्थः । यद्वा । मन्त्रात्मकमूर्तिर्भवेदुक्तमन्त्रत्रयभावितात्माऽऽदशमूर्तिर्भवेदित्यर्थः ॥ ८ ॥ ९ ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"अकामः सर्वकामो वा मोक्षकामो यजेद्धरिम्" इत्युक्तं प्रपञ्चयत्यनेनाध्यायेन । तत्र राजनीताध्याये संक्षिप्य कथितं नारायणकवचनामस्तोत्रं लोकोपकाराय विस्तरतः श्रोतुं पृच्छति । ययेति । गुप्तो रक्षितः रिपुसैनिकान् शत्रुसेनानायकान् ॥ १ ॥

तदिदमुक्तराजलिङ्गानुसारेण यथाततायिनः इतीत्थं भावेन श्रोतुं पुनर्वचनम् । यथा येनेत्थंभावेन तमित्थंभावं त्वमाख्याहीति शेषः ॥ २ ॥ ३ ॥

धौतौ प्रक्षालितावङ्घ्री पाणी च यस्य स तथा धौतेत्यारभ्य ओं विष्णवे नम इत्यन्तेन ग्रन्थेन तद्वर्मधारणे इत्थंभावं वक्ति । कृतः स्वाङ्गे करयोश्च न्यासो येन स तथा ॥ ४ ॥

सन्नह्येद्वध्नीयात् दैवाद्भये अनावृष्टिलक्षणे भूतेभ्य उन्मादादिलक्षणे आत्मकर्मणः कुष्ठभगन्दरादिलक्षणे ॥ ५ ॥

आनुपूर्व्यात्संप्रदायक्रमात् विपर्ययं शिरआदिर्वा करन्यासं संक्षिप्योक्तं विस्तारार्थमाह । करन्यासमिति । ओं नमो भगवते वासुदेवायेतीयं द्वादशाक्षरविद्या ॥ ६ ॥ ७ ॥

न्यसेद्धृदय इत्यादिना षडङ्गन्यासः । न्यसेदिति । अनु ओङ्कारन्यासानन्तरं प्रत्येकमोङ्कारसमुत्थं कृत्वेति । सा ललाटोपरि वा तुना वर्णदेवतास्मरणं सूचयति । शिखया शिखायां मुकुटप्रदेशे ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अस्त्रमसुरनिरासमुद्दिश्य कुर्यादिति शेषः । मन्त्रमूर्तिः मन्त्र-देवतासन्निधानयुक्तदेह इति विसर्गेण सहितं फडित्यक्षरावसानमन्त्रम् अन्तं रक्षसां नाशकरं फडक्षरं वा तं मकारं स्वाहा-विसर्जनीयसहितं फडक्षरं चेति वा (१) व्यस्तरूयोक्त्या विष्णवे नम इत्यन्यथा प्रतीतिनिरासाय प्रतीकं पठति । ओं विष्णवे नम इतीति । अनन्तरं ध्येयदेवताप्रकारं निरूपयति । आत्मानमिति । परमात्मानं विप्रतिपत्तिनिरासायोक्तं ध्येयमिति । ऐश्वर्यादिषड्शक्तिभिः उत्साहप्रभुमन्त्रज्ञानक्रियेच्छाशक्तिभिर्वा तपो नाम शत्रुसन्तापनशक्तिर्ज्ञानं वा इमं मन्त्रमिति वक्ष्यमाणमोमिति ॥ ६—११ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथेति युग्मकम् । यया वर्मरूपया विद्यया यथा अजयत् तं प्रकारश्चाख्याहि ॥ १—१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नारायणात्मकं वर्म विश्वरूप उपादिशत् ।
शक्रं येनाजयद्दैत्यान् स इत्यष्टम उच्यते ॥
मन्त्राभ्यामष्टाक्षरद्वादशाक्षराभ्याम् ॥ १ ॥ ४ ॥

अत्राष्टाक्षरेण पादाद्यष्टाङ्गेषु न्यासमाह । पादयोरिति सार्द्धेन । प्रणवसंपुटितमोङ्काराद्येकैकाक्षरं विन्यसेत् । विपर्ययं यथा भवत्येवं शिरआदिपादान्तं वा विन्यसेत् । अक्रमेण सृष्टिन्यासं व्युत्क्रमेण संहारन्यासं वा कुर्यादित्यर्थः ॥ ५—६ ॥

प्रणवादीति । प्रणवसंपुटितमेकैकमक्षरं दक्षिणतर्जनीमारभ्य वामतर्जनीपर्यन्तमङ्गुलीषु　परिशिष्टमक्षरचतुष्टयम् अङ्गुष्ठयोराद्यन्तपर्वसु न्यसेत् ॥ ७ ॥

मन्त्रान्तरेणापि हृदयादिन्यासमाह । न्यसेदिति ॥ ८ ॥

मकारमस्त्रमुद्दिश्य ध्यात्वा तन्मकाराख्यं मः अस्त्राय फडिति एवं सर्वदिग्बन्धे विनिर्दिशेत् ॥ ९ ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नारायणवर्म अष्टमेनाध्यायेन प्रकाश्यते । तत्र तावत् नारायणवर्म बुभुत्सुः पृच्छति । ययेति । यया नारायणवर्मरूपया विद्यया त्रिलोक्यां या श्रीः संपत्ताम् ॥ १ ॥

नारायणात्मकं नारायण आत्मा विषयो यस्य तत् । मम महामाख्याहि कथय ॥ २ ॥

नारायणः आख्यायते कथ्यते येन तत् ॥ ३ ॥

शुचिः कृतस्नानः पुनर्धौताङ्घ्रिपाणिः उदङ्मुखः आसने उपविष्ट इति शेषः । सपवित्रः गृहीतकुशः आचम्य विधिवत्कृताचमनः मन्त्राभ्यामष्टाक्षरद्वादशाक्षराभ्यां कृतः स्त्रीयेषु अङ्गेषु करयोश्च न्यासो येन सः । नारायणपरं नारायण एव परः साध्योऽर्थो यस्मात्तन्नारायणप्रापकमित्यर्थः । अनेनैतद्धारणफलं नारायणप्राप्तिरिति गम्यते । वर्म कवचं संनह्येत् । फलान्तरं दर्शयति । भय आगते इति । अङ्गेष्वष्टाक्षरेण न्यासं कुर्यादित्याह । पादयोरिति सार्द्धेन । प्रणवाद्येकैकमक्षरं पादयुग्मादिषिरोऽन्तेष्वङ्गेषु अनुक्रमेण विन्यसेत् । विपर्ययं यथा भवति तथा शिरआदिपादयुग्मान्तं वा विन्यसेत् । अत्र केवलनामाक्षराणां न्यास उक्तः । ऋषिच्छन्दआदिकं च नोक्तम् । यथोक्तस्यैव सर्वपुरुषार्थप्रदत्वात्तथापि यथारुचि यथाशास्त्रं सानुस्वारं प्रणवसम्पुटितं वा नमोऽन्तं वा एकैकमक्षरं तत्र विन्यसेत् । नारायणमन्त्रसम्बन्धि ऋष्यादिकं च ज्ञेयम् । मन्त्रमाह । ओं नम इति ॥ ४—६ ॥

द्वादशाक्षरेण करयोर्न्यासं कुर्यादित्याह । करन्यासमिति । द्वादशाक्षरं मन्त्रमाद्यन्ताभ्यामक्षराभ्यां सूचयति । प्रणवादियकारान्तमिति । एकैकमक्षरं दक्षिणतर्जनीमारभ्य वामतर्जनीपर्यन्तमङ्गुलीषु परिशिष्टानि चतुरक्षराणि अङ्गुष्ठयोराद्यन्तेषु पर्वसु च विन्यसेत् ॥ ७ ॥

मन्त्रान्तरन्यासमाह । न्यसेदिति द्वाभ्याम् । षकारणकारयोर्विश्लेषेण न्यासमाह । षकारं भ्रुवोर्मध्ये णकारं शिखया शिखायां वेकारं नेत्रयोर्युञ्ज्यात् नकारं सर्वसन्धिषु करचरणसन्धिषु तदनन्तरं मः अस्त्राय फडित्येवं सविसर्गं मकारं फडन्तमस्त्रमन्त्रमुद्दिश्य ध्यात्वा सर्वदिक्षु विनिर्दिशेत् तर्जन्यङ्गुष्ठाग्रसंयोगरूपया छोटिकमुद्रया दिग्बन्धनं कुर्यात् । एवं मन्त्रमूर्तिर्भवेदित्यर्थः । मन्त्रमाह । ओं विष्णवे नम इति ॥ ८—१० ॥

भाषा टीका ।

षष्ठस्कन्धके आठ वें अध्याय में श्रीनारायण कवच का कथन है तिस में बडे छन्दवाले मिलकर ४३ श्लोक हैं अनुष्टुप ४८ श्लोक हैं महाराज श्रीपरीक्षितजी प्रश्न करतेहैं कि हेभगवन् शुकदेवजी ! जिस विद्या मन्त्र से रक्षित होने से इन्द्र ने शत्रुओं के सेनापतियों को वाहनोंके सहित खेलते सरीके जीतकर तीनों लोकोंकी सम्पत्ति का भोग किया है जिससे रक्षित होकर युद्धमें शस्त्रधारि शत्रुओं को इन्द्र ने जीतलिया है उस नारायण कवचको मेरे से कथन करो ॥ १ ॥ २ ॥

श्रीशुकदेवजी बोले हे राजन् ! विश्वरूपको जब देवतों ने पुरोहितपनामें वरण किया तब इन्द्र के पूछने से इन्द्र के अर्थ विश्वरूप ने नारायण कवचका उपदेश किया है मेरे कहनेसे एकाग्रमनहोकर इहांपर तुम सुनो ॥ ३ ॥

विश्वरूपबोले जिस समय में मनुष्यको भयप्राप्तहो तिस समय में पुरुष स्नानादि नित्यकर्मों से पहिले निवृत्त होकरभी हाथ पैरों को धोवे फिर दहिने हाथकी अनामिका अंगुली में कुश या तामा आदि का पवित्र धारण करै फिर कुशा मृगचर्मादि के आसनपर उत्तरको मुखकरके बैठे काम क्रोधादि वासनाओं को छोडकर भीतरकी शुद्धि करै मौनव्रत धारण करै फिर अष्टाक्षर द्वादशाक्षर दोनों मन्त्रों से अङ्गन्यास करन्यास दोनों करै ॥ ४ ॥

(१) न्याससमये षकारणकारयोः पृथगुक्त्या ।

आत्मानं परमं ध्यायेद्ध्येयं षट्शक्तिभिर्युतम् ।
विद्यातेजस्तपोमूर्तिमिमं मन्त्रमुदाहरेत् ॥ ११ ॥
ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्ताङ्घ्रिपद्मः पतगेन्द्रपृष्ठे ।
दरारिचर्मासिगदेषुचापपाशान् दधानोऽष्टगुणोऽष्टबाहुः ॥ १२ ॥
जलेषु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य पाशात् ।
स्थलेषु मायावटुवामनोऽव्यात्त्रिविक्रमः खेऽवतु विश्वरूपः ॥ १३ ॥
दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथपारिः ।
विमुञ्चतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥ १४ ॥
रक्षत्वसौ माध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः ।
रामोऽद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद्भरताग्रजोऽस्मान् ॥ १५ ॥
मामुग्रधर्मादखिलात् प्रमादान्नारायणः पातु नरश्च हासात् ।
दत्तस्त्वयोगादथ योगनाथः पायाद्गुणेशः कपिलः कर्मबन्धात् ॥ १६ ॥
सनत्कुमारोऽवतु कामदेवाद्धयशीर्षा मां पथि देवहेलनात् ।
देवर्षिवर्यः पुरुषार्चनान्तरात् कूर्मो हरिर्मां निरयादशेषात् ॥ १७ ॥
धन्वन्तरिर्भगवान् पात्वपथ्याद्द्वन्द्वाद्भयादृषभो निर्जितात्मा ।
यज्ञश्च लोकादवताज्जनान्ताद्बलो गणात् क्रोधवशादहीन्द्रः ॥ १८ ॥
द्वैपायनो भगवानप्रबोधाद्बुद्धस्तु पाखण्डगणात् प्रमादात् ।
कल्किः कलेः कालमलात् प्रपातु धर्मावनायोरुकृतावतारः ॥ १९ ॥
मां केशवो गदया प्रातरव्याद्गोविन्द आसङ्गवमात्तवेणुः ।
नारायणः प्राह्ण उदात्तशक्तिर्मध्यन्दिने विष्णुररीन्द्रपाणिः ॥ २० ॥

भाषा टीका ।

फिर नारायणमय कवचको शरीर के अवयवों में धारण करे तिससे पहिले नारायण मन्त्रके ओङ्कारआदि अक्षरों को दोनो पादों में दोनो पींडियोमे दोनो जांघों मे उदर में हृदय में वक्षस्थल में न्यास करे ॥ ५ ॥

बाकी दो अक्षरों को मुखमे और मस्तक मे न्यास करै इन आठ स्थानों मे जिस मन्त्र के अक्षरों का न्यास करना है सो मन्त्र विपरीत ऐसा है "यणायरानामोनओम्" इस मन्त्र के अक्षरों का उलटे से अथवा सीधे से न्यास करै ॥ ६ ॥

तिसके पीछे द्वादशाक्षरवासुदेव मंत्र सें छै छै अक्षरों का अंगूठा तर्जनी मध्यमा अनामिका कनिष्ठा करतलकरपृष्ठ इनों मे न्यास करे फिर हृदय शिर शिखा कवच नेत्र अस्त्र इन स्थानों मे छै अक्षरों का न्यास करै ॥ ७ ॥

षडक्षर विष्णु मन्त्र के ओङ्कार को हृदय में विकार को मस्तक मे षकार को भौं के मध्यमें णकार को शिखा मे न्यास करे ॥ ८ ॥

वेकार को नेत्रों मे नकार को सर्व सन्धियों में न्यास करै मकार का अस्त्र उद्देश करके साधक पुरुष मन्त्र मूर्तिवाला होजावै ॥ ९ ॥

विसर्ग के सहित फट् इस अक्षर को सब दिशों में न्यास करै उस मन्त्र का स्वरूप "ॐ विष्णवे नमः" इस प्रकारका है ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ध्येयमीश्वररूपमात्मानं ध्यायेत् । षट्शक्तिभिरैश्वर्यादिभिर्भगशब्दवाच्याभिः । विद्या च तेजश्च तपश्च मूर्तिर्यस्य तम् । इमं वक्ष्यमाणं श्रीमन्नारायणकवचाख्यम् ॥ ११ ॥

अष्टगुणोऽणिमाद्यष्टैश्वर्ययुक्तः ॥ १२ ॥

यादसां गणा एव वरुणस्य पाशास्तस्मात् ॥ १३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अटवी आजिमुखं सङ्ग्रामोपक्रमश्च आदिर्येषां तेषु सङ्कटस्थानेषु ॥ १४ ॥

असौ प्रसिद्धो वराहो मामध्वनि रक्षतु । यज्ञैरवयवरूपैः कल्प्यते निरूप्यत इति तथा । उन्नीता उद्धृता धरा येन सः । अद्रिकूटेषु गिरिशिखरेषु रामो जामदग्न्यः ॥ १५ ॥

उग्रधर्माद्भिचारादिलक्षणात् । हासाद्गर्वात्नरोऽवतु । दत्तो दत्तात्रेयः । अयोगाद्योगभ्रंशात् ॥ १६ ॥

पथि यद्देवानां हेलनं नमस्कारमकृत्वा गमनं तस्मात् । पुरुषार्चनस्यान्तराद्देवपूजाच्छिद्राद्द्वात्रिंशदपराधरूपान्नारदः ॥ १७ ॥

लोकाज्जनापवादाद्यज्ञः जननिमित्तो योऽन्त उपघातस्तस्माद्बलभद्रो ऽवतात् । कृतान्तादिति पाठे कृतान्तात्कालाद्रक्षतु क्रोधवशात्सर्पाणां गणात् अहीन्द्रः शेषः ॥ १८ ॥

कालमलभूतात्कलेः कल्किः धर्मावनाय धर्मरक्षणायोरुमहान् कृतोऽवतारो येन ॥ १९ ॥

दिनस्य षट्सु भागेषु क्रमेण प्रातरादिसंज्ञेषु रात्रेश्च प्रदोषादिसंज्ञेषु रक्षा प्रार्थनम् । मां केशव इति त्रिभिः । आसङ्गधं सङ्घमाभिव्याप्य ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं कृतस्वाङ्गकरन्यासः परमात्मानं ध्यायन् मन्त्रमावर्तयेदित्याह । आत्मानमिति । परमात्मानं ध्यायेत् कथम्भूतं ध्येयं ध्यातुं योग्यं यादृशविग्रहविशिष्टस्य ध्यानेन मनः प्रसन्नं भवेत्तादृशमित्यर्थः । षड्शक्तिभिर्ज्ञानशक्तिबलैश्वर्यवीर्यतेजआत्मिकाभिः शक्तिभिरपृथक्सिद्धप्रकारभूताभिः कार्योपयोगिनीभिर्युतं यावत्स्वसत्त्वं युक्तमेवंविधं परमात्मानं ध्यात्वा इमं वक्ष्यमाणं नारायणवर्माख्यं मन्त्रमुदाहरेत् पठेत् मन्त्रं विशिनष्टि । विद्यातेजस्तपोमूर्त्ति विद्या ज्ञानं तेजः प्रभावस्तपः सत्कर्म विद्यादीनां मूर्त्तिराश्रयः तं विद्यादयो मूर्त्तिः शरीरं यस्येति वार्थः । सर्वज्ञातानां तेजसां तपसां चैतन्मन्त्रायत्तत्वात्सर्वज्ञानादिसन्ततिरूपोऽयं मन्त्र इत्यर्थः ॥ ११ ॥

वर्माह । ओमिति । "स्रवत्यनोङ्कृतं पूर्वम्" इति न्यायेन मन्त्रादावोङ्कारः । प्रथमं शरणागतगजेन्द्ररक्षणायावतीर्णं हर्यवतारूपं श्रीनारायणं गजेन्द्रवत्पीडितस्वरक्षणाय प्रार्थयते । हरिरिति । हरत्याश्रितानामार्त्तिमिति हरिः । मम सर्वतो रक्षां विदध्यात्कुर्यात् । मन्त्र एव स्वजापकपुरुषगतं प्रार्थयितृत्वं स्वस्मिन्नारोप्य प्रार्थयते । कथम्भूतः पतगेन्द्रस्य गरुत्मतः पृष्ठे न्यस्ते अङ्घ्रिपद्मे अङ्घ्री पद्मे इव अङ्घ्रिपद्मे येन सः । दरः शङ्खः अरि चक्रं चर्म खेटः असिः खड्गः दरादीन् दधानः बिभ्रत् अष्टौ गुणा अणिमादयो यस्य नित्याविर्भूतनिरुपाधिकापहतपाप्मत्वाद्यष्टगुणको वा अष्टौ बाहवो यस्य सः ॥ १२ ॥

एवं सामान्यतो रक्षाविधानं प्रार्थ्याथ जलस्थलादिप्रदेशभेदेन रक्षणोपयुक्तमत्स्यादिमूर्त्तिधरं श्रीमन्नारायणं प्रार्थयते । जलेष्विति । यादसां जलजन्तूनां गणा एव वरुणस्य पाशास्तस्माज्जलचरकुष्कप्रतिभटः मत्स्यमूर्त्तिर्भगवान् जलेषु मां रक्षतु स्थलेषु निर्जलप्रदेशेषु मायावटुवामनः स्वसङ्कल्पोपात्तवटुवामनरूपः स्थलजदुष्कृतां शास्ता मामव्याद्रक्षतु खेऽन्तरिक्षे त्रिविक्रमः त्रयो विक्रमाः पदाविन्यासाः लोकत्रयसंग्राहका यस्यात एव विश्वरूपः कृत्स्नविश्वव्याप्तरूपः खसञ्चारिष्णुदुष्कृतां शास्ताऽवतु रक्षतु ॥ १३ ॥

अटव्यरण्यमाजिमुखं युद्धोपक्रमश्चादिर्येषां तेषु दुर्गेषु सङ्कटस्थानेषु प्रभुः समर्थोऽसुरसेनानायकानामरिर्नृसिंहः स्वभटप्रतिभटनिरसनशीलः पायात् रक्षतु । नृसिंहं विशिनष्टि । यस्य नृसिंहस्य महान्तमट्टहासं विमुञ्चतः सतः दिशो विनेदुः प्रतिदध्वनुः गर्भाश्च न्यपतन् सस्रंसिरे ॥ १४ ॥

असौ प्रसिद्धो वराहमूर्त्तिः मार्गेऽभिमुखमागतदुष्कृद्धिरण्याक्षस्य हन्ता मामध्वनि रक्षतु । कथम्भूतः यज्ञकल्पः यज्ञैः कल्प्यत इति तथा यज्ञावयवकत्वेनोपास्यः स्वदंष्ट्रया करणेन उन्नीतोद्धृता धरा भूमिर्येन अद्रिकूटेषु पर्वतशिखरेषु रामो जामदग्न्योऽद्रिकूटस्थदुष्कृतां हन्ता रक्षत्वित्यनुषङ्गः । विप्रवासे परदेशगमनदशायां सलक्ष्मणो भरताग्रजो दाशरथी रामः देशान्तरस्थरावणादीनां हन्ताऽव्यात् ॥ १५ ॥

उग्रधर्मादभिचारादेरखिलात्प्रमादान्नारायणः अभिचारादिनिरसनक्षमनामधान्मूर्त्तिपुत्रः पातु हासाद्गर्वान्नरः गर्वप्रतिभटः मूर्त्तिपुत्रः पातु दत्तो दत्तात्रेयः योगविरोधिनिरसनक्षमो योगाद्योगविरोधिवर्गात्पातु । अथेति प्रार्थनानन्तरारम्भद्योतकम् योगनाथः योगेश्वरो गणानां सिद्धगणानामीशः कपिलः ज्ञानप्रदानेन कर्मबन्धनिरासकः कर्मबन्धात् दुरितकर्मबन्धात्पायाद्व्यात् । गणयन्तीति गणाः प्रकृतिमहदादितत्त्वानां याथात्म्यविवेचने गणयितारस्ते सांख्यास्तेषामीश इति वार्थः ॥ १६ ॥

कामदेवान्मिथुनात्सनत्कुमारोऽस्पृष्टकामः अवतु पथि देवहेलनात् देवानां हेलनं परिहासस्तस्माद्धयशीर्षः वेदापहरणादिना चतुर्मुखादिदेवहेलनं कुर्वतां मधुकैटभादीनां हन्ता मामवतु पुरुषस्य भगवतोऽर्चनमाराधनं तस्यान्तराद्विच्छेदाद्देवर्षिवर्यः नारदः अविच्छिन्नभगवदाराधनपरः पातु । अशेषान्निरयात्नरकात्कूर्मो हरिराश्रितार्तिहा अधस्तान्मग्नानामुद्धारकः ॥ १७ ॥

अपथ्याद्धन्वन्तरिः भिषक्श्रेष्ठः पातु । द्वन्द्वाच्छीतोष्णादेः ऋषभः निर्जितः आत्मा मनो येन जितान्तर्बाह्येन्द्रियः शीतोष्णादिद्वन्द्वनावृतस्तत्सहिष्णुः पातु । लोकाज्जनापवादात् यज्ञः विष्णुः "यज्ञो वै विष्णुः" इति श्रुतेः । सर्वजनान्तरात्मा पातु । उत अपि तत्कृतान्तात् तेन जनेन कृतोऽन्तः उपघातस्तस्माद्बलो बलभद्रः दुर्जनकृतोपघातहा पातु । नः कृतान्तादिति पाठे तु कृतान्तान्मृत्योर्बलभद्रो मृत्युहा नः पात्वित्यर्थः । क्रोधवशात् सर्पाणां गणादहीन्द्रः शेषः पातु ॥ १८ ॥

अप्रबोधादज्ञानाद्भगवान् द्वैपायनो ज्ञानदः पातु । अत्र नरदत्तसनत्कुमारदेवर्षिवलाहीन्द्रद्वैपायना अंशावताराः जामदग्न्यकपिलधन्वन्तर्यृषभास्त्वावेशावतराः इतरे पूर्णाः । जीवविशेषे आविर्भाव आवेशः केश्चिद्गुणैः साक्षादाविर्भावोंऽशः प्रमादान्मोहजनकात्पाखण्डानां गणाद्बुद्धः जगन्मोहपाखण्डगणहा कालमलभूतात् कलेः कल्किः कालमलकलिहा प्रपातु । काल्किं विशिनष्टि । धर्मावनाय धर्मरक्षणाय उरुर्महान् कृतः अवतारो येन सः ॥ १९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

अथ प्रातरादिकालेषु दिनस्य षट्सु भागेषु केशवादिमूर्त्तिभ्यो रक्षां प्रार्थयते। मामिति। केशवः गदया युक्त इति शेषः। प्रातर्मागव्यात् आत्तः धृतः वेणुर्येन स गोविन्दः आसङ्गवं सङ्गव कालमभिव्याय सङ्गव उदयानन्तरकालः उदात्ता उद्धृता शक्तिरायुधविशेषो येन सः श्रीमन्नारायणः प्राह्णे पूर्वाह्णे अरीन्द्रश्चक्रराजः स पाणौ यस्य सः विष्णुः मध्यन्दिने मध्याह्ने पातु रक्षतु ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

हरिर्विदध्यादित्यादिना नारायणाख्यं कवचमुच्यते अणिमाद्यष्टगुणो वा व्याप्तगुणो वा अशूङ्व्याप्ताविति धातुः शुभलक्षणं गुणमेव भुङ्क्ते नत्वशुभलक्षणं दुःखमिति वाष्टगुणः अश्भोजन इति धातुः "शुभं पिबत्यसौ नित्यं नाशुभं स हरिः पिबेत्"इत्यादेः ॥ १२ ॥

"यादांसि जलजन्तवः" इत्यतो वरुणपाशस्य यादोगणान्तर्भूतत्वेऽपि तद्ग्रहणस्य मरणाविनाभूतत्वेन तत्परिहारार्थं पृथग्ग्रहणं मध्नाति हिंसतीति मदसुरस्तं स्यति नाशयतीति मत्स्यः "मथि" हिंसायां शिरो ममन्थ तरसेतिप्रयोगाच्च इतरस्तु मथित्वा विलोड्य सरतीति मत्स्यः "मन्थविलोडने" इति धातुः सुगताविति अस्मात् ड्यप्रत्ययः। माययेच्छया गृहीतबटुवामननाममूर्तिर्विश्वरूपः स्थूलरूपः ॥ १३ ॥

अटवी च आजिश्च मुखश्चादिर्येषां तानि तथा तेषु गर्भो असुरस्त्रीणामिति शेषः ॥ १४ ॥

अध्वनि मा मां स्वदेहेन यज्ञं कल्पयतीति यज्ञकल्पः यज्ञो विष्णुस्तत्समः स एवेत्यतो वा रामः परशुरामः विविधप्रवासे भरताग्रजः दाशरथी रामः ॥ १५ ॥

छन्दःसाम्यद्योतनाय उग्रधन्वा अखिलप्रमादादिस्युक्तम्। नरनामा विष्णुः हासादुन्मादकृतहासात् अयोगान्नारायणस्मरणानुपायवैकल्यात् ॥ १६ ॥

सनत्कुमारो ब्रह्मचारिवपुः ब्रह्मपुत्रसनत्कुमाराविष्टः।

सनत्कुमारनामा तु ब्रह्मचर्यवपुर्हरिः।
सनत्कुमारमपरं ब्रह्मपुत्रं विवेश यः।
स मां योग्येतरात्कामात्पातु विश्वेश्वरः प्रभुः।

इतिवाक्यमत्रमानं कामानयोग्यान् मद्यादिविषयान् देवयति गमयति आत्मनीति देवः तस्माद्देवर्षिवर्यः मद्विदासः पुरुषान्तरार्चनात् विष्णोः परिवारत्वमन्तरेण प्राधान्येनान्यदेवतार्चनाद्दोषात्।

मद्विदासस्तु देवर्षिः पातु मां विष्णुरव्ययः।
तदनर्पितकर्मभ्यस्तदस्मरणतस्तथा इति।

अनेन हर्यनर्पितार्चनालक्षणकर्मणः तथा तस्यास्मरणपूर्वकानर्चनाच्च "मद्विदासस्तु देवर्षिः पातु मां विष्णुरव्ययः। तदनर्पितकर्मभ्यस्तदस्मरणतस्तथेतिवाक्यद्योतनाय मद्विदासेति प्रसिद्धनाम मुक्त्वा देवर्षिवर्यं इत्यवादि अनेन वैष्णवानामेवाधिकारो नान्येषां तेषामेव विशेषस्मरणाज्ञानपूर्तेरिति सूचितम्। केचित्पुरुषार्चनान्तरादित्यनूद्यान्तरायवाचित्वमन्तरशब्दस्योचुस्तच्चिन्त्यम् "अन्तरः परिधानीये बाह्ये स्वीयेऽन्तरात्मनि"इत्यादौ एवं प्रयोगात् ॥ १७ ॥

शरीररोगजनकादपथ्यद्रव्यान्निर्जितात्मा वशीकृतेन्द्रियग्रामः तत्कृताद्यज्ञकर्मापादितादनित्यफलात्स्वर्गादेर्यज्ञनामा यागप्रवर्तको विष्णुः। बलः बलभद्रः स एवाहीन्द्रशेषनामा "शेषदेवः सहस्राक्षः सहस्राङ्घ्रिशिरोभुजः" इत्यादेः "बलं शक्तौ बलो रामे बलिष्ठे च बलस्तथा,,इत्यभिधानात् बलिष्ठोऽहीन्द्र इति वा ॥ १८ ॥

धर्मावनाय धर्मपरिपालनाय उरु प्रपातु भूयो भूयो रक्षत्वित्यर्थः ॥ १९ ॥

प्रातरारभ्य पञ्चभिः पञ्चभिर्घटिकाभिः अहोरात्रविभागं कृत्वा तेष्वेकैकां मूर्तिं सङ्कल्प्याह। मां केशव इति। गोष्ठेभ्यो निर्गत्य यदेकत्र गावः संयुज्यन्ते स काल आसङ्गवस्तस्मिन्काले ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

यक्षश्च लोकादित्यत्र बलदेवस्य शेषादन्यत्र कृतान्तादिस्वधिकशक्तित्वं दर्शितम्। जनान्तादिति पाठे जनानामन्ताच्छ्रादिति स एवार्थः ॥ १८ ॥ १९ ॥

मां केशव इति सार्द्धकम्। अनेन मथुरावृन्दावननाथयोर्नित्यप्रकाशत्वं दर्शितम्। प्रातरादयः काला एवं युज्यन्ते। प्राह्णस्तावत् प्रथमभागः प्रातःसङ्गवौ तु तस्यैवांशौ मध्याह्नो मध्यभागः। तृतीयभागस्त्वपराह्णः सायंसन्ध्याभ्यामवान्तरभेदभेदभिन्नः रात्रौ च प्रदोषः प्रथमभागः मध्यभागो निशीथः अर्द्धरात्रस्तु तत्रापि मध्यमघटिकाद्वयम्। अपररात्रस्तु तृतीयो भागः। तस्यैवान्तिमांशद्वयं प्रत्यूषप्रभातसंज्ञम्। यथा सन्ध्याश्च तदवान्तरभेदा अपि पृथगरायन्त इति। क्रमगणनायां तु मध्याह्नाद्यतिक्रमापत्तेः प्राह्णस्तु स्मृतौ न भिन्नत्वेन गण्यते। तथाहि "मुहूर्त्तत्रितयं प्रातस्तावानेव तु सङ्गवः। मध्याह्नस्त्रिमुहूर्त्तोऽथ अपराह्णोऽपि तादृशः। सायाह्नस्त्रिमुहूर्त्तः स्यात् सर्वकर्मसु गर्हित" इति ॥ २०—३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

ध्येयमीश्वररूपमात्मानं ध्यायेदित्यन्यैरधृष्यत्व कामनया अहंग्रहोपासना। विद्या तेजस्तपांसि मूर्त्तिर्यस्य तमिमं मन्त्रं नारायणकवचाख्यम् ॥ ११ ॥

समुद्रेण सह नदीनदादिवत् ध्येयरूपेण सहैक्यं प्राप्तोऽपि पृथग्भूयापि तिष्ठन् स्वरक्षाप्रार्थनमन्त्रमुच्चारयेदित्याह। हरिरिति। अष्टगुणः अणिमाद्यष्टैश्वर्ययुक्तः ॥ १२ ॥

सामान्येन सर्वतो रक्षां प्रार्थ्य देशविशेषेषु तत्तदधिष्ठातृस्वरूपेण भगवतो रक्षामन्त्रमाह। जलेष्विति त्रिभिः। यादसां गणा एव वरुणस्य पाशस्तस्मात् ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

आजिमुखं युद्धसम्मुखप्रदेशः॥ १४॥

यज्ञकल्पः यज्ञस्वरूपः स्वार्थिकः कल्पप्। यद्वा। यज्ञाः कल्पाः समर्था यतः सः। रामो जामदग्न्यः॥ १५॥

स्वपरोद्भवेभ्यः उपद्रवेभ्यः। रक्षामन्त्रानाह चतुर्भिः। उग्रधर्मोदभिचारादेः। हासात् गर्वात्। प्रयोगात् योगभ्रंशात्॥ १६॥

कामदेवात् कन्दर्पवेगात्। पथि यद्देवहेलनं नमस्कारमकृत्वैव गमनम्। पुरुषार्च्चनस्यान्तरात् देवपूजाच्छिद्रात् द्वात्रिंशदपराधरूपादित्यर्थः॥ १७॥

लोकाज्जनापवादात् जनान्तात् जनहेतुकोऽन्त उपघातस्तस्मात् कृतान्तादिति च पाठः। क्रोधवशात् सर्पाणां गणात् अहीन्द्रः शेषः॥ १८॥

कालमलरूपात्। कलेः कल्किः कीदृशः धर्मावनेत्यादि॥१९॥

कालविशेषेषु तत्तदधिष्ठातृस्वरूपेण भगवतो रक्षामन्त्रानाह। मामिति त्रिभिः। केशवो मथुराधिपतिः। प्रातर्दिनस्य पञ्चमघटिकापर्यन्तम्। गोविन्दो वृन्दावनाधिपतिः। आसङ्गवं षष्ठघटिकामारभ्य दशमघटिकापर्यन्तम्। एकादशघटिकामारभ्य पञ्चदशघटिकापर्यन्तः प्राह्णस्तत्र। षोडशघटिकामारभ्य विंशतिघटिकापर्यन्तं मध्यन्दिनं तत्र। अरीन्द्रपाणिः चक्रहस्तः एकविंशतिघटिकामारभ्य पञ्चविंशतिघटिकापर्यन्तमपराह्णस्तत्र। षड्विंशतिघटिकामारभ्य त्रिंशद्घटिकापर्यन्तं सायं तत्र। त्रयः सच्चिदानन्दा धामानि यस्य सः॥ २०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

आत्मानमंशभूतं परममंशिनं ध्यायेत्। अंशभूतोऽहमंशिपृथक्स्थितिप्रवृत्त्याद्यभावात्तदभिन्नोऽस्मीति चिन्तयेत्। परमं विशिनष्टि। ध्येयमुपास्यम्। षड्भिः।

> ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।
> ज्ञानवैराग्ययोश्चापि षण्णां भग इतीङ्गना॥

इति स्मृतिप्रोक्तामियुक्तं विद्यादयो मूर्त्तयः शरीरवत् प्रिया यस्य सः इमं श्रीनारायणकवचरूपं मन्त्रमुदाहरेदावर्त्तयेदित्यर्थः॥११॥

अष्टौ अणिमादिरूपा गुणा यस्य सः। मम रक्षां विदध्यात् करोतु॥ १२॥

एवमात्मनः सामान्यतो रक्षां प्रार्थ्य जलस्थलादिषु तत् प्रार्थयते। जलेष्वित्यादित्रिभिः। मायया भक्तविषयिण्या कृपया बटुवामनः बालह्रस्वरूपः॥ १३॥

अटवीषु आजिमुखेषु युद्धाग्रभागेषु आदिना अग्न्याद्यावृतप्रदेशेषु॥ १४॥

यज्ञाः कल्पाः फलदाने समर्थाः यस्मात्सः। यज्ञैः साहचर्येणोपासनार्थं कल्प्यते निरूप्यते इति वा यज्ञकल्पः॥ १५॥

स्वपरहेतुकोपद्रवेभ्यो रक्षां प्रार्थयते। मामिति चतुर्भिः। उग्रधर्मादभिचारादिरूपात्। प्रमादात् अनवधानतः। हासात् गर्वात् अयोगात् योगविघ्नात्॥ १६—१९॥

प्रमादात् बुद्धिमोहात् यः पाखण्डगणः प्रवर्त्तते तस्मात्। कालमलात् कलेः॥ १९॥

कालभेदेषु रक्षां प्रार्थयते। मां केशव इति त्रिभिः। तत्र दिनस्य षड् भागाः प्रातरादिशब्दार्थाः। तत्र प्रातः केशवः अरीन्द्रपाणिः चक्रपाणिः॥ २०॥

भाषाटीका

छै ऐश्वर्य वाली शक्तियों से सहित विद्या तेज तप इनों की मूर्तिवाले ध्यान के योग्य भगवान् का ध्यान करै फिर इस मन्त्र का उच्चारण करै॥ ११॥

शङ्ख चक्र ढाल तरवार गदा बाण धनुष पाश इन आयुधों को धारण किये आठ भुजों के सहित अणिमादिक आठ ऐश्वर्यों के सहित भगवान् गरुडजी के पीठ पर चरण कमल को स्थापन किये हुये श्री हरि मेरी सब प्रकार से रक्षा करैं॥ १२॥

जलों के मध्य में जलचर जन्तुओं से वरुण के पाश से मत्स्यमूर्ति भगवान् मेरी रक्षा करैं स्थलों में माया से बटुवामन मेरी रक्षा करैं आकाश में विश्वरूप त्रिविक्रम रक्षा करैं॥ १३॥

जिनके अट्टहास के छोडने से सब दिशा शब्दाय मान होगई और असुर स्त्रियों के गर्भ गिर पडे वे प्रभु असुरों के यूथ के पति हिरण्यकशिपु के विदारण करने वाले नृसिंह भगवान् पर्वतादि दुर्गम स्थानों में तथा युद्धों में मेरी रक्षा करैं॥ १४॥

अपने डाढों पर पृथिवी को उठा लाने वाले यज्ञ मूर्ति भगवान् वाराहजी मार्ग में मेरी रक्षा करैं पर्वतों के शिखरों पर परशुरामजी रक्षा करैं परदेश में भरतजी के वडे भ्राता श्री रामचन्द्रजी लक्ष्मणजी के सहित हमारी रक्षा करैं॥१५॥

सम्पूर्ण मन्त्रादि द्वारा मारण करने से और सब प्रमादों से नारायण मेरी रक्षा करैं अभिमान के पाप से नर भगवान् रक्षा करैं योग के भ्रष्ट होने से योगनाथ दत्तात्रेयजी मेरी रक्षा करैं कर्म बन्ध से गुणों के ईश कपिल भगवान् रक्षा करैं॥ १६॥

काम के वेग से सनत्कुमार मेरी रक्षा करैं भगवन्मदिर के सामने नमस्कार नहीं करके रस्ता में चलेजाने के पाप से हयग्रीव भगवान् रक्षा करैं नारायण के पूजन में अपराधों से नारद भगवान् रक्षा करैं सम्पूर्ण नरकों से कूर्म भगवान् मेरी रक्षा करैं॥ १७॥

अपथ्य पदार्थों के भक्षण से धन्वन्तरि भगवान् मेरी रक्षा करैं शीतोष्णादि दुःखों से शरीर मन के जीतने वाले भगवान् ऋषभदेव जी रक्षा करैं लोकापवाद से यज्ञ भगवान् रक्षा करैं मनुष्यों के आघात से बलदेव भगवान् रक्षा करैं क्रोध वश सर्पादिकों के गण से शेष भगवान् रक्षा करैं॥१८॥

अज्ञान से व्यास भगवान् रक्षा करैं पाखण्ड बुद्धि से प्रमाद से बुद्ध भगवान् रक्षा करैं कालों मे मलिन कलिके दोष से कल्कि भगवान् रक्षा करैं जिनोंने कि धर्म की रक्षा करने के निमित्त बहुत अवतार धारण किये हैं॥ १९॥

देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामावतु माधवो माम् ।
दोषे हृषीकेश उतार्धरात्रे निशीथ एकोऽवतु पद्मनाभः ॥ २१ ॥
श्रीवत्सधामापररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः ।
दामोदरोऽव्यादनुसन्ध्यं प्रभाते विश्वेश्वरो भगवान् कालमूर्तिः ॥ २२ ॥
चक्रं युगान्तानलतिग्मनेमि भ्रमत् समन्ताद्भगवत्प्रयुक्तम् ।
दन्दग्धि दन्दग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः ॥ २३ ॥
गदेऽशनिस्पर्शनविस्फुलिङ्गे ! निष्पिण्ढि निष्पिण्ढ्यजितप्रियासि ।
कूष्माण्डवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन् ॥ २४ ॥
त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् ।
दरेन्द्र ! विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कम्पयन् ॥ २५ ॥
त्वं तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम छिन्धि छिन्धि ।
चक्षूंषि चर्मन् ! शतचन्द्र ! छादय द्विषामघोनां हर पापचक्षुषाम् ॥ २६ ॥
यन्नो भयं ग्रहेभ्योऽभूत् केतुभ्यो नृभ्य एव च ।
सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंऽहोभ्य एव वा ॥ २७ ॥
सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्त्तनात् ।
प्रयान्तु संक्षयं सद्यो ये नः श्रेयःप्रतीपकाः ॥ २८ ॥
गरुडो भगवान् स्तोत्रस्तोभश्छन्दोमयः प्रभुः ।
रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः ॥ २९ ॥
सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः ।
बुद्धीन्द्रियमनःप्राणान् पान्तु पार्षदभूषणाः ॥ ३० ॥

भाषा टीका ।

प्रातः काल में केशव भगवान् गदा से मेरी रक्षा करैं दूसरे आसंगव भाग मे वेणु धारण किये गोविन्द भगवान् मेरी रक्षा करैं तीसरे प्राह्ण काल में शक्ति को धारण किये नारायण मेरी रक्षा करैं दिन के मध्य भाग में चक्रधारी विष्णु भगवान् मेरी रक्षा करैं ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रिधामा ब्रह्मादित्रिमूर्तिः श्रीमाधवः । दोषे प्रदोषे । अर्धरात्रे अर्धरात्रिपर्यन्ते । काले निशीथे चैक एव पद्मनाभोऽवतु ॥ २१ ॥

अपररात्रे ईशः श्रीवत्सधामावतु । प्रत्यूष ईशः श्रीजनार्दनः । श्रीदामोदरः प्रभाते । श्रीविश्वेश्वरोऽनुसन्ध्यं प्रतिसन्ध्यम् ॥ २२ ॥

युगान्तानलवत्तिग्मा तीक्ष्णा नेमिर्यस्य तच्चक्रं भगवता प्रयुक्तं सदरिसैन्यं दन्दग्धि दन्दग्धि अतिशयेन दहति । तस्यायं स्वभाव एव न तु तस्मात्प्रार्थनीयमित्यर्थः । यद्वा । दन्दग्धीति लोटमध्यमपुरुषः । अत्र त्वमेवंभूतं चक्रमिति स्वरूपमुक्त्वा सम्बोध्य प्रार्थ्यतेऽतिशयेन दहेति । कक्षं शुष्कतृणम् ॥ २३ ॥

अशनिवत्स्पर्शो येषां ते विस्फुलिङ्गा यस्यास्तस्याः सम्बोधनं हे गदे । त्वमजितस्य प्रियासि । अहमच्युतस्य दासः । अतः कूष्माण्डादीन्निष्पिण्ढि निष्पिण्ढि सञ्चूर्णय सञ्चूर्णय । अरींश्च चूर्णय चूर्णय । सर्वत्र वीप्सातिशीघ्रत्वाय ॥ २४ ॥

हे दरेन्द्र पाञ्चजन्य ! त्वं यातुधानादीन्विद्रावय विप्रग्रहा ब्रह्मराक्षसा येऽन्ये च घोरदृष्टयस्तान् ॥ २५ ॥

तिग्मा धारा यस्य हे तिग्मधार असिवर खड्गश्रेष्ठ ! त्वं ममारिसैन्यं छिन्धि छिन्धि । शतं चन्द्राकाराणि मण्डलानि यस्मिन् हे शतचन्द्र चर्मन् ! अघोनामघवतां द्विषां चक्षूंषि छादय पापचक्षुषां क्रोधदृष्टीनां चक्षूंषि हर ॥ २६ ॥

यत् । येभ्यो भयम् । अंहोभ्यः पापेभ्यः ॥ २७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्रेयःप्रतीपकाः इष्टव्याघातकाः ॥ २८ ॥

स्तोत्राणि बृहद्रथन्तरादिसामानि तैः स्तोऽयते संस्तूयत इति स्तोत्रस्तोभः छन्दोमयो वेदमूर्तिः "सुपर्णोऽसि गरुत्मान्" इत्यादिश्रुतेः । एकपद्यपाठे स्तोभा गीतिपूरकाक्षराणि स्तोत्रस्तोमेति पाठे सोमाधारभूत ऋक् स्तोमः ॥ २९ ॥

नामानि च रूपाणि च यानानि च वाहनानि आयुधानि च नो बुद्ध्यादीन् पान्तु पार्षदभूषणाः पार्षदमुख्याश्च पान्तु ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उग्रं धनुर्यस्य स मधुहा मधुसूदनः स्वतेजसा दीप्यमानः अपराह्णे त्रीणि धामानि तेजांस्यभिव्यक्तिस्थानानि यस्य "सामर्ग्भिः साम्नां चैव त्रीणि तेजांसि न स्पृशेत्" इत्युक्तत्रीणि तेजांस्यत्र विवक्षितानि । यद्वा । योगिहृदयक्षीराब्धिरूपाणि त्रीणि धामानि स्थानानि यस्य सः । माधवः सायङ्काले मामवतु । दोषे प्रदोषे हृषीकेशः । अर्द्धरात्रपर्यन्तकाले निशीथे चैकः पद्मनाभोऽवतु ॥ २१ ॥

अपररात्रे श्रीवत्सचिन्हः ईर्लक्ष्मीर्लक्ष्मा ईशः श्रीधरः पातु प्रत्यूषे असिधरः खड्गधरो जनार्दनः पातु । अनुसन्ध्यं प्रतिसन्ध्यं दामोदरः पातु । प्रभाते भगवान् कालशरीरको विश्वनियन्ता पातु । अत्र केशवादिद्वादशमूर्त्तीनां मध्ये वामनत्रिविक्रमयोर्मायावटुवामनोऽव्यात् त्रिविक्रमः खेऽवत्विति रक्षकत्वेन प्रार्थितत्वात्तयोरत्रानुक्तिः । नारायणस्य सुदर्शनस्याऽऽयुधविशेषविशिष्टस्यात्र वक्ष्यमाणत्वे प्रार्थ्यत इति न पौनरुक्त्यम् । क्रमस्त्वविवक्षितः । प्रातःप्रत्यूषप्रभातशब्दा भूतभविष्यद्वर्त्तमानदिनावयवप्रातःकालपराः ॥ २२ ॥

अथ भगवतोऽस्त्राण्यरिष्टनिरासकत्वेन प्रार्थयते । चक्रमित्यादिना । युगान्तानलवत्तीक्ष्णा नेमिर्यस्य तच्चक्रं भगवता प्रयुक्तं सत् शत्रूणां सैन्यं दन्दग्धि अतिशयेन दहति । अरिसैन्यदाहकत्वं तस्य स्वभाव एवेति न तत् प्रार्थनीयमिति प्रथमपुरुषनिर्देशः । दहने दृष्टान्तः । वायुसखोऽग्निः कक्षं शुष्कं तृणं यथेति ॥ २३ ॥

अशनिवत् स्पर्शो येषां ते विस्फुलिङ्गा यस्यास्तस्याः सम्बोधनं हे गदे । त्वमजितस्य भगवतः प्रियासि च तस्य दासः ॥ अतः कूष्माण्डादीन् निष्पिण्ढि निष्पिण्ढि आभीक्ष्ण्ये द्विर्वचनमतिशीघ्रत्वद्योतनाय वीप्सायां वा । पुनःपुनर्नितरां पेषयेत्यर्थः । तथारीन् शत्रून् पुनः पुनश्चूर्णय ॥ २४ ॥

हे दरेन्द्र ! शङ्खराज ! पाञ्चजन्य ! त्वं कृष्णेन भगवता पूरितः भीमः भयङ्करः स्वनो ध्वनिर्यस्य तादृशः शत्रोर्हृदयानि कम्पयन् यातुधानादीन् ग्रहविशेषान् येऽन्ये च घोरदर्शनाः तान् विद्रावय पलायितान् कुरु ॥ २५ ॥

तिग्मा तीक्ष्णा धारा यस्य सचासावसिवरश्च तस्य सम्बोधनं त्वम् ईशेन भगवता प्रयुक्तः ममारिसैन्यं छिन्धि छिन्धि यानि चन्द्राश्चन्द्राकाराणि मण्डलानि यस्मिन् हे शतचन्द्र ! चर्मन् खेट ! अघवतां द्विषां चक्षूंषि छादय पापचक्षुषामुग्रदृष्टीनां चक्षूंषि हर ॥ २६ ॥

ग्रहादिभ्यो यद्भयं नोऽस्माकमभूत्तानि सर्वाणि भयानि भगवतो नामरूपाण्येवास्त्राणि तेषां कीर्त्तनात् । यद्वा । कीर्त्तनं स्मरणस्याप्युपलक्षणम् । भगवतो नाम्नां कीर्त्तनाद्रूपाणां दिव्यमूर्त्तीनामस्त्राणां च स्मरणात् । सद्यः नाशं सद्य एव यान्तु प्राप्नुवन्तु । तत्र केतवो धूमकेत्वादयः । नरश्चौरादयः सरीसृपाः सर्पणस्वभावाः दंष्ट्रिणः श्वापदादयः अघानि पापस्वभावानि भूतानि तथा येऽन्ये श्रेयस इष्टस्य प्रतीपकाः विघातकाः तेऽपि संक्षयं यान्तु ॥ २७ ॥ २८ ॥

स्तोत्राणि बृहद्रथन्तरसामादीनि तैः स्तोऽयते स्तोत्राश्रयत्वेन स्तूयत इति तथा । छन्दोमयः छन्दःप्रचुरः प्रभुः समर्थो भगवान् गरुडः स्तोभस्तोत्रच्छन्दोमय इति पाठे स्तोभानि गीतपूरकाक्षराणि तद्युक्तानि स्तोत्राणि छन्दांसि बृहदादीनि गीत्याधारभूतानि छन्दांसि तत्प्रचुरः तदवयवकत्वमाचुर्यमनुसन्धेय इत्यर्थः । अशेषकृच्छ्रेभ्यः अशेषापद्भ्यो रक्षतु स्वनामभिर्विश्वक्सेनो रक्षतु ॥ २९ ॥

तथा हरेर्नामानि रूपाणि च यानानि वाहनानि च तथा पार्षदप्रवरा भूषणानि च मम बुद्ध्यादीन् पान्तु ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दोषे रात्रिभोजनकाले रात्रिसामान्यविवक्षायां दोषशब्दोऽव्ययवाची स्त्रीलिङ्गो वा रात्रिविशेषकालविवक्षायां पुल्लिङ्गः । निशीथात्पूर्वयामोऽर्धरात्र उच्यते तस्मिन् काले निशीथे पञ्चदशघटिकातुलिके एकः पद्मनाभ एवावतु ॥ २१ ॥

प्रत्यूषे अरुणोदयप्रारम्भे अनुसन्ध्यं सन्ध्यानिकटे प्रभाते सूर्योदयासन्नसमये ॥ २२ ॥

युगान्तोऽग्निवत्तिग्मा तीक्ष्णा नेमिर्यस्य तत्तथा । स्वरूपमुक्त्वा सम्बोधयति । दन्दग्धीति । हे सुदर्शन ! अरिसैन्यमाशु दन्दग्धि अतिशयेन दह अनेन ।

सुदर्शन ! महाज्वाल ! कोटिसूर्यसमप्रभ !
अज्ञानान्धस्य मे नित्यं विष्णोर्मार्गं प्रदर्शय । इति

मन्त्रोऽप्यत्र उक्तः ॥ २३ ॥

"स्पृश उपतापे" इति धातोः स्पर्शनं तपनम् अशनिवन्निर्घातवत्स्पर्शनात्तापकरा विस्फुलिङ्गा अग्निकणा यस्याः सा तथा अशन्योर्वज्रयोः स्पर्शनेन सङ्घट्टनेन जाता ये विस्फुलिङ्गा यस्याः सा तथा इति वा सम्बन्धेन अशनिशब्देन मेघवन्हिर्लक्ष्यते तस्य स्पर्शनवत् सहा विस्फुलिङ्गा यस्याः सा इति वा तस्याः सम्बुद्धिः अशनिस्पर्शनविस्फुलिङ्गे हे गदे ! निष्पिण्ढि नितरां पिष्टं कुरु निष्पिण्ढीति पाठे "पिषि पेषणे" इत्यस्य रूपम् ॥ २४ ॥

दरेन्द्र शङ्खश्रेष्ठ ! यातुधानादिदृष्टिवत् (१) घोरा दृष्टिर्येषां ते तथा तान् अरीन् विद्रावयेत्यन्वयः अनेन ।

(१) अक्षराच्चुतादि ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पाञ्चजन्यनिजध्यानध्वस्तपातकसञ्चय !
पाहि मां पापिनं घोरं संसारार्णवपातिनम्

इत्ययं मन्त्रः सूचितः ॥ २५ ॥

मम छिन्धीति तुगागमो विकल्पेनेति वक्तव्यम् । द्विषां चक्षूंषि छादय नोऽस्माकमघं हरेत्यन्वयः । शतचन्द्रोति चर्मणो नाम ॥२६॥

केतुभ्य इत्यनेन उल्कापाता गृह्यन्ते केतोर्ग्रहेभ्य इत्यनेन गतार्थत्वात् अघेभ्यो व्यसनेभ्यः ॥ २७ ॥

श्रेयःप्रतीपकाः श्रेयोविरोधिनस्ते चासुराः ॥ २८ ॥

स्तोत्राणां स्तोमः समूहः स्तोत्रस्तोमः तल्लक्षणश्छन्दः सामवेदस्तन्मयस्तत्प्रधान इत्यर्थः । भगवान् पूज्यः विष्वक्सर्वत्र सेना यस्य स तथा । स्वस्य स्वामिनो नामभिः (१) । विष्वक्सेनश्च हरेर्निवेदितान्नः ॥ २९ ॥

यानं रथः पार्षदाश्च भूषणाश्च पार्षदभूषणाः भूषणानामपि ज्ञानाश्रयत्वज्ञापनाय पुल्लिङ्गप्रयोगः "तत्कण्ठगं कौस्तुभंमास भाता"इत्यादेः ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

षोढा विभक्तां दिवसरक्षामुक्त्वा पञ्चधा विभक्तरात्रिरक्षामाह । दोषे रात्रेश्चतुर्थघटिकापर्यन्तं प्रदोषस्तत्र । पञ्च घटिकामारभ्य चतुर्द्दशघटिकापर्यन्तमर्द्धरात्रमन्तभागस्यार्द्धरात्रत्वात् तत्र । पञ्चदशषोडशघटिके निशीथस्तत्र ॥ २१ ॥

श्रीवत्सो धामनि शरीरे यस्य निशीथादूर्ध्वमरुणोदयात् प्राक् अपररात्रः । प्रत्यूषे रात्रिशेषघटिकाचतुष्टये । अनुसन्ध्यं दिनरात्रिसन्ध्ययोः ॥ २२ ॥

भगवदस्त्रैश्च रक्षामन्त्रानाह । चक्रमिति चतुर्भिः । युगान्तानलवत् तिग्मा तीक्ष्णा नेमिर्यस्य तत् । हे समन्तात् भ्रमत् ! भ्रमणशील ! त्वं चक्रं भगवत्प्रयुक्तं सत् अरिसैन्यं दन्दग्धि अतिशयेन दह । कक्षं शुष्कतृणम् ॥ २३ ॥

अशनिवत् स्पर्शनं येषां ते विस्फुलिङ्गाः यतः । हे गदे ! निष्पिण्ढि निष्पिण्ढि चूर्णय चूर्णय ॥ २४ ॥

दरेन्द्र ! हे पाञ्चजन्य ! ॥ २५ ॥

हे तिग्मधार ! हे असिवर ! हे खड्गश्रेष्ठ ! हे शतचन्द्र ! शतचन्द्राकारयुक्त ! चक्षूंषि हर आच्छादय च ॥ २६ ॥ २७ ॥

श्रेयसः प्रतीपकाः प्रतिकूलाः ॥ २८ ॥

स्तोत्राणि बृहद्रथन्तराणि सामानि तैः स्तोभ्यते संस्तूयत इति स्तोत्रस्तोमः । देकपद्यपाठे स्तोमा गीतिपूरकाक्षराणि स्तोत्रस्तोभेति पाठे सामाधारभूतऋक्समुदायः स्तोमः ॥ २९ ॥

पार्षदभूषणाः पार्षदमुख्याः ॥ ३० ॥

---

(२) अयं विष्वक्सेनः पार्षदः ।

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्रीणि ऊर्द्ध्वाधो मध्यलोकाख्यानि धामानि यस्य सर्वलोकस्य इत्यर्द्धरात्रेश्च षड् भागाः दोषादिशब्दवाच्याः तत्र दोषे प्रदोषे हृषीकेशः निशीथे अर्द्धरात्रे चेति विभागद्वयेऽपि एकः पद्मनाभः ॥ २१ ॥

दामोदरः प्रभाते उत कालानामनुसन्ध्यं प्रतिसन्ध्यं च विश्वेश्वरः ॥ २२ ॥

एवं भगवन्तं रक्षार्थं प्रार्थ्य तदायुधानि रक्षार्थं प्रार्थयते । चक्रमिति चतुर्भिः । युगान्तानलवत्तिग्मा नेमिर्धारा यस्य तदीदृक् चक्रं त्वं भगवत्प्रयुक्तं समन्तात् भ्रमत् सत् अरिसैन्यमस्मच्छत्रुसमूहं दन्दग्धि द्विरुक्तिः शीघ्रत्वाय शीघ्रं दहेत्यर्थः । कक्षं शुष्कतृणम् ॥ २३ ॥

अशनिर्वज्रं तद्वत् स्पर्शो येषां ते विस्फुलिङ्गा यस्यास्तस्या सम्बुद्धौ हे अशनिविस्फुलिङ्गे ! हे गदे ! त्वमजितप्रियासि । अतोऽजितभजने विघ्नकरान् कूष्माण्डादीन् निष्पिण्ढि शीघ्रं पेषयेत्यर्थः ! ममारीश्चूर्णय चूर्णय ॥ २४ ॥

हे दरेन्द्र ! शङ्खराज ! विग्रग्रहा ब्रह्मराक्षसाः ॥ २५ ॥

हे तिग्मधार ! तीक्ष्णधार ! हे असिवर ! खड्गराज ! त्वमीशप्रयुक्तो ममारिसैन्यं छिन्धि छिन्धि शतचन्द्राकाराणि मण्डलानि यस्मिन् हे शतचन्द्र ! हे चर्मन् ! खेट अघोनामघवतां मम द्विषां चक्षूंषि छादय तत्र पापचक्षुषामतिक्रूरदृष्टीनां तु चक्षूंषि हर उत्पाटयेत्यर्थः ॥ २६ ॥

अंहोभ्यः पापेभ्यः ॥ २७ ॥

श्रेयसां पुरुषार्थानां प्रतीपकाः घातकाः ॥ २८ ॥

स्तोत्रैर्बृहद्रथन्तरादिसामभिः स्तोभ्यते इति स्तोत्रस्तोभः छन्दोमयो वेदप्रचुरः । प्रभुः समर्थो भगवान् गरुडः विष्वक्सेनो हरिश्च स्वनामभिः अशेषकृच्छ्रेभ्यो रक्षतु ॥ २९ ॥

हरेर्नामादीनि पार्षदभूषणाः पार्षदश्रेष्ठाश्च सर्वोपद्रवः नोऽस्माकं बुद्ध्यादीन् पान्तु ॥ ३० ॥

उग्रधनुषवाले मधुसूदन देव अपराह्न कालमें मेरी रक्षा करें सायं काल मे ब्रह्मादि तीनों मूर्ति वाले माधव मेरी रक्षा करें प्रदोषकाल में हृषीकेश रक्षा करें अर्धरात्र मे और निशीथ काल मे पद्म नाभ भगवान् रक्षा करें ॥ २१ ॥

पीछली रात में श्रीवत्स चिन्हवाले भगवान् मेरी रक्षा करें प्रत्यूष कालमे खड्गधारी जनार्दन भगवान् रक्षा करें प्रभात समय में दामोदर भगवान् रक्षा करें प्रातः सायं की सन्धियो में विश्वंभर भगवान् कालमूर्ति रक्षा करें ॥ २२ ॥

प्रलय काल के अग्नि सरीके तीक्ष्ण किनारों वाले भगवान् के प्रयोग करने से चारों तरफ घूमते हुये श्रीसुदर्शन चक्र बड़ी शीघ्रता से जैसे वायुके साथमें अग्नि सूखे तृण को जलावे तैसे शत्रुओं के सैन्यको दहन करो ॥ २३ ॥

हे गदे वज्रके स्पर्शसरी के अग्निकणा वाली आप हो अजित भगवान् की बड़ी प्रिया हो सो कूष्माण्ड विनायक

यथा हि भगवानेव वस्तुतः सदसच्च यत्।
सत्येनानेन नः सर्वे यान्तु नाशमुपद्रवाः ॥ ३१ ॥
यथैकात्म्यानुभावानां विकल्परहितः स्वयम्।
भूषणायुधलिङ्गाख्या धत्ते शक्तीः स्वमायया ॥ ३२ ॥
तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः।
पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ ३३ ॥
विदिक्षु दिक्षूर्ध्वमधः समन्तादन्तर्बहिर्भगवान्नारसिंहः।
प्रहापयँल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः ॥ ३४ ॥
मघवन्निदमाख्यातं वर्म नारायणात्मकम्।
विजेष्यस्यञ्जसा येन दंशितोऽसुरयूथपान् ॥ ३५ ॥
एतद्धारयमाणस्तु यं यं पश्यति चक्षुषा।
पदा वा संस्पृशेत् सद्यः साध्वसात् स विमुच्यते ॥ ३६ ॥
न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत्।
राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित् ॥ ३७ ॥
इमां विद्यां पुरा कश्चित् कौशिको धारयन् द्विजः।
योगधारणया स्वाङ्गं जहौ स मरुधन्वनि ॥ ३८ ॥

भाषा टीका।

यक्ष राक्षस भूत ग्रहों को औ शत्रुओं को पीसो औ चूर्ण करो ॥ २४ ॥

हे पाञ्चजन्य शङ्ख! आप कृष्ण भगवान् के मुख के वायु से पूर्ण होकर बडे भयंकर शब्द से शत्रुओं के हृदय को कंपाते हुये यातुधान प्रमथ प्रेत मातृ पिशाच विप्रग्रह घोरदृष्टि वालों को दूर भगाओ ॥ २५ ॥

हे असिवर! खड्गश्रेष्ठ आप तीक्ष्णधारा वाले हो सो भगवान् के प्रयोग करने से मेरे शत्रुओं के सैन्य को वारम्वार छेदन करो हे चर्मन्! ढाल! आप शतचन्द्र के तुल्य हो सो शत्रुओं के नेत्रों को ढांक देवो पाप दृष्टि वाले के शत्रुओं के नेत्रों को हरण करो ॥ २६ ॥

जो हम को ग्रहों से भय होवै जो भय उल्कापात से होवै जो भय दुष्ट मनुष्योंसे होवै जो सर्पादिकों से होवै जो भय दांत वाले व्याघ्रादिकों से होवै जो भय पापों से होवै ॥ २७ ॥

ए सब भय भयकारक जितने हमारे घातक हैं सो सब भगवान् के नाम रूप अस्त्र के कीर्तन करने से जल्दी नष्ट हो जावैं ॥ २८ ॥

बृहद्रथंतरादिक स्तोत्रों से स्तुति करने योग्य साक्षात् वेदमय प्रभु गरुड भगवान् हमको संपूर्ण कष्टों से रक्षित करैं और विश्वकसेन भगवान् भी अपने नामों के ग्रहण करने से हमारी रक्षा करैं ॥ २९ ॥

श्रीहरि के नाम रूप वाहन आयुध तथा भगवान के श्रेष्ठ पार्षद हम लोगों के बुद्धि इंद्रिय मन प्राणों की रक्षा करैं ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

सच्च असच्च मूर्तामूर्तं यत्तत्सर्वं जगत् ॥ ३१ ॥

ऐकात्म्यस्यानुभावोऽनुध्यानं येषां तेषाम्। विकल्पो भेदस्तद्रहितोऽपि ॥ ३२ ॥

सत्यमानेन सत्यभूतेन प्रमाणेन ॥ ३३ ॥

पुनरपि श्रीनृसिंह एव प्रार्थ्यते। विदिक्ष्विति। पात्वित्यनुषङ्गः षष्ठा। नारसिंहः प्रहारः स्वनेन श्रीनृसिंहनामगर्जनेन स्वतेजसा स्वप्रभावेण ग्रस्तानि समस्तानि दिग्गजविषशस्त्रजलवाय्वग्न्यादीनां तेजांसि प्रभावाः येन सः ॥ ३४ ॥

दंशितः कवचितः ॥ ३५ ॥

सोऽपि साध्वसाद्भयाद्विमुच्यते ॥ ३६ ॥

तस्य तु भयं न भवेदेव ॥ ३७ ॥

एतद्विद्याप्रभावमितिहासेनाह। इमामिति सार्धैस्त्रिभिः

श्रीधरस्वामिकृतभावार्थदीपिका ।

मरुधन्वनि निरुदके देशे । अनेन विद्यायाः क्षेत्रतीर्थानपेक्षत्वं दर्शितम् ॥ ३८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं भगवन्नामरूपास्त्रभूषणपार्षदादीनिष्टप्रापकत्वेनानिष्टनिवर्त्तकत्वेन च सम्प्रार्थ्य तन्नामरूपादिवत्सन्निभूत्यादिवच्च तद्विषयकप्रार्थनायाः सत्यत्वं प्रतिजानीते । यथेति त्रिभिः । यथा च यत् सदसच्चिदाचिदात्मकं जगद्वस्तुतो भगवानेव भगवदात्मकमेवात्र न तु विप्रतिपत्तिः "यस्य पृथिवी शरीरं यस्यात्मा शरीरं तदनुप्रविश्य सच्च त्यच्चाभवत्" इति श्रुतेरितिभावः । तथानेन सत्येन सत्यभूतेनाबाधितेन दृष्टान्तेन तद्विषयकप्रार्थनया नोऽस्माकमुपद्रवाः तस्य जगदात्मकत्ववत्तद्विषयप्रार्थनापि न मिथ्या भवितुमर्हतीति भावः ॥ ३१ ॥

यथा च भगवानैकात्म्यानुभावेन कृत्स्नचिदचिदात्मकजगदेकान्तरात्मत्वकृतभावेन विकल्परहितः । प्राकृतदेवमनुष्यादिनामरूपात्मकभेदरहितः स्वमायया स्वसङ्कल्पज्ञानेन स्वयमात्मनैव स्वेच्छया न तु जीववत्कर्मणेत्यर्थः । भूषणादीन् धत्ते बिभर्त्ति अत्र लिङ्गानि दिव्यविग्रहा आख्याः रामकृष्णादीनि नामानि यथा भूषणादीनि सत्यान्येव बिभर्ति तथा त्वद्विषयामपि प्रार्थनां सत्यां कृत्वा तेनैव सत्यमानेन सत्यभूतेन मीयते प्रमीयतेऽनेनेति मानं दृष्टान्तस्तेन सर्वस्वरूपेणास्त्रपार्षदादिस्वरूपेण सर्वदा सर्वकालेषु सर्वत्र सर्वेषु देशेषु सदा सर्वावस्थासु च पातु ॥३२।३३॥

एवं प्रार्थनायाः सत्यतां प्रतिज्ञाय पुनः सिंहावलोकनन्यायेन श्रीनृसिंहं त्रातारं प्रार्थयते । विदिक्ष्विति । विदिक्ष्वाग्नेय्यादिषु दिक्षु ऐन्द्र्यादिषु ऊर्ध्वायामधश्च दिशि शरीरस्यान्तर्बहिश्च भगवान्नारसिंहः पात्वित्यनुषङ्गः । तं विशिनष्टि । स्वनेन महाट्टहासेन ध्वनिना लोकस्य स्वभक्तलोकस्य भयं प्रहापयन्नपनुदन् स्वतेजसा ग्रस्तान्याच्छादितानि समस्तानि तेजांसि सूर्यादितेजांसि येन सः "न तत्र सूर्यो भाति न चन्द्रतारकम्" इति श्रुत्यर्थोऽनेनाभिप्रेतः ॥ ३४ ॥

एवमिन्द्रायेदं नारायणवर्मोपदिश्यैतन्मन्त्रप्रभावेण शत्रून् विजेष्यसीति वदन्नन्यमपि तत्प्रभावमाह विश्वरूप इत्याह । मघवन्निति । हे मघवन् ! इदं नारायणात्मकं वर्म तुभ्यमाख्यातं मयेति शेषः । कथम्भूतं येन नारायणवर्मणा दंशितः कवचितः अञ्जसा सुखेनैवासुरयूथपान् शत्रून्विजेष्यसि ॥ ३५ ॥

एतदिमं धारयमाणः अनुसन्दधत्पुमान् यं यं भीतं पुरुषं चक्षुषा पश्यति पदा वा संस्पृशेत्स भीतः साध्वसाद्भयाद्विमुच्यते॥ ३६ ॥

विद्यां नारायणवर्मरूपमन्त्रविद्यां धारयतः पुंसः कुतश्चिदपि कर्हिचिदपि राजादिभ्यो व्याघ्रादिभ्यश्च भयं न विद्यते निर्भयो जायत इत्यर्थः ॥ ३७ ॥

एतद्विद्याप्रभावसूचकं कञ्चिदितिहासमाह । इमामिति सार्द्धैस्त्रिभिः । पूर्वस्मिन् काले कश्चित्कौशिकगोत्रजो द्विजः इमां विद्यामधारयत् स च योगधारणया "स्वपार्ष्णिनापीड्य गुदम्" इत्यादिना द्वितीयस्कन्धोक्तया स्वशरीरं मरुधन्वनि निरुदके देशे जहौ तत्याज ॥ ३८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"सर्वं खल्विदं ब्रह्म"इति श्रुतेः । भगवानेव यत्सदसद्वस्तु वस्तुतस्तन्नियामकतया तद्रूप उच्यत इति यथा सत्यम् "तत्सृष्ट्वा तदेवानुप्राविशत्तदनुप्रविश्य सच्च त्यच्चाभवत्"इति श्रुतिविहितत्वादव्यभिचरितेन सत्येन "द्रव्यं कर्म च कालश्च स्वभावो जीव एव च" इत्यादि वाक्यं चशब्दगृहीतम् । एवशब्देन "सत्येनानेन मां देवः पातु विष्णुश्चतुर्भुजः" इति स्मारयति ॥ ३१ ॥

भूषणादीनामचेतनत्वेन चेतनवत्प्रार्थितदातृत्वं कथमित्याशङ्क्य तेषु हरेस्तत्तत्कार्यक्षमशक्तिस्वरूपेणावस्थानं यथा सत्यं तेन सत्येन हरिः पात्वित्याह । यथेति । ऐकात्म्यानुभावेन तत्तद्वस्तुस्थितरूपाणामेकात्मत्वापरोक्षज्ञानेन विकल्परहितः स्वगतभेदवर्जितोऽपि स्वमायया स्वरूपसामर्थ्येन स्वयमेव भूषणादिसंज्ञाः (१) स्वाधीनत्वाच्छक्तिशब्दवाच्या धत्ते इति यथा यत्सत्यं तेन सत्येन अनेन सत्याख्यप्रमाणेन यथार्थेन सर्वज्ञत्वमपि सत्यत्वे प्रमाणमिति द्योतनाय विशेषणीकृतम् ॥ ३२ ॥

न केवलमायुधादिष्वेव सन्निहितत्वं किन्तु सर्वत्रापीति भावेनाह । सर्वैरिति ।

> एक एव परो विष्णुर्भूषाहेतिध्वजेष्वजः ।
> तत्तच्छक्तिस्वरूपेण स्वयमेव व्यवस्थितः ॥
> सत्येनानेन मां देवः पातु सर्वेश्वरो हरिः इति ॥

अतो भूषणादिषु विशेषतः सन्निहितत्वादुच्यत इति ज्ञातव्यम् ॥ ३३ ॥

मूलरूपस्य सर्वगतत्वं नावतारस्येति शङ्कां परिहरन् सर्वगतत्वं यथा सत्यं तेन सत्येन तथा नारसिंहः पात्विति तात्पर्याद्विशिष्याह । विदिक्ष्विति । प्रहापयन्निति स्वार्थे णिच् परिहरन्नित्यर्थः । स्वतेजसा ग्रस्तानि अभिभूतानि समस्तानि तेजांसि सूर्यादीनि येन स तथा ॥ ३४ ॥

मघवन् ! धनवन् ! दंशितः कवचितः ॥ ३५ ॥

साध्वसाद्भयात् ॥ ३६ ॥ ३७ ॥

कौशिकः । कुशिकगोत्रे विद्यमानः । योगधारणया योगाभ्यासेन । मरुधन्वनि निर्जलप्रदेशे ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथा येन प्रकारेण ॥ ३१ ॥

यथेति युग्मकम् । ऐकात्म्यानुभावानां केवलपरब्रह्मस्वरूपदृष्टिपराणां विकल्परहितः परमानन्दैकरसपरमस्वरूपतया स्फुरन्नपि यथा येन प्रकारेण स्वेषु स्वस्वामितया भजत्सु माया कृपा तया हेतुना स्वयं विचित्रशक्तिमयेन स्वस्वरूपेणैव

---

(१) भूषणास्थितास्तच्छब्दवाच्याः ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कारणभूतेन भूषणाद्याख्याः शक्तीः शक्तिमयाविर्भावान् भक्तो गोचरयति । तेनैव विद्वदनुभवलक्षणेन सत्यप्रमाणेन तद्यदि सत्यं स्यात्सदेत्यर्थः । तैरेव भूषणादिलक्षणैः सर्वैः स्वरूपैर्विचित्रस्वरूपाविर्भावैः पातु अत एव विष्णुधर्मे वलिकृतचक्रस्तुतौ "यस्य रूपमनिर्देश्यमपि योगिभिरुत्तमैः" इत्याद्यनन्तरञ्च । भ्रमतस्तस्य चक्रस्य नाभिमध्ये महीपते । त्रैलोक्यमखिलं दैत्यो ददृशवान् भूर्भुवादिकम्" इति तदेवमेव नवमे श्रीमदम्बरीषेणापि चक्रमिदं स्तुतमस्ति चिह्नानि गरुडाकारध्वजादीनि अनेन यत् क्वचिदाकस्मिकत्वमिव श्रूयते तदपि श्रीभगवदाविर्भावत्वज्ञेयम् । अत्र तृतीये "चैतस्य तत्त्वममलं मणिमस्य कण्ठे" इत्यपि सहायम् । अतो द्वादशेऽपि "कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यजः" इत्यादिकं विराड्तत्वेनोपासनार्थमभेददृष्ट्या दर्शितमेव यथासम्भवं साक्षाच्छ्रीविग्रहगतत्वेनाप्यनुसन्धेयम् । तथाहि श्रीविष्णुपुराणे "आत्मानमस्य जगतो निर्लेपमगुणामलम् ।
बिभर्ति कौस्तुभमणिस्वरूपं भगवान् हरिः" इति ॥ ३२——३६ ॥

तर्हि कथं विद्याधारिणः फलं नास्तीत्याशङ्क्याह । न कुतश्चिदिति ॥ ३७—४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यत् सदसद्रूपं जगत् तद्वस्तुतो भगवानेव तस्यैव बहिरङ्गमायाशक्तिकार्यत्वात् । सत्येन शपथेनानेन इति यद्येवंभूतो भगवान् सत्यः स्यात् तदास्माकमुपद्रवा नश्यन्तु । "यदि वेदाः प्रमाणम्" इतिवत् ॥ ३१ ॥

ऐकात्म्यं चिन्मयत्वादेकस्वरूपत्वमनुभावो लक्षणं यासां तासां भूषणादीनां शक्तीनां विकल्परहितः स्वस्य तासाञ्च चिद्रूपत्वात्तेभ्यो भेदरहितोऽपि भूषणायुधाख्याः शक्तीः यथा धत्ते तथा तेनैव सत्यमानेन नः सार्वितन्वयः । तत्र भूषणानि कौस्तुभादीनि आयुधानि चक्रादीनि चिह्नानि चतुर्भुजत्वादीनि आख्या नामानि यासां ताः शक्तीः स्वरूपशक्तिवृत्तीर्धत्ते । स्वमायया स्वरूपशक्त्या स्वरूपभूतया नित्यशक्त्या मायाख्यया युतः "अतो मायामयं विष्णुं प्रवदन्ति मनीषिणः" इति माध्वभाष्यप्रमाणितश्रुतेः । तेनैव सत्यमानेन सत्यरूपप्रमाणेन भूषणायुधादीनि चतुर्भुजत्वादीनि च स्वरूपशक्तिमयत्वात् स्वेनाभिन्नान्येव भगवान् धत्ते इति यदि सत्यं स्यात्तदा सर्वैः "हरिर्विदध्यात्" इत्यादिमन्त्रोक्तैः स्वरूपैः सर्वत्र देशे काले च सर्वगः सन् पातु । सर्वज्ञ इत्यस्मिन् मनोगतमास्तिक्यं भगवानेव जानातीति शपथो ज्ञापितः ॥ ३२ ॥ ३३ ॥

एवं नानास्वरूपैः स्वरक्षां समाप्यापि पुनरपि सर्वेषां प्रतिकूलानां भीषणेनैकेनैव नृसिंहस्वरूपेण स्वरक्षामन्त्रमेकमाह । विदिक्षिति । पात्वित्यनुषङ्गः । यद्वा । नारसिंहः नरसिंहभक्तः प्रह्लादः स्वनेन श्रीनृसिंहनामगर्जनेन स्वतेजसा ग्रस्तानि समस्तानां दिग्गजविषशस्त्रजलवाय्वग्न्यादीनां तेजांसि प्रभावा येन सः॥३४॥

दंशितः कवचितः ॥ ३५ ॥

सोऽपि साध्वसाद्विमुच्यते किमुत देहे तद्धारयमाणः ॥ ३६—३८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यत्ते सदसच्च स्थूलं सूक्ष्मं च जडमजडं तत्सर्वं भगवानेव सर्वचेतनाचेतनस्य तदंशत्वादिना तत्पृथक्स्थितिप्रवृत्त्याद्यभावात् ॥ ३१ ॥

ऐकात्म्यं स्वस्य भगवदंशत्वेन तदनतिरिक्तत्वं तस्यानुभावोऽनुचिन्तनं येषां विकल्पो भेदः पृथगवस्थानं तद्रहितः सत्य एव यथा स्वयं च सर्वात्मा सत्य एव यथा भूषणानि कौस्तुभादीनि आयुधानि सुदर्शनादीनि लिङ्गानि नृसिंहादीनि आख्या ब्रह्मनारायणादीनि नामानि शक्तीः प्रकृतिकालाद्याः सत्या एव धत्ते यथा ॥ ३२ ॥

तथा तेनैव सत्यभूतेन मानेन प्रमाणेन सर्वैः स्वरूपैः स्वकीयेषु दासेषु या माया कृपा तया नोऽस्मान् पातु ॥ ३३ ॥

एकैकस्वस्वरूपस्य नाममात्रं येन केनाप्युच्चारितं लोकस्य यस्य कस्यापि संसारभयं सदा सर्वत्र निराकरोतीति द्योतयितुं पुनरपि नृसिंहः प्रार्थ्यते । विदिक्ष्विति । विदिक्ष्वादिषु देशेषु समन्तात्कालयोगतः सर्वेषु कालेषु इत्यर्थः । अन्तः शुचिजन्मादौ बहिरशुचिजन्मादौ च लोकस्य वर्णाश्रमादिनिरपेक्षस्य भयं भयमात्रं सर्वभयगर्भं संसारभयं स्वनेन हरिः इत्येवमात्रेण विमस्त्यादिसम्बन्धवर्जितेनापि कुतश्चिन्निर्गतेनापि महापयन् विराजते इति शेषः ॥ ३४ ॥

वर्म कवचं येन कवचेन दंशितः कवचितः ॥ ३५ ॥

साध्वसाद्भयात् ॥ ३६ ॥ ३७ ॥

मरुधन्वनि निरुदके देशे ॥ ३८ ॥

भाषा टीका ।

यथार्थ से सत् असत् जो कुछ है सो भगवान् ही जैसे हैं तिसी सत्य से सब उपद्रव नाश को प्राप्त होवें ॥ ३१ ॥

जैसे सब जगत् को ब्रह्म भावना करने वालों को लौकिक पदार्थों के भेद से रहित होने परभी स्वयं भूषण मूर्ति आयुध नाम की शक्तियों को अपनी ज्ञान माया से धारण करते हैं ॥ ३२ ॥

तिसी सत्य प्रमाण से सर्वज्ञ भगवान् हरि सर्वगामी सदा सर्वत्र अपने सब स्वरूपों से हमारी रक्षा करैं ॥ ३३ ॥

विदिशाओं में दिशाओं में ऊपर नीचे चारों ओर बाहिर भीतर नारसिंह भगवान् अपने तेजसे सब के तेजों के ग्रसन करने वाले शब्द से लोक भय को नाश करने वाले हैं सो हमारी रक्षा करैं ॥ ३४ ॥

हे इन्द्र ! यह नारायण स्वरूप कवच मैंने तुम्हारे आगे

तस्योपरि विमानेन गन्धर्वपतिरेकदा ।
ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥ ३९ ॥
गगनान्न्यपतत् सद्यः सविमानो ह्यवाक्शिराः ।
स बालखिल्यवचनादस्थीन्यादाय विस्मितः ।
प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥ ४० ॥
श्रीशुक उवाच ।
य इदं शृणुयात् काले यो धारयति चादृतः ।
तं[1] नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ॥ ४१ ॥
एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः ।
त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां षष्ठस्कन्धे नारायणवर्म नामा-ऽष्टमोऽध्यायः ॥ ८ ॥

भाषा टीका ।

कहा है जिस को पढ़कर तुम असुर यूथपतियों को अनायास से जीतोगे ॥ ३५ ॥

इस कवच को धारण करके नेत्र से जिस जिस को देखे या जिस जिस को पाद से छूवे सो पुरुष शीघ्रही सब भयों से मुक्त होजाता है ॥ ३६ ॥

इस विद्यास्तोत्र को जो पुरुष धारण करे तिस से उस पुरुष को कहीं से भी राजा चोर ग्रहादि व्याघ्रादि इनों से कभी भी भय नहीं होता है ॥ ३७ ॥

पूर्व काल मे कोई कौशिक नामा ब्राह्मण इस विद्या को धारण करता था फिर योग धारणा से उसने निर्जल देश मे शरीर का त्याग किया ॥ ३८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यत्र द्विजस्य क्षयो देहत्यागस्तस्योपरि ॥ ३९ ॥

सद्यस्तत्क्षणादेव गगनान्न्यपतत् । पाठान्तरे अङ्गनाभिः सह । बालखिल्योपदेशात्तस्यास्थीनि प्रास्य प्रक्षिप्य विस्मितः सन् स्वं धाम गन्धर्वलोकं जगाम ॥ ४०—४१ ॥

अधिगतः प्राप्तः सन् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम् अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्य त्यक्तस्य देहस्योपरिष्टाच्चित्ररथाख्यः कश्चिद्गन्धर्वाणां पतिः स्त्रीभिः परिवृतः विमानेन कदाचिद्ययौ यत्र द्विजस्य क्षयो देहत्यागस्तत्र चित्ररथो विमानसहितो गगनादवाक्शिरा अधोमुखः सद्यो न्यपतत् । पुनरुत्थाय बालखिल्यस्य ऋषेः वचनात्कौशिकस्यास्थीन्यादाय शल्यानि गृहीत्वा प्राचीसरस्वत्यां नद्यां प्रास्य प्रक्षिप्य स्नात्वा विस्मितः अहो एतद्विद्याप्रभाव ईदृश इति विस्मितः । स्वं धाम स्थानमन्वगादिति ॥ ३९ ॥ ४० ॥

एवंविधानेकप्रभावशालिनो वर्मणः श्रवणधारणाभ्यां न कुतश्चिद्भयं भवतीष्टप्राप्तिश्च भवतीत्याह मुनिः । य इति द्वाभ्याम् । यः पुमानिदं वर्म काले भयागमनकाले शृणुयाद्यश्चादृतः कर्तरि क्तः आदरयुक्तः धारयति वा तं सर्वाणि भूतानि कूश्माण्डादीनि न पश्यन्ति सर्वतो भयान्मुच्यते ॥ ४१ ॥

शतक्रतुरिन्द्रो विश्वरूपादेतां विद्यामधिगतः प्राप्तः सन् मृधे युद्धेऽसुरान्दानवान् विजित्य निर्जित्य त्रैलोक्यलक्ष्मीं बुभुजे अनुबभूव ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् अष्टमोऽध्यायः ॥ ८

(१) न पश्यन्ति इति श्री वीर० ।

हतपुत्रस्ततस्त्वष्टा जुहावेन्द्राय शत्रवे ।
इन्द्रशत्रो ! विवर्धस्व मा चिरं जहि विद्विषम् ॥ ११ ॥
अथान्वाहार्यपचनादुत्थितो घोरदर्शनः ।
कृतान्त इव लोकानां युगान्तसमये यथा ॥ १२ ॥
विष्वग्विवर्धमानं तमिषुमात्रं दिने दिने ॥ १३ ॥
दग्धशैलप्रतीकाशं सन्ध्याभ्रानीकवर्चसम् ।
तप्ततामशिखाश्मश्रुं मध्याह्नार्कोग्रलोचनम् ॥ १४ ॥
देदीप्यमाने त्रिशिखे शूल आरोप्य रोदसी ।
नृत्यन्तमुन्नदन्तं च चालयन्तं पदा महीम् ॥ १५ ॥
दरीगम्भीरवक्त्रेण पिबता च नभस्तलम् ।
लिहता जिह्वयर्क्षाणि ग्रसता भुवनत्रयम् ॥ १६ ॥
महता रौद्रदंष्ट्रेण जृम्भमाणं मुहुर्मुहुः ।
वित्रस्ता दुद्रुवुर्लोका वीक्ष्य सर्वे दिशो दश ॥ १७ ॥
येनावृता इमे लोकास्तमसा त्वाष्ट्रमूर्त्तिना ।
स वै वृत्र इति प्रोक्तः पापः परमदारुणः ॥ १८ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले हे भारत परीक्षितजी ! उस विश्वरूप के तीन मस्तक थे एक सोमपीथ एक सुरापीथ एक अन्नाद ऐसा हमने सुना है ॥ १ ॥

हे नृप ! वह विश्वरूप यज्ञ करते समय में अपने पितर देवतों को ऊँचे स्वर से पुकार कर भाग निवेदन करता था और विनय करता था ॥ २ ॥

उसी ने माता के स्नेह के वश होकर देवतों के यजन करने के समय में भी छिपा कर धीरे से असुरों को भी भाग अर्पण करदिया ॥ ३ ॥

इन्द्र ने उस विश्वरूप के कपट सहित देवतों की अवज्ञा को जानकर असुरों के वढने से डर कर शीघ्र से क्रोध करके उस के मस्तकों को काटदिया ॥ ४ ॥

उस का जो सोमपीथ मस्तक है सो कपिञ्जल पक्षी होगया जो सुरापीथ सो कलविङ्क पक्षी होगया जो अन्नाद था सो तित्तिरि पक्षी होगया ॥ ५ ॥

यद्यपि इन्द्र सब समर्थ हैं तौभी ब्रह्महत्या का उन को अञ्जलि से ग्रहण करना पडा फिर एक वर्ष में शुद्धि होने के वास्ते उस पाप के चार भागकर के इन्द्र ने पृथिवी जल वृक्ष स्त्री इन को वांट दिया ॥ ६ ॥

जमीन के गढेलों के भरजाने के वर माग कर पृथिवी ने पाप का चौथा हिस्सा लेलिया सोई पृथिवी के ऊषर भूमि मे ब्रह्महत्या का चिन्ह दीखता हैं ॥ ७ ॥

कटे घाव के भरजाने के वर से वृक्षों ने चौथा भाग लिया उस ब्रह्महत्या का रूप वृक्षों मे गोंद रूप से दीखता है ॥ ८ ॥

निरन्तर काम भोग की इच्छा के वर मांग कर चतुर्थ भाग को स्त्रियों ने ग्रहण किया सो स्त्रियों मे महिना महिना मे रज रूप से ब्रह्महत्या दीखती है ॥ ९ ॥

पदार्थ को वढा देने के वरसे चौथे भाग को जलों ने ग्रहण किया सो जल में फेन वबूला रूप से ब्रह्महत्या दीखती है ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इन्द्रायेन्द्रं हन्तुम् । शत्रवे शत्रुत्पत्त्यै । तदाह । इन्द्रशत्रो विवर्धस्वेति । अत्र चेन्द्रशत्रुपदस्याद्युदात्तत्वात् "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इति स्मृतेर्बहुव्रीहिलक्षणापत्त्या इन्द्र एव तस्य शत्रुरभूत् । तदुक्तं श्रुत्या । "यदब्रवीत्स्वाहेन्द्रशत्रुर्वर्धस्व इति तस्मादस्येन्द्रः शत्रुरभवत्" इति । तथा च शिक्षायाम् ।
मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥
इति ॥ ११ ॥

अन्वाहार्यपचनाद्दक्षिणाग्नेः तं वीक्ष्य वित्रस्ता लोका दश

तं निजघ्नुरभिद्रुत्य सगणा विबुधर्षभाः ।
स्वैः स्वैर्दिव्यास्त्रशस्त्रौघैः सोऽग्रसत्तानि कृत्स्नशः ॥ १९ ॥
ततस्ते विस्मिताः सर्वे विषण्णा ग्रस्ततेजसः ।
प्रत्यञ्चमादिपुरुषमुपतस्थुः समाहिताः ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दिशो विदुद्रुवुरिति पञ्चमेनान्वयः ॥ १२ ॥

कथम्भूतम् । विष्वक्समन्तत इषुविक्षेपमात्रं प्रतिदिनं वर्धमानम् ॥ १३ ॥

दग्धशैलप्रतीकाशं कृष्णवर्णम् । सन्ध्याभ्रानीकवद्वर्चो दीप्तिर्यस्य तं तप्तताम्रवच्छिखाः श्मश्रूणि च यस्य । मध्याह्नार्कवदुग्रे लोचने यस्य ॥ १४ ॥

रोदसी आरोप्येवेत्यर्थः ॥ १५

दरीवद्गम्भीरेण वक्त्रेण मुहुर्मुहुर्जृम्भमाणमित्यन्वयः । कथम्भूतेन । नभस्तलं पिबता ऋक्षाणि जिह्वया लिहता भुवनत्रयं ग्रसता ॥ १६ ॥

महता विस्तीर्णेन रौद्रा दंष्ट्रा यस्मिन् ॥ १७ ॥

वृत्रनाम निर्वक्ति । येनावृता इति । त्वाष्ट्री मूर्तिर्यस्य तमसस्तेन तथा च श्रुतिः "स इमाँल्लोकानावृणोत्तद्वृत्रस्य वृत्रत्वम्" इति ॥ १८ ॥

अग्रसद्भक्षितवान् ॥ १९ ॥

ग्रस्तं तेजो येषां प्रत्यञ्चमन्तर्यामिणं त्रिभुवनस्य तेन व्याप्तत्वात्क्वापि गमनासम्भवात्तत्रैव स्थित्वा तुष्टुवुरित्यर्थः ।

महाभये परित्राणमन्यतो न भवेदिति ।
हरिमेव प्रपद्यन्ते सुराः शरणमातुराः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततस्त्वष्टा इन्द्रेण हतः पुत्रो यस्य तादृशः इन्द्राय शत्रवे जुहाव इन्द्रायात तादर्थ्ये चतुर्थी तदर्थश्चात्र तन्निवृत्तिरर्थशब्दस्य निवृत्तेरपि वाचकत्वात् । यथा मशकार्थो धूमः मशकेभ्यो धूम इति । इन्द्रविनाशार्थमजुहोदित्यर्थः । हुत्वैवं प्रार्थितवानित्याह । इन्द्र शत्रो इति । इन्द्रस्य शत्रो माचिरमाशु विवर्द्धस्व स्वविद्विषमिन्द्रं जहि विनाशयेति ॥ ११ ॥

अथ होमानन्तरमन्वाहार्यपचनाद्दक्षिणाग्नेर्घोरदर्शनोऽसुर उत्थितः उदितः तं विशिनष्टि । यः लोकानां युगान्तसमये प्रलये कृतान्तो मृत्युरिव स्थितः ॥ १२ ॥

तमसुरं दिने दिने प्रतिदिनमिषुमात्रम् इषुप्रमाणं विष्वक्सर्वतो विवर्द्धमानम् । दग्धः साङ्गारो यः शैलः पर्वतः तत्प्रतीकाशं तदुपमम् । सन्ध्याभ्राणामनीकस्य समूहस्येव वर्चो यस्य । तप्तताम्रवच्छिखाग्रभागो येषां तादृशानि श्मश्रूणि यस्य । मध्याह्ने योऽर्कः सूर्यः तद्वदुग्रे लोचने यस्य देदीप्यमानाहितस्त्रिशिखा यस्मिंस्तस्मिन् शूले रोदसी द्यावापृथिव्यौ तदन्तर्वर्तिपदार्थजातमित्यर्थः । आरोप्य नृत्यन्तम् उन्नदन्तमुच्चैर्ध्वनन्तम् । पद्भ्यां पादेन महीं चालयन्तं कम्पयन्तम् ॥ १३-१५ ॥

दरीवत्पर्वतद्रोणीवद्गम्भीरवक्त्रेण किम्भूतेन नभस्तलं पिबतेव स्थितेन किञ्च जिह्वया ऋक्षाणि नक्षत्राणि लिहता आस्वादनं कुर्वता भुवनत्रयं ग्रसता ॥ १६ ॥

रौद्रा भयङ्करा दंष्ट्राः यस्मिन्महता विपुलेनैवम्भूतेन वक्त्रेण मुहुर्मुहुर्जृम्भमाणं वीक्ष्य विशेषेण त्रस्ता भीताः सर्वे लोका दश दिशो दुद्रुवुः ॥ १७ ॥

त्वाष्ट्री मूर्त्तिर्यस्य तेन त्वाष्ट्रमूर्त्तिभूतेन तपसा । त्वष्टुस्तपसा येनेमे लोका आवृतास्तेन लोकावरणरूपप्रवृत्तिनिमित्तेन वृत्र इति प्रोक्तः । वृत्रशब्दवाच्यः सोऽभूदित्यर्थः । तथा च श्रुतिः "स इमाँल्लोकानावृणोत्तद्वृत्रस्य वृत्रत्वम्" इति वृत्रस्य वृत्रशब्दाभिधेयस्य वृत्रत्वं वृत्रशब्दप्रवृत्तिनिमित्तम् । तल्लोकावरणमेवेत्यर्थः । स च पापः धर्मप्रतिपक्षः । लोकपालविरोधित्वादिति भावः । परमदारुणः दुःसहः ॥ १८ ॥

तं वृत्रमभिद्रुत्याभिमुखमागत्य सगणाः ससैन्या विबुधर्षभा इन्द्रादयः स्वैः स्वैर्दिव्यानामस्त्राणां शस्त्राणां च ओघैः सङ्घैर्निजघ्नुः प्रजह्रुः । तानि दिव्यान्यस्त्रादीनि स वृत्रोऽग्रसीत् ॥ १९ ॥

ततस्ते देवा विस्मिताः अहो एतस्य दुर्जयत्वमिति विस्मिताः ग्रस्तं वृत्रेणापहृतं तेजो येषां ते । अत एव विषण्णाः खिन्नाः प्रत्यञ्चं प्रत्यगात्मशरीरकं प्रत्याग्दिग्गतं वा प्रतीच्यां दिश्याविर्भूदिति तत्रैवाविर्भावस्य वक्ष्यमाणत्वात् । आदिपुरुषं जगत्कारणभूतं परमात्मानं समाहितचित्ताः सन्तः उपतस्थुस्तुष्टुवुः । त्रिभुवनस्य तेन व्याप्यत्वादन्यत्र गमनाभावात्तत्रैव स्थित्वा स्वान्तरात्मानं तुष्टुवुरिति भावः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इन्द्रशत्रव इत्यादिना "त्वष्टा हतपुत्रोऽपीन्द्रं सोममाहरत्" इत्यादिवेदवाक्यं सूचयति । इन्द्रः शत्रुर्यस्य वृत्रस्य स इन्द्रशत्रुः इन्द्र एव तस्य सम्बुद्धिरिन्द्रशत्रो ! इति अनेन यजमानस्यानभिप्रेतार्थोऽपि सूच्यत इति ज्ञातव्यम् ॥ ११ ॥

अन्वाहार्यपचनाद्दक्षिणाग्नेः लोकानां क्षयाय ॥ १२-१३ ॥

सन्ध्याकालाभ्रमालावत्कपिशं वासो यस्य स तथा तं तप्तताम्रवच्छिखा श्मश्रूणि च यस्य स तथा तम् ॥ १४ ॥

तिस्रः शिखाः शिरांसि यस्य तत्तथा तस्मिन् ॥ १५ ॥

दरीगम्भीरवक्त्रेण गुहावद्गाधमुखेन ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

रौद्ररूपे दंष्ट्रे यस्य तत्तथा तेन मुखेन जृम्भयन्तं व्याददानम् ॥ १७ ॥

निरुक्तिपूर्वकं नाम निर्दिशति । येनेति । त्वाष्ट्रलक्षणा मूर्तिर्यस्य तत्तथा तेन तमसा आवृता इति येन ततः सोऽसुरो वृत्र इति ख्यातः "वृत्रं जघन्वाँ अपतद्ववार" इति श्रुतेः "दैत्यभेदे चान्धकारे वृत्रशब्दः प्रयुज्यते" इत्यभिधानाच्च । पातीति पः पालकः परमात्मा धर्मो वा तस्मादपगतः पापः एतदेव सूचयति । परमदारुणा इति ॥ १८ ॥ १९ ॥

श्रीनारायणानुग्रहमन्तरेण वृत्रजयो दुःसाधन इति कृत्वा देवानां हरिशरणप्रकारं वक्ति । तत इति । प्रत्यञ्चं प्रत्यगात्मानमादिपुरुषं सृष्टेरादौ भक्तानुग्रहाय गृहीतपुरुषरूपम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इन्द्रशत्रो ! विवर्द्धस्वेति शत्रुः हन्ता तत्र तत्पुरुषे वृत्रस्य हन्तृत्वम् । बहुव्रीहौ सतीन्द्रस्य हन्तृत्वमायाति तत्र च तत्पुरुषत्वं "समासस्य" इत्यनेन समासान्तस्वरस्यान्तोदात्तविधिना व्यज्यते । बहुव्रीहित्वं तु तद्बाधकेन "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इत्यनेन पूर्वपदे स्वभावसिद्धाद्युदात्तस्थापकेन व्यज्यते । इन्द्रशब्दो ह्याद्युदात्तः "इदि परमैश्वर्ये" इत्यस्योदात्तगणपठितत्वात् । तदेवं दैवादाद्युदात्तत्वपाठेन वैपरीत्यं जातमिति इन्द्र एव तस्य शत्रुरभूत ॥११-१४॥

तत्र शूल आरोप्यैवेति द्यावापृथिवीस्थलोकैस्तस्मिन् शूले स्वग्रथनानिष्पत्तिमननात् ॥ १५--१७ ॥

येनेति तैः । त्वाष्ट्रमूर्त्तिनेति मूर्त्तिः स्वरूपं त्वाष्ट्रसम्बन्धेनैव तस्य स्वरूपं मासत इत्यर्थः ॥ १८——२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सम्वत्सरान्ते तदवमिति पूर्वोक्तेराश्विनमासारम्भे इन्द्रो यदैव ब्रह्महत्यातो विमुक्तो बभूव तदैव तपोवनादागत्य स्वीयमाश्विनमासं पालयितुं प्रवृत्तः । त्वष्टा स्वपुत्रवधं श्रुत्वा क्रोधशोकाभ्यामिन्द्रवधोपायं चकारेत्याह । हतपुत्र इति । इन्द्राय शत्रवे इन्द्ररूपं शत्रुं हन्तुं तत्र मन्त्रमाह । इन्द्रशत्रो ! विवर्द्धस्वेति । इन्द्रस्य शत्रुः सन् विवर्द्धस्वेति तत्पुरुषसमासस्य विवक्षितत्वेऽपि इन्द्र एव शत्रुर्यस्येति बहुव्रीह्यर्थ एव दैवादापतितः स्वरव्यतिक्रमात् । तथा हि "इदि परमैश्वर्ये,, इत्यस्योदात्तगणपठितत्वादिन्द्रशब्दो ह्याद्युदात्तः । तत्र "समासस्य,, इति सूत्रेण समासमात्र एवान्तोदात्तत्वविधानात्तत्पुरुषे शेषम् "अनुदात्तम्" इत्यनेन इन्द्रशत्रो इत्यस्याद्यनुदात्तत्वम् "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इति तद्बाधकसूत्रेण पूर्वपदस्य स्वभावसिद्धस्वरस्थापनाद्बहुव्रीहाविन्द्रशत्रो इत्यस्याद्युदात्तत्वम् । त्वष्ट्रा तु दैवादाद्युदात्तस्वरतयैव पाठादिन्द्र एव तस्य शत्रुर्हन्ता अभूत् । तदुक्तं श्रुत्या "यदब्रवीत् स्वाहेन्द्रशत्रो ! विवर्द्धस्वेति तस्मादस्येन्द्रः शत्रुरभवत्" इति । तथा च शिक्षायाम् ।

मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्या प्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात्

इति ॥ ११ ॥

अथ तदनन्तरमेव स्वीयपाठव्यतिक्रमेऽवगते सति अन्वाहार्यपचनात् स्वभावप्राप्ताद्युदात्तव्यञ्जितबहुव्रीहिपठनानन्तरं आहार्यतांप्राप्ताद्यनुदात्तव्यञ्जित तत्पुरुषपाठाद्धेतोः स घोरदर्शन उत्थितः स्वाभाविकपाठादिन्द्रोऽस्य हन्ता भाविष्यति पश्चादाहार्यपाठादिन्द्रोऽप्यनेन हतो भविष्यति सवाहनस्यापि तस्यानेन निगिलिष्यमाणत्वादिति भावः । अन्वाहार्यशब्दस्य षाण्मासिकश्राद्धवाचित्वाद्व्याख्यान्तरं न घटते ॥ १२ ॥

तं वीक्ष्य वित्रस्ता लोका दश दिशो विदुद्रुवुरिति पञ्चमेनान्वयः । कीदृशं विष्वक्समन्ततः स्वस्य उर्द्ध्वाधो दशदिक्षु इषुविक्षेपमात्रं प्रतिदिनं वर्द्धमानम् । आरोप्य आरोप्येवेत्यर्थः । पिबता पिबतेव ॥ १३—१७ ॥

त्वाष्ट्री त्वष्टृसम्बन्धिनी मूर्त्तिर्यस्य तेन वृत्रेण इमे लोका आवृता इत्यर्थः ॥ १८ ॥ १९ ॥

प्रत्यञ्चं प्रत्यग्भूतमन्तर्यामिणमित्यर्थः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ततस्तदनन्तरं हतः पुत्रो यस्य सः । इन्द्राय शत्रवे जुहाव "तादर्थ्ये चतुर्थी" मरुद्भ्यो धूम इतिवत् इन्द्ररूपशत्रुवधार्थं जुहावेत्यर्थः । तत्र मन्त्रमाह । इन्द्रशत्रो ! विवर्द्धस्वेति । अत्राद्युदात्तं पदं पठितं तेनानिष्टं जातम् । तथा हि तत्पुरुषविवक्षया पठितेऽपि तत्पुरुषे शेषम् "अनुदात्तम्" इत्यनेन आद्यानुदात्तत्वे प्राप्ते इन्द्रशत्रुपदस्याद्युदात्तत्वात् "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इत्यनेन बहुव्रीहिलक्षणापत्त्या इन्द्र एव तस्य शत्रुर्जातः । तथोक्तं शिक्षायाम् ।

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।

स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥

इति "यदब्रवीत्स्वाहेन्द्रशत्रो विवर्द्धस्वेति तस्मादस्येन्द्रः शत्रुरभवत्" इतिश्रुतिरप्यनेनोपबृंहिता ॥ ११ ॥

अथ होमानन्तरमन्वाहार्यपचनाद्दक्षिणाग्नितः ॥ १२ ॥

तं वीक्ष्य लोका वित्रस्ता दश दिशो दुद्रुवुरित्यनेन सम्बन्धः । विश्वक्सर्वदिक्षु इषुविक्षेपमात्रं दिने दिने विवर्द्धमानं दग्धशैलप्रतिकाशं कृष्णवर्णम् । सन्ध्याभ्रसमूहवदर्चिः कान्तिर्यस्य तं तप्तताम्रवदरुणा शिखा श्मश्रूणि च यस्य मध्याह्नार्कवदुग्रे दुर्दर्शे लोचने यस्य तम् ॥ १३ । १४ । १५ ॥

शूले रोदसी आरोप्येत्यनेन शूलस्यापि लम्बत्वं दृढत्वं सूच्यते दरीवद्गम्भीरेण वक्त्रेण मुहुर्मुहुः जृम्भमाणमित्यन्वयः । कथम्भूतेन नभस्तलं पिबता अतिविपुलेन जिह्वया ऋक्षाणि लिहता दीर्घजिह्वेन भुवनत्रयं ग्रसता दुष्पूरेणेत्यर्थः ॥ १६ ॥ १७ ॥

त्वाष्ट्रः त्वष्टुरपत्यभूतः अन्वाहार्यपचनादुत्थितो यः कृष्णवर्णः पुरुषः स एव मूर्तिर्यस्य तपसस्तेन पुरुषाकारेण त्वष्टुः तपसेत्यर्थः । इमे लोका आवृताः अतो वृत्र इति प्रोक्तः । अनेन "स इमाँल्लोकानावृणोत्तद्वृत्रस्य वृत्रत्वम्" इति श्रुतिरुपबृंहिता ॥ १८ ॥ १९ ॥

विषण्णाः खिन्नाः प्रत्यञ्चमन्तर्यामिणमुपतस्थुस्तुष्टुवुः ॥ २० ॥

॥ देवा ऊचुः ॥

वाय्वम्बराग्न्यप्क्षितयस्त्रिलोका ब्रह्मादयो ये वयमुद्विजन्तः ।
हराम यस्मै बलिमन्तकोऽसौ बिभेति यस्मादरणं ततो नः ॥ २१ ॥
अविस्मितं तं परिपूर्णकामं स्वेनैव लाभेन समं प्रशान्तम् ।
विनोपसर्पत्यपरं हि बालिशः श्वलाङ्गुलेनातितितर्ति सिन्धुम् ॥ २२ ॥
यस्योरुशृङ्गे जगतीं स्वनावं मनुर्यथाबद्ध्य ततार दुर्गम् ।
स एव नस्त्वाष्ट्रभयाद्दुरन्तात्त्राताश्रितान् वारिचरोऽपि नूनम् ॥ २३ ॥
पुरा स्वयम्भूरपि संयमाम्भस्युदीर्णवातोर्मिरवैः कराले ।
एकोऽरविन्दात् पतितस्ततार तस्माद्भयाद्येन स नोऽस्तु पारः ॥२४॥
य एक ईशो निजमायया नः ससर्ज येनानुसृजाम विश्वम् ।
वयं न यस्यापि पुरः समीहतः पश्याम लिङ्गं पृथगीशमानिनः ॥ २५ ॥
यो नः सपत्नैर्भृशमर्द्यमानान् देवर्षितिर्यङ्नृषु नित्य एव ।
कृतावतारस्तनुभिः स्वमायया कृत्वात्मसात्पाति युगे युगे च ॥ २६ ॥
तमेव देवं वयमात्मदैवतं परं प्रधानं पुरुषं विश्वमन्यम् ।
व्रजाम सर्वे शरणं शरण्यं स्वानां स नो धास्यति शं महात्मा ॥ २७ ॥

श्रीशुक उवाच ।

इति तेषां महाराज ! सुराणामुपतिष्ठताम् ।
प्रतीच्यां दिश्यभूदाविः शङ्खचक्रगदाधरः ॥ २८ ॥

भाषा टीका ।

विश्वरूप पुत्र के मरजाने पर त्वष्टा ने शत्रु इन्द्र के मरने के वास्ते होम किया तिस होम में इस मन्त्र का उच्चारण किया कि इन्द्रशत्रु वढ देर मत कर शत्रुको जीत ॥ ११ ॥

इंद्रशत्रु शब्द में स्वरके फरक होजाने से इन्द्र जिसका शत्रु होवै ऐसे अर्थ होजाने से उस कुण्ड में से जो एक पुरुष उत्पन्न भया सो बडा भयङ्कर रूपवाला प्रलय काल में सब के नाश करने वाला काल सरीका मालूम पडा ॥ १२ ॥

वह पुरुष रोज रोज एक बाण के बरोबर बढने लगा जले पर्वत सरी का सन्ध्या काल की मेघमाला सरी का लाल तांबे सरीके जिसके केश और मूछें हैं ॥ १३ ॥

मध्यान्ह काल के सूर्य सरी के उग्र उसके नेत्र हैं तीन शिखावाले प्रकाशमान त्रिशूल को उठाकर आकाश पाताल के मध्य में नाचता था और गर्जकर पृथिवी को कंपाता था ॥ १४ ॥ १५ ॥

बडे भारी गम्भीर कन्दरा सरीके मुख से आकाश पाताल को ग्रसता सा था जीभ से नक्षत्रों को चाटता सा था जैसे कि तीनों भुवनों को ग्रास करै ॥ १६ ॥

बडे भयङ्कर दांतों से बारम्बार जमुहाई लेता था तिससे उसको देखकर सब लोग दशों दिशाओं को भगने लगे ॥ १७ ॥

त्वष्टा के पुत्र उस स्वरूप अन्धकार मूर्ति से सब लोक व्याप्त होगये तिससे उस परम दारुण का नाम वृत्र रखा गया ॥ १८ ॥

अपने गणों के सहित देवता लोग उसके पास जा दौडकर मारने लगे अपने अपने जितने अस्त्र शस्त्रों से मारे उन सब अस्त्रादिकों को उसने ग्रास कर लिया ॥ १९ ॥

तिसके अनन्तर सब देवता उसके तेज से ग्रसित होगये तब विषाद युक्त होकर विस्मित होकर अन्तर्यामि आदि पुरुष नारायण की स्तुति करने लगे ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वाय्वादीनि पञ्च महाभूतानि तैर्निर्मितास्त्रयो लोकास्तेषामधिपतयो ब्रह्मादयश्च ततोऽर्वाचीना वयं च सर्वे यस्मै अन्तकाय कालायोद्विजन्तः सन्तो बलिं हराम असावपि यस्माद्बिभेति ततः परमेश्वरादेव नोऽस्माकमरणं शरणं रक्षणमस्तु ॥ २१ ॥

आत्मतुल्यैः षोडशभिर्विना श्रीवत्सकौस्तुभौ ।
पर्युपासितमुन्निद्रशरदम्बुरुहेक्षणम् ॥ २९ ॥
दृष्ट्वा तमवनौ सर्वे ईक्षणाह्लादविक्लवाः ।
दण्डवत् पतिता राजन् ! शनैरुत्थाय तुष्टुवुः ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत एवेत्यवधारणे हेतुमाहुः । अविस्मितं निरहङ्कारं कुतूहलशून्यं वा । कुतः । प्रशान्तं रागादिशून्यम् । तच्च कुतः । स्वेनैव लाभेन परिपूर्णकामम् । तच्च कुतः । सम्यगुपाधिपरिच्छेदशून्यम् । एवंभूतं परमेश्वरं विना परं यः शरणार्थमुपसर्पति स बालिशोऽज्ञः यतोऽसौ शुनो लाङ्गूलेन पुच्छेन समुद्रमतितितर्ति अतितर्तुमिच्छतीत्यर्थः । यथा तेन समुद्रतरणं न भवति तथा निरीश्वराश्रयणेन व्यसनार्णवतरणं न भवतीति भावः ॥ २२ ॥

महाभये स एव रक्षक इति दृष्टान्तमित्याहुः । यस्येति द्वाभ्याम् । यस्य महाशृङ्गे जगतीं पृथ्वीमेव स्वनावं बद्ध्वा मनुः सत्यव्रतो यथावद्दुर्गं सङ्कटं ततार स एव वारिचरो मत्स्यमूर्तिर्नोऽस्मान् त्वदाश्रितान् सतो नूनं त्राता रक्षिष्यति ॥ २३ ॥

संयमाम्भसि प्रलयोदके उदीर्णैरुद्गतैर्वातैर्ये ऊर्मयस्तेषां रवैः कराले भयङ्करे अरविन्दनाभिकमलात् पतितप्राय एकोऽसहाय एव तस्माद्भयाद्येन ततार स एव नः पारस्तारकोऽस्तु ॥ २४ ॥

किञ्च । वयं भगवतैव सृष्टाः पालिताश्च बहुशोऽतस्तमेव शरणं व्रजामेत्याहुः । य एक इति त्रिभिः । येनानुगृहीताः सन्तो विश्वं सृजामः । ननु यूयमेव स्रष्टारो नान्यो युष्माकमनुग्राहकोऽस्ति तस्यादर्शनात्तत्राहुः । अस्मत्तः पुरः पूर्वमेवान्तर्यामितया समीहमानस्यापि यस्य लिङ्गं रूपं न पश्यामः । तत्र हेतुः । पृथक् पृथगीशा इत्यभिमानिनः ॥ २५ ॥

देवादिषूपेन्द्रपरशुराममत्स्यरामादितनुभिः कृतावतारः सन्नात्मसात्कृत्वा पाति च ॥ २६ ॥

आत्मभूतं दैवतं कुतः विश्वं विश्वात्मकम् । तथापि विकारं वारयन्ति । अन्यम् । विश्वात्मत्वे हेतुः । परं कारणम् । ननु प्रधानं पुरुषश्च विश्वस्य कारणं तत्राहुः । प्रधानं पुरुषं च तदात्मकोऽपि स एवेत्यर्थः । स एव नः शं विधास्यति ॥ २७ ॥

प्रतीच्यां दिशि हृदि प्रथममाविरभूत् ॥ २८ ॥

पुनश्च तं पुरो दृष्ट्वा ईक्षणाह्लादेन विवशा अवनौ दण्डवत्पतिताः सन्तः शनैरुत्थाय तुष्टुवुरित्यन्वयः । कथम्भूतम् । श्रीवत्सकौस्तुभौ विना स्वतुल्यैः षोडशभिः सुनन्दादिभिः परितः सेवितम् । उन्निद्रशरदम्बुरुहवदीक्षणे यस्य तम् ॥ २९—३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उपस्थितिमेवाह । वाय्वित्यादिना । तावत् "भीषास्माद्वातः पवते एतस्य वाक्षरस्य प्रशासने गार्गि ! द्यावापृथिव्यौ विधृते तिष्ठतः एतस्य वाक्षरस्य प्रशासने गार्गि ! प्राच्यो नद्यः स्यन्दन्ते" इत्यादिश्रुत्युक्तरीत्या सर्वस्य प्रशासितुः परमात्मनः शासनानुवर्तिनामात्मनां तदनन्यशरणत्वं वदन्तः स्तुवन्ति । वाय्विति । वायुश्चाम्बरं चाग्निश्चापश्च क्षितिश्च तास्तथा त्रिलोकाः लोकत्रयान्तर्गता ब्रह्मादयश्चतुर्मुखप्रभृतयो ये च ते सर्वे वयमुद्विजन्तः बिभ्यतः सन्तो यस्मै परमपुरुषाय बलिं तच्छासनानुरूपमाराधनं वहामः प्रापयामः कुर्मः असौ प्रसिद्धोऽन्तको मृत्युरपि यस्माद्बिभेति तस्मात्परमपुरुषादन्यः कः अरणं शरणं रक्षकोऽस्माकम् ॥ २१ ॥

अथ शरण्यत्वौपयिकगुणपूर्णत्वात्तस्यैव शरण्यत्वं तदितरस्याशरण्यत्वं च वदन्तः शरणं ययुः । अविस्मितमिति । अविस्मितं स्वमहिम्नः स्वाभाविकत्वाद्विस्मयरहितं परिपूर्णकाममवाप्तसमस्तकामम् । लभ्यते इति लाभः स्वाभाविकेनैव लाभेन स्वानुभवानन्देन उपलक्षितं समं रागादिरहितं प्रशान्तमूर्मिषट्करहितं एते हि शरण्यत्वोपयुक्ता गुणाः एतेन समस्तसोपाधिकमहिम्नोऽपरिपूर्णसमस्तकामस्यौपाधिकानन्दयुक्तस्य रागद्वेषादिप्राकृतगुणयुक्तस्योर्मिषट्कपीडितस्य शरणागततुल्यत्वेनाशरण्यत्वं सूचितम् । न हि शृङ्खलितस्तादृशमन्यं शरणं व्रजति । एवमीश्वरं शरण्यं त्वां विना परमन्यं क्षुद्रं देवं यो बालिशोऽज्ञः सन्नुपसर्पत्यनुवर्त्तते सः श्वलाङ्गूलेन प्लवमानस्य शुनः पुच्छेन साधनेन सिन्धुं समुद्रमतितर्ति अतीव तरितुमिच्छति श्वलाङ्गूलेन सिन्धुं तितीर्षुरिव नेष्टं प्राप्नोति प्रत्युत विहतो भवति इत्यर्थः ॥ २२ ॥

यथा मनुचतुर्मुखादयः शरण्यमापन्नाः त्रातारं भक्तवत्सलं भगवन्तमाश्रित्यैवापदोऽत्यवर्त्तन्त तथा वयमपि तमेवापन्निवृत्तये शरणं व्रजाम इत्याहुः । यस्येति द्वाभ्याम् । यस्य महामत्स्यस्योरुशृङ्गे महाशृङ्गे जगतीं पृथ्वीमेव स्वां नावमावध्य बद्ध्वा मनुः सत्यव्रताख्यो दुर्गं सङ्कटं ततार । अष्टमस्कन्धेऽयमितिहासः स्फुटीभविष्यति स एव वारिचरो मत्स्यमूर्तिर्भगवानाश्रितान् शरणागतानस्मान् दुरन्तादपारात्त्वाष्ट्रस्य वृत्रस्य भयान्नूनं त्राता रक्षिता भविष्यति अतस्तमेव शरणं व्रजाम इति भावः ॥ २३ ॥

तथा पुरा जगदादौ स्वयम्भूर्ब्रह्मापि संयमाम्भसि प्रलयसंबन्धिनि जले कथम्भूते उदीर्णः प्रचण्डो यो वातः पवनस्तेन ये ऊर्मयस्तरङ्गास्तेषां रवैः ध्वनिभिः कराले भयङ्करे संयमाम्भस्यरविन्दनाभिकमलात् पतितः पतितप्रायः एकः असहायो येन भगवता साधनभूतेन तस्माद्भयात्ततार स एव नोऽस्माकं पारः पारयतीति पारः पालकोऽस्तु ॥ २४ ॥

किञ्च । वयं भगवता सृष्टाः पालिताश्च स इदानीमप्यस्मान्गोपयिष्यत्यतस्तमेव शरणं व्रजाम इत्याहुः । य एक इति त्रिभिः । एकोऽ-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

द्वितीयः स्वसमाभ्यधिककारणान्तरानपेक्षो निजमायया आत्मीयसङ्कल्परूपज्ञानेन यः परमपुरुषो नोऽस्मान् ससर्ज येन भगवतानुगृहीताः सन्तो वयं विश्वं व्यष्टिवर्गं सृजामः यच्छन्दानां तमेवेति तृतीये नान्वयः। यस्य च पुरः हृदयकुहरे समीहतः अन्तरात्मतया नियमयतः लिङ्गं दिव्यावग्रहं न पश्यामः। तत्र हेतुः। पृथगीशमानिभः यतः पृथगीश्वरा इत्यभिमानिनो वयम् ॥ २५ ॥

यश्च सपत्नैः शत्रुभिः भृशं नितरामभ्यर्द्यमानान् पीडितान्नोऽस्मान् पाति अरक्षत्। कथम्भूतः। नित्य एव सदा अस्मानात्मसात्कृत्वा स्वकीयत्वेन मन्यमानोऽस्मद्रक्षणाय युगे युगे प्रतियुगं स्वमायया स्वकीयसङ्कल्परूपज्ञानेनैव न तु कर्मणेति भावः। तनुभिरुपेन्द्रपरशुराममत्स्यकूर्मवराहरामकृष्णादितनुभिर्देवादिषु कृतावतारः धृतावतारः सन् ॥ २६ ॥

तमेव भक्तवत्सलमात्मनामस्माकं दैवतं प्रधानं पुरुषं कारणावस्थचिदचिच्छरीरकमन्यं चिदचिद्विलक्षणं परमुत्कृष्टमत एव शरण्यं शरणमर्हतीति शरण्यः तं सर्वे वयं देवाः शरणं व्रजाम रक्षकत्वेनाध्यवस्यामः। एतावदेवास्मत्कृत्यमिति भावः। तत्र शरण्यकृत्यं प्रकाशयन्तः शरणागत्यङ्गमात्मनां महाविश्वासं दर्शयन्ति। स्वानामिति। स्वीयत्वेन परिगृहीतानां नोऽस्माकं शं सुखं शत्रुनिरसनद्वारकं नूनं धास्यति स तु महात्मा कृतस्वभक्तरक्षणादीक्षः। एवं रक्षिष्यतीति विश्वासः प्रपत्त्यङ्गभूतो दर्शितः। स नोऽस्तु पार इत्यनेन गोप्तृत्ववरणम्। आत्मदैवतं प्रधानं पुरुषं विश्वं शरणं व्रजामेत्यनेन चिदचिच्छरीरकत्वकथनाच्छरीरस्य शरीरिशेषित्वैकस्वरूपत्वादात्मनः परमात्मैकशेषत्वानुसन्धानरूपात्मनिक्षेपः। न पश्यामः लिङ्गं सपत्नैर्भृशमर्द्यमानानित्यनेन च ज्ञानशक्तिबलाद्यभावरूपमात्मनां कार्पण्यमपि प्रदर्शितम्। तं विनोपसर्पत्यपरं हि बालिश इत्यनेनोपायान्तरनिष्ठत्वादिरूपप्रातिकूल्यवर्जनं प्रदर्शितम्। कृत्स्नचिदचिच्छरीरकत्वकथनेनैव "चराचराणि भूतानि सर्वाणि भगवद्वपुरतस्तदानुकूल्यं मे" इत्युक्तरीत्या भगवच्छरीरभूतसर्वभूतानुकूल्यमप्यात्मनां प्रदर्शितम्। न च सर्वभूतानुकूल्यस्याभिप्रेतत्वे शत्रुनिरसनप्रार्थनानुपपत्तिः। अस्याः प्रपत्तेर्मोक्षार्थत्वाभावात् तस्या एव हि सर्वभूतानुकूल्यरूपमङ्गमपेक्षितं अस्यास्तु शत्रुनिरसनार्थत्वात्तद्व्यतिरिक्तभूतानुकूल्यसङ्कल्पमात्रमेवापेक्षितमित्युत्पश्यन्तु विचक्षणाः ॥ २७ ॥

एवं सुरैः प्रपद्यमानो भगवानाविरभूदित्याह मुनिः। इतीति। हे महाराज ! इतीत्थं सुराणां वेचानामुपतिष्ठतां प्रपदनपूर्वकं स्तुवतां सतां शङ्खचक्रगदाधरो भगवान् प्रतीच्यां प्रत्यगात्मसम्बन्धिन्यां दिशि हृदये "हृदि ह्ययमात्मा प्रतिष्ठितः" इति श्रुतेः प्रथमं हृद्याविरभूत्ततः पुरत आविरभूदित्यर्थः। यद्वा। प्रतीच्यां पश्चिमायां दिशि इत्यर्थः। देवानां पृष्ठत इति यावत् ॥ २८ ॥

तमाविर्भूतं भगवन्तं विशिनष्टि द्वाभ्याम्। श्रीवत्सकौस्तुभौ विना आत्मना सह तुल्यैः श्रीवत्सकौस्तुभमात्ररहितैरित्यर्थः। तयोः प्रधानपुरुषतत्त्वाभिमानित्वाज्जीवेनाधार्यत्वादिति भावः। षोडशभिः सुनन्दादिभिः पर्युपासितम्। यद्वा। भगवानाविरभूच्छङ्खचक्रगदाधरः तमाविर्भूतं प्रतीच्यां दिशि पृष्ठतः श्रीवत्सकौस्तुभमात्ररहितैरात्मतुल्यैः षोडशभिः पर्युपासितमित्यन्वयः। उन्निद्रे विकसिते शरदम्बुरुहे इवेक्षणे नेत्रे यस्य ॥ २९ ॥

तं दृष्ट्वा ईक्षणेन यः आल्हादस्तेन विक्लवाः ईषत्परवशाः सर्वे देवाः भूमौ दण्डवत्पतिताः प्रणेमुः। हे राजन् ! शनैरुत्थाय तुष्टुवुः ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वाय्वाद्यभिमानिनो ब्रह्मादयो ये त्रिलोकाः ते वयं यस्मै बलिं हराम त्रिलोकीबहिष्ठं लक्ष्मीतत्त्वं तदानियतं स्वतन्त्रमस्तीति शङ्कामाभूदित्याह। अन्तक इति। असावन्तकः मूलप्रकृतिर्दुर्गादिनामभिर्भिन्ना यस्मान्महान्तकाद्धरेर्बिभेति भीतेव तद्वशे वर्तते यतस्ततः स हरिर्नः अस्माकमरणं शरणमस्त्वित्यन्वयः। ननु ब्रह्मादयो वयं यस्मै बलिं हराम यस्माच्च असावन्तकोऽपि बिभेति ततस्तस्मात्परमेश्वरादरणं क्षेमो भवत्विति प्रतीतार्थः कस्मादुपलभ्यत इतिचेन्न।

> कालोऽन्तकः प्रधानं च मृत्युरव्ययकमित्यपि ।
> उच्यते प्रकृतिः सूक्ष्मा श्रीभूर्दुर्गेति नामभिः ॥
>
> सैव ब्रह्मादिभयदा विष्णोस्तु वशवर्तिनी ।
> अभयापि बिभेतीव तद्वशत्वादुदीर्यते ॥

इति स्मृतिविरोधात् वायुश्च अम्बरं च अग्निश्च आपश्च क्षितिश्चेति वाय्वम्बराग्न्यप्क्षितयः ॥ २१ ॥

एवं स्थिते शिवाद्यन्यतमस्य शरणमिच्छन् बालिश इत्याह। अविस्मितमिति। यो ब्रह्माद्युपात्तपूजस्तं स्वेनैव लाभेन स्वरूपानन्दानुभवेनैव परिपूर्णकाममत एवाविस्मितं कुतूहलबुद्धिरहितं सममेकप्रकारं प्रशान्तं समुद्रवत् स्तिमितं विना योऽपरं रुद्राद्यन्यतममुपसर्पति श्वलाङ्गूलेन तरिस्थानेन सिन्धुं समुद्रमतिपिपर्ति पारमतिक्रामति तदुचितमित्याह। हीति। बालिशो हि यस्मात्तस्मादुचितमित्यर्थः ॥ २२ ॥

ननु यस्य कस्यचिच्छरणमुपगतस्यापदर्णवसन्तरणं दृष्टपूर्वं चेत्तमन्तरेणान्यं शरणं गच्छन् बालिशत्वेन श्वलाङ्गूलेनापारमकूपारं तितीर्षतीति परिहास्यः स्यात् तदेव कथमिति तत्राह। यस्येति। मनुर्यस्य हरेरुरुणि शृङ्गे जगतीं महीमयीं स्वनावं स्वस्य मनोरथेन कल्पतां तरीं यथा यथावद्दृढमाबध्य दुर्गमन्योपायेन तर्तुमशक्यं प्रलयार्णवलक्षणं क्लेशं ततार नूनमिदानीमपि स वारिचरो मत्स्यावतारो हरिर्वाश्रितानित्यसेवारतान्नो दुरन्तात्त्वाष्ट्रभयात्त्राता त्रातास्त्वित्यन्वयः। यथा ततार तथा तरणायाश्रितानिति वा ॥ २३ ॥

इतोऽपि श्रीहरिप्रसादादृते एतद्भयसरणं दुःसाधनमिति भावेन स्तुवन्तीत्याह। पुरेति। पुरादिसृष्टौ संयमाम्भसि प्रलयोदके स्थितादरविन्दात्प्रकृत्यात्मनः पद्मात्पतितः स्वयम्भूर्भयं ततार स हरिर्नस्त्वाष्ट्रभयार्णवस्य पारः पारप्रदर्शकोऽस्त्वित्यन्वयः। तमत्यो वायुरपि प्रकृत्यात्मा अन्यथा नेदृशं बलमन्यस्य स्यादित्यतस्तल्लयजलं विशिनष्टि। उदीर्णेति। उदीर्णेन वातेन प्रकृत्यात्मना

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वायुनोन्नमितानामूर्मीणां रवेः कराले भयङ्करे पद्मादीनां प्रकृत्यात्मत्वं कस्माद्विशिष्योच्यत इति शङ्का माभूत् यत्र वायूदपद्मादिरूपेण प्रकृतिः स्थिता ।

एकस्तत्र बिभेद्ब्रह्मा विज्ञाय भयमत्यगात् ।
अन्तर्गतो हरिस्तस्य ध्यातो भयमपानुदत्त् इत्युक्तेः ॥

भयनिमित्तमाह। एक इति। एकाकित्वात् द्वितीयवस्तुनोऽनुत्पन्नत्वात् "सोऽबिभेत्स द्वितीयमैच्छत्" इति श्रुतेः। ननु किमर्थं ब्रह्मणा भयमदर्शीत्यत उक्तमपीति स्वसृज्यजनानां भयादिस्वभावसम्भावनार्थम्। "जनिष्यतां जनानां तु स्वभावानां प्रसिद्धये" इत्युक्तेः। अपि सम्भावन इति च सम्भावनामन्तरेण स्वाभाविकं किं न स्यादित्यस्यापीदमुत्तरमपीति अज्ञानाद्धि भयमुत्पद्यते ब्रह्मणस्तु तन्नास्ति "ज्ञानादिगुणपूर्णस्य ब्रह्मणोऽपि" इत्युक्तेः। तर्हि कियन्तं कालमनुवर्तत इत्यस्यापीदमुत्तरं पूर्णज्ञानस्य चिरकालीनं भयादिकं गर्हितं "क्षणार्धगाः भयादिका भवन्तीव कथं तस्मिन् स्थिरालयाः" इत्युक्तेः। स्वसृज्यजनभयस्वभावप्रदर्शनमन्तरेणान्यत्किंप्रयोजनमित्यस्यापीदमेवोत्तरमपीति। भयप्रदर्शनेन भगवत्प्रीतिलक्षणमन्यदपि विद्यत इत्यर्थः। "भगवत्प्रीतये नित्यं ब्रह्मणो ये भयादयः। न वृथा तस्य भावः स्यात्कश्चित्तेऽपि क्षणार्धगाः" इत्युक्तेः। भयादिकमपि किमेकवारं बहुवारमुतेत्यस्यापीदमुत्तरं नैकवारं किन्तु बहुवारमस्तीत्यर्थः

अज्ञानं तु चतुर्वारं द्विवारं भयमेव च ।
शोकोऽपि तावान्नान्यत्र कदाचिद्ब्रह्मणो भवेत् इत्युक्तेः ॥

इदमपि हरिप्रीतिजनकत्वेनोन्नतिकारणम्। तत्रापि भगवत्प्रीत्या उत्कर्षैवास्य तद्भवेत्" इत्युक्तेः ॥ २४ ॥

किञ्चास्माकं स्रष्टृत्वेन सम्बन्धत्वादपि निजस्वरूपं न बुद्ध्यामहे किन्तु लक्षणमेव पश्यामः अतो वयं तमेव शरणं याम इत्याहुः। य एक इति। एकः केवल ईशः ऐश्वर्यादिगुणपूर्णः यो निजमायया स्वाधीनया प्रकृत्या नः ससर्ज येन वयं प्रेरिताः विश्वमनुसृजाम यस्य पुरोऽग्रतः स्थिताः समेताः सङ्गता अपि वयं लिङ्गं लक्षणमेव पश्याम न तु स्वरूपं तत् स्रष्टृत्वेन तदनुगृहीतकर्तृत्वेन वाचिन्त्यवैभवमेव लक्षणं बुद्ध्यामहे न सच्चिदानन्दादिस्वरूपम्। अदर्शने कारणमाह। पृथगिति। पृथक् पृथगीशाभिमानित्वात्। अयं च कादाचित्क एव न तु सनातनः तदुक्तम्।

कदाचिदभिमानस्तु देवानामपि सोऽपि च प्रायः।
कालेषु नास्त्येव तारतम्येन सोऽपि तु इति ॥

अनेन पृथगित्यनेनाभिमानस्य तारतम्यं ध्वनयति। हे ईश! अभिमानिनो वयं पृथक्तारतम्योपेता इति वार्थः सम्पद्यते ॥ २५ ॥

करचरणादिदेहवत्त्वेऽपि देवदत्तवदनित्यदेहो नास्ति अतः स्वाभिमतसिद्ध्यै संप्रार्थनीय इतिभावेनाहुः। यो न इति। तनुभिर्दैवर्ष्यादिषु कृतावतारोऽपि नित्य एव निर्विकार एव न तु योनिकृतदुःखादिमान् न केवलमनुयुगं रक्षति हरिः किं तु अन्यदापीत्यर्थे चशब्दः ॥ २६ ॥

यत्तच्छब्दैरेवोक्तावशिष्टगुणैर्विशिष्य तं शरणं प्रार्थयन्ते। तमेवेति। अन्ययोगव्यवच्छेदार्थ एवशब्दः। देवा इत्यनेन देवानां शरणं हरिरेव नान्य इत्येवशब्दार्थो विवृतः। वयमित्यनेन हरेस्तेषां च मिथो भेदाभिमानं ध्वनयति। न केवलमिष्टदेवतात्वेन शरणं यामः अपि तु सर्वोत्तमत्वादिगुणविशिष्टत्वाच्चेति भावेनाह। परं प्रधानमिति। प्रकृतिः किं नेत्याह। पुरुषमिति। तर्हि जीवः किं नेत्याह। विश्वमिति। न प्रपञ्च इत्याह। आद्यमिति। प्रपञ्चस्यादिभूतम् "वासुदेवो वा इदमग्र आसीत्" इति श्रुतेः नृशंसस्वभावश्चेत्कथमयमिष्टः स्यादत्राहुः। शरण्यमिति। शरणप्राप्यत्वान्नृशंसो न भवतीत्यर्थः। नास्मिन्नस्मासु विप्रतिपत्तिरित्याह। स्व इति। शरणं आप्तावपि उदासीनो न भवति किं तु वदान्यवदभीष्टं ददातीत्याहुः। स्वानामिति ॥ २७ ॥

स्तुतिफलमाह। इतीति ॥ २८ ॥

प्रत्यक्षीभूतं तं भगवन्तं संदृश्य देवाः किं चक्रुरिति तत्राह। आत्मतुल्यैरिति। अनेन दर्शनावस्थायां किं गुणविशिष्ट इति शङ्कापर्यहारि आत्मतुल्यैः आत्मनो मूर्तेः अत एव आत्मतुल्यैः मूलभूतस्य हरेः सदृशैः सामर्थ्यादिगुणैरनूनैः षोडशभिर्वासुदेवादिदामोदरान्तैः पर्युपासितं तेषां मध्यस्थावृत्तिरूपेण स्थितं मूलरूपस्याप्राकृतत्वात्प्रादुर्भावानां शुक्रशोणितसम्पर्केण जातत्वात्कथमन्योऽन्यतुल्यत्वमिति तत्राह। विनेति। श्रीवत्सकौस्तुभौ विना प्रकृतिपुरुषाभ्यां विना प्रकृतिपुरुषातीतत्वेन तदनिर्मितशरीरैरित्यर्थः। अनेन सप्तदशरूपाण्यपि गुणक्रियादिना विशेषरहितानीत्युक्तं भवति। श्रीवत्सकौस्तुभरहितैरात्मतुल्यैः षोडशभिः पार्षदमुख्यैरुपासितमित्यङ्गीकारस्तु "श्रीवत्सः प्रकृतिर्ज्ञेया अक्षाख्यः कौस्तुभः पुमान्। तदतीतैः षोडशभिः स्वरूपैरप्युपास्यते" इतिप्रमाणविरोधादप्रामाणिकः। तेषां तद्भृत्त्वादन्यलक्षणतुल्यं चाप्रामाणिकम्। अतः प्रकृतिपुरुषानधीनत्वेनान्योऽन्यतुल्यत्वं वासुदेवादीनामेव। तदुक्तम्

अपुंप्रकृत्यधीनत्वाद्वासुदेवादिका हरेः।
तुल्याश्च केशवाद्याश्च न च भिन्नाः कथञ्चन। इति।

अनेन मूलरूपस्यावताराणां मिथो भेदराहित्यमुक्तमिति ज्ञातव्यम्। हरेः प्रकृतिपुरुषराहित्यं च न कादाचित्कं किं तु सनातनम् "श्रीवत्सकौस्तुभाभ्यां तु विनाभावं प्रदर्शयेत्। पुंप्रकृत्यात्मकाभ्यां स धत्ते नित्यं जनार्दनः" इतिवाक्यात्। प्रकृतिपुरुषराहित्यं च तदतीतत्वं तदवशत्वं च। तदुक्तम् "यदस्याभ्यामतीतत्वं यद्वशो नानयोर्हरिः" इति "श्रीवत्सकौस्तुभाभ्यां तु विनाभावः स एव च" इति इयंचोपासिका भक्तानुकम्पित्वेन हरेः परं क्रीडैव "आत्मैव सप्तदशधा स्वयं भूत्वा जनार्दनः। मध्यस्थावृत्तिरूपेण क्रीडते पुरुषोत्तमः" इत्युक्तेः संवीतश्चतुरात्माभिः स्वसदृशैः श्रीकेशवाद्यैरतश्चक्राद्यैरितरैरधीश्वरमुखैर्वज्रादिभिस्तत्परम्। "संसेव्यं स्वयमन्तराम्बुजमहापीठे विराजन् हरिर्भूत्यै श्रीपुरुषोत्तमो भवतु वः श्रीवल्लभः सन्ततम्" इति तन्त्रान्तरोक्तमत्रानुसंधेयम् ॥ २९ ॥

पूर्वं हरेः प्रत्यक्षायाधुना स्वाभिप्रेतार्थसिद्ध्यर्थं स्तुतिरिति विशेषः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अविस्मितं ततोऽन्यस्यापूर्वस्य वस्तुनोऽसद्भावाद्विस्मयरहितं अतः स्वेनैव स्वीयेनैव स्वस्यैव कर्मभूतस्य क्रियाभूतेन लाभेन परिपूर्णकामं नान्यस्येत्यर्थः । अतः सर्वत्र समम् । अतः प्रशान्तं चित्तदोषरहितम् । तथोक्तम् "रजस्तमः प्रकृतयः समशीला भजन्ति वै" इत्यादि अत उक्तं श्रीसत्यव्रतेन"

न यत्प्रसादायुतभागलेशमन्ये न देवा गुरवो जनाः स्वयम् ।
कर्तुं समेताः प्रभवन्ति पुंसस्तमीश्वरं वै शरणं प्रपद्ये । श्रीमहाभारते च ।

यस्तु विष्णुं परित्यज्य मोहादन्यमुपासते ।
स हेमराशिमुत्सृज्य पांशुराशिं जिघृक्षति । इति

त दिदं भक्तिसन्दर्भे विशेषेण विवृतमस्ति ॥२२—२८॥

आत्मेति युग्मकम् । इच्छयाह्लादेति वस्तुस्वाभाव्यात् स्वाभीष्टसिद्धिनिश्चयाच्च ॥ २९—३१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अस्माद्वृत्रजनिताद्भयात् परमेश्वरं विना न कोऽपि रक्षितुं प्रभविष्यतीति मत्वा तमेव शरणमाश्रयन्ते । वाय्विति । वाय्वाद्युपलक्षितानि त्रयोविंशतितत्त्वानि तथा वाय्वादिभिः निर्मितास्त्रिलोकास्तथा तेषामधिपतयो ब्रह्मादयस्तथा ततोऽर्वाचीना वयं च ये सर्वे यस्मान्मृत्योरुद्विजन्तो भीताः । असावन्तको मृत्युरपि यस्माद्बिभेति ततस्तस्मात् अरणं शरणं रक्षणमस्तु ॥ २१ ॥

तदन्यस्तु सुधिया नैवाश्रयणीय इत्याहुः । अविस्मितमिति । तं विना अपरं देवतान्तरं कर्मयोगं ज्ञानयोगमपरयोगं वा शरणार्थं बालिशो महामूर्ख एवोपसर्पति । ननु विज्ञः यथा शुनः पुच्छेन सिन्धुमतितर्त्तुमिच्छति स श्वा एव सिन्धुं तर्तुं न शक्नोति किमुत तत्पुच्छग्राहिणं स श्वा एव दृष्ट्वा प्रथमं समुद्रमध्ये क्षिपति निमज्जतीति भावः । भगवदाश्रयी तु संसारसिन्धुं यत्तरति तत किमपि नाद्भुतमित्याह । अविस्मितमिति । न विद्यते विस्मितं किमप्यद्भुतं यत्र तं विना दुर्लङ्घ्यस्यापि संसारसिन्धोस्तारणे अन्यत्रातिविस्मयोऽपि तत्र न कोऽपि विस्मयः । सद्य एव तस्य गोष्पदीकरणसामर्थ्यादिति भावः । स्वेनैव स्वस्वरूपेणैव यो लाभः सौन्दर्यादिमाधुर्यसप्तकस्य प्राप्तिस्तेन समं सह परिपूर्णाः कामाः स्वीयह्लादिनीशक्तिदत्ता भोगा यस्य तम् । प्रशान्तमनुग्रं सेवापराधे जातेऽपि भक्तवात्सल्यत्वात् क्षन्तारम् ॥ २२ ॥

वयन्त्वतिनिकृष्टाः सकामा अप्यस्मिन्महाभय एव शरणं प्राप्तोऽपि तेन रक्षणीया एव यथापूर्वं इत्याहुः । यस्येति द्वाभ्याम् । यस्य मत्स्यरूपस्य जगतीं पृथ्वीं यथा ततारेति वयमपि तथा तरेमेति भावः । वारिचरोऽपि वारिण्येव चरन्नपि तत्रैव स्थित्वा जगतीवद्यानस्मानीश्वरत्वाद्रक्षतु ॥ २३ ॥

संयमाम्भसि प्रलयजले अरविन्दात् नाभिकमलात् पतितः पतितप्रायः येन हेतुना सः ॥ २४ ॥

स खलु सर्वत्र च वर्त्तमानोऽप्यस्माकं बहिर्मुखेन्द्रियाणामदृश्योऽपि कृपयैव दृश्यो भूत्वा रक्षत्वित्याहुः । य इति त्रिभिः । पुरोऽस्माकमग्र एव समीहमानस्य रामकृष्णादिरूपेण लीलां कुर्वतोऽपि तस्य लिङ्गं न पश्यामः । तत्र हेतुः । पृथगिति ॥ २५ ॥

तनुभिः उपेन्द्रपरशुरामादिस्वरूपैः स्वस्य मायया कृपया चिच्छक्त्या वा नोऽस्मानात्मसात्कृत्य पातीत्यत एव साम्प्रतं स्वरक्षणार्थं निवेदनेऽपि न सङ्कुचाम इति भावः । तमेवेति । विश्वं मायाशक्त्या विश्वरूपम् । स्वरूपशक्त्या अन्यं विश्वस्माद्भिन्नम् ॥ २६ ॥ २७ ॥

प्रतीच्यां दिशि पश्चिमसमुद्रकूले देशान्तरस्योत्तमस्य दैत्याक्रान्तत्वात् तत्र देवैः स्थातुमशक्यत्वात् । तत्रैव विविक्ते उपविश्य स्तुतत्वात् ॥ २८ ॥

श्रीवत्सकौस्तुभौ विना चतुर्भुजत्वादिस्वचिह्नवत्त्वादात्मतुल्यैः सुनन्दादिभिः परित उपासितम् ॥ २९ ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यस्मै अन्तकाय वाय्वाद्युपलक्षितानि लोककारणानि तत्त्वानि त्रिलोकाः ब्रह्मादयो लोकनाथाः ये वयं तत्प्रजाभूताः उद्विजन्तः सन्तो बलिं हरामः असावन्तकः कालोऽपि यस्माद्बिभेति ततो हेतोः सः नोऽस्माकमरणं शरणमस्तु भवत्विरन्वयः ॥ २१ ॥

अथ भगवतोऽविस्मितत्वपूर्णकामत्वादिगुणान् दर्शयन्तस्तदितरं जनं निन्दन्ति । अविस्मितमिति । उपसर्पति शरणं गच्छति यः स बालिशोऽज्ञः भवार्णवात्तरणोपायं न जानातीत्यर्थः । यथा श्वलाङ्गूलेन यः सिन्धुमतितितर्ति तर्तुमिच्छति स बालिशो भवति तद्वत् ॥ २२ ॥

तस्य स्वभक्तरक्षकत्वं सुप्रसिद्धं सः अस्माकमप्यापद्भयस्तारकोऽस्त्वित्याहुः । यस्येति द्वाभ्याम् । यस्योरुशृङ्गे महच्छृङ्गे मनुः स्वनावं जगतीं यथावद्बद्ध्वा दुर्गं सङ्कटं ततार स एव वारिचरो मत्स्यमूर्तिः त्वाष्ट्रभयात् वृत्रभयात् नूनं निश्चितं त्राता रक्षिष्यति ॥ २३ ॥

पुरा लोकरचनातः प्राक् उदीर्णवातेन ये ऊर्मयस्तरङ्गास्तेषां रवैः कराले संयमाम्भसि प्रलयजले एक एव स्वयम्भूः अरविन्दात्पतितः पतितप्रायः येन भगवता तस्माद्भयात्ततार सः नोऽस्माकं पारस्त्वाष्ट्रभयात्तारकोऽस्तु ॥ २४ ॥

येन वयं सृष्टा यश्च अस्माज्ज्ञानावतारैः पाति स एवास्मान् सुखयिष्यतीत्याहुः । य इति त्रिभिः । निजमायया निजवयुनेन य एक ईशः सर्वेश्वरः नोऽस्मान् ससर्ज येन नियुक्ताः यस्य पुनः पूर्वमेवं समीहितः विश्वम् सृजतोऽपि तत्सृष्टमेव विश्वम् अनुपश्चात्सृजामः यस्य लिङ्गं भगवतैव वयं सृष्टाः तेनैव सृष्टं तन्नियुक्ताः किञ्चित्करवामेति तद्गुणज्ञापकम् चिह्नमपि न पश्यामः एवम्भूता अज्ञा वयमित्यर्थः । अत एवाज्ञानेन वयं पृथगीशमानिनः ॥ २५ ॥

यो नोऽस्मान् देवादिषु वामनजामदग्न्यमत्स्यदाशरथ्यादितनुभिः कृतावतारः सन् स्वमायया स्वकृपया आत्मसात्कृत्वा पाति च ॥ २६ ॥

प्रधानं प्रकृत्याख्यशक्तिरूपं पुरुषं जीवात्मकांशरूपं विश्वं तदुभयात्मकप्रपञ्चरूपं शक्तितद्वतोः अंशांशिनोश्च स्वाभाविकभेदाभेदसम्बन्धात् "उभयव्यपदेशात्त्वहिकुण्डलवत्" इति पारमर्षसूत्रात् । ननु तर्हि सर्वे दोषाः ब्रह्मणि प्रसज्जेरन्नत्राहुः । अन्यमिति सर्वदोषास्पृष्टस्वरूपम् । प्रकृतिपुरुषतदुभयात्मकजगद्विलक्षण-

देवा ऊचुः ।

नमस्ते यज्ञवीर्याय वयसे उत ते नमः ।
नमस्ते ह्यस्तचक्राय नमः सुपुरुहूतये ॥ ३१ ॥
यत्ते गतीनां तिसृणामीशितुः परमं पदम् ।
नार्वाचीनो विसर्गस्य धातर्वेदितुमर्हति ॥ ३२ ॥

ओं नमस्तेऽस्तु भगवन्नारायण ! वासुदेवादिपुरुष ! महापुरुष ! महानुभाव ! परममङ्गल ! परमकल्याण ! परमकारुणिक ! केवल ! जगदाधार ! लोकैकनाथ ! सर्वेश्वर ! लक्ष्मीनाथ ! परमहंसपरिव्राजकैः परमेणात्मयोगसमाधिना परिभावितपरिस्फुटपारमहंस्यधर्मेणोद्घाटिततमःकपाटद्वारे चित्तेऽपावृत आत्मलोके स्वयमुपलब्धनिजसुखानुभवो भवान् ॥ ३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्वरूप मित्यर्थः । यतः परं पूर्णं शरण्यं शरणागतहितकरं शरणं व्रजामः रक्षितारं जानीम इत्यर्थः । स एव नः शं सुखं धास्यति त्वाष्ट्रभयनिराकरणेनेति शेषः ॥ २७ ॥

प्रतीच्यां दिशि तथा सुखं भजनार्थमाश्रितायां पश्चिमायामुपतिष्ठतां स्तुवतामाविरभूत् ॥ २८ ॥

आत्मतुल्यैः सारूप्यं प्राप्तैः पार्षदैः पर्युपासितं दृष्ट्वा भवनौ दण्डवत्पतिताः पुनः शनैरुत्थाय तुष्टुवुः स्तुतवन्त इति द्वयोरन्वयः ॥ २९—३० ॥

भाषा टीका ।

देवता बोले वायु आकाश अग्नि जल पृथिवी तीनों लोक ब्रह्मादिक हम सब लोग सदा उद्विग्न होकर जिस काल के वास्ते भेट पूजा देते हैं सो काल भी आप से डरता है तिन आप के हम शरण मे प्राप्त हैं सो आप हमारे रक्षक होवें ॥ २१ ॥

आप अपने स्वरूपानन्द के लाभ से परिपूर्णकामना वाले हो अहङ्कार रहित हो शान्त स्वरूप हो ऐसे आपको छोड कर जो दूसरे के शरण जाता है सो मूर्ख कुत्ता की पूंछ को पकड कर समुद्र के पार जाना चाहता है ॥ २२ ॥

जैसे मत्स्यमूर्ति आप के वडे शृङ्ग में पृथिवी रूपी अपनी नौका को बांधकर सत्यव्रत मनु प्रलयकाल के महासमुद्र को तरगये तैसेही सोइ जलचर रूपवाले आप शरणागत हम लोगों की रक्षा करोगे यह बात निश्चित है ॥ २३ ॥

पूर्व में सृष्टि के समय में अति प्रबल शब्दवाले पवनों से कराल प्रलय समुद्र मे ब्रह्माजी कमल के ऊपर से गिरने लगे तब जिन भगवान् के सहायता से ब्रह्माजी भयको तरगये सोइ भगवान् हमारे पार करने वाले होवें ॥ २४ ॥

जिन एक ईश्वर ने अपनी माया से हम सबों को पैदा किया है जिन के अनुग्रह से हम लोग संसार को सृजते हैं पहिले सृष्टि करनेवाले जिन भगवान् के चिन्ह को हम अलग अपने को ईश्वर मानने वाले होने से नहीं जानते, हैं तिन के हम शरण प्राप्त हैं ॥ २५ ॥

शत्रुओं से अत्यन्त पीडित हम लोगों को देवता ऋषि मनुष्यों मे अवतार लेकर दिव्यमूर्तियों के द्वारा अपनी कृपा से हम को अपना बनाकर जो भगवान् युग युग मे रक्षा करते हैं ॥ २६ ॥

कारण प्रधान पुरुष विश्वरूप देव आत्मदैवत तथा अन्य उन्हीं भगवान् के हम शरण जाते हैं सो महात्मा अपने भक्त हम लोगों के कल्याण को विधान करेंगे ॥ २७ ॥

श्रीशुकदेवजी बोले हे राजन् ! उन देवतों के इस प्रकार से स्तुति करने पर शङ्ख चक्र गदा पद्म धारण किये भगवान् पश्चिमदिशा मे प्रगट भये ॥ २८ ॥

श्रीवत्स तथा कौस्तुभ इन दोनों के विना और सब प्रकार से अपने सदृश सुनन्दादिषोडश पार्षदों से भगवान् चारों ओर से सेवित हैं शरद ऋतु के खिले कमल सरीके नेत्रों से सुशोभित हैं ॥ २९ ॥

हे राजन् इस प्रकार के भगवान् का दर्शन कर के सब देवता दर्शनके आनन्द के मारे विह्वल होगये फिर पृथिवी मे नमस्कार के वास्ते दण्डसरीके गिरपडे फिर धीरे से उठकर स्तुति करने लगे ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यज्ञो वीर्यं स्वर्गादिफलजननाय सामर्थ्यं यस्य तस्मै नमः । वयसे उत तत्फलपरिच्छेदककालात्मनेऽपि । तद्विघातकेषु दैत्येष्वस्तं प्रक्षिप्तं चक्रं येन । एवम्भूतैः प्रभावैः सुपुरुहूतये शोभनबहुनाम्ने ॥ ३१ ॥

दुरवबोध इव तवायं विहारयोगो यदशरणोऽशरीर इदमनवेक्षितास्मत्समवाय आत्मनैवाविक्रियमाणेन सगुणमगुणः सृजसि पासि हरसि ॥ ३४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु मम गुणातीतं रूपं विहाय गुणोपाधिकं यज्ञवीर्यत्वादि किमिति वर्ण्यते तत्राहुः । यत्तव गुणत्रयस्येशितुर्नियन्तुस्त्रिगुणात्मिकानां तिसृणां गतीनां परमं पदं निर्गुणस्वरूपं तद्विसर्गस्यार्वाचीन इदानीन्तनो हे धातर्वेदितुं नार्हति । अतः केवलं तस्मै ते नमोऽस्तु ॥ ३२ ॥

क्षितावरणानि पद्यानि न मीयन्ते हरेर्गुणाः ।
इति पद्यैरतुष्यन्तः सद्यो गद्येन तुष्टुवुः ॥

भक्त्युद्रेकेण बहुधा सम्बोधयन्तो दुर्ज्ञेयत्वं प्रपञ्चयन्ति । भगवन्नित्यादिना । परमं मङ्गलं शुद्धो धर्मो यस्मिन् । आत्मयोगेनाष्टाङ्गेन यः समाधिश्चित्तैकाग्र्यं तेन परिभावितः सुशीलितः परिस्फुटो यः पारमहंस्यधर्मो भगवद्भजनं तेनोद्घाटितं तमोरूपं कपाटं यस्मिंस्तस्मिन् द्वारभूते चित्ते अपावृते प्रकटे आत्मलोके प्रत्यग्रूपे स्वयमेवोपलब्धमभिव्यक्तं यन्निजसुखं तदनुभवरूपो भवान् ॥ ३३ ॥

ननु केवलानुभवरूपत्वे मम सृष्ट्यादिकर्तृत्वं कथं तत्राहुः । दुरवबोध इव तवायं विहारयोगो यद्यस्मादशरणो निराश्रयः । इदं विश्वम् । अनवेक्षितोऽस्माकं समवायो मेलनं साहाय्यं येन सः ॥ ३४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्तुतिमेवाह । नम इत्यादिना । तावत्सर्वस्य आत्मायुःप्रदं भीतानां प्रणतरक्षाविलम्बासहिष्णुं नाममात्रस्मरणनिरस्तमहाभयं स्वर्गापवर्गादिप्रदं वाङ्मनसापरिच्छेद्यस्वभावं नमस्कुर्वन्तः स्तुवन्ति । नमस्त इत्यादिवाक्यद्वयाम् । यज्ञः वीर्यं सृष्टिहेतुः सामर्थ्यं यस्य "यज्ञाद्भवति पर्जन्यः" इत्युक्तप्रकारेण यज्ञमुखेन प्रजाः सृजत इत्यर्थः । यद्वा । वीर्यशब्दोऽर्शआद्यजन्तः । यज्ञो वीर्यवान् यस्मात् यदाराधनरूपत्वे यज्ञस्य सारवत्ता अनन्तस्थिरफलसाधनता भवतीत्यर्थः । अन्यथाल्पास्थिरफलसाधनतेति भावः । वयसे स्वाराधनभूतयज्ञाद्यनुष्ठानोपयुक्तायुःप्रदाय अनये यज्ञादिफलदानेनानिष्टनिवारणेन च रक्षाकराय आत्तचक्राय प्रणतरक्षणाविलम्बासहनेन सदा धृतसुदर्शनाय पुरुहूतये स्मरणमात्रनिरस्तमहद्भयोदारनाम्ने नम इत्यादावृत्तिर्गुणभेदाभिप्रायः ॥ ३१ ॥

तिसृणां स्वर्गापवर्गनरकाणामीशितुः निर्वाहकस्य दातुस्ते तव परमं प्रकृतिपुरुषविलक्षणमुत्कृष्टं पदं स्वरूपं विसर्गस्यार्वाचीनः सृष्टेः पश्चात्स्थः कार्यभूतः स्वल्पस्त्वदाहितज्ञानशक्तिमान् यः पुमान् हे धातः ! वेदितुं ज्ञातुं नार्हति ॥ ३२ ॥

अथ पुरुहूतय इत्यनेनाभिप्रेतैर्भगवत्साधारणैर्नामभिरुक्तं सम्बोधयन्तो नार्वाचीनोऽर्हति वेदितुमित्युक्तदुर्ज्ञेयत्वनिमित्तानाश्रयणीयत्वशङ्कां योगपरिशुद्धमनोग्राह्यत्वकथनेन निराकुर्वन्तो यज्ञवीर्यायेत्यनेनोक्तजगद्व्यापारस्य मृत्कुलालादिव्यापारवैजात्यं लीलारूपतां चाभिदधतः कारणान्तरानपेक्षसृष्ट्याद्युपयुक्तगुणयोगित्वं च वदन्तस्तुवन्ति । ॐ नम इत्यादिना । पासि हरसि चेत्यन्तेन गद्येन ॐ इत्यसाधारणं भगवतो ब्रह्मणो नाम "ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः" इति भगवद्गीतेः तथा भगवन्नारायणादयः शब्दा अपि भगवन् ! षाड्गुण्यपूर्ण ! नारायण ! नारं जीवसमूहस्तस्यायनं प्राप्यं प्रापक आधारश्च तस्य सम्बोधनं नारायणशब्दश्च योगरूढिभ्यां विष्णुवसाधारणः न च केवलयोगेन रुद्रादिपरत्वमपि शङ्कितुं युक्तम् । रूढ्यभावेन "पूर्वपदात्संज्ञायामगः" इति णत्वाभावप्रसङ्गात् च विष्णुपरत्वाङ्गीकारेण संज्ञापरत्वाभावात्तन्मतेऽपि न णत्वमिति वाच्यम् "भृजोऽसंज्ञायाम्" इति सूत्रभाष्ये यदेतत्संज्ञया विधीयते तत्र न संज्ञायामभिधेयायामित्यर्थः । किं तर्हि तत्कार्यविशिष्टेन चेत्संज्ञा गम्यत इत्यर्थः । इत्युक्तमत एव रघुनाथरामानुजादिशब्देषु न णत्वं न हि तत्र कृतणत्वेन संज्ञावगतिः । किं तु अकृतणत्वेन "क्षुभ्नादिषु नियुक्तसंज्ञास्थले तु यथाविनियुक्तानामेव साधुत्वम्" इति रघुनाथादौ णत्वाभावः अध्वपरिमाणसंज्ञाभूतगव्यूतिशब्दे च न लोपः । अन्यथा संज्ञात्वभङ्गापत्तेरित्यन्यत्र विस्तरः । वासुदेव ! सर्वभूताधार ! आदिपुरुष ! जगत्कारणपुरुष ! महापुरुष ! पुरुषोत्तम ! महानुभाव ! अचिन्त्यप्रभाव ! परममङ्गल ! स्वयं मङ्गलरूप ! परमकल्याण ! अन्येषां मङ्गलावह ! परमकारुणिक ! स्वार्थनिरपेक्षपरदुःखासहिष्णो ! केवलजगदाधार ! इतरानपेक्षजगदाधार ! स्वसमानरहितलोकनाथ ! सर्वेषां ब्रह्मादीनामपीश्वरनियन्तः लक्ष्मीनाथ ! श्रियःपते ! परमहंसाः ज्ञानिनः परिव्राजकाः संन्यासधर्मनिष्ठाः ज्ञानयोगकर्मयोगनिष्ठा इत्यर्थः । तैः परमेणोत्कृष्टेनात्मसमाधियोगेन परमात्मविषयकध्यानयोगेन परिभावितः संदीपितः अत एव परिस्फुटः प्रत्यक्षतापन्नो यः पारमहंस्यधर्मो भगवद्भक्तियोगरूपो धर्मः तेनोद्घाटितं निर्मूलितं तमःकपाटं तमः अनाद्यविद्यात्मकमज्ञानं तदेव कपाटं परमात्मदर्शनविरोधि यस्य तद्द्वारं परमात्मदर्शनसाधनं चित्तं यस्मिंस्तस्मिन्नात्मलोके आत्मैव लोकः लोकनीय इति लोकः परमात्मापृथक्सिद्धत्वेन जीवस्यापि लोकनीयत्वात्तस्मिन्नात्मलोकेऽपावृतः आवरणरहितः उपलब्ध इत्यर्थः । कथमपावृतः स्वयमुत्थः स्वयमात्मनैव उत्थः नित्योदितो यो निजसुखानुभवः निजानन्दरूपोऽनुभवो ज्ञानं तद्रूपः नित्यनिरुपाधिकाविर्भूतापरिच्छिन्नज्ञानानन्दानुभवरूपत्वेनापावृत इत्यर्थः । एवंभूतोऽसि । एवम्भूतस्य भगवान् तव विहारयोगः लीलारूपो योगः जगद्व्यापाररूपो योगः जगत्सङ्कल्पमात्रनिष्पाद्यत्वज्ञापनाय समाधिरूपसङ्कल्पापरपर्याययोगपदं प्रयुक्तम् । जगद्व्यापारस्याकर्मायत्तकेवललीलारूपत्वख्यापनाय विहारपदम् । स एव विहारयोगो दुःखबोध इव लोकदृष्टमृत्कुलालादिव्यापारजातीयत्वेन बोद्धुमशक्य इव वर्त्तते इवशब्देन सर्वज्ञस्य सर्वशक्तेस्तव उपपन्न एवेति सूच्यते । दुःखबोधकत्वमेव विशदयन्ति । यदस्त्वमिदं विश्वमशरणमनपेक्षितस्वव्यतिरिक्ताश्रयं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सृजसि कुलालादेर्घटादीन् सृजतस्तु भूतलादिरूपः कश्चिदाधारोऽपेक्षित इति भावः । त्वं तु स्वस्मिन्नेवाधारभूते सृजसीति भावः । किञ्च । स्रष्टा त्वमनपेक्षितास्मत्समवायसहायः अस्मदादिसहकारिसमुदायनिरपेक्षः । कुलालादिस्तु सहकारिसमवायसापेक्ष इति भावः । किञ्चागुणः गुणत्रयरहितः कुलालादिस्तु सत्त्वादिगुणयुक्त इति भावः । ननु विशिष्टस्य कारणत्वाङ्गीकारात्कथं कुलालादिवैलक्षण्यापादकमगुणत्वमुच्यत इति चेन्न । विशिष्टस्य उपादानत्वाभ्युपगमेऽपि प्रकृतिपुरुषाभ्यामुत्कृष्टस्य विशेष्यस्य ब्रह्मणो निमित्तत्वाभ्युपगमाद्विशेष्यांशे च सत्त्वादिगुणत्रयाभावात्त्रैगुण्यं कुलालादिवैलक्षण्यापादनमेव । एवं कुलालादिनिमित्तकारणवैलक्षण्यमुक्तम् । अथ मृदाद्युपादानवैलक्षण्यमाहुः । आत्मनैवाविक्रियमाणेन सगुणमिति "तदात्मानं स्वयमकुरुत" इति श्रुत्यर्थोऽत्राभिप्रेतः । आत्मनेत्यनेन स्वयंशब्दार्थ उक्तः । सगुणमित्यनेनात्मानमित्यस्यार्थः । गुणशब्दश्चात्रापृथक्सिद्धविशेषणवाची तथाचापृथक्सिद्धविशेषणभूतचिदचिद्विशिष्टमात्मानं स्वेनैव सृजसि पासि रक्षसि हरसि च सूक्ष्मचिदचिद्विशिष्टमात्मानमेव स्थूलचिदचिद्विशिष्टावस्थविश्वाकारेण परिणमयसीत्यर्थः । निर्विकारश्रुतिविरोधपरिहारायात्मानं विशिषन्ति । अविक्रियमाणेनेति विकारेण विशेषणभूतचिदचित्तत्त्वाद्विक्रियमाणेनैवात्मना सृजसीत्यर्थः । मृत्पिण्डादिकं तु स्वाभिन्नेन कुलालादिना घटादिरूपेण सृज्यत इति ततो यस्य वैलक्षण्यसिद्धिः । आत्मनैवात्मानं सृजसीत्यनेन विशिष्टत्वविशेष्यत्वाकाराभ्याम् उपादानत्वं निमित्तत्वं चैकस्यैवोक्तं भवति । अविक्रियमाण इति सप्तम्यन्तपाठे स्वस्मिन्विशेष्यभूतेऽविक्रियमाणे स्वरूपस्वभावाभ्यामविक्रियमाणे सत्येव विशिष्टमात्मानं स्वेनैव सृजसीत्यर्थः । नन्वेकस्यैव पदार्थस्य निमित्तत्वमुपादानत्वं च परस्परविरुद्धमिति चेन्नैकस्योभयविधकारणत्वप्रतिक्षेपकैरपि कचित्कचिदेकस्मिन्नेव तदुभयविधकारणत्वाभ्युपगमात् यथा स्वज्ञानचिकीर्षाप्रयत्नादिकं शास्त्राभ्यासादिभिः स्वयमेव करोति जीवः तेन तत्र कर्तृत्वेन निमित्तकारणं भवति तथापि च स्वयमेव समवायिकारणं भवति स्वज्ञानादीन्प्रति कार्यं यत्र समवैति तत्समवायिकारणम् इति समवायिकारणलक्षणस्य स्फुटोपलम्भात् । किञ्च । ईश्वरोऽपि सर्वव्याप्तस्य स्वस्य सर्वैरपि परमाण्वादिभिः संयोगं स्वयमेव सृजति सर्वकार्यहेतुत्वात्तथा च तत्र कर्तृत्वेन निमित्तकारणं भवति समवायिकारणत्वमपि तत्प्रतीतस्य दृश्यते परमाण्वादिसंयोगस्येश्वरसंयोगापेक्षत्वात्तेन यथा कर्तृत्वं समवायिकारणत्वं चेश्वरनिष्ठमेव भवन्मते भवति । तथास्मत्सिद्धान्ते निमित्तत्वमुपादानत्वञ्चैकवस्तुनिष्ठमिति । नन्वेवमपि न विशिष्टस्योपादानत्वं क्वापि दृष्टमिति चेन्न ऊर्णनाभिप्रभृतीनामेव दृष्टान्तत्वात् । नह्यूर्णनाभेर्देहस्यैवाचेतस्य प्राणिनोऽपि केवलात्मन्यपि तु देहविशिष्टात्मनीति लोकोपलम्भः । श्रुतिश्च "यथोर्णनाभिः सृजते गृह्णते च" इत्यूर्णनाभिदृष्टान्तत्वेन दर्शयति ॥ ३३ ॥ ३४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्तुतेः प्रतीकं गृह्णाति । नमस्त इति । यज्ञस्य वीर्यं रेतः स्रष्टेत्यर्थः । तस्मै यज्ञो वीर्यं यस्य सः तथाभिव्यक्तथ इति शेषः । तस्मै हे यज्ञ ! वीरेषु स्थित्वा वीरत्वप्रदायेति वा । उत किं तु वयसे बन्धकशक्त्या जीवानां संसारे बन्धकाय "वय बन्धने" इति धातोः "वयः सर्वस्य वयनाद्भगवान् पुरुषोत्तमः" इति वचनात् वयशब्दोऽत्र बन्धवचनः "मा तन्तुश्छेदि वयतो धियं मे मामात्राशार्यपसः पुरा क्रतोः" इति श्रुतेश्च "अतो वयो विहङ्गो विहगो विहङ्गमः" इत्यभिधानेऽपि प्रकृतानुपयुक्तत्वान्न पक्ष्यत्र ग्राह्यः श्रुतेरयमर्थः । देवे धियं वयतो बध्नतो मे तन्तुः सन्ततिर्माच्छेदि उत्सन्नो माभूत् । क्रतोः पुरा ज्ञानोत्पत्तेः पूर्वं मयसः कर्मणः मात्रा मानं परिमाणं माशारिः "शॄ हिंसायाम्" इति धातोः फलदानेन नष्टं माभूत् "कर्मणा ज्ञानमातनोति" इति श्रुतेः ज्ञानमनुत्पाद्य न नश्यत्वित्यर्थः । स्वकृतं बन्धनं स्वयमेव हन्तुं शक्तो नान्य इति ज्ञापनाय सन्धिकार्याभावः । चक्राय पुनः सृष्ट्यादिकर्त्रे करोतेर्यङ्लुगन्तं शब्दरूपम् । सर्वहन्त्रे चरतेर्भक्षणार्थे रूपं वा । सर्वविपत्परिहर्तृसुदर्शनाख्यावताराय वा । अत्राप्यनन्यसाध्यकरणशक्त्यादिमत्त्वप्रदर्शनाय सन्ध्यभावः । पुरवो बहवो हूतयो नामानि यस्य सः तथा तस्मै "नामानि सर्वाणि यमाविशन्ति" इति श्रुतेः "इन्द्रायाहि चित्रभानो" इत्यादिबहुवेदेहूतिर्यस्य सः तथा तस्मै वा "शुचिः शुचिव्रतः शुद्धः पुरुहुः शुचिरुच्यते" इत्यभिधानात् । पुरुहुः शुद्धा ऊतिर्यस्य सः तथा तस्मै वा ॥ ३१ ॥

ईशितुस्ते तव यत्तिसृणां गतीनां देवलोकपितृलोकनिरयसंज्ञानां सकाशात्परममुत्कृष्टं वैष्णवं पदं वैकुण्ठादिस्थानं तद्धातुर्ब्रह्मणो विसर्गस्य विविधसृष्टेरर्वाचीनोऽनन्तरकालीन इदानीन्तनो मनुष्यो वेदितुं लब्धुं प्राप्तुं नार्हति न योग्यो विद्वानेव योग्य इत्यन्वयः ।

देवलोकात्पितृलोकान्निरयाच्चापि यत्परम् ।
तिसृभ्यः परमं स्थानं वैष्णवं विदुषां गतिः ॥

इति वचनात् "विदॢ लाभे" इति धातुः "पदॢ गतौ" इति च अनेन वैष्णवपदप्राप्तौ ज्ञानमेव प्रयोजकं न कर्मादिकमिति सूचयति ॥ ३२ ॥

हरेः प्रसन्नतायां गुणोत्कर्षप्रकाशिका स्तुतिरेव प्रयोजिकेति पर्यवसिताः कतिपयगुणा एव प्रकाशन्त इत्यतोऽपेक्षिताशेषगुणप्रकाशनार्थं गद्यैः स्तुवन्ति । नमस्त इति । भगवद्रावित्यशब्देराविष्कृतगतये ते तुभ्यं नम इत्यन्वयः । परिव्राजकाश्चतुर्विधाः कुटीचकबहूदकहंसनिष्क्रिया इति तेषां मध्ये परमहंसाख्यपरिव्राजकैः परमेणोत्तमेनात्मयोगेन परमात्मध्यानेन यः समाधिश्चित्तैकाग्रता तेन परिभावितः प्रवर्धितः परिस्फुटितश्च प्रकाशितो यः पारमहंस्यनामा धर्मः ज्ञानाख्यः तेनोद्घाटितं तमःकपाटद्वारमज्ञानाख्यकपाटद्वारं येन सः । तथा तेनापावृते प्रकाशिते आत्मलोके वैकुण्ठादिनाम्नि स्वयमुपलब्धः अप्रयत्नेन दृष्टः यो भगवान् स्वरूपसुखानुभवस्तस्य तव विहारयोगः जगज्जन्मलयादिहेतुभूतक्रीडोपायो दुरवबोध इव त्वदनुग्रहमन्तरेण दुर्बोध एवेत्यर्थः । कुतो दुर्ज्ञान इति तत्राह । यदशरण इति । अशरणोऽधिष्ठानरहि-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तोऽशरीरो ज्ञानसाधनशरीररहितोऽप्राकृतत्वादनपेक्षितोऽस्मत्समवायः साहाय्यलक्षणो येन स तथा अगुणो निर्गुणः स्वयं स त्वमविक्रियमाणेन स्वतः परतो वा विकाररहितेनात्मनैव स्वभावेनैव भोगादिप्रयोजनमन्तरेणेदं जगत्सृजसि रक्षसि संहरसीति यद्यस्मात्तस्मात्कुलालादिविलक्षणत्वादिति भावः ॥ ३३ ॥ ३४ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ननु प्रत्यक्षतोऽनुभूयमानमिदं मद्रूपं विहाय गुणोपाधिकं यज्ञवीर्यत्वादिकं किमिति वर्ण्यते तत्राहुः । यस्त इति ॥ ३२ ॥

आत्मलोके स्वस्वरूपे लोके वैकुण्ठाख्ये ॥ ३३ ॥

तदेवं वैकुण्ठविहारो दुर्दर्शोऽपि युक्तिसिद्ध एव गुणातीतत्वादिना तव योग्यत्वात् । प्रपञ्चविहारस्तु युक्त्यतीतः । सगुणत्वादिना वैपरीत्यादित्याहुः । दुरवबोध इति । कुलालादिर्हि सगुणः किञ्चित् स्थानं समवायान्तरं चावलम्ब्य स्वशरीरञ्च प्रवर्त्य मृदादिवस्त्वन्तरेण सगुणं घटादिकं करोति पाति हरति त्वं त्वगुणश्चाविक्रिय एव च तत्तदवलम्बनादिकं विनैवेच्छामात्रेणात्मनैव च सगुणं प्रपञ्चमित्यर्थः । अशरण इत्यादिकं हि तदभिप्रायेणैवोक्तम् । इवेत्यचिन्त्यशक्तित्वादेव तदपि नातियुक्त्यगम्यमिति भावः ॥ ३४ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

स्वेषामीश्वरमन्यतामात्रं व्यञ्जयन्तो यज्ञैरस्मदाद्युपासकानां फलप्राप्तिविघातयोर्भवानेव हेतुरित्याहुः । नम इति । यज्ञस्य वीर्यं स्वर्गादिफलोत्पादनलक्षणः प्रभावो यस्मात्तस्मै स्वर्गादिफलप्रापकायेति भावः । उत पुनः वयसे कालाय स्वर्गादिफलनाशकाय च तथा अस्तचक्राय असुरेषु चक्रं क्षिप्त्वा तेषां निग्राहकाय अस्माकं पालकाय च । एवं स्वर्गादिप्रापक इति स्वर्गादिनाशक इति असुरसंहारक इति देवपालक इत्यादिनामभिः सुपुरुहूतिर्यस्य तस्मै ॥ ३१ ॥

ननु नश्वरतुच्छस्वर्गपदप्राप्त्यर्थमेव स्तुवध्वे न त्वनश्वरनित्यसुखमयवैकुण्ठार्थमत्र को हेतुस्तत्राहुः । यत्त इति । तिसृणां देवमनुष्यतिर्यग्गतीनामीशितुः प्रापकस्य तव यत् परमं पदं वैकुण्ठधाम तत् विसर्गस्यार्वाचीनोऽस्मादृशो जनो वेदितुमनुभवितुं नार्हति । न हि घासबुषादिकं विना पशुरन्यत् क्षीरादिकं वाञ्छति लभते वा कुतश्चिदिति भावः ॥ ३२ ॥

पुरुहूतय इत्युक्तमतो बहुभिर्नामभिः सम्बोध्य स्तुवते । नम इति । हे भगवन् ! षडैश्वर्यपरिपूर्ण ! परिपूर्णत्वमेवाहुः । हे नारायण ! त्वमेव स्वांशांशिकपक्रमेण व्यष्टिसमष्टिप्रकृत्यन्तर्यामित्वेन क्षीरोदगर्भोदकारणार्णवशायी भवसीत्यर्थः । ततोऽपि पूर्णत्वात् हे वासुदेव ! व्यूहानामादिभूत ! ततोऽपि परिपूर्णत्वात् हे आदिपुरुष ! परमव्योमनाथ ! ननु कथमेवमवगम्यते तत्राहुः । महापुरुषेषु तत्तद्भक्तेषु महान्तोऽनुभावा अनुरूपमहाप्रभावा एव यस्य सः ।

ननु महाप्रलये मद्भक्तमद्धाममदाकाराणां का वार्ता तत्राहुः । मङ्गलानि प्राकृतानि परममङ्गलानि अप्राकृतमङ्गलवस्तूनि त्वद्भक्तधामादीनि तेषां परमकल्याणं कुशलित्वं यतः । तेषां कालनियम्यत्वाभावादिति भावः । किञ्च । अपारैश्वर्यमाधुर्यसिन्धोस्तव करुणामेव बहिर्दर्शिनो वयं कालग्रस्यमाना आश्रयाम इत्याहुः । हे परमकारुणिक ! अन्तर्दर्शिभिस्तु भवानुपलब्धनिजसुखानुभव एव भवति । कदा । आत्मयोगैर्यमनियमादिभिर्यः समाधिश्चित्तैकाग्र्यं तेन परि सर्वतो भावेन भावितः । कुतः । परिस्फुटः पारमहंस्यधर्मो भक्तियोगस्तेन उद्घाटिततमःकपाटं द्वारं यस्य तथाभूते चित्ते चित्तमन्दिरे अपावृतः अपगतावरणः आत्मलोके वैकुण्ठधामनि वर्त्तमानः । चिरस्यैतादृशत्वे सति तन्मध्ये एव सह वैकुण्ठलोको भवान् स्फुरतीति भावः ॥ ३३ ॥

किञ्च । स्वीयवैकुण्ठलोके सदा विहरन्नात्मारामो गुणातीतोऽपि प्रपञ्चलोके अस्मदादिदुर्ज्ञेयप्रकारैः सृष्ट्यादिभिर्विहरसीत्याहुः । दुरवबोध इति । विहारयोगः क्रीडायुक्तत्वं दुरवबोध इवेति त्वद्भक्तविज्ञैः सुबोधोऽप्यन्यैर्दुर्बोध इत्यर्थः । कुतः यदशरणो निराश्रय एव अशरीरः शारीरचेष्टारहित एवेति । सृष्टिकर्त्ता हि साकार एव "सहस्रशीर्षा"इत्यादिश्रुतेः । न अवेक्षितम् अस्माकम् इन्द्रादीनां हस्ताद्यधिष्ठातॄणां समवायः साहाय्यं येन सः । आत्मनैव स्वेनैव आत्मन उपादानत्वेऽप्यविक्रियमाणेनैव विवर्तवादाङ्गीकारेऽत्वविक्रियमाणत्वं न चित्रं चित्रं खलु तदनङ्गीकार एव अत एव वक्ष्यते गजेन्द्रेण "नमो नमस्तेऽखिलकारणाय निष्कारणायाद्भुतकारणाय" इति कारणस्याद्भुतत्वमुपादानत्वेऽपि निर्विकारत्वमेवेति । अगुणः सन् सगुणं विश्वं सृजसि कुलालादिर्हि किञ्चित् स्थानमवलम्ब्य स्वशरीरं च प्रवर्त्य ससहायो मृदादिवस्त्वन्तरेण विक्रियमाणेनैव सगुण एव सगुणं घटं सृजतीति दृष्टमितीदमेकं दुर्ज्ञेयत्वं सृष्टौ ॥ ३४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

साक्षाद्भगवन्तं सर्वकर्मफलदं सर्वशक्तिं सर्वनामानं दृष्ट्वा कर्मकालादिकमीश्वरनैरपेक्ष्येण सुखादिहेतुं मन्यमाना बाला इति सूचयन्तो भगवन्तं प्रणमन्ति । नम इति । यज्ञस्य वीर्यं फलदाने सामर्थ्यं यस्मात्तस्मै वयसे तत्फलाभिव्यञ्जककालशक्तये यज्ञेतरफले च प्रतीपेषु अस्तं क्षिप्तं चक्रं येन तस्मै सुपुरुहूतये शोभनबहुनाम्ने ॥ ३१ ॥

ननु यज्ञवीर्याय नम इत्यादिना यज्ञफलभूतस्वर्गार्थिनो वयमिति सूचितं ननु मुक्तगम्यं मम धाम भवद्भिर्मत्तः प्रार्थितमित्यत्राहुः । तिसृणां स्वर्गापवर्गनरकगतीनामीशितुः प्रापकस्यापि तव यत्परमं पदं मुक्तगम्यं स्थानं विसर्गस्य विशेषतः सृज्यते स्वपादमूलप्राप्तिकामेषु तुच्छीकृतैहिकामुष्मिकपदार्थेषु इति विसर्गः कृपावलोकः तस्य अर्वाचीनः पाश्चात्यः अविषयमादृशो बुभुक्षुरित्यर्थः हे धातः ! तत्प्रेप्सायास्तु का कथा वेदितुमपि नार्हतीत्यर्थः ॥ ३२ ॥

भगवल्लोकः भगवत्कृपावलोकाविषयैर्दुर्ज्ञेय इत्युक्तमद्य विश्वसृष्ट्यादिरूपा भगवल्लीलापि तैर्दुर्ज्ञेया भगवत्कृपावलोकविषयैस्तु नित्यं हृदि निजलोकसहितो भगवान् सुज्ञेय एव विश्वसृष्ट्यादिलीला च सुज्ञेयेति वदन्तः नमः सुपुरुहूतये इत्यत्र सूचितानाम्

अथ तत्र भवान् किं देवदत्तवदिह गुणविसर्गपतितः पारतन्त्र्येण स्वकृतकुशलाकुशलं फलमुपाददात्याहोस्विदात्माराम उपशमशीलः समञ्जसदर्शन उदास्त इति ह वाव न विदामः ॥ ३५ ॥

न हि विरोध उभयं भगवत्यपरिमितगुणगण ईश्वरेऽनवगाह्यमाहात्म्येऽर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलान्तःकरणाश्रयदुरवग्रहवादिनां विवादानवसर उपरतसमस्तमायामये केवल एवात्ममायामन्तर्धाय को न्वर्थो दुर्घट इव भवति स्वरूपद्वयाभावात् ॥ ३६ ॥

समविषममतीनां मतमनुसरसि यथा रज्जुखण्डः सर्पादिधियाम् ॥ ३७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

बहूनां नाम्नां मध्ये कैश्चिन्नामभिः सम्बोध्य स्तुवन्ति । ॐ नमस्ते इत्यादिना हरसीत्यन्तेन गद्येन । हे भगवन् ! ते तुभ्यं नमः कथम्भूताय ॐ सर्ववेदबीजभूतप्रणववाच्याय प्रणवस्य परब्रह्मवाचकत्वात् "ओंतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः" इति श्रीमुखवचनात् । नमोयोगाच्चतुर्थ्यन्तोऽत्र प्रणवः अव्ययत्वाच्चतुर्थ्या लोपः भगवन्नित्यादीनि भगवन्नामानि स्पष्टार्थानि तत्र तत्र यथोपयोगं व्याख्यातानि च आत्मनः स्वस्य लोके "योऽस्याध्यक्षः स परमे व्योमन् । एते वै निरयास्तात । लोकस्य परमात्मनः" इत्यादिश्रुतिस्मृतिप्रसिद्धे अपावृते निरावरणे स्वयमुपलब्धः श्रुतः स चासौ निजसुखानुभवश्च स तथाभूतो यो भवान् स एव परमहंसपरिव्राजकैः परमहंसाः बहुजन्मकृतवर्णाश्रमोचितधर्मपूर्वकनानामोक्षसाधनविमलमतित्वेन भगवद्ध्यानसमुद्रनिमग्नतया विस्मृतार्दितरकृत्याः परिव्राजकाः चतुर्थाश्रमिणो हरिभक्ताः परमहंसाश्च परिव्राजकाश्च तैश्चिन्ते दृष्ट इति शेषः । कथम्भूते परमेहंसाश्च परिव्राजकाश्च तैश्चिन्ते दृष्ट इति शेषः । कथम्भूते परमे... आत्मनि भगवति युज्यते इति योगः स चासौ समाधिश्चेकाग्र्यं च तेन परिभावितः स्वनुष्ठितः परिस्फुटः प्रशस्तः परमहंसानां योग्यः पारमहंस्यो धर्मः सर्वात्मना भगवत्प्रावण्यं तेनोद्घाटितं तमो मालिन्यरूपं कपाटं यस्य तदेव द्वारं भगवद्दर्शनकरणं तस्मिन् ॥ ३३ ॥

अथ "यतो वा इमानि भूतानि जायन्ते स ऐक्षत बहुस्यां तदात्मानं स्वयमकुरुत अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते" । प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् १।४।२४। इत्यादिश्रुतिस्मृतिसूत्रसिद्धं भगवतो जगदभिन्ननिमित्तोपादानकारणत्वमाहुः । दुरवबोध इति । तत्र अयं विहारयोगः विश्वसृष्ट्यादिलीलायोगः दुरवबोधः दुर्ज्ञेयः । इवशब्देन भक्तप्रसादेन तु सुज्ञेय इति द्योत्यते । यद्यत आत्मनैव स्वेनैव स्वरूपेण अविक्रियमाणेन निर्विकारेण ऊर्णनाभिर्यथा निर्विकारेण स्वरूपेणैव तन्तुमयं स्वपूर्वं सृजति तद्वदिदं सगुणं विविधविचित्रगुणयुक्तं विश्वम् "देवात्मशक्तिं स्वगुणैर्निगूढां प्रधानक्षेत्रज्ञपतिर्गुणेशः" एषा परस्य शक्तिः "भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा । अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्" इत्यादिश्रुतिस्मृतिप्रसिद्धाभ्यां प्रकृतिभ्यां सृजसि पासि हरसि कुलालकुविन्दादयो गृहादियुक्ताः कायिकव्यापारवन्तः अपेक्षितभार्यादिसमवायाः रजआदिगुणवन्तः अन्तरात्मकेन मृत्पिण्डतन्त्वादिना घटपटादिकं सृजन्ति त्वं तु अशरणः आयतनानपेक्षः अशरीरः शारीरव्यापारानपेक्षः नापेक्षितोऽस्मत्समवायः साहचर्यं येन सः अगुणः रजआदिभिः निखिलैः प्राकृतैर्गुणैश्च रहितः ॥ ३४ ॥

भाषा टीका ।

देवता बोले यज्ञ फल के हेतु काल स्वरूप आपके अर्थ नमस्कार है दुष्टोंपर चक्र चलाने वाले अनेक नाम वाले आप के अर्थ नमस्कार है ॥ ३१ ॥

हे विधाता ! तीनों गुणों की गतियों के प्रेरक आप हो आपकी सृष्टि के पीछे पैदा होने वाला पुरुष हम सभी का आप की गति को नहीं जान सकता है ॥ ३२ ॥

हे नारायण ! भगवन् वासुदेव आदिपुरुष महानुभाव परममङ्गल परमकल्याण परमकारुणिक केवल जगदाधार लोकैकनाथ सर्वेश्वर लक्ष्मीनाथ, परमहंस परिव्राजक जन बडे भारी आत्मसमाधियोगसे निर्मल किये हुये अन्तःकरण में प्रकाशमान जो पारमहंस्यधर्म तिस से हृदय मे अन्धकार रूपी जो कवाट द्वार हैं तिन को खोल कर आत्मा के देखने योग्य जो चित्त तिस मे स्वयं प्राप्त सुख स्वरूप आप का अनुभव करते हैं ॥ ३३ ॥

आपका यह क्रीडा का विहार बडा आश्चर्य जनाने वाला है जिस से कि आप विना प्राकृत शरीर वाले हो विना आश्रय के हो इन्द्रियों के अधिष्ठाता हम देवतों के समूह को भी नहीं चाहते हो और किसी विकार को नहीं प्राप्त होकर भी स्वयं अपने स्वरूपही से प्राकृत गुण रहित होकर भी गुणमय संसार को सृजते हो पालते हो नाशकरते हो ॥ ३४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दुर्ज्ञेयान्तरमाहुः । अथ तत्रेति । यथेह देवदत्तो गृहादि निर्माय तत्र स्वकृतशुभाशुभयोः फलमुपादत्ते एवं भवान् ब्रह्मस्वरूपो जीवरूपेण गुणविसर्गं पतितः सन्नुपाददाति । यद्वा । समञ्जसमप्रच्युतं दर्शनं चिच्छक्तिर्यस्य स भवानुदास्ते उदासीनः साक्षितया वर्तत इति ॥ ३५ ॥

स एव हि पुनः सर्ववस्तुनि वस्तुस्वरूपः सर्वेश्वरः सकलजगत्कारणभूतः सर्वप्रत्यगात्मत्वात्सर्वगुणाभासोपलक्षित एक एव पर्यवशेषितः ॥ ३८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवं विरोधेन दुर्ज्ञेयत्वमुक्त्वा तत्परिहारेण ज्ञानप्रकारमाहुः । न हीति । विरुध्यत इति विरोधः । उभयं न विरुद्धमित्यर्थः । न ह्यन्यदृष्टान्तेन त्वयि विकल्पो युज्यतेऽतर्क्यैश्वर्यत्वादित्याहुः । भगवतीति । अपरिमिता गुणगणा यस्य तस्मिन्नीश्वरे स्वतन्त्रेऽनवगाह्यमतर्क्यं माहात्म्यं यस्य तस्मिन् । विकल्प एवं वा एवं वेति वितर्कः किमत्र युक्तमिति विचार इत्थमेवेति तत्र प्रमाणाभासास्तदनुग्राहकाः कुतर्काश्चार्वाचीना वस्तुस्वरूपासंस्पर्शिनो ये विकल्पादयस्ते येषु शास्त्रेषु तैः कलिलं व्याकुलमन्तःकरणमाश्रयो यस्य दुरवग्रहस्य तेन वादिनां विवादस्यानवसरेऽगोचरे । ननु श्रद्धामात्रमेतत् । युक्तिरुच्यतां तत्राहुः । उपरतो मायामयः संसारो यस्मिंस्तस्मिन् केवलेऽध्यात्ममायां मध्ये निधाय को न्वर्थः कर्तृत्वादिर्न सम्भवति यदि वस्तुतः कर्तृत्वादि भवेत्तर्हि विरोधः स्यान्न तु तदस्तीत्याहुः । स्वरूपद्वयाभावादिति ॥ ३६ ॥

अनुग्रहनिग्रहादिकं तु तत्तन्मतिभेदेन त्वन्मायया त्वयि स्फुरतीत्याहुः । समा विषमा च मतिर्येषां तेषां मतमभिप्रायम् । सर्पादिविषया धीर्येषां तेषां यथा रज्जुखण्डस्तथा तथा भाति । यद्वा । तमेवाविरोधं पुरुषमतिभेदेन दर्शयन्ति । समाविषमेति ॥३७॥

तदेवं विरोधं परिहृत्य निश्चितं परमार्थमाहुः । स एव हि नानारूपेण प्रतीतः । वस्तुस्वरूपः सद्रूपः सर्वेषां गुणानां विषयाणामाभासैः प्रकाशैरुपलक्षितः । ननु तैर्जीव एवोपलक्ष्यते । न । सर्वप्रत्यगात्मत्वात्सर्वजीवान्तर्यामित्वात् । जडतादात्म्याध्यासेन जीवस्यापि जडप्रायत्वान्न तेन विना प्रकाश इति भावः । पर्यवशेषितो "नेति नेति„ इत्यादिश्रुतिभिः ॥ ३८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु सत्यमीश्वरः सृष्ट्यादिकर्तेत्युक्तं स किं कर्मनिष्ठचेतनो यथा कुशलाकुशलमिश्रकर्माणि कृत्वा तत्फलानि सुखदुःखमोहात्मकानि भुङ्क्ते तथा सृष्ट्यादिकर्माणि गुणत्रयप्रयुक्तानि कृत्वा तत्फलानि भुङ्क्ते । किं वा ज्ञाननिष्ठचेतनवदुदासीन एवास्ते । नाद्यः भोक्तृत्वेन संसारित्वापातात् । न द्वितीयः उदासीनस्य कर्तृत्वानुपपत्तेः । अथोदासीनत्वं कर्तृत्वं चोच्यत इति चेन्न । परस्परविरुद्धत्वादनयोरित्याशङ्कते । अथेत्यादिना उदास्त इत्यन्तेन गद्येन । अथ ननु तत्र जगत्सृष्ट्यादिकर्तृत्वे सति हे भगवन् ! किंशब्द आक्षेपद्योतकः । आहोस्विच्छब्दश्च प्रश्नस्वरूपपरमपि वाक्यद्वयमाक्षेपगर्भम् । किं भवान् देवदत्तवत् कर्मनिष्ठसंसारिजीववदिह गुणविसर्गे त्रिगुणकार्यरूपे प्रपञ्चे पतितः स्वातन्त्र्येण कर्तृत्वेन हेतुना स्वेन कृतानि कुशलाकुशलानि सात्त्विकराजसादीनि कर्माणि तेषां फलमुपाददाति स्वीकरोति भुङ्क्त इति यावत् । आहोस्वित्किंवा आत्माराम इवात्मयाथात्म्यानुभवनिष्ठ इव उपशमस्वभावः निवृत्तान्तर्बाह्येन्द्रियव्यापारः । अत एव समञ्जसदर्शनः अबाधिततत्तद्वस्तुयाथात्म्यज्ञान उदास्त इति परिहारं प्रतिजानीते । इतीति । इतीत्थमिह त्वयीश्वरे न विदामः न जानीमः कर्मनिष्ठचेतनतुल्यतां ज्ञाननिष्ठचेतनतुल्यतां च न विदाम इत्यर्थः । किन्तूदासितृत्वं कर्तृत्वञ्चोभयमपि त्वयि विदाम इति भावः ॥ ३५ ॥

ननु परस्परविरुद्धमुभयमेकस्मिन् कथमुपपद्यते इत्यत्राहुः । न हि विरोध इति । न विरोधः अपि तूभयं भवति सम्भवति । कर्मभावनया ब्रह्मभावनया चान्वितानां सर्वेषां चेतनानामन्तरात्मभूते तद्विलक्षणे विविधविचित्रशक्तिमति त्वयि सर्वमविरुद्धमित्यभिप्रायः । अविरोधापादकगुणजातेन तं विशिंषन्तो वादिविप्रतिपत्त्यविषयताञ्च वदन्तोऽविरोधमुपपादयन्ति भगवतीत्यादिना । भगवतीत्यादिभिः सप्तम्यन्तैः पदैः कर्मब्रह्मोभयभावनान्वितचेतनेभ्यो वैलक्षण्यमुच्यते भगवति पूर्णषाड्गुण्येऽपरिगणिता असङ्ख्याता गुणानां कल्याणगुणानां गणा यस्य ईश्वरे भावनाद्वयान्वितचेतनानामन्तरात्मन्यनवगाह्यं कर्मादिभावनान्वितचेतनसजातीयत्वेन दुर्बोधं माहात्म्यं यस्य अर्वाचीना इदानीन्तनाः विकल्पः संशयः तन्मूलको वितर्कः एवं वा एवं वेति वितर्कः तत्र यो विचारः किं युक्तमिति विचारः तदन्यतरपक्षसाधकाः ये प्रमाणाभासाः प्रमाणवदाभासमानाः तन्मूलकं यद्बाधिततर्कात्मकं शास्त्रं तदभ्यासेन कलिलं दूषितमन्तःकरणं तेनाधिकरोतीत्यधिकरणः नन्द्यादित्वात्कर्तरि ल्युः प्रारम्भणः उत्पन्न इति यावत् । स दुरवग्रहो दुराग्रहो येषां तेषां वादिनां विवादानवसरे विवादाविषयभूते उपरताः निरस्ताः समस्ता मायामयाः प्राकृतदोषा यस्मिन् । प्रलयदशायामुपसंहृतकार्यवर्गोऽत एव केवले एकरूपे मायां प्रति स्वयमन्तर्धाय तिरोभूय स्थिते को न्वर्थो दुर्घट इव भवति कर्तृत्वकारयितृत्वसाक्षित्वानुमन्तृत्वफलित्वफलप्रदत्वोदासितृत्वादिरूपः कोऽप्यर्थो न दुर्घट इत्यर्थः । कुतः । स्वरूपद्वयाभावात् । स्वरूप द्वयस्य विरुद्धाकारद्वयस्याभावात् कर्तृत्वोदासितृत्वयोः परमात्मस्वरूपे विरोधाभावादित्यर्थः । अयं भावः । तावज्जगत्सृष्ट्यादिव्यापारेषु स्वातन्त्र्यरूपं कर्तृत्वं प्रयोज्यकर्तुर्जीवस्य कारयितृत्वात्प्रेरकत्वरूपं प्रयोजककर्तृत्वं चेश्वरस्योपपन्नम् । न च कर्तृत्वसमनियतभोक्तृत्वापत्तिः तादृशकर्तृत्वस्य कर्माधीनत्वात्प्रशासित्रन्तराभावाच्च सर्वस्य शासितुरीश्वरस्येश्वरान्तराभावेनानिष्टकर्तुरभावाच्च स्वानिष्टापादकं कर्म स्वयमेव करोतीति वक्तुं युक्तमुक्तान्तत्वापाताच्च तथा लोके यथा सर्वाङ्कुराणां साधारणकारणं सलिलं विशेषकारणं बीजं दृष्टमेवं सर्वेष्वपि कार्येषु समानत्वादुदासीनः । ननूदासितृत्वं नाम न साधारणकारणत्वमपि तु कर्तृत्वाकर्तृत्वोभयपरिहारेण अवस्थातृत्वमिति चेन्न । जगद्विषयकोदासितृत्वानभ्युपगमात् । तत्र कर्तृत्वमेव हि साक्षादभ्युपगतमस्माभिः । तर्हि यद्विषयकमुदासितृत्वमीश्वरेऽभ्युपगतमिति चेदुच्यते साक्षात्सुखदुःखादिसाधनभूत-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पुण्यापुण्यकर्मस्वकर्तृत्वेन तत्कर्तृत्वपरिहारात् तेष्वेव कर्मसु प्राचीनवासनानुसारेण जीवप्रेरकत्वेनाकर्तृत्वपरिहाराच्च तद्विषयकमुदासितृत्वमिति । एवं सर्वावस्थायां सर्वस्य द्रष्टृत्वात्साक्षी कर्मसु प्रवृत्तस्य जीवस्योत्तरोत्तरं प्रवर्त्तकत्वादनुमन्ता सर्वस्वामित्वेन समाश्रितसंरक्षणरूपफलस्यापि स्वफलत्वात्फली फलमत उपपत्तेः ।३।२।३९। इति न्यायेन फलप्रद इति जीवस्तु क्लेशकर्मादिहेयाकरत्वात्कर्मवश्यत्वान्मायामोहितत्वादविद्यया तिरोहितस्वभावत्वाच्च कुशलाकुशलफलमुपादत्त इति ॥ ३६ ॥

ननु विवादानवसरश्चेदहमीश्वरः तर्हि कथं विवादानामुदयस्तत्राहुः । समेति । समा विषमा च मतिर्येषां तेषां मतमभिप्रायमनुसरसि वादिविप्रतिपत्तीरप्रतिषिध्य तूष्णीं भवसीत्यर्थः । अप्रतिषेधे दृष्टान्तमाहुः । यथेति । यथा सर्पादिधियां सर्पादिभ्रान्तिमतां मतं रज्जुखण्डोऽनुसरति न प्रतिषेधते एवं त्वं चापि नानाविधवादिविप्रतिपत्तिसाक्षी तूष्णीमास्से इत्यर्थः ॥३७॥

एवं जगत्स्रष्टृत्वरूपनिमित्तकारणत्वे जीववत्संसारित्वादिशङ्का परिहृता अथोपादानकारणत्वे स्वरूपे विकाराश्रयत्वशङ्कां परिजह्रुः । स एवेति । योऽयं निमित्तकारणभूतः स एव त्वं सकलजगदुपादानकारणभूतोऽपि सर्ववस्तुषु देवादिपदार्थेषु स्थितोऽपि वस्तुस्वरूपः निर्विकारस्वरूपः यथोक्तम् "यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै । परिणामादिसम्भूतां तद्वस्तु नृप ! तच्च किम् " इति कुतः सर्वप्रत्यगात्मत्वात्सर्वे प्रत्यगात्मानः शरीरं यस्य तस्य भावस्तत्त्वं तस्मादचेतनविशिष्टसर्वजीवशरीरकत्वाच्छरीरभूतचिदचिद्गतत्वाद्विकाराणां न स्वरूपे प्रसङ्ग इति भावः । अत एव सर्वगुणाभासः सर्वैश्चिदचित्कालादिभिरपृथक्सिद्धविशेषणैरवभासत इति सर्वगुणावभासः साक्षादवस्थाश्रयचेतनाचेतनविशिष्टत्वेनोपलक्षित इति भावः । समस्तपाठे गुणैः सत्त्वादिभिरवभासन्त इति गुणावभासाः गुणकार्यदेहेन्द्रियादयः तैरुपलक्षितः तद्विशिष्टत्वेनोपलक्षितः इत्यर्थः । अतस्त्वमेक एव पर्यवशेषितः एक एव समाभ्यधिकरहितः पर्यवशेषितः एवं विधो नान्य इति निर्णीत इति भावः ॥ ३८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवत्स्वरूपनिर्धारणार्थं पूर्वपक्षयन्ति । अथेति । सृष्ट्यादिकर्मणि प्रवर्तमानो भगवान् अथेह गुणविसर्गपतितः संसारान्तःपाती देववत्तत्परवशतया स्वकृतपुण्यापुण्यफलमुपादत्ते किमथवोदास्ते नोपादत्ते किम् । कुतः । आत्मारामः स्वमहिम्नि स्थितः उपशमशीलः पूर्णानन्दानुभवः समञ्जसदर्शनः शुद्धज्ञानः एते प्रत्येकं हेतवोऽनुपादाने भवन्तीति न विद्मो ह वाव न बुध्यामहे ह वावेत्येताभ्यामज्ञानिन एवं वदन्तीति सूचयन्ति न ज्ञानिन इति । कस्मिन् सति किं स्यादिति तत्राहुः । न हीति । कुशलाकुशलस्योपादानमनुपादानं चेत्युभयमितरत्र विरुद्धमत्र न हि विरोधः । कथं तत्राहुः । भगवतीति । भगवति को नु दुर्घट इव भवति सर्वः सुघट एवेत्यन्वयः । सौघट्यं बहुभिर्विशेषणैरुपपादयन्ति । अपरिगणितेति । न परिगणिताः गुणानां गणा यस्य स तथा तस्मिन् कुत इत्यत्राहुः । ईश्वर इति । अघटितघटकत्वशक्तिमत्त्वाद्युक्तमित्यर्थः । इतोऽपि गुणानाम् अगणितत्वं युक्तमित्याहुः । अनवगाह्येति । अपरिच्छेद्यमहिमत्वात् अयमीशः (१) स्वस्वेतरवृत्तित्वानाक्रान्तपरिच्छिन्ननिष्ठाधिकरणमेयत्वाद् घटवदित्यादिमहाविद्यालक्षणवितर्केण देवदत्तवदयं कुशलाकुशलभोक्ता न वेति विकल्पेन । अत्र कर्मणः पुरुषार्थहेतुत्वसमर्थनादस्ति शास्त्रादिसङ्गतिरित्यादिलक्षणमीमांसया अथास्मिन् गुल्मे व्याघ्रोऽदर्शीत्यादिविद्यमानेन प्रमाणवदवभासमानेन यदीशो दुर्गमशरीरे स्थितस्तर्हि देवदत्तवत्तद्गतदुःखभोगः प्रसज्येत इत्यादिकुतर्केण (२) चावगाह्यमाहात्म्यत्वादिति (३) तत्राहुः । अर्वाचीनेति । अर्वाचीना व्याप्त्यादिरहिताः विकल्पादयो येषु तानि तथोक्तानि तैः शास्त्रैः वैशेषिकादिभिः कलिलेन व्याकुलितेनान्तःकरणेन मनसा दुरवग्रहो येषां ते तथा ते च वादिनस्तेषां विवादानवसरे विप्रतिपत्त्यगोचरे इतोऽपि विवादाविषय इत्याहुः । उपरतसमस्तेति । केवलस्वात्ममायाम् अद्वन्द्वरूपसामर्थ्यमन्तर्धायावष्टभ्योपरतसमस्तमायामये प्राकृतस्वभाववर्जिते एवम्विधेऽपि पुण्यापुण्यभोक्तृत्वं वयं न विद्महे । ये वदन्ति ते मूढाः असुरप्रकृतय इत्यभिप्रेत्य स्वयमेव समादधते । स्वरूपेति । "एकमेवाद्वितीयं निरनिष्टो निरवद्यः„ इत्यादिश्रुतेः । सुखी दुःखीत्यादिस्वरूपद्वयानुपपत्तेः न चायं संशयः सुराणां स्वतन्त्रः परतन्त्रो वाज्ञो ज्ञो दुःखी सुखी नु किं इत्यादिसंशयः क्व स्याज्ज्ञानिनां पुरुषोत्तम इति विरोधात्तर्हि ज्ञानिनः कथं वदन्ति चेदुच्यते । अनन्तगुणत्वात्पूर्णशक्तित्वाच्च स्वातन्त्र्यादिकमेव जानन्ति । तदुक्तम् ।

> तस्यानन्तगुणत्वाच्च पूर्णशक्तित्वतो हरेः ।
> स्वातन्त्र्यादिकमेवास्य विदो जानन्ति निश्चयात् ।

इति निरवयवस्य जीवस्य पुण्यापुण्यभोक्तृत्वं युज्यते ।

> घटकत्वाद्दुर्घटस्य दुर्ज्ञेयत्वाच्च सर्वशः ।
> तच्छक्तेरविदो जीवं परतन्त्रं वदन्त्यमुम् ।
> एवं दुर्घटया शक्त्या ज्ञोऽज्ञानां परमेश्वरः ॥

इति वचनात् । यद्वा । पारतन्त्र्येण कुशलाकुशलादिकमनुभवति किम् उत स्वातन्त्र्येणोदास्त इति संशयं न विद्मः किं त्वनन्तशक्तेरनन्तगुणस्य हरेः पारतन्त्र्यादिकं कुतो घटत इति निश्चिनुमः अस्मिन्नर्थे च स्वतन्त्रः परतन्त्रो वाज्ञो ज्ञो दुःखी सुखी नु किम् इत्यादिमानमनुसन्धेयमितोऽपि न घटत इत्याहुः । न हीति । विरोधो हि यस्मात्तस्मादुभयमेकस्य न युक्तमित्यर्थः । ननु निर्गुणस्य हरेः गुणित्वम् अकिञ्चनस्येशितृत्वं

---

(१) अत्रसाध्ये स्वपदद्वयं बुद्धिस्थात्मपरमेव । परिच्छिन्ने निष्ठा आधेयता यस्येति व्युत्पत्त्या परिच्छिन्नत्वसमानाधिकरणइत्यर्थः । अनाक्रान्तेत्यन्तमस्य विशेषणं तथा च आत्मवृत्तित्वात्मेतरवृत्तित्वैतदुभयाभाववान् यः परिच्छिन्नत्वसमानाधिकरणो धर्मः तदधिकरणत्वं साध्यमिति दृष्टान्ते घटत्वादिधर्ममादाय साध्यसत्त्वनिर्वाहः । पक्षे आत्मत्वादिधर्ममादाय साध्यसिद्धावपि तस्य परिच्छिन्नत्वासिद्धेः तत्सामानाधिकरण्यस्य निवेशः ।

(२) परिच्छेद्यमाहात्म्यत्वात् ।

(३) तद्गुणानामपरिच्छिन्नत्वं कथमित्यपेक्षायाम् ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वव्यतिरिक्तरहितस्य माहात्म्यम् अवाङ्मनसगोचरस्य विचारविषयित्वम् अकर्तुः कर्तृत्वमित्यादि सर्वं दुर्घटमिति तत्राहुः । भगवतीति । तर्हि उपाधिभेदाद्दौर्घट्यपरिहारोऽस्त्विति तत्राहुः । स्वरूपेति । ननु "मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा" इत्यादि कथं सङ्गच्छत इति चेत्तत्राहुः । समेति । सममतीनामनन्तं सच्चिदानन्दलक्षणं ब्रह्मेति यथार्थबुद्ध्यानुसरसि तथात्वेन प्रकाशस इत्यर्थः । विषममतीनामसुरप्रकृतीनां मतमभूतिरित्यसुरा इति मिथ्याबुद्ध्या दुःखी छिन्नो विद्ध इत्याद्याकारेण दृश्यस इत्यर्थः । अत्र दृष्टान्तमाहुः । यथेति । यथा रज्जुखण्डः सर्पोऽयमिति मन्दान्धकारे मन्दितेन्द्रियस्य ज्ञानं स एव पुनरालोकादिना लोकिते स्थले निर्दुष्टेन्द्रियस्य रज्जुखण्ड एष इति तदुक्तम् ।

यथा रज्जुः सर्पधिया रज्जुबुद्ध्यावगम्यते ।
तथा यथार्थबुद्ध्या वा मिथ्याबुद्ध्यावगम्यते ॥
स्वेच्छयैव महाविष्णुः फलदश्चानुसारतः ।

इति तथा स एव पुनर्भगवान् सर्ववस्तुषु वस्तुस्वरूपोऽप्रतिहतस्वरूपः "वासनाद्वासयेद्वस्तु नित्याप्रतिहतत्वतः" इत्यादेः तादात्म्यं किं न स्यात्तत्राहुः । सर्वेश्वर इति । प्रत्यगात्मत्वेन सर्वेश्वरत्वं हरेरेवेत्याहुः । सकलेति । ननु कुलालादिवद्ब्रह्मकारणत्वमस्तु नान्तः परिच्छिन्नत्वापत्तेः । तथा च सकलकारणकारणत्वमयुक्तमत्राहुः सर्वप्रत्यगिति । सर्वेषामपि प्रत्यगात्मत्वेनान्तर्यामित्वेन तत्तद्वस्तुतच्चेष्टादिकारणत्वेन, अपरिच्छिन्नस्यापि आकाशवदुपपत्तेः तदन्तःस्थस्य तत्तद्दृष्टप्राप्यदौर्भाग्यप्राप्तिः स्यादत्राहुः । सर्वेति । सर्वगुणानामाभासेन सम्यक्प्रकाशेनोपलक्षितो ज्ञानिभिः सम्यग्दृष्ट इतरैरनुमीयत इत्यर्थः । न च स्थानभेदात्तस्य भेद इत्याहुः एक इति । "स वा एष आत्मा नेति नेति" इत्यादिपारिशेष्यलक्षणप्रमाणात् एक एवेति निश्चित इत्यर्थः । महतामनुभवापरपर्यायसाक्षिप्रत्यक्षं हरेरेकत्वे निर्दोषत्वे संसारनिवर्तकमहामहिमत्वे प्रमाणमाहुः । अथेति । विप्लुषा विन्दुना असकृल्लीढया निरन्तरसेवितया नितरां स्यन्दमानेन निरवरतेन निरन्तरेण स्वरूपसुखेन हे मधुमथन ! यस्मात्त्वं सर्वोत्तमः सर्वगुणपूर्णः सर्वात्मना निर्दोषः सर्वान्तर्यामी अथ तस्मादेकान्तिनो हरावर्पितशरीरेन्द्रियप्राणसर्वस्वाः भागवताः ये एते कथं त्वच्चरणाम्बुजसेवां विसृजन्ति एवेत्यन्वयः । ह वाव इत्येतैर्निपातैः "परमः परार्ध्यः" इति श्रुतेः महिम्नः परमपरार्ध्यत्वं सूच्यते सर्वभूतप्रियाः संन्यासिनोऽज्ञातशत्रवस्तेषां सुहृत् सर्वभूतानां परेणाभीष्टकर्तृत्वात् प्रियश्च सुहृच्च परेयं प्रियनामेति वचनात् निरन्तरं सन्तुष्टमनसः अविसर्जने कारणमाहुः । स्वार्थेति । यत्र त्वच्चरणाब्जसेवायां परिवर्तैः परिभ्रमणं स्वाभिप्रायं विज्ञापयितुमुपोद्घातमाहुः । त्रिभुवनेति । त्रिभुवनमेवात्मभवनं यस्य स तथा त्रिभुवनस्य य उपद्रवः सोऽवश्यं परिहर्तव्य इति द्योतनायेदं विशेषणमिति ज्ञातव्यम् । एवमेवोत्तरविशेषणानि आभिप्रायगर्भाणि त्रीणि नयनानि यस्य स तथा नृसिंह इत्यर्थः "विष्णोर्नृसिंहनामानि त्रिनेत्रोग्रादिकानि तु" इति वचनात् नृसिंहसुदर्शनादयस्त्रिनेत्रादिनामानः त्रयो लोकास्त्रिलोकविषयाः ज्ञानलक्षणाः प्रकाशाः यस्य स तथा सर्वज्ञ इत्यर्थः । त्रिलोकस्य त्रिलोकनिवासिनो जनस्य मनोहरोऽनुभावो यस्य स तथेति वा "मायागुणव्यतिकराद्यदुरुर्विभासि" इति वचनाद्विभूतय इत्युच्यन्ते देवादयो न तु स्वरूपत्वात् अपिशब्दान्मत्स्यादय एव साक्षाद्विभूतय एव गम्यन्ते "विविधभावस्य पात्रत्वात्सर्वे विष्णोर्विभूतयः" इति च ये विभूतिशब्दवाच्या दितिजादयोऽभूवन् तेषामनुपक्रमसमयः क्षयप्रारम्भकालोऽयमिति मत्वा स्वात्ममायया स्वरूपभूतेच्छया स्वमहिम्ना शुक्रशोणितसम्बन्धमन्तरेण वा सुराद्याकृतिभिरवतीर्य यथापराधं त्रैलोक्यापहरणादिलक्षणापराधमनुसृत्य बल्यादीनां धृतवानसीत्यन्वयः । मिश्रिताकृतिभिर्नरसिंहादिभिः सुराद्याकृतिभिरित्यनेन विभूतित्वं विवृतमिति ज्ञातव्यम् । किं बहूक्तेनापेक्षितं वक्तव्यमिति तत्राहुः । एवमिति । यदि मन्यसे कर्तव्यं तर्हीति शेषः । किं चेदं कर्तव्यमिति प्रार्थयन्ते । अस्माकमिति । हृदयनिगडानां हृदयाख्यशृङ्खलानां चक्रशङ्खादिलाञ्छनानां स्पष्टतया धारणात्मसात्कृतानां तद्भक्तानामनुकम्पया रञ्जितं स्निग्धं च विशदं निर्मलं च रुचिरं चारु च शिशिरं शीतलं च यत्स्मितं तेन युक्तेनावलोकनेन निरीक्षणेन विगलितं निर्गतं च मधुरं च मधुरितं मुखरितं मन्द्रं च यद्वचस्तेनामृतकलया युक्तेनेति शेषः । वचोलक्षणयामृतकलयेति वा बुभुक्षितबालवत्सर्वज्ञस्य तव हृदयस्यातिरेकादुत्क्वथितमिव यद्विज्ञापनमस्मदीयं तदस्मदज्ञाननिमित्तमित्यभिप्रेत्याहुः । अथेति । दिव्यमायया स्वरूपेच्छया विनोदो लीला यस्य स तथा निकायानां राशीनां ब्रह्मस्वरूपेण बहिः प्रत्यगात्मस्वरूपेणेति यथा देव्यादिक्रियाविशेषणं तेषां देशकालादीनामुपादानोपलम्भकतया कारणत्वप्रापकत्वेनोपादानत्वेनोपालम्भकत्वेनेति वा सर्वमनुभवतः आकाशशरीरस्याकाशवत् सूक्ष्मरूपस्य "आकाशशरीरं ब्रह्म" इति श्रुतेः लिङ्गशरीरस्य व्यावृत्त्यर्थं परब्रह्मण इति मुक्तजीवस्य व्यावृत्त्यर्थं साक्षादिति । साक्षात्परब्रह्मत्वं चित्प्रकृतेरप्यस्तीत्यतः परमात्मन इति । हिरण्यरेतसोऽग्नेः महाप्रकाशस्य विस्फुलिङ्गादिभिरल्पप्रकाशैरग्निकणैः खद्योतैश्च यतस्त्वमस्माकं सर्वापदां परिहर्तासि अतो वयं यत्कामेन त्वच्छरणलक्षणवाञ्छया तव पादकमलच्छायामुपगताः तदुपसन्नानाम् "अधीहि भगवो ब्रह्म" इति समित्पाणिशिष्यवच्छरणं गतानामस्माकं तत्कार्यमुपकल्पय समर्थस्त्वमित्यन्वयः । बहुप्रार्थनेनैव स्वाभीष्टफलप्राप्तिः स्यादिति दर्शयितुमेवं गद्येन विज्ञापितमेव पद्यप्रबन्धेन विज्ञापयन्ति । अथो इति । तेजांसि सामर्थ्यलक्षणानि ॥ ३५—४४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

किन्त्विदं तु निर्णेतुं न शक्नुम इति बहिर्मुखानाक्षेप्तुं सोल्लुण्ठमाहुः । अथेति । तत्र सृष्ट्यादौ कर्मणि देवदत्तवत् संसारिजीवविशेषवदविद्यया गुणविसर्गपतितः सन् स्वकृतशुभाशुभयोः फलं देवतिर्यगाद्यवतारूपमुपादत्ते । आहोस्विदथवा तद्वदेव तत्स्वरूपत्वेऽपि विद्यारमारामः सन्निस्यादि ॥ ३५ ॥

यत्र विद्या सम्भाव्यते तत्राविद्यापि सम्भाविता स्यादिति मायाशक्तिवृत्तिविद्याशक्तिमयेश्वरवादिनामुपहासार्थमिदमुक्तवन्तः । स्वमतं पुनः स्फूर्त्तिमभिनयन्त इवाहुः । न हीति । उभय-

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मपीदं विरुद्धं भगवति नैव विद्यते । तत्र हेतुः । स्वरूपद्वयाभावात् । संसारिजीववद्बद्धत्वमुक्तत्वावस्थाविशेषाभावात् । बद्धत्वे हि मुक्तत्वं तथा दिव्यातिदिव्यतत्तदवतारादिलक्षकोऽप्यर्थो दुर्घटो न भवति । यतः आत्ममायां निजेच्छाशक्तिमन्तर्ज्ञाय मध्ये निधाय तत्र तत्र सहायत्वेन सम्पाद्य तिष्ठति सतीत्यर्थः । उभयत्र हेतवो भगवतीत्यादयः ॥ ३६ ॥

तर्हि कथमन्यथा प्रतीतिर्बहिर्मुखानां तत्राहुः । समेति । अनिश्चितबुद्धीनामित्यर्थः । तदेव स्थापयितुं जीवन्मुक्ताद्वैलक्षण्यमाहुः । स एव हीति ॥ ३७ ॥ ३८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

शिष्टानां पालनं हि दुष्टानां संहारं विना न भवतीत्यन्तर्भूतसंहारस्य पालनस्यापि दुर्बोधत्वमाहुः । अथेति । देवदत्तः प्राकृतजीवो यथा गृहादिकं निर्माय तत्र मित्रशत्रूदासीनादिगहने संसारे प्रविश्य स्वकृतधर्माधर्मफलं सुखदुःखं भुङ्क्ते तथैव तत्र भवानित्यादरे त्वमपि गुणेभ्यः सत्त्वरजस्तमोभ्यो विविधः सर्गो येषां तेषु गुणविसर्गेषु देवासुरराक्षसादिषु परस्परविघातिषु मध्ये पतितः उपेन्द्रकृष्णरामाद्यवतारेषु शिष्टपालनदुष्टनिग्रहयोः प्रवृत्तः भोगैश्वर्यसुखं सङ्ग्रामादिश्रमदुःखञ्च यत् प्राप्नोषि तत् किं पारतन्त्र्येण कर्माधीनत्वेन स्वकृतयोः पुण्यपापयोः कुशलाकुशलं सुखदुःखमुपाददाति स्वीकरोति आहोस्वित् किं वा समञ्जसदर्शनः अप्रच्युतचिच्छक्तिकः उदास्ते साक्षित्वाच्च सुखं दुःखं स्वीकरोतीति न विदामः तत्त्वं न विद्मः ॥ ३५ ॥

विरोधमुक्त्वा भक्तानां मते तस्य परिहारमाहुः । नहीति । विरुध्यतइति विरोधः । उभयम् आत्मारामत्वमप्राकृतसुखदुःखित्वं च त्वयि न विरुद्धमित्यर्थः । नह्यन्यदृष्टान्तेन त्वयि विकल्पो युज्यते अतर्क्यैश्वर्यत्वादित्यविरोधे हेतूनाहुः । भगवतीत्यादि । प्रथमं सुखदुःखित्वं भगवतीत्यादिपदद्वयेनाहुः । भगवतीति "ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः" इति वैष्णवोक्तेरप्राकृतज्ञानादिषडैश्वर्यवत्त्वेनाज्ञानमूलकं सर्वमेव प्राकृतं सुखदुःखं त्वयि नास्तीत्यवगतम् । ननु तर्ह्यन्ये सुखदुःखे मयि कुतस्त्ये तत्राहुः । अपरिगणितगुणानां प्रेमवश्यत्वभक्तवात्सल्यादीनां गणा यस्मिन् तेन असुरराक्षसादिभ्यस्त्वद्भक्तानां प्रह्लादविभीषणादीनां पाण्डवयादवादीनां नित्यपार्षदानां साधकभक्तानामप्यनन्तानां भक्ताभासानामस्मदादिदेवानाञ्च कष्टे वृत्ते सति तदादुष्टसंहारार्थं विविधप्रयासज्ञापितस्य त्वदीयदुःखस्य तथा तेषामेव तदाद्विपदुरीणानामवग्रहजाज्वल्यमानसस्यानां कादम्बिनीवृष्यमाणामृतसिक्तानामिव लब्धभवद्दर्शनानां परमसुखे वृत्ते सत्यद्भुतस्य तव सुखस्य च भक्तवात्सल्यप्रेमवश्यत्वैकनिदानत्वादप्राकृते एव ते सुखदुःखे भवतः । किञ्च । सुखदुःखे अपि ते चिन्मयसुखरूपे एव प्रेमाख्यच्छक्तिसारवृत्तित्वात् । किं पुनर्व्रजदेव्यादीनां वैदेह्याश्च सम्भोगविप्रलम्भजनिते सुखदुःखे ते तु प्रेमपरमकाष्ठामयत्वात् परमसुखरूपे एव स्तः । ततश्च चित्स्वरूपस्य तव चित्स्वरूपयोः सुखदुःखयोः रममाणस्यात्मारामत्वं सुखदुःखवत्त्वमैक्यादविरुद्धमेव प्रतिपादितम् । नन्वेवं कैरपि दार्शनिकैर्नाहं निरूप्ये तत्राहुः । ईश्वरे त्वयि ईशितव्यानां तेषां "निरूपणायोग्यता युक्तैवेति भावः । यतोऽनवगाह्यम् "भक्त्याहमेकया ग्राह्यः" इति त्वद्वचनात्तेषां भक्तिहीनानामवगाहनानर्हं माहात्म्यं यस्मिन् । ननु युष्मत्प्रतिपादिते मत्षडैश्वर्याणां प्रेम्णश्च चिन्मयत्वे तैर्बहह्वय एवानुपपत्तयः उद्भाव्यन्ते तत्राहुः । अर्वाचीना वस्तुस्वरूपासंस्पर्शिनो विकल्पादयो येषु शास्त्रेषु तैः कलिलं व्याकुलं यदन्तःकरणमाशयः तत्र आशेरते सदैव शयित्वा तिष्ठन्ति ये दुरवग्रहाः दुराग्रहास्तैरेव वादिनां नानावादोद्ग्राहवतां विवादस्यानवसरे अगोचरे तत्र विकल्प एवं वा एवं वेत्याकारः वितर्कः किमत्र युक्तमित्यनिश्चयः विचार इत्थमेवेति निश्चयः । तत्र प्रमाणाभासाः कुत्सितास्तर्का इति । नन्वनुपपत्तौ सत्यां कुतो विवादाभावस्तत्राहुः । उपरताः समस्ता मायामयाः मायिकाः पदार्था यत्र तस्मिन्निति विवादादीनां मायाशक्तिकार्यत्वात् तव तु मायामायिकपदार्थातिरिक्तवस्तुत्वात् कुतो विवादप्रसक्तिसम्भावनापीत्यर्थः । ननु तदपि युष्मत्साहाय्यार्थं समुद्रमन्थनादौ पाण्डवसाहाय्यार्थं सारथ्यदूत्यादौ यादवपालनार्थं जरासन्धाद्युपद्रवोत्थभयपलायनादौ कर्मणि प्रत्यक्षत एव सर्वैर्दृश्यमानं मदीयदुःखं कथं चिन्मयं सुखरूपं भवेदित्यत आहुः । केवल एवेत्यादि । त्वयि मायाशक्तिविनाभूते सत्येव या आत्ममाया अचिन्त्ययोगमाया तामन्तर्ज्ञाय मध्ये कृत्वा को न्वर्थो दुर्घट इति त्वदनुभवे सुखमये कः प्रवेष्टुं शक्नुयादिति नात्र प्रत्यक्षादिप्रमाणं प्रवर्तत इति भावः । "अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्" इति वचनात् । नन्वलमचिन्त्यशक्तिस्वीकारेण मम भगवत्स्वरूपेण भक्तवात्सल्योत्थसुखदुःखादिमत्त्वञ्च ब्रह्मस्वरूपेण सर्वत्र तटस्थ्यादात्मारामत्वमिति स्वरूपद्वयस्य क्रमेण धर्मद्वयमस्तु तत्राहुः । स्वरूपद्वयाभावादिति । एकस्यैव भगवतस्तव निर्विशेषज्ञानगम्यत्वमेव ब्रह्मत्वमलौकिकविशेषज्ञानगम्यत्वमेव भगवत्त्वमिति दूरवर्तिभिर्ज्ञानिभिरलौकिकविशेषग्रहणासमर्थैस्त्वमेव ब्रह्मसमीपवर्तिभिर्भक्तैरलौकिकविशेषग्रहणसमर्थैर्भगवानिति त्वमेवोच्यसे इत्यर्थः । तत्र कृपायाः परमाणुत्वपरममहत्त्वे एव दूरत्वसमीपत्वयोर्हेतू ज्ञेयौ ॥ ३६ ॥

किञ्च । तदपि संसारपरम्परासिद्ध्यर्थं तेषामभक्तानां मतं नैवोच्छिन्नीकरोषीत्याहुः । समा ब्रह्मविषयत्वात् विषमा तत्प्रातिकूल्यवत्त्वाच्च मतिर्येषाम् । यद्वा । स्वरूपभूताभ्यां ब्रह्मत्वभगवत्त्वाभ्यां समेऽपि एकरूपेऽपि त्वयि विषमा मायातीतस्य ब्रह्मण एव माया शावलेय सति भगवत्त्वमित्येवं वैषम्यवती मतिर्येषां तेषां मतमनुसरसि प्राप्नोषि मतमेवाहुः । सर्पादिधियां रज्जुखण्ड इव ब्रह्मण्यात्मारामत्वमेव सत्यं भक्तवात्सल्यादीनां तु मायाप्रत्यायितत्वात्तन्मूलकं सुखदुःखादिकमलौकिकमेवेति नैवास्ति विरोध इति ॥ ३७ ॥

यस्मादेवं तस्मात् सर्वज्ञमतमपहाय त्वद्भक्तसम्मतमेव वयमनुसराम इत्याहुः । स एव पूर्वोक्तभगवत्त्वादिविशेषणविशिष्ट एव वस्तुस्वरूपः । वास्तववस्तुस्वरूपः सर्वेषां प्रत्यगात्मत्वात् इन्द्रियागोचरत्वादप्रत्यक्षोऽपि सर्वेषां गुणानां बुद्धीन्द्रियादीनामाभासैः प्रकाशैरूप आधिक्येन लक्षितः ज्ञातः

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अनुमित इत्यर्थः । यदुक्तम् "गुणप्रकाशैरनुमीयते भवान्" इति । पर्यवशेषितः मायामायिकवस्तुमात्रनिषेधेन "नेति नेति" इत्यादिश्रुतिभिरिति भागवतामृतदृष्टाः "विना शारीरचेष्टत्वं विना भूम्यादिसंश्रयम् । विना सहायांस्ते कर्माविक्रियस्य सुदुर्गमम्" इत्याद्याः कारिकाः अनुसृत्य दुरवबोध इत्यादीनि गद्यानि व्याख्यातानि॥३८॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवद्धामादिकं भगवत्कृपां विना न जानन्तीत्युक्तम् । अथ कुशास्त्रविमोहितजीवानुग्रहचिकीर्षया स्वोक्तविश्वहेतौ भगवति सर्वात्मनि स्वभावतोऽपास्तसमस्तदोषे केचिदासक्तमन्येऽनासक्तं पुरुषविशेषमीश्वरमपि बाह्या मन्यन्ते तन्मतद्वयविरोधमारोप्य निराकुर्वन्ति । अथेति । तत्र स्वकृते विश्वस्मिन् देवदत्तवत् यथा देवदत्तः पारतन्त्र्येण विषयपारवश्यतया गृहादिकं विधाय तत्र स्वकृतशुभाशुभं फलं भुङ्क्ते तद्वद्भवान् गुणैर्विविधतया सृज्यन्ते इति सर्गाः देवमनुष्यादिदेहास्तेषु पतितः प्रविष्टः स्वकृतकुशलफलमुपाददाति तर्हि स्वतोऽवाप्तसमस्तकामत्वेन विश्रुते त्वयि इदं बुभुक्षुलक्षणं विरुद्धं स्यादिति भावः । आहो स्वित् देवदत्तवदित्यत्रापि योज्यम् । यथा देवदत्तः मुमुक्षुः सन् आत्मारामः स्वरूपानन्दतृप्तः उपशमशीलोऽन्तर्दृष्टिः समञ्जसदर्शनः उदास्ते भोगादुदासीनो भवति तद्वद्भवानस्ति तर्हि सर्वनियन्तृत्वसर्वात्मत्वमुक्तोपसृप्यत्वादिना विश्रुते त्वयि इदमात्मारामत्वोपशमशीलत्वादिकं मुमुक्षुलक्षणमपि विरुद्धं स्यादिति भावः इतिशब्दः पूर्वपरामर्शपरः इति पूर्वोक्तं विरोधद्वयं न विद्मः त्वयि न विद्मः ॥ ३५ ॥

तदेवाहुः । नहीति । ईश्वरे बुभुक्षुमुमुक्षुसर्वजीवनियन्तरि स्वकृतकुशलभोक्तृत्वेन बुभुक्षुत्वम् आत्मारामत्वोपशमशीलत्वादिना मुमुक्षुत्वञ्चेत्युभयं नास्ति स्वरूपद्वयाभावात् स्वरूपे ईश्वरस्वरूपे तद्द्वयस्याभावात् ईश्वरांशभूतजीवधर्मत्वाद्बुभुक्षुत्वमुमुक्षुत्वद्वयस्येत्यर्थः । हि हेत्वर्थः । अतो हेतोर्न विरोधः इति नकारस्योभयत्र योगः । ईश्वरे बहुभिर्विशेषणैः बुभुक्षुत्वमुमुक्षुत्वाभावमेवोपपादयन्ति भगवति "ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणैर्नृप" इति सच्छास्त्रोक्तेः । अपरिमिताः अनन्ताः स्वाभाविकाः गुणगणा यस्य तस्मिन् उप समीपे आधेयत्वनियम्यत्वकार्यत्वादिना रताः स्वस्वावस्थां प्राप्ताः समस्ता मायामया तच्छक्तिमयाः महदादयः सृष्टिवेलायां यस्मात्तस्मिन् संहारवेलायां च आत्ममायां प्रकृतिमात्मशक्तिमन्तर्धाय आकृष्य केवले कारणे को न्वर्थो भोगमोक्षादिरूपो दुर्घटः न कोऽपीत्यर्थः । स्वतोऽवाप्तसमस्तकामत्वात् अथार्वाचीना आधुनिकाः विकल्पादयो येषु इदमेव मुख्यं प्रमाणमित्येवं प्रमाणतया भासमानेषु कुत्सिता वेदविरुद्धाः तर्क्यन्ते प्रतिपाद्यन्ते इति तर्काः विषया येषां तैः शास्त्रैः कलिलं मलिनं यदन्तःकरणं तदाश्रया ये दुरवग्रहाः दुराग्रहास्तैरेव वादिनां विवादस्य नास्त्यवसरोऽवकाशो यस्मिन् तत्र विकल्पः ईश्वरो नास्ति अस्ति वेति वितर्को वेदविरुद्धो विविधपदार्थवादः विचारो वेदविरुद्धस्वकल्पितपदार्थचिन्तनम् ॥ ३६ ॥

सर्वप्रेरकोऽपि तान्सन्मार्गे न नियोजयसि प्रत्युत तदनुरूपे तानधोगतौ पातयितुं तन्मतमनुसरसीत्याहुः । समविषममतीनामिति । समे सर्वात्मनि सर्वकारणकारणे सर्वेश्वरे स्वस्मिन् विषममतीनां, तेषामन्यशास्त्रनिष्ठानां मतं स्वपराङ्मुखत्वापादकं सिद्धान्तमनुसरसि "यमेभ्यो लोकेभ्य उन्निनीषति तं साधु कर्म कारयति यमेभ्यो लोकेभ्योऽधो निनीषति तमसाधु कर्म कारयति" इत्यादिवाक्यान्यत्रानुसन्धेयानि । तत्र दृष्टान्तमाहुः । यथा सर्पोऽयमिति धीर्येषां तेषां मतं सर्पतया भासमानो रज्जुखण्डः अनुसरति तद्वत् ॥ ३७ ॥

एवमन्यशास्त्रविमोहितविवादाविषयत्वं भगवत उपपाद्य स्वतः प्रमाणभूतश्रुत्युक्तरीत्या भगवन्तं स्तुवन्ति । स एवेति । स एव सकलजगत्कारणभूतः सर्वस्मिन् वस्तुनि कार्यमात्रे वस्तुस्वरूपस्तत्तद्रूपस्त्वाकारः सर्वेषां प्रत्यञ्चानां जीवानां स्वांशानामात्मा आश्रयः स्थितिप्रवृत्तिप्रदस्तस्य भावस्तत्त्वं तस्मात्सर्वेश्वरः सर्वं सत्त्वादयो गुणा आभासन्ते प्रतीयन्ते येषु ब्रह्मादिमत्कुणान्तेषु तैर्धार्यत्वप्रेर्यत्वादिस्वासाधारणगुणयुक्तैः सर्वाधारत्वप्रेरकत्वादिस्वासाधारणगुणयुक्तः लक्षितः ज्ञापितः । एवं सकलजगत्कारणत्वात्सर्वचेतनाचेतनपदार्थगर्भोऽपि एकः सजातीयपदार्थान्तरशून्यः एवकारेण विजातीयपदार्थान्तरशून्यः पुनर्भूयो भूयः पर्यवशेषितः परितः सर्वश्रुतिसमन्वयेन सर्वविरोधपरिहारेण च अवशेषितः सर्वकारणत्वेन वर्णित इत्यर्थः ॥ ३८ ॥

भाषा टीका ।

और भी एक संदेह है किसी एक संसारी देवदत्त के तुल्य इस संसार मे पड के आप भी परतंत्र होकर अपने कर्मों के सुख दुःखों को भोगते हो अथवा आत्माराम शम दम शील स्वभाव वाले दिव्य ज्ञान वाले होकर संसार से उदासीन रहते हो इस बात को हम लोग नहीं जानते हैं ॥३५॥

तथापि भगवान् आप में इन दोनों बातों के होने का विरोध नहीं है क्योंकि भगवान् तो असंख्यात गुण वाले हैं ईश्वर हैं उन के माहात्म्य को कोई नहीं जान सकता है तो नवीन नैयायिकादिकों के विकल्प वितर्क विचार दुष्टप्रमाण कुतर्क शास्त्र आदिकों से जिन के अंतःकरण भ्रांत होगये हैं तिन आग्रह वालों के विवाद के अवसरसे दूर हैं समस्त माया प्रपंच से दूर हैं केवल स्वरूप हैं आत्ममाया को अपने में धारण किये हैं तिनको कौन सा अर्थ दुर्घट होसकता है क्योंकि आप तो कर्ता अकर्ता दोनों अभिमान स्वरूप से रहित हैं ॥ ३६ ॥

ज्ञानी अज्ञानी दोनों को आप दोनों प्रकार दीखते हो जैसे कि रस्सी का टुकड़ा भ्रांत को सर्प सा दीखता है और को रस्सी दीखता है ॥ ३७ ॥

फिर विचार करने से वेही आप सब वस्तु मे वस्तुस्वरूप हो सर्वेश्वर हो सब संसार के कारण के कारण हो सब जीवों के अंतर्यामी होने से सब बुद्धि आदि गुणों के प्रकाशक होने से जाने जाते हो एक आपही सब के शेषमें गिने जाते हो ॥ ३८ ॥

अथ हवाव तव महिमामृतरससमुद्रविप्रुषा सकृदवलीढया स्वमनसि निष्यन्दमानानवरतसुखेन विस्मारितदृष्टश्रुतविषयसुखलेशाभासाः परमभागवता एकान्तिनो भगवति सर्वभूतप्रियसुहृदि सर्वात्मनि नितरां निरन्तरं निर्वृतमनसः कथमु ह वा एते मधुमथन ! पुनः स्वार्थकुशला ह्यात्मप्रियसुहृदः साधवस्त्वच्चरणाम्बुजानुसेवां विसृजन्ति न यत्र पुनरयं संसारपर्यावर्त्तः ॥ ३९ ॥

त्रिभुवनात्मभवन ! त्रिविक्रम ! त्रिनयन ! त्रिलोकमनोहरानुभाव ! तवैव विभूतयो दितिजदनुजादयश्चापि तेषामनुपक्रमसमयोऽयमिति स्वात्ममायया सुरनरमृगमिश्रितजलचराकृतिभिर्यथापराधं दण्डं दण्डधर ! दधर्थ एवमेनमपि भगवन् ! जहि त्वाष्ट्रमुत यदि मन्यसे ॥ ४० ॥

अस्माकं तावकानां तव नतानां तत ! ततामह ! तव चरणनलिनयुगलध्यानानुबद्धहृदयनिगडानां स्वलिङ्गविवरणेनात्मसात्कृतानामनुकम्पानुरञ्जितविशदरुचिरशिशिरस्मितावलोकेन विगलितमधुरमुखरसामृतकलया चान्तस्तापमनघार्हसि शमयितुम् ॥ ४१ ॥

अथ ह भगवंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमायाविनोदस्य सकलजीवनिकायानामन्तर्हृदयेषु बहिरपि च ब्रह्मप्रत्यगात्मस्वरूपेण प्रधानरूपेण च यथादेशकालदेहावस्थानविशेषं तदुपादानोपलम्भकतयानुभवतः सर्वप्रत्ययसाक्षिण आकाशशरीरस्य साक्षात् परब्रह्मणः परमात्मनः कियानिह वा अर्थविशेषो विज्ञापनीयः स्याद्विस्फुलिङ्गादिभिरिव हिरण्यरेतसः ॥ ४२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतस्त्वद्भक्तिरेव परमपुरुषार्थ इत्याहुः । अथहेत्यादिपर्यावर्त इत्यन्तेन । यस्मादेवम्भूतस्त्वं परमेश्वरः । अथ हवाव अत एव हि । हे मधुमथन ! परमभागवता एते त्वत्पादाम्भोजानुसेवां कथं मुहुर्मुहुर्विसृजन्तीत्यन्वयः । हि यस्मात्स्वार्थे पुरुषार्थे कुशला निपुणाः । अत एव आत्मा त्वमेव प्रियः सुहृच्च येषां ते साधवो रागादिशून्याः । तत्र हेतुः । तव महिमैवामृतरससमुद्रस्तस्य विप्रुषा बिन्दुमात्रेण सकृदवलीढया आस्वादितया स्वमनसि निष्यन्दमानमतिशयेन स्रवदनिरन्तरं सुखं तेन विस्मारिता दृष्टश्रुतविषयाः सुखलेशाभासा येषां ते । अत एव भगवति त्वयि नितरां निरन्तरं निर्वृतं च मनो येषां ते । यत्र यस्यामनुसेवायां सत्याम् ॥ ३९ ॥

प्रस्तुतं विज्ञापयन्ति । त्रिभुवनेत्यादिना यावत्समाप्ति । त्रिभुवनमात्मा स्वरूपं भवनं च यस्य त्रिभुवनस्यात्मा भवनं चेति वा त्रयो विक्रमा यस्य त्रींल्लोकानयतीति तथा त्रयाणां लोकानां मनोहरोऽनुभावो यस्य । एवं चतुर्धा सम्बोध्याहुः । तेषामनुपक्रमसमय उद्यमकालो न भवतीति मत्वा । हे दण्डधर ! पूर्वं यथा दण्डं दधर्थ धृतवानस्येवमेनं त्वाष्ट्रमपि जहि यदि मन्यसे हन्तुं यदीच्छसि ॥ ४० ॥

प्रथमं तावत्त्वदीयानामस्माकमन्तस्तापं शमयितुमर्हसि । तावकानामित्यत्र हेतुः । हे पितः ! हे पितामह ! तव चरणनलिनयुगलध्यानेनानुबद्धो हृदये निगडः शृङ्खला येषाम् । स्वलिङ्गविवरणेन निजमूर्तिप्रकटनेन स्वीकृतानाम् । केन । अनुकम्पयानुरञ्जितं सानुरागं च तद्विशदं रुचिरं शिशिरं च स्मितं तत्सहितेनावलोकेन तथानुकम्पयैव विगलितो मधुरो मुखरसः प्रियवाक् सैवामृतकला तया च ॥ ४१ ॥

किञ्च । अस्मदभिप्रायस्त्वया ज्ञायत एव किमत्रास्माभिर्विज्ञापनीयमित्याहुः । अथ हे भगवंस्तवास्माभिरिह कियान्वार्थविशेषो विज्ञापनीयः स्यादित्यन्वयः । यथा हिरण्यरेतसोऽग्नेस्तदंशभूतैर्विस्फुलिङ्गादिभिः प्रकाशो न क्रियते तथा तवास्माभिः कार्यार्थप्रकाशनं न कार्यमित्यर्थः । अत्र हेतुगर्भाणि विशेषणानि । अखिलजगतामुत्पत्त्यादिषु निमित्तायमानया दिव्यमायया विनोदो यस्य । अत एव सर्वजीवनिकायानामन्तर्हृदयेषु ब्रह्मस्वरूपेण प्रत्यगात्मान्तर्यामी तद्रूपेण च बहिरपि प्रधानरूपेण देशकालदेहावस्थानविशेषाननुल्लङ्घ्यानुभवतः । कथम् । तेषामुपादानतयोपलम्भकतया च उपादानस्योपलम्भकतयेति वा । अत एव सर्वेषां प्रत्ययानां बुद्ध्यादीनामपि साक्षिणः । साक्षित्वे हेतुः । आकाशवदलिप्तं शरीरं स्वरूपं यस्य । अलिप्तत्वे हेतुद्वयम् । साक्षात्परब्रह्मणो निरुपाधेः परमात्मनः शुद्धसत्त्वमूर्तेश्च ॥४२॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यत एव भवाननितरसाधारणोदारहूतिर्योगपरिशुद्धमनोग्राह्यो नित्यनिरुपाधिकापरिच्छिन्ननिजानन्दानुभवरूपो जगत्सृष्टिस्थितिसंहारलीलः सार्वज्ञ्यसत्यसङ्कल्पत्वाद्यपरिमितगुणसागरोऽ-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नितरसाधारणाविविधविचित्रशक्तिरशेषचिदचिच्छरीरकः सर्वेश्वरः सर्वसमोऽत एव त्वच्चरणारविन्दमधुरसास्वादनशीलास्त्वामविस्मरन्तोऽनन्तस्थिरफलरूपमुक्तिं प्राप्नुवन्तीत्याहुः । अथेत्यादिना पर्यावर्त्तत इत्यन्तेन गद्येन । अथ ह्वाव ननु भगवानत एव हीति वार्थः । हे मधुमथन ! परमभागवता एकान्तिनोऽनन्यप्रयोजनाः त्वत्पदाम्बुजसेवां कथमुहवा विसृजन्तीत्यन्वयः । हि यस्मात्ते स्वार्थकुशलाः पुरुषार्थनिष्कर्षकुशलाः अतः कथम्भूताः आत्मा त्वमेव प्रियः सुहृच्च येषां साधवः साध्नुवन्ति परेषामभीष्टमिति साधवः रागादिरहिताश्च । तत्र हेतुः । तव महिमैवामृतरससमुद्रस्तस्य विप्रुषा बिन्दुमात्रेण कथम्भूतया सकृदवलीढयास्वादितया स्वमनसि निष्यन्दमानमतिशयेन स्रवन्निरन्तरं सन्ततं सुखं तेन विस्मारिताः दृष्टाः ऐहिकाः श्रुताः आमुष्मिकाश्च विषयाः सुखलेशाभासा येषां ते सर्वभूतानां प्रिये सुहृदि च सर्वान्तरात्मनि भगवति त्वयि निर्वृतं सुखितं मनो येषां ते चरणाम्बुजसेवां विशिषन्ति । यत्र त्वच्चरणाम्बुजसेवायां मुक्तिपर्यन्तायां सत्यां पुनरयं संसारो न पर्यावर्त्तते न परिवृत्तिं प्राप्नोति निवर्त्तत इत्यर्थः ॥ ३९ ॥

एवमभिष्टूयाथ प्रस्तुतं विज्ञापयन्ति । त्रिभुवनेत्यादिना । हे त्रिभुवनात्मभवन । त्रिभुवनस्यात्मान्तःप्रविश्य नियन्ता भवनमाश्रयश्च तस्य सम्बोधनम् । एवमग्रेऽपि । त्रयो विक्रमा यस्य सर्वान्तरात्मनस्तवाविदितमन्तरं नास्ति त्रिविक्रमस्य तवासाध्यमपि नास्तीति भावः । हे त्रियनयन ! त्रयश्चन्द्रसूर्याग्नयो नयनानि यस्य बाह्यमप्यविदितं नास्तीति भावः । त्रयाणां लोकानां मनोहरोऽनुभावो यस्यास्मदभिलषितमपि तव कर्त्तव्यमेवेति भावः । एवं सम्बोध्य विज्ञापयन्ति यद्यपि दितिजा दनुजाश्च तवैव विभूतयोऽतस्तेषां वधोपायचिन्तनमनुचितं तथापि तेषामनुपक्रमोऽयमित्यभ्युदयकालोऽयं न भवतीति मत्वा पूर्वं यथा स्वात्ममायया आत्मसङ्कल्पेनैव उपात्ताभिः सुरादिसम्मिश्रितैर्जलचराकृतिभिः सुराद्यवतारैर्मत्स्यकूर्माद्यवतारैश्चेत्यर्थः । तत्र सुराकृतिरुपेन्द्रावतारः । नराकृतिः रामकृष्णादिः मृगाकृतिर्वराहादिः यथापराधमपराधानुसारेण दण्डं विरोधिनिरसनरूपं दधर्थ कृतवानसि । एवं हे भगवन् ! एनं त्वाष्ट्रं वृत्रमपि जहि यद्युपमन्यसे हन्तुं यदीच्छसि ॥ ४० ॥

एवं प्रस्तुतं विज्ञाप्य स्वानुग्राहकं तद्वाक्यं श्रोतुकामास्तं प्रार्थयन्ते । अस्माकमिति । हे तत ! रक्षक ! पितामहेति वार्थः । तावकानां त्वदीयानाम् । तत्र हेतुः । स्वलिङ्गविवरणेन आत्मीयविग्रहप्रकाशनेन आत्मसात्कृतानामात्मीयत्वेन परिगृहीतानां तव चरणयुगलध्यानेनैव अनुबद्धं वशीकृतं हृदयं तदेव निगलो येषां तेषां नः अनुकम्पास्माद्विषया कृपा तयानुरञ्जितं सानुरागं च तद्विशदं रुचिरं च स्मितं तत्सहितेनावलोकनेन तथानुकम्पयैव निगलितो मधुरो मुखरसः प्रियवाक्सैवामृतकला तयान्तस्तापं शमयितुमर्हसि ॥ ४१ ॥

अपारमहिमशालिनस्तवास्माभिर्विज्ञाप्यमेतत्कियदित्याहुः । अथेत्यादिना हिरण्यरेतस इत्यन्तेन । अथ । ननु हे भगवन् ! अस्माभिर्विज्ञापनीयस्तव कियानर्थः प्रयोजनं स्यात् । तत्र दृष्टान्तः । विस्फुलिङ्गादिभिरिव हिरण्यरेतस इति । विस्फुलिङ्गादिभिरिवाग्नेः कार्यभूतैर्हिरण्यरेतसः कारणभूतस्याग्नेरिव त्वत्कार्यभूतैरस्माभिर्विज्ञापनीयः कारणभूतस्य तव कियानर्थ इत्यर्थः । कार्यकारणभावमात्रपरोऽयं दृष्टान्तः । उभयोरप्यचेतनत्वे विज्ञप्तितद्ग्रहणयोरसम्भवात् । यद्वा । अग्नेर्विस्फुलिङ्गादिभिः क्रियमाणः प्रकाशः कियान् । तथास्माभिर्विज्ञाप्योऽर्थस्तव कियानित्यर्थः । यद्वास्माभिः कथम्भूतैरित्यत्र दृष्टान्तः । यथा विस्फुलिङ्गा अग्न्यायत्तसत्तास्थित्यादिमन्तस्तथा त्वदायत्तसत्तादिमद्भिरिति । कथम्भूतस्य । तवाखिलजगतामुत्पत्तिस्थितिलयेषु निमित्तायमाना विक्रियमाणा या दिव्या माया सैव विनोदः परिकरो यस्य सकलजीवसमूहानामन्तर्हृदये ब्रह्मप्रत्यगात्मस्वरूपेण प्रत्यग्जीव आत्मा शरीरं यस्य तत्स्वरूपेण ब्रह्मशब्दवाच्येन जीवशरीरकत्वेन स्वरूपेणेत्यर्थः । बहिः प्रधानं प्रकृतिः रूपं यस्य प्रधानशरीरकत्वेन "यस्यात्मा शरीरं यस्य पृथिवी शरीरम्" इति श्रुतेः । देशकालदेहावस्थानविशेषाननुल्लङ्घ्यानतिक्रम्यानुभवतः व्याप्तस्य । यद्वा । तेषामुपादानोपलम्भकतयानुभवत इत्यन्वयः । तेषां देशकालदेहादीनामुपादानं स्वीकारः एतस्मिन् देशे काले देहे एतत्सुखदुःखादिकमुपादेयमित्येवं रूपमुपादानं तस्योपलम्भकतया अभिज्ञापकतया निदानेन सह सर्वज्ञानजनकतयानुभवतः व्याप्तवत इत्यर्थः । सर्वप्रत्ययसाक्षिणः सर्वजीवानां चित्तवृत्तिसाक्षिणः आकाशशरीरस्याकाशो दहराकाशः स एव शरीरं मूर्तिर्यस्य आसमन्तात्प्रकाशते प्रकाशयति वाकाशः स्वप्रकाशं सर्वस्य प्रकाशमपरिच्छिन्नं ज्ञानं तदेव शरीरमाकारो यस्येति साक्षात्परब्रह्मणः मुख्यवृत्त्या परब्रह्मशब्दवाच्यस्य परमात्मनः लोकत्रयमन्तःप्रविश्य धारकस्य ॥ ४२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेवं बहिर्मुखानाक्षिप्य तद्भक्तान् स्तुवन्ति । अथ हेति ॥ ३९-४१ ॥

अथ भगवन्निति सम्बोध्य ब्रह्मपरमात्मरूपत्वेऽपि भगवद्रूपत्वस्यैव श्रैष्ठ्यमभिप्रेतमतः प्रधानरूपेण चेति सर्वश्रेष्ठरूपेणेति भगवदाख्येन चेत्यर्थः । आकाशशरीरस्येति आ सर्वतः काशते विराजते यत्तत् परं ब्रह्मैव शरीरं यस्येत्यर्थः ॥ ४२ ॥ ४३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तदेवं बहिर्मुखानाक्षिप्य तद्भक्तान् स्तुवन्ति । अथ हेति । सकृदप्यवलीढया आस्वादितया जनितेन सुखेन प्रेमानन्देन एकान्तिनः त्वत्सेवैकतानमानसत्वात् देवर्ष्यादीन् अनुपासीनाः । तदपि देवर्ष्यादयस्तेषु बहुतरमेव प्रसीदन्तीत्याहुः । सर्वेषां भूतानां प्रिये सुहृदि सर्वेषामात्मनि चेति । त्वत्सेवायां सत्यां ते सर्वेऽपि सेविता एव बभूवुरिति भावः । स्वार्थकुशला इति । तेन त्वत्सेवात्यागिनः कुयोगिप्रभृतयः स्वार्थघातिन एवेति भावः ॥ ३९ ॥

त्वद्भक्तेषु मध्ये सकामस्याद्भुतमेवातिनिकृष्टा इति द्योतयन्तः प्रस्तुतं विज्ञापयन्ति । त्रिभुवनमात्मभवनं यस्य त्वद्भक्ता देवमनुष्यादयो यत्र स्थित्वा त्वां सेवन्ते तदिदमसुराक्रान्तमभूदिति

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भावः । त्रिभिर्विक्रमैस्त्रीँल्लोकान् नयसीति । यदेव त्रिभुवनं वामनावतारे त्रिभिरेव पादैः प्रतिगृह्य बलेः सकाशादानीयास्मभ्यं दास्यसीति भावः । त्रिलोकेति । सम्प्रत्यपि त्रिलोकस्था जनास्तवानुभावं पश्यन्तु । दैत्यं संहरेति भावः । ननु परहिंसां समुद्दिश्य मां यजध्वे तत्राहुः । तवैव विभूतयो यद्यपि तदपि तेषामुपक्रमसमयो नायमिति ज्ञात्वा निवेदयाम इति भावः । तस्मात् हे दण्डधर ! पूर्वं यथा दण्डं दधर्थ एवमधुनापि उप समीपकाल एव ॥ ४० ॥

एवं स्तुत्वा कृपावलोकमधुरमाश्वासवागमृतं प्रार्थयन्ते । अस्माकमिति । हे तत ! तात ! ततामह ! हे पितामह ! तव चरणनलिनयुगलमेव ध्यानानुबद्धहृदयस्य निगडः शृङ्खला येषां त्वच्चरणारविन्दान्मनोमधुपमाक्रष्टुं न शक्नुम इत्यर्थः । स्वलिङ्गविवरणेन निजमूर्त्तिप्रकटनेन विगलितः मुखचन्द्राच्चिःसृतः मधुरो मुखरसः प्रियवाक् स एवामृतकला तया च ॥ ४१ ॥

तव त्वयि कियानर्थविशेषो विज्ञापनीय इत्यन्वयः । प्रत्यगात्मा अन्तर्यामी तद्रूपेण बहिरपि विषयेषु प्रधानं माया इन्द्रियादिकं तद्रूपेण देशश्च कालश्च देहस्यावस्थानविशेषो बाल्यादयश्च ताननतिक्रम्य अनुभवतः । तेषां देवादिजीवनिकायानाम् उपादानतया कारणत्वेन उपलम्भकतया प्रकाशकत्वेन च इद्धतं विज्ञापनीयं जानत इत्यर्थः । आकाशवद्गुणैरलिप्तं शरीरं यस्य हिरण्यरेतसो वह्नेर्विस्फुलिङ्गादिभिस्तत्कणभूतैरिवास्माभिः ॥ ४२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ "कारणं तु ध्येयम्" इति श्रुतिमुपबृंहयन्तः संसारनिवृत्तये त्वद्भजनमेव कर्तव्यमिति सूचयितुं शिष्टाचारमाहुः । अथेति । हे मधुमथन ! तव महिमामृतरससमुद्रस्य विप्लुषा बिन्दुना सकृदवलीढया एकवारमप्यास्वादितया स्वमनसि निष्यन्दमानेन प्रस्रवमानेन अनवरते न अश्रान्तेन सुखेन विस्मृताः दृष्टश्रुता ऐहिकामुष्मिका विषयसुखलेशाभासा यैस्ते अमवति नितरां निरन्तरं निर्वृतं मनो येषां ते । अत एव स्वार्थकुशलाः आत्मा परमेश्वरो भवान् प्रियः सुहृच्च येषां ते । त्वच्चरणाम्बुजानुसेवां कथं विसृजन्ति नैव विसृजन्तीत्यर्थः । यत्र सेवायां सत्यामयं संसारपर्य्यावर्तः जन्ममरणप्रवाहः पुनर्न भवति ॥ ३९ ॥

वयमर्थार्थित्वेन त्वद्भक्तेषु निकृष्टा इति सूचयन्तः प्रस्तुतं विज्ञापयन्ति । त्रिभुवनेत्यादिना हे त्रिभुवन ! विराड्रूप ! आत्मनैव स्वेनैव भवनं यस्य हे तथाभूत ! त्रिषु कालेषु विविधः क्रमः पराक्रमो यस्य हे तथाभूत ! कालानवच्छिन्नपराक्रमः त्रिषु कालेषु मनोहरोऽनुभावो यस्य हे कालानवच्छिन्नानुभाव ! यद्यपि दितिजादयोऽपि तवैव विभूतयः तथापि यतस्तदुपक्रमस्य त्रैलोक्यराज्योद्यमस्यायं कालो नास्ति इति हेतोः । हे दण्डधर ! यथा स्वकीयेषु भक्तेषु या आत्मनस्तव माया कृपा सुरनराद्याकृतिभिर्यथापराधं दण्डं स्वभक्तप्रतिकूलेषु धृतवानसि एवमेनं त्वाष्ट्रमपि यदि उत मन्यसे हन्तुमिच्छसि तर्हि जहि ॥ ४० ॥

अतिदैन्ययुक्ताः शीघ्रं कृपां प्रार्थयन्ते । हे तत ! पितः ! हे ततामह ! तव चरणनलिनयुगलध्यानमेवानुबद्धो हृदये निगडो येषां तेषाम् । स्वलिङ्गविवरणेन स्वमङ्गलमूर्त्याविष्कारेण त्वदात्मसात्कृतानामनुकम्पया रञ्जितो विशदो विपुलो रुचिरो यः स्मितावलोकः तेन विगलितया मधुरया मुखामृतरसकलया चान्तस्तापं हे अनघ ! प्रत्युपकारादिवासनारूपाघशून्य ! शमयितुमर्हसि ॥ ४१ ॥

सर्वात्मनि सर्वज्ञे त्वयि अस्माभिः किं विज्ञापनीयमिति सदृष्टान्तमाहुः । अथेति । हे भगवन् ! यथा हिरण्यरेतसः अग्नेस्तदंशभूतैर्विस्फुलिङ्गादिभिः प्रकाशो न क्रियते तथास्माभिरंशभूतैरिह तव कियानर्थविशेषो विज्ञापनीय इत्यन्वयः । तत्र हेतुगर्भाणि विशेषणानि अखिलजगतामनन्तकोटिब्रह्माण्डानामुत्पत्त्यादिषु निमित्तायमानया परमकारणेन त्वया महदादिभावं नीयमानया दिव्यमायया विनोदो यस्य सकलाः सपरिकराः जीवनिकाया जीवसमूहा येषु तेषामखिलानां जगतामनन्तकोटिब्रह्माण्डानामन्तर्हृदयेषु बहिरपि ब्रह्मप्रत्यगात्मरूपेण ब्रह्म च तत्पदार्थलक्षणं प्रत्यगात्मस्वरूपं च पदार्थलक्षणं तयोः समाहारद्वन्द्वैक्यम् । ब्रह्मरूपेण स्वांशभूतजीवरूपेण स्वशक्तिरूपेण च तेषां सकलजीवनिकायानामुपादानतया उपलम्भकता प्रकाशकता तयो च देशादिकमनतिक्रम्येति यथादेशकालदेहावस्थानविशेषमनुभवतः अतएव सर्वप्रत्ययसाक्षिणः आकाशवन्निर्मलमप्राकृतं यस्य शरीरं तस्य ॥ ४२ ॥

भाषा टीका

हे मधुमथन ! इसी हेतु से जो आपकी महिमा रूपी अमृत रस का समुद्र है उसके एक विन्दु मात्र से एक वारभी आस्वादन करी भक्ति से हुआ जो अपने मन मे अचल निरन्तर सुख तिस से देखे सुने सब विषय सुखों के लेशमात्र भूल जाते हैं जिन के ऐसे एकान्तिपरमभागवतजन सब भूतों के सुहृद सर्वात्मा भगवान् में अतिशय से निरन्तर लगे हुये मन में सुखी होकर यदि वे स्वार्थ मे चतुर होवैं तो अपने सुहृद आपकी चरण कमल की सेवा को क्यों छोड़ैंगे जिस मे कि फिर वह संसार का भ्रमण नहीं होता है ॥ ३९ ॥

हे भगवन् ! तीनो भुवन आपके स्थान हैं तीनों लोक में आप काही प्रभाव है तीनों लोकों मे आपकी लीला है दनुज दैत्य ए सब आप की ही विभूति हैं तथापि यह उनके उपद्रवका काल नहीं है इसलिये अपनी माया से देवता मनुष्य मृग नृसिंह हयग्रीव जलचर आकृतियां धारण कर के अपराधके अनुरूप दण्ड देते हो तिसी प्रकार इस वृत्रासुर को भी मारो यदि आपकी इच्छा होतो कृपा कीजिये ॥ ४० ॥

हे तात ! हे पितामह ! हे अनघ ! हम आपके दास हैं आप के चरणोंमें नम्र हैं आपके चरण कमल युगल में ध्यान से हमारी शृङ्खला बंधी है आपने अपनी मूर्ति का दर्शन कराकर हम लोगों को अपना बनाया है सो आपके कृपा अनुराग युक्त अति निर्मल अति सुन्दर अति शीतल तारा युक्त नेत्रों के अवलोकन से तथा मन्दहास से तथा मुख से

अत एव स्वयं तदुपकल्पयास्माकं भगवतः परमगुरोस्तव चरणशतपलाशच्छायां विविधवृजिन-संसारपरिश्रमोपशमनीमुपसृतानां वयं यत्कामेनोपसादिताः ॥ ४३ ॥

अथो ईश ! जहि त्वाष्ट्रं ग्रसन्तं भुवनत्रयम् ।
ग्रस्तानि येन नः कृष्ण ! तेजांस्यस्त्रायुधानि च ॥ ४४ ॥

हंसाय दह्रनिलयाय निरीक्षकाय कृष्णाय मृष्टयशसे निरुपक्रमाय ।
सत्सङ्ग्रहाय भवपान्थनिजाश्रमाप्तावन्ते परीष्टगतये हरये नमस्ते ॥ ४५ ॥

श्रीशुक उवाच ।

अथैवमीडितो राजन् ! सादरं त्रिदशैर्हरिः ।
स्वमुपस्थानमाकर्ण्य प्राह तानभिनन्दितः ॥ ४६ ॥

श्रीभगवानुवाच ।

प्रीतोऽहं वः सुरश्रेष्ठाः ! मदुपस्थानविद्यया ।
आत्मैश्वर्यस्मृतिः पुंसां भक्तिश्चैव यया मयि ॥ ४७ ॥
किं दुरापं मयि प्रीते तथापि विबुधर्षभाः ! ।
मय्येकान्तमतिर्नान्यन्मत्तो वाञ्छति तत्त्ववित् ॥ ४८ ॥
न वेद कृपणः श्रेय आत्मनो गुणवस्तुदृक् ।
तस्य तानिच्छतो यच्छेद्यदि सोऽपि तथाविधः ४९ ॥
स्वयं निःश्रेयसं विद्वान्न वक्त्यज्ञाय कर्म हि ।
न राति रोगिणोऽपथ्यं वाञ्छतो हि भिषक्तमः ॥ ५० ॥

भाषा टीका ।

विगलित जो मधुर वचन अमृत तिसके लेश से हम लोगों के भीतर का जो वृत्रासुर के भयरूप ताप तिसको आप शान्त करने के योग्य हो ॥ ४१ ॥

अब हम लोग आपको किसबात का विज्ञापन करसके हैं क्यों कि सम्पूर्ण संसार की उत्पत्ति स्थिति प्रलय की निमित्त जो दिव्यमाया सो आपका खेलमात्र है और आप सब जीवों के हृदय के भीतर ब्रह्म रूपसे अन्तर्यामी रूप से रहते हो बाहिर मे प्रधानरूप से रहते हो इसीसे देशकाल देह तिनके विशेषोंके उनके उपादान कारण होने उनके उपलम्भक होनेसे आप अनुभव करते हो सबकी बुद्धिके सची हो आकाशादि सब तत्व आपके शरीर हैं आप साक्षात् परब्रह्म हो परमात्मा हो सो जैसे अग्नि के आगे चिनगारी कुछ गिनतीमे नहीं आती हैं तैसे हम आपसे कुछ जनाने नहीं सकते हैं ॥ ४२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत एव सर्वज्ञत्वादेव वयं यत्कामेन यस्य कार्यस्य कामेनोपसादिताः प्रापितास्तदस्माकं कार्यं स्वयमेवोपकल्पय सम्पादयेति । चरणमेव शतपलाशं कमलं तस्य छायां विविधैर्वृजिनैर्यः संसारपरिश्रमस्तस्योपशमकरीमुपसृतानां प्राप्तानाम् ॥ ४३ ॥

पूर्वं भक्तेरुत्कर्षोक्तेस्तत्कामशङ्का माभूदिति स्वकामं कथयन्ति । अथोऽनन्तरमेव ॥ ४४ ॥

शीघ्रं तद्वधाय पुनः प्रणमन्ति । हंसाय शुद्धाय हरये आर्तिहराय ते नमः । शुद्धत्वे हेतवः । दह्रनिलयाय हृदयाकाशनिकेताय । निरीक्षकाय । बुद्ध्यादिसाक्षिणे । कृष्णाय सदानन्दरूपाय ।

कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥

इति निरुक्तेः । आर्तिहरत्वे हेतवः । मृष्टं रुचिकरं यशो यस्य । निरुपक्रमायादिशून्याय । सद्भिः सङ्ग्रहस्तु इति तथा तस्मै । भवपान्थो भवरूपे पथि वर्तमानस्तस्य जनस्य निजाश्रमाप्तौ स्वशरणप्राप्तौ सत्यां संसारस्यान्ते परीष्टा सर्वतः पूजिता उत्तमा गतिः फलं यस्तस्मै ॥ ४५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अभिनन्दितः सन्तोषितः ॥ ४६ ॥

मदीयमुपस्थानं स्तोत्रं तत्सहितया विद्यया ज्ञानेन। आत्मन ऐश्वर्यमसंसारित्वं तस्य स्मृतिर्यया। न हि विरोध उभयमित्यादिना। कर्तृत्वभोक्तृत्वादेर्मायिकत्वोक्तेः भक्तिश्च यया भवति ॥४७॥

अथ ह भगवन्नित्यादिना भक्तेः सर्वोत्कर्षोक्तेर्भक्तमभिनन्दन्ति। किमिति ॥ ४८ ॥

यदुक्तं देवैः स्वयं तदुकल्पयास्माकमित्यादि तत्सम्पादनं कृपालोर्ममानुचितमित्याशयेनाह। न वेदेति द्वाभ्याम्। गुणेषु विषयेषु तत्त्वदर्शी। तान् विषयान्। तथाविधोऽज्ञ एव ॥ ४९ ॥

कर्म न वक्ति। प्रवृत्तिमार्गं न वक्ति हि। अपथ्यं यथा न याति न ददाति भिषक्तमः सद्वैद्यः ॥ ५० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

यत एवं वयमग्नेर्विस्फुलिङ्गा इव त्वदायत्तसत्तादिमन्तः अत एवास्माकं तदुपकल्पय तत्कार्यमुपकल्पय सम्पादय किन्तत् यत्कामेन यत्प्रयोजनकामेन वयमुपसादिताः। ननु दिविजदनुजानामपि मदायत्तसत्तादिमत्त्वाविशेषे विशेषेण स्वकार्यं साधयेत्युच्यते इत्याशङ्कां निराकुर्वन्तः स्वात्मनो विशिंषन्ति। परमगुरोर्भवतश्चरणाम्बुजशतपत्राशे कुशेशये तयोश्छायामुपसृतानामाश्रितानां प्रपन्नानामिति भावः। कथम्भूतां छायां विविधवृजिनैः पापैः संसारस्य परिश्रमः तस्य उपशमनीम् उपशमयन्त्यनयेत्युपशमनीं ताम् ॥४३॥

तदुकल्पयेत्येतदेव विशदयन्ति। अथो इति। अतः हे ईश! भुवनत्रयं ग्रसन्तं त्वाष्ट्रं वृत्रं जहि येन त्वाष्ट्रेण हे कृष्ण! नोऽस्माकं तेजांस्यस्त्रायुधानि च ग्रस्तानि ॥ ४४ ॥

तन्नमाय पुनः प्रणमन्ति। हंसायेति। हंसाय निरस्तनिखिलदोषाय प्रणतार्तिहृत्स्वे या दहं हृदयपुण्डरीकं तदेव निलयं यस्य तस्मै अस्मदीयदुःखाभिज्ञायेति भावः। निरीक्षकाय चित्तवृत्तिसाक्षिणे न कापट्येनास्माभिर्विज्ञापितमिति भावः। कृष्णाय भारापहरणेन भूमेः सुखकराय सुष्ठुयशसे विशुद्धकीर्तये प्रपन्नार्तिहरणेन न तवापकीर्तिरपि तु निष्कलङ्का कीर्तिरेवेति भावः। निरुपक्रमः निर्गतः उपक्रमः अस्मदुद्योगो यस्मात्तस्मै त्वत्प्रपत्तिव्यतिरेकेण नास्माकमुद्योगोऽस्तीति भावः। सतां स्वशासनानुवर्तिनां सङ्ग्रहाय स्वीयत्वेनानुग्राहकाय भवपान्थाः संसाराध्वगास्तेषां निजाश्रमाय स्वगृहभूताय यथा "पान्थः स्वगृहं यथा" इत्युक्तरीत्या स्वगृहं प्राप्य सुख्याति तथा भवपान्थानां निजाश्रमाय न केवलमैहिकसुखदाय अपि त्वामुष्मिकसुखदाय चेति भावः। शश्वत्सदा गरिष्ठा गतिः फलं तद्रूपाय निरतिशयपुरुषार्थरूपाय हरये तुभ्यं नमः प्रपन्नानामनेकाध्यात्मिकाधिदैविकाधिभौतिकादिदुःखहरणशीलाय तुभ्यं नमः ॥ ४५ ॥

एवं देवैः संस्तुतो विज्ञापितश्च भगवानुवाचेत्याह मुनिः। हे राजन्! त्रिदशैर्देवैः सादरमेवमीडितः स्तुतो भगवान्स्वं स्वकीयमुपस्थानं स्तोत्रमाकर्ण्याभिनन्दितः तान्प्रत्याह ॥ ४६ ॥

उक्तिमेवाह। प्रीत इत्यादिना यावदध्यायपरिसमाप्ति। हे सुरश्रेष्ठाः! मदुपस्थानविद्यया स्तुत्यात्मिकया विद्ययाहं वो युष्मभ्यं प्रीतः विद्यां विशिनष्टि। यया अमुया ययानया विद्यया पुंसां तावन्मद्भक्तिस्तत आत्मैश्वर्यस्मृतिर्देहातिरिक्तात्मनोपहतपाप्मत्वादिगुणाष्टकरूपात्मैश्वर्यस्मृतिश्च भवति ॥ ४७ ॥

यद्यपि मयि प्रीते सति हे विबुधर्षभाः! किं दुरापं किं दुर्लभं न किमस्ति सर्वमपि वाञ्छितं सुलभमेवेति भावः। तथापि मय्येकान्तमतिरनन्यप्रयोजनविषया मतिर्यस्य। अत एव तत्त्वविन्मत्तोऽन्यात्किञ्चिदपि न वाञ्छति मां प्रसाद्य प्रतिपक्षजयकामा यूयमतद्विविदो मन्दबुद्धय इति भावः ॥ ४८ ॥

एतदेवोपपादयति। नेति। गुणेषु शब्दादिविषयेषु वस्तुदृक् पुरुषार्थदृष्टिरत एव कृपणः इन्द्रियवश्यः पुमानात्मनः स्वस्य श्रेयो निरतिशयपुरुषार्थरूपं न वेद एवं तान् शब्दादीनिच्छतः तस्य पुंसः तान् शब्दादीनीशोऽपि निरतिशयपुरुषार्थप्रदानसमर्थोऽपि यः पुमान् यच्छेद्दद्याद्यदि सोऽपि तादृश एव कृपणः कृपणेन श्रेयोऽनभिज्ञेन क्षुद्रे पुरुषार्थे प्रार्थितेऽपि स्वयं परमपुरुषार्थप्रदानसमर्थोऽपि क्षुद्रफलं प्रयच्छन्कृपण एवेति भावः ॥ ४९ ॥

एतदेव दृष्टान्तमुखेन विशदयति। स्वयमिति। निःश्रेयसं निरतिशयपुरुषार्थं तत्साधनं च विद्वान् स्वयमविज्ञाय परमपुरुषार्थतत्साधनज्ञानरहिताय केवलकर्मासक्तिदुःखिताय कर्मैव कुर्विति न वक्ति न बोधयति तथाहि भिषक्श्रेष्ठः वाञ्छतः कामयमानस्यापि रोगिणः अपथ्यं न राति न ददाति ॥ ५० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

हंसवत्सारग्राहिणे दध्नमिलमाय हृदयाकाशनिवासाय "तस्यान्ते सुषिरं सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितम्" इति श्रुतेः निरीक्षकाय चेतनकर्मसाक्षिणे कृष्णाय "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः" इत्यतः सन्ततपूर्णानन्दाय कृतौ पूर्णौ यशो बलश्रियौ यस्य स तथा तस्मै निरुपक्रमाय श्रमजनकप्रयत्नमन्तरेण जगत्कर्त्रे "निरुपक्रमो हरिर्नित्यमप्रयत्नो ह्युपक्रमेत्" इत्यतः सतां संग्रहो यस्य स तथा तस्मै भवपान्थाः संसारमार्गे वर्तमानाः तेषां निजाश्रयाय "निजमात्मीयनित्ययोः" इत्यभिधानं शश्वदेकप्रकारा वरिष्ठा धर्मादेरत्युत्तमा गतिर्मुक्तिलक्षणा यस्मात्स तथा तस्मै हरये आपत्परिहरणशीलाय ॥ ४५ ॥

स्वमुपस्थानं स्वविषयां स्तुतिम् ॥ ४६ ॥

मदुपस्थानलक्षणया विद्यया पुंसामात्मैश्वर्यस्मृतिर्मोक्षात्म्यस्मृतिः मयि भक्तिश्च भवतीत्यन्वयः ॥ ४७ ॥

प्रीते प्रत्यक्षे तथापि फलप्राप्त्यनायासेऽपि भक्तिज्ञानप्रसादेभ्योऽन्यत्। अत्र हेतुस्तत्त्वविदिति। अनेनायमधिकारिषु सुखाधिक्यप्राप्तियोग्य इति ज्ञायते ॥ ४८ ॥

तत्त्वविस्तथास्त्वभिलाषकस्य किं फलमिति तत्राह। नेति। यः कृपणः कामानभिलषन् स्वस्य मोक्षणं श्रेयो न वेद। कुतः। गुणवस्तुदृक् स्वर्गादेर्गुणानां शब्दादिविषयाणां वस्तुदृक् अप्रतिहतत्वदर्शी नित्यत्वज्ञानीत्यर्थः। अहमिच्छतोऽभिलाषकस्य तस्य

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तान् कामान् यच्छे दद्यां त्वां भजमानस्य तथाविधफलदातृत्वं तव कथं युक्तमिति तत्राह । यदीति । यदि स मां भजमानोऽपि तथाविधः नश्वरफलस्वीकारयोग्यः उत्तमाधिकारी न स्यात्तर्हि तस्मै ऐहिकान् कामान् दद्यां यश्च त्रैविद्योऽप्युत्तमो न स्यात् तस्मै स्वर्गादिकामान् दद्यामिति विशेषमभिप्रेत्याचार्यैरुत्तमो न भवति चेदिति व्याख्यातम् । यच्छेदिति पाठेऽयमर्थः । त्वद्भक्तादन्यः कथमिति तत्राह । नेति । गुणवस्तुदृक् त्रिगुणजन्यशरीरादेर्वस्तुत्वज्ञानी दीनोऽयं मुग्धः श्रेयो मोक्षाख्यं न वेद तद्विनान्यद्वाञ्छेच्च तस्य सेवकस्य सेव्योऽपि तथाविधोऽप्युत्तमो न भवति चेत्तर्हि तादृशान् कामान् यच्छेद्दद्यात् मत्प्रेरित इति शेषः ॥ ४९ ॥

कथमत्युत्तमो न भवतीति तत्राह । स्वयमिति । विद्वांस्तत्तद्योग्यमुक्तिविशेषं जानन्नत्युत्तमः स्वयमज्ञाय अज्ञानिने पुंसे कर्मभिर्निःश्रेयसं न वक्ति नोपदिशति किं तु "तमेवं विद्वान्" इति श्रुतेः । ज्ञानेनैव यथा पथ्यमेव अभिषिञ्चति ददाति नापथ्यमित्यल्लोपेन भिषक् भिनत्ति रोगं सिञ्चति आप्याययति प्राणमिति वा वैद्यः पानीयं वाञ्छतो ज्वरादिरोगार्तस्यापथ्यं पानीयादिद्रव्यं न राति न ददाति तस्मादनीदृश उत्तमो न भवतीत्यर्थः । ननु कृपणः कर्मणा सिद्धिकामित्वाद्धि नात्युत्तम इत्यभिप्रेतं तत्कथमुच्यते ॥

> लोकसङ्ग्रहमेवापि संपश्यन् कर्तुमर्हसि ।
> यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ॥

इत्यादौ भगवतैव कर्मविधानादत्राह । स्वयमिति । मादृशो विद्वान् स्वयं केवलैः कर्मभिरज्ञाय अज्ञानिने निःश्रेयसं न वदाति किं तु ज्ञानद्वारा शुद्धान्तःकरणाय यथा भिषगपि केवलफलकामिन एव तादृशफलं दीयते अतः साकल्यफलस्वीकारयोग्य इति नियम्यते तर्हि किमर्थं तस्मै तादृशमपि दीयत इति चेन्न । युष्मद्भक्तत्वेन फलदानस्य युष्मदिष्टत्वात्तदेव मम प्रियं युष्मत्कामाभावे तत्फलं न दद्यां भवतां च मत्प्रियकामित्वादेतदाचार्यैरुक्तम् । युष्मत्कामो मत्प्रिय एवान्यथा न दद्यामिति भावः ॥

> विष्णोः प्रियं कामयन्ति देवा नैवाप्रियं क्वचित् ।
> यद्यप्रियं कामयन्ति न रातीशो हितो यतः ।

इति । ननु यदि पुरुषेण निष्कामेण भवितव्यं तर्ह्यस्मत्कामो निष्फलो भवतोऽनिष्टत्वादिति शङ्का माभूत् त्वाष्ट्रहननस्य ममेष्टत्वान्मदिष्टमेव युष्माभिः कामितमित्यतो वाचार्यैः युष्मत्काम इत्याद्युक्तम् ॥ ५० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

उत्कण्ठया पुनः स्फुटमेव निवेदयन्ति । अथो इति ॥४४-४६॥

आत्मा जीवश्च ईश्वरश्च आत्मेश्वरौ । तयोर्भावः आत्मैश्वर्यम् उभयपदवृद्धिः । तस्य स्मृतिर्विवेको यस्याः अथ तत्र भवान् किं देवदत्तवदित्यादेः ॥ ४७-४९ ॥

स्वयमिति । तस्मान्न बुद्धिभेदं जनयेदित्यादिकम् । असमर्थोपदेष्टृविषयं ज्ञेयम् ॥ ५० ॥ ५१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अत एव सर्वज्ञत्वादेव वयं यत्कामेन यस्य कामनया चरणपद्मच्छायामुपसादिताः स्वयं त्वयैव प्रापिताः । तत्कार्यं स्वयमेव उपकल्पय सम्पादय । छायां कीदृशीमुपसृतानां भक्तानां परिश्रमोपशमनीम् ॥ ४३ ॥

सर्वत्रैव स्तुतिषु शुद्धभक्तेरुत्कर्षकथनात् कदाचिद्भक्तिमेव ददाति भगवांस्तथा सति प्रेमाश्रुकम्पादिमन्तो वयं स्वर्गीयसुखेषु वैमुख्योदयात् पृथिव्यामेव पर्यटिष्यामोऽस्मद्वैरिण एवामरावतीमध्यास्य विराजिष्यन्त इत्याशङ्कया गाम्भीर्याभावेन च स्पष्टमेव काममाहुः । अथो इति ॥ ४४ ॥

तव चरणयोः पतामः शीघ्रं जहीति वैकल्येन श्रीकृष्णरूपिणं तं सर्वमेव स्वाभिलषितमभिव्यञ्जयन्तः प्रणमन्ति । हंसाय सारासारौ विमृश्य सारग्राहिणे । दहूनिलयाय अस्मद्धृदयसरोनिकेताय । निरीक्षकाय तत्रास्मद्धृदयेषु प्रस्तुतं काममपि निरीक्षमाणाय । ततश्च मृष्टयशसे । अस्मन्महाविपत्त्रायकत्वलक्षणम् यशस्ते लोका गायन्तीति भावः । निरुपक्रमाय अस्मन्निवेदितकृत्येषूपक्रमं विनैव तत्सम्पादनसमर्थाय । किं तु सतां भक्तानामेव प्रयासेनापि सङ्ग्रहो न चान्यवस्तूनां यस्य तस्मै "नमोऽकिञ्चनवित्ताय" इतिवचनात् । किञ्च । भववर्त्मनि ये पान्थास्तेषामस्मदादिदुर्जीवानां शुद्धभक्तिरहितानामपि निजस्याश्रमस्य प्राप्तौ अविद्यां तीर्त्वा स्वानन्दाधिगमे सतीत्यर्थः । संसारस्य अन्ते परि सर्वतो भावेनेष्टा वाञ्छिता गतिः सायुज्यं सालोक्यं दास्यादिप्रेमा वा यतस्तस्मै ॥ ४५ ॥ ४६ ॥

ममोपस्थानं स्तोत्रमेव विधा तया । आत्मैश्वर्येति । ये मामनया स्तुवन्ति तेषां मदैश्वर्यस्मृतिर्भवेत् । आत्मनैवाविक्रियमाणेन सगुणमगुणः सृजसि हरसि पासीत्यतर्क्यैश्वर्योक्तेः ॥४७॥

अहो दौर्भाग्यं मूर्खता च युष्माकमनया विद्यया मां स्तुत्वापि भक्तिं न प्रार्थयध्वे इत्याह । किमिति ॥ ४८ ॥

यद्यपि यूयं मूर्खा विषयानभिलसन्तः स्वभद्राभद्रं न जानीथ तदप्यहन्तु विज्ञस्तान् कथं युष्मभ्यं ददामि । न हि माता सुतेभ्यः स्वहस्तेन विषं ददातीत्याह । नेति । गुणान् विषयानेव वस्तुपुरुषार्थं पश्यतीति सः । आत्मनः श्रेयो न वेद । तस्य तस्मै तानेव यो विज्ञोऽपि यच्छेत् सोऽपि अज्ञ एव ॥ ४९ ॥

कर्म न वक्ति । प्रवृत्तिमार्गं नोपदिशति अपथ्ये यथा न राति न ददाति भिषक्तमः सद्वैद्यः ॥ ५० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अतो वयं यत्कामेन यस्य प्रयोजनस्य सङ्कल्पेन तव चरणशतपत्रपलाशच्छायामुपसादिताः प्रापिताः तदस्माकमुपसृतानां शरणागतानां स्वयमुपकल्पय सम्पादय विविधैर्वृजिनैर्यः संसारपरिश्रमस्तस्य शमनीमिति विशेषणेन धिगस्माकं कामं प्रति येन मुक्तिदां तव चरणकमलपत्रच्छायां तुच्छप्रयोजनकृते नीता वयमिति द्योत्यते ॥ ४३ ॥ ४४ ॥

दभ्रो हृदयाकाशः निलयो यस्य तस्मै । हृदिध्येयाय निरीक्षकाय सर्वसाक्षिणे निर्गतः उपक्रम उत्पत्तिर्यस्मात्तस्मै । नित्यसिद्धाय

मघवन् ! यात भद्रं वो दध्यञ्चमृषिसत्तमम् ।
विद्याव्रततपःसारं गात्रं याचत मा चिरम् ॥ ५१ ॥
स वा अधिगतो दध्यङ्ङश्विभ्यां ब्रह्म निष्कलम् ।
यद्वा अश्वशिरोनाम तयोरमरतां व्यधात् ॥ ५२ ॥
(१) दध्यङ्ङाथर्वणस्त्वष्ट्रे वर्माभेद्यं मदात्मकम् ।
विश्वरूपाय यत् प्रादात्त्वष्टा यत्त्वमधास्ततः ॥ ५३ ॥
युष्मभ्यं याचितोऽश्विभ्यां धर्मज्ञोऽङ्गानि दास्यति ।
ततस्तैरायुधश्रेष्ठो विश्वकर्मविनिर्मितः ॥ ५४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सद्भिः साधुभिः ऋषिभिर्मन्त्रैर्वा सङ्गृह्यते इति तथा तस्मै भवे जन्ममरणप्रवाहलक्षणे संसारे पथि वर्तमानो भवपान्थस्तस्य जन्ममरणप्रवाहपतितस्यान्ते संसारनिवृत्तिकाले निजाश्रमाप्तौ निजधामप्राप्तौ परीष्टा परित इष्टा गम्यते अनया इति गतिर्यः स्वधामप्रापक इत्यर्थः तस्मै ॥ ४५ ॥

त्रिदशैः सादरमीडितः स्तुतः नन्दितः सन्तोषितश्च समुपस्थान स्तोत्रम् ॥ ४६ ॥

मदुपस्थानविषयया मदीयस्तुतिरूपया आत्मैश्वर्यस्मृतिर्मदीयैश्वर्यज्ञानम् ॥ ४७ ॥

मयि प्रसन्ने कोऽपि पुरुषार्थो दुर्लभो नास्ति तथापि मद्भक्तेन भगवद्भजनमेव प्रार्थनीयमहमपि मद्भक्तेभ्यः प्राकृतान् विषयान् दातु नोत्सहे तथापि भवद्भिः स्वेष्टसिद्ध्ये इदमनुष्ठेयमित्याह । किं दुरापमिति चतुर्भिः ॥ ४८ ॥

गुणेषु वस्तुदृक् दृष्टिः तान् गुणानिच्छतः तानेव यच्छेत् यदि तर्हि सोऽपि गुणदानसमर्थोऽपि तथाविधोऽविवेकी ॥ ४९ ॥

निःश्रेयसम् । निवृत्तिमार्गम् । कर्म । प्रवृत्तिमार्गम् ॥ ५० ॥

भाषा टीका ।

इससे भगवान् परमगुरु आपके चरणकमलकी छाया जो कि नानाप्रकारके दुःख संसार परिश्रमको नाशकरने वाली है तिसके हम शरण आये हैं सो जो हमारा मनोरथ है तिसको आप पूरा करो ॥ ४३ ॥

हे ईश्वर ! इससे आप इस वृत्रासुरको मारो जिसने कि तीनों भुवनको तथा हमारे तेजों को अस्त्र आयुधों को ग्रस लिया है ॥ ४४ ॥

हंसस्वरूप श्रीहरि हृदय मे निवास करनेवाले शुक्रादि के साक्षी निर्मल यशवाले श्रीकृष्ण आदिअन्तरहित सत्पुरुषों के सङ्ग्राहक हो तिन आपके अर्थ नमस्कार है ॥ ४५ ॥

श्रीशुकदेवजी बोले हे राजन् ! इस प्रकारसे जब देवतों ने भगवान्की स्तुति की तब अपनी स्तुतिको सुनकर हर्षित होकर उनसे बोले ॥ ४६ ॥

श्रीभगवान् बोले हे देवश्रेष्ठ हो ! मेरी स्तुतिरूपविश्वास से मै तुम पर प्रसन्न हुआ हूं जि स्तुति से कि मनुष्यो को हमारा ऐश्वर्य हमारी स्मृतिः अथावा मेरेमें भक्तिभी होती हैं ॥ ४७ ॥

हे देवता ! हो मेरे प्रसन्न होनेपर कोई पदार्थभी दुर्लभ नहीं है तो भी मेरेमे एकान्त भक्ति करने वाला पुरुष मेरे से और कुछ लेने नहीं चाहता है ॥ ४८ ॥

गुणोंमे यथार्थबुद्धि करने वाला पुरुष अपने कल्याणको नहीं जानता है यदि जो वह चाहता है तिसीको यदि प्रभु देवै सो भी अज्ञानी ही होगा ॥ ४९ ॥

जो स्वामी स्वयं कल्याणमार्ग को जानता है सो अज्ञानी सेवकको बन्ध कर्मको नहीं सिखावेगा जैसे कि उत्तम वैद्य रोगीके इच्छाकरने पर भी कुपथ्य पदार्थ नहीं देता है ॥ ५० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं तत्त्वकथनेनानौचित्यं परिहृत्य तदभिप्रायमनुसरन्नाह । मघवन्निति । विद्यया व्रतैस्तपसा च सारं दृढं गात्रं शरीरं याचत याचध्वम् ॥ ५१ ॥

तत्र तदीयविद्यातिशयमाह । स वा इति द्वाभ्याम् । एवं ह्यत्र प्रसिद्धा कथा ।

निरग्न्याथर्वणो दत्त्वं प्रवर्ग्यब्रह्मविद्ययोः ।
दध्यञ्चं समुपागम्य तमूचतुरथाश्विनौ ॥
भगवन् ! देहि नौ विद्यामिति श्रुत्वा स चाब्रवीत् ।
कर्मण्यवस्थितोऽद्याहं पश्चाद्वक्ष्यामि गच्छतम् ॥
तयोर्निर्गतयोरेव शक्र आगत्य तं मुनिम् ।
उवाच भिषजोर्विद्यां मावादीरश्विनोर्मुने ! ॥
यदि मद्वाक्यमुल्लङ्घ्य ब्रवीषि सहसैव ते ।
शिरश्छिन्द्यां न सन्देह इत्युक्त्वा स ययौ हरिः ॥
इन्द्रे गते तथाऽभ्येत्य नासत्यावूचतुर्द्विजम् ।
तन्मुखादिन्द्रगदितं श्रुत्वा तावूचतुः पुनः ॥

---

(१) कृत्स्नमाथर्वणामिति श्रीविजयध्वजतीर्थपाठः ।

येन वृत्रशिरो हर्त्ता मत्तजउपबृंहितः ।
तस्मिन् विनिहते यूयं तेजोऽस्त्रायुधसम्पदः ।
भूयः प्राप्स्यथ भद्रं वो न हिंसन्ति च मत्परान् ॥ ५५ ॥
इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
पारमहंस्यां संहितायां वैयासिक्यां भगवदुपदेशोनाम
नवमोऽध्यायः ॥ ९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आवां तव शिरश्छित्वा पूर्वमश्वस्य मस्तकम् ।
सन्धास्यावस्ततो ब्रूहि तेन विद्यां च नौ द्विज ! ॥
तस्मिन्निन्द्रेण संछिन्ने पुनः सन्धाय मस्तकम् ।
निजं ते दक्षिणां दत्वा गमिष्यावो यथातथम् ॥
एतच्छ्रुत्वा तथोवाच दध्यङ्ङाथर्वणस्तयोः ।
प्रवर्ग्यं ब्रह्मविद्यां च सत्कृतोऽसत्यशङ्कितः ॥

इति । ततश्चायमर्थः । दध्यङ् निष्कलं शुद्धं ब्रह्माधिगतो ज्ञातवान् पाठान्तरे तु निष्कृतं नितरां कृतं भवति यत येन तं प्रवर्ग्यं चाधिगतो ज्ञातवान् । ततोऽश्विभ्यां प्रादादित्युत्तरस्यानुषङ्गः । उपदिदेशेत्यर्थः । कथम्भूतं ब्रह्म । यद्वै अश्वशिरसा प्रोक्तत्वादश्वशिरोनाम प्रसिद्धम् । तयोरमरतां जीवन्मुक्तत्वं व्यधात् । तथा च श्रुतिः । "अश्वस्य शीर्ष्णा प्रयदीमुवाच" इति ॥ ५२ ॥

मदात्मकं वर्म श्रीनारायणकवचं चाधिगत इति पूर्वस्यानुषङ्गः । तत्र हेतुः । यस्मात्त्वष्ट्रे प्रादात् । किं तत् । यत्त्वष्टा विश्वरूपाय पुत्राय प्रादात् । कीदृशम् । यत्त्वं ततो विश्वरूपादधाः धृतवानसि । तदेवं विद्यया सारं गात्रं याचध्वमित्यर्थः ॥५३॥

ननु प्रेष्ठं देहं कथं दास्यति तत्राह । युष्मभ्यमङ्गान्यस्थीनि याचितः सन् दास्यति यतो धर्मज्ञः । विशेषतोऽश्विभ्यां शिष्यप्रीत्या दास्यति । अस्थीनीत्यनेन देवत्वं दर्शितम् । तैरस्थिभिर्विश्वकर्मणा विनिर्मित आयुधश्रेष्ठो वज्रो भविष्यतीति शेषः॥५४॥

येन भवान् वृत्रशिरो हर्ता हरिष्यति मम तेजसा उपबृंहितः सन् । तेजश्चास्त्राणि चायुधानि च सम्पदश्च भूयः प्राप्स्यथ । महाकायस्त्रिभुवनग्रासी स एवास्मान् हन्यादिति शङ्काकुलचित्तान् प्रत्याह । मत्परांश्च केऽपि न हिंसन्त्यतो युष्माकं भद्रमेवेति ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
नवमोऽध्यायः ॥ ९ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यद्यप्येवं परिपाटिस्तथापि हे मघवन्निन्द्र ! ऋषिसत्तमं दध्यञ्चं प्रति यात गच्छत वो युष्माकं भद्रमभिलषितं भविष्यति कथमित्यत्राह । विद्यादिप्रभावेण प्रवर्ग्यकर्मणा युष्मदपेक्षितार्थदानशीलं गात्रं शरीरं याचत याचध्वं विलम्बं मा कुरुत ॥ ५१ ॥

दधीचो गात्रस्य सारवत्त्वमेवाह । स वा इति । अत्रैषा प्रसिद्धा कथावगन्तव्या । अथर्वणो दध्यङ्नाम ऋषिः कश्चित्प्रवर्ग्याख्यधर्मविद्याब्रह्मविद्याभ्यां समर्थोऽभूत्तं च विद्याप्रभावशालिनं विद्यास्याश्विनौ विद्याजिघृक्षया तमुपेत्योचतुः नौ विद्यामुपदिशेति तेन दधीचाधुना कर्मण्यासक्तोऽहं पश्चादुपदेक्ष्यामीत्युक्तावश्विनौ ययतुः । तत इन्द्र आगत्य न कस्मैचिदपीमां विद्यामुपदिश यद्युपदिशेस्तव शिरः छिन्द्यामित्युक्त्वा ययौ ततः पुनरश्विनावागत्योचतुः उपदिशेति स च ताभ्यामिन्द्रोक्तमुक्तवान् ततोऽपि पूर्वमेव तव शिरश्छित्वाश्वशिरः सन्धास्यावः अतो नौ उपदिशेति स तथैव ताभ्यामभिसन्धितेनाश्वशिरसा विद्यामुपादिशदिति । तथा चोक्तम् ।

दध्यङ्ङाथर्वणो दक्षः प्रवर्ग्यब्रह्मविद्ययोः ।
इति ज्ञात्वाश्विनौ देवौ गत्वा तमिदमूचतुः ॥
ब्रह्मविद्यां प्रवर्ग्यं च वेद त्वं साम्प्रतं द्विज ! ।
तदावाभ्यां प्रवक्तव्यमागतौ त्वां तदर्थिनौ ॥
दध्यङ्ङपि तदा प्राह तौ पश्चात्तद्ब्रवीम्यहम् ।
कर्मण्यवस्थितोऽद्याहमधुना न तु साम्प्रतम् ॥
तच्छ्रुत्वा तौ तथेत्युक्त्वा जग्मतुः स्वालयं किल ।
एतस्मिन्नन्तरे शक्रो विद्यातिशयमात्मनः ॥
असहन् त्वरितो गत्वा दध्यञ्चमिदमब्रवीत् ।
प्रवर्ग्यं ब्रह्मविद्यां न कस्मैचिद्वक्तुमर्हसि ॥
शिरश्छिन्द्यां यदि ब्रूया रागलोभादिना तव ।
तथा बहुतिथे काले नासत्यावुपजग्मतुः ॥
ऊचतुश्चाप्यथर्वाणं ब्रूहि पूर्वोक्तमावयोः ।
इन्द्रेणाहं निषिद्धोऽस्मीत्याह वै द्विजसत्तमः ॥
यदि वक्ष्ये शिरश्छिन्द्यादिन्द्रो मे नात्र संशयः ।
पूर्वमेव शिरश्छित्वा तद्वीश्वशिरसं तव ॥
सन्धास्यावस्त्वमधुना ब्रूहि तेन प्रवर्ग्यकम् ।
तच्चेदिन्द्राश्छिनत्त्याशु स्वकीयं शिरसं ततः ॥
सन्धाय दक्षिणां चैव दास्याव इति होचतुः ।
एवमुक्तोऽथ दध्यङ् तु तयोस्तदुभयं जगौ ॥
प्रवर्ग्यब्रह्मविद्याभ्यां स तदा वीर्यवान् यतः । इति

स वा अधिगत इत्यादिना एषा कथा सूचिता । तत्रायमर्थः । स दध्यङ् ऋषिसत्तमः निष्कलं विशुद्धं ब्रह्म अधिगतः यथावज्ज्ञातवान् निष्कृतमिति पाठे तु नितरां कृतमनुष्ठितं प्रवर्ग्यं चाधिगतः यद्वावश्यं वक्ष्यामीत्यश्विभ्यां प्रतिज्ञातमित्यर्थः । तदेव निष्कृतं ब्रह्म विशिनष्टि । यद्वा । अश्वशिरोनामेति अश्वशिरसा प्रोक्तत्वादश्वशिर इति यत्प्रसिद्धं ब्रह्मेत्यर्थः । अश्विभ्यामित्यत्र ततोऽदादित्यस्यानुषङ्गः । ततोऽश्विभ्यामश्वशिरो ब्रह्म प्रवर्ग्यं चाददुपादिदेश उपदिश्य तयोरमरतां मरणराहित्यं व्यधादकरोदित्यर्थः ॥ ५२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथाथर्वणो दध्यङ् मदात्मकं मद्देवताकमत एवाभेद्यं वर्म नारायणवर्म स्वेनाधिगतं त्वष्ट्रेऽदादनेन च तद्गात्रस्य सारवत्त्वं तस्यापेक्षितप्रदत्वं च दर्शितम् । किं तद्वर्म यत्त्वष्टा स्वपुत्राय विश्वरूपायादात् यत्त्वं ततः विश्वरूपाद्धृतवानसि ॥ ५३ ॥

एवं दधीचो गात्रस्य सारवत्त्वमभिधायावश्यं याचितो गात्रं स्वीयं दध्यङ् दास्यतीत्याह । युष्मभ्यमिति । धर्मज्ञ इन्द्रादिदेवतारक्षणरूपधर्मज्ञः दध्यङ्ङ्याचितः सन् युष्मभ्यमवश्यमङ्गानि दास्यति । ददातु किं तैरस्माभिः कार्यं तत्राह । तत इति । तैर्दधीचाङ्गैः । विश्वकर्मणा विनिर्मित आयुधश्रेष्ठो भविष्यति ॥ ५४ ॥

येनायुधश्रेष्ठेन मत्तेजसोपबृंहितः आहितशक्तिरिन्द्रो वृत्रस्य शिरो हर्ता भविष्यति । तस्मिन्वृत्रे हते सति यूयं तेजांस्यस्त्राणि चायुधानि च पूर्ववद्भूयः प्राप्स्यथ त्रिभुवनग्रासी स एवास्मान् हन्यादिति शङ्काकुलचित्तान् प्राह । मत्पराँश्च न केऽपि बाधितुं क्षमन्ते वो युष्माकं भद्रमेव भविष्यति ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमद्वीर-
राघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एतत्कुत इत्याशङ्क्य त्वाष्ट्रहननोपायमाह । मघवन्निति । गानं ज्ञानं त्रायत इति गात्रं गतिसाधनत्वाद्वा ॥ ५१ ॥

जगतो धारकत्वाद्दधि ब्रह्म तदञ्चति गच्छतीति दध्यङ् सोऽधिगतोऽधिकज्ञानवान्वै प्रख्यातः "दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्रयदीमुवाच" इति श्रुतिः एतदेवाह । अश्विभ्यामिति । यस्माद्दधीचोऽश्विनीदेवताभ्यां ब्रह्मविद्यालक्षणं नितरां कृतमापादितं स्वीकृतमिति यावत्स इति । यद्वा । निष्कृतं प्रवर्ग्याख्यं कर्म ब्रह्म चाश्विभ्यामुक्तवानिति शेषः । यद्वा । * ब्रह्माश्विनीदेवताभ्यामुक्तवान् । किमिति । निष्कृतं सत्यप्रतिपालननिमित्तं दधीचा ब्रह्म दास्यामीति प्रतिज्ञातत्वात् तदनुपदेशेऽनृतवादित्वं स्यात् तत्राह । अश्वशिर इति । यद्दधीचाश्विभ्यामुपदिष्टं यच्च तयोर्वैद्याविरयुक्त्वा देवैर्दुर्लभीकृतामृतयोरश्विनोरमरतां मरणराहित्यं व्यधात्तद् ब्रह्माश्वशिरं नाम । अत्रेति हासमाचक्षते । अथर्वणो दध्यङ् प्रवर्ग्यब्रह्मविद्ययोर्वेत्ता इति तं विज्ञायात्मनोरमरत्वं कामयमानावश्विनौ देवौ दधीचमुपागम्य त्वं प्रवर्ग्यब्रह्मविद्याविशारद इत्याकर्णयागताभ्यां तदर्थिभ्यामावाभ्यां ते वक्तव्ये इति विज्ञापयाञ्चक्रतुः । कर्मकाण्डोक्तकर्मणि प्रवृत्तेन मया तत्समाप्य कालान्तरे वक्ष्येते इति तेनोदितौ तौ निजगृहाय याजग्मतुः । एतस्मिन्नन्तरे आत्मनोऽन्यस्य विद्यातिशयमसहमानः सुरपतिस्तमृषिमुपसृत्य त्वया प्रवर्ग्यब्रह्मविद्ये कस्मैचिन्न वक्तव्ये रागलोभादिना वदतस्तव शिरश्छिन्द्यामिति तमनुशशास एवं बहुतिथे कालेऽतिक्रान्ते नासत्याभ्यामागत्य पूर्वोक्तविद्ये वक्तव्ये इत्युक्तो मुनिरहमिन्द्रेण निषिद्धोऽस्मीत्यजीगदत् तत्रोपायमाकलय्य निजशिरश्छेदात्प्रागेव तत्र शिरश्छित्त्वान्यत्र निधाय कस्यचिदश्वस्य शिरश्छित्त्वा गले सन्धाय तेन ते विद्ये ब्रूहि यदीन्द्रस्तदश्वशिरश्छिनत्ति तर्हि स्वकीयशिरः पूर्ववद्गले संयोज्य तुभ्यं दक्षिणां च दास्यावः इति ताभ्यां देवचिकित्सकाभ्यामुक्तो दध्यङ्ङश्वशिरसा ते विद्ये तयोरुपदिदेश इत्यतोऽश्वशिरं नामेति प्रख्यातमभूदिति "आथर्वणायाश्विनौ दधीचेऽश्व्यं शिरः प्रत्यैरयतं स वां मधु प्रवोचदृतायन्त्वाष्ट्रं यद्दस्रावपि कक्ष्यं वाम्" इति श्रुतिं चात्रोदाहरन्ति । हेऽश्विनावाथर्वणाय दधीचेऽश्वसम्बन्धि शिरः प्रत्यैरयतं प्रतिसंहितमकुरुतं स दध्यङ् वां मधु ब्रह्मविद्यालक्षणं प्रवोचत्प्रावोचत् हे दस्रौ ! त्वष्ट्रा विश्वरूपाय प्रोक्तं त्वाष्ट्रं कक्ष्यं नारायणकवचं च वामुवाच । कीदृशं ऋतायन् यथातथं विद्यां जानन् विद्यां वक्ष्यामीति वचनं सत्यं सम्पादयन्निति वा ॥ ५२ ॥

किञ्च । नारायणकवचधारणाच्च दधीचोऽङ्गं वीर्यवदित्यभिप्रेत्याह । कृत्स्नञ्चेति । मदात्मकं वर्म नारायणकवचमाथर्वणमाथर्वणेन दधीचाधीतत्वात् कृत्स्नम् अङ्गोपाङ्गसाहित्येनान्यूनं त्वाष्ट्राय विश्वरूपाय प्रादात् यच्च त्वं विश्वरूपादधाः ततस्तस्मात्त्वाष्ट्रं त्वष्टुर्विद्यमानत्वात्तन्नामत्वात्तस्य विश्वरूपस्य विद्यमानत्वाच्च तथा ॥ ५३ ॥

युष्माकं वाच्याभङ्गभयं माभूदित्याह । युष्मभ्यमिति । अङ्गानीत्यवयवसाहित्यविवक्षया बहुवचनं किञ्चिदपि नावशेषयतीत्यर्थः । याचितोऽश्विभ्यामिति पाठे अश्विभ्यां याचितो यथा ताभ्यां विद्यां प्रादात्तथा युष्मभ्यमप्यङ्गानि ददातीत्यर्थः । तैरङ्गैर्विश्वकर्मणा निर्मित आयुधश्रेष्ठो भवत्विति शेषः । येनायुधश्रेष्ठेन मत्तेजसोपबृंहितो भवान् तेजोऽस्त्रायुधसम्पदः तेन ग्रस्ता इति शेषः । मत्परांश्च हिंसन्ति केऽपीति शेषः । अत्र द्वयोः कारित्वेन मुन्यादियाच्ञया न देवानां सामर्थ्यन्यूनतेति दोषः "समर्था अपि याचन्ति देवा मुन्यादिकान् क्वचित् । आज्ञयैव हरेस्तेषां यशोऽर्थमपि नान्यथा" इति वचनात् ॥ ५४ ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
नवमोऽध्यायः ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

निष्कल मायातीतम् ॥ ५२-५५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तदपि यदि देहारामत्वाद्विषयान् विना म्रियध्वे तर्हि तत्रोपायं शृणुतेत्याह । मघवन्निति । विद्यया व्रतैस्तपसा च सारं दृढं गात्रं शरीरं याचत याचध्वम् ॥ ५१ ॥

तदीयं विद्यातिशयमाह । स वा इति द्वाभ्याम् । एषं ह्यत्र प्रसिद्धा कथा । निशम्याथर्वणं दक्षं प्रवर्ग्यब्रह्मविद्ययोः । दध्यञ्चं समुपागम्य

(१) विद्यालक्षणाम् ।

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तमूचतुस्तथाश्विनौ । भगवन् ! देहि नौ विद्यामिति श्रुत्वा स चाब्रवीत् । कर्मण्यवस्थितोऽद्याहं पश्चाद्वक्ष्यामि गच्छतम् । तयोर्निर्गतयोरेव शक्र आगत्य तं मुनिम् । उवाच भिषजोर्विद्यां मावादीरश्विनोर्मुने ! । यदि मद्वाक्यमुल्लङ्घ्य ब्रवीषि सहसैव ते । शिरश्छिन्द्यां न सन्देह इत्युक्त्वा स ययौ हरिः । इन्द्रे गते तथाऽभ्येत्य नासत्यावूचतुर्द्विजम् । तन्मुखादिन्द्रगदितं श्रुत्वा तावूचतुः पुनः । आवां तव शिरश्छित्त्वा पूर्वमश्वस्य मस्तकम् । सन्धास्यावस्ततो ब्रूहि तेन विद्याश्च नौ द्विज ! तस्मिंश्चिन्द्रेण संछिन्ने पुनः सन्धाय मस्तकम् । निजं ते दक्षिणां दत्त्वा गमिष्यावो यथागतम् । एतच्छ्रुत्वा तथोवाच दध्यङ्ङाथर्वणस्तयोः । प्रवर्ग्यं ब्रह्मविद्याञ्च सत्कृतोऽसत्यशङ्कितः । इति । ततश्चायमर्थः । दध्यङ् निष्कलं शुद्धं ब्रह्म अधिगतः ज्ञातवान् । निष्कृतमिति पाठे कृतादनित्यपदार्थान्निष्क्रान्तम् । ततोऽश्विभ्यां प्रादादित्युत्तरस्यानुषङ्गः । ब्रह्म कीदृशं यद्वै अश्वशिरसा प्रोक्तत्वादश्वशिरोनाम तयोरमरतां जीवन्मुक्तत्वं व्यधात् । तथा च श्रुतिः "अश्वस्य शीर्ष्णा प्रयतीमुवाच" इति ॥ ५२ ॥

मदात्मकं वर्म श्रीनारायणकवचं त्वष्ट्रे प्रादात् यत् कवचं त्वष्टा विश्वरूपाय स्वपुत्राय प्रादात् । ततो विश्वरूपात्त्वं यत् अधा धृतवानसि अत एव विद्यया सारं गात्रं याचध्वमित्यर्थः ॥ ५३ ॥
नन्वेवं को दाता यः स्वगात्रमपि दद्यात्तत्राह । युष्मभ्यमिति । विशेषतोऽश्विभ्यां शिष्यप्रीत्या दास्यति । अश्विभ्यां हेतुभ्यामिति वा तैरङ्गैरस्थिभिः भविष्यतीति शेषः ॥ ५४ ॥

ननु सर्वग्रासिना वृत्रेण सार्द्धं योद्धुं न शक्नुमस्तस्मात्तं हन्तुं स्वयमेव यतस्वेत्यत आह । न हिंसन्तीति । वृत्रस्तद्वशीभूता असुराश्च मत्परान् युष्मान् न घ्नन्ति वृत्रस्य परमभक्तत्वेन मदर्थं स्वदेहमपि जिहासोर्वस्तुतो युष्मासु द्वेषो नास्त्येव यथा युष्माकं तस्मिन्निति॰ भावः ॥ ५५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठस्य नवमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे मघवन् ! ऋषिसत्तमं दध्यञ्चं प्रति यात गच्छत । वो भद्रं वाञ्छितं भविष्यति । तत्र गात्रं याचत याचध्वम् ॥ ५१ ॥

ऋषेर्विद्यावत्त्वंसत्यप्रतिज्ञत्वादीन् गुणानाह । स वा इति द्वाभ्याम् । इयं ग्रन्थान्तरे प्रसिद्धा कथा ।

निशाम्याथर्वणं दक्षं प्रवर्ग्यब्रह्मविद्ययोः ।
दध्यञ्चं समुपागम्य तमूचतुरथाश्विनौ ॥
भगवन् ! देहि नौ विद्यामिति श्रुत्वा स चाब्रवीत् ।
कर्मण्यवस्थितोऽद्याहं पश्चाद्वक्ष्यामि गच्छतम् ॥
तयोर्निर्गतयोरेव शक्र आगत्य तं मुनिम् ।
उवाच भिषजोर्विद्यां मावादीरश्विनोर्मुने ! ॥
यदि मद्वाक्यमुल्लङ्घ्य ब्रवीषि सहसैव ते ।
शिरश्छिन्द्यां न सन्देह इत्युक्त्वा स ययौ हरिः ॥
इन्द्रे गते तथाऽभ्येत्य नासत्यावूचतुर्द्विजम् ।
तन्मुखादिन्द्रगदितं श्रुत्वा तावूचतुः पुनः ॥
आवां तव शिरश्छित्त्वा पूर्वमश्वस्य मस्तकम् ।
सन्धास्यावस्ततो ब्रूहि तेन विद्यां च नौ द्विज ! ॥
तस्मिंश्चिन्द्रेण संछिन्ने पुनः सन्धाय मस्तकम् ।
निजं ते दक्षिणां दत्त्वा गमिष्यावो यथागतम् ॥
एतच्छ्रुत्वा तथोवाच दध्यङ्ङाथर्वणस्तयोः ।
प्रवर्ग्यं ब्रह्मविद्यां च सत्कृतोऽसत्यशङ्कितः ॥

इति । श्लोकान्वयस्तु स वै दध्यङ् यद्वै अश्वशिरसो यदिष्ट्वादश्वशिरोनाम ब्रह्म निष्कृतं नितरामनुष्ठेयं प्रवर्ग्याख्यं कर्म च ब्रह्मविद्यां प्रवर्ग्याख्यं कर्मविद्यां च अधिगतः ज्ञातवान् । ततः अश्विभ्यां प्रादादिति क्रियापदेनान्वयः । तथा च श्रुतिः "अश्वस्य शीर्ष्णा प्रयतीमुवाच" इति तया ब्रह्मविद्यया तयोरमरतां ब्रह्मज्ञता व्यधात् ॥ ५२ ॥

स एव दध्यङ् यन्मदात्मकं कवचं त्वष्ट्रे प्रादात् स च त्वष्टा विश्वरूपाय प्रादात् ततस्त्वष्टुः सकाशात् यत् त्वमधाः धृतवानसि ॥ ५३ ॥

युष्माभिः विशेषतोऽश्विभ्यां च याचितः धर्मज्ञः अङ्गानि अस्थीनि युष्मभ्यं दास्यति । तैः अस्थिभिः आयुधश्रेष्ठो वज्रो भविष्यति हर्ता हरिष्यति । तेन वृत्रशिरो हर्ता हरिष्यति मत्तेजसा उपबृंहितः सन् तस्मिन् वृत्रे विनिहते यूयं भूयस्तेजआदिकं प्राप्स्यथ । तदनन्तरं वो युष्माकं भद्रं मङ्गलमेव भविष्यति । ये तु विशेषतो मत्परास्तांस्तु सर्वदा केऽपि न हिंसन्तीत्याशयेनाह । नेति । अहं परः पूज्यो येषां तान् केऽपि न हिंसन्तीति योजना ॥ ५४ ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
नवमाध्यायार्थप्रकाशः ॥ ९ ॥

भाषा टीका ।

हे इन्द्र ! आपका भला होगा तुम लोग उत्तम ऋषि दधीच के पास जाओ फिर विद्या व्रत तपस्या से दृढ़ उनके शरीरको जल्दी मांगो ॥ ५१ ॥

वह दधीच मुनि निष्कल ब्रह्म को जानते हैं जिस ब्रह्म ज्ञान का अश्व शिर नाम है उस विद्या को अश्विनी कुमार को देकर उनने उन दोनों को अमर कर दिया है ॥ ५२ ॥

जिस दधीचने मेरा स्वरूप नारायण कवच को त्वष्टाके लिये

भाषा टीका ।

उपदेश किया है उस त्वष्टाने विश्वरूप को दिया है विश्वरूप ने तुमको दिया है ऐसी विद्या वाले दधीच हैं ॥ ५३ ॥

तुमारे साथ में रहने वाले अश्विनीकुमार के मांगने से दधीच ऋषि अपने शरीरको देदेंगे तिससे विश्वकर्मा केवनानेसे हमारे तेजसे युक्त होनेसे विश्वकर्मा का वनाया बज्र आयुध वृत्रासुरके शिरको काटैगा तव तुम लोग आयुध अस्त्र सम्पत्तिसे युक्त होकर फिर अपने स्थान को प्राप्त होवोगे क्यों कि मेरे भक्तों को कोई नहीं मार सकता है ॥ ५४ ॥ ५५ ॥

इति श्रीभागवत षष्ठस्कन्ध के नवमें अध्यायका भाषानुवाद लक्ष्मणाचार्यकृत समाप्त ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे नवमोऽध्यायः समाप्तः ॥ ९ ॥

॥ दशमोऽध्यायः ॥

॥ श्रीशुक उवाच ॥

इन्द्रमेवं समादिश्य भगवान् विश्वभावनः ।
पश्यतामनिमेषाणां तत्रैवान्तर्दधे हरिः ॥ १ ॥
तथाभियाचितो देवैर्ऋषिराथर्वणो महान् ।
मोदमान उवाचेदं प्रहसन्निव भारत ! ॥ २ ॥
अपि वृन्दारका ! यूयं न जानीथ शरीरिणाम् ।
संस्थायां यस्त्वभिद्रोहो दुःसहश्चेतनापहः ॥ ३ ॥
जिजीविषूणां जीवानामात्मा प्रेष्ठ इहेप्सितः ।
क उत्सहेत तं दातुं भिक्षमाणाय विष्णवे ॥ ४ ॥

॥ देवा ऊचुः ॥

किं नु तद्दुस्त्यजं ब्रह्मन् ! पुंसां भूतानुकम्पिनाम् ।
भवद्विधानां महतां पुण्यश्लोकेड्यकर्मणाम् ॥ ५ ॥
ननु (१) स्वार्थपरो लोको न वेद परसङ्कटम् ।
यदि वेद न याचेत नेति नाह यदीश्वरः ॥ ६ ॥

॥ ऋषिरुवाच ॥

धर्मं वः श्रोतुकामेन यूयं मे प्रत्युदाहृताः ।
एष वः प्रियमात्मानं त्यजन्तं सन्त्यजाम्यहम् ॥ ७ ॥
योऽध्रुवेणात्मना नाथाः ! न धर्मं न यशः पुमान् ।
ईहेत भूतदयया स शोच्यः स्थावरैरपि ॥ ८ ॥
एतावानव्ययो धर्मः पुण्यश्लोकैरुपासितः (२) ।
यो भूतशोकहर्षाभ्यामात्मा शोचति हृष्यति ॥ ९ ॥
अहो दैन्यमहो कष्टं पारक्यैः क्षणभङ्गुरैः ।
यन्नोपकुर्यादस्वार्थैर्मर्त्यः स्वज्ञातिविग्रहैः ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दशमे केशवादिष्टदध्यङ्ङस्थिजवज्रभृत् ।
इन्द्रोऽयुध्यत वृत्रेण सासुरेण स निर्जरः ॥ १ ॥ १ ॥

तथेति । मोदमान एव तन्मुखाद्धर्मं श्रोतुकामः प्रत्याचक्षाण इवोवाच अपीति द्वाभ्याम् । हे वृन्दारकाः ! अपि किं संस्थायां मृत्यौ योऽभिद्रोहो दुःखं तं न जानीथ ॥ २ ॥ ३ ॥

आत्मा देहः । वयं जानीम एव किं तु श्रीविष्णुरस्मन्मुखेन याचत इति चेत्तत्राह । याचते विष्णवेऽपि दातुं क उत्सहेत ॥ ४ ॥

---

(१) नूनमिति श्रीवीरराघवविजयध्वजचक्रवर्त्तिनां पाठः (२) उपासित इति श्रीवीरराघवाचार्यपाठः ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

पुण्यश्लोकैरीड्यानि कर्माणि येषाम् ॥ ५ ॥

याचको यदि वेद तर्हि न याचेत यदीश्वरो दानसमर्थश्चेत्तर्हि सोऽपि नेति नाह । अतो यथा तव सङ्कटं स्वार्थपरा वयं न जानीम एवं प्रत्याचक्षाणस्त्वमस्मत्सङ्कटं न जानासीति भावः ॥६॥

मे मया प्रत्युदाहृताः प्रत्युक्ताः । मां त्यजन्तं त्यक्त्वा यान्तमात्मानं देहम् ॥ ७ ॥

अध्रुवेणात्मना देहेन हे नाथाः ! ॥ ८ ॥

भूतानां शोकेन शोचति हर्षेण हृष्यति य आत्मा स्वयं तस्य यो धर्म एतावानेवाव्यय इत्यर्थः ॥ ९ ॥

पारक्यैः श्वसृगालादिभक्ष्यैः अस्वार्थैरात्मोपयोगशून्यैः स्वं वित्तम् । ज्ञातयः पुत्रादयः विग्रहो देहः । तैर्नोपकुर्यादिति यत् ॥१०॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हरिरेवमादिश्यान्तर्दधावित्याह मुनिः । इन्द्रमिति । एवमित्थमिन्द्रं समादिश्याह्लादय विश्वस्य सुखकरो भगवाननिमेषाणां देवानां पश्यतां सतां तत्रैवान्तरधीयतान्तर्हितवान् ॥ १ ॥

हे भारत ! भगवदुक्तप्रकारेण देवैरभियाचितो दध्यङ्ङाथर्वणः अथर्वणः पुत्रः मुनिः परब्रह्ममननशीलः महान् "कृतकृत्याः प्रतीक्षन्ते मृत्युं प्रियमिवातिथिम्" इत्युक्तविधगुणसम्पन्नः अत एव मोदमानः हृष्टचित्तः प्रहसन्निव परिहासं कुर्वन्निवेदं वक्ष्यमाणमुवाच ॥ २ ॥

उक्तिमेवाह । अपीत्यादिना विष्णव इत्यन्तेन । तावत्तेषां विवक्षितं श्रोतुकामः प्रत्याचिख्यासुरिवाह दध्यङ् । अपीति । हे वृन्दारकाः ! शरीरिणां संस्थायामन्तकाले यो दुःसहः सोढुमशक्यश्चेतनापहः चैतन्यहरः अभिद्रोहः क्लेशस्तमपि किं न जानीथ ॥ ३ ॥

इह लोके जीवितुमिच्छूनां जीवानामात्मा देहः प्रेष्ठः प्रियतमः । अत एवेप्सितः इष्टस्तं प्रेष्ठं देहं भिक्षमाणाय विष्णवेऽपि दातुं को वा उत्सहेतोत्साहं कुर्यात् । न कोऽप्युत्सहेतेत्यर्थः । विष्णव इत्यनेन "अभ्यागतः स्वयं विष्णुः" इति प्रकारेण विष्णुरूपाय याचमानायेत्यर्थ उक्तः ॥ ४ ॥

एवमुक्ता देवास्तमाहुः । किं न्विति । हे ब्रह्मन् ! पुण्यश्लोकैरीड्यानि कर्माणि चरित्राणि येषाम् । पुण्यश्लोकेति सम्बुद्ध्यन्तं वा अत एव महतां भूतान्यनुकम्पयन्तीति तथा तेषां भूतानुकम्पाशीलानां भवादृशानां पुंसां किं नु तद्दुस्त्यजमात्मपर्यन्तदातॄणां न किमपि दुस्त्यजमस्तीति भावः ॥ ५ ॥

यदुक्तमभिद्रोहं किं न जानीथ इति तत्राहुः । नूनमिति । स्वार्थपरः स्वप्रयोजनासक्तः पुमान् परस्य सङ्कटं नूनं न वेद यदि परसङ्कटं वेद तर्हि न याचेतैव यदि याच्यमान ईश्वरः दानसमर्थस्तर्हि नेति न दास्यामीति नाह न ब्रूते असौ यथा तव सङ्कटं वयं स्वार्थपराः न जानीमस्तथा प्रत्याचक्षाणस्त्वमप्यस्मत्सङ्कटं न जानासीति भावः ॥ ६ ॥

एवमुक्तो दध्यङ् स्वाभिप्रायमाह । धर्ममिति चतुर्भिः । वो युष्माकं धर्मं श्रोतुकामेन मया प्रकृतं प्रत्युदाहृताः प्रत्याख्याताः आत्मानं मां त्यजन्तं प्रारब्धभङ्गात्स्वयमेव त्यजन्तं तमेतं वः युष्माकं प्रियं देहमहं सन्त्यजामि सम्यगहङ्कारापोहेन त्यजामि ॥ ७ ॥

हे नाथाः ! यः पुमानध्रुवेणात्मना देहेन धर्मं यशो वा भूतदयया नेहेत न साधयेत् स पुमान् स्थावरैरपि शोच्यः । स्थावरा अपि हि स्वविनाशेनापि परैरुपयुज्यन्ते । अतोऽनुपकारकस्तेभ्योऽपि निकृष्ट इत्यभिप्रायः ॥ ८ ॥

अव्ययोऽक्षयिष्णुः धर्मः पुण्यश्लोकैरेतावानेव उपासितः उपार्जितः कियान् । भूतानां शोकेन शोचति हर्षेण हृष्यति यः आत्मा स्वयमिति यः एतावानेव ॥ ९ ॥

मर्त्यैः कर्तृभिः पारक्यैः श्वसृगालादिभक्ष्यैः क्षणभङ्गुरैरस्थिरैरस्वार्थैरात्मोपयोगशून्यैः स्वज्ञातिभिर्विग्रहैर्देहैश्च साधनैर्नोपकुर्यादिति यदेतदहो कष्टमहो दैन्यं च ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शत्रुनिग्रहोऽपि भगवत्प्रीतिजनकत्वेन मुक्तिसाधनं स्यादित्यभिप्रेत्य कतिपयैरध्यायैर्वृत्रवासवयोर्युद्धं निरूप्यते । अत्रादौ सतामभीष्टमवश्यं कर्तव्यं पुरुषेणेति देवेभ्यो दधीचेः स्वाङ्गदानप्रकारं वक्तुमाह । इन्द्रमिति । "सुरमत्स्यावनिमिषौ" इत्यमरः ॥१॥२॥

संस्थायाम(१)चेतनापहो बुद्धिभ्रंशकरो यो द्रोहः दुःखलक्षण उपद्रवः तं वृन्दारका देवा अपि यूयं न जानीथेत्यन्वयः । सर्वप्राणिनां बुद्धिवृत्तिसाक्षित्वाद्भवतामित्यर्थः । अभिद्रोहस्य सर्वविषयज्ञाननाशकत्वात् ॥ ३ ॥

"आत्मा देहे शरीरे च संसारिणि हरौ तथा" इत्यभिधानात् इह प्रियेषु वस्तुषु देहः प्रेष्ठः प्रियतमः ईप्सिततम इति । यस्मात् कः पुमान् भिक्षमाणायातिथिरूपेण याचमानाय विष्णवेऽपि तं देहं दातुमुत्सहेत प्रयतेत ॥ ४ ॥

पुण्यश्लोकैः पुरुषैरीड्यानि स्तुत्यानि कर्माणि देहदानादीनि येषां ते तथा तेषाम् ॥ ५ ॥

नूनं प्रायः परसङ्कटं परदुःखं दातुमशक्यं दातव्यं चेति वा परसङ्कटं वेद तर्हि न याचेत । सामान्यमुक्त्वा विशेषमाहुः । नेतीति । अशक्यमपि दातुं यदीश्वरः समर्थस्तर्हि याचितः सन् असौ दास्यामीति नेति नाह न वक्तव्यं ते जानन्तोऽपीदृशो याचनीय इति जानन्तो वयं दातुं समर्थं भवन्तं याचामहे इत्यभिप्रायः । न चात्र देवानां स्वात्मनो नीचमाथर्वणं याचमानानामपि मानलक्षणतेजःक्षतिः शङ्कनीया । कार्यगौरवविवक्षया तद्भावस्य प्रामाणिकत्वाद्धर्याज्ञाकारित्वाच्च ।

> आज्ञयैव महाविष्णोः कार्यार्थमपि च क्वचित् ।
> नीचानपि तु याचन्ते स्वात्मनो गुणवत्तराः ॥
> नीचवाक्यं वदेयुश्च सुरा नैतावता क्वचित् ।
> तेजःक्षतिर्भवेदेषां जनकस्य यथार्भकः ॥

इति वचनात् ॥ ६ ॥

---

(१) मरणे ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रत्युदाहृताः निराकृता इत्योक्ताः । त्यजन्तं त्यक्ष्यन्तम् ॥ ७ ॥ अध्रुवेणात्मना अनित्येन देहेन हे नाथाः ! स्थावरैः स्तब्धैर्विवेकशून्यैरित्यर्थः ॥ ८ ॥ ९ ॥

पारक्यैः परेषां श्वसृगालादीनां भक्ष्यभूतैः अस्वार्थैः परप्रयोजनैः स्वज्ञातिजनैः स्वविग्रहैः स्वदेहैश्च ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

दशमाध्यायस्य क्रमसन्दर्भो नास्ति ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दधीचो याचितात् प्राप्तैरस्थिभिर्वज्रनिर्मितिः ।
दशमेऽभूज्जयश्चाजौ देवानामसुरैः सह ॥०॥

मोदमानोऽपि प्रहसन्निव याच्ञाप्रत्याख्यानेन तान् तिरस्कुर्वन्निव ॥ १ ॥ २ ॥

संस्थायां मृत्यौ ॥ ३ ॥

आत्मा देहः वयं जानीम एव किन्तु विष्णुरेवास्मन्मुखेन याचते इति चेत्तत्राह । विष्णवेऽपि दातुं क उत्सहेत ॥ ४ ॥ ५ ॥

ऋषिराह । नूनमित्यादि न याचेतेत्यन्तम् । देवाः प्रत्याहुः । नूनमित्यादिपद्यमेव न याचेतेति चतुरक्षरविनाभूतम् । ततश्चार्थान्तरन्यासस्यात्र विशेषतोऽयमर्थः । याचको लोकः नूनं स्वार्थपरः स्वर्गाद्यैश्वर्यभोगपरः । परस्य दातुः सङ्कटं स्वदेहास्थिप्रदाने पीडां न वेद । यदि देवत्वेन विवेकवत्त्वाद्वेद तर्हि न याचेतेति । तेन युष्माकं विवेकाभावान्न देवत्वं किन्तु व्याघ्रादिपशुतुल्यत्वमिति । ऋषिणोक्तं श्रुत्वा देवैः प्रत्युक्तं दाता लोकोऽपि नूनं स्वार्थपरः देहेन्द्रियादिषु ममत्वे चिरजीवित्वसुखपरः । परेषां याचकानां सङ्कटं घोरशत्रूपद्रवादिदुःखं न वेद । यदि ऋषित्वेन विज्ञानविवेकदयादिमत्त्वाद्वेद तर्हि नेति नाहं न दास्यामीति न ब्रूयात् । यद्यस्मादीश्वरः तद्दानसमर्थः तेन तवापि विज्ञानाद्यभावान्न ऋषित्वम् । प्रत्युत शोकमोहादिसद्भावाद्व्याघ्रादिपशुतुल्यत्वमिति भावः ॥ ६ ॥

धर्मं वः श्रोतुकामेनेति । स धर्मो युष्मत्प्रत्युत्तरेणैव श्रुतः । यद्वा । ध्वनिरयं वक्रोक्त्यैव धर्मो न श्रुतः । किन्तु । वाक्चातुर्यं श्रुतम् । भवतु तावत् स्वाभिप्रायं ज्ञापय इत्यत्राह । एष इति । आत्मानं देहं त्यजन्तं सम्यक् त्यजामीति स देहो यावन्मां न त्यजति तावदहमेव तं त्यजामि युष्मभ्यं ददामीत्येतावद्भाग्यं मम भवत्विति भावः ॥ ७ ॥

हे नाथाः ! ॥ ८ ॥

आत्मा मनः ॥ ९ ॥

अदातारमाक्षिपति । अहो इति । पारक्यैः शृगालादिभिर्भक्ष्यैः स्वं वित्तं ज्ञातयः पुत्रादयः विग्रहा देहास्तैः ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इत्थं लब्धवज्रस्य सदेवस्येन्द्रस्य सासुरेण वृत्रेण सह युद्धं वर्णयति । इन्द्रमिति दशमेन । अनिमेषाणां देवानाम् ॥ १ ॥

भगवता ममास्थीनि भिक्षितुमेते प्रेषिता इति कथञ्चिज्ज्ञात्वा मोदमानः धर्मं श्रोतुमिदमुवाच । स्वार्थपरा एवंविधेऽपि कर्मणि न लज्जन्ते इति तान् प्रति प्रहसन्नित्युक्तवान् ॥ २ ॥

अहो हे वृन्दारकाः ! संस्थायां मरणे योऽभिद्रोहो दुःखं तमपि किं यूयं न जानीथ ॥ ३ ॥ ४ ॥

पुण्यश्लोकैः पवित्रकीर्तिभिरपि ईड्यानि कर्माणि येषां तेषाम् ॥ ५ ॥ ६ ॥

वो धर्मं श्रोतुकामेन मे मया प्रत्युदाहृताः प्रत्याख्याताः । मां त्यजन्तं प्रारब्धकर्मक्षयात् पतन्तं वो युष्माकं प्रियं वाञ्छितमात्मानं देहं त्यजामि ॥ ७ ॥

हे नाथाः ! देवाः ! आत्मना देहेन ॥ ८ ॥

यः आत्मा पुरुषः भूतानां शोकेन शोचति हर्षेण हृष्यति यत एतावानेव धर्मः अव्ययः मोक्षपर्यवसायी पुण्यश्लोकैरुपासित आदृतः ॥ ९ ॥

अस्वार्थैः आत्मोपयोगरहितैः क्षणभङ्गुरैरनित्यैः पारक्यैः मातृपितृनृपश्वाग्न्यादीनां ममतास्पदैः स्वज्ञातिविग्रहैः धनबन्धुशरीरैः यन्नोपकुर्यादिति यदेतदहो दैन्यमहो कष्टं च ॥ १० ॥

भाषा टीका ।

श्रीशुकदेवजी बोले हे भारत ! विश्वपालन करने वाले भगवान् इन्द्र को इस प्रकार आज्ञा देकर देवतों के देखतेही वहींपर अन्तर्धान होगये ॥ १ ॥

हे भारत ! देवतों के इस प्रकार मागने से महात्मा अथर्वणा दधीच जी आनन्दित होकर हसते सरीके इस वचन को बोले ॥ २ ॥

यद्यपि आपलोग देवता हो तौ भी नहीं जानते हो कि देहधारियों को मरने में मूर्च्छा कर देने वाला जो दुःख होता है ॥ ३ ॥

जीनेकी इच्छावाले जीवों को इस संसार मे आत्मा वडा प्रिय है उस आत्मा को यदि विष्णु भी मांगे तो कौन देने को चाहैगा ॥ ४ ॥

देवता बोले हे ब्रह्मन् ! भूतों पर दया करने वाले, सत्कीर्ति वालों से कीर्तन करने योग्य कीर्ति वाले आप सरीके महात्माओं को कौनसी वात नहीं त्यागने योग्य है ॥ ५ ॥

दधीच जी बोले यह लोक सब वडा स्वार्थ वाला है सो दूसरे के सङ्कट को नहीं जानता है यदि जानता होता तो नहीं मांगता देवता बोले यदि देनेवाला देने में समर्थ होवै तो मांगने पर निषेध नहीं करता है ॥ ६ ॥

ऋषिबोले आपसे धर्म सुननेकी इच्छा से मैने आपको

॥ श्रीशुक उवाच ॥

एवं कृतव्यवसितो दध्यङ्ङाथर्वणस्तनुम् ।
परे भगवति ब्रह्मण्यात्मानं संनयन् जहौ ॥ ११ ॥
यताक्षासुमनोबुद्धिस्तत्त्वदृग्ध्वस्तबन्धनः ।
आस्थितः परमं योगं न देहं बुबुधे गतम् ॥ १२ ॥
अथेन्द्रो वज्रमुद्यम्य निर्मितं विश्वकर्मणा ।
मुनेः शुक्तिभिरुत्सिक्तो भगवत्तेजसान्वितः ॥ १३ ॥
वृतो देवगणैः सर्वैर्गजेन्द्रोपर्यशोभत ।
स्तूयमानो मुनिगणैस्त्रैलोक्यं हर्षयन्निव ॥ १४ ॥
वृत्रमभ्यद्रवच्छेत्तुमसुरानीकयूथपैः ।
पर्यस्तमोजसा राजन् ! क्रुद्धो रुद्र इवान्तकम् ॥ १५ ॥
ततः सुराणामसुरै रणः परमदारुणः ।
त्रेतामुखे नर्मदायामभवत् प्रथमे युगे ॥ १६ ॥
रुद्रैर्वसुभिरादित्यैरश्विभ्यां पितृवह्निभिः ।
मरुद्भिर्ऋभुभिः साध्यैर्विश्वेदेवैर्मरुत्पतिम् ॥ १७ ॥
दृष्ट्वा वज्रधरं शक्रं रोचमानं स्वमायया ।
नामृष्यन्नसुरा राजन् ! मृधे वृत्रपुरःसराः ॥ १८ ॥
नमुचिः शम्बरोऽनर्वा द्विमूर्द्धा ऋषभोऽम्बरः ।
हयग्रीवः शङ्कुशिरा विप्रचित्तिरयोमुखः ॥ १९ ॥
पुलोमा वृषपर्वा च प्रहेतिर्हेतिरुत्कलः ।
(१) दैतेया दानवा यक्षा रक्षांसि च सहस्रशः ॥ २० ॥

भाषा टीका ।

प्रत्युत्तर किया है यह देह यद्यपि प्रिय है तौ भी कभी आत्मा को छोडनेही वाला है सो तिसको मैं आपके वास्ते छोडता हूं ॥ ७ ॥

हे नाथ हो ! जो पुरुष इस अनित्य शरीर से धर्म या यश को नहीं करता है और भूतों की दया नहीं करता है सो पुरुष सबके शोचने योग्य है उसका स्थावर जीवभी शोच करते हैं ॥ ८ ॥

उत्तम पुरुषों का अनुष्ठान किया इतनाहीं वडा धर्म है जो कि भूतों के सुख से सुखपाना और भूतों के दुःखसे दुःखित होना ॥ ९ ॥

प्राणिमात्र को यही वडा कष्ट है यही वडा दैन्य है जो कि कुत्ता सृगालादिकों के भक्ष शरीर तथा धन बन्धु आदिकों से पराया उपकार नहीं करता है ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृतं व्यवसितं निश्चयो येन । आत्मानं क्षेत्रज्ञं सन्नयन्नेकीकुर्वंस्तनुं जहौ ॥ ११ ॥

यता अक्षादयो येन । तत्त्वं पश्यतीति तथा । ध्वस्तानि बन्धनानि यस्य ॥ १२ ॥

अथेन्द्रोऽशोभतेत्युत्तरेणान्वयः । मुनेः शुक्तिभिरस्थिभिर्निर्मितम् । उत्सिक्त ऊर्जितः मुनेरस्थिभिरिति वा पाठः ॥ १३ ॥ १४ ॥

असुरानीकानां यूथपैः पर्यस्तं परिवृतम् ॥ १५ ॥

---

[१] व्योमकेशो विरूपाक्षः कपिलोऽथ विभावसुः अयमधिकपाठः श्रीविजयध्वजतीर्थमते ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

रणः संग्रामः । प्रथमे चतुर्युगे त्रेतायुगस्य मुखे आरम्भे ॥ १६ ॥ १७ ॥

नामृष्यन्नासहन्त ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं कृतनिश्चयो देहं तत्याज दध्यङ्ङित्याह मुनिः । एवमिति । एवम् इत्थं कृतव्यवसितः कृतव्यवसायः आथर्वणो दध्यङ् परब्रह्मण्यात्मानं प्रत्यगात्मानं संनयन् समर्पयंस्तनुं देहं जहौ तत्याज ॥ ११ ॥

कथम्भूतस्तत्याज यता नियता असवः इन्द्रियाणि येन । शोभनं विषयेभ्यः प्रत्याहृतं मनो बुद्धिश्च यस्य । तत्त्वं प्रत्यगात्मशरीरकपरब्रह्मयाथात्म्यं पश्यतीति तत्त्वदृक् । ध्वस्तानि बन्धनानि पुण्यपापात्मकानि यस्मात् । परमम् "स्वपार्ष्णिनापीड्य" इत्यादिना द्वितीयस्कन्धोक्तं देहोत्क्रमणयोगमाश्रितः जहाविति पूर्वेणान्वयः । ततो गतं देहं न बुबुधे ॥ १२ ॥

अथ मुनेर्दधीचोऽस्थिभिः शल्यैर्विश्वकर्मणा विनिर्मितं वज्रमायुधमुद्यम्य उद्धृत्य भगवत्तेजसान्वितः अत एव उत्सिक्तः ऊर्जित इन्द्रः ॥ १३ ॥

सर्वैः देवगणैः परिवृतो गजेन्द्रस्य ऐरावतस्योपरि पर्यशोभत । ततो मुनिगणैः स्तूयमानो लोकत्रयं हर्षयन्निव शत्रोरहतत्वाद्धर्षयन्निवेति इवशब्दः प्रयुक्तः ॥ १४ ॥

असुरसैन्यानां नायकैः पर्यस्तं परिवेष्टितं शत्रुं वृत्रमभ्यद्रवदभिमुखमगात् यथा प्रलयकाले क्रुद्धो रुद्रः अन्तगं प्रति अन्तमवसानं गच्छतीति अन्तगः प्रपञ्चः तं प्रति । अन्तक इति पाठे अन्तं करोतीत्यन्तकः "अन्येभ्योऽपि दृश्यते" इति ड: प्रत्ययः । जगद्विनाशकृदित्यर्थः । अन्तकमिति द्वितीयान्तपाठे त्वन्तकं मृत्युं प्रति वेत्यभूतोपमेयम् ॥ १५ ॥

ततोऽसुरैः सह सुराणां परमदारुणो रणः सङ्ग्रामोऽभूत् । कदा क तत्राह । प्रथमे चतुर्युगे त्रेतामुखे त्रेतायुगारम्भे प्रथमेऽन्तरे इति पाठे प्रथमे कृतत्रेतयोरन्तरालकाले प्रथममन्वन्तरे वा । नर्मदायां नद्याम् ॥ १६ ॥

हे राजन् ! मृधे युद्धे रुद्रादिभिः परिवृतं वज्रायुधधरं स्वया प्रभया रोचमानं मरुत्पतिमिन्द्रं दृष्ट्वा वृत्रप्रभृतयोऽसुराः नामृष्यन्नासहन्त ॥ १७ ॥ १८ ॥

नमुच्यादयः ॥ १९ ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आत्मानं मनो ब्रह्मणि सम्यङ् नयन् आत्मानं देहम् ॥ ११ ॥

यता इन्द्रियप्राणमनोबुद्धयो येन स तथा हरेस्तत्त्वं रूपं पश्यन् योगम् (१) मूलाधारमारभ्य द्वादशान्तपर्यन्तं प्राणोन्नयनलक्षणम् ॥ १२ ॥

(१) नासाग्रमारभ्य द्वादशाङ्गुलान्तब्रह्मरन्ध्रलक्षणतुर्यस्थानपर्यन्तम्

उत्सिक्तः उन्नद्धः ॥ १३ ॥ १४ ॥

पर्यस्तं परिवृतम् ॥ १५ ॥

ननु कस्मिन् काले कस्मिन् देशे वृत्रवासवयोर्युद्धमभूदिति तत्राह । त्रेतामुख इति । अन्तरे अस्मिन्वर्त्तमाने वैवस्वताख्यमन्वन्तरे तत्रापि प्रथमे युगे प्रथमचतुर्युगे तत्रापि त्रेतामुखे त्रेतायुगस्यादौ नर्मदायां नर्मदातीरे गङ्गायां घोष इतिवत् तत्र तत्र लक्षणोक्त्या प्रथमरणस्तु नर्मदातीरे । द्वितीयरणस्तु मृतिकाले । समुद्रतीर इति विशेषो ग्रन्थान्तरेण च ज्ञातव्यः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ ०॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

आत्मानं मनः ॥ ११ ॥

योगं समाधिम् । गतं स्वस्माद्विच्युतम् ॥ १२ ॥

शुक्तिभिरस्थिभिः शक्तिभिरिति च पाठः ॥ १३ ॥ १४ ॥

पर्यस्तं परिवृतम् अन्तकमिवेति रुद्रो हि यममपि संहर्त्तुं शक्नोतीत्यभिप्रायेण । यद्वा । सिंहः सिंहमिवेतिवदयं दृष्टान्तः ॥ १५ ॥

त्रेतामुखे त्रेतारम्भे । प्रथमे युगे वैवस्वतमन्वन्तरस्य प्रथमे चतुर्युगे "स्यात् शतघ्नी चतुर्हस्ता लोहकण्टकसञ्चिता । भुशुण्डी सर्वतो लोहकण्टकानुक्रमोन्नता" इत्यभिधानम् ॥ १६—२३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कृतव्यवसितः कृतनिश्चयो ब्रह्मणि अंशिनि तत्पदार्थे आत्मानं तदंशभूतं त्वंपदार्थं संनयन् अर्पयन् तनुं जहौ तत्याज ॥ ११ ॥

यतान्यक्षाणीन्द्रियाणि असवः प्राणाः मनो बुद्धिश्च येन । तत्त्वे ब्रह्मणि आत्मरूपेणास्थाने दृग् दृष्टिर्यस्य ध्वस्तानि बन्धनानि यस्य सः । परमं योगं ब्रह्मणि चित्तैकाग्र्यमास्थितः देहं गतं न बुबुधे न ज्ञातवान् ॥ १२ ॥

शुक्तिभिः अस्थिभिर्निर्मितमुद्यम्य उत्सिक्तः इन्द्रः अशोभतेत्युत्तरेण सम्बन्धः ॥ १३ ॥ १४ ॥

पर्यस्तं परिवृतं रुद्रः अन्तकं लोकनाशकं त्रिपुरमिव मृत्युमिवेति वा । आत्मारामत्वात् ॥ १५ ॥

एतन्मन्वन्तरस्य प्रथमे चतुर्युगे त्रेतायुगस्य मुखे उपक्रमे ॥ १६ ॥

रुद्रादिभिर्युतं मरुत्पतिम् ॥ १७—२३ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले दधीचजी ने इस प्रकार से विचार करके परब्रह्म भगवान् में मनको लगाकर अपने शरीर को त्यागदिया ॥ ११ ॥

इन्द्रिय मन बुद्धि इन सबों को रोककर तत्त्वदृष्टि से बन्धन में से छूटकर परमयोग को धारण किया तब उतने जाते हुये शरीर को नहीं जाना ॥ १२ ॥

(१) इल्वलो वल्वलश्चैव दन्दशूको वृषध्वजः ।
कालनाभो महानाभो भूतसन्तापनो वृकः ॥ ० ॥
सुमालिमालिप्रमुखाः कार्त्तस्वरपरिच्छदाः ।
प्रतिषिध्येन्द्रसेनाग्र्यं मृत्योरपि दुरासदम् ॥२१॥
अभ्यर्दयन्नसम्भ्रान्ताः सिंहनादेन दुर्मदाः ।
गदाभिः परिघैर्बाणैः प्रासमुद्गरतोमरैः ॥ २२ ॥
शूलैः परश्वधैः खड्गैः शतघ्नीभिर्भुशुण्डिभिः ।
सर्वतोऽवाकिरञ्छस्त्रैरस्त्रैश्च विबुधर्षभान् ॥ २३ ॥
न ते दृश्यन्त संछन्नाः शरजालैः समन्ततः ।
पुङ्खानुपुङ्खपतितैर्ज्योतींषीव नभोघनैः ॥ २४ ॥
न ते शस्त्रास्त्रवर्षौघा ह्यासेदुः सुरसैनिकान् ।
छिन्नाः सिद्धपथे देवैर्लघुहस्तैः सहस्रधा ॥ २५ ॥
अथ क्षीणास्त्रशस्त्रौघा गिरिशृङ्गद्रुमोपलैः ।
अभ्यवर्षन् सुरबलं चिच्छिदुस्तांश्च पूर्ववत् ॥ २६ ॥
तानक्षतान् स्वस्तिमतो निशाम्य शस्त्रास्त्रपूगैरथ वृत्रनाथाः ।
द्रुमैर्दृषद्भिर्विविधाद्रिशृङ्गैरविक्षतांस्तत्रसुरेन्द्रसैनिकान् ॥ २७ ॥
सर्वे प्रयासा अभवन् विमोघाः कृताः कृता देवगणेषु दैत्यैः ।
कृष्णानुकूलेषु यथा महत्सु क्षुद्रैः प्रयुक्ता रुशती रूक्षवाचः ॥ २८ ॥

भाषा टीका ।

इसके अनन्तर विश्वकर्मा के बनाये उस वज्रको हाथ में ग्रहण करके मुनि की अस्थि के वज्र से वलिष्ठ होकर भगवान् के तेज से भी इन्द्र युक्त होगये ॥ १३ ॥

इन्द्र सब देवतों के साथ युक्त होगये गजेन्द्र के ऊपर शोभित भये मुनिगण उनकी स्तुति करने लगे तीनों लोकों को हर्षातेसे इन्द्र दीखने लगे ॥ १४ ॥

हे राजन् ! इस प्रकार तेज से युक्त होकर यम को मारने को क्रुद्ध हुये रुद्र के तुल्य होकर असुरों के सेना पतियों से युक्त वृत्रासुर के मारने को उद्यत भये ॥ १५ ॥

तव सत्ययुग के अन्त त्रेता युगके आदि में नर्मदा के किनारे देवता असुरों के साथ में बडा भयङ्कर संग्राम भया ॥ १६ ॥

रुद्र वसु आदित्य अश्विनीकुमार पितर अग्नि उञ्वास पवन ऋभु साध्य विश्वेदेवा इनों से संयुक्त वज्रधर अपनी माया से प्रकाश मान इन्द्र को युद्ध मे देखकर वृत्र आदिक असुर नहीं सह सके ॥ १७ ॥ १८ ॥

नमुचि शम्बर अनर्वा द्विमूर्द्धा ऋषभ अम्बर हयग्रीव शङ्कुशिरा विप्रचित्ति अयोमुख पुलोमा वृषपर्वा प्रहेति हेति उत्कल दैतेय दानव यक्ष राक्षस हजारों इल्वल वल्वल दन्दशूक वृष ध्वज कालनाभ महानाभ भूतसन्ताप न वृक सुमाली माली आदिक सब दैत्यादि सुवर्णादि से भूषित होकर मृत्युसे भी अति भयङ्कर इन्द्र की सेनाको निषेधकरने लगे ॥ १९ २० ॥२१॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शतघ्नी च चतुर्हस्ता लोहकण्टकसञ्चिता ।
भुशुण्डी सर्वतो लोहकण्टकानुक्रमोन्नता ॥

इत्यभिधानम् ॥ २३ ॥

पुङ्खो मूलदेशः एकस्य मूलदेशमनु तत्संलग्नोऽपरस्य पुङ्खो यथा भवति तथा नभःस्थैर्घनैर्ज्योतींषीवेत्यनेन तेषां तत्प्राप्तिः सूचिता ॥ २४ ॥

तामेवाह । न त इति । शस्त्राणामस्त्राणां च यानि वर्षाणि तेषामोघाः नासेदुर्न प्रापुः सिद्धपथे आकाशे ॥ २५ ॥

क्षीणा अस्त्राणां शस्त्राणां च ओघा येषां गिरिशृङ्गै-र्द्रुमैरुपलैश्च ॥ २६ ॥

[१] अयंपाठःटीकाश्रीधरीये श्रीवीरराघवविजयध्वजीयादिषु चनिर्दिष्टोदृश्यते ।

ते स्वप्रयासं वितथं निरीक्ष्य हरावभक्ता हतयुद्धदर्पाः ।
पलायनायाजिमुखे विसृज्य पतिं मनस्ते दधुरात्तसाराः ॥ २९ ॥
वृत्रोऽसुरांस्ताननुगान् मनस्वी प्रधावतः प्रेक्ष्य बभाष एतत् ।
पलायितं प्रेक्ष्य बलं च भग्नं भयेन तीव्रेण विहस्य वीरः ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तानिन्द्रसैनिकान् शस्त्राणामस्त्राणां च पूगैः समूहैरक्षतान् क्षतशून्यान् स्वस्तिमतः सुखिनो द्रुमादिभिश्चाविक्षतान्निशाम्य दृष्ट्वा । वृत्रो नाथो येषां ते तत्रसुर्भीताः ॥ २७ ॥

कृताः कृताः पुनः पुनः कृताः । कृष्णोऽनुकूलो येषां तेषु देवगणेषु । उशतीः उशत्यः । अकल्याण्यो रूक्षाः परुषा वाचो यथा महत्सु क्षोभकर्यो न भवन्ति तद्वत् ॥ २८ ॥

हतो युद्धे दर्पो येषां ते । आत्तः परैर्गृहीतः सारो धैर्यं येषां ते अतिप्रसिद्धा अपि ते दैत्याः एवं ते इत्यस्यापौनरुक्त्यम् । आजिमुखे युद्धारम्भे पतिं विसृज्य पलायनाय मनो दधुः यतो हरावभक्ताः ॥ २९ ॥

प्रधावतः पलायमानान् प्रेक्ष्य आदावेव तीव्रेण भयेन पलायितं भग्नं च तद्बलं सैन्यं तच्च प्रेक्ष्य एतद्वक्ष्यमाणं बभाषे ॥३०॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथा सुमालिप्रभृतयश्च सर्वे कार्त्तस्वरपरिच्छदाः सुवर्णमयाः परिच्छदाः परिकरा येषां ते मृत्योरपि दुरासदं दुष्प्रापमिन्द्रसेनाग्रमिन्द्रसेनाया अग्रं पुरोभागं प्रतिषिध्यावरुध्य ॥ २१ ॥

असम्भ्रान्ता अपरवशाः सन्तः दुर्मदा सिंहनादेनाऽभ्यद्रवन् गदादिभिः शस्त्रैश्च विबुधर्षभान् सुरान् सर्वतोऽवाकिरन् तत्र शतघ्नी चतुर्हस्ता लोहकण्टकसंयुक्ता ॥ २२ ॥ २३ ॥

पुङ्खो मूलदेशः एकस्य पुङ्खमनु तत्संलग्नोऽपरस्य पुङ्खो यथा भवति तथा समन्तात्पतितैः शरजालैः संछन्नास्ते देवा न दृश्यन्त यथा नभोघनैर्नभःस्थैर्मेघैराच्छन्नानि ज्योतींषि इत्यनेन तेषां तदप्राप्तिः सूचिता ॥ २४ ॥

तामेवाह । नत इति । ते शस्त्राणामस्त्राणां च यानि वीर्याणि तेषामोघाः सङ्घाः सुरसैनिकांस्तेषुनं प्रापुः किन्तु । लघुहस्तैर्हस्तलाघवशालिभिस्तैर्देवैः सहस्रधा सिद्धपथे आकाशे छिन्ना बभूवुः ॥ २५ ॥

अथ तीक्ष्णाच्छिन्ना अस्त्रशस्त्राणामोघा येषां ते दानवा गिरिशृङ्गैर्द्रुमैरुपलैः पाषाणैश्च सुराणां बलमभ्यवर्षन् तान् गिरिशृङ्गादीन् पूर्ववद्देवाश्चिच्छिदुरिदलयन्तः ॥ २६ ॥

अथ वृत्रो नाथो येषां ते ऽसुराः सर्वे स्वशस्त्रास्त्राणां पूगैः सङ्घैरक्षतानताडितानत एव स्वस्तिमतः सुखिनः तथा द्रुमैर्दृषद्भिः पाषाणैर्विविधैरद्रीणां शृङ्गैश्चाक्षतानिन्द्रसैनिकान्निशाम्य दृष्ट्वा सर्वेऽसुरास्तत्रसुः भीताः ॥ २७ ॥

देवगणेषु दैत्यैर्ये कृताः प्रयासास्ते सर्वे विमोघा व्यर्था अभवन् तत्र हेतुं वदन् देवगणान्विशिनष्टि । कृष्णानुकूलेष्विति । कृष्णोऽनुकूलो येषां तेषु तत्र दृष्टान्तमाह । यथेति । क्षुद्रैः प्रयुक्ताः उशती उशत्योऽकल्याण्यः रूक्षाः परुषा वाचो यथा महत्सु विमोहकाः क्षोभका न भवन्ति तथेति ॥ २८ ॥

हरौ भगवत्यभक्ताः अत एवात्तःसुरैर्गृहीतः सारो बलं येषाम् अत एव हतः युद्धे दर्पो गर्वो येषां तेऽसुरा वितथं व्यर्थं स्वप्रयासं निरीक्ष्य अधुनास्माकं सर्वे प्रयासाः व्यर्था एवेत्यालोच्य ते ऽतिप्रसिद्धा अपि दैत्या एवं ते इत्यस्यापौनरुक्त्यमाजिमुखे युद्धारम्भे पतिं वृत्रं विसृज्य पलायनाय मनो दधुः चक्रुः ॥ २९ ॥

अथ धीरो वृत्रः प्रधावतः, तीव्रेण भयेन पलायमानांस्ताननुगान् भृत्यान् प्रेक्ष्य तथा किञ्चिद्भग्नमवशिष्टं पलायितं बलं च प्रेक्ष्य विहस्येदं वक्ष्यमाणं बभाषे ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कार्त्तस्वरपरिच्छदाः सुवर्णालङ्काराः ॥ २१ ॥ २२ ॥

अवाकिरन् अवर्षन् ॥ २३ ॥

प्रावृषि वर्षाकाले ॥ २४ ॥

लघुहस्तैः शीघ्रवेधिभिः देवैः सिद्धपथे व्योम्नि स्वप्राप्तैः पूर्वं मध्यमार्गे एव छिन्नाः ॥ २५ ॥ २६ ॥

वृत्रो नाथो येषां ते तथा दृषद्भिः पाषाणैः ॥ २७ ॥

प्रयासाः प्रहारलक्षणाः प्रयत्नाः कृष्णोऽनुकूलोऽनुग्रहाऽभिमुखो येषां ते तथा तेषु उशतीः हिंसनाः "उशरिश हिंसायाम्" इति धातुः महत्सु दुर्वासः प्रभृतिषु यतिषु क्षुद्रैः हिंसकिमकादिजनकल्पैः ॥ २८ ॥

पतिं वृत्रम् आत्तसाराः निरस्तबलाः ॥ २९ ॥

मनस्वी प्रशस्तमनाः ॥ ३० ॥ ३१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ते देवाः पुङ्खः शरस्य मूलदेशः एकस्य पुङ्खमनु पतितो यः शरस्तस्य पुङ्खमन्वेवं पतितैः । नभःस्थैर्घनैर्ज्योतींषीवेत्यनेन तेषां तदप्राप्तिः सूचिता ॥ २४——२६ ॥

निशाम्य दृष्ट्वा तत्रसुर्भीताः ॥ २७ ॥

कृताः कृताः पुनः पुनः कृताः यथा महत्सु वैष्णवेषु उशतीः

कालोपपन्नां रुचिरां मनस्विनामुवाच वाचं पुरुषप्रवीरः ।
हे विप्रचित्ते ! नमुचे ! पुलोमन्!मयानर्वन् ! शम्बर ! मे शृणुध्वम् ॥ ३१ ॥
जातस्य मृत्युर्ध्रुव एष सर्वतः प्रतिक्रिया यस्य न चेह क्लृप्ता ।
लोको यशश्चाथ ततो यदि ह्यमुं को नाम मृत्युं न वृणीत युक्तम् ॥ ३२ ॥
द्वौ सम्मताविह मृत्यू दुरापौ यद्ब्रह्मसन्धारणया जितासुः ।
कलेवरं योगरतो विजह्याद्यदग्रणीर्वीरशयेऽनिवृत्तः ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम्
वैयासिक्यां षष्ठस्कन्धे वृत्रासुरयुद्धंनाम-
दशमोऽध्यायः ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

रुवन्तः यूयं शीघ्रं म्रियध्वमित्यकलयायः । रूक्षाः परुषा वाचः रे रे अधमा ! इत्याद्याः ॥ २८—३१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एकस्य पुङ्खं मूलदेशमनुवर्तमान इतरपुङ्खो यथा भवति तथा पतितैः नभोघनैः नभःस्थमेघैः यथा ज्योतींषि न दृश्यन्ते इत्यदर्शनमात्रे दृष्टान्तः ॥ २४ ॥

ते शस्त्रास्त्रवर्षौघाः यतो देवैः सिद्धपथे आकाशे संछिन्ना अतः सुरसैनिकान् आसेदुः प्रापुः ॥ २५ ॥

उपलैः पाषाणैः ॥ २६ ॥

तानिन्द्रसैनिकान् शस्त्रास्त्रपूगैरक्षतान् द्रुमादिभिश्चाविक्षतान् स्वस्तिमतो निशाम्य दृष्ट्वा वृत्रनाथाः त्रेसुः ॥ २७ ॥

कृताः कृताः भूयोभूयः कृताः प्रयासाः विशेषतः मोघाः निष्फला अभवन् वपतीः रुवन्तः दोषवन्तः रूक्षवाचः रूक्षाः नीरसाः वाचः ॥ २८ ॥ २९ ॥ ३० ॥

भाषा टीका ।

उन मद वाले असुरों ने सिंहनाद करके देवतों को गदाओंसे परिघों से बाणों से प्रास तोमर मुद्गरों से त्रिशूलों से फरसाओं से तरवारों से तोपों से भुशुण्डियों से चारों ओर से देवतों को अस्त्र शस्त्रों से प्रहार किया ॥ २२ ॥ २३ ॥

जैसे आकाश में मेघ में चन्द्रादि ज्योति ढकजाती हैं तैसे बाणों की वृष्टि से सब देवता ढक गये सो नहीं दीखे ॥ २४ ॥

असुरों के वे शस्त्र अस्त्रों के समूह देवतों के नहीं लगे देवतों ने बड़े सफाई के हाथ से जो शस्त्र चलाये तिनसे वे शस्त्र आकाश में कटगये ॥ २५ ॥

इसके अनन्तर असुरों के अस्त्र शस्त्र जब चीण होगये तब पर्वतों के शिखर पत्थर आदिकों से देवतों के सैन्य को मारने लगे तब देवतों ने पहिले सरी के सब शस्त्रादि काट दिये ॥ २६ ॥

फिर तो वृत्रासुर के संग वाले दैत्यों के जब पर्वतादिकों से भी देवतों को कुछ नहीं भया और बड़े शस्त्र अस्त्र पेड़ पत्थर भी व्यर्थ होगये तब इन्द्र सेनापतियों को देखकर असुर बड़े त्रास को प्राप्त भये ॥ २७ ॥

देवगणोंमें दैत्यो नें जो प्रयास किये सो सब व्यर्थ होगये जैसे श्रीकृष्ण भक्तों को क्षुद्र लोगों के परुष वचन कोई बाधा नहीं करते हैं ॥ २८ ॥

श्री हरि में अभक्त वे दैत्य अपने प्रयास को व्यर्थ देखकर युद्ध के गर्व के नष्ट होने से धैर्यसे छूट गये तब समर को छोडकर भगने के वास्ते मन में निश्चय करते भये ॥ २९ ॥

अपने बलको भगते देखकर और भगते देखकर अपने अनुगामी भागते हुये असुरों को देखकर बड़ा उत्साही वृत्रासुर बोला ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेव विशिनष्टि । कालोपपन्नामवसरोचितां मनस्विनां रुचिरां हे मय ! हे अनर्वन् ! मे वाचं शृणुत ॥ ३१ ॥

ततो मृत्योरिह यशो लोकः स्वर्गश्च यदि स्यात् । अथ नहि अमुं मृत्युं युक्तं समीचीनं प्राप्तं वा ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ब्रह्मसन्धारणया कलेवरं जह्यादिति यत्स एको मृत्युः वीरशये रणभूमावनिवृत्तोऽपराङ्मुखः सन् जह्यादिति यत्स एकः । तौ द्वाविह शास्त्रे सम्मतौ मृत्यू । तथा च स्मृतिः

द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ।
परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः ।

इति ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
दशमोऽध्यायः ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एतद्भाष इत्येतदेव प्रपञ्चयति । पुरुषश्रेष्ठः मनस्वी प्रशस्तमनस्कः वृत्रः कालोचितां मनस्विनां रुचिरां च वाचमुवाच । उक्तमेवाह । हे विप्रचित्ते ! इत्यादिना यावदध्यायपरिसमाप्ति । हे अय ! हेऽसर्वन् ! मे वाचं शृणुध्वम् ॥ ३१ ॥

सर्वतः सर्वस्य जातस्य जन्तोरेष मृत्युर्ध्रुवः निश्चितः मृत्युं विशिनष्टि । यस्य मृत्योरिह लोके प्रतिक्रिया प्रतीकारः न कृता नास्ति । किञ्च । शत्रुभ्यो मृत्युभयनिमित्तात्पलायनादयशस्करात्परलोकहानिकराच्चेभ्यो मृत्युरेव स्वर्गसंपादकः कीर्त्तिकरश्च श्रेयान् सङ्ग्रामे शत्रुभ्यो मृत्युर्दुर्लभश्चातस्तमेव वृणीतेत्याह । लोक इति द्वाभ्याम् । अथ हे दानवाः ! ततः सङ्ग्रामे मृत्योर्यदि लोकः वीरस्वर्गः यशश्च स्यात्तर्ह्यमुं मृत्युं युक्तं प्राप्तं को नाम न वृणोति किन्तु वृणुयादेव ॥ ३२ ॥

दुरापौ दुर्लभौ द्वौ मृत्यू इह लोके शास्त्रसम्मतौ । कौ तौ तावज्जितासुर्जितान्तर्बाह्येन्द्रियप्राणो योगासक्तः ब्रह्मसन्धारणया ब्रह्मविषयकधारणायोगेन कलेवरं त्यजेदिति यत्स एकः तथा वीरशये रणभूमौ अनिवृत्तोऽपराङ्मुखः कलेवरं जह्यादिति यत् सोऽपरो मृत्युः तथा चोक्तम् ।

द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ।
परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः ।

इति ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
दशमोऽध्यायः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यस्य मृत्योः प्रतिक्रिया परिहारः अथ यदि (१) यस्माल्लोको यशश्च स्यातां ततस्तर्हि कः क्षत्रियादिकल्पः युक्तं युद्धमूर्ध्नि प्राप्तं मृत्युं न वृणीत नामेत्यन्वयः ॥ ३२ ॥

इतोऽपि युद्धमरणं प्रशस्तमित्याहुः । द्वाविति । योगरतो जितप्राणश्च यो ब्रह्मसन्धारणया ब्रह्मध्यानेन कलेवरं विजह्यादिति । यश्च युद्धादनिवृत्तोऽग्रणीः । यो वीराणामग्रतो गत्वा वीरशये युद्धाङ्गणे शरीरं जहातीति । अथ मरणम् । तयोरेवैतौ मृत्यू दुष्प्रापौ सम्मतौ शास्त्रविहिताविर्त्यन्वयः ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
दशमोऽध्यायः ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ततो मृत्योरिह यशः स्वर्गश्च यदि स्यात् अथ तर्हि अमुं मृत्युं युक्तं समुचितम् ॥ ३२ ॥

वीरशये सङ्ग्रामे अनिवृत्तः अभिमुखस्थः ॥ ३३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठस्य दशमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कालोपपन्नां तत्कालोचिताम् ॥ ३१ ॥

जातस्योत्पन्नस्य मृत्युर्ध्रुवः आवश्यकः । यदि तत आवश्यकादपि इह यशः लोकः स्वर्गश्च स्यात् । अथ तर्हि अमुं मृत्युं युक्तं योग्यं को न वृणीत ॥ ३२ ॥

इह लोके द्वौ मृत्यू सम्मतौ योग्यौ तौ च दुरापौ दुर्लभौ । यतासुः यता असवः प्राणा इन्द्रियाणि येन । योगरतो भगवज्ज्ञानभक्तिनिष्ठः स ब्रह्मसन्धारणया कलेवरं जह्यात् इत्येकः । यश्चाग्रणीः सन् वीरशये सङ्ग्रामे निवृत्तो मृत इति द्वितीयः ॥३३॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
दशमाध्यायार्थप्रकाशः ॥ १० ॥

भाषा टीका ।

उस काल के उचित और उत्साही पुरुषों को रुचिकर वचन को वह पुरुषों मे वीर वृत्रासुर बोला कि हे विप्र चित्ति !

---

(१) मृत्योः ।

भाषाटीका।

हे नमुचि हे पुलोमन् ! हे मय ! हे अनर्वन् ! हे शम्बर ! आप लोग मेरे वचन को सुनो ॥ ३१ ॥

पैदा होने वाले का अवश्य सब प्रकार से मरण होना है जिस के कि निवारण का कोई भी उपाय नहीं है तब तो युद्ध मे मरने वाले को ब्रह्म लोक और यश होता है तो ऐसे मृत्यु को कौन नहीं चाहेगा ॥ ३२ ॥

इस संसार मे दो मृत्यु बड़े दुर्लभ हैं जिस की सब शास्त्र प्रसंशा करते हैं एकतो पवन को जीत कर ब्रह्म धारणा से प्राण त्यागना दूसरा युद्ध मे नहीं हट कर सन्मुख मे मरजाना ॥ ३३ ॥

इति श्रीभागवत षष्ठस्कन्ध के दशमे अध्यायका

भाषानुवाद लक्ष्मणाचार्यकृत

समाप्त ॥ १० ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे दशमोऽध्यायः समाप्तः ॥ १० ॥

॥ एकादशोऽध्यायः ॥

॥ श्रीशुक उवाच ॥

त एवं शंसतो धर्मं वचः पत्युरचेतसः ।
नैवागृह्णन् भयत्रस्ताः पलायनपरा नृप ! ॥ १ ॥

विशीर्यमाणां पृतनामासुरीमसुरर्षभः ।
कालानुकूलैस्त्रिदशैः काल्यमानामनाथवत् ॥ २ ॥

दृष्ट्वातप्यत संक्रुद्ध इन्द्रशत्रुरमर्षितः ।
तान्निवार्यौजसा राजन् ! निर्भर्त्स्येदमुवाच ह ॥ ३ ॥

किं व उच्चरितैर्मातुर्धावद्भिः पृष्ठतो हतैः ।
न हि भीतवधः श्लाघ्यो न स्वर्ग्यः शूरमानिनाम् ॥ ४ ॥

यदि वः प्रधने श्रद्धा सारं वा क्षुल्लका ! हृदि ।
अग्रे तिष्ठत मात्रं मे न चेद्ग्राम्यसुखे स्पृहा ॥ ५ ॥

एवं सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून् ।
व्यनदत् सुमहाप्राणो येन लोका विचेतसः ॥ ६ ॥

तेन देवगणाः सर्वे वृत्रविस्फोटनेन वै ।
निपेतुर्मूर्च्छिता भूमौ यथैवाशनिना हताः ॥ ७ ॥

ममर्द पद्भ्यां सुरसैन्यमातुरं निमीलिताक्षं रणरङ्गदुर्मदः ।
गां कम्पयन्नुद्यतशूल ओजसा नालं वनं यूथपतिर्यथोन्मदः ॥ ८ ॥

विलोक्य तं वज्रधरोऽत्यमर्षितः स्वशत्रवेऽभिद्रवते महागदाम् ।
चिक्षेप तामापततीं सुदुःसहां जग्राह वामेन करेण लीलया ॥ ९ ॥

स इन्द्रशत्रुः कुपितो भृशं तया महेन्द्रवाहं गदयोरुविक्रमः ।
जघान कुम्भस्थल उन्नदन् मृधे तत्कर्म सर्वे समपूजयन्नृप ! ॥१०॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एकादशे तु वृत्रस्य युध्यमानस्य वज्रिणा ।
भक्तिज्ञानबलोदर्काश्चित्रा वाचोऽनुवर्णिताः ॥ १ ॥

शंसतः कथयतः पत्युर्वचः ॥ १ ॥

कालानुकूलैः कालानुवर्तिभिः। काल्यमानां विद्राव्यमाणाम् ॥२॥

अमर्षितोऽसहमानस्तांस्त्रिदशान्निवार्य निर्भर्त्स्य चेदं वक्ष्यमाणमुवाच ॥ ३ ॥

तदेवाह द्वाभ्याम्। मातुरुच्चरितैः पुरीषप्रायैः। प्रथमान्तपाठे देवानां सम्बोधनम्। पृष्ठतो हतैर्वस्तैः किञ्चित् न यशो नापि धर्मः। तदेवाह। नहीति ॥ ४ ॥

प्रधने सङ्ग्रामे। सारं धैर्यं हृदि चेत्तर्हि हे क्षुल्लकाः ! क्षुद्राः ! मात्रं क्षणमात्रमग्रे तिष्ठत। न चेदिह लोकभोगे स्पृहास्ति ॥ ५ ॥

सुरगणान् रिपून्। सुमहान् प्राणो बलं यस्य। येन विचेतसो बभूवुः ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वृत्रस्य विस्फोटनेन नादेन ॥ ७ ॥

उद्यतं शूलं येन । नालं वनं नलानां वनम् उद्धृतो मदो यस्य स यूथपतिर्गजो यथा मर्दयति ॥ ८ ॥ ९ ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं वृत्रेण प्रतिबोधितानपि पलायमानानसुरान् वीक्ष्य स वृत्रस्तान्निवार्य युयुत्सुरिन्द्रं प्रत्युवाचेत्याह मुनिः । त इति । एवं हे नृप ! पत्युर्वृत्रस्य धर्म्यं धर्मादनपेतं वचः शंसतः कथयतः सतोऽपि भीताः । अत एव पलायनासक्ताः अत एवाचेतसोऽतिभयेन युद्धानासक्तचित्तास्ते असुरा नैवागृह्णन् पत्युर्वचो नाऽभ्यनन्दन् ॥ १ ॥

ततोऽसुरर्षभो वृत्रः कालोऽनुकूलो येषां तैस्त्रिदशैर्देवैर्विशीर्यमाणां विशेषेण पीड्यमानामत एवानाथवत् काल्यमानां विद्राव्यमाणामासुरीं पृतनाम् सेनाम् ॥ २ ॥

दृष्ट्वामर्षितोऽसहमानः संकुद्धः नितरां क्रुद्धः हे राजन् ! तां पृतनामोजसा स्वबलेन निवार्य निर्भर्त्स्य चेदं वक्ष्यमाणं देवान् प्रत्युवाच ॥ ३ ॥

तदेवाह भोऽस्याम । मातुः स्वस्य जनन्या उच्चरितैः पुरीषप्रायैरसुरैः प्रथमान्तपाठे देवानां सम्बोधनम् । धावद्भिः पलायमानैरपि पृष्ठतो हतैर्हन्यमानैरसुरैः किं प्रयोजनम् । न तद्वधेन यशो न स्वर्गश्चेति भावः । तदेवाह । न हीति । भीतस्य वधः शूरमात्मानं मन्यमानानां न हि श्लाघ्यः । नापि स्वर्ग्यः स्वर्गहेतुश्च ॥ ४ ॥

अतो हे क्षुल्लकाः ! अल्पाः ! वो युष्माकं हृदि प्रधने युद्धे श्रद्धा सारं बलं वा यद्यस्ति विषयभोगेच्छा नो चेत्तर्हि मात्र क्षणमात्रं ममाग्रे तिष्ठत ॥ ५ ॥

एवं क्रुद्धो वृत्रः सुरगणान् रिपून् वपुषा देहेन भीषयन् महान् प्राणो बलं यस्य तादृशो व्यनदत् । नादं विशिनष्टि । येन नादेन लोका जनाः विचेतसः मूर्च्छिता बभूवुः ॥ ६ ॥

तेन वृत्रस्य विस्फोटनेन नादेन सर्वे देवगणाः मूर्च्छिताः सन्तो भूमौ निपेतुः पतितवन्तः यथाशनिना हताः जनाः पतन्ति निपतन्ति तद्वत् ॥ ७ ॥

आतुरं मूर्च्छितमत एव निमीलिताक्षं सुरसैन्यमोजसा बलेन पद्भ्यां ममर्द मर्दितवान् । यथोन्मदो यूथपतिर्गजः तालं तालानां सम्बन्धि वनं मर्दयति । कथम्भूतो ममर्द रणाङ्गे दुर्निवारो मदो यस्य । उद्यतं शूलं येन । क्ष्मां पृथिवीं कम्पयन् ॥ ८ ॥

एवं स्वसैन्यं मर्दयन्तं वृत्रं विलोक्य वज्रधर इन्द्रोऽत्यमर्षितोऽभिमुखं द्रवते आगच्छते शत्रवे महतीं गदां चिक्षेप प्रयुक्तवान् । स च वृत्रस्तामापतन्तीं दुःसहां दुःखेनापि सोढुमशक्यां गदां वामेन करेण लीलया सुखेन जग्राह गृहीतवान् ॥ ९ ॥

तया च गृहीतया गदया भृशं नितरां क्रुद्ध इन्द्रशत्रुर्वृत्रः उत्कटमतीव नदन् उरवो विक्रमाः पादविन्यासाः यस्य तादृशो महेन्द्रवाहमैरावतं जघान । कमवयवं तत्राह । कुम्भस्थलम् मृधे युद्धे तस्य वृत्रस्य कर्म तद्गदया तद्वाहनताडनरूपं कर्म सर्वे द्रष्टारः समपूजयन् बहुमन्यन्ते ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अचेतसो बुद्धिमत्प्रवृत्तिस्मरणरहिताः ॥ १ ॥

काल्यमानां विद्राव्यमाणाम् ॥ २ ॥

ओजसा राजन् दीप्यन् स वृत्रः तां स्वपृतनां निवार्य द्रावयतो देवान्निर्भर्त्स्येदं वाक्यमब्रवीत् ह किल ॥ ३ ॥

हे देवाः ! यूयं मातुरुच्चरितैरुच्चरिताः अवमेहनवन्निर्गताः किम् उभयेषामपि देहान्निष्क्रान्तत्वाविशेषात् कुतोऽस्माकमत्राह । धावद्भिरिति । पृष्ठतो हतैर्धावद्भिः असुरनायकैः वः युष्माकं किं प्रयोजनम् अधर्मत्वात् अयशपि कुतोऽत्राह । नहीति । स्वर्ग्यः स्वर्गप्राप्तियोग्यः ॥ ४ ॥

हे क्षुल्लकाः ! अल्पाः ! देवाः ! युष्माकं हृदि सारं धैर्यं चास्ति मात्रं चर्णाकालं ग्राम्यसुखे विषयभोगजनितानन्दे ॥ ५ ॥

विचेतसो मूर्च्छिताः ॥ ६ ॥

एतदेव स्पष्टयति । तेनेति । विस्फोटनं प्रकाण्डताडनम् ॥ ७ ॥

नालं नलसमुदायलक्षणं वनं यूथपतिर्गजः ॥ ८ ॥

अभिद्रवते अभ्यागच्छते ॥ ९ ॥

महेन्द्रवाहमैरावतम् ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

असृष्टवर्हि समदन्तीति क्रोधेनैवासम्भवोक्तिः ॥ १—२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एकादशे तु संग्राममध्ये वृत्रस्य वर्णिताः ।
शौर्यमय्यो गिरः काश्चित् प्रेममय्यश्च काश्चन ॥

अनाथवत् अनाथानिव तान्विद्रवान् ॥ १—३ ॥

प्रथमान्तपाठे सम्बोधनं हे मातुरुच्चरिताः ! पुरीषतुल्या देवाः ! पृष्ठतो हतैर्वैः किम् । न यशो नापि धर्मः । तृतीयान्तपाठे दैत्यानां विशेषणम् । भीतानां वधो न श्लाघ्यः । कर्तृकर्मणोरुभयोरपि यशोधर्माभावव्यञ्जकत्वात् जुगुप्सित इत्यर्थः ॥ ४ ॥

प्रधने युद्धे सारं धैर्यं हे क्षुल्लकाः ! क्षुद्राः ! ॥ ५ ॥ ६ ॥

वै इति चार्थे विस्फोटितम् ऊरुगण्डयोः करतलाघातस्तेन च ॥ ७ ॥

आतुरत्वादेव मुद्रितनेत्रम् । नलानां वनं नालम् । यूथपतिर्हस्ती ॥ ८ ॥

अभिद्रवते सम्मुखमागच्छते ॥ ९ ॥ १० ॥

ऐरावतो वृत्रगदाभिमृष्टो विघूर्णितोऽद्रिः कुलिशाहतो यथा ।
अपासरद्भिन्नमुखः सहेन्द्रो मुञ्चन्नसृक् सप्तधनुर्भृशार्तः ॥ ११ ॥
न सन्नवाहाय विषण्णचेतसे प्रायुङ्क्त भूयः स गदां महात्मा ।
इन्द्रोऽमृतस्यन्दिकराभिमर्शवीतव्यथः क्षतवाहोऽवतस्थे ॥ १२ ॥
स तं नृपेन्द्राहवकाम्यया रिपुं वज्रायुधं भ्रातृहणं विलोक्य ।
स्मरंश्च तत्कर्म नृशंसमंहः शोकेन मोहेन हसन् जगाद ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इन्द्रेण युध्यमानस्य वृत्रस्य पूर्वजन्मगतहरिभक्तत्वसूचकानि वाक्यानि वर्णयति । त एवेत्येकादशेनाध्यायेन । धर्मं युद्धधर्मं शंसतः कथयतः ॥ १ ॥

कालानुकूलैरसुरपराभवकालानुसारिभिः । अनाथवत्काल्यमानां विद्राव्यमाणाम् ॥ २ ॥

अमर्षितः त्रिदशपराक्रममसहमानः तान् निवार्य निर्भर्त्स्य चेदं वक्ष्यमाणं सुरान् प्रत्युवाच ॥ ३ ॥

वो युष्माकं मातुरुच्चरितैर्मलनिभैः दैत्यैः पृष्ठतो हतैर्दैत्यैः किं न किमपि यशोधर्मादिकम् । यतो भीतवधः शूरमानिनां श्लाघ्यो न भवति । हे क्षुल्लकाः क्षुद्राः ! यदि वः प्रधने युद्धे श्रद्धा हृदि सारं धैर्यं च ग्राम्यसुखे स्पृहा च न चेत्तर्हि मे अग्रे मात्रं क्षणमात्रं तिष्ठत । सुमहान् प्राणो बलं यस्य सः । येन नादेन लोकाः विचेतस आसन् ॥ ४ ॥ ५ ॥ ६ ॥

तेन नादेन विस्फोटनेन हस्ताभ्यामूरुप्रताडनेन च ॥ ७ ॥

भयान्निमीलिताक्षम् । नलिं नलवनम् । यूथपतिः गजराजः ॥ ८ ॥ ९ ॥ १० ॥

भाषा टीका ।

श्रीशुकदेव जी बोले हे नृप ! अपने मालिक वृत्रासुर के उसप्रकार कथन को भी बेहोस होकर भय से त्रस्त होकर भगने में तत्पर होकर उन असुरों ने नहीं ग्रहण किया ॥ १ ॥

अनाथ सरीकी भगाई बिखरती हुई अपनी सेना को देखकर काल के अनुकूल होने से देवतों के बल को देख कर वृत्रासुर बोला ॥ २ ॥

हे राजन् ! इन्द्र का शत्रु वृत्रासुर नहीं सह कर क्रोधित होकर दुर्वाद् कह कर निवारण करके देवतों से यह वचन बोला ॥ ३ ॥

तुम लोग केवल माता के मलरूप हो दौडकर भगने वाले दैत्यों को मारते हो जो लोग अपने को शूर मानते हैं उनको तो भयभीत का मारना न यश कारक है न स्वर्ग दायक है ॥ ४ ॥

यदि तुम लोगों को युद्धमे श्रद्धा है हे क्षुद्र हो ! तुमारे हृदयमे यदि बल हो और यदि विषय भोगों में इच्छा न होवे तो मेरे आगे खडे मात्र रहो ॥ ५ ॥

इस प्रकार क्रोधित होकर शत्रु देवतों को डराता हुआ घोर शब्द को करने लगा जिस से तीनों लोक बेहोस होगये ॥ ६ ॥

तिस वृत्रासुर के शब्द से सब देवता वज्र से मारे पर्वत सरीके मूर्छित होकर भूमि में गिरने लगे ॥ ७ ॥

तवतो युद्ध में बडा मदवाला वृत्रासुर आंख मीच कर बडे दुःखित देव सेना को दोनों पावों से मर्दन करने लगा पृथिवी को कपावने लगा अपने बल से त्रिशूल को उठा कर ऐसा मर्दन करने लगा जैसे मद वाला हस्ती नरशल के वन को तोड डाले ॥ ८ ॥

उस को देखकर वज्रधारी इन्द्र बडा क्रोधित भया दौडते हुये अपने शत्रु के अर्थ बडा गदा का प्रहार करता भया आती हुई उस गदा को वृत्रासुर ने सहज से बामे हाथ से बडी कठिन उस गदा को पकडलिया ॥ ९ ॥

बडे विक्रम वाले उस इन्द्र शत्रु वृत्रासुर ने कुपित होकर इन्द्र के वाहन ऐरावत के ऊपर उसी गदा को चलाया सो उस से ऐरावत के कुम्भस्थल को मारा उस कार्य को देखकर सबों ने बडा आश्चर्य माना और बल की प्रशंसा करी ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सप्तधनुःप्रमाणं देशम् ॥ ११ ॥

सन्नोऽवसन्नो वाहो यस्य तस्मै न प्रायुङ्क्त । अमृतस्यन्दी अमृतस्रावी यः स्वकरस्तेनाभिमर्शः स्पर्शस्तेन वीतव्यथो गतदुःखः क्षतो वाहो यस्येन्द्रस्य स तथाभूतोऽवतस्थे ॥ १२ ॥

स वृत्रः हे नृपेन्द्र ! आहवकाम्यया युद्धेच्छयावस्थितम् । भ्रातृहणं भ्राता विश्वरूपस्तस्य हन्तारम् । नृशंसं क्रूरं तदेवांहः पापं तस्य कर्म स्मरन् ॥ १३ ॥

वृत्र उवाच

दिष्ट्या भवान् मे समवस्थितो रिपुर्यो ब्रह्महा गुरुहा भ्रातृहा च ।
दिष्ट्यानृणोऽद्याहमसत्तम ! त्वया मच्छूलनिर्भिन्नदृषद्धृदाचिरात् ॥ १४ ॥
यो नोऽग्रजस्यात्मविदो द्विजातेर्गुरोरपापस्य च दीक्षितस्य ।
विश्रभ्य खड्गेन शिरांस्यवृश्चत् पशोरिवाकरुणः स्वर्गकामः ॥ १५ ॥
ह्रीश्रीदयाकीर्तिभिरुज्झितं त्वां स्वकर्मणा पुरुषादैश्च गर्ह्यम् ।
कृच्छ्रेण मच्छूलविभिन्नदेहमस्पृष्टवह्निं समदन्ति गृध्राः ॥ १६ ॥
अन्येऽनु ये त्वेह नृशंसमज्ञा ये ह्युद्यतास्त्राः प्रहरन्ति मह्यम् ।
तैर्भूतनाथान् सगणान्निशातत्रिशूलनिर्भिन्नगलैर्यजामि ॥ १७ ॥
अथो हरे ! मे कुलिशेन वीर ! हर्ता प्रमथ्यैव शिरो यदीह ।
तत्रानृणो भूतबलिं विधाय मनस्विनां पादरजः प्रपत्स्ये ॥ १८ ॥
सुरेश ! कस्मान्न हिनोषि वज्रं पुरःस्थिते वैरिणि मय्यमोघम् ।
मा संशयिष्ठा न गदेव वज्रं स्यान्निष्फलं कृपणार्थेव याच्ञा ॥ १९ ॥
नन्वेष वज्रस्तव शक्र ! तेजसा हरेर्दधीचेस्तपसा च तेजितः ।
तेनैव शत्रुं जहि विष्णुयन्त्रितो यतो हरिर्विजयः श्रीर्गुणास्ततः ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यो ब्रह्महा ब्राह्मणं हतवान् विशेषतः स्वगुरुं मम च भ्रातरं स भवानग्रतः समवस्थितः एतद्दिष्ट्या भद्रं जातम् । दिष्ट्येत्यव्ययमानन्दार्थे । हे असत्तम ! मम शूलेन निर्भिन्नं दृषत्तुल्यं हृत् हृदयं यस्य तेन त्वया निमित्तभूतेनाद्याचिराद्धि भ्रातुरनृणोऽहं स्यामेतच्च दिष्ट्या ॥ १४ ॥

स्वर्गकामो यो भवानवृश्चत् स्वर्गकामो याज्ञिकः पशोरिवेति वा ॥ १५ ॥

तं त्वामस्पृष्टवह्निमदग्धदेहं समदन्ति । वर्तमानसामीप्ये वर्तमानवन्निर्देशः ॥ १६ ॥

अन्येऽपि ये अज्ञा इह त्वा त्वां नृशंसमनु मह्यमुद्यतास्त्राः सन्तो यदि प्रहरन्ति तैर्भूतनाथान् भैरवादीन् यक्ष्यामि । कथंभूतैः । निशातं तीक्ष्णीकृतं यन्मम त्रिशूलं तेन निर्भिन्नो गलो येषां तैः ॥ १७ ॥

अथो अथवा । हरे ! भो इन्द्र ! यदि भवानेव मम शिरो हर्ता हरिष्यति तत्र तथा सत्यनृणो विमुक्तकर्मबन्धः सन् भूतेभ्यो बलिं देहेन विधाय मनस्विनां पादरजः प्रपत्स्ये धीराणां पदं प्राप्स्यामि ॥ १८ ॥

जीविताद्वरि मृत्युरेव ममाभिमत इत्याशयेनाह । सुरेशेति । न हिनोषि न हि क्षिपसि । गदेव विफलो यास्यतीति संशयं माकार्षीः । कृपणाद्दर्थः प्रयोजनं यस्याः सा याच्ञा यथा निष्फला तथा न स्यात् ॥ १९ ॥

अमोघत्वे हेतुं वदंस्तं प्रोत्साहयति । नन्विति । तेजितस्तीक्ष्णीकृतः । शत्रुं मां जहि । विष्णुना यन्त्रितः प्रेरितः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमैरावतो वृत्रस्य गदयातीव विह्वलस्ताडितो वज्रायुधाहतोऽद्रिरिव विघूर्णितो भ्राम्यमाणः भिन्नं मुखं यस्य सः । नितरामार्तः असृग्भिः रक्तं मुञ्चन् सहेन्द्रः सप्तधनुःप्रमाणमपासरत्पश्चादगच्छत् ॥ ११ ॥

स वृत्रो महात्मा युद्धधर्माभिज्ञः । अत एव सन्नवाहाय सन्नः अवसन्नः दुःखितो वाहो यस्य तस्मै दुःखितचित्तायेन्द्राय पुनर्गदां न प्रायुङ्क्त । तत इन्द्रः अमृतस्राविस्वकराभिमर्शेन विगता व्यथा यस्य । तथात्वेन कृतो वाहो यस्य । तथाभूतोऽभितष्ठौ क्षतवाह इति पाठे पूर्वं क्षतो वृत्रेण ताडितो यो वाहो गजः येनेन्द्रेणामृतस्यन्दिकराभिमर्शेन वीतव्यथः गतव्यथः अमृतस्यन्दिकराभिमर्शवीतव्यथः । क्षतो वाहो यस्येत्यर्थः । अभितष्ठौ अभिमुखे स्थितः ॥ १२ ॥

हे नृपेन्द्र ! स वृत्रः आहवकाम्यया युद्धेच्छया अवस्थितं वज्रम् आयुधं यस्य तम् । भ्रातृहणं भ्रातरं विश्वरूपं हतवन्तं रिपुमिन्द्रं विलोक्य तस्येन्द्रस्य कर्म भ्रातृहननरूपं नृशंसं क्रूरमंहः पापं शोकेन हेतुना स्मरन्पश्चान्मोहेन हसन् जगादेन्द्रं प्रत्युवाच ॥ १३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

गदितमेवाह। दिष्ट्येत्यादिना यावदध्यायसमाप्ति। यो भवान् रिपुः दिष्ट्या दैववशान्ममाग्रतः समवस्थितः प्राप्तः कथंभूतः यस्त्वं ब्रह्महा ब्राह्मणं हतवान्। तत्रापि स्वगुरुं मम च भ्रातरं हतवान्। हे असत्तम मच्छूलेन निर्भिन्नं दृषत्तुल्यं हृदयं यस्य तेन त्वया निमित्तभूतेनाद्याचिरान्मम भ्रातुर्विश्वरूपस्यानृणोऽहं दिष्ट्या भविष्यामि ॥ १४ ॥

करुणारहितः यो भवाञ्शोऽस्माकमग्रजस्य द्विजातेस्तत्रापि ब्रह्मविदः गुरोरपापस्य पुनर्दीक्षितस्य यज्ञीयदीक्षायामवस्थितस्य विश्वास्य शिरांसि खड्गेनाच्छिच्छेद यथा स्वर्गकामो याज्ञिकः पशोः शिरश्छिनत्ति तद्वत्। द्विजातित्वादीनि विशेषणान्यवध्यत्वसूचकानि ॥ १५ ॥

अतो ह्रिया लज्जया श्रिया सम्पदा दयया कीर्तिभिर्यशोभिश्चोज्झितं परित्यक्तं निकृष्टेन स्वकर्मणा पुरुषादैः पिशाचैरपि गर्ह्यं निन्द्यं त्वामद्य मच्छूलेन विभिन्नो देहो यस्य। अस्पृष्टवह्निमदग्धदेहमित्यर्थः। गृध्राः सम्यगत्स्यन्ति "वर्तमानसामीप्ये वर्तमानवद्वा" इति लट् ॥ १६ ॥

अपि च नृशंसं त्वामनुसृत्य ये देवा अज्ञाः मूढाः सन्तः इह युद्धे उद्यतास्त्राः मह्यं यदि प्रहरन्ति। तर्हि तैर्निशातेन तीक्ष्णेन त्रिशूलेन निर्भिन्ना गलाः कण्ठा येषां तैः। सगणान् भूतनाथान् यजामि यक्ष्यामि ॥ १७ ॥

एवं स्वपौरुषानुरूपमुक्त्वाथ युद्धे स्वं देहं जिहासुर्मां जहीति शक्रं प्रार्थयते। अथो इति। अथवा हे हरे! इन्द्र! हे वीर! भवानेव इह युद्धे कुलिशेन वज्रेण यदि मम शिरो हर्ता हरिष्यति तत्र तथा सति मद्देहेन भूतेभ्यो बलिं विधायानृणः विमुक्तकर्मबन्धस्सन् मनस्विनां पादरजः प्रपत्स्ये पादरजःसहचरितं मार्गं प्रपत्स्ये ज्ञानिनां गतिं प्राप्स्यामीत्यर्थः ॥ १८ ॥

हे सुरेश! इन्द्र! अग्रतः स्थिते वैरिणि तव शत्रौ मय्यमोघमप्रतिहतं वज्रं कस्माद्धेतोर्न हिनोषि न मुञ्चसि न प्रयुङ्क्षे इत्यर्थः। गदावन्निष्फलो भविष्यतीत्याशङ्कया न प्रहिणोमीत्यत्राह। गदेव गदावत्कृपणार्थो कृपणपुरुषादर्थः प्रयोजनं यस्याः सा याच्ञेव च वज्रो न निष्फलः स्यादतो मा संशयिष्ठाः संशयं मा कुरु किन्तु प्रहिणिवत्यर्थः ॥ १९ ॥

अनिष्फलत्वे हेतुं वदन् तं प्रोत्साहयति। नन्विति। हे शक्र! तव वज्रः हरेर्भगवतस्तेजसा दधीचो मुनेस्तपसा च तेजितस्तीक्ष्णीकृतः। अतः कारणात्तेनैव वज्रेण विष्णुना यन्त्रित आदिष्टो मां शत्रुं जहि मारय। हरिर्भगवान् यतो यस्मिन् पक्षे ततस्तस्मिन् पक्षे श्रीः राज्यसम्पद्विजयः गुणाः प्रभुत्वादयो गुणाश्च भवन्ति ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

वृत्रगदामिमृष्टोऽभिहतोऽपासरत्। तिर्यक् पृष्ठतो वा गतः ॥११॥ स्वसवाहाय विह्वलितवाहनाय पुनः गदां न प्रायुङ्क्त अमृतस्राविणा करेण कृतेन अभिमर्शेन स्पर्शलक्षणेन वीतव्यथः वीता गता व्यथा यस्य सः। वृतः वाहो यस्य स तथा ॥ १२ ॥

भ्रातृहणं विश्वरूपस्य हन्तारमंहः पापरूपं मोहेन अज्ञानेन ॥ १३ ॥

ब्रह्महत्यादिकमेकं विश्वरूपमपेक्ष्योच्यते। अनृणो भ्रातृमरणप्रायश्चित्तैः हीनः दृषद्धृदा पाषाणवत्कठिनहृदयेन ॥ १४ ॥

स्वर्गकामो यजमानः विस्रभ्य विश्वस्य ॥ १५ ॥

ह्रीश्रीदयाकीर्तिभिरुज्झितं रहितं समदन्तु भक्षयन्तु। अस्पृष्टवह्निमित्यनेन निःशेषनाशं सूचयति ॥ १६ ॥

त्वानु त्वामनु ॥ १७ ॥

हरे! इन्द्र! इह युद्धे तत्र तर्हि इहास्मिन् जन्मन्येव मनस्विनां पूर्वं वीरस्वर्गगतानां पादरजः प्रपत्स्ये तेषां लोकं गमिष्यामीत्यर्थः ॥ १८ ॥

हिनोषि मुञ्चसि मा संशयिष्ठाः संशयं माकार्षीः। भगानां भाग्यानां सम्पदां देवनाथदातर्यो अहल्याजारेति निन्दां वा सूचयति। प्रयुक्तं वज्रं नितरां फलतीति निष्फलं प्रयोजनवत् स्यात्। किन्तु। कृपणार्था दरिद्रविषया याच्ञा व्यर्था भवति यथा तथा न स्यादित्यर्थः ॥ १९ ॥

हे शक्र! य एष तव वज्रः हरेस्तेजसा दधीचेस्तपसा च तेजितो निशितः तेनैव शत्रुं मां जहीत्यन्वयः। विष्णुयन्त्रितो विष्णुवशो यतो यत्र हरिस्ततस्तत्रापि जयादिगुणाः स्युः ॥२०॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

भिन्नमुखः विदीर्णवक्त्रः स्रवच्छुरक्तं विश्वतिहस्तमात्रम् ॥११॥ सन्नोऽवसन्नो वाहो यस्य तस्मै। अमृतस्यन्दी अमृतस्रावी कः स्वकरस्तस्याभिमर्शेन स्पर्शेन गतव्यथः ॥ १२ ॥

नृशंसं क्रूरम् ॥ १३ ॥

मच्छूलेन निर्भिन्नं दृषत्तुल्यं हृदयस्य तथाभूतेन सता अथाहमनृणोऽभूवम् ॥ १४ ॥

स्वर्गकामो याज्ञिको भवांश्च ॥ १५ ॥

समदन्तीति "वर्तमानसामीप्ये वर्तमानवत्" इति लट् ॥ १६ ॥

अन्ये ये त्वा त्वामनुगताः तैर्यजामि यक्ष्यामि। असुरेषु देवैः तेन चासुरान् असुरैर्देवान् भूतनाथांश्च प्रीणयामीत्यर्थः ॥१७॥

अथो अथवा। भूतेभ्यः शृगालादिभ्यो बलिं स्वदेहेनातिस्थूलेन विधाय दत्त्वा अनृणः शोभितऋणः सन् मनस्विनां श्रीनारदादिभक्तानां पादरजः प्राप्स्यामि ॥ १८ ॥

त्वं यथा जीवित्वा स्वर्गीयविषयभोगमभिलषसि तथैवाहं मृत्वा वैकुण्ठे भगवतः साक्षाच्चरणसेवामभिलषामीति तव च मम चाभीष्टं सिध्यतु किमिति मद्वधे विलम्बसे इत्याह। सुरेशेति। वज्रक्षेपस्यैवम्भूतं लक्ष्यं कदा प्राप्स्यसीत्याह। पुर एव केवलं स्थिते न तु कमपि प्रतीकारं कुर्वतीत्यर्थः। ननु महासुरत्वे त्वयि कदाचिद्वज्रक्षेपो निष्फलः स्यादिति शङ्कं तत्राह। अमोघमव्यर्थम्। ननु गदा यथा मदीयैव त्वत्पाणिगता मम पीडाकरी साक्षादेवाभूत्

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तथैव च यदि वज्रोऽपि स्यात्तदाहं किं करिष्यामीत्यत आह । मेति । कृपणादर्थ-प्रयोजनं यस्याः सा याच्ञा यथा निष्फला तथा वज्रं निष्फलं न स्यात् ॥ १९ ॥

अमोघत्वे हेतुं वदन् प्रोत्साहयति । नन्विति । हरेर्भगवतस्तेजसा दधीचस्तपसा च तेजितस्तीक्ष्णीकृतः । विष्णुना यन्त्रितः प्रेरितः यतो यत्र पक्षे ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गदया अभिमृष्टः ताडितः भिन्नमुखो विदीर्णवक्त्रः सप्तधनुः परिमितं देशम् ॥ ११ ॥

स महात्मा महामनाः सन्नोऽवसन्नो वाहो यस्य तस्मै । विषण्णचेतसे भूयो गदां न प्रायुङ्क्त । अमृतस्यन्दी पीयूषस्रावी यः करस्तेनाभिमर्शः स्पर्शस्तेन वीता व्यथा क्षतं च यस्य स वाहो यस्य सः इन्द्रः अवतस्थे ॥ १२ ॥

तस्येन्द्रस्य नृशंसं क्रूरं कर्म तदेवांहः पापम् ॥ १३ ॥

यो मे भ्रातृहा अतो रिपुः ब्रह्महा गुरुहा च अतः हे असत्तम ! भवान् दिष्ट्या मे समवस्थितः । दिष्ट्या अद्य मच्छूलेन भिन्नं दृषदा पाषाणेन सदृशं हृत् यस्य तेन त्वयाहमचिरादनृणः भविष्यामि भ्रातुरिति शेषः ॥ १४ ॥ १५ ॥

अस्पृष्टवन्हिमलब्धदाहक्रियम् । समदन्तीति वर्तमानसामीप्ये वर्तमानवत्"इति लट् ॥ १६ ॥

येऽन्ये अज्ञाः नृशंसं क्रूरं त्वामनु अनुयुद्यतास्त्राः मह्यं मां प्रति प्रहरन्ति तदा तीक्ष्णीकृतेन त्रिशूलेन भिन्नो गलो येषां तैः । गणान् भूतनाथान् यजामि ॥ १७ ॥

अथो अथवा । हे हरे ! इन्द्र ! यदि भवानिह कुलिशेन प्रमथ्य मे शिरो हर्ता हरिष्यति तत्र तदा अनृणः बदर्थमुत्पादितः पित्रा तरकते मृतस्य ऋणित्वाभावात् देहेन स्वकीयेन भूतबलिं क्रव्यादानां भोजनं विधाय मनस्विनां पादरजस्तैः प्राप्तां गतिं प्रपत्स्ये प्राप्स्यामि ॥ १८ ॥

मा संशयिष्ठाः संशयं मा कार्षीः ॥ १९ ॥

दधीचस्तपसा हरेस्तेजसा च तेजितः तेन शत्रुं मां विष्णुना यन्त्रितः प्रवर्तितो जहि । यतो यस्मिन् पक्षे हरिस्तस्तस्मिन् पक्षे विजयः श्रीः गुणाः सर्वादरणीयत्वादयश्च स्युः ॥ २० ॥

भाषा टीका ।

वृत्रासुर के गदा लगने से ऐरावत अति दुःखित होकर घूमने लगा जैसे कि वज्र के मारने से पर्वत होवे तैसा मुख को मोड कर रक्त को गिराता हुआ इन्द्र के सहित अठाईस हाथ पीछे हट गया ॥ ११ ॥

उस महात्मा वृत्रासुर ने इन्द्र के वाहन ऐरावत के दुःखित होने से इन्द्र के चित्त मोहित होने के समय में धर्म युद्ध मान कर गदा नहीं चलाई थोडी देर में अपने हाथ के अमृत झरने से व्यथा के मिट जाने से इन्द्र उठ खडे भये ॥ १२ ॥

हे नृपेन्द्र ! युद्ध की इच्छा से वज्र को धारण कर के खडे हुये भ्राता के मारने वाले इन्द्र को देखकर वृत्रासुर ने इन्द्र के पाप को स्मरण करके शोक मोह से युक्त होकर यह वचन कहा ॥ १३ ॥

वृत्रासुर बोला आज ब्राह्मण के मारने वाला गुरु के मारने वाला भ्राता के मारने वाला तू शत्रु मेरे आगे खडा है सो अच्छा हुआ है असत्तम ! मेरे त्रिशूल से पत्थर सरीके तेरे हृदय को भेदन कर के आज मैं अपने भाई के ऋण से जल्दी तर जाऊंगा ॥ १४ ॥

जिस प्रकार से स्वर्ग कामना वाला पुरुष निर्दयी होकर पशु के मस्तक को काटता है तैसे तैंने ब्राह्मण गुरु निष्पाप दीक्षित आत्मज्ञानी हमारे बडे भ्राता विश्वरूप के मस्तकों को विश्वास से काटा है ॥ १५ ॥

शोक लज्जा लक्ष्मी दया कीर्ति इनसे तू रहित है अपने कुकर्मों से राक्षसों के भी निन्दा के योग्य है मेरे त्रिशूल के लगने से बडे कष्ट से तू मरेगा तेरा अग्निसंस्कार भी नहीं होगा इहां पर गीध तेरे देह को खांयगे ॥ १६ ॥

तेरे से निर्दयी के साथ रहने वाले और जो ए सब अज्ञानी हैं शस्त्र लेकर मेरे को मारते हैं उनके गलाओं को तो तीक्ष्ण त्रिशूल से काटकर प्रेतादिगणों के सहित भैरवादिकों को मैं पूजोंगा ॥ १७ ॥

हे वीर ! इन्द्र ! अथवा यदि जवरदस्ती से तू ही मेरे मस्तक को काटेगा तब तो मैं अपने शरीर से मांस भक्षक प्राणियों को वलि देकर भ्राता के ऋण से छूट कर महात्मा नारदादिकों के चरण रज को प्राप्त हूंगा ॥ १८ ॥

हे सुरेश ! मैं वैरी आगे खडा हूं तब मेरे पर वज्र क्यों नहीं छोडता है तु संशय मतकर जैसे कि लोभी से मांगना वृथा हो जाता है तैसे गदा सरीका यह तेरा वज्र व्यर्थ नहीं होगा यह वज्र तो सफल है ॥ १९ ॥

यह बात निश्चित है तेरा यह वज्र तो विष्णु के तेज से और दधीची के तपसे तेजयुक्त है सो विष्णु की आज्ञा को मानकर तिस वज्र से मो शत्रु को तू मार क्यों की जिधर श्रीहरि होंगे उधर ही लक्ष्मी और सब गुण रहते हैं और वहांही विजय होती है ॥ २० ॥

अहं समाधाय मनो यथाह सङ्कर्षणस्तच्चरणारविन्दे ।
त्वद्वज्ररंहोलुलितग्राम्यपाशो गतिं मुनेर्याम्यपविद्धलोकः ॥ २१ ॥
पुंसां किलैकान्तधियां स्वकानां याः सम्पदो दिवि भूमौ रसायाम् ।
न राति यद्द्वेष उद्वेग आधिर्मदः कलिर्व्यसनं सम्प्रयासः ॥ २२ ॥
त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्ते पुरुषस्य शक्र ! ।
ततोऽनुमेयो भगवत्प्रसादो यो दुर्लभो किञ्चनगोचरोऽन्यैः ॥ २३ ॥
अहं हरे ! तव पादैकमूलदासानुदासो भवितास्मि भूयः ।
मनः स्मरेतासुपतेर्गुणांस्ते गृणीत वाक्कर्म करोतु कायः ॥ २४ ॥
न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा समञ्जस ! त्वा विरहय्य काङ्क्षे ॥ २५ ॥
अजातपक्षा इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्ताः ।
प्रियं प्रियेव व्युषितं विषण्णा मनोऽरविन्दाक्ष ! दिदृक्षते त्वाम् ॥ २६ ॥
ममोत्तमश्लोकजनेषु सख्यं संसारचक्रे भ्रमतः स्वकर्मभिः ।
त्वन्माययात्मात्मजदारगेहेष्वासक्तचित्तस्य न नाथ ! भूयात् ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां षष्ठस्कन्धे वृत्रवाक्ये
एकादशोऽध्यायः ॥ ११ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हननेन मम पीडा स्यादित्यपि मा संशयिष्ठा इत्याह । अहमिति । सङ्कर्षणो मत्पतिर्यथाह तथा तदीयचरणारविन्दे मनः समाधाय मुनेर्योगिनो गतिमहं यास्यामि तव वज्रस्य रंहसा लुलितश्छिन्नो ग्राम्यपाशो विषयभोगलक्षणो यस्य । अपविद्धलोकस्त्यक्तदेहः ॥ २१ ॥

तर्हि भगवान् सङ्कर्षणः स्वभृत्याय मह्यमेव स्वर्गादिसम्पदो दास्यतीत्यपि मा संशयिष्ठा इत्याह । पुंसामिति । स्वर्गे भूमौ रसातले च याः सम्पदस्ताः किल निश्चितं न राति न ददाति । तत्र हेतुः । यद्याभ्यो द्वेषादयो भवन्ति ॥ २२ ॥

तर्हि स्वभक्तस्य किं विधत्ते तत्राह । त्रैवर्गिको धर्मार्थकामविषयो य आयासस्तस्य विघातं विधत्ते तत आयासोपरमादनुमेयो न त्वैश्वर्यादिना अतः सम्यग्भगवत्प्रसादाभावात्तव सम्पदो भविष्यन्तीति भावः ॥ २३ ॥

एवमिन्द्राय स्वाभिप्रायं निवेद्य भगवन्तं प्रार्थयते । अहमिति । तव पादावेव एकं मूलमाश्रयो येषां तेषां दासानामनुदासो भूयो भवितास्मि भविष्यामि भवेयमसुपतेः प्राणनाथस्य तव गुणान्मम मनः स्मरतु वागपि तानेव कीर्तयतु कायस्तवैव कर्म करोतु ॥ २४ ॥

ननु किं दास्येन तुभ्यं महाफलानि दास्यामि तत्राह । नाकपृष्ठं ध्रुवपदं ब्रह्मलोकादिकं च हे समञ्जस ! निखिलसौभाग्यनिधे ! त्वा त्वां विरहय्य पृथक्कृत्य न काङ्क्षे नेच्छामि ॥ २५ ॥

तर्हि किमिच्छसि तदाह । अजातपक्षाः खगा घूकादिभिः पीडिता यथा मातरं यथा च दाम्ना बद्धा बालवत्साः स्तन्यं यथा च व्युषितं दूरदेशगतं प्रियं कामेन विषण्णा प्रिया तथा मे मनस्तापत्रयपीडितं कर्मभिर्बद्धं च कामादिभिर्विषण्णं च त्वां दिदृक्षते द्रष्टुमिच्छतीत्यर्थः ॥ २६ ॥

उत्तमश्लोकस्य तव जनेषु भक्तेष्वेव सख्यं भूयात् त्वन्मायया देहादिष्वासक्तचित्तस्य भूयोऽपि तेष्वासक्तिर्न भूयात् ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ! ततो यान्त्यधमां गतिम् ॥

इत्युक्तरीत्या नरकोदर्कस्मरणार्थं किं मां प्रार्थयसे तत्राह । अहमिति । अहमसुरोऽपि नरकं न यास्यामि किन्त्वस्मद्दैवतं गुरुश्च सङ्कर्षणो भगवान्यथाह उपदिदेश । मच्चरणारविन्दे मनो निश्चलं निधेयमिति । तथा तच्चरणारविन्दे मनो निधाय तव वज्रस्य वेगेन लुलितः छिन्नः ग्राम्येषु विषयेषु रागरूपः पाशो यस्य । देहलवनद्वारा ग्राम्यपाशोऽपि लुलितो भवतीति भावः । अपविद्धः त्यक्तः लोकः स्वर्गादिलोको येन तादृशः मुनेर्गतिं मुनीनां गतिं मोक्षं यामि यास्यामि असुरोऽप्यहं भगवत्सङ्कर्षणोपदिष्टतत्त्वो मुक्तिमेव यास्यामि न त्वर्वाचीनलोकानिति भावः । यथाह सङ्कर्षण इत्यनेन वृत्रः सङ्कर्षणोपदिष्टतत्त्व इत्यवगम्यते ॥ २१ ॥

किञ्च भगवाननन्यभावेनात्मानं भजतां स्वीयामेव गतिं नूनं दास्यति नत्वर्वाचीनामित्याह । पुंसामिति सार्द्धेन । एकान्तधियां प्रयोजनान्तररहितमतीनामनन्यप्रयोजनानामित्यर्थः । स्वकानां स्वभक्तानां पुंसामस्मत्पतिर्भगवान् सङ्कर्षणः दिवि स्वर्गादौ भूमौ रसायामतलादिलोके च याः सम्पदो विभवाः ताः न ददाति । कुतः यतः तासु सम्पत्सु द्वेषः परस्परमसहिष्णुत्वम् उद्वेगो विनाशभयं तत्प्रयुक्त आधिर्मनःपीडा मदः विषयभोगनिमित्तो मदः तत्त्वज्ञानोदयप्रतिबन्धकः कलिः विषयभोगविरोधिभिः सह कलहः व्यसनमभिमतविषयालाभनिमित्तं दुःखं प्रयासः क्षुद्रसुखाय प्रकृष्टो यत्नश्चैव भवन्ति । यतः परमकृपालुर्भगवानात्मभक्तानां मुक्तिमेव दास्यतीत्यर्थः ॥ २२ ॥

तर्हि स्वकानां किं विधत्ते तत्राह । त्रैवर्गिकेति । हे शक्र ! त्रैवर्गिको धर्मार्थकामविषयो य आयासस्तस्य विघातं विधत्ते अल्पास्थिरात्रिवर्गकर्मायासपरिहारेणानन्तस्थिरफलरूपमुक्तिं दास्यतीत्यर्थः । ननु । प्रसन्नो भगवानस्माकमपि स्वकानां त्रैवर्गिकायासविघातमेव विधत्ते नेत्याह । तत इति । यो भगवत्प्रसादो यत अकिञ्चनगोचरः निष्कामस्वभक्तविषयः अकिञ्चनानामेव नितरां भगवान् प्रसन्नो भवतीत्यर्थः । ततोऽन्यैर्विषयभोगपरायणैस्तदर्थमेव भजद्भिर्भवादृशैः स भगवत्प्रसादोऽनुमेयः अभिलषितार्थविषयकत्वेनानुमेयः । यद्वा । योऽकिञ्चनगोचरो भगवत्प्रसादः सोऽन्यैर्भवादृशैस्ततोऽनन्यप्रयोजनभजनादनुमेयः । वयमप्यनन्यप्रयोजना यदि भजेम तर्ह्यकिञ्चनगोचरो भगवत्प्रसादोऽस्मद्विषयको भविष्यतीत्येवं भवादृशैरनुमेय एव न तु सिद्धः । इदानीं विषयभोगपरायणत्वादिति भावः । तथैव ह्युक्तं भगवता "मय्येकान्तमतिर्नान्यन्मत्तो वाञ्छति तत्त्ववित्" इत्यादिनेति चेतिभावः ॥ २३ ॥

अथ मनसानुसंहितं वज्राग्रे दृष्टं तदनु प्रविष्टं भगवन्तमभिमुखीकृत्याह । अहमिति । हे हरे ! भगवन् ! तव पादावेवैकं मूलमाश्रयो येषां दासानामनुदासोऽहं भूयो भवितास्मि । मदीयं मनोऽसुपतेर्मत्प्राणनाथस्य तव गुणानेवानुस्मरतु । वागपि तानेव गुणान् गृणातु कीर्त्तयतु । कायो देहस्त्वाराधनरूपं कर्मैव करोतु ॥ २४ ॥

ननु किं मद्दास्येन तुभ्यं महदैश्वर्यमैहिकमामुष्मिकं च दास्यामीत्यत्र त्वद्दास्यं विनान्यन्न काङ्क्षामीत्याह । नेति द्वाभ्याम् । नाकपृष्ठं वैकुण्ठं न काङ्क्षे तथा पारमेष्ठ्यं चतुर्मुखैश्वर्यं न सार्वभौमं कृत्स्नभूम्याधिपत्यं न रसाधिपत्यं पातालादिलोकाधिपत्यं योगसिद्धीरणिमादीनपुनर्भवं कैवल्यं च न हि हे समञ्जस ! सकलसौभाग्यनिधे ! त्वां विरहय्य पृथक्कृत्य विनेत्यर्थः न काङ्क्षे न वाञ्छामि ॥ २५ ॥

किं तु हे अरविन्दाक्ष ! अजातपक्षाः खगाः पक्षिशावकाः मातरमिव क्षुधा आर्ताः पीडिताः वत्सतराः स्तन्यं दुग्धमिव व्युषिते विप्रोषितं दूरदेशगतं प्रियं विषण्णा दुःखिता प्रियेव मनस्त्वां दिदृक्षते द्रष्टुमिच्छति ॥ २६ ॥

अत एव मामनुगृहाणेत्याह । ममेति । उत्तमश्लोकस्य तव जनेषु दासेषु एव मम सख्यं भूयात् । त्वन्मायया आत्मादिष्वासक्तचित्तस्य स्वकर्मभिः संसारचक्रे भ्रमतो मम पुनः तेष्वात्मादिष्वासक्तिर्न भूयादेवमनुगृहाणेति भावः । तत्रात्मा देहः ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वृत्रे सात्त्विकचेतनांशस्वभावं दर्शयितुमाह । अहमिति । सङ्कर्षणो भगवांस्तन्मनःसमाधानं यथाह । तथा मनस्तस्य सङ्कर्षणस्य चरणारविन्दे समाधाय तव वज्रवेगेन लुलितः छिन्नो ग्राम्यपाशो विषयभोगलक्षणः पाशो यस्य स तथा । अपविद्धः परित्यक्तो लोको देहो येन स तथा "अस्माल्लोकात्प्रेत्य" इति श्रुतेः परिभ्रष्टैतल्लोकस्थितिरिति वा अहं मुनेर्ज्ञानिनो गतिं लोकं वैकुण्ठादिलक्षणं यामीत्यन्वयः । संन्यासलक्षणं वा ॥ २१ ॥

ननु परत्र सुखं वा दुःखं वा न निश्चितम् । तवात्र चाखण्डैश्वर्यं दरीदृश्यते एतल्लोकत्यागे तदपि त्यक्तं स्यात्तस्मात्तव शोको न स्यात्किमित्याशङ्क्य सर्वस्येश्वराधीनत्वेन तद्दत्तमेव स्थिरतरं नान्यत् । किञ्च । स्वभक्तेभ्यः स्वर्गादिकमपि न ददाति किमुत ऐहिकम् अतो न शोको ममेत्याशयेनाह । पुंसामिति । स लोकनाथः स्वर्गादौ याः सम्पदः सन्ति ताः स्वकानां पुंसां न राति किल तासां सकाशाद्भयादिकमुत्पद्यत इति यस्मात्तस्मादिति शेषः ॥ २२ ॥

इतो नु हरेर्भक्तानुकम्पित्वं पश्यैत्याशयेनाह । त्रैवर्गिकेति । अस्मत्पतिर्भगवान् पुरुषस्य भक्तस्य तेन धर्मार्थकामपरिश्रमनाशेन "यस्यानुग्रहमिच्छामि हरिष्ये तद्धनं शनैः" इत्यादेः ॥ २३ ॥

अधुना "अहं समाधाय मनः" इत्यत्र कथितमनःसमाधानप्रकारं निरूपयति । अहमिति । मनः आत्मपतेः आत्मपतिं स्मरेत् "अधीगर्थदयेशां कर्मणि" इति षष्ठी । नो वाक् तद्गुणान् गृणीत कायः कर्म प्रणामादि करोतु ॥ २४ ॥

मम वीरस्वर्गोऽपि वैकुण्ठादिरित्याशयेनाह । न नाकपृष्ठमिति । सार्वभौममित्यनेन भूमौ चक्रवर्तिपदमाह । योगसिद्धीः अणिमादि-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

लक्षणाः अपुनर्भवं पुनरुत्पत्तिमात्रशून्यत्वेन सुखपूर्त्यभावलक्षणां मोक्षं समंजसं वैषम्यनैर्घृण्यबुद्धिशून्यं विरहय्य विहाय ॥२५॥

स्तन्यं स्तनच्युतं पयः वत्सतराः अतिशयेन बालाः स्तनंधयाः प्रिया नवोढा भार्या अध्युषितं प्रोषितमन्यतः स्थितमित्यर्थः ॥ २६ ॥

श्रीहरिदर्शनसाधनमाह । ममेति । न भूयात्सख्यमिति शेषः ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सार्वभौमं श्रीप्रियव्रतादीनामिव महाराज्यम् । रसाधिपत्यं पातालादिस्वाम्यमपुनर्भवं मोक्षमपि अत्र नाकपृष्ठादिचतुष्टयस्यानुक्रमश्च न्यूनत्वविवक्षया । ततश्चोत्तरोत्तरं कैमुत्यमपि । ध्रुवपदस्य श्रैष्ठ्यं विष्णुपदसन्निहितत्वात् । योगसिद्ध्यादिद्वयं तु सार्वत्रिकमिति पश्चाद्विन्यस्तम् । अनयोस्तूत्तरश्रैष्ठ्यम् ॥ २५ ॥

अजातपक्षा इत्यनेनानन्याश्रयत्वं तदनुगमनासमर्थत्वं तथा तत्सहितेन मातरमित्यनेनानन्यस्वाभाविकदयालुत्वं तदीयदयाधिक्यञ्च व्यञ्जितम् । तेन च मातरि तेषामपि प्रीत्यतिशयो दर्शितः । ततस्तत्साम्येऽपि तद्वदात्मनोऽपि भगवति प्रीत्याधिक्यहेतुका दिदृक्षा व्यञ्जिता । तथापि तन्मात्रा यद्वस्त्वन्तरमुपह्रियते तदेव तेषामुपजीव्यमास्वाद्यं चेति केवलतन्निष्ठत्वाभावादपरितोषेण दृष्टान्तान्तरमाह । स्तन्यमिति । अत्र दिदृक्षायोजनार्थं मातरमित्येवानुवर्त्तयितव्ये स्तन्यमित्युक्तिस्तस्यास्तैस्तदंशप्राचुर्यभावनया वस्तुतस्तस्य तदीयशरीरांशतया च तदभेदविवक्षार्था ततः स्तन्यं स्तन्यरूपतदंशमयीं मातरमित्येव लब्धे तादृशी मातैव तैरुपजीव्यते आस्वाद्यते चेति पूर्वतः श्रैष्ठ्यं दर्शितम् । तथा वत्सतरा अत्यन्तबालवत्सास्तत एव स्वामिबद्धतया तदनुगतावसमर्था इति साधारण्येऽपि बहुसमयातिक्रमात् क्षुधार्त्ता इत्यनेन पूर्वतो वैशिष्ट्यम् । तथा गोजातेः स्नेहातिशयस्वाभाव्येन च तदनुसन्धेयम् । अथ तथाप्युत्तरदृष्टान्ते स्तन्यगवोः कार्यकारणभावेन भेदं वितर्क्य दृष्टान्तद्वयेऽप्यजातपक्षत्वादिविशेषणायत्यां तादृशप्रीतेरस्थिरतां चालोक्य दृष्टान्तान्तरमाह । प्रियमिति । सत्स्वपि वाचकान्तरेषूभयोः प्रियशब्देनैव निर्देशात् स्वाभाविकाव्यभिचारिप्रीतिमन्तावेव तौ गृहीतौ । यत्र वार्द्धके बाल्येऽपि सह विहारादिकं दृश्यते तत स्तादृशी कापि प्रिया यथा तादृशं प्रियं व्युषितं विदूरप्रोषितं सन्तमनन्योपजीवित्वेन विषण्णा सती विक्षुब्धते । लोचनद्वारा तदास्वादाय भृशमुत्कण्ठते तथा मम मनोऽपि त्वामित्यर्थः । अत्र दार्ष्टान्तिकेऽपि स्वकर्तृकत्वमनुक्त्वा मनःकर्तृकोल्लेखनादबुद्धिपूर्वकप्रवृत्तिप्राप्तौ प्रीतेः स्वाभाविकत्वेनाव्यभिचारित्वं व्यक्तम् । तथारविन्दाक्षेति मनसो भ्रमरतुल्यतासूचनेन भगवतः परममधुरिमोल्लेखेन च तस्यैवोपजीव्यत्वमास्वाद्यत्वञ्च दर्शितम् ॥२६॥

अथ तद्दर्शनभाग्यं स्वस्यासम्भावयन्निदमपि मम स्यादिति सवाष्पमाह । ममोत्तमेति । तदेतच्छुद्धप्रेमोद्गारमयत्वेनैव श्रीमद्वृत्रवधोऽसौ विलक्षणत्वाच्छ्रीमद्भागवतलक्षणेषु पुराणान्तरे गण्यते । "वृत्रासुरवधोपेतं तद्भागवतमिष्यते" इति ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अयमेवं मां प्रलोभ्य पुनः पराक्रमाविष्कारेण वज्रञ्च निष्फलय्य पुनरपि मां हनिष्यतीति मा मंस्थाः । अहं यत् करोमि तदेकाग्रमनाः शृण्वित्याह । अहमिति । सङ्कर्षणो नोऽस्माकं प्रभुः यथा तथा तच्चरणारविन्दे मनः समाधाय मुनेर्योगिनो गतिमहं यास्यामि । त्वद्वज्रस्य रंहसा लुलितः खण्डितः ग्राम्यपाशाकार एतद्देहो यस्य सः । अपविद्धलोकः त्यक्तत्रिलोकैश्वर्यः ॥ २१ ॥

तर्हि त्वद्भक्तितोषितः सङ्कर्षणस्तुभ्यमेव स्वर्गाद्यैश्वर्यं दास्यतीति मा वादीः शृणु रे शक्र ! । मत्प्रभोस्त्वञ्च भक्तोऽहं च भक्तस्तत्र तुभ्यमेव भोगैश्वर्यं ददाति न तु मह्यमित्यत्र कारणं मत्प्रभोः स्वभावमेव शृण्वित्याह । पुंसामिति । याः सम्पदः ता एकान्तिभ्यः पुंभ्यो न राति न ददाति कुतः यद्यतः सम्पद्भ्यो द्वेषादयो भक्तिसुखे विक्षेपका भवन्तीत्यतः ॥ २२ ॥

मां स्वपार्श्वे शीघ्रमेव नेतुं वज्रेण मद्वधोपायमुक्त्वा यत्तुभ्यं मत्प्रभुर्भोगसम्पदं ददाति एतेनैव त्वमात्मनि तस्यानुग्रहाभावं मन्यस्वेत्याह । त्रैवर्गिको धर्मार्थकामविषयो यः आयासस्तस्य विघातं विधत्ते पुरुषस्य स्वान्तरङ्गभक्तस्य तत आयासोपरमादेव भगवत्प्रसादः अनुमेयः । नन्वेवमस्मदनुभवे तु न भाति तत्राह । स आकिंचनगोचर एव अन्यैर्युष्माभिस्तु दुर्लभो युष्मदगोचर एवेत्यतस्त्वयि तस्य सम्यक् प्रसादाभावात् तव सम्पदो भविष्यन्तीति विश्वस्तो भूत्वा शीघ्रं वज्रं निक्षिपेति भावः ॥ २३ ॥

तदपि वज्रमनिक्षिपन्तमिन्द्रं दृष्ट्वा हन्त हन्त वराकमिमं शक्रं वहिर्दर्शिनं किमिति ब्रवीमि स्वप्रभोश्चरणारविन्द एव किं न निवेदयामीति ध्यानाविर्भूतं भगवन्तमवलोक्याह । अहमिति । तव पादावेव एकं मूलमाश्रयो येषां तेषां दासानामनुदासो भूयः पुनरपि भवितास्मि भविष्यामि किं तत्र कियान् विलम्बो वर्त्तते तं कृपया कथय । उत्कण्ठया जर्जरीभूतोऽस्मीति भावः । नन्वविलम्बेनैव त्वामहमेष एवात्मसात् करोमि स्वाभीष्टान् वरान् वृणिष्वेत्यत आह मनो मम असुपतेः प्राणनाथस्य तव प्राणनाथं त्वां स्मरतु वाक् गुणान् कीर्त्तयतु कायः कर्म त्वत्पादसम्वाहन व्यजनताम्बूलप्रदानादिकं करोत्विति कायवाङ्मनसां मे प्रार्थना ॥२४॥

ननु तुभ्यं स्वर्गापवर्गादीनि सर्वाण्येव फलानि ददामि गृहाणेति तत्र सशिरोधूननं न नेत्याह । नेति । नाकपृष्ठं स्वर्गपदं त्वा त्वां विरहय्य त्यक्त्वा त्वद्विरहेण मम प्राणा ज्वलन्ति । स्वर्गादयः

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

र्किं मे सुखयिष्यन्तीति ध्वनिः । त्वत्संयोगे मम पूर्वश्लोकोक्तं वरत्रयं भवेत्तदा तदेव मे स्वर्गापवर्गादिसर्वसुखतमम् । किमेतै-र्गृहीतैरित्यनुध्वनिः ॥ २५ ॥

किञ्च । अत्युत्कण्ठावतोऽपि मम त्वत्प्राप्तिस्त्वदधीनैव । न च तत्र मे स्वतः कापि शक्तिरस्तीत्यत्र दृष्टान्तत्रयमाह । अजातपक्षाः खगाः खगबालकाः घूकादित्रस्ताः क्षुत्पीडिताश्च मातरं कदा प्राप्स्याम इति प्रतिक्षणं दिदृक्षमाणाः पत्रेऽपि संचलति आयाता मम मातेति बुद्ध्या कोमलं कलं कूजन्तश्चञ्चून् प्रसारयन्ति । ननु तर्हि तन्माता यथा आगत्य घूकादिभ्यो रक्षन्ती स्वतः पृथग्भूते-रानीतैः क्षुद्रकीटैस्तच्चञ्चुमध्ये निहितैस्तेषां क्षुधामुपशम-यति तथैवाहमपि त्रिविधतापेभ्य इन्द्रादिशत्रुभ्यश्च त्वां रक्षन् स्वर्गपारमेष्ठ्यादिभोगैर्दत्तैस्त्वदभीष्टं पूरयाणीति । तत्र त्वन्मा-धुर्यं विना मम नान्यत् किमप्यभीष्टमिति तथा त्वत्प्राप्तिप्रतिकूलं वृत्राख्यस्थूलसूक्ष्मदेहद्वयबन्धनं विना मम नान्यत् किमपि तापत्रयमित्यतो दृष्टान्तान्तरमाह । स्तन्यं वाञ्छन्तीति शेषः । वत्स-तरा अत्यल्पवयस्का वत्सा गृहस्थगृहे दामबद्धाः क्षुधाया मातुरेव दुग्धपानैकतानमनस्कत्वादार्त्ताः । अत्रापि वत्सतरा मातु-र्दुग्धादेव स्वसुखमभिलषन्तोऽपि मातुः कामपि सेवां नलिप्समाना इत्यपरितुष्य दृष्टान्तान्तरमाह । प्रियं प्रीतिमन्तं पतिं व्युषितं सुदूर-देशस्थं प्रिया प्रेमवती विषण्णा तद्विरहजर्जरिता दिदृक्षते सा यथा स्वीयसर्वेन्द्रियव्यापारैः सेवमाना प्रियं सुखयितुं प्रियस्यैव सौन्दर्यसौस्वर्यादिभिर्गुणलीलावैदग्ध्यादिभिश्च स्वसर्वेन्द्रियाणि सुखयितुमिच्छति तथैवाहमपि त्वां सेवेयेत्यत एव "मनः स्मरेता-सुपतेर्गुणानां गृणीत वाक् कर्म करोतु कायः" इति वरत्रयमवाञ्छ-मिति भावः । किन्तु सा दास्यसख्यशृङ्गारैः प्रियं सुखयेदहन्तु केवलेनैव दास्येन त्वां सुखयेयमित्येतावानेव भेदः ॥ २६ ॥

अथ तत्क्षण एवातिदैन्यभावोदयेन हन्त हन्त ममाधमस्य कथमेतावत् सौभाग्यं सम्भवेदत एतदस्त्विति प्रार्थयते । मम उत्तमश्लोकजनेषु त्वद्भक्तेषु सख्यं भूयात् किन्तु त्वन्मायया आत्मात्मजादिष्वासक्तस्य जनस्य कस्यापि मयि सख्यं न भूयात् यथैतज्जन्मनि असुराणां मयि सख्यमभूत् मम च त्वद्भक्तेषु सख्यं नाभूदित्यपारं दुःखमन्वभूवमिति भावः ॥ २७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

षष्ठे एकादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्वद्वज्ररंहसा लुलितश्लथः आत्मपाशः भोगानुरागो यस्य सः । अपविद्धस्त्यक्तः लोको बद्धजीवलोको येन सः । मुनेः मननशीलस्य भगवद्ध्याननिष्ठस्य गतिं गम्यते इति गति-र्भगवांस्तम् ॥ २१ ॥

यद्याश्रयः द्वेषादयो जायन्ते ॥ २२ ॥

अस्मत्पतिर्भगवान् पुरुषस्य त्रैवर्गिकार्थे य आयासस्त-द्विघातं विधत्ते ततो विघातात् अकिञ्चनगोचरः भगवद्भिन्नजन-विषयः अन्यैर्दुर्लभो भगवत्प्रसादोऽनुमेयः ॥ २३ ॥

इन्द्रं प्रति स्वहार्दमुक्त्वाथ भगवन्तं प्रार्थयते । अहमिति । हे हरे । तव पादावेवैकं मुख्यं मूलमाश्रयो येषां तेषां दासानुदासैः भविता भवेयम् । असवः प्राणाः इन्द्रियाणां तत्पतेः हृषीकेशस्य तव गुणान् मम मनः स्मरेत वागपि तान् गृणाति किं बहुना सकल-करणयुक्तः कायस्तत्करणानुरूपं कर्म पूजनादिकं करोतु ॥ २४ ॥

हे समञ्जस । सर्वसौभाग्यसम्पन्न । त्वा त्वां विरहय्य विहाय नाकपृष्ठं ध्रुवलोकं पारमेष्ठ्यं चतुराननलोकं सार्वभौमं सर्वभूमि-राज्यं रसाधिपत्यं बिलस्वर्गसुखं योगसिद्धीरणिमादिरूपाः अपुनर्भवं जीवस्वरूपप्राप्तिलक्षणं मोक्षं परवैकुण्ठप्राप्तिरूपां मुक्तिं वा न काङ्क्षे नेच्छामि ॥ २५ ॥

तर्हि किमिच्छसि तदाह । अजातपक्षा इति । स्तन्यं दुग्धम् । विषण्णा दुःखिता दिदृक्षते द्रष्टुमिच्छति ॥ २६ ॥

दर्शनाधिकारस्तु सत्सङ्गाद्भवति अतः सत्सङ्गं मम भूया-दित्याह । ममेति । उत्तमकीर्त्तेस्तव जनेषु दासेषु सख्यं भूयात् त्वन्मायया आसक्तचित्तस्य अत एव संसारचक्रे स्वकर्मभिः भ्रमतः आत्मा देहस्तदादिषु सख्यं न भूयात् ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

एकादशाध्यायार्थप्रकाशः ॥ ११ ॥

भाषा टीका ।

मैंतो सब स्वर्गादि लोकों की इच्छा को छोड कर स्थित हूं सो जिस प्रकार से सङ्कर्षणजीने मेरे को उपदेश किया है तैसे भगवान् के चरणारविन्द मे मन को लगाकर तुमारे वज्र से विषय पाशसे मुक्तहोकर मुनियों की गति को प्राप्त होजाऊंगा ॥ २१ ॥

एकान्तबुद्धिवाले अपने भक्तों को भगवान् स्वर्ग मर्त्य पाताल की सम्पत्तियों को नहीं देते हैं जिस से कि द्वेष उद्वेग आधि मद कलि दुःख प्रयास ये सब दोष सम्पत्ति मे होते हैं ॥ २२ ॥

हे शक्र ! हमारे पति श्रीनारायण धर्म अर्थ काम इन्होकों नाश कर देते हैं जब ऐसा अपने भक्तको भगवान् करदेवैं तब भगवान् की कृपा का अनुमान करना चाहिये जो प्रसाद अकिञ्चन पुरुषों को ज्ञात है अन्यलोग उस को नहीं जानते हैं ॥ २३ ॥

वृत्रासुर भगवान् से प्रार्थना करते हैं कि हे श्रीहरि मैं आप के चरणारविन्द के दासों का दास फिर भी होऊंगा मेरा मन प्राणनाथ आप के गुणों को स्मरण करै मेरी वाणी आप के गुणों का कथन करै मेरा शरीर आपकी सेवा को करै यह वर दीजिये ॥ २४ ॥

भाषा टीका।

हे प्रभो ! हे सर्वगुणनिधे ! आप को छोड कर मैं न स्वर्ग को चाहता हूं न ब्रह्मपद को चाहता हूं न पृथिवी के चक्रवर्त्ति राज्य को चाहता हूं न पाताल के राज्य को चाहता हूं न योग सिद्धियों को चाहता हूं न मोक्ष को चाहता हूं ॥ २५ ॥

जैसे विना पंखवाले चिडिया के बच्चा अपनी माता को चाहते हैं जैसे बछरा क्षुधित होने से माता को चाहते हैं जैसे परदेश को गये हुये पति को प्यारी स्त्री चाहती है तैसे मेरा मन आप ही के दर्शन करने को चाहता है ॥ २६ ॥

हे नाथ ! मेरे की उत्तमश्लोक जनों के साथ सख्यभाव होवे अपने कर्मों के वश होकर संसार चक्र मे भ्रमने से आपकी माया से देह स्त्री पुत्र गृहादिकों मे आसक्ति मत होवे यही वर दीजिये ॥ २७ ॥

इति श्रीभागवत षष्ठस्कन्ध के ग्यारमें अध्यायका

भाषानुवाद लक्ष्मणाचार्यकृत

समाप्त ॥ ११ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे एकादशोऽध्यायः समाप्तः ॥ ११ ॥

॥ द्वादशोऽध्यायः ॥

ऋषिरुवाच ।

एवं जिहासुर्नृप ! देहमाजौ मृत्युं वरं विजयान्मन्यमानः ।
शूलं प्रगृह्याभ्यपतत् सुरेन्द्रं यथा महापुरुषं कैटभोऽप्सु ॥ १ ॥
ततो युगान्ताग्निकठोरजिह्वमाविध्य शूलं तरसासुरेन्द्रः ।
क्षिप्त्वा महेन्द्राय विनद्य वीरो हतोऽसि पापेति रुषा जगाद ॥ २ ॥
ख आपतत्तद्विचलद्ग्रहोल्कवन्निरीक्ष्य दुष्प्रेक्ष्यमजातविक्लवः ।
वज्रेण वज्री शतपर्वणाच्छिनद्भुजं च तस्योरगराजभोगम् ॥ ३ ॥
छिन्नैकबाहुः परिघेण वृत्रः संरब्ध आसाद्य गृहीतवज्रम् ।
हनौ तताडेन्द्रमथामरेभं वज्रं च हस्तान्न्यपतन्मघोनः ॥ ४ ॥
वृत्रस्य कर्मातिमहाद्भुतं तत् सुरासुराश्चारणसिद्धसङ्घाः ।
अपूजयंस्तत् पुरुहूतसङ्कटं निरीक्ष्य हाहेति विचुक्रुशुर्भृशम् ॥ ५ ॥
इन्द्रो न वज्रं जगृहे विलज्जितश्च्युतं स्वहस्तादरिसन्निधौ पुनः ।
तमाह वृत्रो हर आत्तवज्रो जहि स्वशत्रुं न विषादकालः ॥ ६ ॥
युयुत्सतां कुत्रचिदाततायिनां जयः सदैकत्र न वै परात्मनाम् ।
विनैकमुत्पत्तिलयस्थितीश्वरं सर्वज्ञमाद्यं पुरुषं सनातनम् ॥ ७ ॥
लोकाः सपाला यस्येमे श्वसन्ति विवशा वशे ।
द्विजा इव शिचा बद्धाः स काल इह कारणम् ॥ ८ ॥
ओजः सहो बलं प्राणममृतं मृत्युमेव च ।
तमज्ञाय जनो हेतुमात्मानं मन्यते जडम् ॥ ९ ॥
यथा दारुमयी नारी यथा यन्त्रमयो मृगः ।
एवं भूतानि मघवन्नीशतन्त्राणि विद्धि भोः ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वादशेऽति विषयोगेन स्वयमुत्साहितेन तु ।
महेन्द्रेण महायुद्धे वृत्रस्य वध ईर्यते ॥ १ ॥

महापुरुषं श्रीविष्णुम् । अप्सु प्रलयोदके ॥ १ ॥

युगान्ताग्निवत्कठोरा जिह्वा शिखा यस्य तत् । आविध्य भ्रामयित्वा ॥ २ ॥

तत् खे आपतदागच्छत् । विचलत्परिभ्रमत् । ग्रहश्चोल्का च ग्रहोल्कं तद्वद्दुष्प्रेक्ष्यम् । शतं पर्वाणि यस्य तेन । उरगराजो वासुकिस्तस्य भोगो देहस्तदाकारम् ॥ ३ ॥

हनौ कपोलप्रान्ते । अमरेभमैरावतं च ॥ ४ ॥ ५ ॥

पुनश्च तमाह वृत्रः । हे हरे ! इन्द्र ! ॥ ६ ॥

सदा जयो नैव किं तु कुत्रचिज्जय एकत्र कुत्रचिन्नैव । यद्वा कुत्रचिदपि युयुत्सतां सदा जयो नैव किं त्वेकत्रैव कदाचिदे-

श्रीधरस्वामिकृतभावार्थदीपिका ।

वेत्यर्थः । परो देह आत्मा येषां पराधीनात्मनामिति वा । आद्य-मनादिम् । सनातनं नित्यम् ॥ ७ ॥

पराधीनतामेवाह । लोका इति सप्तभिः । यस्य वशे स्थिताः स्वयं विवशाः सन्तः श्वसन्ति चेष्टन्ते । द्विजाः पक्षिणः । शिचा जालेन कालः कलयतीति भगवान् इह जयादौ कारणम् ॥८॥

ओजआदिरूपं कालं तं हेतुमज्ञायाविज्ञाय जडं सन्त-मात्मानं देहं हेतुं मन्यते ॥ ९ ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमभिलषितभगवदेकदास्यो निरयोपमाभिमानविषयै-श्वर्यकैवल्यो जिहासितस्वकलेवरो वृत्रो युयुधे इत्याह मुनिः । एवमिति । हे नृप ! स्वकलेवरं हातुमिच्छुरत एवाजौ युद्धे जयान्मृत्युमेव वरं श्रेष्ठं मन्यमानः शूलं गृहीत्वा सुरेन्द्रं मघ-वन्तं प्रति अभ्यपतत्तदभिमुखमगात् । यथा महापुरुषं भगवन्तं प्रत्यप्सु प्रलयोदके कैटभाख्योऽसुरस्तद्वत् ॥ १ ॥

ततोऽसुरेन्द्रो वीरो वृत्रः प्रलयकालवह्निवत्कठोरा दुःसहा जिह्वा शिखा यस्य तच्छूलमाविध्य भ्रामयित्वा क्रोधेन महेन्द्राय क्षिप्त्वा विनद्य सिंहनादं कृत्वा हे पाप ! हतोऽसीति जगाद ॥ २ ॥

ततो वज्री इन्द्रः खे आकाशे आपतदागच्छद्विचलत्परिभ्र-मच्च ग्रहोल्कवत् दुष्प्रेक्ष्यं दुर्निरीक्ष्यं च यच्छूलं ग्रहश्च उल्काश्चेति द्वन्द्वाद्वतिः ग्रहः सूर्यः उल्का अङ्गाराः तच्छूलं तथा तस्य वृत्रस्य उरगराजभोगं वासुकिदेहाकारं भुजं चाजातविक्लवः अनुदिताधैर्यः सन् शतं पर्वाणि यस्य तेन वज्रेणाच्छिनत् अद्भुतं यथा भवति तथेति क्रियाविशेषणं शूलविशेषणं भुजाविशेषणं वा ॥ ३ ॥

ततो वृत्रः छिन्नः एकः बाहुर्यस्य सः अत एव संरब्धः नितरां क्रुद्धः गृहीतवज्रमिन्द्रमासाद्य समीपमागत्य परिघेणायुध-विशेषेण तताड । अथामरेभमैरावतं च तताड । एवं ताडितस्य तस्य मघोन इन्द्रस्य हस्ताद्वज्रमायुधं न्यपतद्विगलितमभूत् ॥ ४ ॥

तद्वृत्रस्य महदद्भुतं च कर्म निरीक्ष्य सर्वे सुरादयः अपूजय-न्नहो एतस्य पराक्रम इति बहुमन्यन्त । तथा पुरुहूतस्येन्द्रस्य सङ्कटं निरीक्ष्य भृशं हाहेति विचुक्रुशुर्भृशमिति सङ्कटविशेषणं वा ॥ ५ ॥

तत इन्द्रः स्वहस्ताच्छत्रुसन्निधौ च्युतं वज्रायुधमत एव लज्जितो वज्रं पुनर्न जगृहे न गृहीतवान् । तमगृहीतवज्रमिन्द्रं वृत्र आह बभाषे । उक्तिमेवाह । हर इत्यादिना अमुष्य पराजय इत्यन्तेन । हे हरे ! इन्द्र ! पुनर्गृहीतवज्रस्त्वं स्वशत्रुं मां जहि । अयं विषादकालः शोककालो न भवति ॥ ६ ॥

ननु पराजये न लज्जितोऽहं योद्धुं नोत्सहे तत्राह । युयुत्सता-मिति । आततायिनां जिघांसतां योद्धुमिच्छूनां पुंसां सदा सर्वत्र च जयो न वै न भवति । किन्तु कुत्रचिदेव कस्मिंश्चि-द्देशे काल एव जयो भवतीत्यर्थः । तत्र हेतुं वदन् पुंसो विशिनष्टि । परात्मनामिति । परः परमपुरुष आत्मान्तः प्रविश्य तत्तत्कर्मानुसारेण नियन्ता येषां कर्मवश्यत्वात् परम-पुरुषनियाम्यत्वाच्च तत्तद्देशकालकर्मानुरूपसुखदुःखादिफलानुभ-वाय जयापजयावीश्वरकारिताविति न तत्र लज्जाशोकौ कर्तव्यौ इति भावः । सर्वस्य नियन्तुरकर्मवश्यस्य परमपुरुषस्य तु सर्वत्र सर्वदा जय एव भवतीत्याह । विनेति । एकं परमपुरुषं विनान्येषां पुंसां सर्वत्र सर्वदा जय एव न भवति परमपुरुषस्य तु भवती-त्यन्वयः । तत्र हेतुं वदस्तं विशिनष्टि । जगदुत्पत्तिस्थितिलयाना-मीश्वरं कर्त्तारं तदुपयुक्तो गुण उच्यते । सर्वज्ञमिति । अनेन कर्म-सङ्कुचितज्ञानजीवव्यावृत्तिः अनेनाकर्मवश्यत्वमप्युक्तं भवति । तत्त-ज्जीवकर्मानुसारेणोत्पत्त्यादिकर्त्रन्तरविरहादकर्मवश्यत्वाच्च तस्य देशकालनिमित्तकर्मायत्तकर्त्रन्तरप्रयुक्तजयापजयौ न स्तः । किन्तु सर्वदा सर्वत्र जय एवेति भावः । यदि जगदुत्पत्त्यादिकर्त्ता परम-पुरुषस्तर्हि किमुपादानकारणं जगतस्तत्राह । आद्यमिति । आदौ भवमाद्यं कारणत्वेनावस्थितमुपादानकारणमपि स एवेति भावः । लोके पटाद्युपादानकारणस्य तन्त्वादेरपि कारणान्तरदर्श-नात्कारणस्यापि तस्य कारणान्तरं सम्भाव्यतेत्याशङ्कां निराकुर्वन् विशिनष्टि । सनातनमिति । नित्यमित्यर्थः । कार्यं ह्यनित्यं स तु नित्यः कारणान्तररहित इत्यर्थः ॥ ७ ॥

तस्याकर्मवश्यत्वेन यत्स्वातन्त्र्यमुक्तं तदेवोदाहरणमुखेन प्रपञ्चयति । लोका इति । सपालाः पालकैर्ब्रह्मादिभिः सहिताः सर्वे लोकाः विवशाः परमपुरुषवशं गता यस्य परमपुरुषस्य वशे वश इच्छा "वश कान्तौ" इति धातुपाठात् वशे इच्छायां निमित्तभू-तायां श्वसन्ति स्वतन्त्रतत्तदिच्छानिमित्तजीवना इत्यर्थः । तथा च श्रुतिः "को ह्येवान्यात् कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्" इति यथा शिचा पाशेन बद्धा द्विजाः पक्षिणः बन्धयितुर्वशे श्वसन्ति तद्वत्स एव कालरूप ईश्वरः इह जयापजयादिषु कारणं हेतुभूतः ॥ ८ ॥

न केवलं जयापजययोरेव हेतुरपि त्वोजआदीनामपि निर्वाहक इत्याह । ओज इति । ओजः प्रवृत्तिसामर्थ्यं सहो वेगः बलं धारणसा-मर्थ्यं प्राणो जीवनममृतं मोक्षं मृत्युः संसारः ओजआदीन्प्रति तं परमात्मानं हेतुमज्ञात्वाविज्ञाय आर्षत्वात्प्रयोगस्यानञ्पूर्व इति न प्रतिषेधः अतोऽयमेव परमात्मानमेव ओजआदीनां कारणमज्ञात्वा ओजः केवलं परमात्मा स्वात्मानमेव कारणं मन्यतेऽतो यं जडः अज्ञो जन इत्यर्थः । जडमिति पाठे जडमज्ञः स्वात्मानम् एव कारणं मन्यतेऽयं जन इत्यर्थः ॥ ९ ॥

एवं परमात्मनो जयापजयाद्यभावे हेतुतया सर्वस्य वशित्वं कारणत्वम् ईशितृत्वं चोक्तमथ जीवस्य तद्विपर्ययमाह । यथेति सार्द्धद्वयेन । हे मघवन्प्रभो ! इन्द्र ! विभो ! परमात्महष्टेदं सम्बोधनं दारुमयी दारुणो विकारभूता नारी यन्त्रमयः यन्त्रबलादागतः यन्त्रेण गृहीतो मृग इत्यर्थः । यथा पुरुषतन्त्रः आद्यमप्राणिदृष्टान्ताभिप्रायकम् । द्वितीयं तु प्राणिदृष्टान्ताभि-प्रायकमिति वेदितव्यम् । एवं सर्वाणि भूतानीश्वरतन्त्राणीश्व-रतन्त्राण्येवेश्वरवश्यान्येवेत्यर्थः । [illegible] कारणार्थके चादेराकृतिगणत्वात् । एवं जीवस्य पारतन्त्र्यमुक्तम् ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वृत्रवासवसंवादच्छलेन हरेर्जीवेनाभेदज्ञानं तमःसाधनमित्येतन्निरूप्यतेऽस्मिन्नध्याये तत्रादौ वृत्रवासवयोर्युद्धशेषं वक्ति एवं जिहासुरिति विजयं विजयात्मकं परं मुख्यं मन्यमानः ॥ १ ॥ २ ॥

भोगवत् भोगः पुष्टिर्यस्य स तथा तं "भोगः सुखे स्त्र्यादिभृतौ फणिसर्पशरीरयोः" इत्यभिधानात् । भोगो विषयसेवायामहिवर्ष्मणि पालने । वर्तुले स्थूलतायाञ्च अन्मन्यावादने तथेति वररुचिः ॥ ३ ॥

इम इन्द्रः परिवृढः पतिरध्यक्षवल्लभाधिस्थतः स्वामिमात्रेऽपीन्द्रशब्दप्रयोगात्ततो विशिष्योक्तममरेशमिति ॥ ४ ॥ ५ ॥

हरे ! स्वशत्रुं मामिति शेषः ॥ ६ ॥

ननु इमने तव पराजय इत्याशङ्क्य पराजयापराजयौ न नियतौ किन्तु दैवकृताविस्याह - युयुत्सतामिति । युयुत्सतां युद्धशीलानां मध्ये कुत्रचिद्युद्धे देवप्रकृतेरेकस्य सदा जय इतरस्य सदा पराजय इति तत्राभिभविनस्तव स्थितावपि देहवियोगलक्षणो जयः प्रतिक्षणमस्तीति दर्शयितुम् उतपरयनन्तरं जयपदोपादानम् ॥ ७ ॥

हरेरेव सदा जय इत्ययं नियमः कुत इति तत्राह । लोका इति । यस्य वशे स्थिताः श्वसन्ति श्वसप्राणन इति धातुः सन्तापि तदधीनेति विज्ञायते शिचा जाललक्षणा तन्त्या द्विजाः पक्षिणः खगा इत्युक्तिं विना विदुषामपि वाक्तन्त्या नियतत्वमस्तीति द्योतनाय द्विजा इत्युक्तम् इह जीवराशौ जितयोर्जयपराजययोः कारणम् ॥ ८ ॥

ओज आद्याधिक्यानाधिक्ये (१)उभयोर्हेतुत्वेन सिद्धे हरेरधीनत्वं कुतः सङ्गच्छत इति तत्राह । ओज इति । जडो जनः ओजस्त्वादिगुणमूर्तिमन्तं भगवन्तमज्ञात्वा (२) तयोर्हेतुमात्मानं स्वं मन्यत एतन्मत्वः स वै बलं बलिनां चापरेषामिति स्वोक्तेः ओज आदिषु स्थितौजस्त्वादिगुणप्रवर्तकोऽहमित्यजानन् जनो जड इत्युच्यते ओजस्त्वादि हेतुमिति वा ॥ ९ ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यत् शौर्येणा गतोत्साहः शक्रोऽभूत्तेन बोधितः तं संस्तूय-महायुद्धेऽहमिति द्वादशो कथा मामयमितिसर्वध्यमूढो महान्त तद्-हमेव जयौर्य दर्शयितुमनुत्साहयानि कोपयामि च यतोमामयं शीघ्रं निहन्यादित्याशयेन पुनर्योद्धुं प्रवृत्त इत्याह । शूलमिति । अप्सुप्रलयोदके ॥ १ ॥

जिह्वा शिखा आविध्य भ्रमयित्वा ॥ २ ॥

आपतत् आगच्छत् ॥ ३ ॥

हनौ कपोलप्रान्ते ॥ ४ ॥

पुरुहूत इन्द्रः ॥ ५ ॥ ६ ॥

आततायिनां शस्त्रवतां कुत्रचित् शत्रुषु सदा जयः एकत्र शत्रौ न जयश्च । यथा युष्माकं असुरेषु सदा जयः । मयि तु न जय इत्यर्थः । यतः परः अनात्मात्मभिः अस्वाधीन आत्मा परमेश्वरो येषां परमेश्वरस्य तु सदैव जय इत्याह । विनैकमिति । तेन स्वाधीनीकृतपरमेश्वराणामर्ज्जुनादीनामिव न युष्माकं सदा जय इति भावः ॥ ७ ॥

तस्मात् युष्माकं कर्म्माधीनानां तु शुभाशुभादृष्टानुकूलः काल एव जयपराजययोः कारणमित्याह । लोका इति । यस्य वशे स्थिताः श्वसन्ति चेष्टन्ते द्विजाः पक्षिणः शिचा जालेन ॥ ८ ॥

ओज आदि रूपं तं कालं हेतुमज्ञाय अविज्ञाय जडं सन्तमात्मानं देहं हेतुं मन्यते ॥ ९ ॥

किञ्च तस्य कालस्यापि वशयिता यः पुरुषः सोपि यस्य वशे स स्वयं भगवानेव सर्व्वकारणकारणमिति सदृष्टान्तमाह । यथेति द्वाभ्यां । ईशतन्त्राणि तस्येश्वरस्याधीनानि ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इन्द्रः वृत्रभयात्प्रथमं गतोत्साहः पुनर्वृत्रेणोत्साहितस्सन् वृत्रं संस्तुत्य युद्धे हतवानिति द्वादशेनाध्यायेन वर्णयति । एवमिति । आजौ रणे देहं जिहासुः विजये विष्णुप्राप्तौ विजयो भवेद्यतस्तस्मान्मृत्युं वरं श्रेष्ठं मन्यमानः अप्सु प्रलयोदकेषु कैटभो महापुरुषं विष्णुमिव ॥ १ ॥

तदनन्तरं युगान्ताग्निवत् कठोरो जिह्वाग्रभागो यस्य तत् आविध्य भ्रामयित्वा महेन्द्राय क्षिप्त्वा विनद्य हे पाप ! गुरुघ्न ! हतोसीति जगाद ॥ २ ॥

तच्छूलं ग्रहश्चोल्का च ग्रहोल्कं तद्वद्दिव्यवत् परिभ्रमत् खे आपतत् आगच्छत् दुष्प्रेक्ष्यं दुर्निरीक्ष्यमपि निरीक्ष्य शतपर्वाणि यस्य तेन वज्रेणाऽऽच्छिनत् उरगराजभोगं वासुकिदेहवद्दीर्घं भुजञ्च चिच्छेद ॥ ३ ॥

संरब्धः क्रुद्धः हनौ कपोलप्रान्ते ॥ ४ ॥

पुरुहूतस्येन्द्रस्य सङ्कटं निरीक्ष्य भृशमस्वर्थं हा हेति चुक्रुशुः ॥ ५ ॥

हरे ! हे इन्द्र ! विषादस्य शोकस्यायं कालो नास्ति ॥ ६ ॥

आततायिनां शस्त्रपाणीनां परात्मना परे उत्कृष्टे परार्थे आत्मा मनो येषाम् अत एव तदर्थं युयुत्सतां सदा जयः कुत्रचिदपि न भवति किन्तु एकत्र कदाचिदेव भाव्यं विश्वबीजं विना तत्र हेतुगर्भं विशेषणमेकं स्वसदृशप्रतिभटशून्यं सनातनं नित्यम् ॥ ७ ॥

स एवैकः अन्येषां जयपराजययोर्हेतुरित्याह । लोका इति । शिचा जालेन कालः सर्वस्योऽहेतुर्भगवान् "ज्ञः कालकालः" इति श्रुतेः । इह जगति ॥ ८ ॥

ओजआदिरूपश्च स एवैक इत्याह । ओज इति । जडमसमर्थम् आत्मानं हेतुं जयादि हेतुं मन्यते जानाति ॥ ९ ॥ १० ॥

---

(१) जीवेश्वरयोः । (२) आधिक्यानाधिक्ययोः ।

पुरुषः प्रकृतिर्व्यक्तमात्मा भूतेन्द्रियाशयाः ।
शक्नुवन्त्यस्य सर्गादौ न विना यदनुग्रहात् ॥ ११ ॥
अविद्वानेवमात्मानं मन्यतेऽनीशमीश्वरम् ।
भूतैः सृजति भूतानि ग्रसते तानि तैः स्वयम् ॥ १२ ॥
आयुः श्रीः कीर्तिरैश्वर्यमाशिषः पुरुषस्य याः ।
भवन्त्येव हि तत्काले यथाऽनिच्छोर्विपर्ययाः ॥ १३ ॥
तस्मादकीर्तियशसोर्जयापजययोरपि ।
समः स्यात्सुखदुःखाभ्यां मृत्युजीवितयोस्तथा ॥ १४ ॥
सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ।
तत्र साक्षिणमात्मानं यो वेद न स बध्यते ॥ १५ ॥
पश्य मां निर्जितं शक्र ! वृक्णायुधभुजं मृधे ।
घटमानं यथाशक्ति तव प्राणजिहीर्षया ॥ १६ ॥

भाषा टीका ।

ऋषि उवाच । हे नृप ! ऐसे कहकर संग्राम में देह त्यागने की इच्छा करता असुरेन्द्र विजय से मृत्यु को उत्तम मानता शूल लेकर सुरेन्द्र पर दौडा जैसे प्रलयकाल के जल में कैटभ दैत्य महापुरुष भगवान् पर दौडा था ॥ १ ॥

तदनन्तर असुरेन्द्र ने प्रलयकाल की अग्नि के समान कठोर जिह्वा (अनी) वाला शूल हाथ में उभोलन कर बडे वेग से महेन्द्र पर चलाया और चलाकर उस वीरने गर्जकर बडे क्रोधसे यह कहा हे पाप ! तू मरा ॥ २ ॥

वज्रधारी इन्द्र ने चलते हुए ग्रह और उल्का के समान दुर्निरीक्ष्य और आकाश में चले आते उस शूल को शत पर्व वज्र से मध्य ही में काटदिया और अविक्लव होकर सर्पराज के अंगके समान वृत्रासुर की भुजा को भी छेदन करदिया ॥ ३ ॥

क्रोधी वृत्रासुर ने एक बाहु कटजाने पर भी निकट आकर वज्रधारी इन्द्र को परिघ से हनू (कपोलके पास) में ताडन किया और ऐरावत को भी ताडन किया । तब मघवा इन्द्र के हाथ से वज्र छूटकर गिरपडा ॥ ४ ॥

वृत्रासुर के इस महा अद्भुतकर्म की सुर, असुर, चारण, सिद्ध आदिक सब प्रसंशा करने लगे और पुरुहूत [इन्द्र] के इस सङ्कट को देखकर सब हा ! हा !! करके आक्रोश करने लगे ॥ ५ ॥

अरिकी सन्निधी में अपने हाथ से गिरे वज्र को लज्जित इन्द्र फिर नहीं ग्रहण करना चाहता था तब वृत्रासुरने कहा हे हरे ! वज्र ग्रहण करो और अपने शत्रु को (मुझे) विनाश करो यह काल विषाद करने का नहीं है ॥ ६ ॥

क्योंकि युद्ध करने वाले आतती (शस्त्रधारी) पुरुषों में सदा ही का जय हो यह नहीं है यह सब जीव परतन्त्र हैं । इस जगत् की उत्पत्ति लय और स्थिति के ईश्वर सर्वज्ञ, सनातन, आदिपुरुष का ही जय निश्चय है उनके बिना औरों का कहीं जय भी होता है कहीं पराजय भी होता है ॥ ७ ॥

लोकपालों के सहित ये समस्त लोक विवश होकर जिसके वश में शिखा (जाल) बद्ध पक्षियों के समान परतन्त्र होकर जीवित हैं वही काल रूप भगवान् जय पराजय का कारण है ॥ ८ ॥

ओज (इन्द्रिय शक्ति) सह (मनःशक्ति) बल (शरीर-शक्ति) प्राण अमृत और मृत्यु स्वरूप कालको न जानकर यह जन जड देहको जय पराजय का हेतु मानता है ॥ ९ ॥

हे मघवन् ! जैसे काठ की नारी (पुतली) और यन्त्र मय (कलका) मृग पराई इच्छा से क्रिया करते हैं ऐसे ही इन सब भूतों को ईश्वर परतन्त्र जानो ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु स्वारम्भकप्रधानपुरुषादितन्त्राणीति युक्तं तत्राह-पुरुष इति । व्यक्तं महत्तत्वम् आत्माऽहङ्कारः ॥ ११ ॥

ननु स्वकर्मद्वारा जीव एव सृष्ट्यादिहेतुरिति मीमांसका मन्यंते तत्राह एवमविद्वानजीवमेवात्मानमीश्वरं स्वतन्त्रं मन्यते ननु पित्रादयः स्रष्टारो दृश्यन्ते व्याघ्रादयस्तु हन्तारस्तत्राह भूतैरिति स्वयमीश्वरः ॥ १२ ॥

ननु त्वया पराजितस्य मम अद्यादिवाकैश्च नास्ति किमिति मां वधायुक्ते प्रवर्तयसि तत्राह । आयुरिति । तत्काले जयादिकाले विपर्ययाः मकारियोदयः ॥ १३ ॥

प्राणग्लहोऽयं समर इष्वक्षो वाहनासनः ।
अत्र न ज्ञायतेऽमुष्य जयोऽमुष्य पराजयः ॥ १७ ॥

॥ श्रीशुक उवाच ॥

इन्द्रो वृत्रवचः श्रुत्वा गताऽलीकमपूजयत् ।
गृहीतवज्रः प्रहसंस्तमाह गतविस्मयः ॥ १८ ॥

॥ इन्द्र उवाच ॥

अहो दानव ! सिद्धोऽसि यस्य ते मतिरीदृशी ।
भक्तः सर्वात्मनात्मानं सुहृदं जग[1]दीश्वरम् ॥ १९ ॥
भवानतार्षीन्मायां वै वैष्णवीं जनमोहिनीम् ।
यद्विहायासुरं भावं महापुरुषतां गतः ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यस्मादेवं सर्वमीश्वराधीनं तस्मात्समः स्याद्धर्षविषादहीनो भवेत् ॥ १४ ॥

समत्वस्योपायमाह । सत्त्वमिति । हर्षादिभिर्न बध्यते ॥ १५ ॥

हर्षविषादनिवृत्त्यै तथाहमेव गुरुरित्याह । पश्येति । वृक्णमायुधं भुजश्च यस्य ॥ १६ ॥

अनियतत्वं द्यूतरूपकेणोपसंहरति प्राणा एव ग्लहः पणो यस्मिन् इषव एवाक्षाः पाशका यस्मिन् वाहनान्येवेतस्ततश्चालयमानान्यासनानि फलकानि यस्मिन् ॥ १७ ॥

गताऽलीकं निष्कपटम् ॥ १८ ॥

भक्तः सेवितवानसि ॥ १९ ॥ २० ॥ २१ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पुरुषः जीवः प्रकृतिः प्रधानं चित्समष्टि संसृष्टमचेतनं व्यक्तं महत्तत्त्वमात्माऽहङ्कारः भूतान्याकाशादीनि इन्द्रियाणि ज्ञानकर्मोभयात्मकानि दशेन्द्रियाण्येकादशोऽन्तःकरणम् एते यस्य भगवतोऽनुग्रहाद्विना तदनुप्रवेशरूपानुग्रहमन्तरेणास्य विश्वस्य सर्गादौ उत्पत्तिस्थितिलयेषु न शक्नुवन्ति न प्रभवन्ति एषां परमपुरुषकार्यत्वादिति भावः । प्रकृत्यादिग्रहणं दृष्टान्तार्थं यथा प्रकृत्यादयोऽस्य सर्गादौ न शक्नुवन्ति तथा पुरुषश्चतुर्मुखादिजीवोपि तदनुग्रहं विनास्य सर्गादौ न शक्नोति तत्कार्यत्वादित्यर्थः ॥ ११ ॥

एवं कार्यत्वमुक्तमथानीशत्वमाह । अविद्वानिति । इमं परमपुरुषायत्तोत्पत्त्यादिमन्तं तत्परतन्त्रमत एवानीश्वरमात्मानमविद्वानज्ञानीश्वरं मन्यते स्वात्मानमीश्वरं मन्यते जन इति शेषः "पुरुषः प्रकृतिर्व्यक्तम्" इति व्यष्टिसृष्ट्यादौ परमपुरुषस्य प्रयोजकत्वं प्रकृत्यादीनां तत्कार्याणां प्रयोज्यकर्तृत्वं चोक्तं तदेव प्रपञ्चयति । भूतैरित्यर्धेन । स्वयमात्मना प्रयोजककर्त्रा स्वेनेत्यर्थः भूतैः पृथिव्यादिभिः स्वानुगृहीतैः भूतगृहीतैः भूतग्रहणं प्रकृत्यादीनामप्युपलक्षणं प्रकृत्यादिभिः स्वानुप्रवेशाहितशक्तिभिः भूतानि देवमनुष्यादिव्यष्टिभूतानि सृजति तथा तैरेव भूतानि ग्रसते च व्यष्टिसृष्टेः सद्वारकत्वकथनेन समष्टिसृष्टेरद्वारकतेति सूचितम् "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत्" इति श्रुत्यर्थोऽत्रानुसन्धेयः ॥ १२ ॥

अस्त्वेवं तथापि पराजितोहं पुनरात्मनो न जयं सम्भावयामीत्यत्राह । आयुरिति । हि यस्मादीश्वरायत्ता स्वस्वकर्मानुगुणाद्देवमनुष्यादिसृष्टिस्तस्मादायुरादयोपि तदायत्तानि यतः देशकालपरिणामकर्मानुगुणाः पुरुषस्य याः आशिषस्ताः सर्वास्तत्काले उचितकाले तत्तत्कर्मफलानुभवदशायामित्यर्थः भवन्त्येव तत्र दृष्टान्तः । यथेति यथाऽनिच्छोः मरणदारिद्र्यादिकमनिच्छोरपि पुंसः तद्विपर्ययाः आयुरादिविपर्ययाः मरणदारिद्र्यापकीर्तिप्रभृतयोपि भवन्ति तथा आयुरादयोपीत्यर्थः तत्रायुर्जीवनं श्रीः सम्पत् ऐश्वर्यं प्रभुत्वं यद्वैश्वर्यं सम्पत् श्रीस्तेजः भगवत्सहायस्य तेऽधुना आयुरादयो भवेयुरेवेति भावः ॥ १३ ॥

यत एवं सर्वमीश्वरायत्तं कर्मानुगुणं चात एव न विक्रियेत विवेकीत्याह । तस्मादिति । यस्मात्सर्वमायुरादिकम् ईश्वरायत्तं कर्मानुगुणं विपर्ययवद्भवति तस्माद्विवेकी कीर्त्यकीर्त्योर्जयपराजययोस्तथा मरणजीवनयोश्च निमित्तयोर्ये सुखदुःखे ताभ्यां कीर्त्यादिनिमित्तसुखादिना विकारं न प्राप्नुयादित्यर्थः ॥ १४ ॥

किञ्च भगवदुक्तरीत्या मदुक्तरीत्या च मुक्तेरेव निरतिशयपुरुषार्थत्वादनभिसंहितफलसङ्गकर्तृकस्य युद्धादि कर्मणा आयुराद्यानुषङ्गिकफलप्राप्तिद्वारा तत्साधनत्वान्मोक्षाविरुद्धकर्म कुर्वन्देहावसाने मुक्तोपि भवतीत्याह । सत्त्वमिति । सत्त्वादयो गुणाः नात्मनः जीवस्य किन्तु प्रकृतेरेव गुणा इति निर्विवादं तत्र सत्त्वादिगुणपरिणामरूपे देहे स्थितमात्मानं यः पुमान्साक्षिणं द्रष्टारं मन्यते तत्कर्तृत्वं देहगतं मत्वा आत्मानं कर्तारं मन्यत इत्यर्थः स तु न बध्यते किन्तु संसारबन्धान्मुच्यत इति भावः ॥ १५ ॥

अस्मिन्नर्थे मामेव दृष्टान्तभूतं पश्येत्याह । पश्येति ।

(१) हरिमिति वी० पाठान्तरम् ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे शक्र ! मृधे युधे वृकणं छिन्नमायुधं त्रिशूलं भुजश्च यस्य तं निर्जितं पराजितमपि पुनस्तव प्राणान्हर्तुमिच्छया यथाशक्ति यतमानं यतमानं युयुत्सुं मां पश्य ॥ १६ ॥

यदि नूनं मम जयो भवेत्तर्हि योत्स्यामीत्याशङ्कमानं प्रवृत्तसमरं द्यूतत्वेन रूपयति । प्राणग्लह इति । गृह्यत इति ग्लहः जितेन गृह्यमाणः पणः प्राणा एव ग्लहो यस्मिन् वाहनानि हस्त्यश्वरथादीन्येवासनानि अस्यन्ते क्षिप्यन्ते इतस्ततश्चाल्यंत इत्यसनानि फलका यस्मिन्निषवः शरा एवाक्षाः देवनाक्षा यस्मिंस्तोयं द्यूतसदृशः संग्रामः अत्र द्यूततुल्ये संग्रामे कस्य जयः कस्य वा पराजय इति न ज्ञायते द्यूत इव जयपराजयौ तावदुर्ज्ञेयौ इत्यर्थः इत्थं तु लोकदृष्ट्योक्तं मया नूनं भगवत्सहायस्य तव जय एव निश्चित इति भावः ॥ १७ ॥

एवं तत्त्वकथनेन युद्धाय प्रोत्साहितः उपात्तवज्रः शक्रः तमाहेत्याह मुनिः । इन्द्र इति । गतालीकं निष्कपटं अस्य वचः श्रुत्वाऽपूजयदहमन्यतस्वीकृतवज्रायुधः शक्रो विगतस्मयः ज्ञानिनामियं रीतिरित्याश्चर्यरहितः प्रहसन् सावधानं स्ववचः समाकर्णनाय प्रहसंस्तं वृत्रमुवाच ॥ १८ ॥

उक्तमेवाह । अहो इत्यादिना स्वातकोष्ठकेरित्यंतेन । हे दानव, त्वं सिद्धोसि कृतकृत्योसि सिद्धोहं इति कथं त्वया ज्ञातस्तत्राह । यस्य ते तव ईदृशी मतिर्वर्त्तते किञ्च सिद्धत्वापादिकानन्या भगवद्भक्तिरेव सा च तवास्तीत्याह । भक्त । इति त्वं सर्वात्मनोपायोपेयादिभावेन जगदीश्वरमन्तरात्मानमत एव सुहृदं निरतिशयप्रियं भगवन्तं भक्त आर्तत्वात्कसंरिक्तः सेवितवान् ॥ १९ ॥

किञ्च जनान्मोहयतीति तथा तां वैष्णवीं मायां भवानतार्षीः कुतः यद्यस्मात्त्वमानासुरं भावं तामसत्वं विहाय महापुरुषतां श्रेष्ठपुरुषतां सत्त्वोत्तरपुरुषतां इति यावत् गतः प्राप्तवानसि ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हिरण्यगर्भादिनमोज आदिगुणाद्धेतुत्वेन सत्त्वाज्जयपराजययोरपि तन्निवर्तत्वमपि किमपराधमिति तत्राह—पुरुष इति । "हिरण्यगर्भः पुरुष आत्मा वायुरुदाहृतः शेषो व्यक्तस्तथैवेंद्र आश्रयः समुदाहृतः" इत्यतः पुरुषादिशब्देन न संसार्यादिसामान्यानि वस्तूनि गृह्यन्ते किन्तु विशिष्ट एव चेतन इत्येवं शास्त्रनिर्णये सति हिरण्यगर्भादयो यदनुग्रहं विनाऽस्य जगतः सर्गादौ न शक्नुवन्ति तमात्मानमन्तःस्थित्वा दानादिकर्तारं श्रीहरिमनीशं जीवं मन्यते व्याहतमिदमित्याह - ईश्वरमिति । कोसाविति तत्राह अविद्वानेवेति । अज्ञानादेवं मन्वानस्य निरय एवावस्थानं नान्यत्रेत्यस्मिन्नर्थे एव वाक्यं

> "अनीशं जीवरूपेण परमात्मानमीश्वरम् ।
> ये मन्यंते तान्समीक्ष्य ब्रह्माजिरयमात्मभवेत्" इति ॥

वचनात् ॥ ११ ॥

ननु सत्स्रष्टृत्वे ब्रह्मा च्छेत्वादिरूढिः कथमिति । तत्राह - भूतैरिति ॥ १२ ॥

दैवं दिनवृद्धिसंहारावपि तदधीनावित्याह । आयुरिति । पुरुषस्योत्पन्नस्य या आयुराद्याशिषो भवन्ति ते भावाः काले कालात्मनो हरेराराधनोपयोगाय भवन्ति हि यस्मात्तस्मादकीर्त्यादेः समः

स्यादित्यन्वयः यथा दुःखाद्यनुभवेच्छारहितस्यापि विपर्ययाः दुःखादिलक्षणा दृश्यंते तथेति शेषः अनेन सर्वे भावाः नारायणाधीना इति निरणायि ॥ १३—१४ ॥

दुःखाद्यागमे प्रकृतिपुरुषविवेकाज्ञानं कारणमित्याह । सत्वमिति । आत्मनो जीवस्यात्मानं परमात्मानम् ॥ १५ ॥

श्रीहर्यधीनत्वेन जयादिकं तथापि प्रत्यक्षमित्याह । पश्येति ॥ १६ ॥

प्राणा एव ग्लहः पणो यस्य स तथा इषवः शरा एव अक्षा यस्य स तथा हस्त्यादिवाहनान्यासनं फलकलक्षणं यस्य स तथा द्यूतकल्पः संग्रामः अत्र द्यूतलक्षणे समरे ॥ १७ ॥

गतालीकं निर्व्याजम् ॥ १८ ॥

सिद्धः जीवन्मुक्तः "जीवन्मुक्ते जातिभेदे सिद्धः स्यात्साधितेपि च" इति आत्मानं श्रीहरिं भक्तः भजमानः ॥ १९ ॥

ग्रामं गत इतिवत् महापुरुषतां प्रति गतः । भक्तिज्ञानादिगुणसंपन्नत्वेन महत्त्वम् ॥ २०॥२१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वाहनानि हस्त्यादीन्येव आसनानि सारि स्थानीयानां योधृणामाधारभूताः फलका यस्मिन् ॥ १५ ॥

गतविस्मयः प्राप्तविस्मयः ॥ १६—३० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पुरुषो महत्स्रष्टा स्वांशोपि किमुत प्रकृत्यादय इत्यर्थः । व्यक्तं महत्तत्त्वमात्मा अहङ्कारः । एते यस्यानुग्रहाद्विना सर्गादौ न शक्नुवन्ति । न च पुरुषस्य स एव कथं तदनुग्राह्य इति वाच्यं । परब्रह्मणोपि तदनुग्राह्यत्व श्रवणात् यथा "मदीयं महिमानञ्च परब्रह्मेति शब्दितम् । वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि" इति ॥ ११ ॥

ननु स्वकर्मद्वारा जीव एव सृष्ट्यादि हेतुरिति मीमांसका मन्यन्ते तत्राह एवमविद्वान् । अनीशमेवात्मानं जीवं ईशं मन्यते । ननु पित्रादयः स्रष्टारो दृश्यन्ते व्याघ्रादयस्तु हन्तारस्तत्राह भूतैरिति ॥ १२ ॥

ननु त्वया पराजितस्य मम जयादि शंकैव नास्ति किमिति वधान्मां युद्धे प्रवर्त्तयसीति तत्राह-आयुरिति । तत्काले स्वयुराद्यनुकूले काले अतस्तवाधं जयकालस्त्वं जेष्यसीति भावः विपर्ययाः मृत्युवधादिद्राद्वयः ॥ १३ ॥

समः समभावनावान् स्यात् सुखदुःखयोः ॥ १४ ॥

जयपराजयाद्याः गुणकार्याण्येव आत्मा तु गुणव्यतिरिक्त एवेति विवेकेन हर्षविषादौ न कर्त्तावित्याह । सत्वमिति । न वध्यते संसारबन्धं न प्राप्नोति ॥ १५ ॥

अत्रार्थे अहमेव ते गुरुरित्याह । पश्येति ॥ १६ ॥

युद्धमिदं द्यूत क्रीडनमेव । दोषबुद्ध्याशगिभिरपि त्यक्तुमशक्यमित्याह प्राणा एव ग्लहः पणो यत्र । इषव एवाक्षाः पाशका यस्मिन् । वाहनानि हस्त्यश्वादीन्येव आसनानि फलका यस्मिन् ॥ १७ ॥

गतविस्मय इति हन्त हन्त कथमसुरस्याप्येतावन्ति भक्तिज्ञानवैराग्याणीति प्रथमम् विस्मितो हास्यरहित एवाऽऽसीत् ततः प्रह्लाद वलिवृत्रादिस्मृत्या भक्तिरस्माद्भ्योऽपि कोटिगुणिता

खल्विदं महदाश्चर्यं यद्रजःप्रकृतेस्तव ।
वासुदेवे भगवति सत्त्वात्मनि दृढा मतिः ॥ २१ ॥
यस्य भक्तिर्भगवति हरौ निःश्रेयसेश्वरे ।
विक्रीडतोऽमृताम्भोधौ किं क्षुद्रैः खातकोदकैः ॥ २२ ॥

श्रीशुक उवाच ।

इति ब्रुवाणावन्योन्यं धर्मजिज्ञासया नृप ! ।
युयुधाते महावीर्याविन्द्रवृत्रौ युधाम्पती ॥ २३ ॥
आविद्ध्य परिघं वृत्रः कार्ष्णायसमरिन्दमः ।
इन्द्राय प्राहिणोद्घोरं वामहस्तेन मारिष ! ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

खल्वसुरेष्वपि संभवेदेवेति विस्मयापाये तस्य प्रहर्षहेतुको हासश्चाभूदित्यर्थः ॥ १८ ॥

भक्तः सेवितवानसि ॥ १९ ॥ २० ॥

महदाश्चर्यमिति । पुनरपि विस्मयोदयः । रजःस्वभावस्य तव कथं दृढा भक्तिः प्रह्लादादौ तु नारदादिमहदनुग्रहेणैव रजःस्वभावापगमात्तत्रोचितैव भक्तिरिति भावः । सत्त्वात्मनि शुद्धसत्त्व मूर्त्तौ ॥ २१ ॥

तव स्वर्गादिभोगोपेक्षा युक्तैवेत्याह-यस्येति । खातकोदकैः गर्त्तादिजलोपमैः स्वर्गादिभिः किम् अस्माकन्तु भक्त्यभावादेतैरेव निर्वृत्तिरिति भावः ॥ २२ ॥ २३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पुरुषो जीवः व्यक्तं महत्तत्त्वं आत्माहङ्कारः भूतानि च इन्द्रियाणि आशयोन्तःकरणञ्च ते तथा यदनुग्रहाद्विना सर्गादौ न शक्नुवन्ति यत्प्रवेशरूपमनुग्रहं विना सर्गादिकं कर्तुं न प्रभवन्तीत्यर्थः ॥ ११ ॥

अनीशं स्वातन्त्र्येण किमपि कर्तुमसमर्थमीश्वरमिदं मयैव कृतमिति समर्थं मन्यते यतो यः स्वयं भूतैर्भूतानि सृजति तैस्तानि संहरति च ॥ १२ ॥

यथा पुरुषस्यानिच्छोरेव विपर्ययाः आयुराद्यभावाः भवन्त्येव तथा आयुरादयोपि भवन्त्येव ॥ १३ ॥

सुखदुःखाभ्यां सुखदुःखयोश्च समः स्यात् ॥ १४ ॥

समत्वसाधनं गुणसाक्षिभूतात्मज्ञानमित्याह - सत्त्वमिति ॥१५॥

वृक्णं छिन्नमायुधं भुजश्च यस्य तम् ॥ १६ ॥

जयपराजययोरनियतत्वं द्यूतरूपकेण दर्शयति-अयं समरः प्राणाः ग्लहः पणो यस्मिन् तथाभूतः द्यूत एव इषूपलक्षितान्यायुधान्येव अक्षाः पाशाः यस्मिन् वाहनानि आस्यन्ते क्षिप्यन्ते इत्यास्यानि फलका यस्मिन् ॥ १७ ॥

गतमलीकं मिथ्याभाषणं यस्मात्तद्वचः श्रुत्वा ॥ १८ ॥

आत्मानं परमात्मानं प्रति भक्तोसि ॥ १९ ॥

महापुरुषाः भागवतास्तत्ताम् ॥ २० ॥ २१ ॥

भाषाटीका ।

पुरुष, प्रकृति, (व्यक्त) महत्तत्त्व पञ्चभूत इन्द्रिय और अन्तःकरण ये सब विना जिसके अनुग्रह के विना सृष्ट्यादिक में समर्थ नहीं होसके हैं ॥ ११ ॥

ऐसे ईश्वर परमात्माको अविद्वान पुरुष अनीश असमर्थ मानता है, वह तो भूतों के द्वारा भूतों को रचकर उनही के द्वारा उन भूतों को आप ग्रसता है ॥ १२ ॥

पुरुष इच्छा न करे तो भी उस समय पर जैसे आयु श्री, कीर्त्ति, और आशिष ये सबही विपरीत हो जाते हैं ॥ १३ ॥

तिसीसे अयश और यश, जय और पराजय तथा मरण और जीवन में भी सुख दुःख समान माने ॥ १४ ॥

सत्व, रज, तम ये तीनों प्रकृति के गुण हैं आत्मा के नहीं । तिनमें जो आत्मा को साक्षी जानता है सो बन्धको नहीं प्राप्त होता ॥ १५ ॥

हे इन्द्र ? मोकूं तूने जीत भी लिया और मेरा आयुध तथा हाथभी कट गया है तौभी उत्साह से तेरे प्राण हरने की चेष्टा करताहूं तू देख ॥ १६ ॥

ये समर नहीं एक जुआ है इसमें बाण ही फेकने के पाशे और वाहन ही चलने का घर है औरप्राणों की बाजी लगती है । इसमें किसकी जीत किसकी हार यह नहीं जाना जाता ॥ १७ ॥

श्री शुकदेवजी बोले ॥ इन्द्रने वृत्रासुर का सच्चावचन सुनकर बडी श्लाघा की इन्द्रभी विस्मयको छोड वज्र हाथ में ले हँसकर बोला ॥ १८ ॥

इन्द्रबोले । हे दानव ! तुम सिद्ध हो जो तुमारी एसी मति है सर्व के सुहृद और आत्मा जगदीश्वर के तुम सर्व प्रकार से भक्त हो ॥ १९ ॥

तुम जनों के मोहने वारी वैष्णवी माया को तर गये जो तुम आसुरभावको छोडकर महापुरुष के भाव को प्राप्त भये हो ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य तव खातकोदकैर्गर्तादिजलोपमैः स्वर्गादिभिः किम् ॥२२॥

युधां संग्रामाणां पती मुख्यौ ॥ २३ ॥

स तु वृत्रस्य परिघं करं च करभोपमम् ।
चिच्छेद युगपद्देवो वज्रेण शतपर्वणा ॥ २५ ॥
दोर्भ्यामुत्कृत्तमूलाभ्यां बभौ रक्तस्रवोऽसुरः ।
छिन्नपक्षो यथा गोत्रः खाद्भ्रष्टो वज्रिणा हतः ॥ २६ ॥
कृत्वाधरां हनुं भूमौ दैत्यो दिव्युत्तरां हनुम् ।
नभोगंभीरवक्त्रेण लेलिहो[1] ल्बणजिह्वया ॥ २७ ॥
दंष्ट्राभिः कालकल्पाभिर्ग्रसन्निव जगत्त्रयम् ।
अतिमात्रमहाकाय आक्षिपंस्तरसा गिरीन् ॥ २८ ॥
गिरिराट्पादचारीव पद्भ्यां[2] निर्जरयन्महीम् ।
जग्रास स समासाद्य वज्रिणं सह वाहनम् ॥ २९ ॥
महाप्राणो महावीर्यो महासर्प इव द्विपम् ।
वृत्रग्रस्तं तमालक्ष्य सप्रजापतयः सुराः ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हे मारिष श्रेष्ठ राजन् ! ॥ २४ ॥

उत्कृत्तं मूलं ययोस्ताभ्यां रक्तं स्रवतीति तथा गोत्रः पर्वतः ॥ २५ ॥

कृत्वाधरामित्यादेर्जग्रासेति तृतीयेनान्वयः नभोवद्गम्भीरेण वक्त्रेण लेलिहः सर्पस्तद्वदुल्बणया जिह्वया ॥ २७ ॥

कालकल्पाभिः कालतुल्याभिर्दंष्ट्राभिर्ग्रसन्निव आक्षिपन् चालयन् ॥ २८ ॥

निर्जरयन् चूर्णयन् ॥ २९ ॥

महाप्राणो महाबलः महावीर्यो महाप्रभावः ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्चेदं महदाश्चर्यं खलु किं तत् यद्रजःप्रकृतेः राजसस्वभावस्य तव सर्वात्मनि षाड्गुण्यपूर्णे वासुदेवे निश्चयमतिरवस्थितेति यत् ॥ २१ ॥

अत एव न तवैश्वर्यकैवल्यादिषु मतिरित्याह—यस्येति । निःश्रेयसेश्वरे मोक्षाधिपतौ आश्रितानां संसृतिबन्धहारिणि भगवति यस्य पुंसो भक्तिस्तस्य अमृताम्भोधौ महानन्दसमुद्रे विक्रीडतः विहरतः पुंसः क्षुद्रैरल्पैः खातकोदकैर्गर्तोदकतुल्यैरैश्वर्यकैवल्यादिसुखैः किं तानि तव तुच्छानीति भावः ॥ २२ ॥

एवं परस्परं ब्रुवाणौ इन्द्रवृत्रौ युयुधातेइत्याह मुनिः—इतीति । इतीत्थं धर्मजिज्ञासया भगवद्धर्मविचारेण तत्पूर्वमित्यर्थः एवं ब्रुवाणौ भाषमाणौ युधां योधृणां पती मुख्यौ अपारवीर्यौ इन्द्रवृत्रौ हे नृप ! युयुधाते युद्धङ्कृतवन्तौ ॥ २३ ॥

तदेवाह—आविध्येति । अरिन्दमो वृत्रः कार्ष्णायसं कृष्णलोहमयं घोरं परिघं वामहस्तेनाविध्य भ्रामयित्वा इन्द्राय प्राहिणोत् प्रचिक्षेप हे मारिष श्रेष्ठराजन् ! ॥ २४ ॥

स देवः इन्द्रस्तु वृत्रस्य परिघं करभोपमं दिग्गजशुण्डातुल्यं करं वामहस्तं च युगपदेव शतपर्वणा वज्रेण चिच्छेद छिन्नवान् ॥ २५ ॥

उत्कृत्तं छिन्नं मूलं ययोस्ताभ्यां बाहुभ्यां रक्तं स्रवतीति रक्तस्रवो ऽसुरो वृत्रः बभौ रराज यथा गोत्रो गिरिर्वज्रिणेन्द्रेण छिन्नौ पक्षौ यस्य तादृशः खादाकाशाद्भ्रष्टो गलितो हतस्सन् भाति तद्वत् ॥ २६ ॥

स दैत्यो वृत्रः अधरां हनुं भूमौ उत्तरां हनुं दिवि कृत्वा निधाय नभोवद्गम्भीरेण वक्त्रेण लेलिहस्सर्पः पुनः पुनरतिशयेन वा लेढि लेलिहः यङ्लुगन्तात्पचाद्यच् तद्वदुल्बणया क्रूरया जिह्वया सवाहनमैरावतसहितं वज्रिणं इन्द्रमासाद्य प्राप्य जग्रास निगीर्णवान् कथंभूतस्सन् कालकल्पाभिर्मृत्युतुल्याभिर्दंष्ट्राभिर्जगत्त्रयं ग्रसन्निवातिमात्रोच्छ्रितो महादेहो यस्मात् एव तरसा बलेन गिरीनाक्षिपन् इतस्ततश्चालयन् पादचारी पर्वतराडिव पद्भ्यां महीं निर्दरयंश्चूर्णयन् पद्भ्यां गिरीनाक्षिपन्महीं निर्दरयंश्चेति वान्वयः महाप्राणो महाबलः महावीर्योतिप्रभावस्सर्पोद्विपं गजमिव जग्रासेति दृष्टान्तीभूतः ॥ २७ ॥ २८ ॥ २९ ॥

वृत्रेण ग्रस्तं तमिन्द्रमालक्ष्य दृष्ट्वा ब्रह्मादिभिर्महर्षिभिश्च सहिताः सर्वे सुराः हा महेन्द्रस्य कष्टं प्राप्तं इति निर्विण्णाश्चिन्ताक्रान्ताश्चुक्रुशुः असुरेन्द्रेण वृत्रेण निगीर्णोपीन्द्रो न ममार न मृतः किन्तूदरं प्रविष्टो महापुरुषेण भगवता सम्यक् रक्षितः महापुरुषेण नारायणकवचात्मकेन सम्यक् रक्षितो वा भगवन्मायाबलेन योगमायाबलोपबृंहितेनेत्यर्थः ॥ ३० ॥ ३१ ॥

(१) लिलेढेति विजयध्वज सम्मतः पाठः । (२) निर्दरयन् । इति वी० पाठान्तरम् ।

हा कष्टमिति निर्विण्णाश्चुक्रुशुः समहर्षयः ।
निगीर्णोऽप्यसुरेन्द्रेण न ममारोदरं गतः ।
महापुरुषसन्नद्धो योगमायाबलेन च ॥ ३१ ॥
भित्वा वज्रेण तत्कुक्षिं निष्क्रम्य बलभिद्विभुः ।
उच्चकर्त्त शिरः शत्रोर्गिरिशृङ्गमिवौजसा ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्नातकोदकैः कूपतटाकादिजलैः तत्प्रायैः स्वर्गादिभिः ॥ २२ ॥

धर्मजिज्ञासया धर्मविचारेण युक्तौ युध्यंतीति युधो योधाः तेषां पती युधसंप्रहार इति धातुः अनपुंसकाद्युपपदे क्विप् प्रत्ययः पुंशब्दवत् ॥ २३ ॥ २४ ॥

"कनिष्ठिकाधः करभः करिपोतेऽपि तत्कर" इत्यभिधानात् अत्र करभशब्दस्य युक्तोर्थो ग्राह्यः ॥ २५ ॥

मूर्छो भ्रंशितः ॥ २६ ॥

लिलेह नभ इति शेषः ॥ २७ ॥

कालकल्पाभिः अमसदृशीभिः ॥ २८ ॥ २९ ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

आविध्य भ्रामयित्वा मारिष हे मान्य ! ॥ २४—२५ ॥

गोत्रः पर्वतः ॥ २६ ॥

नभोवद्गम्भीरेण वक्त्रेण लेलिहः सर्पस्तद्वदुल्बणाया जिह्वया निर्जरयन् जीर्णीकुर्वन् तरसा जग्रासेत्यन्वयः ॥ २७—२८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यस्य निःश्रेयसेश्वरे मुक्तिप्रदे हरौ भक्तिः स्यात्तस्य क्षुद्रैः स्वर्गादिसुखैः किं प्रयोजनम् यथाऽमृताम्भोधौ क्षीराब्धौ विक्रीडतः खातकोदकैः किम् ॥ २२ ॥ २३ ॥

हे मारिष श्रेष्ठ ! ॥ २४ ॥ २५ ॥

यथा वज्रिणा हतः खाद्भ्रष्टः पतितश्छिन्नपक्षो गोत्रो गिरिस्तद्वत् । असुरः उत्कृत्तं मूलं ययोस्ताभ्यां रक्तं स्रवतीति तथा बभौ ॥ २६ ॥

दैत्यः दैत्यपक्षपातित्वात् न तु दितिपत्यत्वात् । अधरां हनुं भूम्यामुत्तरां हनुं दिवि च कृत्वा नभ इव गंभीरवक्त्रेण उल्वणाजिह्वया च लेलिहत्सर्प इव प्रतीयमानः । वज्रिणं जग्रासेति तृतीयेनान्वयः ॥ २७ ॥

कालकल्पाभिः कालतुल्याभिः जगत्त्रयं ग्रसन्निव अतिमात्रः अतिप्रमाणः महान्कायो यस्य स तरसा वेगेन गिरीन् आक्षिपन् धर्षयन् ॥ २८ ॥

निर्जरयन् जर्जरीकुर्वन् ॥ २९ ॥

महाप्राणो विपुलबलः महावीर्यो विपुलपराक्रमः सर्पो द्विपं गजमिव ॥ ३० ॥

भाषाटीका।

यह बड़ा आश्चर्य है जो रजोगुण की प्रकृति वाले तुमारी शुद्धसत्त्वस्वरूप भगवान् वासुदेव में दृढ मति भई ॥ २१ ॥

जिस की मोक्ष के भी ईश्वर, हरि, भगवान् में भक्ति है । उस अमृतसमुद्रके गोता लगाने वाले को खोदके निकाले हुए कूपादि के पानी से क्या प्रयोजन है ॥ २२ ॥

श्रीशुकदेवजी बोले ! हे राजन् ! संग्रामके पती धर्मकी जिज्ञासा से परस्पर यों बोलते हुये बड़े बली इन्द्र और वृत्रासुर दोनों युद्ध करने लगे ॥ २३ ॥

हे राजन् ! शत्रु के दमन करने वाले वृत्रासुरने फट्कारके लोहेका एक घोर परिघ बायें हाथ से चलाया ॥ २४ ॥

इन्द्रनेभी उस परिघ और वृत्रासुर के हाथको (शतपर्व) वज्रसे एकही वार काट दिया ॥ २५ ॥

मूलसे कटे हुये हाथों से रक्त बहाता हुआ वृत्रासुर ऐसा मालूम पड़ा कि जैसे इन्द्रके वज्र से कटे पक्षवाला आकाश से गिरा हुआ पर्वत हो ॥ २६ ॥

वृत्रासुर नीचे का होठ पृथ्वी में ऊपरका होठ आकाश में करके आकाश के सदृश गंभीर मुखसे सर्प के नाईं उल्वण जिव्हा से और काल के सदृश डाढ़ों से तीनों जगत्को ग्रसताला बहुत ही भारी शरीर वाले वेग से पर्वतों को लखाता हुआ पांवसे चलने वाले बड़े पर्वत सरीका पृथ्वी को चूर्ण करता हुआ इन्द्र के पास पहुंच कर वाहन सहित इन्द्र को ग्रस लिया ॥२७॥२८॥२९॥

महाबल महाप्रभाव वाला सर्प हाथी को जैसे ग्रस ले । वैसे वृत्रासुर के ग्रसे हुए इन्द्र को देख देव, प्रजापति और महर्षि, ये सब ही अहो ? बड़ा कष्ट हुआ यों दुःखितहो कर आक्रोश करते हुये । इन्द्र को तो वृत्रासुर ने निगल लिया तो भी वह नारायण कवच रूप महापुरुष से कवचित होने के कारण और योग माया बल के कारण उदर में जाकर भी मरा नहीं ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

महापुरुषेण कवचरूपेण श्रीनारायणेन सन्नद्धो दंशितः योगबलेन मायाबलेन च ॥ ३१ ॥

वज्रस्तु तत्कन्धरमाशुवेगः कृन्तन्समन्तात्परिवर्तमानः ।
न्यपातयत्तावदहर्गणेन यो ज्योतिषामयने वार्त्रहत्ये ॥ ३३ ॥
तदा च खे दुन्दुभयो विनेदुर्गन्धर्वसिद्धाः समहर्षिसङ्घाः ।
वार्त्रघ्नलिङ्गैस्तमभिष्टुवाना मन्त्रैर्मुदा कुसुमैरभ्यवर्षन् ॥ ३४ ॥
वृत्रस्य देहान्निष्क्रान्तमात्मज्योतिररिन्दम ! ॥
पश्यतां सर्वलोकानामलोकं समपद्यत ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां वृत्रवधोनाम
द्वादशोऽध्यायः ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

बलभिदिन्द्रः उच्चकर्त्त चिच्छेद ॥ ३२ ॥

तस्य कन्धरं कन्धराम् आशुवेगोऽतिवेगवान् ज्योतिषां सूर्यादीनाम् अयने दक्षिणोत्तरगतिरूपे संवत्सरे योऽहर्गणः षष्ट्युत्तरशतत्रयात्मकस्तावताऽहर्गणेन वार्त्रहत्ये वृत्यहत्यायोग्ये काले न्यपातयत् यद्वा स्वार्थे तद्धितः वृत्रहत्यायां वृत्रहननार्थं परिवर्तमान इत्यर्थः ॥ ३३ ॥

वार्त्रघ्नलिंगैर्वृत्रहन्तुर्वीर्यप्रकाशकैः "वार्त्रहत्याय शवसेपृतनाषाह्यायच" इत्याद्यैस्तमिन्द्रमभिष्टुवाना अभिष्टुवन्तः ॥ ३४ ॥

अलोकं लोकातीतं भगवन्तम् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

वज्रेण तस्य वृत्रस्य कुक्षिं भित्वा विभुः बलभिदिन्द्रः कुक्षेः बहिर्निर्गत्य शत्रोर्वृत्रस्य शिरः पर्वतस्य शृङ्गमिव उच्चकर्त चिच्छेद ॥ ३२ ॥

अति विपुलां वृत्रस्य कन्धरां कियता कालेन चिच्छेदेत्यत्राह-वज्रस्त्विति आशुवेगस्तीक्ष्णधारो वज्रो वज्रायुधं तस्य वृत्रस्य कन्धरं कण्ठं पुंस्त्वमार्षं समन्तात्कन्धरायाः अभितः परिवर्त्तमानः कृन्तन् छिन्दन् वार्त्रहत्ये वृत्रहत्यासम्बन्धिनि ज्योतिषामयने संवत्सरे योऽन्हां षष्ट्युत्तरत्रिशतसंख्याकानां गणः तेन तावता कालेनेत्यर्थः न्यपातयच्छिरो भूमौ पातितवानित्यर्थः ज्योतिषां सूर्यादीनामयनं दक्षिणोत्तरगतिः तदात्मके संवत्सर इत्यर्थः वार्त्रहत्ये इत्यनेन कारस्न्येन संवत्सरसम्बन्धित्वं वृत्रहत्यायाः सूचितम् ॥ ३३ ॥

तदा वृत्रशिरश्छेदनानन्तरं खे दिवि देवदुन्दुभयो दध्वनुः महर्षीणां सङ्घैः सहिता गन्धर्वादिसङ्घाश्च वार्त्रघ्नलिङ्गैः वृत्रहंतुरिन्द्रस्य प्रकाशकैर्मन्त्रैस्तं इन्द्रमभिष्टुवन्तः मुदा हर्षेण कुसुमैरभ्यवर्षन् ॥ ३४ ॥

हेऽरिन्दम ! वृत्रस्य देहान्निर्गतमात्मज्योतिःज्योतिरूपः स्वप्रकाशरूप आत्मा सर्वलोकानां पश्यतां सतां अलोकं प्राकृतलोकविलक्षणं श्रीवैकुण्ठं समपद्यत स्वं लोकमिति पाठे मुक्तानां स्वतः प्राप्तं स्थानमित्यर्थः ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

महापुरुषेण भगवता सन्नद्धः सहितो रक्षित इति यावत् नारायणकवचाख्यविद्यया समुद्धतो वा योगमायाबलेन अणिमादिमहिमबलेन उपायलक्षणमायाबलेन वा ॥ ३१ ॥ ३२ ॥

अकृत्रिमो योगो यस्य स तथा योऽयमहर्गण आदित्यादिज्योतिषामयने दक्षिणोत्तरायणसंज्ञे संवत्सरे संभवति तावताहर्गणेन षष्ट्युत्तरशतत्रयलक्षणेन वार्त्रहत्ये वृत्रहननसम्बन्धिनि समरे काले वा तावत्कालं समन्तात्कृन्तन् परिवर्तमानो भ्रमन्वज्रस्तं न्यपातयदित्यन्वयः । अत्रेतिहासंपठंति । प्रथमं युद्धं नर्मदातीरे द्वितीयं तु समुद्रतीरे तत्र वृत्रेण केनचित्संकेतेन संधित इन्द्रः सख्यंप्राप्तस्य तस्य स्निग्धतया करं प्रगृह्य फेनेनास्य वधं कर्तुं विचरन्फेनेन मां जहीति विनोदवचनं वृत्रेण वाचयित्वा तेन पादस्पर्शलक्षणं ताडनं कृत्वा युद्धाय सन्नद्धः एकसंवत्सरकालं युद्धं कृत्वा विष्णुशक्तियुक्तं वज्रं फेने निवेश्य तस्मै विसृज्य श्रीनारायणं ध्यायतस्तस्य शिरः प्रजहार "सन्धितः समयेनेन्द्रो वृत्रेणाथो करग्रहः । समुद्रतीरे विचरन् फेनेन वधमस्य तु । नर्मणा जहि फेनेन वाचयित्वा सुरेश्वरः पादस्पर्शं विवादं च कृत्वा युद्धाय दंशितः । फेने वज्रं समाविश्य विष्णुयुक्तं व्यसर्जयत् । अपानुदच्छिरस्तस्य ध्यायतो वत्सरेण सः" इतिवाक्यमत्रमानं करं गृह्णातीति करग्रहः ॥ ३३ ॥

वृत्रघ्नस्येन्द्रस्य संबंधीनि लिङ्गानि लक्षणानि स्तम्भितजलनिर्गमनादीनि तानि येषु मन्त्रेषूच्यन्ते ते वार्त्रघ्नलिंगास्तैर्मन्त्रैः "दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः अपां बिलमपिहितं यदासीद्वृत्रं जघन्वान् । अपतद्ववार" इत्यादिलक्षणैः ॥ ३४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आत्मज्योतिर्जीवाख्यं तेजः स्वलोकं स्वेनाधिकृतं विद्याधरलोकम् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

न ममारेत्यत्र हेतुमाह-महापुरुषेण विश्वरूपोपदिष्टनारायणवर्म्मणा सन्नद्धः। ननु गुरुवधेपि सा विद्याऽस्फुरदिति शास्त्रविदामसम्मतं तत्राह- योगेति । सम्प्रतिलब्धेन भगवच्छक्तिबलेनेत्यर्थः। चकारात्तद्बलेन पूर्व्वशक्तेरप्युद्भवो गमितः ॥ ३१—३४ ॥

वृत्रस्येति आत्मज्योतिराविर्भूतपार्षददेहात्मकम्। अलोकं भगवल्लोकम् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भस्य
द्वादशोऽध्यायः समाप्तः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

महापुरुषेण श्रीनारायणाकवचेन सन्नद्धो दंशितः योगबलेन स्वमायाबलेन च तत्र योगोऽष्टाङ्गः। माया अन्तर्धाय पवनादिरूपेण स्थितिः ॥ ३१ ॥

उच्चकर्त्त चिच्छेद ॥ ३२ ॥

आशुवेगोपि समन्तात् परिवर्त्तमानः कन्धरायाः सर्वतो दिक्षु भ्रमन्नेव कृन्तन् न त्वेकतो दिशः । कन्धराया महासारत्वादिति भावः॥ तावता अहर्गणेन कर्त्तित्वा भूमौ न्यपातयत् योऽहर्गणः ज्योतिषां सूर्यादीनां सम्बन्धिनी अयने द्वे दक्षिणोत्तरे अभिव्याप्य भवेदित्यर्थः । अयने कीदृशे वार्त्रहत्ये वृत्रहत्यायोग्ये वृत्रादियप्रत्ययान्तात् स्वार्थिके नाना तत्र भावार्थे नाना वा रूपम् ॥ ३३ ॥

वार्त्रघ्नलिङ्गैः "वार्त्रहत्याय शवसे पृतनासाह्याय च" इत्यादिमन्त्रैस्तमिन्द्रमभिष्टुवानाः ॥ ३४ ॥

अत्र यदैव वृत्रः सवाहनमिन्द्रं अग्रास तदैव मम हन्ता अन्यः कोपि नास्तीति निश्चित्य योगबलेनैव देहं त्यक्त्वा कथं न शीघ्रं भगवत्पार्श्वं यामीति विभाव्य समाधिश्चकार तदैवेन्द्रोऽचेतनस्य वृत्रदेहस्य कुक्षिं विदार्य्य निःसृत्य शिरश्छेदे प्रवृत्त इति गिरिशृङ्गमिव चकर्त्तेति दृष्टान्तात् ज्ञेयम्। आत्मज्योतिः पार्षददेहात्मकः प्रकाशः वृत्रदेहात् प्रथग्भूतः । अलोकं लोकातीतं श्रीसङ्कर्षणवैकुण्ठम् ॥ ३५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठस्य द्वादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

महापुरुषेण वर्मरूपेण श्रीनारायणेन सन्नद्धः दंशितः इन्द्ररक्षार्थं भगवत्प्रयुक्तमायाबलेन च न ममार ॥ ३१ ॥

बलभिदिन्द्रः तस्य कुक्षिं भित्वा विदार्य ततो निष्क्रम्य निर्गत्य शत्रोः वृत्रस्य शिरः उच्चकर्त अच्छिनत् ॥ ३२ ॥

आशुवेगः शीघ्रगतिर्वज्रः कन्धरायास्समन्तात् । परिवर्तमानः परिभ्रममाणः तस्य कन्धरं पुंस्त्वमपि कन्धरां कृन्तन् छिन्दन् वार्त्रहत्ये वृत्रहत्यायोग्ये ज्योतिषां सूर्यादीनामयनं दक्षिणोत्तरगतिस्तदात्मके संवत्सरे योऽहर्गणः षष्ठ्यधिकशतत्रयदिवससमूहस्तावता अहर्गणेन न्यपातयत् ॥ ३३ ॥

वार्त्रघ्नलिंगैः वृत्रहन्तुरिन्द्रस्य वीर्यप्रकाशकैः । "वार्त्रहत्याय शवसे पृतनासाह्याय च इन्द्रत्वावर्तयामसि" इत्यादिमन्त्रैः । तमिन्द्रमभिष्टुवानाः । कुसुमैरभ्यवर्षन् ॥ ३४ ॥

आत्मज्योतिः जीवाख्यज्योतिः । अलोकं अकारार्थस्य वासुदेवस्य लोकं वैकुण्ठं समपद्यत ॥ ३५ ॥

इतिश्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
द्वादशोऽध्यायः ॥ १२ ॥

भाषाटीका ।

इन्द्रने भी वज्र से वृत्रासुर की कुक्षि को फाडकर बाहर निकल के पराक्रमसे गिरिशिखर के सदृश शत्रु के शिर को काट दिया ॥ ३१ ॥ ३२ ॥

इन्द्र का वज्र भी वृत्रासुर के मारने के लिये अति वेग से चारों तरफ भ्रमता हुआ उतने दिनों मे वृत्रासुर के कंधर को गिरासका कि जितने में सूर्यादिक फिरते हैं अर्थात् एक वर्ष में गिराया ॥ ३३ ॥

उस समय आकाश में दुन्दुभि बाजने लगी गन्धर्व, सिद्ध और महर्षियों के समूह वृत्रासुरके मारने वाले इन्द्र के वीर्य को प्रकाश करने वाले मंत्रों से इन्द्र की स्तुति करते हुये कुसुमों की वर्षा करते भये ॥ ३४ ॥

हे राजन्! वृत्रासुर के देह से निकली जोति सबों के देखते २ साक्षात् भगवान को प्राप्त होगई ॥ ३५ ॥

इति श्रीमत् भागवत महापुराण षष्ठस्कन्ध
की भाषा टीका में द्वादश अध्याय समाप्त ।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे द्वादशोऽध्यायः समाप्तः ॥ १२ ॥

॥ त्रयोदशोऽध्यायः ॥

श्रीशुक उवाच ।

वृत्रे हते त्रयो लोका विना शक्रेण भूरिद! ।
सपाला ह्यभवन्सद्यो विज्वरा निर्वृतेन्द्रियाः ॥ १ ॥
देवर्षिपितृभूतानि दैत्या देवानुगाः स्वयम् ।
प्रतिजग्मुः स्वधिष्ण्यानि ब्रह्मेशेन्द्रादयस्ततः ॥ २ ॥

राजोवाच ।

इन्द्रस्यानिर्वृतेर्हेतुं श्रोतुमिच्छामि भो मुने! ।
येनासन्सुखिनो देवा हरेर्दुःखं कुतोऽभवत् ॥ ३ ॥

श्रीशुक उवाच ।

वृत्रविक्रमसंविग्नाः सर्वे देवाः सहर्षिभिः ।
तद्वधायार्थयन्निन्द्रं नैच्छद्भीतो बृहद्वधात् ॥ ४ ॥

इन्द्र उवाच ।

स्त्रीभूजलद्रुमैरेनो विश्वरूपवधोद्भवम् ।
विभक्तमनुगृह्णद्भिर्वृत्रहत्यां क्व मार्ज्म्यहम् ॥ ५ ॥

श्रीशुक उवाच ।

ऋषयस्तदुपाकर्ण्य महेन्द्रमिदमब्रुवन् ।
याजयिष्याम भद्रं ते हयमेधेन मा स्मभैः ॥ ६ ॥
हयमेधेन पुरुषं परमात्मानमीश्वरम् ।
इष्ट्वा नारायणं देवं मोक्ष्यसेऽपि जगद्वधात् ॥ ७ ॥
ब्रह्महा पितृहा गोघ्नो मातृहाऽऽचार्यहाऽघवान् ।
श्वादः पुल्कसको वाऽपि शुद्ध्येरन्यस्य कीर्त्तनात् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रयोदशे तु वृत्रस्य ब्रह्महत्यामहाभयात् ।
चिरं नष्टोऽखिलः शक्रो विष्णुनेति निरूप्यते ॥ १ ॥
अनिर्वृतं शक्रमपृष्ट्वा स्वयमेव प्रतिजग्मुः ॥ २ ॥
हरेरिन्द्रस्य ॥ ३ ॥

तस्य दुःखहेतुं वक्तुं प्रस्तावकथामाह-वृत्रविक्रमेत्यादिना ।
नार्थयन् प्रार्थयन् बृहद्वधात् ब्राह्मणवधाद्भीतः सन् ॥ ४ ॥
एनः पापं विभक्तं विभज्य गृह्णद्भिः मार्ज्मि शोधयामि ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं वृत्रवधेन सर्वे निर्वृताः स्वस्वलोकान् जग्मुरित्याह मुनिः वृत्र इति द्वाभ्यां । हे भूरिद ! एवं वृत्रे हते सति शक्रं विना सर्वे लोकपालैः सहिताः लोकाः सद्य एव विज्वराः विगताभयः अत एव निर्वृतानि सुखितानि इन्द्रियाणि अन्तर्बाह्यानि येषां तादृशाः अभवन् बभूवुः ॥ १ ॥

ततो देवाश्च ऋषयश्च पितरश्च भूतानि च तथा दैत्याः देवाश्च तदनुगाश्च तथा ब्रह्मा चतुर्मुखश्च ईशो रुद्रश्च इन्द्रश्च आदिशब्दादन्ये च स्वस्वस्थानानि प्रति स्वयं जग्मुः ॥ २ ॥

यदुक्तं यच्छक्रेण विना सर्वे लोकाविज्वरा निर्वृतेन्द्रियाः अभवन्निति तत्रेन्द्रस्यानिर्वृतौ देवानांनिर्वृतौ च कारणं पृच्छति राजा-इन्द्रस्येति । हे महामुने ! इन्द्रस्यानिर्वृतौ हेतुं कारणं श्रोतुमिच्छामि वृत्रवध एवेति चेत्तर्हि तेनैव देवानामप्यनिर्वृतिर्भवेदिदं तु कुतः देवानां निर्वृतिरिन्द्रस्य दुःखमितिपृच्छति-येनेति । येन वृत्रवधरूपेण हेतुना देवाः सुखिनः आसन् तस्मादेव हेतोरिन्द्रेणापि सुखिना भवितव्यं कुतः कस्माद्धेतोर्हेतोरिन्द्रस्य दुःखमभूदित्यर्थः ॥ ३ ॥

एवं पृष्टो मुनिरिन्द्रस्यानिर्वृतौ देवानां निर्वृतौ च हेतुं वक्तुं तावद्वृत्रवधोद्योगकालिकं देवानां वृत्तान्तमाह मुनिः । वृत्रेत्यादिना यावदध्यायसमाप्ति । वृत्रस्य पराक्रमेण भीताः सर्वे देवा ऋषिभिस्सह वृत्रवधार्थम् इन्द्रमार्थयन् प्रार्थयन्त परस्मैपदमार्षम् एवं प्रार्थितोपीन्द्रो ब्रह्महत्याद्ब्रह्मवधात्पूर्वं कृताद्विश्वरूपवधात्कारिष्यमाणावृत्रवधाद्वाभीतः सन्नैच्छत् ॥ ४ ॥

एतदिन्द्रोक्तिमुखेन विशदयति-स्त्रीति । विश्वरूपवधोद्भवमेनः पापं मामनुगृह्णद्भिः स्त्रीभूमिजलद्रुमैश्चतुर्भिर्विभक्तं विभज्य गृहीतमधुना वृत्रहत्यां क कुत्र मार्जिम संशोधयेयं वृत्रहत्योद्भवं पापं कावस्थाप्याहं शुद्धो भवेयं न कायप्यतस्तं न हन्यामित्यर्थः ॥ ५ ॥

एवमिन्द्रेणोक्ता ऋषयस्तं प्रत्यूचुरित्याह मुनिः । तदिन्द्रस्य वच उपाकर्ण्य ऋषयो महेन्द्रं प्रतीदं वक्ष्यमाणं वाक्यमब्रुवन् ऋषीणामुक्तिमेवाह-याजयिष्याम इत्यादिना स्वानिग्रहेणोत्थेन । हयमेधेनाश्वमेधेन यागेन करणेन त्वया कर्त्रा वयं याजयिष्यामः भगवन्तमिति शेषः । त्वं मास्मभैर्भयं माकार्षीः ते तव भद्रमेव भविष्यति ॥ ६ ॥

नन्वश्वमेधमात्रेण मत्पापं कथं निवर्तिष्यत इति शङ्कमानं प्रत्याहुः-हयमेधेनेति । परमात्मानं लोकत्रयमन्तः प्रविश्य भर्तारमीश्वरं सर्वस्य प्रशासितारं स्वतेजसा दीप्यमानं परमपुरुषं नारायणं हयमेधेनेष्ट्वा आराध्य कृत्स्नजगद्वधनिमित्तादपि पापान्मोक्ष्यसे किमुत वृत्रवधनिमित्तात्पापान्मोक्ष्यस इतीत्यर्थः

"नाम्नोऽस्य यावती शक्तिः पापनिर्हरणे हरेः ।
तावत्कर्तुं न शक्नोति पातकं पातकी नरः" ॥

इत्युक्तरीत्या स्मरणमात्रमहापातकनिवर्तनशीलत्वादिरूपमहामहिमशालिनस्तस्य भगवतः साक्षादाराधनेन धर्मप्रतिपन्नवृत्रवधमात्रनिमित्तं पापं न निवर्तेत किमित्यभिप्रायेण पुरुषं परमात्मानमित्याद्यनेकनामनामुपादानम् ॥ ७ ॥

तदेव विशदमाहुः । ब्रह्महेतिद्वाभ्यां । यस्य भगवतो नाम्नः कीर्तनादेव ब्रह्महन्मादयः शुध्येरन् श्वादः श्वपाकः पुल्कसः पापजातिः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अश्वमेधादिकर्मज्ञानप्रतिबन्धदुष्कर्मपरिहारत्वेन तत्साधनमित्येतदस्मिन्नध्याये प्रतिपाद्यते । भूरिद बहुप्रद ! स्वर्णप्रदेति वा "स्वर्णं भूरिहिरण्यञ्च पुरटं निष्कहेमनि" इत्यभिधानाद्धिरण्यादिद्रव्यप्रद ॥ १ ॥

ततः समुद्रतीरात् ॥ २ ॥

हरेरिन्द्रस्य "अर्कमर्कटमण्डूकविष्णुवासववायवः तुरङ्गसिंहशीतांशुयमाश्च हरयो दश" इत्यभिधानम् ॥ ३ ॥

अर्थयन्नित्युभयपदी अर्थप्रातिपदिकात् कृदन्तात्तत्करोतीति णिचि कृते रूपं साधु वृद्धवधात् ब्राह्मणवधात् ॥ ४ ॥

एनो ब्रह्महत्यापापं मार्जिम संशोध्य परिहरामि ॥ ५ ॥

मास्म भैः भयं माकार्षीः स्म ॥ ६ ॥ ७ ॥

यन्नामसङ्कीर्तनादेते शुद्धा भवन्ति किं वक्तव्यं तद्यजनेनेति भावेनाह-ब्रह्महेति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वृत्रविक्रमेत्यादि वृत्रवाक्यश्रवणानन्तरमेव ज्ञेयम् ॥१॥२॥३॥ ४॥

अथ यथा बृहस्पत्यवज्ञात्मकं पापं विश्वरूपवधात्मकपापान्तरस्य जनकं जातं । तथाच तत्र लोकमात्र दृष्ट्या विभक्तमपि वृत्रवधात्मकपापान्तरजनकत्वेनावशिष्टमेव दृष्टं इन्द्रः स्वयमपि तदवशेषमनुभूयान्तर्भीत एव बहिस्तान् प्रत्याचक्षाणस्तमपि पूर्ववल्लोकसंग्रहार्थमपलपति-स्त्रीति ॥ ५ ॥

ऋषयस्तु जगत्स्वास्थ्याय तस्याप्यासुरभावनाशाय श्रीभगवदाज्ञाबलेन संप्रयोजितवन्त इत्यभिप्रेत्याह—ऋषय इति ॥ ६ ॥

अतो दोषाभासत्वात् प्रायश्चित्ताभासमप्युद्भावयन्ति-हयेति । तत्र वीर्यातिशयाधानज्ञापनार्थमाहुः । नारायणमिष्ट्वेति । कैमुत्यार्थमाह ब्रह्महेति । आचार्यो वेदगुरुः । कीर्तनमात्रात् । किं पुनरसकृच्छ्रामोच्चारणमयतद्यजनादित्यर्थः ॥ तत्र स्वप्रभावमपि दर्शयन्ति अस्माभिरिति । तत्र भगवत एव स्वाभिप्रायमपि व्यञ्जयन्ति स्वेति जगतस्तस्यच भक्तिभावाभावान्न दोष इति ॥ ५—९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ब्रह्मेशेन्द्रादय इति इन्द्रस्य स्वाधिष्ण्यगमनं नोपपद्यते वृत्रवधक्षण एव ब्रह्महत्योपद्रवप्राप्तेः । तस्मात्तत इत्यनेन मानससरोवरादागत्य प्रवर्तिताद्श्वमेधात् परत इति व्याख्येयम् ॥१॥२॥

हरेरिन्द्रस्य ॥ ३ ॥

तस्य वृत्रस्य वधाय आर्थयन् प्रार्थयन्त सर्वेन्द्रो हन्तुं नैच्छत् । वृद्धवधात् ब्राह्मणवधाद्भीतः सन् ॥ ४ ॥

एनः पापं मार्जिम शोधयामि ॥ ५ ॥

मास्मभैः माभैषीः ॥ ६—९ ॥

तमश्वमेधेन महामखेन श्रद्धाऽन्वितोऽस्माभिरनुष्ठितेन ।
हत्वा हि सब्रह्मचराचरं त्वं न लिप्यसे किं खलनिग्रहेण ॥ ९ ॥

॥ श्रीशुक उवाच ॥

एवं (१) सञ्चोदितो विप्रैर्मरुत्वानहनद्रिपुम् ।
ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिम् ॥ १० ॥
तयेन्द्रः स्मासहत्तापं निर्वृत्तिर्नामुमाविशत् ।
ह्रीमन्तं वाच्यतां प्राप्तं सुखयन्त्यपि नो गुणाः ॥ ११ ॥
तां ददर्शानुधावन्तीं चाण्डालीमिव रूपिणीम् ।
जरया वेपमानाङ्गीं यक्ष्मग्रस्तामसृक्पटाम् ॥ १२ ॥
विकीर्य पलितान्केशांस्तिष्ठ तिष्ठेति भाषिणीम् ।
मीनगन्ध्यसुगन्धेन कुर्वतीं मार्गदूषणम् ॥ १३ ॥
नभो गतो दिशः सर्वाः सहस्राक्षो विशाम्पते ! ।
प्रागुदीचीं दिशं तूर्णं प्रविष्टो नृप! मानसम् ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वृत्रहत्याभिभूतस्येन्द्रस्य विष्णुना रक्षा कृतेतित्रयोदशेनाध्यायेन वर्णयति-वृत्रे हते इति ॥ १ ॥

स्वर्षिमिति तमिन्द्रमपृष्ट्वैव देवादयः स्वयं स्वधिष्ण्यानि प्रति जग्मुः ॥ २ ॥

येन वृत्रवधेन देवाः सुखिन आसन् हरेरिन्द्रस्य दुःखं कुतोऽभूत् ॥ ३ ॥

तस्य वृत्रस्य वधार्थमन् प्रार्थितवन्तः प्रार्थितोपि सः वृद्धब्राह्मणवधाद्भीतः सन् नैच्छत् ॥ ४ ॥

विश्वरूपवधोद्भवमेनः पापं स्त्र्यादिभिरनुगृह्णद्भिर्विभक्तं विभज्य स्वीकृतम् वृत्रहत्यां क मार्ज्मि प्रक्षालये ॥ ५ ॥

मास्म भैः भयं मा कुरु ॥ ६ ॥

जगद्वधादपि विमोक्ष्यसे किं पुनः वृत्रवधात् ॥ ७ ॥

यस्य नारायणस्य ॥ ८ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले । हे बड़े दानी हे राजन् ! वृत्रासुरके मरने पर इन्द्र के विना लोकपालों सहित तीनों लोक तत्काल ज्वर रहित और सुखितइन्द्रियोंवाले होगये ॥ १ ॥

देवता ऋषि पितृ भूत दैत्योंके पीछे जाने वाले दैत्य और ब्रह्मा महादेव इन्द्रादिक सब अपने २ गृहको जाते भये ॥ २ ॥

राजाबोले । हे मुने ! इन्द्रकी (अनिर्वृति) अर्थात् असुख के हेतुको मैं श्रवण करनेकी इच्छा करता हूं । जिससे सब देवता सुखी होगये इन्द्रको दुःख क्यों भया ॥ ३ ॥

श्रीशुकदेवजीबोले । वृत्रासुर के विक्रमसे उद्विग्न ऋषियो सहित सब देवता उसके वधार्थ इन्द्रसे याचना किये पर ब्राह्मण के वधसे भयभीत होकर इन्द्रने इच्छा नहीं की ॥ ४ ॥

इन्द्रबोले । विश्वरूपके वधसे भया जो पाप उसको अनुग्रह करके स्त्री भूमि जल और वृक्षोंने बांटलिया वृत्रकी हत्याको कहां शुद्ध करूंगा ॥ ५ ॥

श्रीशुकदेवजी बोले । ऋषियों ने ऐसा सुन महेन्द्रसे कहा-कि तुम मत डरो तुमारा मंगल होय हम तुमको अश्वमेध यज्ञ से यजन करावेंगे ॥ ६ ॥

अश्वमेध से परमपुरुष, परमात्मा, नारायण, देव का यजन करके जगत के वध से भी विमुक्त होसके हो ॥ ७ ॥

जिन हरिके कीर्तन से ब्रह्महत्या वाला, पितृघाती, गोघ्न, मातृहन्ता, गुरुहत्यारा, पापी, श्वभक्षी, वा पुक्कस जाती, ये भी सब शुद्ध हो जाते हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वृषाकपिमिन्द्रम् ॥ १० ॥

तया देवादिभिः कारितया स्मैत्यपधारणो इन्द्र एव तापमसहत् मान्यः अमुमिन्द्रं निर्वृतिर्नाविशत् ननु, धैर्यादिगुणयुक्तस्य कुतोऽनिर्वृतिरत्राह-ह्रीमन्तं लज्जावन्तं वाच्यतां निन्द्यताम् ॥११॥

यक्ष्मग्रस्तां क्षयरोगव्याप्ताम् ॥ १२ ॥

मीनस्येव गंधो यस्य स मीनगन्धिः सचासावसुश्च श्वासवायुस्तस्य गन्धेन ॥ १३ ॥

प्रागुदीचीं दिशं गतः संस्तूर्णं मानसं सरः ॥ १४ ॥

(१) सम्बोधित इति पाठान्तरम् ॥ वी०

स आवसत्पुष्करनालतन्तूनलब्धभो[1]गो यदि हाग्निदूतः ।
वर्षाणि साहस्रमलक्षितोऽन्तः स चिन्तयन्ब्रह्मवधाद्विमोक्षम् ॥ १५ ॥

तावत्त्रिणाकं नहुषः शशास विद्यातपोयोगबलानुभावः ।
स सम्पदैश्वर्यमदान्धबुद्धिर्नीतस्तिरश्चां गतिमिन्द्रपत्न्या ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स इन्द्रः सहस्रं वर्षाणि पुष्करनालस्य तन्तूनावसत् कथंभूतः न लब्धो भोगो येन सः कुतः यदस्मादिह जले वसन्नग्निदूतश्च स्वयम् अग्नेश्च स्वदूतस्य हविर्भागाप्रेतुर्जलेप्रवेशासम्भवाद्लब्धभोग इत्यर्थः अलब्धभागइति पाठान्तरे न लब्धो यज्ञभागो येन सः ॥ १५ ॥

त्रिणाकं न अकं दुःखं यस्मिन्निति नाकः पुण्यलोकः तृतीयं नाकं स्वर्गं । ननु, मनुष्यस्य कुतः स्वर्गराज्यं तत्राह विद्यादिभिरनुभावः स्वर्गपालनसामर्थ्यं यस्य सः तर्हि तस्मिन्सति कथमिन्द्रस्य पुनः स्वर्गप्राप्तिस्तत्राह स नहुषः सम्पदैश्वर्याभ्यां यो मदस्तेनान्धा बुद्धिर्यस्य स इन्द्रपत्न्या शच्या तिरश्चां गतिं सर्पयोनिं नीत उपायेन प्रापितः एवं ह्याख्यायते नहुषः किल कदाचिदिन्द्राणीमुवाच इन्द्रस्तावदहमतस्त्वं मां भजेति तया चावेदितवृत्तान्तो बृहस्पतिस्तामुवाच ब्राह्मणवाह्यशिबिकायामारुह्यागतं त्वां भजिष्यामीति ब्रूहि ततोऽसौ ब्रह्मशापात्पतिष्यतीति तया च तथोक्तो नहुषोऽगस्त्यादीन् शिबिकां वाहयामास तदा शीघ्रं सर्पसर्पेत्यगस्त्यं पदा पस्पर्श तेन कुपितेन सर्पो भवेति शप्तो महासर्पोऽजगरोऽभूदिति ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तं महामहिमशालिनमनन्तनामानं भगवन्तमस्माभिरनुष्ठितेनानुष्ठापितेन अश्वमेधाख्यमहायागेनाराध्याकथमपि विघ्नमयुक्तस्त्वं मघवन् शरीरभूतं चराचरात्मकं जगद्धत्वापि पापेन न लिप्यसे किं वक्तव्यं दुरात्मनो वृत्रस्य निग्रहेण वधप्रयुक्तेन पापेन लिप्यसे किं न लिप्यस एवेत्यर्थः ॥ ९ ॥

एवं विप्रैः सञ्चोदितः शक्रस्ततो वृत्रं जघान स च तद्वधनिमित्तेन पापेन दुःखितश्चाभूदित्याह मुनिः—एवमिति । एवं विप्रैः ऋषिभिः सञ्चोदितः प्रेरितः सम्बोधित इति पाठे सम्यग्बोधितः मरुत्वानिन्द्रो रिपुं वृत्रमहनन्नहतवान् तस्मिन्वृत्रे हते सति ब्रह्महत्या वृत्रस्य ब्राह्मणत्वाद्ब्रह्महत्येत्युक्तं वृषाकपिमिन्द्रमासन्नाद् अन्वपद्यत ॥ १० ॥

तया देवादिभिः धारितया ब्रह्महत्यया कमेत्यपध्यानयो इन्द्र एव तापमसहदसहत नान्यस्तत्र अमुं इन्द्रं निर्वृतिः सुखं नाविशदिन्द्रः सुखी नाभूत्किन्तु दुःखमेव प्रापेत्यर्थः ननु, धैर्यादिगुणयुक्तस्य कुतो न निर्वृतिस्तत्राह—ह्रीमन्तं लज्जावन्तं वाच्यतां निन्द्यतां प्राप्तं गुणा धैर्यादयो न सुखयन्ति हि हि शब्देन लोकपरिपाटिः प्रदर्श्यते ॥ ११ ॥

एवमिन्द्रस्यानिर्वृतिकारणमभिधायाथ तत्पापनिस्तारप्रकारं वक्ष्यमाणस्तत्पापनिमित्तदुःखानुभवप्रकारमाह – तामिति । ततस्तां हत्यां इन्द्रो ददर्श कथंभूतामनुसृत्य पृष्ठतो धावन्तीं चाण्डालीमिव तद्वद्वस्थितां रूपिणीम् मूर्तिभूतां जरया वेपमानानि कम्पमानानि शिरःपाण्याद्यङ्गानि यस्यास्तां यक्ष्मग्रस्तां क्षयरोगव्याप्तामसृक्पटां रजोरक्तवस्त्राम् ॥ १२ ॥

पलितान्केशान्विकीर्य क्व गच्छसि तिष्ठ तिष्ठेति भाषमाणां मीनस्य मत्स्यस्येव गन्धो यस्य स मीनगन्धिः सर्वासावसुश्च प्राणवायुः तस्य गन्धेन मार्गदूषणं कुर्वन्तीम् ॥ १३ ॥

ततः सहस्राक्षः इन्द्रः नभः सर्वा दिशश्च गतः भ्रमन् क्वापि विश्रान्तिमलभमान इत्यर्थः प्रागुदीचीम् ऐशानीं दिशं प्राप्य तत्रापि मानसं सरः प्रविष्टः ॥ १४ ॥

स इन्द्रः पुष्करनालतन्तून्मानससरोवरस्थकमलनालतंतूनावसत्सूक्ष्मरूपेणाश्रित्यावासेत्यर्थः कथम्भूतः अलब्धभोगो यज्ञियभागो येन तादृशः कुतः यद्यस्मात्स्वयमग्निदूत अग्निरेव दूतः हविर्भागप्रापको यस्य तादृशः स्वदूतस्याग्नेर्हविर्भागप्रापकस्य जले प्रवेशाभावादलब्धभाग इत्यर्थः अन्तः पद्मनालस्यान्तः अलक्षितः ब्रह्महत्ययाऽलक्षित अदृष्टः ब्रह्मवधनिमित्तात्पापान्मोक्षं मोक्षोपायं विचिन्तयन् सहस्रं वर्षाण्यवसदित्यन्वयः ॥ १५ ॥

यावदिन्द्रः पद्मनालतन्तुनावसत्तावन्नहुषो राजा विद्यातपोयोगैर्महाननुभावः इन्द्राधिपत्यप्रापकं सामर्थ्यं यस्य तादृशस्त्रिनाकं स्वर्गं शशासेन्द्रलोकाधिपत्यं कृतवानित्यर्थः अकं दुःखं न विद्यते यस्मिन्स नाकः भोगदेशः भौमपातालान्तरिक्षभेदेन त्रिविधाः सुखानुभवदेशाः तत्र तृतीयो नाकः स्वर्लोकः तर्हि तस्मिन्सति कथमिन्द्रस्य पुनः स्वर्गप्राप्तिस्तत्राह – स नहुषः सम्पदैश्वर्याभ्यां भोग्यभोगोपकरणादिसमृद्धीन्द्राधिपत्याभ्यां यो मदस्तेनान्धा विवेकशून्या बुद्धिर्मतिर्यस्य तादृशः इन्द्रपत्न्या शच्या हेतुभूतया तिरश्चां गतिं सर्पयोनिं नीतः प्रापितः अत्रेदमाख्यानमवगन्तव्यं स्वर्गाधिपत्यं कुर्वन्नहुषः कदाचिदिन्द्राणीमुवाच इन्द्रस्तावदहमतस्त्वं मां भजेति । ततस्तयावेदितवृत्तान्तो बृहस्पतिस्तामुवाच इन्द्रवद्यदि ब्राह्मणशिबिकामारुह्य मद्गृहमागच्छसि चेत्तर्हि त्वां भजिष्यामीति ब्रूहि ततोऽसौ ब्रह्मशापात्पतिष्यतीति । ततः सा तं तथैवोवाच ततः स नहुषोऽगस्त्यादिऋषीन् बलाद्दासानिव स्वेनारूढां शिबिकां तैर्वाहयामास तदा स शीघ्रं सर्पसर्पेत्यगस्त्यं पदा पस्पर्श तेन स सर्पो भवेति शप्तो नहुषो महासर्पोऽजगरोऽभूदिति ॥ १६ ॥

---

(१) भाग इति पाठः वीर० ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सब्रह्मेति चराचरात्पृथग्ग्रहणं ब्रह्महननदोषाधिक्यसूचनाय ॥ ९ ॥

वृषाकपिरिन्द्रः "वृषाकपिर्हरे शक्रे हरितकपौ जनार्दने" इत्यभिधानम् ॥ १० ॥

स्महेत्येतौ ब्रह्मवधस्य लोके जुगुप्सितत्वेनस्मृतावपि नात्र तथा इतीममर्थं सूचयतः सर्वस्य सुखस्य हेतुत्वात् तर्हि किमर्थमस्य निर्वृतिर्नाभूत् सुखहेतूनां शौर्यादिगुणानामुन्मीलितत्वाच्छत्रुहननेनेति तत्राह—ह्रीमन्तमिति । यद्यपि शत्रुवधसूचकशौर्यादिगुणाः सुखहेतवस्तथापि ते ब्रह्महत्यया तप्तस्य नो सुखयन्ति कुतः लज्जाकरत्वात् इन्द्रादिदेवानां तदानीन्तनं कर्म प्रारब्धकर्मणा प्राप्तदुःखस्य सूचकम् "प्रारब्धकर्मणैवैषांक्लृप्त दुःखस्यसूचकम् । तदानीन्तनकर्मस्माद् ब्रणाहेतुर्यथा रणः ॥ देवादीनां स्थितप्रज्ञभावान्नैवान्यथा भवेत् । प्रारब्धमपि तु कापि किञ्चिद्विघटितं भवेत्" इति ॥ ११ ॥

असृक्पटां रक्तरञ्जितपटां रजस्वलामिव ॥ १२ ॥

मीनगन्धिनः चीणमीनधारिणश्चण्डाला दाशादयो ये तेषां यो दुर्गन्धः तादृशेनासुगन्धेनासुरभिणा ॥ १३ ॥

तत्तः सहस्राक्षस्तां परिहर्तुं सर्वा दिशो गत्वा विहायसा नभो गतः समर्थयेक्षया प्रागुदीचीं दिशं दृष्ट्वा तां प्रविष्टो मानसं नाम सरः प्रापेत्यन्वयः ॥ १४ ॥

तन्तूनावसदित्युपान्वध्याङ्वसइति सप्तम्यर्थे द्वितीया अग्निर्दूतो यस्य सोऽग्निदूतः यावदिन्द्रः सरसि पुष्करनालतन्तुष्ववसत्तावन्नहुषस्त्रिणाकं स्वर्गं भूम्यन्तरिक्षं स्वर्गस्थानं वा शशासेत्यन्वयः अत एव त्रैलोक्यपालनलब्धसर्वैश्वर्यभोगरहितः ब्रह्मवधादुत्पन्नदोषमोक्षं तावच्च नाकमिति केचित्पठन्ति अत्र चशब्द एवार्थे नहुष इत्यनेन सम्बध्यते अन्ययोगव्यवच्छेदार्थः तिरश्चाङ्गतिम् आजगरीं स्थितिम् ॥ १५ ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

एवं तस्यात्मनि पापस्य नात्युपपत्तावपि साभिमाना तदधिष्ठात्रीतु तमभिभवितुमुद्यतेत्याह-ब्रह्महत्येति ॥ १० ॥

ततश्च तया सन्निहितया हेतुभूतया यस्तापस्तदपीन्द्रोऽसहत् तेन पराभवं न प्राप्तवान् । तदेवमपि निर्वृतिस्त्वमुं नाविशत् । तत्र हेतुः ह्रीमन्तमिति ॥ ११—१३ ॥

ततस्तत् सङ्कताञ्चाय नभ आकाशं गतः । सर्वाश्च दिशोगतः । तूर्णं तदनुद्रव विदूरं यथास्यात् ॥ १४ ॥

अग्निदूतस्तत् सहायोऽयं । तस्मात् जले न तिष्ठेदित्यलक्षितस्तया सर्वैरन्यैश्च अतस्तत्रस्तितयासम्भावनया तमुद्दिश्य हविर्भागादानादलब्धभोगश्चेत्यर्थः ब्रह्मवधात्तदधिष्ठाऽयास्तस्याः सकाशाद्विमोक्षं तदुपायं श्रीभगवन्तमित्यर्थः । अतस्मरध्यानेति वक्ष्यमाणात् ॥ १५ ॥

नहुषः शशासेति वृत्रवधवृत्तं सप्तममन्वन्तरगतमिति लक्ष्यते । तथापि षष्ठमन्वन्तरहतानां नमुच्यादीनां कीर्त्तनं तत्प्रतिनिधिरूपत्वेन तत्रात्मना केषाञ्चिदपेक्षयेति ज्ञेयम् ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तस्मिन् वृत्रे हते सति वृषाकपिमिन्द्रम् । अत्र प्रायश्चित्तबलेन पापाचरणात् पूर्वतोऽपीयमतिप्रबला दुःखभोगेन बिना केवलेन प्रायश्चित्तेन न शाम्येदित्यत एव ते तदानीमश्वमेधेन तं नैव याजयामासुरिति ज्ञेयम् । ते ऋष्यादयोऽपि प्रायश्चित्तबलेन पापप्रवर्त्तनाज्जन्यस्यापराधस्य फलं चिरकालव्यापिनीं दुरवस्थामिन्द्रपदारूढेन नहुषेण तदानीमेव प्रापिता इति च ज्ञेयम् ॥ १० ॥

असहत् असहत निर्वृतिरानन्दः अमुं इन्द्रं । ननु, धैर्यादिगुणयुक्तस्य तस्य कुतोऽनिर्वृतिस्तत्राह—ह्रीमन्तं जनं वाच्यतां । ब्रह्मघातीति प्रवादम् ॥ ११ ॥

यक्ष्मा महारोगः ॥ १२ ॥

मीनस्येव गन्धो यस्य स मीनगन्धिः स चासावसुः श्वासवायुस्तस्य गन्धेन ॥ १३ ॥

प्रथमं नभ आकाशं गतः तत्रापि तामनुधावन्तीं दृष्ट्वा सर्वा दिशो गतः । तत्र तत्रापि तथा दृष्ट्वा प्रागुदीचीम् ऐशानीं गतः सन् तत्र तूर्णं मानसं सरः प्रविष्टः ॥ १४ ॥

पुष्करस्य कमलस्य नाले ये तन्तवः तत्र अत्यलक्षितमित्यर्थः अलब्धभोगः यद्यतोऽग्निदूतः अग्नेः स्वदूतस्य हविर्भागानेतुर्जले प्रवेशासम्भवादिति भावः । यद्यप्यग्निना जलं न दुष्प्रवेशं तदन्तः स्थिताय वरुणायापि हविर्वहनात् तदपि तदीयं जलं दुष्प्रवेशमेव रुद्रानुचरैः रक्ष्यमाणत्वात् अत एव सर्वत्राभिगामिनी ब्रह्महत्यापि तत्र गन्तुं न शशाकेति ज्ञेयं । साहस्रं सहस्रवर्षाणि व्याप्य अलक्षितः सर्वैरदृष्टः ॥ १५ ॥

त्रिनाकं तृतीयं नाकं स्वर्गं । ननु, मनुष्यस्य कुतः स्वर्गराज्यं तत्राह — विद्यादिभिरनुभावः सर्वतेजोहरणसामर्थ्यं स्वर्गपालनसामर्थ्यञ्च यस्य सः तस्मिन् सति पुनरिन्द्रस्य कुतः स्वर्गप्राप्तिस्तत्राह—स नहुषः सम्पदैश्वर्याभ्यां यो मदस्तेनान्धा बुद्धिर्यस्य स इन्द्रपत्न्या तिरश्चाङ्गतिं सर्पयोनिं नीतः उपायेन प्रापितः । एवं ह्युपाख्यायते नहुषः कदाचिदिन्द्राणीमुवाच इन्द्रस्तावदहमतस्त्वं मां भजेति । तयाचावेदितवृत्तान्तो बृहस्पतिस्तामुवाच ब्राह्मणवाह्यशिबिकामारुह्यागतं त्वामहं भजिष्यामीति ब्रूहि । ततोऽसौ ब्रह्मशापात्पातिष्यतीति । तयाच तथैवोक्तः नहुषः अगस्त्यादीन् शिबिकां वाहयामास तदाच शीघ्रं सर्पसर्पेत्यगस्त्यं पदा पस्पर्श । तेन च कुपितेन शप्तोऽजगरोबभूवेति ॥ १६ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

तं नारायणम् ॥ ९ ॥

तस्मिन् वृत्रे हते याजकैर्ब्राह्मणैर्यस्त्पादितः तस्य वृत्रस्य ब्राह्मणत्वात्तद्वधजा ब्रह्महत्या वृषाकपिमिन्द्रमाससार अन्ववर्तत ॥१०॥

इन्द्रस्तया ब्रह्महत्यया तापमसहत्स्म अतोऽमुमिन्द्रं निर्वृतिर्नाविशत् स सुखितो नैवाभूत् । ननु, बहुगुणयुक्त एकेन दोषेण कुतः सुखितोनाऽभूत्तत्राह—ह्रीमन्तं वाच्यतां निन्द्यतां प्राप्तं गुणा न सुखयन्ति ॥ ११ ॥

ततो गतो ब्रह्मगिरोपहूत ऋतम्भरध्याननिवारिताघः ।
पापस्तु दिग्देवतया हतौजास्तं नाभ्यभूदवितं विष्णुपत्न्या ॥ १७ ॥
तं च ब्रह्मर्षयोऽभ्येत्य हयमेधेन भारत ! ।
यथावद्दीक्षयाञ्चक्रुः पुरुषाराधनेन ह ॥ १८ ॥
अथेज्यमाने पुरुषे सर्व (१) देवमयात्मनि ।
अश्वमेधे महेन्द्रेण वितते ब्रह्मवादिभिः ॥ १९ ॥
स वै त्वाष्ट्रवधो भूयानपि पापचयो नृप ! ।
नीतस्तेनैव शून्याय नीहार इव भानुना ॥ २० ॥
स वाजिमेधेन यथोदितेन वितायमानेन मरीचिमिश्रैः ।
इष्ट्वाऽधियज्ञं पुरुषं पुराणमिन्द्रो महानास विधूतपापः ॥ २१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यक्ष्मणा क्षयरोगेण ग्रस्ताम् असृक्पटां रक्तवसनाम् ॥१२॥ पलितान् शुक्लान् मीनस्येव गन्धो यस्य स मीनगन्धिः सचासावसुर्निश्वासवातश्च तस्य गन्धेन मार्गदूषणं कुर्वन्तीम् ॥१३॥ तद्दर्शनानन्तरं नभः सर्वा दिशश्च गतः प्रागुदीचीं गतस्तत्रापि मानसं सरः प्रविष्टः ॥ १४ ॥ तत्र तु स इन्द्रः पुष्करनालतन्तून् सहस्रमेव साहस्रं वर्षाणि आवसत् सूक्ष्मरूपेण तत्तन्तून् आश्रित्योवास कथम्भूतः अलक्षितः अग्निदूतः अग्निसहायस्तथापि अलब्धभोगः विष्णुध्यानोपयोगितपोनिष्ठत्वात्त्यक्तभोग इत्यर्थः यद्यतो ब्रह्मवधान्मोक्षं स्यात्समृतम्भरश्च चिन्तयन् ध्यायन् ॥ १५ ॥ यावदिन्द्रः कं सुखं तद्विपरीतमकं दुःखं नास्त्यकमत्रेति नाकः तत्राडादिपञ्चलोपाभावस्तृतीयो नाकस्त्रिनाकस्तं त्रिनाकं नाभुनक् । तावद्विद्यादिभिरनुभावः स्वर्गपालनसामर्थ्यं यस्य स नहुषः शशास तदा सम्पदैश्वर्याभ्यां यो मद अहमेवेन्द्र इति गर्वस्तेनान्धो लुप्तविवेका इन्द्राणी मां भजतु इत्येवं दोषवती बुद्धिर्यस्य स इन्द्रपत्न्या तन्नाशोपायज्ञयाऽऽगस्त्यशापद्वारा तिरश्चाकृतिं सर्पभावं नीतः ॥ १६ ॥

भाषाटीका।

उस परमात्माको हमलोगों से अनुष्ठित महामख अश्वमेधसे यजन करके ब्राह्मणों सहित चराचर जगत कोभी मार कर पापसे लिप्त न होगे, फिर खलके निग्रहसे तो कहना क्या ॥ ९ ॥

श्रीशुकदेवजी बोले ॥ इस प्रकार ब्राह्मणों के प्रेरणासे इन्द्रने वृत्रको मारा ॥ इनके मरते ही ब्रह्महत्या भी इन्द्रको प्राप्त भई ॥ १० ॥

उस हत्यासे इन्द्रने ताप सहा सुख इन्द्रको नहीं प्राप्त भया क्योंकि लज्जावान जो निन्द्यता को प्राप्त हो जाय तो उसके गुण भी उसको सुख नहीं देते ॥ ११ ॥

जरावस्थासे कम्पित गात्र वाली, क्षयरोगसे ग्रस्त, रुधिर लिप्त वस्त्रवाली, सफेद केशोंको छोडकर रूपवती चाण्डालिनी के सदृश इन्द्रके पीछे दौडती हुई खडारह २ ऐसे कहने वाली, मीनके गंध सदृश दुर्गन्धसे मार्गका दूषण करने वाली, उस हत्याको इन्द्रने देखा ॥ १२ ॥ १३ ॥

फिर इन्द्र आकाश और सर्व दिशाओं में प्राप्तहोकर अतिशीघ्र (प्रागुदीची) पूर्वोत्तर दिशामें जाकर मानससरमें प्रविष्ट हुआ ॥ १४ ॥

वह इन्द्र सहस्र वर्ष तक कमल की नाली के भीतर तन्तूनमें वास करता भया वहां इन्द्रको अपना भाग नहीं मिलता रहा क्योंकि इनका भाग लेजाने वाला दूत तो अग्नि है उसका जलमें प्रवेश कहां ? इसप्रकार अलक्षित हो कर रहा और सदा यही चिन्ता रही कि इस ब्रह्म बधसे कैसे छूटेंगे ॥ १५ ॥

तब तक अपने विद्या तप योग बलके प्रभावसे नहुष राजाने स्वर्ग का राज्य किया । राजा जब सम्पत ऐश्वर्य से मदान्ध बुद्धि हो गया तब इन्द्रकी पत्नीने तिर्यग् गति को अर्थात् सर्पपना को प्राप्त किया ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

तत इन्द्रः स्वर्गं गतः प्राप्तः कथम्भूतः ब्रह्मगिरा ब्राह्मणवाक्येनोपहूतः सन् ऋतम्भरः सत्यपालको हरिस्तस्य ध्यानेन निवारितमघं येन प्रागपि तु पापो ब्रह्मवधस्तमिन्द्रं नाभ्यभूत्तस्याभिभवं नाकरोत् कुतः दिग्देवतया प्रागुदीच्यां दिशि स्थितया श्रीरुद्रेण अवितं रक्षितं सन्तम् ॥ १७ ॥

पुरुषस्य हरेराराधनं यस्मिंस्तेन ॥ १८ ॥

सर्ववेदमयात्मनीति वा पाठः ब्रह्मवादिभिर्विततेऽनुष्ठितेऽश्वमेधे महेन्द्रेणेज्यमाने पुरुषे सति ॥ १९ ॥

तेनैव पुरुषेणैव शून्याय नीतः नाशित इत्यर्थः ॥ २० ॥

(१) भूत इति, विजय० पाठान्तरम् । वेद इति च० श्रीधर पाठान्तरम् ।

इदं महाख्यानमशेषपाप्मनां प्रक्षालनं तीर्थपदानुकीर्तनम् ।
भक्त्युच्छ्रयं भक्तजनानुवर्णनं महेन्द्रमोक्षं विजयं मरुत्वतः ॥ २२ ॥
पठेयुराख्यानमिदं सदा बुधाः शृण्वन्त्यथो पर्वणि पर्वणीन्द्रियम् ।
धन्यं यशस्यं निखिलाघमोचनं रिपुञ्जयं स्वस्त्ययनं तथाऽऽयुषम् ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां इन्द्रविजयोनाम
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अधिकृता यज्ञा येन तम् ॥ २१ ॥

पाठादिविधातुमाख्यानं स्तौति–इदमिति । प्रक्षाल्यतेऽनेनेति प्रक्षालनं तीर्थपदस्यानुकीर्तनं यस्मिन् भक्तेरुच्छ्रयो यस्मिन् भक्तजनानामनुवर्णनं यस्मिन् महेन्द्रस्य मोक्षो यस्मिन् मरुत्वतो विशेषेण जयो यस्मिन् ॥ २२ ॥

इन्द्रियं तत्पाटवकरम् इन्द्रसम्बन्धीति वा आयुषमायुष्यम् ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत इन्द्रः स्वर्गं गतः प्राप्तः कथम्भूतः ब्रह्मगिरा ब्राह्मणवाक्येन उपहूतः सन् ऋतम्भरः सत्यस्य भर्त्ता श्रीमन्नारायणः तस्य ध्यानेन निवारितमघं ब्रह्महत्यारूपं यस्य तादृशः तमागच्छन्तं दिग्देवतया प्रागुदक्स्थितमानससरोवरस्थपद्मस्थया देवतया विष्णुपत्न्या श्रीमहालक्ष्म्याऽवितं रक्षितं पद्मतन्तुषु वसन्तं इन्द्रमत एव हतमोजो बलं यस्य तादृशः पापो ब्रह्मवधः नाक्रमद्भूतपद्मस्था लक्ष्मीर्भगवद्ध्यानपरत्वादिन्द्रं पापाद्ररक्षेत्यर्थः ॥ १७ ॥

अथ हत्यानिस्तारप्रकारमाह-तमित्यादिनाविधूतपाप इत्यन्तेन। तमागतम् इन्द्रमृषयोऽभ्येत्यागत्य हे भारत ! पुरुषाराधानेन परमपुरुषाराधनरूपेण हयमेधेन यथाविधि दीक्षयाञ्चक्रुः हयमेधं कर्तुन्दीक्षितं कृतवन्त इत्यर्थः हेतिहर्षखेदेन्वाहो इन्द्रस्यैवंविधावस्थेति ॥ १८ ॥

अथ ब्रह्मवादिभिर्वेदवादिभि ऋषिभिराविज्यकृतैर्वितते विस्तृते यथावत् क्रियमाणेऽश्वमेधे इन्द्रेण यजमानेन सर्वदेवतानामन्तरात्मभूते सर्वस्यप्रशासितरि परमपुरुषे इज्यमाने आराध्यमाने सति ॥ १९ ॥

भूयानपि स त्वाष्ट्रवधः वृत्रवधनिमित्तः पापः हे परन्तप ! तेनैवाश्वमेधेन शून्याय नीतः प्रापितः शून्यतां प्राप्त इत्यर्थः यथा भानुना सूर्येण नीहारः शून्यतां प्राप्यते तद्वत् ॥ २० ॥

मरीचिमिश्रैः मरीचिसहितैः तत्प्रभृतिभिरित्यर्थः वितायमानेन अनुष्ठीयमानेन यथोक्तेन हयमेधेनाऽधियज्ञं यज्ञेषु प्रधानतया वर्त्तमानं पुराणं पुरुषं इष्ट्वाराध्य स वै इन्द्रः विधूतं निरस्तं वृत्रहत्या रूपं येन तादृशः महाविभ्राजितपक्षः अवाप्तराज्यसम्पश्चासीत् ॥ २१ ॥

उक्तं वृत्रवधाख्यानपठनश्रवणादिफलं वदन् तद्विशिनष्टि–इदमिति द्वाभ्यां । महेन्द्रस्य मोक्षः ब्रह्मवधनिमित्तात्पापान्मोक्षप्रतिपादनं यस्मिन्मरुत्वत इन्द्रस्य विशेषेण जयः तत्प्रतिपादनं यस्मिन् तादृशं तदिदं महाख्यानं गुह्यवत्तरं तदेवाह अशेषाणां पापानां प्रक्षालनं शोधकं निवर्त्तकं तत्र हेतुस्तीर्थपदस्यानुकीर्त्तनं यस्मिंस्तादृशं किञ्च भक्त्युच्छ्रयं भगवद्भक्तेरुच्छ्रयोऽभिवृद्धिर्यस्मात्तथाभूतं तत्र हेतुः भक्तजनानां भगवद्भक्तजनानामनुवर्णनं यस्मिन् तत् ॥ २२ ॥

किञ्चेन्द्रियं इन्द्रस्य लिङ्गमिन्द्रियम् इन्द्रः प्रत्यगात्मा तस्य लिङ्गं ज्ञापकं तद्याथात्म्यप्रतिपादनयुक्तत्वादस्येति भावः यद्वा इन्द्रस्येदमिन्द्रियं इन्द्रियमिन्द्रलिङ्गमिति सूत्रे इति करणादर्थान्तरेऽपि तन्निपातनाभ्युपगमात् यद्वा इन्द्रियशब्दस्तद्बलसम्पादके उपचाराद्वर्त्तते इन्द्रियवृद्धिकरमित्यर्थः यद्वा इन्द्रः परमेश्वरः इदि परमैश्वर्ये इति धातुपाठात् तेन जुष्टं प्रीतिविषयत्वेन परिगृहीतं श्रवणादिद्वारा भगवत्प्रीत्यापादकमित्यर्थः धन्यं धनप्राप्तिसाधनं यशस्करं निखिलानामघानां मोचनं यस्मात्तथाऽशेषपाप्मनां प्रक्षालन मित्यनेन पापविनाशकत्वमुक्तम् अखिलाघमोचनमित्यनेन तु पापाश्लेषकरत्वमुक्तमित्यतो न पौनरुक्त्यं स्वस्त्ययनं मङ्गलावहं तथा आयुष्करं सर्वाण्येतानि फलानि अस्याख्यानस्य श्रवणपठनादिना भवन्ति न स्वरूपेणात्यतोवश्यमुक्तिफलार्थिभिरेतदाख्यानपठनादिकं कार्यमित्युक्तं पठेयुरित्यर्द्धेन यत इदमुक्तफलमथोऽतो बुधाः सदा पठेयुः पर्वणि पर्वणि प्रतिपर्व श्रृण्वन्तु शृणुयुरित्यर्थः ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उपहूत ऋतम्भरेति ब्रह्मगिरा विरिञ्चवाक्येनोपहूतः बृहस्पतिवाक्येन वा अग्न्याख्यदूतमुखेनेत्यर्थः ततः मानससरसः ऋतम्भरस्य सत्यपालकस्य नृसिंहस्य ध्यानेन निवारितमंहो येन स तथा सर्वगतः श्रीनारायण इति प्रल्हादोक्तवचनं सत्यं कर्त्तुं स्तम्भादाविरभूदिति यद्दतो हरिर्ऋतम्भर इति वेदवादिभिरुपहूतत्वाद्धरेस्तन्नाम नन्विदानीमृतम्भरध्यानेन निरस्तं गच्छेत् पूर्वं तेनाभिभूत इन्द्रः किं तत्राह—पापश्चेति । पापो ब्रह्महत्यालक्षणो अविद्य तमिन्द्रं नाऽभूदभिभूतं नाकरोदित्यन्वयः अत्र हेतुगर्भविशेषणमाह—दिग्देवतयेति । इन्द्रहितकारिण्या दिग्देवतया हतमोजो बलं यस्य इन्द्रमन्विष्य सर्वदिक्षु भ्रमतः स तथा कस्मात् गङ्गाजलपरिप्लुतमानससरसि प्रविष्टत्वेन विष्णुपद्याऽवितं रक्षितं तस्माच्चेति ॥ १७ ॥

ऋतम्भरध्यानादिनाभिभवाभावे तदभिभवः स्यात्स्वरूपतो नाशाभावादिति तत्राह—तमिति । भगवद्विषयेणाश्वमेधेन स्वरूपनाशश्च कथं स्यादित्यत उक्तं पुरुषेति । अत्र पुरुषशब्देन विष्णुरुच्यते "सहस्रशीर्षा पुरुष" इति श्रुतेः- इत्यनेन श्रीहरिमाहात्म्यख्यानपूर्वकं तत्करणाभावेन तत्फलं स्यादिति विपक्षे बाधकं सूचयति "अहं हि सर्वयज्ञानां भोक्ता च" इति स्मृतेः ॥ १८ ॥

यत एवं साङ्गो यज्ञः अथ तस्मान्महानपि त्वाष्ट्रवधस्तेन यज्ञेन शून्याय नीत एव सर्वात्मना नष्टोभूत्क्रियाया विशिष्टत्वादित्यन्वयः कथं विशिष्टत्वमित्यतस्तात्पर्योक्तमेव विशिनष्टि—इज्यमान इति । ब्रह्मवादिभिर्वितते विस्तृते अश्वमेधे यज्ञे इन्द्रेण सर्वभूतानां प्रधानाश्वान्तर्यामी च सर्वभूतमयात्मा तस्मिन्यज्ञपुरुषे इज्यमाने । सर्वदेवमयात्मनीति पाठे स एवार्थः वा इत्यनेन "ज्ञानाग्निः सर्वकर्माणि" इति वचनाद्भगवतः ज्ञानेन सर्वात्मना पापस्य नाशेऽप्यश्वमेधेनेन्द्रस्य महत्त्वातिशयो भवतीति सूचयति ॥ १९—२० ॥

तत्कुतोऽवगम्यत इत्यत्राह—स वाजीति । मरीचिमिश्रैर्मरीचिमुख्यैः । ज्ञानाग्निधूतपापोपि इष्ट्वा महानासेत्यर्थः ॥ २१ ॥

नेदमिन्द्रेण स्वार्थतयाऽनुष्ठितं किं तु लोकोपकारकत्वेन । अतोस्येन्द्रस्य पापं नष्टं तच्चरितस्य श्रवणादिना सर्वाभीष्टानि सिद्ध्यन्तीति । तत्स्तौति—इदमिति । तीर्थपदस्य हरेरनुकीर्तनं यस्मिंस्तत्तथा भक्तेरुच्छ्रयो यस्मात्तत्तथा भक्तजनस्यानुवर्णनं यस्मिन् तत्तथा महेन्द्रस्य पापन्मोक्षो यत्र तत्तथा मरुत्वतो विशिष्टजयो यस्मिंस्तत्तथा ॥ २२ ॥

इन्द्रियमिन्द्रियाणां शक्तिप्रदं किं विषयमाख्यानमित्यतो इन्द्रियं इन्द्रसम्बन्धि वेत्युक्तम् ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पापस्तदधिष्ठातृरूपस्तु तद्दिग्देवताहतौजाः न पुनस्तदनुग्रहा समर्थो बभूव । तत्र हेतुः । विष्णुः पतिरभीष्टदेवो यस्या ईशानरूपायास्ताहत्यस्येति । कृत भगवदाश्रयोऽयं कथमनेनाभिभाव्येतेतिभावः ॥ १७ ॥

ततो लोकापवादावशेषो यस्तत्पाप प्रचारः सोऽपिब्रह्मर्षिभिर्नाशित इत्याह ते चेति त्रिभिः ॥ १८ ॥

तत्र यथेति युग्मकम् ॥ १९—२३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भस्य
त्रयोदशोऽध्याय ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ब्रह्मणो ब्राह्मणानाञ्चगिरा त्वामश्वमेधेन याजयिष्याम इति वाक्येनोपहूतः सन् ततोमानसात् सरसः सकाशात् स्वर्गं गतः ऋतम्भरः सत्यपालको विष्णुः । अघं प्रायश्चित्तबलेन पापाचरणलक्षणोऽपराधः । पापः ब्रह्महत्या लक्षणं पापं पुंस्त्वमार्षं ईशानदिग्देवतया श्रीरुद्रेण विष्णुपत्न्या मानस सरसः कमलवनस्थितया लक्ष्म्या ॥ १७—२१ ॥

भक्त्युच्छ्रयं भक्त्युत्कर्षयुक्तं । मरुत्वत इन्द्रस्य विशेषेण जयो यत्र तत् इन्द्रियं इन्द्रियपाटवकरं आयुषमायुष्करम् ॥ २२—२३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठे त्रयोदशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विष्णुपत्न्या दिग्देवतया विष्णुभक्तेन दिक्पालेन श्रीरुद्रेणावितं तमिन्द्रं हतौजाः सन् पापो नाऽभ्यभूत् ध्यानानर्हं न कृतवान् ततस्तदनन्तरम् ऋतम्भरस्य विष्णोर्ध्यानेन निवारितमघं ब्रह्मवधरूपं पापं येन सः ब्रह्मगिरा ब्राह्मणवाक्येन अभिप्रापितेनोपहूतो गतः स्वर्गं प्राप्तः ॥ १७ ॥

एवं विष्णुध्यानेन निष्पापोपीन्द्रः कर्मानुष्ठानेन प्रत्यक्षप्रायश्चित्तेन लोकसंग्रहार्थं मुनिभिर्निष्पापः कृत इत्याशयेनाह—तमित्यादि । पुरुषस्य विष्णोराराधनं यस्मिन् तेन ॥ १८ ॥

सर्वदेवमय आत्मा यस्य तस्मिन् सर्वदेवान्तर्यामिणीत्यर्थः ॥ १९ ॥

त्वाष्ट्रवधः अपि अन्योपि भूयान् पापचयः तेनैव पुरुषेणैव शून्याय नीतः ॥ २० ॥

अधियज्ञं यज्ञेषु भोक्तृतया वरत्वेन च वर्तमानम् ॥ २१ ॥

प्रक्षाल्यतेऽनेनेति प्रक्षालनं तीर्थपदस्य हरेरनुकीर्तनं यस्मिन् भक्तेरुच्छ्रयो यस्मिन् भक्तजनानामनुवर्णनं यस्मिन् महेन्द्रस्य मोक्षो यस्मिन् मरुत्वतो विशेषेण जयो यस्मिन् एवं भूतमिदं महाख्यानम् ॥ २२ ॥

बुधाः सदा पठेयुः शृण्वन्ति शृण्वन्तु अथो नित्यमवकाशाभावे पर्वणि पर्वणि पठेयुः शृण्वंतु च कथंभूतमिन्द्रियमिन्द्रसम्बन्धि इन्द्रपोषणविषयमित्यर्थः आयुषमायुष्यम् ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
त्रयोदशोध्यायार्थप्रकाशः ॥ १३ ॥

भाषा टीका ।

पश्चात् हरि ध्यान से निवृत्त पापवाला इन्द्र ब्राह्मणा वाक्यसे स्वर्गको गया । ब्रह्मवध का पाप तो श्रीरुद्रकी कृपा से नष्ट पराक्रम वाला रहा । इन्द्रका पराभव न करसका क्योंकि इन्द्रकी रक्षा श्रीलक्ष्मीजीने करी रही ॥ १७ ॥

हे भारत ! ब्रह्मर्षि लोग इन्द्रके पास आकर इन्द्रको भगवदाराधन रूप अश्वमेधकी दीक्षा कराते भये ॥ १८ ॥

तदनन्तर ब्रह्मवादियों ने अश्वमेधका विस्तार किया । इन्द्रको सर्वदेवमय परम पुरुष श्रीनारायणका यजन करने से हे राजन् ! वह वृत्र का वध बडा भारी पाप का ढेर भी रहा तौभी उसी यजनसे जैसे सूर्यसे कुहर नष्ट होजावै तैसे नष्ट होगया ॥ १९ ॥ २० ॥

इस प्रकार मरीचि आदि महर्षियोंके कराये हुये अश्वमेध यज्ञसे अधियज्ञ पुराण पुरुष श्रीनारायणका यजन करके इन्द्र विगत पाप वाला होगया ॥ २१ ॥

यह महाख्यान संपूर्ण पापों का प्रक्षालन करने वाला है इसमें तीर्थपाद श्रीहरिका कीर्तन है भक्तिका उल्लास है भक्तजनों का वर्णन है इन्द्रके दुःख का मोक्ष तथा इन्द्रका विजय है ॥ २२ ॥

जो बुधजन इस आख्यान को सदा पर्व२ में पढेंगे सुनेंगे उनको धन यश स्वस्ति आयुका देने वाला है तथा उनके पापों को हटाने वाला है और शत्रुओं को जिताने वाला है ॥ २३ ॥

इति श्रीमद्भागवत षष्ठस्कन्ध

की भाषाटीकामें त्रयोदश अध्याय

समाप्त ॥ १३ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे त्रयोदशोऽध्यायः समाप्तः ॥ १३ ॥

——○:*:○——

॥ चतुर्दशोऽध्यायः ॥

परीक्षिदुवाच ।

रजस्तमःस्वभावस्य ब्रह्मन्वृत्रस्य पाप्मनः ।
नारायणे भगवति कथमासीद्दृढा (१) मतिः ॥ १ ॥
देवानां शुद्धसत्त्वानामृषीणां चामलात्मनाम् ।
भक्तिर्मुकुन्दचरणे न प्रायेणोपजायते ॥ २ ॥
रजोभिः समसङ्ख्याताः पार्थिवैरिह जन्तवः ।
तेषां ये केचनेहन्ते श्रेयो वै मनुजादयः ॥ ३ ॥
प्रायो मुमुक्षवस्तेषां केचनैव द्विजोत्तमाः ।
मुमुक्षूणां सहस्रेषु कश्चिन्मुच्येत सिध्यति ॥ ४ ॥
मुक्तानामपि सिद्धानां नारायणपरायणः ।
सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ! ॥ ५ ॥
वृत्रस्तु स कथं पापः सर्वलोकोपतापनः ।
इत्थं दृढमतिः कृष्ण आसीत्सङ्ग्राम उल्वणे ॥ ६ ॥
अत्र नः संशयो भूयान् श्रोतुं कौतूहलं प्रभो ! ।
यः पौरुषेण समरे सहस्राक्षमतोषयत् ॥ ७ ॥

सूत उवाच ।

परीक्षितोऽथ संप्रश्नं भगवान्बादरायणिः ।
निशम्य श्रद्दधानस्य प्रतिनन्द्यवचोऽब्रवीत् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वृत्रस्य ज्ञानभक्त्यादि श्रुत्वा पृष्टः परीक्षिता ।
हेतुमाह चतुर्भिस्तत्प्राग्जन्मचरितोक्तिभिः ॥ १ ॥
चतुर्दशे तु सहसा कृच्छ्रलब्धे सुते मृते ।
चित्रकेतोरतिस्नेहादतिशोको निरूप्यते ॥ २ ॥

रजश्च तमश्च स्वभावो यस्य ॥ १ ॥ २ ॥

भक्तेर्दुर्लभत्वं प्रपञ्चयति-रजोभिरिति त्रिभिः । पार्थिवै रजोभिः परमाणुभिः समाः सङ्ख्याताः अनन्ता इत्यर्थः जन्तवो जीवाः तेषां मध्ये ये केचन कतिपये श्रेयो धर्ममीहन्ते कुर्वन्ति ॥ ३ ॥

मुच्येत गृहादिसङ्गाद्विमुच्यते सिध्यति तत्त्वं जानाति ॥ ४ ॥ ५ ॥ ६ ॥

न चेन्द्रभिया कृष्णं शरणं गत इत्याह—यः पौरुषेणेति ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

“अहं समाधाय मनो यथाह सङ्कर्षणस्तच्चरणारविन्दे” इत्यनेन वृत्रवाक्येन तस्य सङ्कर्षणोपदेशावगतस्वात्मपरमात्मादियाथात्म्यवत्त्वमुक्तं तदेव विस्तरेण शुश्रूषुः पृच्छति राजा—रज-

---

(१) दृढेति पाठान्तरम् ॥ विज०

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्यादिना सहस्राक्षमतोषयदित्यन्तेन । हे ब्रह्मन् ! रजश्च तमश्च स्वभावो यस्यात एव पाप्मनः पापकारिणः आसुरत्वादिति भावः भगवति नारायणे दृढा निश्चला सिद्धिपर्यन्ता मतिर्भक्तिः हे महामुने ! कथमासीत्तदुपदेशोऽप्यासुरस्वभावस्य सिद्धिपर्यन्ता भगवद्भक्तिर्दुर्लभेति भावः ॥ १ ॥

भक्तेर्दौर्लभ्यमेव प्रपञ्चयति—शुद्धसत्वानां केवलसत्वप्रचुराणां देवानां तादृशाममलचित्तानामृषीणामेव प्रायशो मुकुन्दचरणे भक्तिर्नजायते तेषामपि दुर्लभा कथमस्य सञ्जातेति भावः ॥२॥

"मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानांकश्चिन्मां वेत्ति तत्वतः" ॥

इत्युक्तरीत्या तावत्पृथिव्या रजोभीरेणुभिः सह समसंख्याकाः जन्तवः तद्वदसंख्याकाः जन्तवः तेषां जन्तूनां ये केचन मनुष्यादय एव शास्त्रोक्तधर्माधिकारिणस्तावन्मनुष्यादिजन्म दुर्लभमेवेति भावः ॥ ३ ॥

तेषामपि केचित्प्रायशस्त्रिवर्गरूपश्रेयःप्रवणा मुक्तये न यतन्ते तावन्मुमुक्षुतैव दुर्लभेति भावः देवान्मुमुक्षतां केषांचित्सहस्रेषु कश्चिन्मुच्येत रागादिदोषैर्मुच्येत सिध्यति लब्धयोगो भवति ॥ ४ ॥

मुक्तानामपि सिद्धानां कोटिष्वपि हे महामुने ! नारायणपरायणः प्रशान्तात्मा रागाद्यकलुषितचित्तः सुतरां दुर्लभः ॥५॥

प्रश्नार्थमुपसंहरन् तस्योत्तरदानाय मुनिं प्रेरयति--वृत्रस्त्विति द्वाभ्यां । तु शब्देनोक्तविपरीतमसत्वप्रधानत्वं द्योत्यते रजस्तमःप्रचुरो वृत्रः सर्वलोकोपतापनः सर्वलोकदुःखकारी अत एव पापः इत्थमुक्तप्रकारेण कृष्णे भगवति दृढा मतिर्यस्य तादृशः कथमासीत्कथं वा उल्वणे दुःसहे आम्वे शब्दादिविषये दृढमतिः नासीदिति यत् ॥ ६ ॥

अस्मिन्नर्थे नोऽस्माकं भूयान्संशयो वर्त्तते भो मुने, संशयं विशिनष्टि--हि यस्मात्संशयाच्छ्रोतुम् उत्तरं श्रोतुं कौतूहलमस्माकं अस्ति नन्विन्द्रभयाद्वृत्रः कृष्णं शरणाङ्गत इत्यत्राह—यः पौरुषेणोत्सर्जन । यो वृत्रः पौरुषेण सहस्राक्षमिन्द्रमतोषयत्तस्य इन्द्राद्भयमस्तीति भावः ॥ ७ ॥

एवं राज्ञा पृष्टो मुनिरित्याहेत्याहसूतः - परीक्षित इति । अथ राज्ञः प्रश्नानन्तरम् अथ ननु हे शौनकादयः ! इति वार्थः परीक्षितः समीचीनं प्रश्नमाकर्ण्य प्रतिनन्द्याहो साधुपृष्टमित्यभिनन्द्य कथं भूतस्य परीक्षितः श्रद्दधानस्य उत्तरश्रवणादिषयक(?)त्वरायुक्तस्य उत्तरे विस्रम्भयुक्तस्य वा इदं वक्ष्यमाणमब्रवीत् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्र चित्रकेतुविषयेतिहासश्रवणादिना संसारविरक्तिभूयिष्ठतया श्रीनारायणचरणारविन्दे भक्तिर्जायते इति तदर्थं परीक्षित्प्रश्नपूर्वकं पूर्वकथाशेषत्वेन निरूपयितुमाह—रज इति । दृढा रतिर्दृढातिशयभक्तिरित्यर्थः ॥ १ ॥

देवादीनामपि श्रीकान्ताङ्घ्रिभक्तिर्दुर्लभा किमुतासुरप्रकृतेरिति भावेन वक्ति—देवानामिति । शुद्धसत्त्वगुणनिर्मितशरीरत्वेन शुद्धान्तःकरणानाम् अमलात्मनां तपोभिर्निर्धूतमनोमलानां न प्रायेणोपजायत इत्यस्यायमर्थः निरन्तरभक्तिकरणयोग्यैरसुरावेशात्क्रियमाणस्य द्वेषस्य कादाचित्कत्वेनाल्पत्वेऽपि महत्त्वोपचारोऽन्यथा शुद्धसत्त्वानामित्यादिविशेषणविशिष्टानां देवानां गुणलिङ्गानाम् इत्यादिनोच्यमानमात्यन्तिकभक्तिलक्षणञ्चासङ्गतं स्यादतः प्रायशब्दस्य बाहुल्यार्थत्वेऽप्यत्रापि एवार्थागीकर्तव्यः प्रकृतप्रमाणानुरोधाद्भक्तिकरणं दुर्लभमित्यतो वा तथोक्तं न तु तेषां तदभावात् । भक्तबाहुल्यस्यादृष्टत्वात् भक्तेस्तारतम्यप्रदर्शनाय वा ॥ २ ॥

एतदेवाह । रजोभिरिति । इह कर्मभूमौ जन्तवः पार्थिवैः रजोभिः समसंख्याता यावन्ति भूमेः रजांसि सन्ति तावन्तः शरीरिणो जीवाः सन्ति अन्येऽपि निःशरीरा अनन्ताः सन्ति "परमाणुप्रदेशेऽपि ह्यनन्ताः प्राणिराशयः" इति श्रुतेः । न तेषामिहमानं क्रियते किन्तु गृहीतदेहानामेव तेषां मध्ये ये केचन मनुजादयः श्रेयः स्वर्गादिलक्षणमुद्दिश्य प्रवर्तन्ते वा इत्यनेन मनुष्याणां सहस्रेष्वित्यादिवाक्यं सूचयति ईहमानेष्वपि विशेषं वा ॥ ३ ॥

स्वर्गादीनां क्षणभङ्गुरसुखपरत्वं सन्दिश्य चेष्टमानानां मध्ये केचिदेव मुमुक्षवः मोक्षेच्छवः तेषां मुमुक्षूणां मध्ये केचिदेव प्रयतन्ते तेषु प्रयतमानेषु सहस्रेषु कश्चिदधिकारिणिषु मुच्येत संसारान्मुक्तो भवति तत्रापि संसारान्मुक्तेष्वपि संसाराद्यप्रासिज्ञानादिपूर्तिशून्यमुक्तराशौ कश्चिदेव पूर्णज्ञानी सिद्ध्यति आनन्दादिपूर्णो भवति ॥ ४ ॥

सिद्धानामानन्दादिपूर्णानां मुक्तानां मध्ये नारायणायनो दुर्लभः नारायणायनानां कोटिष्वपि प्रशान्तात्मा प्रकृष्टभगवन्निष्ठायुक्तमनाः प्रकृष्टानन्दरूपो वा नारायणपरायणः सुदुर्लभः ब्रह्मणामेकसन्तरेणात्यन्तदुर्लभ इत्यर्थः अधिकारिणां तारतम्यविवक्षयैतद्वचनम् ॥ ५ ॥

ततः किं प्रकृतमिति तत्राह - वृत्रस्त्विति । तु शब्देनात्यन्तानुपपत्तिं सूचयति ॥ ६ ॥

पौरुषेण परमात्मविषयस्नेहेन अहो दानवसिद्धोसीत्युक्तत्वात् ॥ ७—१० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

देवानामित्यादि यद्यपि "सत्त्वात् सञ्जायते ज्ञानम्" इत्यादिना "कैवल्यं सात्त्विकं ज्ञानम्" इत्यादिना "सत्त्वं यद्ब्रह्मदर्शनम्" इत्यादिना च सत्त्वस्य ज्ञानकारणत्वमुक्तं तथापि देवानां शुद्धसत्त्वानामित्युक्त्वा मुक्तानामपि सिद्धानामित्युक्त्या सद्भावेऽपि भगवज्ज्ञानस्याप्यभावात् । रजस्तमः स्वभावस्येत्याद्युक्त्या तदभावेऽपि सद्भावात् न सत्त्वस्यतत् कारणत्वं । किन्तु तदुत्तरत्वेन तस्य पूर्वजन्मनि श्रीनारदादिसङ्गश्रवणेनवा "नैषां मतिस्तावदुरुक्रमाङ्घ्रिं स्पृशत्यनर्थापगमो यदर्थः । महीयसां पादरजोऽभिषेकं निष्किञ्चनानां न वृणीत यावत्" इत्युक्त्या भगवत्कृपापरिणामभूतस्य श्रीमतो महतः सङ्ग एव कारणं । तत्सङ्गलवतुलनयाऽपि न स्वर्गं नापुनर्भवम् भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ।

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

इत्युक्त्या निर्गुणावस्थातोऽप्यधिकत्वात् । परमनिर्गुण एव सप्तमे च । समः प्रियः सुहृद्ब्रह्मन्नित्यादौ सगुणे देवादौ तस्यकृपा वास्तवी न भवति । किन्तु श्रीमत्प्रह्लादादिष्वेवेति प्रतिपाद्यनात्महत्तां निर्गुणत्वाभिव्यक्त्या तत्सङ्गस्यापि निर्गुणत्वं व्यक्तम् ॥ १ ॥ २ ॥ ३ ॥

मुच्येत जीवन्मुक्तो भवेत् ततश्च सिद्ध्यति "येऽन्येऽरविन्दाक्ष विमुक्तमानिनः" इत्यादि व्याख्यानरीत्या जीवन्मुक्तानामपि पात श्रवणात् । तत्रापि कश्चिदेव निर्विघ्नतां प्राप्नोतीत्यर्थः । मुक्तानां प्राकृतशरीरत्वत्वेपि तदभिमानशून्यानां सिद्धानां प्राप्तसालोक्यादीनाञ्च कोटिष्वपि मध्ये नारायणसेवामात्रकाङ्क्षी सुदुर्लभः प्रशान्तात्मा सर्व्वोपद्रवरहितः ॥ ४—२० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

चतुर्दशे चित्रकेतोर्विविक्ते कृपया सताम् ।
सुखञ्च दुःखञ्च सुतस्योत्पत्त्या मृत्युनाभवत् ॥

शुद्धसत्त्वानां शुद्धान्तःकरणानां प्रायेणेति अन्तःकरणशुद्धौ ज्ञानं यथा स्वतः स्यात्तथा न भक्तिः तस्याः साधुसङ्गाविनाभावित्वात् ॥ १ ॥ २ ॥

येषां मध्ये ये केचनैव मनुजदेवगन्धर्वादयो भवन्ति न तु सर्वे । तेषामपि मध्ये ये केचनैव श्रेयो धर्म्मादि ॥ ३ ॥

मुच्येत जीवन्मुक्तो भवेत् ॥ ४ ॥

मुक्तानामपि मध्ये कश्चिदेवसिद्ध्यतीति—तत्रैवदुक्तं भवति मोक्षसाधनवन्तोपि बहवो मुक्ता न भवन्ति किन्तु केचिदेव । मुक्ता अपि सर्वे सिद्धा न भवन्ति किन्तु केचिदेव । "जीवन्मुक्ता अपि पुनर्बन्धनं यान्ति कर्म्मभिः । यद्यचिन्त्यमहाशक्तौ भगवत्यपराधिनः" इत्याद्युक्तेः ते च सिद्धाः सन्निहितसायुज्या एवोच्यन्ते तेषां मध्ये नारायणपरायण इति निर्द्धारणानुपपत्तेः षष्ठीयं पञ्चम्यर्थं एव ततश्च मुक्तेभ्यः सिद्धेभ्यश्च सकाशात् नारायणपरायणः श्रेष्ठ्यात् सुदुर्लभः । यद्वा अयमत्र विवेकः ज्ञानं हि द्विविधं केवलं भक्तिसहितञ्च तत्र केवलज्ञानेन स्थूलतुषावघातिन इव मुमुक्षवोपि न मुच्यन्ते । भक्तिसहितं ज्ञानञ्च द्विविधं भगवदाकारे मायाबुद्ध्या प्रतात्स्वरेपि तद्भक्तिसहिततया विनैव तदादरे सति तद्भक्ति सहितञ्च । तत्राद्ये खलु मुक्ता न भवन्ति किन्तु मुक्ताभिमानिन एव । तादृश्या भक्त्या अविद्यां सूक्ष्मलिङ्गनिरस्य विद्योदयञ्च सम्यक् सम्पाद्य सद्य एवान्तर्द्धानात् तथा विनाच तत्पदार्थज्ञानाभावाच्च ब्रह्मणि लीयन्ते । तत्र येऽन्येऽरविन्दाक्षेत्यादौ अनादृतयुष्मदङ्घ्रय इति प्रमाणं भगवद्गीता च "अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानन्तो मम भूतमहेश्वरम् । मोघाशा मोघकर्म्माणो मोघज्ञाना विचेतसः राक्षसीमासुरीञ्चैव प्रकृतिं मोहिनीं श्रिताः" अनयोरर्थः । मानुषीं तनुमाश्रितं मां मूढा अवजानन्ति सच्चिन्मयीमपि मानुष्याकृतितो मायिकत्वदर्शनात् मदीयाया अपि मानुष्याकृतेर्मायिकत्वकल्पनमेव ममावज्ञा मम मानुषीं तनुं कीदृशीं परं भावं श्रेष्ठं सत्त्वं विशुद्धं सत्त्वमित्यर्थः । कीदृशं भूतमहेश्वरं । भूतानां ब्रह्मादितृणान्तजीवानां महेश्वरं परमकारणं मम मानुषी तनुरेव स्वीकृता प्राकृतसर्व्ववस्तुकारणमित्यर्थः । मोघाशा इति यदि तेमद्भक्ताः स्युस्तदा ते मोघाशा मत्प्राप्त्याशा तेषां व्यर्था स्यात् यदि ते कर्म्मिणस्तदा ते मोघकर्म्माणः स्युस्तेषां स्वर्गो न स्यात् । यदि ते ज्ञानिनस्तदा मोघज्ञानास्तेषां मोक्षो न स्यात् । तर्हि तेषां किं स्यादित्यत आह—राक्षसीमिति राक्षसादियोनौ जन्म स्यादित्यर्थः । द्वितीये तु अविद्याविद्ययोरुपरामेप्यनुपरतया ज्ञानशावल्यहारितया भक्त्या तत् पदार्थं ज्ञात्वा ब्रह्मसायुज्यं प्राप्नुवन्ति । यदुक्तं "ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् । भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्" इति । किञ्च तेषां सिद्धानां मध्ये कोपि भक्त्या तत्पदार्थानुभवारम्भसमये यदि कस्यचिच्छुद्धभक्तस्य कृपया पूर्णां शुद्धां भक्तिं प्राप्नोति तदा तन्माधुर्यलाभात् सायुज्यमरोचयित्वा नारायणपरायणः स्यादिति निर्द्धारणषष्ठ्यपि व्याख्येया । तत्रानुग्राहकभक्तस्य शान्तत्वे शान्तभक्त इति दासादित्वे दासादिरिति । अस्यातिविरलत्वेन दौर्लभ्यात् प्रशान्तसहस्रशब्दमप्रयुज्य कोटिष्वपीत्याह स्म ॥ ५ ॥

एवं परमदुर्लभा त्रिगुणातीता, भक्तिस्त्रिगुणान्धे असुरे वृत्रे कथमवर्त्ततेति पृच्छति—वृत्रस्त्विति ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवमिन्द्रपोषणमुक्त्वाथ नारदादिमूर्त्तिभिर्भगवता यथा चित्रकेतुपोषणं कृतं तदुच्यते—चतुर्भिरध्यायैः । तत्र वृत्रस्य पूर्वजन्मनि चित्रकेतुरूपस्य पुत्रार्थं क्लिश्यतः पुत्रप्राप्तिस्तस्मिन्पुत्रे मृते सति शोकश्च वर्ण्यते—रजस्तम इति चतुर्दशेनाध्यायेन । वृत्रस्य भगवद्भक्तिः केन हेतुनासीदिति पृच्छति—रज इति । पाप्मनः देवद्रोहरूपपापयुक्तस्य रजस्तमश्च स्वभावो यस्य तस्य ॥ १ ॥

भक्तेर्दुर्लभत्वं संस्मृत्य वर्णयति—देवानामिति चतुर्भिः ॥ २ ॥

जन्तवो जीवाः पार्थिवै रजोभिः समसंख्याताः असंख्येया इत्यर्थः तेषां मध्ये ये केचनैव श्रेयो धर्मादित्रिवर्गं ईहन्ते कुर्वन्ति ॥ ३ ॥

मुमुक्षवः अपवर्गेच्छवः तेषां सहस्रेषु कश्चिदेव मुच्येत मुमुक्षाघातकात् गृहादिसङ्गात् तेषां गृहादिसङ्गान्मुक्तानामपि मध्ये कश्चिदेव सिद्ध्यति आत्मानात्मपरमात्मविवेकरूपां सिद्धिं प्राप्नोति ॥ ४ ॥

मुक्तानां मध्ये ये सिद्धास्तेषां कोटिषु नारायणः परमः अत्माश्रयो भजनीयो यस्य सः ॥ ५ ॥ ६ ॥ ७ ॥

वृत्रोऽब्रवीदुत्तरमब्रवीत् ॥ ८ ॥

श्रीशुक उवाच ।

शृणुष्वावहितो राजन्नितिहासमिमं यथा ।
श्रुतं द्वैपायनमुखान्नारदाद्देवलादपि ॥ ९ ॥
आसीद्राजा सार्वभौमः शूरसेनेषु वै नृप ! ।
चित्रकेतुरिति ख्यातो यस्यासीत्कामधुङ्मही ॥ १० ॥
तस्य भार्यासहस्राणां सहस्राणि दशाभवन् ।
सान्तानिकश्चापि नृपो न लेभे तासु सन्ततिम् ॥ ११ ॥
रूपौदार्यवयोजन्मविद्यैश्वर्यश्रियादिभिः ।
सम्पन्नस्य गुणैः सर्वैश्चिन्ता वन्ध्यापतेरभूत् ॥ १२ ॥
न तस्य सम्पदः सर्वा महिष्यो वामलोचनाः ।
सार्वभौमस्य भूश्चेयमभवन्प्रीतिहेतवः ॥ १३ ॥
तस्यैकदा तु भवनमाङ्गिरा भगवानृषिः ।
लोकाननुचरन्नेतानुपागच्छद्यदृच्छया ॥ १४ ॥
तं पूजयित्वा विधिवत्प्रत्युत्थानार्हणादिभिः ।
कृतातिथ्यमुपासीदत्सुखासीनं समाहितः ॥ १५ ॥
महर्षिस्तमुपासीनं प्रश्रयावनतं क्षितौ ।
प्रतिपूज्य महाराज ! समाभाष्येदमब्रवीत् ॥ १६ ॥

भाषाटीका ।

श्रियैनमः ॥ परीक्षित उवाच ॥ हे ब्रह्मन् ! रज तम स्वभाव वाले पापी वृत्रासुर की षड्गुण युक्त श्रीमन्नारायण में कैसे दृढ मति हुई ॥ १ ॥

प्रायः करके मुकुन्द के चरणारविन्दमें शुद्ध सत्वगुणी देवताओं की तथा निर्मलान्तःकरण वाले ऋषियों की भी भक्ति नहीं होती है ॥ २ ॥

इस संसार में पृथिवी के रज के कणों के तरह जीवभी अनन्त हैं । उनमें से कोई मनुष्यादिक अपने श्रेय की चेष्टा करते हैं ॥ ३ ॥

हे द्विजोत्तम ! उनमें भी कोईक मुमुक्षु होते हैं । हजारों मुमुक्षुवों में भी कोई एक गृहादिक सङ्गसे छूटकर तत्वको जानता है ॥ ४ ॥

हे महामुने ! उन तत्वज्ञानी मुक्तजन और सिद्धजनों में भी शान्त स्वभाववाले नारायण परायण तो कोटानकोट जनों में भी अत्यन्त दुर्लभ है ॥ ५ ॥

फिर सर्व लोक को ताप देने वाला पापी जो वृत्रासुर उसकी घोर संग्राम के बीचमें कृष्णमें एसी दृढ मति कैसे हो गई ? ॥ ६ ॥

हे प्रभो ! इस विषय में हमको बडा संशय है । और श्रवण करने का भी बडा कुतूहल है । क्योंकि जिसने रण में इन्द्र को सन्तुष्ट करदिया ॥ ७ ॥

॥ सूत उवाच ॥

तदनन्तर श्रद्धालु परीक्षित के प्रश्न को सुनकर अभिनन्दन करके व्यास नन्दन भगवान् श्रीशुकदेवजी बोले ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यथा यथावत् शृणु ॥ ९ ॥ १० ॥

भार्यासहस्राणां दश सहस्राणि कोटिरित्यर्थः सान्तानिकः स्वयं सन्तानार्होऽपि पुत्रोत्पादनसमर्थोऽपि तासु सन्ततिं न लेभे सर्वास्ता वन्ध्या एव दैवयोगेन मिलिता इति भावः ॥ ११ ॥

तदेवाह-वन्ध्यापतेरिति ॥ १२ ॥ १३ ॥ १४ ॥

उपासीदत्तस्य समीपमुपविवेश समाहितः संयतः ॥ १५ ॥ १६ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह मुनिः–शृणुष्वेत्यादिनाऽध्यायत्रयेण । तावद्वृत्रस्य भगवद्भक्तिर्न तज्जन्मना लब्धा किन्तु पूर्वजन्मनैवेति वक्तुं तावत् तस्य पूर्वजन्मवृत्तान्तं वक्ष्यन् तच्छ्रवणाय राजानमाज्ञापयति-शृणुष्वेति । हे राजन् ! इमं वक्ष्यमाणमितिहासं अवहितस्समाहितचित्तो यथा यथावच्छृणु कथंभूतं द्वैपायनमुखादस्मत्पितुस्सकाशान्नारदाद्देवलाच्च श्रुतं मयेति शेषः यथा द्वैपायनादिभ्यः श्रुतं तथा कथयतो मत्तः शृणुवेति वान्वयः श्रुतं द्वैपायनादित्यादिनाऽस्येतिहासस्याप्तप्रणीतत्वसूचनात्केवलास्मद्बुद्धिपरिकल्पितत्वशंकामूलकोऽस्मिन्ननादरः कार्य इत्युक्तं भवति ॥ ९ ॥

तदेवेतिहासमाह-आसीदित्यादिना । हे नृप ! इन्द्रेण हतो यो वृत्रः स पूर्वस्मिन् जन्मनि चित्रकेतुरिति प्रसिद्धः सार्वभौमः कृत्स्नभूमेरधिपतिः शूरसेनेषु जनपदेष्वासीत् तं विशिनष्टि - यस्य चित्रकेतोरियं मही कामधुक् काम्यन्त इति कामा इष्टार्थास्तान् दोग्धि प्रपूरयतीति तथासीत् ॥ १० ॥

तस्य चित्रकेतोर्भार्यासहस्राणां दश सहस्राण्यभवन् कोटिसंख्याका भार्या अभवन्नित्यर्थः स च नृपश्चित्रकेतुः सान्तानिकः सन्तानार्थ्यपि तासु भार्यासु संततिं प्रजां न लेभे न प्राप्तवान् यद्वा सान्तानिकः स्वयं सन्तानार्होऽपि पुत्रोत्पादनशक्तिमानपि तासु सन्ततिं न लेभे सर्वास्ता वन्ध्या एव दैवयोगेनोद्वाहिता इति भावः ॥ ११ ॥

रूपेति । रूपादिभिः सर्वैर्गुणैर्धर्मैः संपन्नस्य युक्तस्यापि तस्य वन्ध्यानां सन्तानरहितानां भार्याणां पत्युरत एव चिन्ता पुत्रालाभप्रयुक्ता अभूत् तत्र रूपं लावण्यमौदार्यं सत्पात्रे द्रव्यविनियोगशीलत्वं वयो यौवनं जन्म सत्कुलप्रसूतत्वं विद्या शास्त्रजन्यं ज्ञानं ऐश्वर्यं सार्वभौमत्वं श्रीर्भोग्यभोगोपकरणादिसम्पत् एते चिन्तारहितप्रीतिहेतवः अथाप्यपुत्रत्वमेकं सदा चिन्ताहेतुरासीदिति भावः ॥ १२ ॥

तदेवाह–नेति । तस्यापुत्रत्वप्रयुक्तचिन्ताक्रान्तस्य सार्वभौमस्य चित्रकेतोः सर्वाः सम्पदः वामलोचनाः सुन्दरलोचनाः लोचनग्रहणमन्येषामप्यवयवानामप्युपलक्षणं महिष्यश्चेयं कृत्स्ना भूमिश्च प्रीतिहेतवो नाभवन् ॥ १३ ॥

एवं सर्वसम्पत्सु प्रीतिरहितस्य केवलं पुत्रार्थमेव चिन्तयतस्तस्य चित्रकेतोर्भवनं गृहं प्रति भगवानङ्गिरा ऋषिः सिद्धः ज्ञानकाष्ठां प्राप्तः अत एव यदृच्छया लोकाननुचरन् कदाचिदुपागतः प्राप्तः ॥ १४ ॥

तमागतमाङ्गिरसं यथाविधि प्रत्युत्थानार्घ्यपाद्यादिभिः संपूज्याऽतिथ्यं कृत्वा भोजनादिभिः सत्कृत्येत्यर्थः सुखासनोपविष्टमङ्गिरसमुपासीदत् तस्य समीप उपविष्टवान् कथंभूतस्सन् समाहितः संयतचित्तः सन् ॥ १५ ॥

उपासीनमुपविष्टं क्षितौ प्रश्रयेणावनतं नम्रं तं चित्रकेतुं प्रतिपूज्य अहो तव विनयादिसम्पत्तिरिति बहुसंमान्य समाभाष्य सम्भाषणाभिमुखं कृत्वा महर्षिरंगिरा इदं वक्ष्यमाणमब्रवीत् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सान्तानिकः सन्तानार्थी । कस्यामपीति शेषः ॥ ११—१५ ॥
क्षिताबुपासीनम् ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भार्यासहस्राणां दश सहस्राणि कोटिरित्यर्थः । सान्तानिकः सन्तानप्रयोजनकः न केवलं विषयभोगार्थमेव तावत्यो भार्य्या इति भावः ॥ ११ ॥

वन्ध्यापतेरिति सर्व्वास्ता वन्ध्या एव दैवयोगेन मिलिता इति भावः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मया यथा द्वैपायनादिभ्यः श्रुतं तथा मत्तस्त्वं शृणुष्व ॥ ९ ॥
सार्वभौमः सर्वभूमिपतिः कामधुक् सर्वकामदा ॥ १० ॥

तस्य चित्रकेतोः भार्यासहस्राणां दश सहस्राणि अभवन् कोटिसङ्ख्याकाः भार्या आसन्नित्यर्थः स नृपः सान्तानिकः सन्तानोत्पादनार्होऽपि सन्ततिं न लेभे ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

तं पूजयित्वा समाहितः संयतः उपासीदत् उपविवेश ॥ १५ ॥
क्षितौ उपासीनम् ॥ १६ ॥

भाषाटीका ।

॥ श्रीशुक उवाच ॥

हे राजन् ! सावधान होकर इस इतिहास को सुनो । जैसे हमने (द्वैपायन) व्यासजीके मुखसे तथा नारद और देवल महर्षिसे भी सुना है ॥ ९ ॥

हे नृप ! शूरसेन देश में चित्रकेतु नामसे ख्यात सार्वभौम राजा रहे जिनकी सब कामों को परिपूरण करने वाली भूमि रही ॥ १० ॥

उन चित्रकेतु महाराजके एक (कोटि) किरोड रानी रहीं । राजा सन्तान के योग्यभी रहा तौभी उन रानियों में से राजाको सन्तान की प्राप्ति न भई ॥ ११ ॥

रूप, उदारता, अवस्था, कुल, विद्या, ऐश्वर्य, इत्यादि गुणों से सम्पन्न भी रहे तौभी उन बांझों के पति महाराज चित्रकेतु को बडी चिन्ता भई ॥ १२ ॥

उन राजाके सर्व सम्पत् तथा मनोहर नेत्रवाली रानी तथा सर्व भूमिका राज्य यह सबही कुछप्रीतिके जनक नहीं भये ॥ १३ ॥

एक समय हरीच्छा से इन लोकों में विचरते भये भगवान अंगिरा ऋषि उन चित्रकेतु महाराज के भवन में आये ॥ १४ ॥

अङ्गिरा उवाच ।

अपि तेऽनामयं स्वस्ति प्रकृतीनां तथाऽऽत्मनः ।
यथा प्रकृतिभिर्गुप्तः पुमान् राजापि सप्तभिः ॥ १७ ॥
आत्मानं प्रकृतिष्वद्धा निधाय श्रेय आप्नुयात् ।
राज्ञा तथा प्रकृतयो (१) नरदेवाहिताधयः ॥ १८ ॥
अपि दाराः प्रजाऽमात्या भृत्याः श्रेण्योऽथ मन्त्रिणः ।
पौरा जानपदा भूपा आत्मजा वशवर्तिनः ॥ १९ ॥
यस्यात्माऽनुवशश्चेत्स्यात्सर्वे तद्वशगा इमे ।
लोकाः सपाला यच्छन्ति सर्वे बलिमतन्द्रिताः ॥ २० ॥
आत्मनः प्रीयते नात्मा परतः स्वत एव वा ।
लक्षयेऽलब्धकामं त्वां चिन्तया शबलं मुखम् ॥ २१ ॥
एवं विकल्पितो राजन्विदुषा मुनिनाऽपि सः ।
प्रश्रयावनतोऽभ्याह प्रजाकामस्ततो मुनिम् ॥ २२ ॥

चित्रकेतुरुवाच ।

भगवन्किं न विदितं तपोज्ञानसमाधिभिः ।
योगिनां ध्वस्तपापानां बहिरन्तःशरीरिषु ॥ २३ ॥
तथापि पृच्छतो ब्रूयां ब्रह्मन्नात्मनि चिन्तितम् ।
भवतो विदुषश्चापि चोदितस्त्वदनुज्ञया ॥ २४ ॥

भाषा टीका ।

राजा ने भी विधिवत् उत्कट सामग्री से उनकी पूजा की आतिथ्य स्वीकार करके सुख पूर्वक महर्षि जब बैठे तब राजा भी विनय पूर्वक समीप बैठगया ॥ १५ ॥

हे राजन् ! भूमि में विनय से नम्र अपने समीप बैठे हुए राजा को महर्षि भली भांत बोल कर यह वचन बोले ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अपि किम् अनामयमारोग्यम् स्वस्ति शुभम् । प्रकृत्यधीनमेव हि राज्यमिति सदृष्टान्तमाह—यथा महदाद्याभिः सप्तभिः प्रकृतिभिः पुमान् जीवो नित्यं गुप्तो न तु तद्व्यतिरेकेण क्षणमपि तिष्ठति तथा राजाऽपि सप्तप्रकृतिभिः "स्वाम्यमात्यौ जनपदा दुर्गद्रविणसञ्चयाः । दण्डो मित्रं च तस्यैताः सप्त प्रकृतयो मता" इत्युक्तलक्षणाभिर्नित्यं गुप्तः सन् स्वामी गुरुः स्वयं वा ॥ १७ ॥

आत्मानं प्रकृतिष्वद्धा साक्षान्निधाय तदनुवर्तिनं कृत्वा श्रेयो राज्यसुखं प्राप्नुयादित्यर्थः प्रकृतीनां च सुखं राजाधीनमेवेत्याह—हे नरदेव ! तथा प्रकृतयोऽपि राज्ञा आहिताधयो निहितनिक्षेपाः धनैः समृद्धा भवन्ति पाठान्तरे आ समन्ततो हृताधयो निरस्तमनोदुःखा भवन्तीत्यर्थः ॥ १८ ॥

प्रजाश्च श्रेण्यश्च समयविशेषेण सङ्घशो वर्तमाना वणिक्प्रभृतयः पौराः पुरवासिनः जानपदास्तत्तद्देशाधिकारिणः मन्त्रसहायो मन्त्री कर्मसहायोऽमात्य इति भेदः ॥ १९ ॥

तव मनः स्ववशे वा न वेत्यर्थात्पृच्छति यस्याऽऽत्मा मनोऽनुवशोऽनुवर्ती अधीनः स्यात्तस्य वशगा इमे सर्वे भवन्ति किञ्च लोकाश्च तस्य बलिं यच्छन्ति ॥ २० ॥

आत्मा भवान् आत्मनो न प्रीयते न तुष्यति तत् किं परतो वा ऽलब्धकामं स्वतो वा त्वां लक्षये ॥ २१ ॥

(१) नरदेवाहृताधय इति पाठान्तरम् ।

श्रीधरस्वामिकृत भावार्थदीपिका ॥

विदुषा सर्वज्ञेनापि ॥ २२ ॥

अलब्धकामत्वं कथयन्पुत्रं याचते—भगवन्निति चतुर्भिः ॥ २३ ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह—अपीति । अपि शब्दः कुशलप्रश्नद्योतकः ते तवानामयमारोग्यमप्यस्ति किमेति प्रश्नः आत्मनो स्वसम्बन्धिनीनां प्रकृतीनां स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलात्मकानां सप्तानामपि स्वस्ति- नतु ? सर्वास्मिन्सति विशेषेण प्रकृतीनां स्वस्ति कथं पृच्छतीत्यत आह–यथेति सप्तभिः । प्रकृतिभिर्महदहङ्कारतन्मात्रैर्यथा पुमान् जीवः गुप्तः रक्षितो भवति प्रकृत्यायत्तस्सुखी भवति ॥ १७ ॥

तथा राजापि स्वाम्यादिषु सप्तसु प्रतिष्ठाप्यमाऽऽत्मानं साक्षान्निधायात्मानं प्रकृत्यधीनं कृत्वेत्यर्थः श्रेयः सुखं प्राप्नुयात् राज्यभारं प्रकृतिषु निधाय निर्भरः सुखान्यनुभूयादित्यर्थः अतः प्रकृतीनामेव तावत्स्वस्ति पृच्छामीति भावः एवं राज्ञः श्रेयः प्रकृत्यधीनमित्युक्तम् अथ प्रकृतीनां श्रेयो राजाधीनमित्याह- राज्ञेति । हे नरदेव, तथा प्रकृतयोऽपि राज्ञा हेतुना हितादयः हितमिष्टमादिशब्दादनिष्टपरिहारश्च येषां तादृशा भवन्ति अहृताघ इति पाठे आ समन्ताद्धृता आधयः येषां निरस्तमनोदुःखा भवन्तीत्यर्थः ॥ १८ ॥

एवं राज्ञः प्रकृतीनां चान्योन्यश्रेयःप्रापकत्वमुक्तं । ननु, यदि राज्ञः श्रेयः प्रकृत्यधीनं तर्हि राज्ञः स्वातन्त्र्यभङ्गस्तत्राह- अपीति । यस्य राज्ञो दाराः भार्याः प्रजाः अमात्याः कर्मसहायाः श्रेयः ताम्बूलिकादयः मन्त्रिणः मन्त्रेषु सहायभूताः मित्राणि पौराः पुरवासिनः जानपदा देशान्तराधिपतयो भूपा आत्मजाश्च वशवर्तिनः वशङ्गताः स एव प्रकृतिष्वात्मानं निधाय श्रेयः आप्नुयादित्यर्थः ॥ १९ ॥

कस्यैते वशवर्तिनः स्युस्तत्राह—यस्येति । यस्य राज्ञः आत्मा मनोऽनुवशः वशङ्गतः न तु विषयपरस्य्याजितेन्द्रियस्येति भावः तस्यैव वशङ्गताः सर्वे इमे पूर्वोक्ता दारादयः पालकैस्सहिताः सर्वे लोकाश्चातन्द्रिताः जागरूकास्सन्तो बलिं हरन्ति । यद्वा यस्यात्मानुवशस्तस्यैवेमे सर्वे दारादयो वशङ्गताः यस्येमे दारादयो वशङ्गतास्तस्यैव सर्वे लोकाः सपाला बलिं हरन्तीतिवान्वयः उपायनसमर्पणद्वारा सेवन्त इत्यर्थः ॥ २० ॥

त्वदुक्तरीत्या जितेन्द्रियस्य मम सर्वे वशे वर्तन्त इति चेत्तर्ह्यसन्तोषस्तव कुत इत्याह–आत्मन इति । आत्मनः स्वस्य तवात्मा मनः न प्रीयते न तुष्यति तत्किं परतो वा स्वतो वा हेतोः कथमसन्तोषो जायते ममेत्यत्राह—अलब्धकाममप्राप्ताभिलषितं त्वां लक्षयेऽनुपश्यामि तत्कृतः यश्चिन्तया तव मुखं शबलं विच्छायमनाह्लादमुपलक्ष्यते ॥ २१ ॥

एवमाङ्गिरसा पृष्टश्चित्रकेतुः स्वमनीषितं विज्ञापितवानित्याह मुनिः—एवमिति । विदुषा चित्रकेतोरभिप्रेतज्ञानतापि मुनिना एवं इत्थं विकल्पितः स्वतः परतो वा तवासन्तोष इत्येवं विकल्पपूर्वकं पृष्टः चित्रकेतुः प्रजाकामः पुत्रं कामयमानः तावत्प्रश्रयेण विनयेन नम्रः मुनिमाङ्गिरसमाह ॥ २२ ॥

तदेवाह–भगवन्नित्यादिना, तद्विधेहि न इत्यन्तेन । हे भगवन्, तपोज्ञानसमाधिभिः कर्मयोगज्ञानयोगभगवद्भक्तियोगैः ध्वस्तं निरस्तं पापं ज्ञानावरकं पुण्यपापात्मकं कर्म यैस्तेषां भवादृशानां योगिनां देहिष्वन्तर्बहिश्चाविदितं किं न्वस्ति शरीरिणामन्तर्बाह्यगतं च भवद्भिः सर्वं विदितमेवेत्यर्थः ॥ २३ ॥

तथापि सर्वज्ञस्य ज्ञातत्वेपि हे ब्रह्मन्, आत्मनि मदन्तःकरणे चिन्तितमर्थं पृच्छतस्तव ब्रूयां कथयामि कथंभूतः विदुषा चापि मदभिप्रेतं जानताऽपि भवता चोदितोऽभिप्रेतकथनाय प्रेरितः त्वदनुज्ञया ब्रूयां यद्यनुज्ञापयसि तर्हि ब्रूयामिति स्वस्य विनयादिसम्पत्तिस्सूचिता ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ते तवानामयमपि दुःखं नास्ति हि तथात्मनस्तव प्रकृतीनां स्वस्ति किमित्यन्वयः प्रकृतिविषयकुशलप्रश्नेन किं प्रयोजनमत्राह - यथेति । यथा सप्तभिः प्रकृतिभिः महदहङ्काराभ्यां पृथिव्यादिभिः पञ्चभिर्भूतैर्गुप्तः पुमान् जीवः ॥ १७ ॥

प्रकृतिषु देहहेतुषु आत्मानमञ्जा निधाय श्रेयः प्राप्नोति तथा राजा च प्रकृतिशब्दवाच्ये राजजने रचितः तेषु राज्यभारं निधाय विहितं श्रेय आप्नुयादित्यन्वयः । तथा प्रकृत्यादयो यस्य राज्ञो वशवर्तिनः स्युः आत्मा मनश्चानुवशश्चेत्तर्हि ते सर्वे लोकास्तस्य राज्ञो वशगाः तस्मै बलिं यच्छन्तीत्यन्वयः आत्मा स्वयं प्रकृत्यादेर्वशवर्ती चेत् प्रकृत्यादेरात्मवशत्वाभावेन अनर्थस्य कारणभूता भवन्तीत्याह - अहितादय इति । अतो वशीकर्तव्या इत्यर्थः आहितादय इति वा आदित एव हितकर्तृत्वेन निहिताः अनेन प्रकृत्यादीनां गुणो दर्शितः । —

“स्वाम्यमात्यो जनपदो दुर्गं द्रविणसञ्चयः ।
दण्डो मन्त्री च सप्तैतास्तस्य प्रकृतयः स्मृताः” इति ॥

बुद्धिसहायो मंत्री कर्मसहायोऽमात्यः यथा प्रकृतिगुप्तो राजा सुखमश्नुते तथा राज्ञा सन्तोषिताः प्रकृतयः राज्ञः सन्तोषहेतवो भवन्ति अन्यथाऽहितादयः अहितस्यासन्तोषस्य आदयः कारणभूता भवन्तीति योगविभागो वा ॥ १८ ॥

हे राजन् ! दारसुतादयश्च तव वशवर्तिनोपि अनुकूलतया वर्तन्ते किं ? आत्मा मनश्च वशवर्ति किम् ? ॥ १९ ॥

मनसो वशवर्तित्वे किं फलमत्राह - यस्येति । मनसः स्ववशवर्तित्वे भृत्यादयोपि स्ववशा भवन्ति अन्यथा कोपलोभाद्यधीनस्य तव क्रोधादिना विमनसीकृता भृत्यादय उक्तकारिणो न भवन्ति अतो मनसश्च वशवर्तित्वं क्रोधाद्यभावफलं क्रोधाद्यकरणे भृत्यादिवशीकरणम् ॥ २० ॥

किञ्च प्रपञ्चोपि भवदायत्त इत्याह - आत्मन इति । आत्मा

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

प्रपञ्चोऽपि आत्मनस्तव प्रीतये स्यादित्यन्वयः । अस्त्वेवमिदं सर्वं भवन्मनसि किं प्रतीयत इति तत्राह - परत इति । अहं त्वां स्वतः परतो वाऽलब्धकाममप्राप्तकामं त्वां लक्षये पश्यामि केन लिङ्गेनेत्यत उक्तं चिन्तयेति शबलमवच्छन्नम् ॥ २१ ॥

एवं विकल्पितः सन्ततिनिमित्तं दुःखं विदुषा प्रश्रयलक्षणगुणेनावनतः प्रह्वः ॥ २२—२३ ॥

आत्मनि मनसि ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

यतस्तव मुखं चिन्तया शबलं लक्ष्यते ॥ २१ ॥
विकल्पितो विविधकर्म्मणा विषयीकृतः ॥ २२—२३ ॥
यतश्चोदितो नोदितस्ततस्त्वदनुज्ञया ब्रूयाम् ॥ २४—२६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अपि किमनामयमारोग्यं स्वस्ति शुभं प्रकृतीनाममात्यादीनां राज्ञः सुखममात्यादिसुखाधीनमेव अमात्यादिसुखमपि राजसुखाधीनमिति सदृष्टान्तमाह-यथा महदादिभिः प्रकृतिभिः सप्तभिः पुमान् जीवो नित्यं गुप्तो भवति न तु तद्व्यतिरेकेण क्षणमपि तिष्ठति तथा राजापि सप्तभिः स्वाम्यमात्यसुहृत् कोशराष्ट्रदुर्गबलैः स्वाम्यत्र गुरुः ॥ १७ ॥

राजा आत्मानं स्वप्रकृतिषु निधाय आत्मसर्व्वभावं निक्षिप्य इत्यर्थः । श्रेयः राज्यसुखम् नरदेवे राजन्येव आहितः अर्पितः आधिः धनतुरगहस्त्यादितृष्णामूला मनःपीडा येस्ते राजा गुप्ता आहताधय इति पाठे नरदेवेन नाधितमनोदुःखाः श्रेय आप्नुयुः ॥ १८ ॥

किञ्च राज्ञोऽपि यथाज्ञाकारिणः सर्वजनाः स्युस्तदैव सुखमित्याह-अपीति । अयवस्तैलिकताम्बूलिकादयः ॥ १९ ॥

तव मनः स्ववशं न वेत्यर्थात् पृच्छति-यस्येति । अनुवशः अनुवर्त्ती अधीनः ॥ २० ॥

तदप्यनुवाणं राजानं पुनराह-तव आत्मनो देहस्यात्मा स्वत एव वा परत एव हेतोर्वा न प्रीयते सुखमेवास्मीति चेन्नहीत्याह-लक्षय इति ॥ २१ ॥

विकल्पितः विविधविकल्पविषयीकृतः विदुषा सर्व्वज्ञेनापि तन्मुखादेव तद्दुःखं श्रोतुमिति भावः ॥ २२ ॥

शरीरिष्वस्मद्विधेषु ॥ २३ ॥

पृच्छतो भगवतोऽहमाज्ञाकारीत्यर्थः । आत्मनि मनसि चिन्तितं चिन्ताम् ॥ २४ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

अपि किं तवात्मनः प्रकृतीनां चानामयमारोग्यमस्ति यथा पुमान् जीवः महदहङ्कारतन्मात्ररूपाभिः देहादिरूपेण परिणताभिः सप्तभिः प्रकृतिभिर्गुप्तः स्वस्ति सुखं प्राप्नोतीति शेषः तथा राजा च "स्वाम्यमात्यौ जनपदा दुर्गद्रविणसञ्चयाः । दण्डो मित्रं च तस्येमाः सप्त प्रकृतयो मताः" इति सप्तप्रकृतिभिर्गुप्तः स्वस्ति प्राप्नोतीत्यन्वयः ॥ १७ ॥

आत्मानं प्रकृतिषु अद्धा साक्षान्निधाय श्रेयः राज्यसुखादिकं स्वेष्टमाप्नुयात् तथा प्रकृतयोऽपि राज्ञा आहताधयो बाधितमनोव्यथाऽस्सत्यः श्रेयः प्राप्नुवन्ति ॥ १८ ॥

अपि किं दारादयो वशवर्तिनस्तवेति शेषः ॥ १९ ॥

यस्य आत्मा मनोऽनुवशोऽनुगच्छेत्स्यात् तस्य सर्वे इमे पूर्वोक्ता वशगा भवन्ति सपालाः लोकास्तस्मै बलिं यच्छन्ति भवदीयं मनो वशे वर्तते न वेति भावः ॥ २० ॥

आत्मनस्तव आत्मा चित्तं यन्न प्रीयते न तुष्यति तत्किं स्वतः परतो वा यतस्त्वाम् अलब्धकाममप्राप्तमनोरथं लक्षये तत्र हेतुः तव मुखं शबलं निष्प्रभमस्ति ॥ २१ ॥

विदुषा तद्वृत्तज्ञेनापि एवं विकल्पितः तन्मुखेन तद्वचोद्घाटनार्थम् प्रजाकामः पुत्रकामः ॥ २२ ॥

यच्छरीरिणां बहिरन्तस्तद्योगिनां भवतां किं न विदितं सर्वं विदितमेवेत्यर्थः ॥ २३ ॥

आत्मनि मनसि ॥ २४ ॥

भाषाटीका ।

अंगिरा उवाच ॥

हे राजन् ! तुम और तुमारी प्रजा का आरोग्य और मंगल तो है, जैसे जीव महदादिक सप्त प्रकृति से रक्षित रहता है ऐसे ही राजा भी अमात्यादि सात प्रकृति से रक्षित रहते हैं ॥ १७ ॥

राजा अपने को प्रकृति के अनुकूल करदे तो (श्रेय) सुख को प्राप्त होता है ॥ हे नरदेव ! ऐसे ही (प्रकृति) प्रजा भी राजा के अनुकूल होने से सुख को प्राप्त होवे हैं ॥ १८ ॥

हे राजन् ! जिसका मन स्वाधीन है, उसके दारा, प्रजा, दीवान, सिपाही, धनीलोग, मंत्री, पुरवासी, देश वासी और पुत्रादिक सबही वश में रहते हैं और लोकपाल भी आप्रत होकर उसको (बलि) भेट देते हैं ॥ १९ । २० ॥

राजन् ! तुम अपने से प्रसन्न नहीं हो । आप से अथवा और से तुमको मनोरथ नहीं प्राप्त हुआ ऐसा हमको जान पड़ता है, क्योंकि ? तुमारा मुख चिन्ता से व्याप्त है ॥ २१ ॥

श्री शुकदेव जी बोले । कि हे राजन् ! विद्वान मुनि श्री अंगिरा जी ने राजा से जब ऐसे पूछा तब राजा भी (प्रजा) संतान की कामना करके विनय से नम्र होकर मुनि से बोला ॥ २२ ॥

लोकपालैरपि प्रार्थ्याः साम्राज्यैश्वर्यसम्पदः ।
न नन्दयन्त्यप्रजं मां क्षुत्तृट्काममिवाऽपरे ॥ २५ ॥
ततः पाहि महाभाग ! पूर्वैः सह गतं तमः ।
यथा तरेम दुस्तारं प्रजया तद्विधेहि नः ॥ २६ ॥

श्रीशुक उवाच ।

इत्यर्थितः स भगवान् कृपालुर्ब्रह्मणः सुतः ।
श्रपयित्वा चरुं त्वाष्ट्रं त्वष्टारमयजद्विभुः ॥ २७ ॥
ज्येष्ठा श्रेष्ठा च या राज्ञो महिषीणां च भारत ! ।
नाम्ना कृतद्युतिस्तस्यै यज्ञोच्छिष्टमदाद्विजः ॥ २८ ॥
अथाऽऽह नृपतिं राजन् ! भवितैकस्तवाऽऽत्मजः ।
हर्षशोकप्रदस्तुभ्यमिति ब्रह्मसुतो ययौ ॥ २९ ॥
साऽपि तत्प्राशनादेव चित्रकेतोरधारयत् ।
गर्भं कृतद्युतिर्देवी कृत्तिकाऽग्नेरिवात्मजम् ॥ ३० ॥
तस्या अनुदिनं गर्भः शुक्लपक्ष इवोडुपः ।
ववृधे शूरसेनेशतेजसा शनकैर्नृप ! ॥ ३१ ॥
अथ काल उपावृत्ते कुमारः समजायत ।
जनयन् शूरसेनानां शृण्वतां परमां मुदम् ॥ ३२ ॥

भाषा टीका ।

चित्रकेतुरुवाच ॥

हे भगवन् ! तप ज्ञान समाधि से नष्ट पाप वाले मुनियों को जीवों के बाहर और भीतर का कौनसा समाचार नहीं विदित है ॥ २३ ॥

हे ब्रह्मन् ! आप जानते हो तो भी आपके पूछने से जो मेरे मन में चिंता है सो आपकी आज्ञा से प्रेरित होकर कहता हूं ॥ २४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

अप्रजमपुत्रं क्षुत्तृड्भ्यामन्नपानकाममपरे स्रक्चन्दनादयो यथा न सुखयन्ति ॥ २५ ॥

पूर्वैः पित्रादिभिः सह गतं प्राप्तं तमो नरकं प्रजया यथा तरेम तत्तथा विधेहि ॥ २६ ॥ २७ ॥

यज्ञोच्छिष्टं यज्ञशेषम् ॥ २८ ॥

जन्मना हर्षं मरणेन च शोकं प्रददातीति तथा इत्येवमुक्त्वा ययौ ॥ २९ ॥ ३० ॥

शूरसेनानामीशस्य तेजसा वीर्येण यो गर्भः स ववृधे ॥ ३१ ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तावत् स्वस्य पुत्रालाभप्रयुक्तायाश्चिन्ताया नितरामनिवृत्तिहेतुत्वं यदश्चिन्तितमाह—लोकपालैरिति । लोकपालैरपि प्रार्थ्यास्तेषामपि दुर्लभा इति भावः साम्राज्यं सार्वभौमत्वं तद्रूपं यदैश्वर्यं तत्प्रयुक्ताः सम्पदः भोग्यभोगोपकरणादिसमृद्धयः अप्रजमपुत्रं मां न नन्दयन्ति न सुखयन्ति यथा क्षुत्तृड्भ्यामन्नपानादिकं कामयमानमितरे स्रक्चन्दनवनितादयो न सुखयन्ति तद्वत् ॥ २५ ॥

तत्तस्मात् हे महाभाग ! पूर्वैरस्मत्पित्रादिभिः सह मया गतं प्राप्तं दुस्तारं तमो नरकं यथा प्रजया पुत्रेण हेतुना यथा तरेम तथा विधेहि तथाऽनुग्रहाणेत्यर्थः "अपुत्रस्य गतिर्नास्ति" इति किंवदन्तीमनुसृत्य पूर्वैः सह गतं तम इत्युक्तं "प्रजया

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पितृभ्यः" इति श्रुत्युक्तरीत्या प्रजाया अभावे पितृऋणानिवृत्तेरप्रजस्य तमः प्राप्तिं सिद्धवत्कृत्वा गतमित्युक्तम् ॥ २६ ॥

एवमुक्तोऽङ्गिरास्तमनुगृह्णन्पुत्रकामेष्ट्या याजयित्वा यज्ञोच्छिष्टं हविर्भार्यायै प्रदाप्य ययावित्याह मुनिः—इतीति । इतीत्थं चित्रकेतुनाऽभ्यर्थितो याचितस्स भगवान् ब्रह्मणः चतुर्मुखस्य सुतो विभुरङ्गिराः कृपालुस्त एव त्वाष्ट्रं त्वष्टृदेवताकं चरुं श्रपयित्वा पाचयित्वा तेन चरुणा त्वष्टारमयजत् अयाजयत् स्वयमार्त्विज्यकरणेनेष्टवान्वा ततो हे भारत, राज्ञश्चित्रकेतोर्भार्याणां मध्ये या ज्येष्ठा श्रेष्ठा च नाम्ना कृतद्युतिरिति प्रसिद्धा भार्या तस्यै यज्ञोच्छिष्टं यज्ञशिष्टं हविः विप्रोऽङ्गिरा अदाद्दत्तवान् ॥ २७ ॥ २८ ॥

अथाङ्गिरा नृपतिं चित्रकेतुमाह-उवाच तदेवाह हे राजन् चित्रकेतो, तव पुत्रो भविता जनिष्यते कथम्भूतः तुभ्यं हर्षशोकप्रदः जन्मना हर्षं मरणेन शोकं च प्रददातीति तथा इत्येवमुक्त्वा ब्रह्मणः सुतोऽङ्गिरा ययौ गतः ॥ २९ ॥

ततः सा कृतद्युतिश्चित्रकेतोर्भार्या तस्य यज्ञावशिष्टस्य प्राशनाद्भक्षणादेव हेतोश्चित्रकेतोः सकाशात्पुत्ररूपं गर्भमधारयद्धृतवती यथा कृत्तिकाऽग्नेः सकाशाद्गर्भं कुमाररूपं दधार तद्वत् ॥ ३० ॥

तस्यां कृतद्युतावनुदिनं शुक्लपक्षे उडुपश्चन्द्र इव शूरसेनानां ईशस्य चित्रकेतोस्तेजसा वीर्येण गर्भः शनैर्ववृधे पप्रथे आस ॥ ३१ ॥

अथ काले दशमासात्मके काले उपावृत्ते गते सति कुमारः पुत्रः समजायत कथम्भूतस्सन् राज्ञः पुत्रोत्पत्तिं शृण्वतां शूरसेनदेशस्थानां जनानां परमां मुदं हर्षं जनयन्नुत्पादयन् सन् ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अपरे स्रक्चन्दनवनितादयः ॥ २५ ॥

पालनप्रकारमाह-पूर्वैरिति । पूर्वैः पूर्वजैः सह गतं प्राप्तं तमो नरकं यथा यया प्रजया तरेम तत्तादृशं प्रजालक्षणं वस्तु यद्वा यथा येनोपायेन तरेम तथोऽस्माकं विधेहि स क उपाय इति चिन्ता माभूदित्याह - प्रजयेति ॥ २६ ॥

त्वाष्ट्रं त्वष्टृदेवतम् ॥ २७—२९ ॥

प्राशनात्स्वीकारात् ॥ ३० ॥

शूरसेनस्य चित्रकेतोः ॥ ३१ ॥

शूरसेनानां विषयाणाम् ॥ ३२—३४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पुत्रदानमिषेण वैराग्योत्पादनद्वारा भगवदभिमुखीकरणेच्छुत्वात् कृपालुः तथा च वक्ष्यते स्वयमेव । "तदैव ते परं ज्ञानं ददामि गृहमागतः । ज्ञात्वान्याभिनिवेशन्ते पुत्रमेव ददाम्यहम्" इति ॥ २७ ॥ २८ ॥

निजदोषप्रत्याख्यानार्थं हर्षशोकप्रद इत्युक्तम् ॥ २९—३० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

क्षुत्तृड्भ्यामन्नजलयोः कामो यस्य तं अपरे स्रक्चन्दनादयः ॥ २५ ॥

पूर्वैः पित्रादिभिः सह गतं प्राप्तं तमः नरकं प्रजया यथा तरेम तथा विधेहि ॥ २६ ॥

त्वाष्ट्रं त्वष्टृदेवताकम् ॥ २७ ॥

प्रथमव्यूढत्वेन ज्येष्ठा सौभाग्यातिशयेन च श्रेष्ठा यज्ञोच्छिष्टं यज्ञशेषं चरुम् ॥ २८ ॥

हर्षशोकप्रद इति केन प्रकारेण हर्षप्रदः केन प्रकारेण शोकद इति सम्प्रत्यहं किं ब्रवीमि जन्ममृत्युभ्यां राजैवायत्यां ज्ञास्यति किञ्चेयमप्रियोक्तिरपि सम्प्रत्यवश्यवाच्यैवाग्रे राज्ञा दास्यमानस्योपालम्भनस्य प्रत्युत्तरार्थमिति मनसि विमृश्य तत्त्वं स्पष्टमनुक्त्वा ययौ । पुत्रो मे बहुगुणान्वितो भविष्यतीति हर्षदस्तदपि ऐश्वर्याधिक्यान्न मे वचस्करो भविष्यतीति शोकद इति भवतु तद्दुःखं मया सोढव्यमिति मनसि विचार्य राजात्वाननन्देवेति ज्ञेयम् ॥ २९ ॥

अग्नेः सकाशात् कृत्तिका स्वात्मजमिवेत्यर्थः ॥ ३०—३४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

क्षुत्तृड्भ्यां कामः अन्नोदकाभिलाषा यस्य तमितरे स्रक्चन्दनादयो यथा न नन्दयन्ति न सुखयन्ति तथा अप्रजमनपत्यं मां साम्राज्यैश्वर्यसम्पदो न नन्दयन्ति ॥ २५ ॥

ततस्तेनाप्रजत्वेन तमो नरकभयं पूर्वैः सह गतं प्राप्तं मां पाहि । हे महाभाग ! दुस्तारं तमः प्रजया यथा तरेम तद्विधेहि कुरु ॥ २६ ॥

त्वाष्ट्रस्त्वष्टृदेवताकं चरुं श्रपयित्वा त्वष्टारमयजत् ॥ २७ ॥

ज्येष्ठा सर्वाभ्यः प्राक्परिगृहीता श्रेष्ठा गुणाधिका यज्ञोच्छिष्टं यज्ञशेषम् ॥ २८ ॥

अथ ब्रह्मसुतः अङ्गिरा नृपतिमाह । हे राजन् ! तव एक आत्मजः भविता स च तुभ्यं हर्षशोकप्रद इति तदनन्तरं ययौ ॥ २९ ॥

प्राशनाद्भोजनात् ॥ ३० ॥

शूरसेनेशस्य चित्रकेतोस्तेजसा वीर्येण यो गर्भः स शुक्लपक्षे उडुप इव ववृधे ॥ ३१ ॥

उपावृत्ते प्राप्ते ॥ ३२ ॥

हृष्टो राजा कुमारस्य स्नातः शुचिरलङ्कृतः ।
वाचयित्वाऽऽशिषो विप्रैः कारयामास जातकम् ॥ ३३ ॥
तेभ्यो हिरण्यं रजतं वासांस्याभरणानि च ।
ग्रामान्हयान्गजान्प्रादाद्धेनूनामर्बुदानि षट् ॥ ३४ ॥
ववर्ष काममन्येषां पर्जन्य इव देहिनम् ।
धन्यं यशस्यमायुष्यं कुमारस्य महामनाः ॥ ३५ ॥
कृच्छ्रलब्धेऽथ राजर्षेस्तनयेऽनुदिनं पितुः ।
यथा निःस्वस्य कृच्छ्राप्ते धने स्नेहोऽन्ववर्धत ॥ ३६ ॥
मातुस्त्वतितरां पुत्रे स्नेहो मोहसमुद्भवः ।
कृतद्युतेः सपत्नीनां प्रजाकामज्वरोऽभवत् ॥ ३७ ॥
चित्रकेतोरतिप्रीतिर्यथा दारे प्रजावति ।
न तथाऽन्येषु सञ्जज्ञे बालं लालयतोऽन्वहम् ॥ ३८ ॥
ताः पर्यतप्यन्नात्मानं गर्हयन्त्योऽभ्यसूयया ।
आनपत्येन दुःखेन राज्ञोऽनादरणेन च ॥ ३९ ॥
धिगप्रजां स्त्रियं पापां पत्युश्चागृहसम्मताम् ।
सुप्रजाभिः सपत्नीभिर्दासीमिव तिरस्कृताम् ॥ ४० ॥

भाषा टीका ।

लोकपालों को प्रार्थनीय साम्राज्यैश्वर्य और संपदा बिना पुत्र के हमको सुख नहीं देती, जैसे भूखे प्यासे को स्रक् चंदनादिक ॥ २५ ॥

हे महाभाग ! जिस कारण से पितृ पितामहादिकन सहित हम संतान के द्वारा जैसे दुस्तर नरक को तरजावें ऐसा आपही उपाय करो ॥ २६ ॥

श्रीशुक उवाच ॥

परम कृपालु ब्रह्मपुत्र भगवान अंगिरा से जब राजा ने ऐसे प्रार्थना करी तब उनने त्वाष्ट्र चरु बना कर त्वष्टा का यजन किया ॥ २७ ॥

हे भारत ! रानियों में जो जेठी और श्रेष्ठ नाम से कृतद्युति रानी रही ऋषिने यज्ञ का उच्छिष्ट उसी को दिया ॥ २८ ॥

अनंतर ऋषि राजा से बोले कि तुमारे हर्ष और शोक देने वाला एक पुत्र होगा ऐसा कह कर ऋषि चले गये ॥ २९ ॥

कृत द्युति रानी भी चरु के प्राशन करने से कृत्तिका अग्नि कुमार के नांई चित्रकेतु के गर्भको धारण करती हुई ॥ ३० ॥

रानी का भी (शूरसेन) राजा के वीर्य से जो गर्भ रहा सो शुक्ल पक्ष में चंद्र के नांई धीरे २ बढने लगा ॥ ३१ ॥

पश्चात् समय होने पर राजकुमार उत्पन्न भया । जिसको सुनकर शूरसेन देश के लोगों को आनंद हुआ ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

जातकं जातकर्म ॥ ३३ ॥

अर्बुदं दशकोटयः भेदे तु कोटिरेवार्बुदम् नियुतं च प्रयुतं चार्बुदमेति प्रयुतानन्तरं निर्देशात् ॥ ३४ ॥

धन्यं धनकरम् आयुष्यमायुष्करम् महामना अत्युदारः ॥ ३५ ॥ ३६ ॥

मोहस्य समुद्भवो यस्मिन् प्रजाकामरूपो ज्वरस्तापः ॥ ३७ ॥

दारे इत्येकवचनमार्षम् ॥ ३८ ॥

आनपत्येनापुत्रत्वनिमित्तेन ॥ ३९ ॥

न गृहे सम्मतां न बहुमतां यद्वा गृहिण्येव गृहं न भार्येति सम्मतामित्यर्थः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः हृष्टो हर्षयुक्तो राजा चित्रकेतुः सद्य एव स्नात्वा शुचिरुदारमनाः वस्त्रादिभिरलंकृतश्च कुमारस्य विप्रैराशिषो वाचयित्वा जातकं जातकर्म कारयामास ॥ ३३ ॥

ततस्तेभ्यो विप्रेभ्यो हिरण्यादीन् धेनूनां षडर्बुदानि च ग्रामान् प्रदत्तवान् तत्र हया अश्वा अर्बुदं दश कोट्यः शतकोटि वाऽर्बुदं "प्रयुतं चार्बुदं च" इति प्रयुतानन्तरं निर्देशात् तथान्येभ्योपि बन्धुभृत्यादिभ्यः कामानिष्टार्थान्पर्जन्य इव ववर्ष धनकरं यशस्करं पुत्रस्यायुष्करञ्च यथा भवति तथा ववर्षेति क्रियाविशेषणान्येतानि ॥ ३४ ॥ ३५ ॥

अथ कृच्छ्रलब्धे बहुप्रयासलब्धे तनये पितुराजर्षेश्चित्रकेतोः स्नेहोऽन्ववर्द्धत अन्वैधत यथा निःस्वस्य निर्द्धनस्य पुंसः कृच्छ्रात्ते कष्टलब्धे धने स्नेहोऽन्ववर्द्धते तद्वत् ॥ ३६ ॥

तथा मातुरपि कृतद्युतेस्तनये ऽतितरां नितरां मोहसमुद्भवः स्नेह अन्ववर्द्धत मोहात्समुद्भवो यस्य मोहसमुद्भवः मोहस्य समुद्भवो यस्मादिति वा तदा कृतद्युतेः सपत्नीनां प्रजाकामज्वरः पुत्राभिलाषरूपसन्तापो ऽभवत् ॥ ३७ ॥

यदाऽनुदिनं पुत्रं लालयतश्चित्रकेतोः प्रजावति पुत्रवत्यां दारे भार्यायां कृतद्युतौ यथाऽतिप्रीतिस्तथेतरेषु दारेषु प्रीतिर्नासीत् ॥ ३८ ॥

ततस्तावत् सपत्न्यः आत्मसु राज्ञोऽनादरेणानपत्येन अपुत्रत्वनिमित्तेन दुःखेन च पुत्रवत्यां सपत्न्यां कृतद्युतावभ्यसूयया आत्मानं निन्दयन्त्यः पर्यतप्यन् परितप्ता बभूवुः ॥ ३९ ॥

गर्हापूर्वकपरितापं तासां दर्शयति—धिगिति द्वाभ्यां । अप्रजामपुत्रवतीमत एव पापां मादृशीं स्त्रियं धिक् मादृशी स्त्री निन्द्येत्यर्थः निन्द्यत्वे हेतून्वदन्त्यः स्त्रियं विशिंषन्ति पत्युश्चागृहसम्मतां गृहे सम्मतेष्टा गृहसम्मता तथा न भवतीत्यगृहसम्मता पत्युर्गृहेऽसम्मताम् इत्यर्थः किञ्च सुप्रजाभिः शोभनापत्यवतीभिः सपत्नीभिर्दासीमिव तिरस्कृतां तुच्छीकृताम् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कीदृशं कर्माकरोदत्राह । धन्यमिति । धन्यं स्वधनादिसम्पत्करम् ॥ ३५ ॥

निःस्वस्य दरिद्रस्य ॥ ३६—३७ ॥

प्रजावति पुत्रवति ॥ ३८—४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

धन्यमुत्तमं कामं ववर्ष। नत्वधन्यं महामनाः अत्युदारः ॥३५॥ ३६॥
प्रजाकामरूपोज्वरस्तापः ॥ ३७ ॥ ३८ ॥ ॥ ३९ ॥
अगृहं गृहभिन्नं वनं तत्रैव सम्मतां पत्युरपि वनवासदानार्हामित्यर्थः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कुमारस्य आशिषो वाचयित्वा जातकं जातकर्म कारयामास ॥ ३३ ॥

षडर्बुदानि षष्टिकोट्यः ॥ ३४ ॥

कुमारस्य धन्यं धनकरं यशस्यं यशोवर्द्धनम् आयुष्यमायुष्करम् यथा स्यात्तथा देहिनां यथा कामं पर्जन्य इव ववर्ष ॥ ३५ ॥

निःस्वस्य निर्धनस्य ॥ ३६ ॥

मातुश्च मोहस्य अहं पुत्रवती अयं मे पुत्र इत्येवं भूतस्य संसारपदस्य समुद्भवो यस्मात्स स्नेहोऽतितरामन्ववर्द्धतेति पूर्वेणान्वयः कृतद्युतेः सपत्नीनां तु प्रजाकामरूपो ज्वरस्तापो ऽभवत् ॥ ३७ ॥

प्रजावति दारे भार्यायां यथा चित्रकेतोरतिप्रीतिस्तथाऽन्येषु दारेषु न सञ्जज्ञे ॥ ३८ ॥

ता आत्मानं गर्हयन्त्य आनपत्येन अपुत्रत्वनिमित्तेन दुःखेन राज्ञोऽनादरेण च अभ्यसूयया सर्वत्र दोषारोपेण च पर्यतप्यन् परितप्ताः आसन् ॥ ३९ ॥

पत्युः अगृहसम्मतां न गृहेसम्मतां वृत्तिहानाभिःसारयितुं योग्यामित्यर्थः मादृशीमप्रजां धिक् ॥ ४० ॥

भाषा टीका ।

राजा भी हर्षित हो स्नान से पवित्र होकर अलंकृत होकर ब्राह्मणों से स्वस्ति वाचन करा कर कुमार का जात कर्म करवाता हुआ ॥ ३३ ॥

उन ब्राह्मणों को राजा ने सोना चांदी वस्त्र आभूषण ग्राम हाथी घोड़ा दिये और छै अर्बुद गाय दीं ॥ ३४ ॥

राजा ने उदार चित्त होकर अन्य प्राणियों को भी यथेष्ट मेघ के नाईं वर्षा करी कि जिंससे कुमार का धन यश और आयु होय ॥ ३५ ॥

पीछे राजा के बड़े दुःख से प्राप्त उस पुत्र में प्रति दिन स्नेह बढा जैसे दरिद्री को दुःख से प्राप्त हुवे धन में ॥ ३६ ॥

माता का तो मोह से उत्पन्न होने वाला पुत्र में अत्यन्त ही स्नेह भया ॥ और कृतद्युति रानी की सपत्नियों (सोतों) को तो पुत्र कामना रूप ज्वर होगया ॥ ३७ ॥

बालक को खिलाते २ दिन प्रति राजा की जैसी पुत्रवाली रानी में प्रीति भई। उस प्रकार और रानियों में नहीं हुई ॥ ३८ ॥

अन्य रानिये असूया से अपने को निन्दित समुझ कर अपुत्रिपने के दुःख और राजा के निरादर से बहुत दुःख पाने लगी ॥ ३९ ॥

और कहने लगी कि पापिन विनासन्तान वाली स्त्री को धिक्कार है। सुन्दर सन्तान वाली सपत्नियों से वह सदा दासीके सदृश तिरस्कृत रहती है ॥ ४० ॥

दासीनां को नु सन्तापः स्वामिनः परिचर्यया ।
अभीक्ष्णं लब्धमानानां दास्या दासीव दुर्भगाः ॥ ४१ ॥
एवं सन्दह्यमानानां सपत्न्याः पुत्रसम्पदा ।
राज्ञोऽसम्मतवृत्तीनां विद्वेषो बलवानभूत् ॥ ४२ ॥
विद्वेषनष्टमतयः स्त्रियो दारुणचेतसः ।
गरं ददुः कुमाराय दुर्मर्षा नृपतिं प्रति ॥ ४३ ॥
कृतद्युतिरजानन्ती सपत्नीनामघं महत् ।
सुप्त एवेति सञ्चिन्त्य निरीक्ष्य व्यचरद्गृहे ॥ ४४ ॥
शयानं सुचिरं बालमुपधार्य मनीषिणी ।
पुत्रमानय मे भद्रे ! इति धात्रीमचोदयत् ॥ ४५ ॥
सा शयानमुपव्रज्य दृष्ट्वा चोत्तारलोचनम् ।
प्राणेन्द्रियात्मभिस्त्यक्तं हतास्मीत्यपतद्भुवि ॥ ४६ ॥
तस्यास्तदाकर्ण्य भृशातुरं स्वरं घ्नन्त्याः कराभ्यामुर उच्चकैरपि ।
प्रविश्य राज्ञी त्वरयाऽऽत्मजान्तिकं ददर्श बालं सहसा मृतं सुतम् ॥ ४७ ॥
पपात भूमौ परिवृद्धया शुचा मुमोह विभ्रष्टशिरोरुहाम्बरा ॥ ४८ ॥
ततो नृपान्तःपुरवर्तिनो जना नराश्च नार्यश्च निशम्य रोदनम् ।
आगत्य तुल्यव्यसनाः सुदुःखितास्ताश्च व्यलीकं रुरुदुः कृतागसः ॥ ४९ ॥
श्रुत्वा मृतं पुत्रमलक्षितान्तकं विनष्टदृष्टिः प्रपतन्स्खलन्पथि ।
स्नेहानुबन्धैधितया शुचा भृशं विमूर्छितोऽनुप्रकृतिर्द्विजैर्वृतः ॥ ५० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दास्या दासी यथा तथा वयं दुर्भगाः ॥ ४१ ॥

न सम्मता वृत्तिर्जीवनं यासाम् ॥ ४२ ॥

विद्वेषेण नष्टा मतिर्यासां ताः गरं विषं दुर्मर्षा असहमानाः ॥ ४३ ॥ ४४ ॥

धात्रीं स्तनदायिनीम् ॥ ४५ ॥

उद्गते तारके कनीनिके ययोस्ते लोचने यस्य तम् ॥ ४६ ॥ ४७ ॥

विभ्रष्टाः शिरोरुहा अम्बरञ्च यस्याः सा ॥ ४८ ॥

ताश्च सपत्न्योऽपि ॥ ४९ ॥

अलक्षितोऽन्तको मृत्युहेतुर्यस्य तम् अनुगता प्रकृतयोऽमात्या दयो यस्य सोऽनुप्रकृतिः ॥ ५० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च दास्यपेक्षयाप्यपुत्रा नारी निन्द्येत्यात्मनो गर्हयन्ते—दासीनामिति। दासीनां को नु सन्तापः न कोपि सन्तापोऽस्ति तत्र हेतुः परिचर्यया सेवया स्वामिनः सकाशादभीक्ष्णं पुनः पुनः लब्धः काम इष्टार्थो याभिस्तासां स्वामिनः परिचर्यया लब्धकामाना-मिति वान्वयः अतो वयं दास्याः दासीव दुर्भगाः ॥ ४१ ॥

एवं सपत्न्याः कृतद्युतेः पुत्रसम्पदा नितरां दह्यमानचित्तानां राज्ञश्चित्रकेतोर्न सम्मता वृत्तिर्जीवनं यासां तासां बलवान् विद्वे-षोऽभूत् ॥ ४२ ॥

ततो नृपतिं चित्रकेतुं दुर्मर्षा असहमानास्तद्विद्वेषेण नष्टवि-वेकाः क्रूरचित्ताः स्त्रियः कुमाराय गरं विषं ददुः ॥ ४३ ॥

सपत्नीनां महदघं गरदानरूपमजानती कृतद्युतिः केवलं कुमारं वीक्ष्य सुप्त एवेति मत्वा गृहे व्यचरत्सञ्चचार ॥ ४४ ॥

कुमारं सुचिरतरं सुप्तमुपधार्य विज्ञाय मनीषिणी पुत्रलालन-

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका।

विषयकबुद्धिमती कृतद्युतिः हे भद्रे ! मे पुत्रमानयेति धात्रीं स्तन्यदायिनीमचोदयत् ॥ ४५ ॥

सा धात्री शयानं सुतं तम् उपव्रज्य कुमारसमीपङ्गत्वा उत्तारे उद्गते तारके कनीनिके ययोस्ते लोचने यस्य तादृशं प्राणै-रिन्द्रियैरात्मना जीवेन च त्यक्तं दृष्ट्वा हा हतास्मीति क्रोशन्ती भुव्यपतत् ॥ ४६ ॥

कराभ्यामुच्चैरतितरां उरो घ्नन्त्यास्ताडयन्त्यास्तस्या धात्र्याः नितरामातुरं दुःखयुक्तं दीनं स्वरमाकर्ण्य राज्ञी कृतद्युतिः त्वरया आत्मजस्यान्तिकं प्रविश्य सहसा सर्वथा मृतमेव बालं सुतं ददर्श ॥ ४७ ॥

ततः भूमौ पपात तथा परिवृद्धया एधमानया शुचा शोकेन मुमोह विचित्ताऽभूत्। मोहमेव दर्शयितुं तां विशिनष्टि—विभ्रष्ट-शिरोरुहाम्बरा विभ्रष्टाः विलुलिताः शिरोरुहाः केशा अंबरं च यस्याः सा ॥ ४८ ॥

ततः नृपस्यान्तःपुरवासिनो जनाः हे नृपेति सम्बोधनं वा जनानेवाह—नरा नार्यश्च सर्वे जना रोदनमाकर्ण्य कुमारसमीपमागत्य राज्ञा सह तुल्यदुःखाःसुदुःखिता बभूवुः। तदा कृतागसः गरदानेन कृतापराधा अपि ताः सपत्न्यः समागत्य व्यलीकं निष्कपटमिव यद्वा सकपटं यथा तथा मिथ्या वा रुरुदुः स्वाऽपराधं प्रच्छादयितुमिति भावः ॥ ४९ ॥

न लक्षितः मृत्युहेतुर्यस्य तं मृतं सुतं श्रुत्वा स चित्रकेतुः दुःखितो-भूदिति शेषः। तदेवाह—विनष्टदृष्टिरिति पुत्रे स्नेहानुबन्धः तेना-नुबद्धस्तेन हेतुना एधितया वर्द्धितया शुचा शोकेनातीव पीडितः अत एव विनष्टदृष्टिः विनष्टा दृष्टिर्यस्य ऽत एव पथि कचित्प्रपतन् कचिच्च स्खलन् कचिच्चिमूर्छितः स राजराजः चित्रकेतुरनुसृत्य गच्छद्भिः प्रकृतिभिरमात्यादिभिः द्विजैश्च परिवृतः ॥ ५० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

स्वामिनः स्नेहाभावे दासीत्वमप्रयोजकमित्याह। दासीना-मिति ॥ ४१—४२ ॥

गरं विषं ॥ ४३—४४

धात्रीं स्तनदात्रीम् ॥ ४५ ॥

उत्तारलोचनम् उन्नततारायुक्तनेत्रम् ॥ ४६—४९ ॥

अनुप्रकृतिः सप्रकृतिजनः ॥ ५०—५२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

दास्या दासीव कस्याश्चिद्दुर्भगाया दास्या इव वयं दुर्भगा इत्यर्थः ॥ ४१ ॥

राज्ञोऽसम्मता दुरितमरिष्टं यासाम् ॥ ४२ ॥

दुर्मर्षा असहमानाः ॥ ४३—४६ ॥

बालमेव सुतं तं मृतं ददर्शेत्यन्वयः ॥ ४७ ॥ ॥ ४८ ॥

ताश्च सपत्न्योऽपि ॥ ४९ ॥

अलक्षितोऽन्तको मृत्युर्यस्य तम् अनुप्रकृतिः अनुगतामात्य सुहृदादिकः द्विजैर्वृतः पपातेति अमात्यादयो ब्राह्मणादयश्च पेतुरित्यर्थः ॥ ५० ॥ ५१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

दास्या दासीव दुर्भगा वयमिति शेषः ॥ ४१ ॥

राज्ञो न सम्मता दुरितजीवनं यासाम् ॥ ४२ ॥

विक्षेपेण नष्टा मतिर्यासां ताः नृपतिं प्रति दुर्मर्षा क्रुद्धाः ॥ ४३ ॥

महदघं विषदानरूपं पापम् ॥ ४४ ॥

धात्रीं स्तनदायनीमचोदयत् ॥ ४५ ॥

उद्गते तारे कनीनिके ययोस्ते लोचने यस्य तम् प्राणैः इन्द्रियैः आत्मना जीवेन च त्यक्तं मृतं दृष्ट्वा ॥ ४६ ॥

कराभ्यामुच्चकैरुरः घ्नन्त्या भृशातुरं स्वरमाकर्ण्य सहसा बालमेव सुतं मृतं ददर्श ॥ ४७ ॥

विभ्रष्टाः शिरोरुहाः अंबरं च यस्याः सा पपात मुमोह च ॥ ४८ ॥

तदनन्तरं नृपान्तःपुरवर्त्तिनो जनाः तुल्यव्यसनाः अत एव सुदुःखिताः रुरुदुः ताश्च कृतागसः सपत्न्यो व्यलीकं मृषैव रुरुदुः ॥ ४९ ॥

न लक्षितोऽन्तको मृत्युहेतुर्यस्य तम् मृतं श्रुत्वा विनष्टा दृष्टिर्यस्य स स्नेहानुबन्धेनैधितया वर्द्धितया शुचा शोकेन भृशं विमूर्छितः अनु अनुगताः प्रकृतयोऽमात्यादयो यस्य सः ॥ ५० ॥

भाषा टीका।

दासियों को क्या दुःख है क्योंकि उनको तो स्वामी की सेवा से सदा मान ही मिलता है भाग्यहीन स्त्री तो दासियों की भी दासी के सदृश हैं ॥ ४१ ॥

इस प्रकार सपत्नी की पुत्ररूप सम्पत् से जलने वाली और राजाके असम्मत वृत्ति वाली उन रानियों को बलवान् विक्षेप पैदा हुआ ॥ ४२ ॥

एक तो ज्ञात की स्त्री आप ही दुःखदायी चित्तवाली दूसरे विक्षेप से उनकी मति नष्ट होगई तब राजा के ऊपर अमर्ष करके पुत्रको विष दे दिया ॥ ४३ ॥

रानी कृतद्युति सपत्नियों के भारी कपट को न जान कर, सोता है ऐसे विचार कर देखकर के भी घर में विचर ती रहा ॥ ४४ ॥

पपात बालस्य स पादमूले मृतस्य विस्रस्तशिरोरुहाम्बरः ।
दीर्घं श्वसन्बाष्पकलोपरोधतो निरुद्धकण्ठो न शशाक भाषितुम् ॥ ५१ ॥
पतिं निरीक्ष्योरुशुचाऽर्पितं तदा मृतं च बालं सुतमेकसन्ततिम् ।
जनस्य राज्ञी प्रकृतेश्च हृद्रुजं सती दधाना विललाप चित्रधा ॥ ५२ ॥
स्तनद्वयं कुङ्कुमगन्धमण्डितं निषिञ्चती साञ्जनबाष्पबिन्दुभिः ।
विकीर्य केशान्विगलत्स्रजः सुतं शुशोच चित्रं कुररीव सुस्वरम् ॥ ५३ ॥
अहो विधातस्त्वमतीव बालिशो यस्त्वात्मसृष्ट्यप्रतिरूपमीहसे ।
परेऽनुजीवत्यपरस्य या मृतिर्विपर्ययश्चेत्त्वमसि ध्रुवः परः ॥ ५४ ॥
न हि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदाऽऽत्मकर्मभिः ।
यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्ते तमिमं विवृश्चसि ॥ ५५ ॥
त्वं तात ! नार्हसि च मां कृपणामनाथां त्यक्तुं विचक्ष्व पितरं तव शोकतप्तम् ।
अञ्जस्तरेम भवताऽप्रजदुस्तरं यद्ध्वान्तं नयाह्यकरुणेन यमेन दूरम् ॥ ५६ ॥
उत्तिष्ठ तात ! त इमे शिशवो वयस्यास्त्वामाह्वयन्ति नृपनन्दन ! संविहर्तुम् ।
सुप्तश्चिरं ह्यशनया च भवान्परीतो भुंक्ष्व स्तनं पिब शुचो हर नः स्वकानाम् ॥ ५७ ॥
नाहं तनूज ! ददृशे हतमङ्गला ते मुग्धस्मितं (१) मुदितवीक्षणमाननाब्जम् ।
किं वा गतोऽस्यपुनरन्वयमन्यलोकं नीतोऽघ्रणेन न शृणोमि कला गिरस्ते ॥ ५८ ॥

भाषाटीका ।

कृतद्युतिमती कृतद्युति ने बहुत काल से पुत्रको सोया समुझकर धाय से कहा कि हे भद्रे ! मेरे पुत्रको ले आ ॥ ४५ ॥

वह धाय सोते हुए बालक के निकट जाकर हाय ! मर गई ऐसे कह कर धरती पर गिरपड़ी ॥ ४६ ॥

उससमय दोनों हाथो से छाती कूटने वाली उस धाय के ऊंचे स्वर को सुन कर बड़ी जल्दी रानीने पुत्रके समीप जाकर एका एकी मरे हुए बालक को देखा ॥ ४७ ॥

बस उस बढे हुवे शोक के मारे रानी भी धरती पर गिर पड़ी और केश और वस्त्र खुल गये और मूर्च्छा को प्राप्त होगई ॥ ४८ ॥

तब तो राजा की रनिवास के नर और नारी सबही परिजन रोना सुन कर जल्दी आकर तुल्य दुःख वाले थे तौ भी और भाति दुःखित होकर रोने लगे । और जिनोने विषदिया था वो भी सब आकर मिथ्या रोने लगी ॥ ४९ ॥

राजा भी विनाकारण मालूम भये पुत्र की मराहुवा कर अन्धा सा होगया और मार्ग में गिरते पड़ते स्नेहानुबंध से अति मात्र बढे हुवे शोक के मारे मूर्च्छितहोता हुआ अमात्य ब्राह्मणादि को सहित बालक के पास जाकर मरे हुए बालक के पाउन में पड़गया । उस वखत केश और वस्त्र खुल गये बड़ी २ श्वास लेता था और आंशुओं के मारे कंठरुक गया और कुछ भी बोलने को समर्थ न हुआ ॥ ५०—५१ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

बाष्पकलाभिरश्रुबिन्दुभिरुपरोधतः संवृतत्वेन निरुद्धः कण्ठो यस्य ॥ ५१ ॥

उरुशुचार्पितं बहुशोकेन व्याप्तम् एकमेव सन्ततिम् ॥ ५२ ॥

विगलन्त्यः स्रजो येभ्यस्तान् केशान् ॥ ५३ ॥

आत्मसृष्टेरप्रतिरूपमननुरूपं चेष्टसे तदेवाह नु अहो परे वृद्धे जीवत्यपरस्य बालस्य या मृतिस्तत् [illegible] हि वृद्धस्य सृष्टिसामर्थ्याभावे बाले च मृते सति [illegible] सृष्टिर्नष्टा स्यादित्यर्थः । ननु, साम्प्रतं स्वसृष्टेर्विपरीतोऽस्मीति चेत्तत्राह—विपर्यये विपरीतोऽसि चेत्तर्हि त्वं प्राणिनां [illegible] दुःखकारित्वात् ध्रुवो नित्यः परः शत्रुरसि न तु कृपालुरित्यर्थः ॥ ५४ ॥

ननु, जीवकर्मानुसारेण जन्मादि कुर्वतो मम कोऽपराधस्त-

(१) मुदितवीक्षणमिति पाठान्तरम् । वीर०

श्रीधरस्वामिकृतभावार्थदीपिका ।

–महीति । पुत्रे जीवत्येव पिता म्रियते पितरि जीवत्येव जायत इति क्रमो नास्ति कर्माधीनत्वादिति चेत्तर्हि कर्मभिरेव तज्जन्मादिकमस्तु किं त्वया कृत्यं ? ननु, मयेश्वरेण जडैः कर्मभिरिदं कथं सिध्येत् ? भवतु नाम तथाऽपि गेहृद्वये ते त्वया यः स्नेहपाशः कृतस्तमिमं स्वयमेव सि छिनत्सीत्यादिक्रोशति न ह्येवं विधं दुःखं दृष्ट्वा पि पुत्रादिषु स्नेहं करिष्यतीति भावः ॥ ५५ ॥

अदुस्तरमप्रजानां दुस्तरम् अकरुणेन सह ॥ ५६ ॥

नया क्षुधा ॥ ५७ ॥

न हे पुत्र ! नाहं प्रथमं त्वत्पार्श्वमागता सती तव तं वक्त्रं ददृशे दृष्टवत्यस्मि इदानीमपि गिरो न तर्हि किमपुनरन्वयं पुनरागमनं यथा न भविष्यति तथाऽसि ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥

मद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सा बालस्य पादमूले पपात कथम्भूता विभ्रष्टा शिरोरुहा च यस्य दीर्घं यथा तथा श्वसन् श्वासं मुञ्चन् बाष्पकलाश्रुबिन्दुभिरुपरोधतः सम्भृतत्वेन निरुद्धः कण्ठो यस्य सः भाषितुं किञ्चिदपि वक्तुं न शशाक नाशक्नोत् ॥

तदोक्ता महता शोकेनार्पितं व्याप्तं पतिं तथैकमेव सन्ततिरूपं तं बालं पुत्रं च निरीक्ष्य जनस्य राज्ञः प्रकृतेरमात्यादेश्च रुजम् मनःपीडां दधाना पुष्णान्ती सती कृतद्युतिः राज्ञीति पाठे राज्ञी जनस्य प्रकृतेश्च हृद्रुजं दधाना सती चित्रधाऽनेकप्रकारं विललाप ॥ ५२ ॥

चित्रधा विलापमेव प्रपञ्चयति–स्तनद्वयमित्यादिना, कलशिरस्त इत्येतेन ताम्रकुङ्कुमगन्धेन कुङ्कुममिश्रहरिचन्दनेन मण्डितं भूषितं स्तनद्वयमञ्जनयुक्तैर्बाष्पबिन्दुभिरश्रुबिन्दुभिर्निषिञ्चन्ती विगलन्ती स्रक् व्यस्ता केशा विकीर्य कुररीव पुत्रंप्रति सुस्वरं चित्रंयथा तथा शुशोच ॥ ५३ ॥

हे धातस्त्वमहो बालिशः मूर्खः निष्कृपो वा कुतः यस्त्वमात्मसृष्टेः स्वकर्तृकसृष्टेः पित्रादिक्रमनिबद्धाया अप्रतिरूपम् अननुरूपम् ईहसे चेष्टसे तदेवाह–परे प्राक्कालजाते पित्रादौ अनुजीवति अपरस्य पश्चात्कालजातस्य पुत्रादेर्या मृतिर्मरणमिति तदेतदप्रतिरूपमित्यर्थः विपर्यय एव युक्तविपर्यय एव स्यात्पुत्रादौ जीवति पित्रादेरेव मृतिः स्यादित्यर्थः तर्हि त्वं ध्रुवं नूनं परः सर्वोत्कृष्टो भवेः नियमेन तदभावात्त्वं बालिश एवेति भावः । यद्वा ननु ईदृगस्तु पित्रादिक्रमेणैव मृतिस्त्वनियतेति चेत्तर्हि त्वं ध्रुवं नूनं परः सर्वोत्कृष्टोऽसीत्यधिक्षेपः ध्रुव इति प्रथमान्तपाठे तु त्वं नित्यः शत्रुरसीत्यर्थः ॥ ५४ ॥

ननु, तत्तत्कर्मानुसारेण उत्पत्तिमरणे अतः न मात्र क्रमोऽस्ति न वा ममापराधोऽस्तीत्यत्राह– न हीति । इह प्रकृतिमयदेहधारिणां मृत्युजन्मनो उत्पत्तिमरणयोः क्रमो नास्ति चेत् पश्चाज्जाते पुत्रे जीवत्येव पिता पूर्वं जातो म्रियत इत्येवंविधक्रमो नास्ति चेदित्यर्थः उत्पत्तिक्रमेणैव मृतिक्रमो नास्ति चेत्यर्थः जन्मग्रहणं दृष्टान्तार्थम् यथा जन्मनि क्रमोऽस्ति तथा मृतौ क्रमो नास्तीति चेत्तर्ह्यात्मकर्मभिः स्वस्वकर्मभिरेव तत्तदुत्पत्तिमृत्यादिकं सर्वमस्तु किमीश्वरेण त्वया कृत्यमस्ति ? कर्मानुसारेण फलप्रापकोऽहमिति चेत्तत्राह–य इति निजसर्गवृद्धये ते त्वया यः स्नेहपाशः पुत्रादिषु स्नेहरूपः पाशः कृतस्तमिमं स्वयमेव विवृश्चसि आर्षत्वात्प्रार्थनायां लट् छिन्धीत्यर्थः ॥ ५५ ॥

एवं दैवं प्रत्याक्रुश्याथ मृतं बालकं प्रति विललाप–त्वमिति । हे तात पुत्र ! मामनाथामेतद्दुःखसागराद्रक्षकरहितां दीनां दुःखितां त्यक्तुं त्वं नार्हसि तव शोकेन तप्तं पितरं चित्रकेतुं विचक्ष्व पश्य यद्यस्मात्त्वत्कर्तृकादवलोकनादप्रजदुस्तरमनपत्यत्वप्रयुक्तादपि क्लेशात् दुस्तरम् अप्रजत्वक्लेशस्तु यथाकथञ्चित्सोढुं शक्यः अयं तु नितरां सोढुमशक्य इति भावः ध्वान्तं शोकं तरेम यदि न पश्यसि तर्ह्यकरुणेन निर्घृणेन यमेन करणभूतेन मामपि दूरं नय मामपि यमसमीपं नयेत्यर्थः ॥ ५६ ॥

हे तात पुत्र ! त्वमुत्तिष्ठ इमे वयस्यास्त्वत्समानवयसः शिशवो बालाः हे नृपनन्दन ! त्वया सह संविहर्तुं त्वामाह्वयन्ति किञ्च त्वं चिरं सुप्तः अशनया क्षुधा च परीतो व्याप्तः अतः स्तन्यं दुग्धं पिब स्वकानां नोऽस्माकं शुचो दुःखानि अपनुद ॥ ५७ ॥

हे तनूज पुत्रक ! ते तवाननाब्जं मुखकमलमहं न ददृशे न दृष्टवती कथम्भूतं मुग्धं सुन्दरं स्मितं यस्मिन् मुदितवीक्षणं मुदिते चलत्पक्ष्मणी नेत्रे यस्मिन् तादृशं अत एव हतमङ्गला हतं मङ्गलं यस्याः साऽहमिदानीमपि तव कलाः मधुरा गिरः न शृणोमि नाश्रौषं तर्हि किमपुनरन्वयं पुनरागमनरहितमन्यवाङ्कि लोकान्तरं प्रत्यघृणेन निष्करुणेन दैवेन नीतः प्रापितः गतोऽसि किं चेत्यर्थः ॥ ५८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रोतॄणां चित्रवाचा वदन्ती शुशोचेति ॥ ५२ ॥ ५३ ॥

शोकलक्षणं वाक्यं दर्शयति–अहो इति । अतीव बालिशः जडाज्जडः कथं मम जाड्यमापाद्यत इति तत्राह–यस्त्विति । यस्त्वमात्मसृष्टेरप्रतिरूपं प्रतिकूलं विरुद्धमीहसे तु एव "दुःखादेवधारणे" इत्यभिधानात् कथमियं विरुद्धचेष्टाऽभूदिति तत्राह–पर इति परे पूर्वतने पितरि मातरि वा जीवत्यपरस्य पश्चादुत्पन्नस्य पुत्रस्य या मृतिः सा त्वयाऽऽपाद्यते यस्मात्तस्मादिति शेषः यद्यपि संहारेऽयं क्रमस्तथापि स्थितावनुपपन्नोऽयमिति सूचयति तनोषि वा । कथं तर्हि जाड्यपरिहार इति तत्राह–विपर्यय इति । उक्तविपर्ययोऽन्यथा पूर्वतनस्य पूर्वं मृतिः पश्चात्तनस्य पश्चान्मृतिः यदि तर्हि ध्रुवं निश्चितं त्वं परोऽसि जडादन्यः प्राप्नोषि कर्मानुसारित्वेष्टत्वादित्यर्थः ॥ ५४ ॥

सन्तापकोपरागादिष्वनर्थकवचः कश्चिदिति वचनात्सन्तापा-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दनन्वितमित्याह—नहीति । शरीरिणां मृत्युजन्मनोः क्रमो नास्ति चेत्तदा तर्हि आत्मकर्मभिः स्वकर्मानुकूल्येनास्तु ते त्वया स्वयं निजसर्गवृद्धये यः स्नेहपाशो मोहपाशो मम पुत्रोऽयमिति स्नेहानुबन्धः कृतस्तमिमं स्नेहपाशं विवृश्चसि भिनत्सीति न सम्यक्करोषि । ५५ ।

त्वमकरुणेन यमेन दूरं न याहीत्यन्वयः इदं क्रोधं कटाक्षीकृत्योक्तमिति ज्ञातव्यम् ॥ ५६ ॥

अशनयाऽशनेच्छया भवानित्यनर्थकवचः स्पष्टं प्रतीयते ॥ ५७ ॥

इदमपि रागनिमित्तमितिभावेनाह—नाहमिति मुदिते प्रसन्ने वीक्षणे यस्य तत्तथोक्तं क्रोधं ध्वनयन्ती शोचति । किंवेति अपुनरन्वयं पुनः सम्बन्धशून्यं अघृणेन यमेनेति शेषः ॥ ५८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एकश्चासौ सन्ततिर्वंशरूपश्च तं हृद्रुजं दधाना पुष्यन्ती सती ॥ ५२ ॥ ५३ ॥

अस्माकमेतादृशस्य दुःखस्य कारणं विधातैव । तस्यच कारणत्वं तदीयमूर्खत्वादेवेति निश्चित्य स न पुनरेवं क्वापि करोत्विति हितैषित्वेन तमेव प्रबोधयन्त्याह—अहो इति । बालिशत्वमेवाह यस्त्वम् आत्मनः सृष्टेः अप्रतिरूपं असदृशमनुचितं यथास्यात्तथा इत्यर्थः । ननु, किमनौचित्यं तत्राह परे वृद्धे जीवति अपरस्य बालस्य या मृतिस्तत् तदा हि वृद्धस्य सृष्टिसामर्थ्याभावे बालेच मृते सति तव सृष्टिलोप एव स्यादित्यर्थः विपर्ययश्चेत् संप्रति स्वसृष्टेर्विपरीतोस्मीति मन्यसे चेदित्यर्थः । तर्हि त्वमेवास्माकं परः शत्रुर्ध्रुवो निश्चित एव । स्वस्यापकारमपि कृत्वा अस्मान् दुःखयन् शत्रुत्वमेव व्यक्तीकरोषीत्यर्थः ॥ ५४ ॥

ननु जीवस्य कर्मानुसारेण जन्मादिकुर्वतो मम कोऽपराधस्तत्राह—नहीति । पुत्रे जीवत्येव पिता म्रियते पितरि मृते एव पुत्रो म्रियते इति क्रमो नास्ति कर्माधीनत्वादिति चेत् तर्हि आत्मकर्मभिरेव तज्जन्मादिकमस्तु किं त्वया कृत्यं ननु मयेश्वरेण विना जडैः कर्मभिरिदं कथं सिद्ध्येत् सत्यं त्वयैव सिद्ध्यतु तदपि निजसर्गवृद्धये यः स्नेहपाशस्त्वया स्वयमेव कृतस्तमिमं विवृश्चसि छिनत्सि स्नेहे एतादृशं दुःखं दृष्ट्वा पुत्रादिषु कोपि स्नेहं न करिष्यति स्नेहाकारणे पुत्रादयः कथं जीविष्यन्तीति सृष्टिलोपात् त्वं मूर्ख एवेसि भावः यद्वा कोऽर्थे लट् छिन्धीत्यर्थः । स्नेह एव सुखदुःखयोर्हेतुः । स्नेहाभावे पुत्रो जातः म्रियतां वा नैव स्यातां सुख दुःखे इति भावः ॥ ५५ ॥

बालिशेन विधात्रा सह किमित्यहं संलपामि स्वपुत्रमेव हितकृत्ये किमिति नावधापयामीति विमृश्याह त्वामिति हे तात ! भवता पुत्रेण अप्रजानामपुत्राणां दुस्तरं यत् ध्वान्तं नरकं तत्तरेम । ननु यमो मां स्वपुरं नयति अहं किं करोमि तत्राह—नयाहि अकरुणेन सह ॥ ५६ ॥

पुत्रं सुप्तं मत्वाह—उत्तिष्ठेति । अशनया क्षुधा ॥ ५७ ॥

हे तनूज ! तव मुग्धस्मितं मुखपद्मं नाहं ददर्श न दृष्टवत्यस्मि यत्त्वं न जागर्षि तेन किंवा अन्यलोकं परलोकं गतोसि । अपुनरन्वयं पुनरागमनशून्यं तव को दोषः यतोऽघृणेन निष्करुणेन यमेन नीतः । अत एव कला मधुरा स्फुटा गिरस्ते न शृणोमि ॥ ५८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मृतस्य बालस्य पादमूले पपात बाष्पकलाभिरश्रुबिन्दुभिर्य उपरोधस्तेन निरुद्धः कण्ठो यस्य सः भाषितुं न शशाक ॥ ५१ ॥

बालमेव सुतं मृतं निरीक्ष्य एकां सन्ततिं च निरीक्ष्य जनस्य प्रकृतेश्च हृद्रुजं दधाना सती राज्ञी चित्रधा विललाप ॥ ५२ ॥

विगलन्त्यः स्रजो येभ्यस्तान् केशान् विकीर्य सुतं प्रति सुस्वरं यथा स्यात्तथा शुशोच ॥ ५३ ॥

अहो विधातस्त्वं नु निश्चितं अतीव बालिशोऽसि कुतः आत्मनः सृष्टेः सृज्यत इति सृष्टिः अस्मदादिजनता तस्याः अप्रतिरूपमननुरूपमीहसे स्वयं जनतां सृष्ट्वा तद्विनाशं करोषि । ननु, विनाशाभावे जनताया नित्यं वर्द्धमानायाः क्व स्थितिस्यात्त्राह - परे पितरि मातरि च जीवति अपरस्यापत्यस्य या मृतिः सा तद्बालिशत्वसूचिकेति भावः । ननु, बालिशः इमां विचित्रां सृष्टिं कथं कुर्यादतो नास्मि बालिश इत्यत्राह— विपर्ययश्चेत् बालिशो नास्ति किन्तु विचक्षणश्चेत् तर्हि त्वं ध्रुवो निश्चितः परः शत्रुरेवासि अयमर्थः बाल्यादप्रियं कुर्वन् स्वबन्धुः परो न भवति ज्ञानवान् अप्रियं कुर्वन् तु सर्वथा शत्रुरेवेति ॥ ५४ ॥

किञ्च अपत्ये जीवत्येव पिता म्रियते पितरि जीवत्येवापत्यं जायत इति शरीरिणां मृत्युजन्मनोः क्रमः इहेश्वरसद्भावे न हि चेत् तर्हि आत्मनो जीवस्य कर्मभिरेव तज्जन्मादिकमस्तु किमीश्वरप्रयोजनम् ? ननु, सर्वत्रास्वतन्त्रस्य जीवस्य कर्मानुष्ठाने तत्फलभोगादौ च स्वातन्त्र्येण प्रवृत्तिर्निवृत्तिश्च नैव जायतेऽतो मयैव तत्तत्कर्मानुसारेण तत्तज्जन्मादिकमनादितः प्रवर्तितं । नैव पितृपुत्रादिसम्बन्धो नित्यः किन्तु सृष्टिवृद्ध्यर्थकमत्कृतस्नेहपाशनिबद्धा जना विमुह्यन्तीत्यत्राह—य इति विवृश्चसि छिनत्सीत्यर्थः ॥ ५५ ॥

अप्रजानां दुस्तरं यत् ध्वान्तं तमस्तद्भवता वयमञ्जोऽतायासेन तरेमातोऽकरुणेन यमेन सह दूरं न याहि ॥ ५६ ॥

अशनया क्षुधा परीतः अभिभूतः ॥ ५७ ॥

हे तनूज पुत्र, अहं हतानि मङ्गलानि यस्याः सा प्रथमं त्वत्समीपमागता सती तव मुग्धस्मितं मुदितवीक्षणमाननाब्जं न दृष्टवत्यस्मि अधुना च ते कला मधुरा गिरो न शृणोमि अपुनरन्वयं पुनरागमनं यथा न भवति तथा अघृणेन निर्दयेन

श्रीशुक उवाच ।

विलपन्त्या मृतं पुत्रमिति चित्रविलापनैः ।
चित्रकेतुर्भृशं तप्तो मुक्तकण्ठो रुरोद ह ॥ ५९ ॥
तयोर्विलपतोः सर्वे दम्पत्योस्तदनुव्रताः ।
रुरुदुः स्म नरा नार्यः सर्वमासीदचेतनम् ॥ ६० ॥
एवं कश्मलमापन्नं नष्टसंज्ञमनायकम् ।
ज्ञात्वाङ्गिरानाम मुनिराजगाम सनारदः ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पारमहंस्यां संहितायां वैयासिक्यां चित्रकेतूपाख्याने चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सखेन अत्र विशेषणेन विशेष्याध्याहारः एवं तृणाद्युतमहाशनेरित्यत्र महाशनशब्देन कथमघासुरशब्दाध्याहार इति शङ्का निरस्ता नीतः अन्यलोकं गतोसि ॥ ५८ ॥ ५९ ॥

भाषाटीका ।

रानी भी उस समय पति को भारी शोक में डूबा हुआ देखकर और एकही संतान ऐसे उस मरे भये बाल पुत्रको देखकर रनिवास और प्रजा के दुःख को धारकर बहुत प्रकार विलाप करती हुई ॥ ५२ ॥

कुंकुम चंदन से लिप्त दोनों स्तनों को कजरारे आंसुओं से अत्यन्त सींचती हुई। पुष्पों की माला जिन से गिर गई ऐसे केशों को बिखेरकर कुररी पक्षी के तरह पुत्रका बहुत ही शोक करती हुई ॥ ५३ ॥

हे विधता! तू बड़ाही मूर्ख है जो तू अपनी सृष्टि के भी प्रतिकूल चेष्टा करे है। वृद्धों के जीवते बालक की जो मृत्यु होवै है एसे विपरीत करने वाला जो तू है तो अवश्य तूं सदां-का वैरी है ॥ ५४ ॥

यदि इस संसार में प्राणियों का जन्म और मरण यदि क्रमसे न होता होवै तो अपने कर्म से होता होगा परंतु अपनी सृष्टि के बढने को जो तूने स्नेह रूप फांसी बनाई फिर उस को आपही क्यों काटता है ॥ ५५ ॥

हे पुत्र! मैं बड़ी दीन और अनाथ हूं तू मोकूं छोडनेके योग्य नहीं है शोक तप्त अपने पिता को तो देख निपुत्रियों से दुस्तर जो तम है सो तेरे सों हम सब विना श्रम वातमें तरजांयगे तुम निर्दई यमराज के द्वारा दूरमतजाओ ॥ ५६ ॥

हे तात! तुम उठो ये सब बालक तुमारे सखा हैं हे नृपनन्दन! ये खेलने को तुमको बुलाते हैं बहुत देर के तुम सोये हो भोजन करो स्तनपान करो हमारे शोक को हरो ॥ ५७ ॥

हे पुत्र! नष्ट मङ्गल वाली मैंने तुमारो भोरो मुसक्यातो प्रसन्न दृष्टि वालो मुख कमल नहीं देख पायो क्या तुम निर्दयने जहाँ से फिर न लौटे ऐसे लोक को पहुंचायो हो क्योंकि तुमारी वाणी नहीं सुन पड़ती ॥ ५८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम्

चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं दम्पत्योरन्येषु च भृशं शोकाविष्टेषु सनारदः पुनरङ्गिरास्तत्रागमदित्याह मुनिः—विलपन्त्या इति । मृतं पुत्रं प्रति चित्रविलापनैः प्रलपन्त्यास्तस्याश्चित्रकेतुरपि नितरां शोकेन तप्तोऽत एव मुक्तः सर्वैः स्वरयुक्तकण्ठो रुरोद हेति ॥ ५९ ॥

तयोर्दम्पत्योरेवं विलपतोस्सतोस्तदनुव्रताः सर्वे नरा नार्यश्च रुरुदुः इतरत्सर्वजनजातमचेतनप्रायमासीच्चित्रितप्रतिमा इव बभूवुरित्यर्थः ॥ ६० ॥

एवं कश्मलं महद्दुःखमापन्नमत एव नष्टसंज्ञं विवेकरहितम्

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अनायकं तत्त्वोपदेष्टृरहितं समुदायं ज्ञात्वा श्रीनारदेन देवर्षि-सहितोऽङ्गिरानाममुनिराजगामागतवान् ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

इयमेकैव विलपन्त्यभूनान्य इत्यतः पूर्वोक्तविलापं स्पष्टयति—विलपन्त्यामिति ॥ ५९ ॥

अचेतनं बुद्धिशून्यं अश्मवत्प्रवृत्तिशून्यं पुरं वा ॥ ६० ॥

अनायकं बोधकरहितं अस्मिन्नवसरे सुहृदोऽङ्गिरस आगतिप्रक्ति—ज्ञात्वेति । अनेन ऋषिस्त्रिकालदर्शीति स्पष्टितम् ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अनायकं शोकनिवर्तकशून्यं राजानमिति शेषः ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भस्य
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विलपन्त्या सह ॥ ५९ ॥ ६० ॥

एवं सर्वनगरम् अचेतनमेव नष्टसंज्ञं ज्ञात्वा चित्रकेतोश्च मृततुल्यत्वादनायकम् ॥ ६१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठे चतुर्दशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सर्वं तत्रत्यप्राणिजातम् अचेतनं नष्टसंज्ञम् ॥ ६० ॥

सनारदः नारमज्ञानं द्यति खण्डयतीति नारं ज्ञानंवा ददातीति नारदस्तेन सह ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
चतुर्दशाऽध्यायार्थप्रकाशः ॥ १४ ॥

भाषा टीका ।

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले कि रानी मृत पुत्र को ऐसे विचित्र तरह विलाप करती रहीं और अत्यन्त तप्त चित्रकेतु राजा भी कण्ठ खोल कर रोने लगा ॥ ५९ ॥

इन दोनों के विलाप करने में उनके पीछे और भी सब नर और नारी रोने लगे सब अचेतन प्राय होगया ॥ ६० ॥

ऐसे दुःख को प्राप्त और नष्ट संज्ञा वाले राजा को असहाय जानकर नारद जी को साथ लेकर अंगिरा नाम के ऋषि राजा के समीप आये ॥ ६१ ॥

इति श्रीमत् भागवत महापुराण षष्ठस्कन्ध
कीभाषा टीका में चतुर्दश अध्याय
समाप्त ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे चतुर्दशोऽध्यायः समाप्तः ॥ १४ ॥

॥ पञ्चदशोऽध्यायः ॥

श्रीशुक उवाच ।

ऊचतुर्मृतकोपान्ते पतितं मृतकोपमम् ।
शोकाभिभूतं राजानं बोधयन्तौ सदुक्तिभिः ॥ १ ॥
कोऽयं स्यात्तव राजेन्द्र ! भवान्यमनुशोचति ।
त्वं चास्य कतमः सृष्टौ पुरेदानीमतःपरम् ॥ २ ॥
यथा प्रयान्ति संयान्ति स्रोतोवेगेन बालुकाः ।
संयुज्यन्ते वियुज्यन्ते तथा कालेन देहिनः ॥ ३ ॥
यथा धानासु वै धाना भवन्ति न भवन्ति च ।
एवं भूतेषु भूतानि चोदितानीशमायया ॥ ४ ॥
वयं च त्वं च ये चेमे तुल्यकालाश्चराचराः ।
जन्ममृत्योर्यथा पश्चात्प्रागेवमधुनाऽपि भोः ॥ ५ ॥
भूतैर्भूतानि भूतेशः सृजत्यवति हन्त्यजः ।
आत्मसृष्टैरस्वतन्त्रैरनपेक्षोऽपि बालवत् ॥ ६ ॥
देहेन देहिनो राजन् ! देहाद्देहोऽभिजायते ।
बीजादेव यथा बीजं देह्यर्थ इव शाश्वतः ॥ ७ ॥
देहदेहिविभागोऽयमविवेककृतः पुरा ।
जातिव्यक्तिविभागोऽयं यथा वस्तुनि कल्पितः ॥ ८ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

ततः पञ्चदशे चित्रकेतोः शोकापनोदनम् ।
कृतं तत्त्वोपदेशेन नारदेनाङ्गिरोयुजा ॥ १ ॥

मृतकोपान्ते शवसमीपे ॥ १ ॥

त्वं चास्य बन्धूनां मध्ये कतमः सृष्टौ प्रजारूपायां अयं पुत्रोऽहं चास्य पितेति चेत्तत्राऽऽहतुः—पुरेति । ये पूर्वजन्मनि पित्रादिरूपेण संयुक्ता आसन् त एव मरणेन वियुक्ताः सन्तो वर्तमानजन्मनि कदाचित्तस्यैवान्यस्य वा पुत्रादयो भवन्ति ते जन्मान्तरे तस्यैवान्यस्य वा कलत्रादयः शत्रुमित्रादयो वा भवन्त्यतो नायं नियम इति भावः ॥ २ ॥

तमेवाभिप्रायं प्रकटयति—यथेति । स्रोतसः प्रवाहस्य वेगेन यथा प्रयान्ति वियुज्यन्ते संयान्ति संयुज्यन्ते तथा कालवेगेन देहिनो जीवा अपि ॥ ३ ॥

तथाप्येतावन्तं कालं मम पुत्रो नाभूद्वार्धके जातो मृत इति दुःखमिति चेत्तत्राहतुः—यथा धानासु बीजेषु धाना बीजान्तराणि भवन्ति कासुचित्कदाचिन्न भवन्ति नोत्पद्यन्ते नश्यन्ति च न तु भवन्त्येव तिष्ठन्त्येवेति वा नियमः एवमेव भूतानि पुत्रादिरूपाणि भूतेषु पित्रादिषु । अतो धानानां जन्यजनकत्वेपि यथा पितृपुत्रादिभावो नास्त्येवमत्रापीति न शोकः कार्य इति भावः ईशमायाप्रेरितानामेव भवनमभवनं न वस्तुतः ॥ ४ ॥

तस्य च सर्वसाधारणत्वान्न पुत्र एव शोचनीय इत्याहतुः—

श्रीधरस्वामिकृत भावार्थदीपिका ।

वयञ्चेति । तुल्यकालाः वर्तमानकालीनाः जन्मनः प्राङ्मृत्योः पश्चाच्च यथा न सन्त्येवमधुनापि न सन्ति भो राजन्, आद्यन्तयोरसत्त्वात्स्वप्नवदित्यर्थः ॥ ५ ॥

असत्त्वे कथं प्रतीतिः कथं चाहमस्य जनक इत्याद्यभिमानस्तत्राहतुः—भूतैरिति । ईश्वरेण मायया सृष्टत्वात्प्रतीतिनिमित्तमात्रत्वेनैव च भूतानामयमभिमान इति भावः नन्वीश्वरस्य सृष्ट्यादिभिः साध्यमस्ति चेत्तर्ह्यपूर्णकामता प्राप्ता नास्ति चेत्कुतः प्रवृत्तिस्तत्राहतुः—अनपेक्षोऽपि बालवत् लीलया करोतीति ॥ ६ ॥

अयञ्च जन्मादिव्यवहारो देहानामेव नत्वात्मन इत्याहतुः देहिनः पितुर्देहेन देहिनः पुत्रस्य देहो मातुर्देहिनो देहादभिजायते यथा बीजादेव बीजं जायते देही तु शाश्वत एव अर्थो भूम्यादिर्यथा तद्वत् ॥ ७ ॥

ननु नश्वरदेहप्रतियोगित्वाद्देह्यपि न शाश्वतः स्यात्तत्राऽऽहतुः-देहदेहिनोरयं परस्परप्रतियोगिविभागः पुराऽनादिरविवेककृतोऽज्ञानकल्पितः जातिः सामान्यं व्यक्तिर्विशेषस्तयोर्विभागो यथा वस्तुनि सन्मात्रे कल्पितः परस्परापेक्षसिद्धत्वेनानिरूप्यत्वात्तद्वदिति ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं तत्रागतावङ्गिरोनारदौ शोकापनयनाय तमूचतुरित्याह मुनिः—ऊचतुरिति । मृतकोपान्ते शवसमीपे पतितं मृतकोपमं शवसदृशं तत्र हेतुः शोकेनाभिभूतं तिरस्कृतविवेकं राजानं चित्रकेतुं सदुक्तिभिः प्रकृतिपुरुषेश्वरयाथात्म्यवेदिनीभिरुक्तिभिर्बोधयन्तौ विवेकमुत्पादयन्तावूचतुः ॥ १ ॥

सदुक्तिभिर्बोधनप्रकारमेवाह—क इत्यादिना, वस्तुनि कल्पित इत्यन्तेन । तावज्जीवानां परस्परं निरुपाधिकसम्बन्धाभावादौपाधिकसम्बन्धप्रयुक्तशोकमोहभयादेर्निमित्तसम्बन्धस्यैव निवृत्तेर्न शोकहेतुरस्तीत्यूचतुः—कोयमिति—हे राजेन्द्र, यं प्रति भवाननुशोचति सोऽयं प्रवाहरूपायां सृष्टौ पुरा भूतकाले इदानीं वर्तमानकाले इतःपरं भविष्यत्काले वा तव कः स्यात् त्वमप्यस्य शोच्यमानस्य कतमः? यदि जीवात्मानं प्रति शोचसि तर्हि शोच्यस्य जीवस्य तव च कस्सम्बन्धः? कालत्रयेपि नानेन तव सम्बन्ध इत्यर्थः ॥ २ ॥

देहद्वारकपितृपुत्रसम्बन्धेनानुशोचामीत्यत्रोचतुः—यथेति । स्रोतोवेगेन प्रवाहवेगेन यथा वालुकाः सिकताः कदाचित्संयान्ति संयुक्ता भवन्ति कदाचिच्च प्रयान्ति विप्रयुक्ताश्च भवन्ति तथा कालेन निमित्तेन देहिनोऽप्यन्यैर्देहिभिः सह संयुज्यन्ते वियुज्यते च देहिनां परस्परं कालकर्मायत्तदेहद्वारकसम्बन्धस्यौपाधिकत्वादुपाधिविलये तत्प्रयुक्तसम्बन्धस्यापि विलयाद्धिलीमसम्बन्धप्रयुक्तः शोको न कार्य इति भावः ॥ ३ ॥

ननु, पितृपुत्रत्वादि सम्बन्धो न केवलमात्मगतः नापि देहमात्रगतः अपि तु विशिष्टगतः अतो विशिष्टं प्रत्येवाहं विशिष्टरूपः शोचामीति चेदेवमपि न शोकः कार्य इत्याहतुः—यथेति । यथा धानासु बीजेषु जातिगुणादिविशेषणविशिष्टेषु तादृश्यो धाना बीजान्तराणि ईश्वरसङ्कल्पेन भवन्त्युत्पद्यन्ते अपादानस्यैवाधिकरणत्वविवक्षया सप्तमी न भवन्ति नश्यन्ति च तथा भूतेभ्यः भूतान्तराण्यपीश्वरमाययोत्पद्यन्ते नश्यन्ति च । अप्राणिभ्योऽप्राणिनामिव प्राणिभ्यः प्राणिनामप्युत्पत्तेर्मृतेश्चेश्वरसङ्कल्पायत्तत्वात्तद्वत्प्राणिभिरपीश्वरमायावैभवमनुसन्दधाद्भिस्तूष्णीमेव स्थेयं न तु शोकः कार्यः किञ्च विशिष्टे विशेष्यांशस्य जीवस्य गतत्वाच्च न शोकः कार्य इति भावः ॥ ४ ॥

ननु, गच्छतु विशेष्यांशो जीवः साक्षात्सम्बन्धापादकमवस्थितं देहं प्रत्यनुशोचामीत्यत्राहतुः वयञ्चेति । वयं त्वं चान्ये इमे चराचराश्च सर्वे तुल्यकालाः वर्तमानकालीनाः यथा जन्ममृत्योः प्राक्पश्चाच्च न सन्ति जन्मनः प्राक् नासन्मृत्योः पश्चाच्च भविष्यन्ति भो राजन्, अधुनाऽयमप्येवमेवनास्ति विशरणाधारब्धमिमं देहमप्यसन्तं पश्येत्यर्थः ॥ ५ ॥

यदीशमायया भूतेभ्यो भूतानि भवन्ति न भवन्ति तर्हि तस्य स्वातन्त्र्यरूपमीश्वरत्वमेव न स्यात्तज्जीवविशेषापेक्षया सुखदुःखप्रदत्वेन वैषम्यनैर्घृण्यप्रसङ्गात्तयोश्च कर्मवश्यजीवधर्मत्वाज्जीववत्कर्मवश्यत्वप्रसङ्गादित्यत्रोचतुः—भूतैरिति । भूतेशः समष्टिव्यष्ट्यात्मनावस्थितानां सर्वेषां भूतानामीशः अन्तःप्रविश्य तत्तज्जीवकर्मानुसारेण प्रशास्ता आत्मना स्वेन सृष्टैरत एवास्वतन्त्रैः सृजतीत्यनेन तस्य स्रष्टुस्सकलेतरविलक्षणत्वं, सर्वार्थशक्तियुक्तत्वम्, अज इत्यनेन कर्मफलानुभवाय तदायत्तोत्पत्त्यादिराहित्योक्त्याऽवाप्तसमस्तकामत्वमप्युक्तं भवति । नन्वेवंभूतः सृजत्वथापि जगत्सृष्ट्यादेः केनचित्प्रयोजनेन भवितव्यं निष्प्रयोजनस्य प्रवृत्त्यसम्भवात् तत्र बुद्धिपूर्वकारिणामारम्भे हि द्विविधं प्रयोजनं स्वार्थः परार्थो वा ? न हि परस्य ब्रह्मणः स्वभावत एवावाप्तसमस्तकामस्य जगत्सर्गेण किञ्चन प्रयोजनमनवाप्तमवाप्यते, नापि परार्थः । अवाप्तसमस्तकामस्य परार्थता हि परानुग्रहेण भवति नचेदृशगर्भजन्मजरामरणनरकादिनानाविधानन्तदुःखबहुलं जगत्करुणावान् सृजतीत्याशङ्कमानं प्रत्याहतुः—निरपेक्षोपि बालवदिति । प्रयोजननिरपेक्षोऽपि बालवत्सृजतीत्यर्थः दृष्टान्तस्वारस्येन जगत्सृष्ट्यादेस्तल्लीलैकप्रयोजनत्वमुक्तं निरपेक्षोपीत्यनेन लीलाव्यतिरिक्तप्रयोजनान्तरनिरपेक्षत्वं चोक्तम् अतोऽवाप्तकामत्वभङ्गः नापि प्रवृत्त्यसम्भवः केवललीलैकप्रयोजनानां कन्दुकाद्यारम्भाणां बालमहाराजादिषु दर्शनात् नन्वेवमपीश्वरस्य देवतिर्यङ्मनुष्यस्थावरात्मनोत्कृष्टमध्यमापकृष्टसृष्ट्या पक्षपातः प्रसज्येत अतिघोरदुःखयोगकरणान्नैर्घृण्यं चापर्जनीयमिति शंकमानं प्रत्युक्तं भूतेश इति. अयं भावः एवं स्रष्टुरपि न वैषम्यादिदोषप्रसक्तिः सर्वभूतानां तत्तत्कर्मानुसारेण नियन्तृत्वाद्विषमसृष्टेः सुखदुःखादेश्च देवादित्वेनच कर्मसापेक्षत्वादिति भावः तथा च श्रुतिः "साधुकारी साधुर्भवति पापकारी पापोभवति पुण्यः पुण्येन कर्मणाभवति पापः पापेन कर्मणा" इति तथाचोक्तं भगवता पराशरेणापि देवादिवै-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

चित्र्ये हेतुः सृज्यानां क्षेत्रज्ञानां प्राचीनकर्मशक्तिरेवेति—

"निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणि ।
प्रधानकरणीभूता यतो वै सृज्यशक्तयः ॥
निमित्तमात्रमुक्त्वैव नान्यत्किंचिदपेक्षते ।
नीयते तपतां श्रेष्ठ स्वशक्त्या वस्तुवस्तुताम्" इति ॥

स्वशक्त्या स्वकर्मणैव वस्तु क्षेत्रज्ञवस्तु वस्तुतां देवादिवस्तुतां प्राप्यत इत्यर्थः ॥ ६ ॥

किञ्च देहस्य जन्ममरणादिस्वभावत्वादपुरुषार्थस्वरूपत्वादात्मनस्तु तद्विपरीतस्वभावत्वाच्च न देहसम्बन्धप्रयुक्तशोकः कार्य इत्याहतुः—देहेनेति । हे राजन् ! देहिनो जीवस्य देहः देहेन पितृशरीरेण देहान्मातृशरीरादभिजायते यथा बीजादेव भूमौ निहिताद्बीजान्तरं जायते तद्वत् 'दिहउपचये' इति धातुपाठादुपचयार्थकाद्दिहधातोर्निष्पन्नो देहशब्द उपचयापचयादिषड्भावविकारवद्वाचकः प्रयुक्तः तस्य तत्स्वाभाव्यसूचनाय एवं चाग्नेरौष्ण्यं प्रतीव जलस्यशैत्यप्रतीव देहस्य मृतिंप्रति शोको मुधेति भावः आत्मनो देहविपरीताकारत्वमुक्तं देह्यर्थ इव शाश्वत इति देही जीवः शाश्वतः नित्यः सततैकरूपश्चात एवार्थः पुरुषार्थरूपः आनन्दरूपः आनन्दो हि पुरुषार्थः । इति शब्द एवकारार्थः निपातानामनेकार्थत्वात् पुरुषार्थरूप एवेत्यर्थः नित्यत्वसततैकरूपत्वानन्दरूपत्वादिस्वभावात्मानुदर्शनं विहाय तद्विपरीतं देहं प्रत्यनुशोको व्यर्थ इति भावः ॥ ७ ॥

देहिनो देहो जायते देह्यर्थः इव शाश्वत इति च नित्यसम्बन्धार्थकमत्वर्थेनिप्रत्ययान्तेन जीवो निर्दिष्टः तत्र यद्यनन्तदुःखाकरदेहसम्बन्धो जीवस्य नित्यश्चेदपुरुषार्थनित्यसम्बन्धिनोऽप्यपुरुषार्थरूपतैव स्यान्न तु पुरुषार्थरूपत्वमितिशङ्कां निराकुर्वन्तावाहतुः — देहीति । पुरा योयमविवेकः अनादिसिद्धो देहात्मभ्रमस्वतन्त्रात्मभ्रमरूपः परमार्थकर्ममूलकस्तेन कृतो देहदेहिविभागः न स्वरूपतः अयं देहोऽयं देहीति विभागरहिते आत्मनि देवमनुष्यादिदेहंप्रति सम्बन्ध्ययमात्मा तदात्मप्रतिसम्बन्ध्ययं देह इतिविभागः केवलदेहात्मादिभ्रममूलकः सञ्जात इत्यर्थः यथाऽवस्तुनि रजतत्वजात्याश्रयरजतव्यक्तिभिन्ने शुक्त्यादिवस्तुनि इदं रजतमिति रजतत्वतदाश्रयव्यक्त्योर्विभागः परमार्थसादृश्यादिदोषमूलकेन भ्रमेण कल्पितस्तद्वत् यद्यपि दृष्टान्ते रजतत्वतदाश्रयरूपजातिव्यक्त्युभयभिन्ने शुक्त्यादौ जातिव्यक्तिविभागः कल्पितः स च विभागः प्रतीतिमात्रविषयः न तु प्रमितिविषयः अत एव नेदं रजतमिति तत्र बाधप्रवृत्तिः दार्ष्टान्तिके तु देहं प्रत्याश्रयभूत एवात्मरूपे वस्तुनि देहदेहिविभागः स च प्रमितिविषयश्च अत एव हि तत्र नायं देहः नायं देहीति पाश्चात्यबाधनादर्शनं चेति दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं तथाप्युभयत्र जातिव्यक्तिविभागदेहदेहिविभागयोर्भ्रममूलकत्वस्य भ्रमकारणयोः सादृश्यकर्मणोः पारमार्थिकत्वस्य च साम्याद्दृष्टान्तदार्ष्टान्तिकभाव उपपन्नः न हि दृष्टान्तदार्ष्टान्तिकभावे सर्वसाधर्म्यमपेक्षितम् अन्यथा तयोरुक्तादात्म्यापत्या दृष्टान्तदार्ष्टान्तिकभावस्यैव काप्यसङ्गतत्वापत्तेः अविवेककृत इत्यनेनाविवेकं प्रति निमित्तभूते पुण्यपापात्मके कर्मणि परमात्मोपासनेन निःशेषं निरस्ते सति तन्निमित्तदेहात्मभ्रमादेरपि निवृत्तावपुरुषार्थसम्बन्ध्यात्मस्वरूपमनुभूतं भवतीति सूचितं यथा दृष्टान्ते सादृश्यस्य दोषत्वनिश्चयेन निवृत्ते भ्रमे जातिव्यक्तिविभागानर्हशुक्त्यादियाथात्म्यमनुभूतं भवति तद्वत् देहीति इनि प्रत्ययो न नित्ययोगेऽपि तु सम्बन्धमात्र इति भावः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्र संसारो नित्यस्तदुच्छेदो ज्ञानेनैव तदपि निरंतरोपासितश्रीनारायणानुग्रहादुत्पद्यत इति एतत्सर्वं निरूप्यतेऽस्मिन्नध्याये तत्राङ्गिरोनारदावागत्य किं चक्रतुरित्याशङ्कायामाह— अशुक इति । मृतकोपान्ते शवसमीपे ॥ १ ॥

यमनु शोचति अयं तव कः स्यात्कीदृशो बन्धुः स्यादिदानीं पुत्र इति भ्रान्तिश्चेत्तर्हि विरिञ्चिसृष्टौ पुराऽतीतकाले त्वमस्य बन्धूनां मध्ये कतमो बन्धुः पिता मातुलो वा सहोदरो वा अतः परं एष्यति काले च कतमो बन्धुरिति शेषः अयञ्च पूर्वापरकालयोस्तव कतम इति योज्यं यथा पूर्वोत्तरकाले युवयोर्न कोपि सम्बन्धस्तथेदानीमपि भ्रान्तिमन्तरेणात्यतः शोको न कार्य इति भावः ॥ २ ॥

ननु, तर्हीदं सर्वं मायाकल्पितमस्त्विति तत्राह—यथेति । यथा वालुकाः सिकताः स्रोतोवेगेन नदीप्रवाहवेगेन प्रयान्ति संयान्त्येकत्र संयुज्य राशीभवन्ति तथा 'कल ज्ञाने' इति धातोः कालेन ज्ञानमूर्तिना देहिनः संयुज्यन्ते सम्बध्यन्ते 'कल द्रावणे' इति धातोः कालेन संहारमूर्तिना वियुज्यन्ते ॥ ३ ॥

ननु, त्यक्तदेहाः पुनर्देहान्तरमाप्नुवन्ति उत शून्यतां आहोस्विदनिवृत्तिलक्षणामवस्थामिति तत्राह—यथेति । धानासु बीजेषु अङ्कुरादिसमृद्ध्या परिपक्वेषु सत्सु ततो धानान्तराणि बीजानि क्वचित् भवन्ति क्वचित् प्रतिबन्धान्न भवन्ति यथा, तथाभूतेष्वपि ईशमायया नारायणेच्छया चोदितानि प्रेरितानि पुत्रादिव्यवहारयोग्यतयोत्पद्यन्ते । क्वचिद्भर्जनादिलक्षणकर्मप्रतिबन्धानि बीजानि अङ्कुरादिकार्यं न जनयन्ति यथा, तथा ज्ञानाग्निभर्जितसंसारबीजानि भूतानि पुनरावृत्तिशून्यावस्थां मुक्तिलक्षणामाप्तानि नोत्पद्यन्त इतीमं विशेषं वा इत्यनेन दर्शयति ॥ ४ ॥

इतोपि पुत्राद्यात्मना सम्बन्धः एवमित्याह—वयमिति अस्मिन् क्षण एव तुल्यकालत्वम् अन्ययोः क्षणयोः यथा नास्ति । देहनाशात् । तथा प्रकृतेरपीति भावः । ननु, देहनाशानाशाभ्यां सदा तुल्यकालत्वाभावश्चेत्तर्हि सर्वथा तुल्यकालत्वं कस्येति तत्राह - जन्ममृत्योरिति । जन्ममृत्योः पूर्वापरकालयोर्यथा सृष्ट्यादिकं करोति तथाऽधुनाप्येवमेवेति, अनेन ईशस्य देहेन सदातनत्वमुपवर्णितम् अस्य चैतन्यसदातनत्वेपि देहस्य नास्तीति विशेष इत्यभिप्रायः "देहस्य सर्वथा नाशावनाशश्चेतनस्य तु" इति स्मृतेः ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

केनोद्भूतैर्भूतैरिति तत्राह—आत्मेति । भूतानि स्वयमेव सृजन्तीति किं न स्यादिति तत्राह - अखतन्त्रैरिति. न चार्थार्थी सृजत्ययम् अनपेक्ष इति. अथास्मात्सर्जनात्प्रयोजनापेक्षा न स्यात्कथं तर्हीदं सर्जनं प्रयोजनमन्तरेण प्रवृत्त्यदर्शनादित्यत्राह—बालवदिति. यथा बालः क्रीडनं क्रीडति तथा "लोकवत्तु लीला कैवल्यम्" इति सूत्रात् ॥ ६ ॥

भूतैरुपकरणैरीश्वरः कथं सृजतीत्यतस्तं प्रकारं दर्शयति—देहेनेति । पितुर्देहेन संयुक्तान्मातुर्देहाद्देहिन उत्पत्स्यमानस्य पुत्रलक्षणजीवस्य देहोऽभिजायते न तु चेतनः तस्य नित्यत्वात्. 'दिह उपचये' इति धातोः देहशब्दोपलक्षितपूर्वकर्मणा फलदानायेश्वरप्रेरितेन देहिनः पितृमातृशब्दवाच्यस्य देहादुपादानभूताद्देहः पुत्रस्येति शेष इति वा अभीत्युपसर्गोऽनेकसुखपरम्परासृष्टिमुपलक्षयति अत्र दृष्टान्तमाह—बीजादिति, बीजातपनसादिलक्षणाज्जलतेजआदिसाधनसामग्रीसंवृतादङ्कुराख्यं वृक्षजीवशरीरं तेन सह जायते तस्मादुक्तजलाद्यासारात्पनसादिबीजान्तरमुत्पद्यते तस्माच्चेति यथा कार्यपरम्परा नचैवमनवस्था मूलकार्यस्य प्रकृत्यात्मकत्वात् तथा पितृमातृविकारशुक्रशोणितसम्बन्धात्कलिलादिलक्षणं कार्यमभिमानि जीवेन सह जायते तस्मात्परिणतावयवात्स्त्रीपुरुषभूताद्देहात् आदिक्रमेण कार्यान्तरं जायत इत्यनेन क्रमेण भगवान् भूतैः सृष्टिं करोतीति स्थितिसंहारयोरेवमूह्यं तदहष्टेश्वरेच्छावशादिति अत्र "अथातो रेतसस्सृष्टिः" इति श्रुतेः तस्मात्सर्वाणि कार्याणि कानि चिदाहत्यात्मना नारायणायनानि कानिचित्परम्परया तदधीनानि तत्रापि विशेषस्तु प्रमाणादवगन्तव्यः तदुक्तञ्च—

"नारायणायना देवा ऋष्याद्यास्तत्परायणाः ।
ब्रह्माद्याः केचनैवं स्युः सिद्धो योग्यं सुखं लभेत्" ॥

अत्रापि कियन्त इतीयमाशङ्का च ।

"नव कोट्यस्तु देवानामृषीणां शतकोटयः ॥
नारायणायनाः सर्वे येकेचित्तत्परायणाः" इति ॥

एतद्वाक्यद्वयं सर्वस्य नारायणाश्रयेण वक्तव्यत्वात् "मुक्तानामपि सिद्धानां नारायणपरायणः" (१) इत्यादौ नोदाहृतं उभयत्रापीदमेव प्रमाणमिति सन्तोष्टव्यं । ननु, देहनाशवद्देहिनाशे पुरुषार्थानुपपत्तिरत्राह—देहीति, देहदेहिनोर्मध्ये देही शाश्वतः अभिमानमन्तरेण जन्मनाशरहिततया कालत्रयेऽप्येकप्रकारः कथमिव अर्थ इव मोक्षलक्षणपुरुषार्थ इव शब्दार्थ इव वा तर्हि असाम्प्रयमायातमित्यस्यापेतदेवोत्तरं देह्यर्थः जीवाख्यः पदार्थः शाश्वत इव नित्य इव "द्रव्यं कर्म च कालश्च" इत्यादेः जीवनित्यत्वस्य श्रीनारायणाधीनत्वेनोपचरितत्वाद्धरेरेव निरुपचरितनित्यत्वमतस्तयोर्न साम्यमित्यर्थः केचिदेवं व्याचक्षते अर्थः नरत्वादिजातिमात्रमिव यथा जातेर्नित्यत्वं तथा जीवस्यापीत्येतच्चिन्त्यं "कुतो मनुष्यत्वमासस्य नरत्वं पुनरेष्यति" इति वचनात् तत्तन्नरत्वादेस्तत्तज्जन्मनाशेन नाशसम्भवान्नित्यत्वानुपपत्तेः ॥ ७ ॥

कृशोऽहं स्थूलोऽहमित्यभेदानुभवाद्देहिनो नित्यत्वं देहस्यानित्यत्वमित्ययं विशेषः कथं घटत इति तत्राह—देहेति । अविवेककृतोऽज्ञाननिर्मितः नचायमाधुनिकः शुक्तिरजतवदित्यत उक्तं पुरेति पुरा पुरातनः अनादिमानित्यर्थः अनेन ज्ञानेनाज्ञाने नष्टे उक्तविशेषो घटत इत्युक्तं भवति अत्र दृष्टान्तमाह—जातीति, यथा गवादिवस्तुनि गोत्वगवादिपिण्डानां विभागो भेदः कणादादीनामज्ञानेन कल्पितः न तु वास्तवः अज्ञानकृतत्वमात्रे दृष्टान्तोऽयं तस्माद्भेदाभेदत्वे अप्रयोजके इति कणादादीनामपि तमोयोग्यत्वप्रकटनाय तन्मतोदाहरणं वस्तुनि हरौ गोपालत्वादिजातिव्यक्तिविभागो यथा कल्पितः आरोपितस्तथेति वा ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

शुद्धात्मनो वस्तुतो देहित्वं नास्ति ततो नच तस्य देह इत्येवम् । तत्र दृष्टान्तः यथा न वस्तुनि सर्व्वकारणे परमात्मनि जातिर्व्यक्तिविभाग इति ॥ १—६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अथ पञ्चदशे भूपमुद्धार मुनिद्वयम् ।
शोकानभ्रन्नपदिष्टं नारदः किञ्चिदब्रवीत् ॥ १ ॥

अयं तव को भवेत् पुत्र इति चेत् सत्यं त्वमप्यस्य कतमः पितेति चेत् तत्राह, पुरा सृष्टौ पूर्वजन्मनि किंवा इदानीं किंवा अतःपरं भाविनि जन्मनीत्यर्थः ये पूर्वजन्मनि पुत्रादिरूपेण संयुक्ता आसन् त एव मरणे ततो वियुक्ताः सन्तः वर्त्तमानजन्मनि कदाचित् तस्यैवान्यस्य वा पुत्रादयो भवन्ति ते जन्मान्तरे तस्यैवान्यस्य वा कलत्रादयः शत्रुमित्रादयो वा भवन्तीति भावः ॥ २ ॥

तमेवार्थं प्रकटयति—यथेति । स्रोतसः प्रवाहस्य वेगेन वालुका यथा प्रयान्ति वियुज्यन्ते संयान्ति संयुज्यन्ते तथा कालवेगेन देहिनो जीवा अपि ॥ ३ ॥

नन्वहमस्य पिता वा पुत्रो वा एतस्मिन् जन्मनि अन्यस्मिन् जन्मनि भवामि न भवामि वेत्यादि जिज्ञासया सत्यत्यलमेव किन्त्वस्य परमप्रेमास्पदस्य विच्छेददुःखमहं केनापराधेनानुभवामि तदद्भुतमिति चेत्तत्र कोऽप्यपराधः किन्त्वत्र काल एव कारणमित्याहतुः यथेति, तदप्येतावन्तं कालं मम पुत्रो नाभूत् वार्द्धके जातो मृत इति महद्दुःखमिति चेत्तत्राहतुः धानासु यवेषु धाना यवान्तराणि भवन्ति कदाचिन्न भवन्ति नश्यन्ति च एवम्भूतानि पुत्रादीनि भूतेषु पित्रादिषु । अतो भवानां जन्य जनकत्वेऽपि यथा पितृपुत्रादिभावो नास्ति एवमत्रापि न शोकः कार्य्य इति भावः 'धाना भ्रष्टयवे स्त्रियः' इत्यभिधानात् । श्लेषेण यथा धानासु भ्रष्टयवेषु धाना न भवन्ति, एवम्भूतेषु ईदृशेषु भवद्विधेषु अपत्यजनकादृष्टरहितेषु भूतानि अपत्यानि न भवन्ति किन्तु हे ईश !

---

(१) एतत्स्कन्धीयचतुर्दशाध्यायस्यपञ्चमश्लोकोयम् ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

राजन् ! मायया प्रेरितानि भवन्ति चेत्यहमङ्गिरा एव त्वत्प्रबोधार्थं मायया त्वत्पुत्रोऽभूवमिति भावः ॥ ४ ॥

शोचनीयश्चेत् न केवलं मृतः पुत्र एव अपि तु दारामात्य-स्वजनादयः सर्व्वे वर्त्तमाना अपि शोच्या एवेत्याहतुः—वयञ्चेति । तुल्यकाला एककालस्थिता जन्मनः प्राक् मृत्योः पश्चाच्च यथा न सन्ति एवमधुनापि न सन्ति न ह्यत्रैककालिकं वस्तु वास्तव-मुच्यते नह्यवास्तवं वस्तु भव्यैर्गणनायामुपादीयते इत्यत-स्तत् सत्यमप्यसत्यायमानमेवेति भावः ॥ ५ ॥

ननु मयायं पुत्रो जनितः केनाप्यलक्षितेन दारुणेनायं नाशित इति स्वस्मिन् जनकत्वलक्षणो गुणः परस्मिंस्तु नाशकत्व-लक्षणो दोषप्रसञ्जनीय इत्याहतुः । भूतैः पित्रादिभिः सृजति—राजादिभिरवति, सर्पादिभिर्हन्ति आत्मसृष्टैरिति पित्रादीनामीश्वर-सृष्टत्वादीश्वराधीनत्वाच्चेत्यर्थः । ननु, पूर्णकामस्येश्वरस्य किं सृ-ष्ट्यादिभिस्तत्राह—अनपेक्षोऽपि बालवल्लीलया करोतीति ॥ ६ ॥

सत्यमुक्तमीश्वरसृष्टेन पित्रा मया जनितः पुत्रोऽयं मृत इत्यतः शोचामीति तत्राहतुः—देहेन पितुर्देहेन देहिनः पुत्रस्य देहो मातुर्देहादभिजायते यथा बीजादेव बीजं जायते अतस्त्वया जनितस्य पुत्रदेहस्य तवाग्र एव वर्त्तमानत्वात् त्वं कथमधुना शोचसीति भावः । नन्वत्र संप्रति देहि जीवात्मा नास्तीति शोचामीति तत्राहतुः, देही जीवोनाम अर्थस्तु शाश्वत एव न स त्वया जनित इति तेन सह न कोपि ते सम्बन्धोऽस्तीति भावः ॥ ७ ॥

ननु, नश्वरदेहप्रतियोगित्वात् देह्यपि न शाश्वतः स्यात्तत्राहतुः । देहदेहिनोरयं परस्पर प्रतियोगि विभागः पुरा अनादिः अविवेककृतः अज्ञानकल्पितः जातिः सामान्यं व्यक्तिर्विशेषः तयोर्विभागो यथा वस्तुनि सन्मात्रे कल्पितः परस्परापेक्षसिद्धित्वे-नानिरूप्यत्वात् ॥ ८ ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीनारदाङ्गिरोभ्यां यथोपदेशो राजानं प्रतिकृतस्तथोच्यते—ऊचतुरिति पञ्चदशेन ॥ १ ॥

भवान् यमनुशोचति सोयम् पुरा सृष्टौ पूर्वजन्मनि इदानीं वर्त्तमाने जन्मनि अतःपरं भविष्ये जन्मनि च तव कः स्यात्त्वञ्चास्य कतमः नायं तव कोपि न त्वं चास्य कतमो पीत्यर्थः पितृपुत्रादिसम्बन्धस्यानियतत्वादास्थिरत्वाच्च ॥ २ ॥

यथा स्रोतसः प्रवाहस्य वेगेन बालुकाः प्रयान्ति वियुज्यन्ते ते संयान्ति संयुज्यन्ते तथा देहिनः पितृपुत्रादयः कालेन कर्मफलसमर्पकच्छक्तिभूतकालवेगेन वियुज्यन्ते संयुज्यन्ते च ॥ ३ ॥

धानासूपादानभूतेष्वन्नबीजेषु यथा तत्तज्जातिगुणादियुक्ता धाना अन्नानि भवन्ति च तथेश्वरस्य मायया वयुनेन सङ्कल्पेन तत्तज्जीवकर्मानुसारिणा भूतेषु पित्रादिषु भूतान्यपत्यानि भवन्ति न भवन्ति च पितृपुत्रादिसम्बन्धो नित्यो नास्त्यतो मम पुत्रो मृत इति शोकोऽयुक्त इति भावः ॥ ४ ॥

किञ्च सर्वभूतेषु शरीरस्यानित्यत्वेपि प्रकृतिरूपेणानित्यत्वं जीवस्य तु सर्वथा नित्यत्वमेवेति वस्तुनाशाभावाच्छोकोऽयुक्त इत्याहतुः वयं च त्वं चेमे तुल्यकालाश्चराचराः सर्वे यथा अधुना सद्रूपाः भवन्ति एवं जन्मनः प्राक् नासन् अपि तु आसन्नेव मृत्योः पश्चान्न भविष्यन्त्यपि तु भविष्यन्त्येवेत्यन्वयः "सदेव सौम्येदमग्र आसीत्"।

नत्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
नचैव न भविष्यामः सर्वे वयमतः परम्" ॥

इत्यादि श्रुतिस्मृतयोप्यत्रानुसन्धेयाः ॥ ५ ॥

पाञ्चभौतिकेभ्यो भूतेभ्यो चराचरेभ्यो भूतानि चराचराणि भगवान् सृजति अवति हन्ति च बालवत् निरहङ्कारः ॥ ६ ॥

देहिनः पुत्रदेहगतस्य जीवस्य देहेन पितृदेहेन देहान्मातृ देहात् देह एव जायते देही जीवस्तु शाश्वतो ध्रुवः अर्थ इव सर्वशास्त्रार्थभूतपरमात्मेव ॥ ७ ॥

नन्वेवं भूतो देहिदेहविभागबोधः "तरति शोकमात्मवित्" इत्यादि श्रुतिप्रामाण्यात् शोकसागरनिस्तारको मम कुतो न प्रागासीत् तत्राहतुः—पुरा उपदेशलाभात् देहिदेहविभागबोधात् पूर्वमयं देहि-देहविभागः अविवेकेनाऽबोधेन कृतः छिन्नः 'कृतिछेदने' यथा वस्तुनि पदार्थे मनुष्यादौ कल्पितः प्रजापतिना रचितः सत्योऽपि जातिव्यक्तः मनुष्यत्वतदाश्रयव्यक्त्योर्विभागोयं पुरा मनुष्यत्वतदाश्रयव्यक्त्योर्बोधात्पूर्वं अविवेकेनाबोधेन छिन्नो भवति तद्वदित्यर्थः ॥ ८ ॥

भाषा टीका ।

श्रीरुक्मिणीरमणो जयति ॥

श्री शुकउवाच ॥

अंगिरा और नारद यह दोनों ऋषि शोक से व्याप्त और उस मृतक बालक के समीप पडे हुये राजा को श्रेष्ठ वाणी से बोध कराने लगे ॥ १ ॥

हे राजेन्द्र ! जिसका तुम शोच करते हो इस सृष्टि में यह पूर्व में तथा इस समय में और इस से आगे तुमारा कौन होता है, और तुम इसके कौन होते हो ॥ २ ॥

जैसे प्रवाह के वेग से बालू मिलती है और अलग होजाती है, उसी प्रकार काल के वेग से जीव भी संयोग और वियोग को प्राप्त हुआ करते हैं ॥ ३ ॥

जैसे अन्नादिक बीज से बीज होताहै किसी समय नहीं भी होता, वैसे ही ईश्वर की माया से प्रेरित, प्राणियों के पुत्रादि रूप प्राणि होते है, कभी नहीं भी होते ॥ ४ ॥

हम तुम और वर्त्तमान समय में जो चराचर प्राणि हैं

श्रीशुक उवाच ।

एवमाश्वासितो राजा चित्रकेतुर्द्विजोक्तिभिः ।
प्रमृज्य पाणिना वक्त्रमाधिम्लानमभाषत ॥ ९ ॥

राजोवाच ।

कौ युवां ज्ञानसम्पन्नौ महिष्ठौ च महीयसाम् ।
अवधूतेन वेषेण गूढाविह समागतौ ॥ १० ॥
चरन्ति ह्यवनौ कामं ब्राह्मणा भगवत्प्रियाः ।
मादृशां ग्राम्यबुद्धीनां बोधायोन्मत्तलिङ्गिनः ॥ ११ ॥
कुमारो नारद ऋभुरङ्गिरा देवलोऽसितः ।
अपान्तरतमो व्यासो मार्कण्डेयोऽथ गौतमः ॥ १२ ॥
वसिष्ठो भगवान् रामः कपिलो बादरायणिः ।
दुर्वासा याज्ञवल्क्यश्च जातूकर्ण्यस्तथाऽरुणिः ॥ १३ ॥
रोमशश्च्यवनो दत्त आसुरिः स पतञ्जलिः ।
ऋषिर्वेदशिरा बोध्यो मुनिः पञ्चशिरास्तथा ॥ १४ ॥
हिरण्यनाभः कौसल्यः श्रुतदेव ऋतध्वजः ।
एते परे च सिद्धेशाश्चरन्ति ज्ञानहेतवः ॥ १५ ॥
तस्माद्युवां ग्राम्यपशोर्मम मूढधियः प्रभू ।
अन्धे तमसि मग्नस्य ज्ञानदीप उदीर्यताम् ॥ १६ ॥

भाषा टीका ।

ये जन्म और मरण के पहिले और पीछे जैसे न रहे इस समय में भी ऐसेही जानों ॥ ५ ॥

ईश्वर निरपेक्ष भी होकर बालक के तरह अपनें सृजे हुये अस्वतंत्र प्राणियों के द्वारा प्राणियों को सृजता है पालन करता है और संहार करता है ॥ ६ ॥

हे राजन् ! देही (पिता) के देह से माता के देह में यह पुत्र का देह उत्पन्न होता है, जैसे बीज से बीज उत्पन्न होता है। तिसमें भी देही (जीव) तो शाश्वत (नित्य) है ॥ ७ ॥

यह देह है और यह देही है इस प्रकार का विभाग (भेद) प्रथम अविवेक से है जैसे घट पटादि वस्तुओं में जाति व्यक्ति का विभाग कल्पित है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आधिम्लानं वक्त्रम् ॥ ९ ॥ १० ॥
उन्मत्तस्येव लिङ्गं येषां ते ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥
मम प्रभू स्वकौ बोधे समर्थाविति वा अतो युवाभ्यां ज्ञानदीपः प्रवर्त्यताम् ॥ १६ ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमृषिभ्यां बोधितश्चित्रकेतुर्जातविवेकः स्ताबुवाचेत्याह मुनिः। एवमिति । द्विजयोरङ्गिरोनारदयोरुक्तिभिरेवमाश्वासितः परिसान्त्वितो राजा चित्रकेतुराधिना पुत्रशोकेन म्लानं म्लानं वक्त्रं पाणिना प्रमृज्य विशोऽथाभाषतोवाच ॥ ९ ॥

तदेवाह—कौ इत्यादिना, ज्ञानदीप उदीर्यतामित्यन्तेन । अवदृष्टपूर्ववेषौ तौ युवां कौ इति पृच्छति—काविति, ज्ञानसम्पन्नौ अत एव पूज्यानामपि पूज्यौ युवां तावत्कौ ? पश्यन्नपि किं पृच्छसीत्यत्राह-

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

अवधूतेन क्षुद्रेण वेषेण गूढौ तिरोधापितस्ववेषौ इह समागतौ युवामन्यथा क्षुद्रस्यैतादृशज्ञावसम्पाप्तिर्दुर्लभेति भावः ॥१०॥

"विष्णोर्भूतानि लोकानां मङ्गलाय चरन्ति हि" इत्युक्तरीत्या लोकानुग्रहायैवमेवावधूतवेषा ज्ञानिनश्चरन्तीत्याह – चरन्तीति । ब्राह्मणा भगवद्भक्ता उन्मत्तस्यैव लिङ्गं येषां तादृशाः सन्तो ग्राम्यबुद्धीनां विषयासक्तानां संसारिणां मादृशानां बोधाय ज्ञानोत्पादनायावनौ भूमौ कामं यथेच्छं चरन्ति हि यस्माद्भगवत्प्रिया उन्मत्तलिङ्गिन एव मादृशां बोधाय चरन्त्यतो युवां कौ इति वान्वयः ॥११॥

ब्राह्मणान्भगवत्प्रियानुन्मत्तलिङ्गेने चरत एव दर्शयति–कुमार इति चतुर्भिः । कुमारः सनत्कुमारः ॥ १२ ॥

रामो भार्गवः ॥ १३ ॥

दत्तो दत्तात्रेयः स प्रसिद्धः पतञ्जलिर्महामुनिर्भरद्वाजः मुनिरुचथ्यः वेदशिरोचथ्य इत्यत्र सन्धिरार्षः वेदशिरो बौध्य इति पाठे बोधस्य गोत्रापत्यं बौध्यः आङ्गिरसः "कपिबोधादाङ्गिरसे" इति यञ् ॥ १४ ॥

एते कुमारादयः तथाऽपरे च ज्ञानमेव सम्पद्येषां ते सिद्धेशाश्चरन्ति ॥ १५ ॥

युवां यौ कौचिद्वा भवेत तावद्यद्यस्माद्युवां प्रभू मादृशस्य बोधोत्पादने दत्तौ तस्माद्युवाभ्यां मम ज्ञानमेव दीपः स उदीर्यतां दीयतामित्यर्थः कथम्भूतः अन्धे तमस्यज्ञानरूपे मग्नस्यात एव मूर्खधियः अत एव ग्राम्यपशोः ग्रामे भवो ग्राम्यो नरः स एव पशुस्तस्य ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देहदेह्यविभागप्रतीतेरनुभवात्कथं नानात्वादिप्रतीतिभ्रान्तिरित्यत आह—नानात्वमिति । अतद्धर्माः यो जीवस्तस्मादन्यस्य देहस्य धर्माः सुरो नरो इत्यादिनानात्वादयो द्रष्टुर्जीवस्य विद्यमाना इति भ्रान्तिः क्रियाफलमिति हेतुगर्भविशेषणं कर्मफलत्वात् अग्निना दाह्यस्येन्धनस्य विक्रियाः वृद्धिक्षयादिविकारा अग्नेरिति भ्रान्तिः भ्रान्त्येन्धनसमृद्धौ समृद्धोऽग्निस्तन्नाशे क्षीण इत्यादयो द्रष्टुर्ज्ञानिनो हरेरतद्धर्मा इत्येव भान्ति "नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इति श्रुतेर्नेदन्दर्शनम्भ्रान्तमनेन देहिदेहभेदे प्रमाणमुक्तं भवतीति वा ॥ ९ ॥

इदमेव विवृणोति । त इम इति । ये ये प्रत्यक्षादिप्रमाणसिद्धा जन्मनाशादयस्त इमे जीवस्य देहसंयोगादात्मनि जीवे मनसि वा भान्ति कुतोऽसद्ग्रहाद्देहोहमित्यभिमानात् अत्रोदाहरणमाह—स्वप्न इति जाग्रद्दृष्टसर्पव्याघ्रादिसंस्कारवशात्स्वप्नेपि यथा तद्दर्शनात्सर्वं भयमित्याद्यनर्थजातं भवति तथाऽनादिकालीनमिथ्याभिमानादनर्थकरः संसारः स्यादिति यद्यस्मात्तन्निवृत्त्युपायमाह—नान्यदिति, अन्यदनर्थकरणं न ध्यायेदित्यन्वयः ननु, शुक्तिकाधिष्ठाने रजतं यथा प्रतीयते तथा जन्मादिकं किमधिष्ठानमित्येतां मन्दाशङ्कां वा परिहरति—त इति आत्माधिष्ठानं शुक्तिरजतवज्जन्मादिकं मिथ्याभूतं भवेदित्यतः स्वप्नपदार्थानामर्थक्रियाकारित्वाद्यथासत्यत्वमंगीकर्तव्यं तथा जन्मादीनामित्यभिप्रेत्याह—स्वप्न इति, अन्यद्देहात्मत्वम् ॥ १० ॥

अनन्यध्यानफलं सदृष्टान्तमुपपादयति—प्रसुप्तेति । प्रकर्षेण सुप्तस्य प्रकर्षेणसुप्तेर्मरणापरपर्यायत्वात्तन्निवृत्त्यर्थं जीवतोपीति धृतप्राणस्यापि ज्ञानपूर्वं बाह्यप्रवृत्तिशून्यस्य पुरुषस्यानहम्मानाद्देहात्मत्वादिभ्रान्तिज्ञानराहित्याद्यथा घोरा संसृतिर्न भाति तद्वत्तथा विमुक्तस्य सा न भाति । कुतः ? विमुक्ताहम्भावबुद्धित्वादनेनानन्यध्यानेन कैवल्यप्राप्तिः सूचिता भवतीति ॥ ११ ॥

फलितमाह—तस्मादिति । यतोऽनहम्मानिनो घोरसंसारहानिरन्यस्य तद्भावश्च तस्मादन्यत्पुत्रादिकं मनोमात्रं मनोगतरागद्वेषजनितपुण्यपापनिमित्तम् एतदुक्तं भवति अहम्मानेन मनसो रागद्वेषौ स्यातां तयोः पुण्यपापे भवतः ताभ्यां च पुत्रादिकमुत्पद्यते "मनसो द्वेषरागाभ्यां पुण्यपापसमुद्भवः । पुत्रादिपुण्यपापाभ्यां तस्मात्सर्वम्मनो भवम्" इति वचनात् अनेन पुत्रादर्दीर्घायुष्यादिकं पुण्यपापनिमित्तं भवतीति सूचितमिति ननु, तदस्तु ततः किं प्रकृत इति तत्राह—जहीति । तद्धननोपायमाह—वासुदेव इति आत्मनि बिम्बभूते देहस्थितत्वेपि तद्देहगतदुःखाद्यस्पर्शे समर्थ इति द्योतनायेश्वर इति मनोधारणयोत्पन्नतत्प्रसादोद्भूतज्ञानाग्निना तमोऽहम्ममतालक्षणं निर्मूलयेदित्यर्थः ॥१२॥

आधिना ज्ञानम् ॥ १३ ॥

अवधूतेन वेषेण धूलिरूषिताकारेण ॥ १४ ॥

उन्मत्तस्य लिंगमेषामस्तीति तथा ॥ १५ ॥

मार्कण्डेयगौतमयोर्मध्येऽन्यो नास्तीति द्योतनायाथशब्दः ॥१६॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अवधूतेन वेषेणेति निजाच्छादनार्थं तदाकृतत्वात् ॥ १० ॥

भगवतो विशेषतो भक्तवत्सलस्य सामान्यतोपि ब्रह्मण्यदेवस्य प्रियाः ॥ ११ ॥

कुमार इति चतुष्कं । व्यासबादरायणयदीनां तदानीमनाविर्भूतानामपि गणना शाश्वदृष्टैयवेति ॥ १२—१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अवधूतेन वेषेणेति स्वगोपनार्थं ताभ्यां तथा कृतत्वात् ॥ १०—१७ ॥

* (नानात्वजन्मनाशश्चक्षयो वृद्धिः क्रियाफलम् ।
द्रष्टुश्चभान्त्यतद्धर्मायथाग्नेर्दाह्यविक्रियाः ॥ ० ॥
तद्द्मेदेहसंयोगादात्मन्याभान्त्यसंग्रहात् ।
स्वप्नेयथा तथानान्यद्ध्यायेत्सर्वम्भयश्चयत् ॥ ० ॥
प्रसुप्तस्यानहम्मानान्नाघोरा भाति संसृतिः ।
जीवतोपियथातद्वद्विमुक्तस्यानहम्मतेः ॥ ० ॥
तस्मादन्यन्मनोमात्रजह्यहम्ममतातमः ।
वासुदेवे भगवति मनो धेह्यात्मनीश्वरे ॥ ० ॥)

अङ्गिरा उवाच ।

अहं ते पुत्रकामस्य पुत्रदोऽस्म्यङ्गिरा नृप ! ।
एष ब्रह्मसुतः साक्षान्नारदो भगवानृषिः ॥ १७ ॥
इत्थं त्वां पुत्रशोकेन मग्नं तमसि दुस्तरे ।
अतदर्हमनुस्मृत्य महापुरुषगोचरम् ॥ १८ ॥
अनुग्रहाय भवतः प्राप्तावावामिह प्रभो ! ।
ब्रह्मण्यो भगवद्भक्तो नावसीदितुमर्हति ॥ १९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आश्वासितः प्रतिबोधितः आधिम्लानं वक्त्रं पाणिना प्रमृज्याभाषत ॥ ९ ॥

महिष्ठावतिमहान्तौ ॥ १० ॥

उन्मत्तस्येव लिङ्गं भाषणाचिन्हं येषां ते कामं यथेष्टम् ॥ ११ ॥
॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

मम प्रभू ज्ञानोपदेशेन संसारादुद्धर्त्तारौ अतो युवाभ्यां ज्ञानमेव दीपः अज्ञाननाशक उदीर्यतामुद्दीप्यताम् ॥ १६ ॥ १७ ॥

भाषाटीका ।

श्रीशुकउवाच ॥

राजा चित्रकेतु इस प्रकार के ब्राह्मणों के वचनों से आश्वासन को प्राप्त होकर मनकी व्यथा से मलिन मुख को हाथ से पोंछ कर बोला ॥ ९ ॥

राजोवाच ॥

ज्ञान से पूर्ण और बड़ों में बड़े आप दोनों अवधूत के वेश में छिपे हुए कोन यहां आये हैं ॥ १० ॥

हमारे सदृश ग्राम्य बुद्धियों को ज्ञान देने के लिये उन्मत्त के चिन्ह को धारण कर भगवत्प्रिय ब्राह्मण लोग पृथिवी में विचरतेही रहते हैं ॥ ११ ॥

सनत्कुमार नारद ऋभु अंगिरा देवल असित अपान्तरतम व्यास मार्कण्डेय और गौतम ॥ १२ ॥

वसिष्ठ भगवान् परशुरामजी कपिलदेव शुकदेव जी, दुर्वासा याज्ञवल्क्य जातूकर्ण्य और आरुणि ॥ १३ ॥

रोमश च्यवन दत्तात्रेय आसुरि पतंजलि और वेदशिरा ऋषि तथा पञ्चशिरा मुनि ॥ १४ ॥

हिरण्यनाभ कौशल्य श्रुतदेव ऋतुध्वज ये सब और भी बहुत से ज्ञान के हेतु (देनेवाले) सिद्धेश्वर विचरतेहैं ॥ १५ ॥

तिसी से आप दोनो समर्थ हो अज्ञान रूप अन्धकार में डूबा हुआ मूढबुद्धि ग्राम्य पशु ऐसे मुझको ज्ञान रूप दीपक का प्रकाश कीजिये ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

महापुरुषगोचरं हरिभक्तं त्वाम ॥ १८ ॥ १९ ॥

* एते चत्वारःश्लोका विजयध्वजरीत्या अधिकतया विद्यन्ते एतेषां व्याख्याः २४४ पृष्ठे नवादिद्वादशाङ्कान्तं द्रष्टव्याः ।

तदैव ते परं ज्ञानं ददामि गृहमागतः ।
ज्ञात्वान्याभिनिवेशं ते पुत्रमेव ददाम्यहम् ॥ २० ॥
अधुना पुत्रिणां तापो भवतैवानुभूयते ।
एवं दारा गृहा रायो विविधैश्वर्यसम्पदः ॥ २१ ॥
शब्दादयश्च विषयाश्चला राज्यविभूतयः ।
मही राज्यं बलं कोशो भृत्यामात्याः सुहृज्जनाः ॥ २२ ॥
सर्वेऽपि शूरसेनेमे शोकमोहभयार्तिदाः ।
गन्धर्वनगरप्रख्याः स्वप्नमायामनोरथाः ॥ २३ ॥
दृश्यमाना विनार्थेन न दृश्यन्ते मनोभवाः ।
कर्मभिर्ध्यायतो नानाकर्माणि मनसोऽभवन् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदैव यदा पूर्वमागतोस्मि ॥ २० ॥

रायः अर्थाः ॥ २१ ॥

चला अनित्याः किञ्च महीति ॥ २२ ॥

हे शूरसेन, इमे सर्वेऽपि शोकादिप्रदाः किञ्च आगमापायित्वेन गन्धर्वनगरतुल्याः गन्धर्वनगरं ह्यकस्मादेव क्वचिदायात्यपयाति चेति प्रसिद्धं तदेवमनित्यत्वं शोकादिहेतुत्वञ्चागमापायित्वञ्चोक्तं मिथ्यात्वमप्याह—स्वप्नश्च माया च मनोरथश्च यथा, तद्वत् ॥ २३ ॥

एते मनोभवाः मनोमात्रविजृम्भिताः अत्र हेतुः अर्थेन तात्त्विकस्वरूपेण विनैव दृश्यमानाः, तत्कुतः? यस्मात्क्षणान्तरे न दृश्यन्ते तात्त्विकत्वे हि क्षणान्तरे बाधो न स्यात् अतो मनोमात्रविजृम्भितत्वेन स्वप्नादिवन्मिथ्याभूता इत्यर्थः। नन्वेते पुण्यापुण्यकृत इति मीमांसकाः प्राहुस्तत्कुतो मनोभवत्वं? तत्राह कर्मभिः कर्मवासनाभिरर्थान् ध्यायतः पुंसो मनस एव निमित्तात्कर्माण्यभवन् पाठान्तरे कर्म ईप्सिततममभिध्यायत इत्यर्थः कर्मणोऽपि मनोभवत्वात्तत्साध्या अर्था अपि मनोभवा एवेति भावः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमुभावपि पृष्टौ तत्र तावदङ्गिरा आत्मानौ स्वागमनप्रयोजनञ्च वदंश्चित्रकेतोर्वैराग्यमुत्पादयति—अहन्त इत्यादिनोपशममाविशेत्यन्तेन । हे नृप ! पूर्वं पुत्रं कामयमानस्य तव पुत्रदो योऽङ्गिराः सोहमस्मि एष द्वितीयस्त्वयं साक्षाद्ब्रह्मणः सुतो भगवान्नारद ऋषिः ॥ १७ ॥

किमर्थमागतावित्यत्राह—इत्थमिति । पुत्रशोकेनेत्थं दुस्तरे तमस्यज्ञाने मग्नमतदर्हं शोकानर्हं महापुरुषगोचरं उत्कृष्टपुरुषैरनुग्राह्यं त्वामनुस्मृत्य प्रत्यभिज्ञाय भवतोऽनुग्रहाय भवन्तमनुगृहीतुमिह आवां प्राप्तौ हे प्रभो ! ब्रह्मण्यः ब्रह्मणि ब्रह्मकुले साधुर्ब्राह्मण्यः तत्रापि भगवद्भक्तः त्वादृशोऽवसीदितुं दुःखितुं नार्हति ॥ १८ ॥ १९ ॥

यथा पूर्वमागतस्तथा त्वद्गृहं प्रत्यागतोऽहं ते तुभ्यं परं ज्ञानं ददामि भगवद्भक्तः इत्यत्रादिकर्मणि क्तः आरब्धभगवद्भक्तियोगः भक्तियोगारम्भभूतायाः सत्सङ्गतेः कृतत्वादिति भावः तर्हि पूर्वमेव ज्ञानं किं नाददास्तत्राह—ज्ञात्वेति, अन्याभिनिवेशं पुत्राभिलाषं ज्ञात्वा ते तुभ्यं पुत्रमेवाहं ददौ दत्तवानासम् ॥ २० ॥

ननु, ममान्याभिनिवेशे सत्यपि तस्य दुःखोदर्कतां ज्ञापयित्वा ज्ञानमेव किं न दत्तवानित्यपेक्षायामभिलषितपुत्रप्रदानमन्तरेण दत्तमपि ज्ञानं न सुप्रतिष्ठितं भवति पुत्रोत्पत्तिविपत्तिभ्यामनुभूतसुखदुःखस्य तद्दृष्टान्तेनेतरेषामपि वैषयिकसुखानां दुःखोदर्कतामनुमन्यमानस्य । सञ्जातवैराग्यस्य तु दत्तं ज्ञानं सुप्रतिष्ठितं भवतीत्यालोच्य न दत्तवानस्मीत्यभिप्रायतः । पुत्रदृष्टान्तेनेतरेषामप्यनन्ततो दुःखहेतुतां निदर्शयति - अधुनेति । यथैव भवता पुत्रिणां तापोऽधुनानुभूयते एवं दारादयोपि सर्वे. हे शूरसेनश ! शोकमोहभयार्तिदास्सन्त एवानुभविष्यन्ते भवतैव भवतेवेति पाठे अधुना भवतेव त्वयेव सर्वेषामेव पुत्रिणां तापोऽनुभूयते सर्वैरपि पुत्रिभिस्तापोनुभूयत इत्यर्थः यथा पुत्रः शोकमोहादिप्रदः तथा दारादयोपीत्यन्वयः तत्र आरामा विहारवनानि विविधा ऐश्वर्यसम्पदः प्रशास्तृत्वप्रयुक्ताभोगोपकरणादि समुच्चयः ॥ २१ ॥

तथा हे राजन्, भोग्याः शब्दादयो विषयाश्च विभूतयो ऽणिमादयः मही राज्यं राज्ञः कर्मभावो वा राज्यं स्वामित्वं महाराज्यं महीराज्यं सार्वभौमत्वमित्यर्थः बलं चतुरङ्गसुफं कोशो धनसञ्चयः ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सर्वे चैते गन्धर्वनगरप्रख्याः गन्धर्वनगरेण तुल्यं प्रख्यायन्ते प्रसिध्यन्ते इति तथा गन्धर्वनगरोपमत्वेन प्रसिद्धाः गन्धर्वाणां हि नगरमावासस्थानं न नियतं तद्वदेतेप्यनियताश्चञ्चलाः अनित्या इति यावत् प्रसिद्धं दृष्टान्तान्तरमाह—स्वप्नमायामनोरथा इति, स्वप्ने ये मायामनोरथाः मायाशब्द आश्चर्यवाची, आश्चर्यरूपा मनोरथाः सङ्कल्पविकल्पात्मकमनोविषयाः देशान्तरगमनराज्याभिषेकशिरश्छेदादयः तेचाश्चर्यभूता एव तत्तत्पुरुषानुभाव्यत्वेन स्वाल्पकालानुभाव्यपुण्यपापात्मककर्मफलत्वेन चेश्वरसृष्टानां जागृदवस्थानुभाव्यपदार्थेभ्यो विलक्षणत्वात्स्वप्नमायामनोरथवदनित्या इत्यर्थः ईयांस्तु विशेषः स्वप्नमायामनोरथाः तत्कालमात्रावस्थायिनः एते तु तदपेक्षया किञ्चित्कालावस्थायिन इत्यानित्यत्वं, तत्वं तत्तज्जीवकर्मानुसारेण सृष्टत्वं मनःप्रभवत्वं सुखमात्राहेतुत्वं चोभयत्राप्यविशिष्टम् ॥२३॥

तदेवाह—दृश्यमाना इति । अर्थेन परमपुरुषार्थेन निरतिशयानन्देन विना दृश्यमानाः न दृश्यन्ते कालान्तरेष्वपि न दृश्यन्ते जाग्रत्स्वप्नावस्थाद्वयानुभाव्याः पदार्थाः मनोभवाश्च ननु, स्वाप्नपदार्था मनोभवा इति तु प्रयुक्तं तेषां यथास्य स्वप्नद्रष्टुः कर्मानुसारेण मनः सङ्कल्पविकल्पौ करोति तदनुसारेणेश्वरसृष्टत्वेन मनोनिमित्तकत्वाज्जाग्रदवस्थानुभाव्यानां तु पुत्रदारादीनां कथं मनःप्रभवत्वं ? तत्राह—कर्मभिरिति. कर्मभिरनादिवासनारूपैः कर्मभिरर्थान्विषयान्मनसा ध्यायतः पुंसस्तावत्कर्माणि मनसा अभवन् अनादिकर्मवासनावासितमनस्संयुक्तैरिन्द्रियैर्विषयान् ध्यायंस्तावत्कर्माणि करोतीत्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तुर्वासयाज्ञवल्क्ययोर्विशेषद्योतकश्च शब्दः ॥ १६ ॥ क ॥

यो महाभाष्यकर्ता स पतंजलिनाम्ना बोध्यः ॥ १६ ॥ ख ॥

ज्ञानहितवो लोकानामिति शेषः "ब्राह्मणा भगवत्प्रियाः" । "सिद्धेशा ज्ञानहेतवः" इत्येतैर्विशेषणैर्विशिष्टत्वस्य प्रतिपाद्यमानत्वान्नैतेषां सर्वेषां साम्यं "नारायणपरा देवा मनुष्यास्तत्परायणाः" इत्यादिस्मृत्या अवान्तरविशेषस्य ज्ञायमानत्वात् । नारायणपरा देवा इत्यादिवाक्यं मुक्तानामपि सिद्धानां नारायणपरायणा इत्यत्र ब्राह्मणा भगवत्प्रिया इत्यत्र च प्रमाणार्थमस्मिन्नध्याये उदाहृतं ॥ ब्रह्म अणति अयंते आश्रयंते ब्रह्मणैवेति ब्राह्मणाः इति व्युत्पत्त्या देवद्वारा नारायणायनत्वं लब्धं, योग्यसुखत्वञ्चेत्युभयं सिद्धं, ते च कियंत इत्याशंकोभवकोट्यस्तु देवानां ऋषयः शतकोटयः, इत्यादिकया परिहर्तव्या ॥ ॥ १६ ॥ ग. घ. ॥

युवां युवाभ्याम् ॥ १७ ॥

महापुरुषगोचरं भक्तिस्मरणादिमत्त्वेन श्रीविष्णुविषयम् ॥ १८ ॥

नावसीदितुमर्हति पुत्रनिमित्तशोकेन नष्टो माभूदिति ॥ १९ ॥

तर्हि सदानीं पुत्रः किमिति दत्त इति तत्राह—तदेति । तदा पूर्वागमनकाले ज्ञानमेव ददामीति गृहागतोहं तवान्याभिनिवेशं पुत्रविषयाग्रहं ज्ञात्वा ते पुत्रं तुभ्यं पुत्रमेवा ददामिदानीं ज्ञानं ददामीति शेषः ॥ २० ॥

इदानीं दातुमवसर इत्याह—अधुनेति । न केवलं पुत्रवतामेव तापः किन्तु दारादिमतामप्यविनाभूतोयमित्याह – एवमिति ॥ ॥ २१ ॥ ॥ २२ ॥

स्वप्नमायामनोरथवदनित्यत्वेन दृश्यमानाः प्रतीयमानाः अर्थेन पुरुषार्थाख्यप्रयोजनेन विना दृश्यन्त इति यो नियमः स नास्तीत्यध्याहृत्यान्वेतव्यं तथाहि, योग्यतानुसारेण कदाचित्पुरुषार्थहेतुत्वेन दृष्टत्वात्कदाचिन्नेति नियमात्कुतो मनोभवाः मनसो भव उत्पत्तिर्येषां ते तथा तेन कल्पितत्वात्. एतदेव विवृणोति कर्मेति. निरन्तरं कर्म चिन्तयतः पुंसो मनसो मनःक्षोभान्नाकर्माणि निरयमानुषस्वर्गमुक्तियोग्यानि कर्माण्यभवन् भवंतीति यस्मात्तस्मात्तदनुसारेण दारादिसंभवात्सदा पुरुषार्थहेतुत्वमदिनियमो नास्तीति भावः ॥ २३ ॥ ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इत्थमिति युग्मकं । महापुरुषो गोचरोऽनुभव विषयो यस्य तम् । भगवद्भक्त इति पुर्व्वमेव तत्सङ्गप्रभावेन भक्तिबीजोदयात् ॥ १८ ॥ १९ ॥

ददामि अदास्यमित्यर्थः । पुनश्च ददामि अददामित्यर्थः तिङांतिङो भवन्तीति छान्दसोऽत्र लट् ॥ २०—२६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

महापुरुषाः परमर्षयो भगवद्भक्ताश्च गोचराः मनोनेत्रादिविषयाः यस्य तं अत एव ब्राह्मणवैष्णवसेवित्वाद्ब्राह्मणो भगवद्भक्तश्चोक्तः न तु वस्तुतस्तद्भक्त इत्यर्थः ॥ १८—१९ ॥

ददामि अदास्यं पुनश्च ददामीत्यस्य अददामित्यर्थः । तिङां तिङो भवन्ति इति लक्षणेन ॥ २०—२२ ॥

तदेवं दारादीनामनित्यत्वमवास्तववस्तुत्वं शोकादिहेतुत्वमागमापायित्वञ्चोक्तं । येतु दारादिभ्यः अन्येऽपिशोकमोहभयार्तिदाः अर्थाः स्वप्नादुत्थास्तेतुर्मिथ्याभूता एवेत्याह । गन्धर्वेति स्वप्नश्च मायाया इन्द्रजालं च मनोरथश्च ते तदुत्थाः पदार्थाः ॥ २३ ॥

अर्थेन व्याघ्रसर्पादिना विनैव दृश्यमानाः स्वप्नादिभङ्गे सति न दृश्यन्ते तदेवं दारादयोऽवास्तववस्तुभूताः स्वप्नादयो ऽवस्तुभूताश्च सर्वे मनोभवाः मनोवासना जन्यत्वान्मनोभवाः मनोभवत्वमेवाह कर्मभिः, कर्मवासनाभिरर्थान् ध्यायतः पुंसो मनसएव निमित्तत्वात् कर्माण्यभवन् कर्मभिर्ध्यायत इति पाठे कर्म ईप्सिततममभिध्यायत इत्यर्थः । कर्मणोऽपि मनोभवत्वात्तत्साध्या अर्थो अपि मनोभवा एवेति भावः ॥ २४ ॥

अयं हि देहिनो देहो द्रव्यज्ञान क्रियात्मकः ।
देहिनो विविधक्लेशसन्तापकृदुदाहृतः ॥ २५ ॥
तस्मात्स्वस्थेन मनसा विमृश्य गतिमात्मनः ।
द्वैते ध्रुवार्थविश्रम्भं त्यजोपशममाविश ॥ २६ ॥
(भोजोनामनृपः स्वप्ने शत्रुग्रस्तान्नभोजनः ।
दुःखन्दुर्विषहंप्राप्तः शोकमोहभयार्तिदम् ॥ ० ॥
केचिद्विलुलुपुर्भोगानपरेऽवाधिषुःश्रितान् ।
पूर्ववैरग्रहैर्जाया अन्य आत्मशिरोहरन् ॥ ० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अतदर्हं शोकानर्हम् महापुरुषगोचरं विष्णुकृपादृष्टिविषयं पात्रमित्यर्थः ॥ १८ ॥ १९ ॥

पूर्वमपि ज्ञानमेव दातुमागतस्तव निर्बन्धं दृष्ट्वा पुत्रं दत्तवानित्याह-तदैवेति । परं ज्ञानं ददामि अदास्यम् पुत्रं ददामि दत्त-वान् ॥ २० ॥ २१ ॥ २२

हे शूरसेन ! इमे सर्वेपि शोकादिप्रदा गन्धर्वनगरप्रख्याः गन्धर्वनगरवत् प्रख्यायन्ते इति तथा गन्धर्वनगरं गन्धर्वेच्छयैव काचिदायाति अपयाति च न दृष्टजनेच्छामनुसरति तद्वदिमे ईश्वरेच्छामनुसरन्ति न दृष्टजनेच्छामित्यर्थः किञ्च स्वप्ने या मायाः सूक्ष्मरूपाः विभूतयः मनोरथाश्च कर्मविशेषफलदानाय भगवतैव सृष्टाः शोकादिप्रदाः गन्धर्वनगरप्रख्याश्चेत्यन्वयः ॥ २३ ॥

किञ्च जागरेपि मनोभवाः पुत्रकलत्रादिपदार्थाः अकस्मादेव मनसि हर्षकाले शोकदाः रोदितव्ये हर्षदाः प्रसिद्धपुत्रकलत्रादिविलक्षणाः स्वप्नमायामनोरथविलक्षणाश्चेश्वरेण प्रवर्तिताः ते च केचिदनिष्टा अर्थेन प्रयोजनेन विनैव दृश्यमानाः मनसि प्रस्फुरमाणाः केचिदिष्टाः नैव दृश्यन्ते अतस्तेपि शोकादिप्रदाः गन्धर्वनगरप्रख्याश्चेति पूर्वेणान्वयः किञ्च मनसा कर्मभिर्ध्यायतः एवं स्वाहितमेव करिष्यामीति चिन्तयतः नानाहितानि अहितानि मिश्राणि च कर्माण्यभवन् तान्यपि शोकादिप्रदान्येव जानामीत्यर्थः मनसा इति पाठे मनसो निमित्त भूतान् अभवन्नित्यन्वयः ॥ २४ ॥

भाषा टीका ।

॥ अङ्गिरा उवाच ॥

हे नृप ! पुत्र कामना वाले तेरे पुत्र का देने वाला मैं अङ्गिरा ऋषिहूँ । और ये दूसरे साक्षात् ब्रह्मा के पुत्र भगवान नारद ऋषि हैं ॥ १७ ॥

हे प्रभो ! इस प्रकार पुत्र के शोक से दुस्तर अन्धकार मे डूबेहुये और इस दुःख के अयोग्य एसे हरि भक्त तुम को जानकर तुमारे ऊपर अनुग्रह करनेके लिये हम दोनों यहां प्राप्त हुये हैं क्योंकि ब्रह्मण्य भगवद्भक्त दुःख पानेके योग्य नहीं होते हैं ॥ १८—१६ ॥

अब हम पहिले तुमारे गृह आये रहे तब ज्ञान ही देने को आये रहे परञ्च तुमारी अन्य में आसक्ति देख कर उस समय हमने तुमको पुत्र ही दिया ॥ २० ॥

इस समय पुत्र वालों को जो दुःख होता है सो तुमही जानते हौ । एसेही स्त्री गृह द्रव्य और नाना प्रकार के ऐश्वर्य और सम्पद, और शब्दादिक विषय, राज्य की विभूति, पृथिवी राज्य सेना कोश (खजाना) नोकर मंत्री और सुहृद-जन, हे शूरसेन ! वे सबही शोक मोह और भयके देने वाले है और गन्धर्व नगर के तुल्य, स्वप्न, माया और मनोरथ के तुल्य चल (अनित्य] और आगमापायी अर्थात मिलने विछुरने वाले हैं ॥ २१—२३ ॥

और ये सब विना अर्थ के देख पडते है और कालांतर में नहीं देख पडते हैं क्योंकि वे सब मनके संकल्प से हुये हैं । और कर्म की वासना से ध्यान करने वाले पुरुष के मनही से कर्म भी हुये हैं ॥ २४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

तदेवं ममतास्पदानां पुत्रादीनां दुःखादिहेतुत्वमुक्तं तत्र देहसम्बन्धो मूलमित्याह—अयं हीति । हीत्यवधारणे अयं द्रव्यज्ञानक्रियात्मकः अधिभूताधिदैवाध्यात्मरूपो देह एव देहिनो देहोऽहमिति मन्यमानस्य देहिनो जीवस्य विविधान् क्लेशान्सन्तापांश्च करोतीति तथा ॥ २५ ॥

स्वस्थेनाव्यग्रेण गतिं तत्वं ध्रुवोऽयमर्थ इति विश्रम्भं विश्वासं प्रयासं वा त्यज ततश्चोपशममाविश आश्रय ॥ २६ ॥

इत्थन्दुरन्तदुःखौघादुत्थितस्तदनुस्मरन् ।
तावद्भृशं सुनिर्विण्णो निर्जगाम ततो गृहात् ॥ ० ॥
दर्शयन्नात्मनात्मानं निःसङ्गः शान्तविग्रहः ।
प्रविष्टो ब्रह्मनिर्वाणं कुलायन्नाविदच्युतम् ॥ ० ॥)

नारद उवाच ।

एतां मन्त्रोपनिषदं प्रतीच्छ प्रयतो मम ।
यां धारयन्सप्तरात्रात् द्रष्टा सङ्कर्षणं प्रभुम् ॥ २७ ॥

यत्पादमूलमुपसृत्य नरेन्द्र ! पूर्वे शर्वादयो भ्रममिमं द्वितयं विसृज्य ।
सद्यस्तदीयमतुलानधिकं महित्वं प्रापुर्भवानपि परं न चिरादुपैति ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पारमहंस्याम्
संहितायां वैयासिक्यां चित्रकेतूपाख्याने
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

अङ्गिरसोपदिष्टं तत्त्वं परमेश्वरप्रसादं विना न प्राप्यत इति तत्प्रसादाय मन्त्रविद्यां नारद उपदिशति—एतामिति । उपनिषदं परं श्रेयोऽस्यामित्युपनिषत् मन्त्र एवोपनिषत्तां प्रतीच्छ गृहाण द्रष्टा द्रक्ष्यति भवान् ॥ २७ ॥

अतुलं च तदनधिकं च समानाधिकशून्यं परं महिमानं प्रापुः उपैत्युपैष्यति ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततस्तत्कर्मफलानुभवायास्य देहिनः द्रव्यज्ञानक्रियात्मकः द्रव्यं भूतपञ्चकं ज्ञानानि ज्ञानेन्द्रियाणि क्रियाः कर्मेन्द्रियाणि एतदात्मकः एतत्सङ्घातरूपः अयं देहोऽस्य देहिनः विविधक्लेशरूपसन्तापं करोतीति तथा क्लेशसन्तापशब्दौ वैषयिकसुखदुःखपरौ वा वैषयिकसुखस्यान्ततः क्लेशात्मकत्वात्तौ करोतीति विविधक्लेशसन्तापकृदुदाहृतः मास इति कथित इत्यर्थः प्रथममनादिवासनावासितेन मनसा विषयचिन्तना तयाच विषयलाभोपयुक्तानि पुण्यपापात्मकानि कर्माणि कर्मभ्यः क्लेशसंतापकृद्देहः तेन च पूर्वजन्मकृतकर्मफलशब्दादिविषयमनुभवतः पुनर्विषयचिन्तना पुनस्तया कर्मणीत्येवमियं परिवृत्तिः वासनावासितमनोमूलिकेति सर्वे मनःप्रभवा इति भावः ॥ २५ ॥

तस्मात्पुत्रदारादीनां सर्वेषां स्वाप्नकल्पत्वात्स्वस्थेन विक्षेपरहितेन मनसा आत्मनः प्रत्यगात्मनो गतिं स्वरूपं विमृश्य बुद्धीन्द्रियमनःप्राणादिभिन्नत्वेन ज्ञानानन्दादिस्वरूपस्वभावत्वेन परमात्मशरीरत्वेन च विमृश्य द्वैते उक्तविधप्रत्यगात्मगतदेवमनुष्यादिभेदभिन्नेऽस्थिरे शरीरे ध्रुवार्थविस्रम्भं ध्रुवार्थं आत्मा तद्विस्रम्भमात्माभिमानं त्यज उपशमं वैराग्यमाविश विरक्तो भवेत्यर्थः ॥ २६ ॥

एवमाङ्गिरसोत्पादितविवेकाय चित्रकेतवे भगवान्नारदो मन्त्रविद्यामुपदिदिक्षुस्तावत् तत् प्रभावमाह–एतामिति । एतामुपदेक्ष्यमाणां मन्त्रोपनिषदं मन्त्ररूपामुपनिषदं प्रयतः समाहितचित्तस्त्वं मम उपदेक्ष्यतो मत्तः प्रतीच्छ स्वीकुरु यां मन्त्रोपनिषदं धारयमाणो भवान् सप्तरात्रादूर्ध्वं भगवन्तं सङ्कर्षणं द्रष्टा द्रक्ष्यति ॥ २७ ॥

सङ्कर्षणं विशिंषंस्तस्य तत्साक्षात्कारफलमाह–यदिति । हे नरेन्द्र ! यस्य भगवतः सङ्कर्षणस्य पादमूलमुपसृत्याश्रित्य पूर्वे रुद्रादयः द्वितयं द्वाववयवौ यस्य द्वितयं द्विदलात्मकं भ्रममात्मज्ञात्मकत्वस्वतन्त्रात्मकत्वरूपदलद्वयात्मकं भ्रमं विसृज्यातुलानधिकं निःसमाभ्यधिकं तदीयं सङ्कर्षणसम्बन्धिमहत्वं माहात्म्यं प्रापुः तथा भवानप्यचिरादाशु परं महामाहात्म्यमुपैष्यति ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृत पदरत्नावली ।

देहादेरर्थक्रियाकारित्वान्न मिथ्यात्वं वक्तुमुचितं गन्धर्वनगरादिवदतो नश्वरत्व एव दृष्टांत इत्यभिप्रेत्याह—अयं हीति । देहिनोऽयं देहो देहिनो जीवस्य विविधक्लेशसंतापकृदुदाहृत इत्यन्वयः हिशब्दो हेतौ अभिमानाच्चैतस्य सुखादिभोगः न तु देहस्येति द्योतनाय देहिन इति पुनर्वचनम् अयमित्युक्त्या स्थूलदेहसिद्धावपि स्पष्टत्वायाह—द्रव्येति. द्रव्यात्मकः पञ्चभूतात्मकः स्थूलदेहः गंडशैलादीनां स्थूलत्वेपि भोगायतनत्वाभावात्कथमेतदिति तत्राह - ज्ञानेति. ज्ञानेत्यनेन श्रोत्रादिपञ्चकम् एवं मनश्च गृह्यते क्रियापदेनापि वागादिपञ्चकं कर्म च लक्ष्यते ज्ञानेन्द्रियकर्मेन्द्रियमनआत्मकत्वेन वैलक्षण्याद्भोगायतनत्वमुपपद्यते इन्द्रियकार्यज्ञानक्रियाशब्दाभ्याम् इन्द्रियोक्तिः कार्यकारणयोरेकशब्दव्यवहृतिर्भवेदित्यतो युज्यते "असन्नपि क्लेशद आस देह" इत्यादौ सिद्धत्वादुदाहृत इत्युक्तम् अनेनासदुपासनं क्लेशकरं देहवदित्ययमर्थोऽपि ध्वनित इति ज्ञातव्यम् ॥ २५ ॥

यत एवं नानाक्लेशदो देहस्तर्हि कथंकारं तं निवर्तेत इति तत्राह—तस्मादिति । तस्माद्देहस्य क्लेशकरत्वात् द्वैते देहे ध्रुवार्थविस्रंभं त्यजेत्यन्वयः अन्यापेक्षारहितत्वाद्धरिरद्वैतम् अदृष्टाद्यन्यापेक्षाप्राप्तत्वात् द्वैतं देहादि तस्मिंते पदार्थो ध्रुवत्वान्नित्या इति विश्वासं त्यज "अनन्यापेक्षतस्त्वेको हरिरद्वयं स्मृतम् । अन्यापेक्षत्वतस्तेन प्राप्तत्वाद्द्वैतमुच्यते" इतिवचनात् देहिनो यत्किञ्चित्साधने द्वितीयत्वेन प्राप्तत्वाद्द्वैतशब्दवाच्यो देह इत्यर्थः । नैतावता पूर्यत इत्याह-उपशममिति, अहंकर्तेत्यभिमानोपशममाविशेत्यन्वयः किं च हरौ निरन्तरनिष्ठालक्षणमुपशमं उक्तार्थदाढर्ययाह विमृश्येति आत्मनो हरेर्गतिं स्वातंत्र्यादिलक्षणमात्मनो जीवस्यास्वातंत्र्यादिलक्षणाञ्चेति । केनेत्यत उक्तं मनसेति । तस्य प्रागपि सद्भावात् कुत ईदृशविचाराभाव इति तत्राह—स्वस्थेनेति ॥ २६ ॥

शास्त्रश्रवणमननशाणालीढेन भक्त्यादिसाधनसामग्रीसम्पादनेन गृहादिसंगत्यागः प्रथमसाधनमित्यत्रेतिहासमाह— भोजो नामेति । शत्रुणा ग्रस्तं कवलितं यदन्नं तदेव भोजनं यस्य स तथा शत्रूच्छिष्टान्नभक्षण इत्यर्थः ॥ ० ॥

पूर्वं पुरातनं वैरं गृह्णातीति पूर्ववैरग्रहास्तैः कर्मभिः पूर्ववैरानुग्रहैः ॥ ० ॥

दुरंतदुःखानामोघो यस्मिन्स तथा तस्मात्स्वप्राप्तस्वप्रानुभूतं तावत्तदानीमेव ॥ ० ॥

आत्मानं उन्मत्तादिवद्दर्शयन्नात्मना मनसा आत्मानं दर्शयन्नालोचयन्निति वा निर्वाणं अशरीरेणाजस्यानन्दपूर्णं ब्रह्म श्रीनारायणाख्यं प्रविष्टो मनसेति शेषः यस्मिन्कुलाये देहे स्थितः तं कुलायं नाविदन्न बुबुधे च शब्दो हेत्वर्थः असंप्रज्ञातसमाधिस्थत्वाद्धा ॥ ० ॥

ममाप्येवंसिद्ध्युपायवक्ष्यमाणः क उपाय इति तत्राह—इमामिति । मन्त्राख्योपनिषदचिरकालेन साध्यसाधिका च तत्किमनयेत्यश्रद्धां माकार्षीरित्याह—यामिति, "रुद्राद्याः शेषदेहस्थं विष्णुं संकर्षणाभिधम् । शेषान्तर्यामिणं ज्ञात्वा स्वपदं प्रापुरञ्जसा" इति वचनान्न शेषः संकर्षणोऽत्र गृह्यते किंतु तदंतर्यामी द्वितीयमूर्तिरन्यस्य बंधनिर्मूलनादिसामर्थ्याभावात् इति ॥ २७ ॥

संकर्षणं शेषस्यास्माभिरवितैर्विशिनष्टि—यत्पादेति । पूर्वं शर्वादयो यत्पादमूलमुपसृत्योपास्य महित्वं प्रापुरित्यन्वयः महित्वं नाम कीदृशं ? येन हरिप्रसादप्राप्तं स्यादित्यत उक्तं अतुलेति- अतुलं च तदनधिकं चेति तथोक्तं साम्याधिक्यवर्जितमित्यर्थः ननु, तर्हीदं भगवन्माहात्म्यविनाभूतं स्यादिति तत्राह—तदीयमिति, तेषां रुद्रादीनां योग्यं ननु, स्वकीयप्राप्तौ क्लेशसाध्यायाः किमन्योपासनायाः प्रयोजनं ? स्वतः सिद्धत्वात्तस्येत्यस्याप्येतदेवोत्तरं तत्प्रसादलभ्यत्वात्तदीयमिति । तदीयं तस्य हरेरधीनं । तदुक्तं । "तेषां तेषां पदान्येव वैष्णवानि पदानि तु । तेषां महित्वं च तथा हरेस्तल्लक्षणं यतः" इति । भगवन्महित्वादन्यमहित्वस्य साम्याधिक्यस्य वर्जनं कथं घटत ? इत्यस्यापीदमुत्तरं तस्मादिन्द्रादिपदाद्रुद्रादिप्राप्यशेषादिपदस्य साम्याधिक्यवर्जनं युक्तं किंच शेषादिप्राप्यशेषादिपदस्य मौक्तिकस्य संसारे शेषादिपदमपेक्ष्यातुल्यानाधिक्यं च युक्तिमत् "अतुल्यानाधिकं चैव तस्य तस्यैव मुक्तिगम् । तस्यैव पूर्वमाहात्म्यमपेक्ष्य" इति वचनात् ननु "परमं साम्यमुपैति" इति श्रुतेः हरेरेवातुल्यानधिकमहित्वं प्रापुरित्यर्थः किं न स्यादत्रापीदमेव प्रतिवचनं तस्य विद्यमानं पदमपुनर्हरेर्विद्यमानं निजमहित्वं तदुक्तञ्च । "न हरेः कश्चित्, माहात्म्यमन्यप्राप्यं स्यान्न ते विष्णोः" इति श्रुतेरिति । रुद्रादिप्राप्यं न चेत् ब्रह्मादिप्राप्यं किं न स्यादितिचेन्न "ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुं नैवशक्यते तद्यत्स्वभावः कैवल्यं सभवान्केवलोहरिः" इति प्रमाणविरोधात् । अत्रोपास्त्याविरथंभावमाह भ्रममिति इमं देहाद्यहंममाभिमानलक्षणं भ्रमं विहाय आचार्यैरप्येतदुक्तम् 'देहादावहंममाभिमानो भ्रमः' इति बंधस्य त्यागमन्तरेण तत्प्राप्तिःकथं युक्तिमती तत्राह—तद्धितीयमिति, कार्यकारणयोरेकशब्दव्यवहृतिर्भवेदितिन्यायात्कारणेन कार्यं लक्ष्यते द्वितीयेनान्यथाज्ञानेन निर्मितं बन्धं पुत्रादिस्नेहलक्षणं विसृज्य सम्यक् त्यक्त्वा तदुक्तम् "द्वैतेन बन्धसंत्यागाद्द्वैतत्यागीभवत्युत" इति द्वैतेनोत्पन्नबन्धसंत्यागादित्यर्थः । अनेन मुक्तावपि शेषादिप्राप्यं पदमिति ध्वनितमिति ज्ञातव्यं साधनसामग्र्यां कालक्षेपो नास्तीत्याह—सद्य इति, 'तस्य तावदेव चिरं यावन्न विमोक्ष्येथ संपत्स्यत' इति श्रुतेः । अनेन चित्रकेतोःकिमागतं तत्राह—भवानपीति भवानपि तमनन्तमुपास्य तूष्णीं तत्प्रसादेन नचिरात्स्वकर्मनिर्मितचरमशरीरपातानन्तरं तत्प्रसादलभ्यत्वात्तदीयमपि तेन पूर्वमहिम्ना तुल्यमनधिकं च परमन्यद्रुद्रादिमहित्वविलक्षणं निर्दुःखानन्दानुभवलक्षणं स्वयोग्यमाहात्म्यमुपैतीत्यन्वयः

"यद्येषो परतारेवामाया वैशारदी मतिः ।
सम्पन्न एवेति विदुर्महिम्नि स्वे महीयते" ॥

इति स्मृति वचनात् ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेवं यदङ्गिरसोपदिष्टं तत्रापरितुष्टः श्रीनारद उवाच । सप्तरात्रमतिक्रम्य दिनकतिपयानन्तरमित्यर्थः ॥ २७ ॥ अथोपदेशो वैशिष्ट्यमाह यदिति ॥ २८ ॥

इतिश्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य ।
पञ्चदशोऽध्यायः समाप्तः ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तदेवं ममतास्पदानां दुःखहेतुत्वमुक्त्वा अहन्तास्पदस्यापि देहस्याह अयमिति । द्रव्यज्ञानक्रियात्मकः अधिभूताधिदैवाध्यात्मिकः देहिनः देहोऽहमिति मन्यमानस्य जीवस्य ॥ २५ ॥

स्वस्थेनाऽव्यग्रेण गतिं तत्त्वं । द्वैते अहंतास्पदममतास्पदबहुले इदन्तास्पदे जगति ध्रुवो वास्तववस्तुभूतोऽयमर्थ इति विस्रम्भं विश्वासं प्रणयं वा त्यज तस्य वस्त्ववस्तुमयत्वात् "शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः" इत्यमरः । ततश्चोपशममाविश आश्रय॥२६॥

ननु, तर्हि ध्रुवोऽर्थ एव कः ? तमेव मह्यं कृपया कथयेत्यपेक्षायामङ्गिरसा प्रेरितो महाभागवतत्वान्नारद एवाह--एतामिति । मन्त्ररूपाम् उपनिषदं प्रतीच्छ गृहाण ॥ २७ ॥

भ्रमयति भवन्तमिति भ्रमन्तं द्वितयं द्वैतं उपैति उपैष्यति॥२८॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठे पञ्चदशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः ।

किञ्च द्रव्यज्ञानक्रियात्मकः भूतोभयेन्द्रियादिरूपो देहोपि विविधक्लेशसन्तापकृदुदाहृतः न तु केवलसुखकृदुदाहृतः ॥ २५ ॥

यस्मादेवं तस्मात् स्वस्थेन निश्चलेन मनसा आत्मनो जीवस्य गतिं भगवत्पादपद्मं विमृश्य द्वैते पूर्वोक्ते पुत्रकलत्रादौ दैहिके देहे च ध्रुवार्थविस्रम्भम् एते देहदैहिकाः अर्थाः ध्रुवा नित्या इति विश्वासं त्यज उपशममाविश आश्रय ॥ २६ ॥

एतां वक्ष्यमाणां मंत्ररूपामुपनिषदं मम मत्तः प्रतीच्छ स्वीकुरु ॥ २७ ॥

यस्य सङ्कर्षणस्य पादमूलमुपसृत्याश्रित्य पूर्वं शर्वादयः शिवादयः द्वितयं देहदैहिकादिद्वैतं तत्र भ्रमं ध्रुवत्वभ्रान्तिम् देहे अहमिति दैहिकेषु ममैवैते इति च भ्रान्तिं विसृज्य सद्यस्तदीयं महित्वं तत्साधर्म्यमवापुः भवानपि परं तत्साधर्म्यमुपैत्युपैष्यति ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
पञ्चदशाऽध्यायार्थप्रकाशः ॥ १५ ॥

भाषाटीका ।

यह पुरुष का द्रव्यज्ञान क्रियात्मक जो देह है सो जीव के नाना प्रकार के क्लेश और संताप करने वाला कहा गया है ॥ २५ ॥

तस्मात् स्वस्थमन से आत्मा की गति को विचार कर यह सांसारिक अर्थ नित्य हैं ऐसा विश्वास छोड कर शांति का आश्रय लो ॥ २६ ॥

नारद उवाच ॥

हे राजन् ! तुम सावधान होकर इस मंत्र रूप उपनिषद् [वेदभाग] को हम से ग्रहण करो । जिसके धारण करने से सप्त रात्रि में संकर्षण भगवान के दर्शन करोगे ॥ २७ ॥

जिनके चरणारविन्द के शरण जाकर पहिले शिव ब्रह्मादिक इस अहंता ममता के भ्रमको छोडकर तत्काल भगवान की असमाऽभ्यधिक महिमा को प्राप्त हो गये । तुमभी उसी महिमा को थोडे काल में प्राप्त होगे ॥ २८ ॥

इति श्रीमत् भागवत महापुराण षष्ठस्कन्ध
कीभाषा टीका में चतुर्दश अध्याय
समाप्त ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पञ्चदशोऽध्यायः समाप्तः ॥ १५ ॥

॥ षोडशोऽध्यायः ॥

———○:*:○———

श्रीशुक उवाच ।

अथ देवऋषी राजन् ! सम्परेतं नृपात्मजम् ।
दर्शयित्वेति होवाच ज्ञातीनामनुशोचताम् ॥ १ ॥

नारद उवाच ।

जीवात्मन् ! पश्य भद्रं ते मातरं पितरं च ते ।
सुहृदो बान्धवांस्तप्तान्शुचा त्वत्कृतया भृशम् ॥ २ ॥
कलेवरं स्वमाविश्य शेषमायुः सुहृद्वृतः ।
भुङ्क्ष्व भोगान् पितृप्रत्तानधितिष्ठ नृपासनम् ॥ ३ ॥

जीव उवाच ।

कस्मिञ्जन्मन्यमी मह्यं पितरो मातरोऽभवन् ।
कर्मभिर्भ्राम्यमाणस्य देवतिर्यङ्नृयोनिषु ॥ ४ ॥
बन्धुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः ।
सर्व एव हि सर्वेषां भवन्ति क्रमशो मिथः ॥ ५ ॥
यथा वस्तूनि पण्यानि हेमादीनि ततस्ततः ।
पर्यटन्ति नरेष्वेवं जीवो योनिषु कर्तृषु ॥ ६ ॥
नित्यस्यार्थस्य सम्बन्धो ह्यनित्यो दृश्यते नृषु ।
यावद्यस्य हि सम्बन्धो ममत्वं तावदेव हि ॥ ७ ॥
एवं योनिगतो जीवः स नित्यो निरहङ्कृतः ।
यावद्यत्रोपलभ्येत तावत्स्वत्वं हि तस्य तत् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षोडशे तत्सुतोक्त्यैव विशोकीकृत्य तं नृपम् ।
आदिदेश महाविद्यां नारदः शेषतोषणीम् ॥ १ ॥

आदौ तावत् तत्पुत्रमुखेनैव पितृपुत्रादिसम्बन्धो मिथ्येति दर्शयितुं योगबलेन तमेव ज्ञातीनां दर्शयित्वा जीवात्मन्नित्याद्युवाच ॥ १ ॥ २ ॥

शेषमवशिष्टमायूरस्ति अपमृत्युना मृतत्वादित्यर्थः ॥ ३ ॥

तदेव कलेवरं प्रविश्योत्थितो जीव उवाच यद्वा अन्तराले प्रेतशरीरे स्थित्वेति ज्ञेयम् ॥ ४ ॥

मयि मृते पुत्रदृष्ट्या शोकश्चेत् शत्रुदृष्ट्या हर्षः किं न क्रियते? इत्याशयेन सम्बन्धस्यानियतत्वमाह-बन्धवो विवाहादिभिः सम्बन्धिनः ज्ञातयः सपिण्डाः अरयो घातकाः मित्राणि रक्षकाः मध्यस्था उभयव्यतिरिक्ताः साधारणाः विद्विषो द्रव्यादिनिमित्तेन द्वेषिणः उदासीनास्तद्व्यतिरिक्ता इति भेदः ॥५॥

कर्मभिर्भ्राम्यमाणत्वे दृष्टान्तः यथा पण्यानि क्रयविक्र-

श्रीधरस्वामिकृतभावार्थदीपिका ।

पण्यद्रव्याणि कर्तृषु व्यवहर्तृषु परिभ्रमन्ति एवं जीवोपि योनिषु जनकेषु ॥ ६ ॥

एकस्मिन्नपि जन्मनि सम्बन्धस्यानियतत्वं सदृष्टान्तमाह द्वाभ्यां, नित्यस्य जीवतोपि अर्थस्य पश्वादेः अनित्यः अनियतः विक्रयादिना सम्बन्धनिवृत्तेः ॥ ७ ॥

एवं योनिगतः पित्रादिसम्बन्धं प्राप्तोऽपि स जीवो नित्यः देहजन्मादिना तस्य जन्माद्यभवात् अत एव वस्तुतो निरहङ्कृतः अहमस्य पुत्र इत्यभिमानशून्यः यत्र पित्रादौ सम्बन्धिनि यावदुपलभ्येत कर्मवशेन वर्तेत तावदेव तस्य पित्रादेस्तत्तस्मिन् स्वत्वं न तु विक्रयादुत्तरकालमपि अथवैवं सम्बन्धः यदुक्तं कलेवरम् स्वमाविश्येति तत्र तस्मिन् कलेवरे ममेदानीं स्वत्वं निवृत्तमिति सदृष्टान्तमाह, नित्यस्य चिरकालावस्थायिनः सुवर्णादेः योनिगतो देहम्प्रविष्टः यत्र देहे तस्य जीवस्य तत्तस्मिन् देहे स्वत्वम् न तु मरणोत्तरकालमपीत्यर्थः शेषं समानम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमुपदेक्ष्यमाणमंत्रोपनिषद्ग्रहणे तस्य रुचिमुत्पाद्याङ्गिरसोपदिष्टेषु वैराग्यापादकेष्वर्थेषु चित्रकेतुप्रभृतीनां विस्रम्भद्योतनाय मृतके पुनर्जीवं स्वयोगमहिम्नाऽऽवेश्य तन्मुखेनाङ्गिरसोपदिष्टानर्थानवीवदन्भगवान्नारद इत्याह मुनिः—अथेति । हे राजन्, स देवर्षिर्नारदः सम्परेतं मृतं नृपात्मजमनुशोचतां ज्ञातीनां चित्रकेत्वादीनां दर्शयित्वा योगप्रभावेनाविष्टजीवं प्रदर्श्य इति वक्ष्यमाणम् उवाच इत्याश्चर्यं अहो भगवतो नारदस्य प्रभावो यन्मृतमपि पुनरजीवयदिति ॥ १ ॥

उक्तमेवाह—जीवात्मन्निति द्वाभ्यां । हे जीवात्मन् ! भद्रं प्रविष्टशरीरस्य ते तव मातरं पितरं सुहृदो बान्धवांश्च त्वन्निमित्तया शुचा भृशन्तप्तान्पश्य बान्धवास्तप्ता इति प्रथमान्तपाठे मातरं पितरं च पश्य बान्धवाः सुहृदश्च त्वत्कृतया शुचा भृशं तप्ताः अतस्तानपि पश्येत्यन्वयः ॥ २ ॥

शेषमवशिष्टमायुर्जीवनं यस्य तत्कलेवरं समाविश्य, अपमृत्युना मृतत्वाच्छेषमायुरित्युक्तं सुहृद्भिः परिवृतस्त्वं नृपासनमधितिष्ठन् पितृप्रत्तान् पित्रादत्तान् भोगान् भुङ्क्ष्व ॥ ३ ॥

भुङ्क्ष्वेत्युक्तो जीवस्तत्कलेवरमाविश्यावददित्याह-कस्मिन्नित्यादिना ईश्वरइत्यन्तेन, तावत्पितृपुत्रत्वादिसम्बन्धस्यानियतत्वमाह—कस्मिन्निति । देवतिर्यङ्मनुष्ययोनिषु कर्मभिः पुण्यपापरूपैः भ्राम्यमाणस्य जायमानस्य अत एव तत्र तत्र तत्तत्पुरुषविशेषान्प्रति तत्तन्निरूपितबन्ध्वादिभावं प्राप्तस्य मह्यं मम विभक्तिव्यत्यय आर्षः अमी चित्रकेत्वादयः कस्मिन् जन्मनि पितरः मातरश्चाभवन् ? न सर्वेषु जन्मस्वभवन्, किन्त्वेतस्मिन्नेव. अतः पितृपुत्रत्वादिसम्बन्धो न नियत इति भावः यद्वा कस्मिन् जन्मन्यमी पितरो मातरश्चाऽभवन् ॥ ४ ॥

नतु, सर्वेष्वपि जन्मस्वभवन्नित्यत्राह—बन्ध्वित्ति । सर्वे जीवाः सर्वेषां जीवानां क्रमशः जन्मपरम्पराभिः मिथ अन्योन्यं बन्ध्वादयो भवन्तीत्यन्वयः तत्र बन्धवो विवाहादिभिः सम्बन्धिनः ज्ञातयः सपिण्डाः अरयो घातुकाः मित्राणि रक्षकाः, मध्यस्था उभयव्यतिरिक्ताः विद्विषो द्रव्यादिनिमित्तेन द्वेषिणः उदासीनास्तद्व्यतिरिक्ता इति भेदः ॥ ५ ॥

कर्मभिर्भ्राम्यमाणत्वे दृष्टान्तमाह—यथेति । यथा पण्यानि क्रयाद्यर्हाणि हैमादीनि हेमविकाररूपादीनि कटकाङ्गुलीयकादीनि वस्तूनि कर्तृषु व्यवहर्तृषु नरेष्वितस्ततः पर्यटन्ति एवं जीवा अपि देवतिर्यङ्मनुष्ययोनिषु भ्रमन्ति संसरन्ति ॥ ६ ॥

एकस्मिन्नपि जन्मनि सम्बन्धस्यानियतत्वं सदृष्टान्तमाह—नित्यस्येतिद्वाभ्यां । नित्यस्याविप्लुतस्य जीवत इति यावत् तस्य पश्वादेरर्थस्य अनित्यः अनियतः सम्बन्धो नृषु दृष्टः विक्रयादिना पूर्वस्वामिसम्बन्धस्य निवृत्तेरुत्तरस्वामिसम्बन्धदर्शनादेकस्मिन्नपि जन्मनि सम्बन्धो न नियत इति भावः, तदेवोपपादयति - यावदिति, यस्य पुंसो येन पश्वादिना यावत्सम्बन्धः क्रयादिनिमित्तसम्बन्धोऽस्ति तस्य ममत्वं स्वामित्वादिसम्बन्धस्तावदेव हीत्यनेन लोकप्रसिद्धिं द्योतयति ॥ ७ ॥

एवं दृष्टान्ते उपपादितमर्थं दार्ष्टान्तिके दर्शयति - एवमिति । स प्रसिद्धो निरहंकृतिः वस्तुतो देहात्माभिमानरहितोपि जीवः कर्मणा योनिगतदेवादिशरीरेष्वनुप्रविष्टस्सन्यत्र देवादिशरीरे नित्योऽपरित्यक्तदेहो यावदुपलभ्यते तावदेव तस्य स्वत्वं स्वीयत्वं, तावदेव हि तस्य पित्रादयः स्वीयाभवन्ति, तावदेव तस्येतरैः पितृपुत्रत्वादिसम्बन्ध इति यावत् तत्तस्मात्तत्रोपलभ्यमानत्वादित्यर्थः यद्वा यत्र शरीरे यावदुपलभ्येत तस्य शरीरस्य तावन्तं कालं जीवात्मानंप्रति स्वत्वं तत्तस्मात्तत्रोपलभ्यमानत्वादित्यर्थः अनुपलम्भे तु आत्मनिरूपितस्वत्वस्यैव शरीरेऽभावाच्छरीरनिरूपितपितृपुत्रत्वादिसम्बन्धो दूरादपेत इति भावः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

संसारस्य पुत्रमित्रादिलक्षणानियतत्वं संसारिचेतनस्य हरिनियतनित्यत्वं परमचेतनस्य परमनित्यत्वं तज्ज्ञानमेव पुरुषार्थसाधनमित्यादिकमस्मिन्नध्याये निरूप्यते, अत्र नारदो योगमाहात्म्यं विद्योतयन् राजकुमारमुत्थाप्येदं वक्तीत्याह—अथेति इति ॥ १ ॥ २ ॥ ३ ॥

एवं जीवात्मना किमवादि ? इत्यत्राह, कस्मिन्निति ॥ ४ ॥ ५ ॥

पण्यानि विक्रेयाणि नरेषु विक्रेतृषु रेतस्सेककर्तृषु पित्रादिषु योनिषु मातृषु कर्तृष्विति वा ॥ ६ ॥

ननु, तर्हि हाटकादिवदनित्यत्वमापतितं जीवस्येत्याशङ्क्य सम्बन्धस्यैवानित्यत्वं न तु जीवात्मन इत्याह—नित्यस्येति, यथा सम्बन्धस्यानित्यत्वं तथा ममपुत्रोयमिति ममत्वमप्यनित्यमित्याह यावदिति, हि शब्दाभ्यां प्रत्यक्षादिप्रमाणसिद्धत्वं दर्शयति एव शब्देनायोगव्यवच्छेदं करोति ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

निरहंकृत इति स्वभावाख्यानं यत्र योनिषु स्वत्वं स्वकीयत्वम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

संपरेतमतिवाहिकदेहं प्राप्तं । दर्शयित्वा योगबलेनाविर्भाव्य ॥ १ ॥ २ ॥

टीकायामपमृत्युनेति तत्कारणकोचितपापविशेषो भवति । यतएव पूर्णमायुर्ह्रासयतीति ॥ कलेवरं स्वमाविश्येति विरोधात् पक्षान्तरमाह यद्वेति ॥ ३ । ४ ॥

मध्यस्थाः तस्मिन् तादृशेच मिलन्तः । उदासीना तयोरपि न मिलन्तः ॥ टीकायामथ वैवंसम्बन्ध इत्यत्र श्लोकद्वयस्येति शेषः ॥ ५—८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

षोडशे मृतपुत्रोक्त्या प्रबुद्धो नारदान्मनुम् ।
प्राप्य संस्तूय शेषन्तन्मुखाज्ज्ञानं नृपोऽध्यगात् ॥ १ ॥

ज्ञातीनामिति द्वितीयार्थे षष्ठी ॥ १ ॥

तदपि शोकमोहयोः शेषं दुर्व्वारमभिलक्ष्य मृतपुत्रमुखेनैव तं प्रबोधयितुमाह--जीवेति शुचा शोकेन ॥ २ ॥

शेषमवशिष्टमायुर्व्याप्येत्यपमृत्युना मरणं राजानमूहयति । वस्तुतस्तु तस्य नास्त्येवायुर्मायिकत्वात् पितृप्रत्तान् पित्रा दत्तान् ॥ ३ ॥

जीव उवाचेति तदेव कलेवरं प्रविष्टो ऋषिर्जीवस्त्रिव जीव इत्यर्थः मह्यं मम ॥ ४ ॥

मयि मृते पुत्रदृष्ट्या शोकश्चेत् क्रियते, शत्रुदृष्ट्या हर्षः किं न क्रियते ? इत्याशयेन सम्बन्धस्याऽनियतत्वमाह—बन्धवो विवाहादिसम्बन्धिनः ज्ञातयः सपिण्डा अरयो घातकाः मित्राणि हितैषिणः, मध्यस्थाः बहिरन्तर्मैत्रीवैरवन्तः । उदासीना मैत्रीवैरशून्याः । द्विषः उत्कर्षासहिनः । क्रमश इति जन्मान्तरे शत्रुरप्यस्मिन् जन्मनि पुत्रोभवतीत्यर्थः । यस्तु पुत्रः सद्गुणोभूत्वा म्रियते स तु दुःखाधिक्यप्रदत्वाच्छत्रुरेवेति लोकोक्तिः ॥ ५ ॥

ननु, यदि शत्रुरपि पुत्रः स्यात्तर्हि तत्रात्मीयत्वेन स्नेहः कथं ? स्यात्तत्र दृष्टान्तेन समादधाति यथेति । पण्यानि क्रयविक्रयार्हाणि हेमादीनि हेममुद्रिकादीनि यैव हेममुद्रा शत्रुगृहस्थिता स्ववध प्रयोजिका सैव दैवादात्मगृहमागता प्रेमास्पदीभूता भोगप्रयोजिकाच भवति । एवमेव जीवयोनिषु मनुष्यगर्दभादिषु ये कर्त्तार उत्पादकाः पितरो मातरश्च तेषु प्रविशन्ति ॥ ६ ॥

मम जीवस्य चित्रकेतुपुत्रत्वमेतावन्तं कालमासीत्तावदसौ स्नेहमकरोदेव अतः परमन्यपुत्रत्वं प्राप्स्यामि स एव स्नेहं करिष्यतीत्यर्थान्तरन्यासेनाह नित्यस्यार्थस्य स्वर्णमुद्राया एकास्या अपि क्रयविक्रयादिव्यवहारैरेकस्मिन्नपि दिने अन्य जन-हस्तगताया ममेयं ममेयं नान्यस्येति सम्बन्धो ह्यनित्यः तत्र च यावदितिस्पष्टम् ॥ ७ ॥

वस्तुतो निरहङ्कृत एव यत्र पित्रादौ तस्य पित्रादेः । यद्वा निरहङ्कृत एव जीवो यावद्यत्र देहे उपलभ्येत तावदेव तस्य तस्मिन् जीवस्य देहे स्वत्वं नान्यदा अतोऽस्मिन् देहे सम्प्रति मम स्वत्वाभावात् कथमत्राहङ्कारं करोमीति तस्मात् कलेवरं समाविश्येति त्वत्प्रार्थितं न घटत एवेति भावः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मंत्रोपनिषदि अत्यन्ततो विशोकस्याधिकारस्तदर्थमुक्तोपदेशेन विशोकस्यापि राज्ञः पुनरत्यन्ततो विशोकत्वासिद्धये तत्पुत्रमुखेनापि पितृपुत्रादिसम्बन्धस्यानित्यता तदनन्तरं मन्त्रोपनिषच्च वर्ण्यते—षोडशेनाध्यायेन अथेति सम्परेतं नृपात्मजं योगबलेन ज्ञातीनां दर्शयित्वा जीवात्मन्नित्याद्युवाच ॥ १ ॥

हे जीवात्मन् ! ते भद्रं भवतु ते मातरं पितरं तथा त्वत्कृतया त्वदर्थकृतया शुचा शोकेन भृशं तप्तान् सुहृदो बान्धवांश्च पश्य ॥ २ ॥

ते शेषमवशिष्टमायुरस्ति अपमृत्युना मृतत्वात् अतः कलेवरमाविश्य नृपासनमधितिष्ठ पितृप्रत्तान् पित्रा दत्तान् भोगान् भुङ्क्ष्व ॥ ३ ॥

अमी चित्रकेत्वादयः पितरो ममैव नियमेन कस्मिन् जन्मनि अभवन् पितृपुत्रादि सम्बन्धोऽनित्य इत्यर्थः ॥ ४ ॥

तदनित्यतामेवाह—बन्ध्वादि । सर्वे एव सर्वेषां क्रमशो बन्ध्वादयो भवन्ति ॥ ५ ॥

पण्यानि क्रयविक्रयार्हाणि हेमादीनि यथा कर्तृषु व्यवहर्तृषु इतस्ततः पर्यटन्ति एवं जीवो योनिषु देवमनुष्यादिषु पर्यटति ॥ ६ ॥

नित्यस्य प्रत्यहं व्यवहारार्हस्य ग्रामभृत्यादेरेकस्य नृषु एकस्मिन् दिने यश्चदतस्य भृत्यस्तेनैवाज्ञादिना क्रीतत्वात् एवमन्यस्मिन्नन्यस्यापरस्मिन्नपरस्येति अनित्यः सम्बन्धो दृश्यते यस्य यावत्सम्बन्धः, स्वामित्वं तावदेव तस्य ममत्वं मदीयोयं भृत्यादिरितिधीः ॥ ७ ॥

एवं यो नित्यः शाश्वतो निरहंकृतः जाते जाते पुत्रत्वाद्यहंकाररहितोपि यद्वा पितृपुत्रादिसम्बन्धानुपलंभे अहं पितायं पुत्र इत्याद्यहंकाररहितोपि सः योनिगतः पुनः पुनर्जन्मस्थानं गतः संसारं प्रविष्ट इत्यर्थः यावत् यत्र पित्रादौ पुत्रादिरूपेण उपलभ्येत तावदेव तत् तस्मिन् पुत्रादौ तस्य पित्रादेः स्वत्वं स्वकीयत्वम् ॥ ८ ॥

एष नित्योऽव्ययः सूक्ष्म एष सर्वाश्रयः स्वदृक् ।
आत्ममायागुणैर्विश्वमात्मानं सृजते प्रभुः ॥ ९ ॥
न ह्यस्यातिप्रियः कश्चिन्नाऽप्रियः स्वः परोपि वा ।
एकः सर्वधियां द्रष्टा कर्तॄणां गुणदोषयोः ॥ १० ॥
नादत्त आत्मा हि गुणं न दोषन्न क्रियाफलम् ।
उदासीनवदासीनः परावरदृगीश्वरः ॥ ११ ॥

श्रीशुक उवाच ।

इत्युदीर्य गतो जीवो ज्ञातयस्तस्य ते तदा ।
विस्मिता मुमुचुः शोकं छित्त्वाऽऽत्मस्नेहशृङ्खलाम् ॥ १२ ॥
निर्हृत्य ज्ञातयो देहं तथा कृत्वोचिताः क्रियाः ।
तत्यजुर्दुस्त्यजं स्नेहं शोकमोहभयार्तिदम् ॥ १३ ॥
बालघ्न्यो व्रीडितास्तत्र बालहत्या हतप्रभाः ।
बालहत्याव्रतं चेरुर्ब्राह्मणैर्यन्निरूपितम् ।
यमुनायां महाराज ! स्मरन्त्यो द्विजभाषितम् ॥ १४ ॥

भाषा टीका ।

श्रीरुक्मिणीरमणाय नमः ।

श्रीशुकउवाच ।

अनन्तर हे राजन् ! देवऋषी (नारद) जी मरे मये राज पुत्र को शोक करने वाले ज्ञातियों के आगे बोले ॥ १ ॥

नारद उवाच ।

हे जीवात्मन् तुमारा मंगल हो तुम अपने माता और पिता को देखो । और तुमारे शोक से मति तप्त, तुमारे सुहृद और बन्धुवों को देखो ॥ २ ॥

अपने कलेवर में प्रवेश करके और शेष जो आयु है उसमें पिता के दिये हुए भोगों को भोगो और राज्यसिंहासन् का अधिकार लो ॥ ३ ॥

जीव उवाच ॥

जीव बोलाकि देव तिर्यक और मनुष्ययोनि में कर्मों से भ्रमते हुए मेरे कौन जन्म में ये माता पिता हुए हैं ॥ ४ ॥

बन्धु, जातिवाले, वैरी, वीच के, मित्र उदासीन, और कारण से द्वेष करने वाले, ये सब ही के सब कोई परस्पर क्रम हुआ करते हैं ॥ ५ ॥

जैसे क्रय विक्रय के योग्य सुवर्णादि वस्तु अलग २ मनुष्योंके समीप भ्रमती है इसी प्रकार जीव भी अनेक योनियों में भ्रमता रहता है ॥ ६ ॥

मनुष्यों में विद्यमान वस्तु का भी सवन्ध अनित्यदेख पड़ता है । जब तक जिस वस्तु में जिसका सम्बन्ध है तबही तक उस में उसका ममत्व रहता है ॥ ७ ॥

ऐसे ही नित्य निरभिमानी जीव भी जब तक जिसयोनि में देख पड़ता है तब तक ही उस में उसयोनि के माता पिताओं का स्वत्व रहता है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

जीवस्य नित्यत्वं साधयति, एष नित्यः तत्र हेतुः अव्ययः अपक्षयशून्यः तत्कुतः ? सूक्ष्मः जन्मादिशून्यः तच्च कुतः ? सर्वाश्रयः जन्मादिमतो देहादेराश्रयः न तु देहादिरूपः यतः स्वदृक् स्वप्रकाशः सर्वाश्रयत्वमुपपादयति आत्मनो मायाया गुणैरात्मानमेव विश्वं विश्वात्मकं सृजति "तदात्मानंस्वयमकुरुत" इति श्रुतेः उपादानकारणत्वात्सर्वाश्रय इत्यर्थः जीवस्य वस्तुतो ब्रह्मत्वात् ब्रह्मण एव चिच्छक्तिविशिष्टस्येश्वरत्वेन स्रष्टृत्वाज्जीवः सृजतीति वाचोयुक्तिः । यद्वा स्वकर्मद्वारा सृष्टिनिमित्तत्वेन स्रष्टृत्वं भोग्यस्य च सर्वस्य भोक्ताश्रयत्वात्सर्वाश्रयत्वं चोक्तमिति द्रष्टव्यम् ॥ ९ ॥

यदुक्तं सुहृद्गन इति सुहृदो बान्धवांस्तप्तानिति च तदप्याह नह्यस्येति तत्र हेतुः एकः सुहृदादिसङ्गरहितः तत्कुतः गुणदोषयोर्हिताहितयोः कर्तॄणां मित्रादीनां याः सर्वाधियः विचित्रा बुद्धयः तासां द्रष्टा साक्षी ॥ १० ॥

स इत्थं प्रतिबुद्धात्मा चित्रकेतुर्द्विजोक्तिभिः ।
गृहान्धकूपान्निष्क्रान्तः सरःपङ्कादिव द्विपः ॥ १५ ॥
कालिन्द्यां विधिवत्स्नात्वा कृतपुण्यजलक्रियाः ।
मौनेन संयतप्राणो ब्रह्मपुत्राववन्दत ॥ १६ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

यच्चोक्तं भुंक्ष्व भोगानित्यादि तत्राप्याह--नादत्त । इति गुणं सुखं दोषं दुःखं क्रियाफलं च राज्यादिकम् उदासीनत्वे हेतुः परावरदृक् कारणस्य कार्यस्य च साक्षी न तु भोक्ता यत ईश्वरः देहादिपारतन्त्र्यशून्यः अत एवम्भूतस्य मम च युष्माकं च सम्बन्धाभावाच्छोकं मा कुरुतेति वाक्यार्थः ॥ ११ ॥ १२ ॥ १३ ॥

द्विजभाषितमङ्गिरसा प्रोक्तं पुत्रादीनां दुःखहेतुत्वं स्मरन्त्यः पुत्रकामनाशून्या निर्मत्सराः सत्य इति भावः ॥ १४ ॥

निबिडपङ्कतुल्यं गृहं विहाय निष्क्रमसामर्थ्यं धीरस्य तस्यैव योग्यं नान्यस्येति सदृष्टांतमाह स इत्थमिति सरसः पङ्कात् द्विपो गज इव ॥ १५ ॥

कृताः पुण्यजलक्रियाः पितृतर्पणाद्या येन संयतप्राणो नियतेन्द्रियः ॥ १६ ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तर्हि कीदृशं तस्य स्वरूपं ? यत्स्वरूपगतो न भवत्यनियतः पितृपुत्रत्वादिसम्बन्ध इत्यत्राह-एष इति । एष जीवो नित्यः आद्यन्तरहितः कुतः ? अव्ययः नाशरहितः तत्कुतः ? सूक्ष्मः निरतिशयसूक्ष्मः विनाशकैरव्याप्यः निरतिशयसूक्ष्मत्वात् विनाशकाहि जलाग्निविषशस्त्रादयो विनाश्यं व्याप्य विनाशयन्ति अस्य तु निरतिशयसूक्ष्मतया सर्वान्तःप्रवेशनस्वभावत्वेनाव्याप्यत्वादव्ययः एकः ज्ञानैकाकारः "एको व्रीहिः सुसम्पन्नः" इतिवज्जात्यभिप्रायकत्वकथनं न तु जीवस्वरूपैकत्वाभिप्रायकं तत्स्वरूपनानात्वस्य बहुप्रमाणप्रतिपन्नत्वात् सर्वाश्रयः सर्वेषां बुद्धीन्द्रियमनःप्राणादीनामाश्रयो धारकः स्वमात्मानं पश्यतीति स्वदृक् प्रत्यग्रूपः यद्वा स्वेनैव दृश्यत इति स्वदृक् स्वयंप्रकाशः अस्त्वीदृशं तस्य स्वरूपं किमयं स्वानर्थावहं देवमनुष्यादिशरीरं स्वयमेव सृष्ट्वा तत्र प्रविष्टोऽनर्थमनुभवति उत स्वकीयकर्मणा सृष्टे प्रविष्टोऽनुभवतीत्यत्राह--आत्मेति, न स्वानर्थावहं शरीरं स्वयं सृजति नापि केवलं कर्म, अपि तु परः परमपुरुषः आत्मनः स्वस्य मायया तस्य गुणैः सत्त्वादिभिरात्मानं प्रत्यगात्मानं विश्वं देवमनुष्यादिविश्वाकारं सृजति ॥ ९ ॥

ननु, कोऽसौ परः पुरुषः यदि कश्चित्सिध्यति तर्हि सोपीदृशदेवादिविषमसृष्टिं गर्भजन्मजरामरणाद्यनंतदुःखगर्भां कुर्वन्वैषम्यनैर्घृण्ययुक्तः संसृष्टजीवान्नातिरिच्येत ? तत्राह - नहीति । अस्य परमपुरुषस्य कश्चिदतीव प्रीतिविषयः कश्चिदप्रियः स्वीयः परकीयो वा नास्ति किंतु सर्वेषु समदृष्टिरिति भावः तर्हि कथं विषमं सृजति ? तत्राह एक इति, गुणदोषयोः पुण्यपापयोः कर्तॄणां जीवानां सर्वबुद्धिवृत्तीनां एक एव सन् द्रष्टा भवति । तस्य सामान्येन स्रष्टृत्वेपि देवादिवैषम्यतत्तज्जीवसम्बन्धिपुण्यपापमूलकत्वान्न तस्य वैषम्यादिदोषप्रसक्तिरिति भावः सर्वधियां द्रष्टेत्यनेन तस्य सर्वज्ञत्वं पुण्यपापकर्तृत्वं, तत्फलभोक्तृत्वं चाभिप्रेतम् ॥ १० ॥

तदेवाह--नादत्त इति । आत्मा परमपुरुषो गुणदोषौ नादत्ते न स्वीकरोति गुणदोषकर्तृत्वमात्मनि न मन्यते अत एव क्रियाफलं सुखदुःखादिकम् नादत्ते, किन्तूदासीनवदासीनः उदासीनवज्जीवान्तरात्मतया स्थितः तत्करणेनात्यन्तोदासीनत्वमपि नास्तीत्यावेदितं गुणदोषयोस्तस्य प्रयोजककर्तृत्वात्साक्षात्कर्तृत्वाभावादुदासीनत्वं तत्तत्पूर्वं पूर्वं कर्मवासनानुसारेण प्रयोजयितृत्वाच्चानुदासितृत्वमपि विषयभेदादुभयोरेकस्मिन्न विरोध इति भावः । ननु, जीवस्यापि न गुणदोषयोः साक्षात्कर्तृत्वं तस्य निष्क्रियत्वाद्देहस्यैव साक्षात्कर्तृत्वात् किन्तु देहेन्द्रियादिनियमनरूपमेव तस्य कर्तृत्वम् एवञ्च प्रयोजयितृत्वं जीवपरयोरुभयोरप्यविशिष्टमिति कथमन्यतरस्य क्रियाफलोपादानमन्यतरस्य नेति विभागस्तत्राह--परावरदृगीश्वर इति, स्वयमीश्वरो जीवप्रभृतिदेहेन्द्रियमनःप्राणपर्यन्तानां नियन्ता सन् परावरदृक् परं प्रकृतिपुरुषाभ्यां विलक्षणं स्वस्वरूपमपरं जीवस्वरूपं प्रकृतिस्वरूपं च एतत्त्रितयं यथावत्पश्यतीति परावरदृक् जीवस्तु कर्मणा तिरोहितस्वभावः प्रकृतिमेवात्मानं मत्वा तद्गतं कर्तृत्वं साक्षात्स्वस्मिन्मनुत इति स क्रियाफलभोक्ता भवति परमात्मा तु नित्यासङ्कुचितापरिच्छिन्नानुभूत्या स्वपरयाथात्म्यवित्वाद्देहात्मभ्रमाभावेन क्रियाफलभोक्तेति भावः नहीत्यादिश्लोकद्वयं जीवपरतयापि वर्णयितुंशक्यं तथा हि, पूर्वप्रस्तुतं जीवस्वरूपमेव विशोधयति--नहीति, अस्य जी[illegible] स्वतः प्रियाप्रियो न भवतः अपि तु कर्मकृतावित्यर्थः तथा [illegible]परविभागोपि न. एकः एकरूपः ज्ञानैकाकारः देहगतविकारैरस्पृष्टत्वेन सदैकरूप इति वा गुणदोषयोः कर्तॄणां हेतुभूतानां सर्वधियां द्रष्टा आश्रयः नादत्त इति विवेकज्ञानवान् आत्मा गुणदोषान्वयं नाभिमन्यत इत्यर्थः ईश्वरः देहादिनियमनपरः परावरदृक् स्वस्वरूपप्रकृतिस्वरूपयोर्द्रष्टेत्युक्तवाञ्जानिष्टो जीवः ॥ ११ ॥

तत उपरितनं वृत्तान्तमाह मुनिः—इतीति । इतीत्थमुदीर्योक्त्वा पुनर्जीवः कलेवराद्विनिष्क्रम्य गतः तस्य मृतस्य ये ज्ञातयः ते तथा विस्मितास्सन्तः आत्मनां स्वेषां यः पुत्रादि-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विषयकः स्नेहः स एव शृङ्खला तां छित्त्वाऽपोह्य शोकं मुमुचुः ॥ १२ ॥

ततो ज्ञातयः तं शवमग्नौ निर्हृत्य दग्ध्वा उचिताः मृतोद्देशेन कर्तव्याः क्रियाः कृत्वा शोकमोहादिप्रदं दुस्त्यजं स्नेहमनुरागं तत्यजुः ॥ १३ ॥

ततो बालघ्न्यः याः गरलदानेन बालं हतवत्यः तास्सर्वाः द्विजेनाङ्गिरसा भाषितं स्मरन्त्यो व्रीडिताः लज्जिताः बालहत्यया-हृताः प्रभाः यासां ताः यद्बालहत्याव्रतं बालहत्यापनोदकं व्रतं ब्राह्मणैर्निरूपितं कर्तव्यत्वेन चोदितं तद्यमुनायां हे महाराज, चेरुरनुष्ठितवत्यः ॥ १४ ॥

ततः स चित्रकेतुः इत्थं द्विजोक्तिभिरङ्गिरस उक्तिभिः जीवेन संवादिताभिर्नारदोक्तिभिश्च प्रतिबुद्धः उदितः आत्मविवेको यस्य तादृशः सरसः पङ्कात् गज इव गृहमेवान्धकूपस्तस्माद्वि-निष्क्रान्तः निर्गतः ॥ १५ ॥

कालिन्द्यां यमुनायां विध्युक्तप्रकारेण स्नात्वा कृताः पुण्याः जलक्रियाः पितृतर्पणादयो येन तादृशः मौनेन परमात्मस्वरूप-संशीलनेन हेत्वर्थे तृतीया मौनार्थं संयतप्राणः नियमितान्त-र्बाह्येन्द्रियः इतरैः सम्भाषणराहित्यरूपेण मौनेन वा; ब्रह्मपुत्रौ नारदाङ्गिरसौ अवन्दत दण्डवन्ननाम ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, तर्हि केन सहास्य नित्यसम्बन्धः ? इति तत्राह - एष इति । य आत्ममायागुणैः स्वाधीनप्रकृतिगुणैर्विश्वं परावरं जग-त्सृजति, आत्मानं चावताररूपेण व्यनक्ति स एष सर्वाश्रयः सर्वैर्नित्यसम्बन्ध इत्यन्वयः । अनित्यत्वात्कथं घटत इत्यत उक्तं नित्य इति, कोऽयं इत्यतो ऽव्यय इति अनेन नित्यशब्दो व्या-ख्यातः अनुपलब्धौ हेतुमाह--सूक्ष्म इति, न चायं जीववद्बहुत्व-संख्यापेत इत्याह-एक इति मुख्यत एकत्वसंख्याविशिष्ट इत्यर्थः सृष्टौ प्रवर्तमानस्य गुणसम्बन्धेन ज्ञानलोपो नास्तीत्याह - स्वदृ-गिति, स्वरूपभूतज्ञानस्यापि प्रबलप्रतिबन्धकेनाभिभवः किं न स्यादित्यत आह-प्रभुरिति, अनेन हरिणा नित्यसम्बन्धः पित्रा-दिभिरनित्य इति ज्ञापितम् "अनित्यसम्बन्धयुताः पित्राद्या नित्ययु-ग्घरिः" इति वचनात् ॥ ९ ॥

एवंविधस्य हरेर्योग्यतातिरेकेण न क्वापि प्रियाप्रियौ स्त इत्याह-नहीति । कुतोऽप्रियाभावः ? इति तत्राह सर्वेति, गुणदोषयोः कर्तॄणां पुरुषाणां स्त्रीणाञ्च सर्वासां धियां कु-शलाकुशलसाक्षित्वेन तदनुसारेण फलदातृत्वादतिप्रियाद्यभाव इत्यर्थः द्वितीयसद्भावे तद्वयात्कस्मिंश्चिदतिप्रियत्वादि संभवति न हि हरेस्तादृशोऽस्तीत्यभिप्रेत्याह एक इति ॥ १० ॥

साक्षित्वं स्पष्टयति-नेति । आत्मा परमात्मा कथं गुणाना-द्वानं हरेः "साङ्गर्भिकं जिघ्रति षड्गुणेश" इत्युक्तेरत उक्तं हीति हि शब्दो हेतौ गुणोपभोगेन लोकवद्वृद्धयभावो गुणानादा-नस्यार्थो न तु सर्वात्मनाऽभोक्तृत्वं तथात्वे "भोक्ता सद्गुणभो-क्तृत्वाच्च भोक्ता तद्वृद्धितः । अचिन्त्यशक्तितस्तच्च युज्यते परमे-शितुः" इति स्मृतिविरोधः स्फुटः उदासीन इव सर्वस्मादुत्त-मत्वेन स्थित, एवं भोक्तृत्वाभोक्तृत्वे लोकविरुद्धे हरेः कथं घटेते इत्यत उक्तमीश्वर इति परावरदृक्त्वमृषीणामप्यस्तीत्यत उक्तमुदासीन इति तद्वस्तुषु बाह्याऽभ्यन्तरवृत्त्या तिष्ठन्नेव परावरदृगित्यर्थः ॥ ११ ॥

ज्ञातयस्तस्मिन् जन्मनि सपिण्डाः आत्मनां स्नेहां तस्मिन्पुत्रे स्नेहाख्यशृंखलां छित्वा ॥ १२ ॥

ज्ञातेः सपिण्डस्य तस्य देहं निर्हृत्य दग्ध्वोचिताः क्रियाः श्राद्धादिलक्षणाः ॥ १३—१४ ॥

तत्र चित्रकेतुः किं चकारेति तत्राह । स इत्थमिति ॥ १५ ॥

कृताः पुण्यजलैः क्रियास्तर्पणादिलक्षणाः येन स तथा ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेवं जीवस्य पारतन्त्र्यमुक्त्वा तत्स्वातन्त्र्यर्थं परमपि दर्शयति - एष इति त्रिभिः, एष प्रत्यक्ष एव श्रुतियुक्तिसिद्धः परमेश्वरः पुनरुक्तिर्निर्द्धारणार्था सूक्ष्मो दुर्ज्ञेयः ॥ ९ । १० ॥

आत्मा परमात्मा ॥ ११—१३ ॥

बालघ्नय इति सार्द्धकम् ॥ १४—१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एवं जीवस्य पारतन्त्र्यादनैश्वर्याच्च ततोऽन्यः कश्चित् स्वतन्त्रः ईश्वरोऽस्तीति प्रतीयते स एष कीदृश इत्यपेक्षायामाह—एष इति । जीवस्य मायया आवरणादपरोक्षस्यापि परोक्षायमाणत्वात् तच्छब्दवाच्यत्वमुक्तम् । ईश्वरस्य मायया अनावरणात् प्रयो-क्तुरङ्गिरसोपि जीवन्मुक्तत्वेनाविद्यावरणराहित्यादपरोक्षत्वेनैत-च्छब्दवाच्यत्वमुच्यते एष इति, तत्र नित्यत्वमव्ययत्वं सूक्ष्म-त्वमिति साधारणधर्मत्रयमीश्वरस्य. पारतन्त्र्यमनैश्वर्यमिति त्वसाधारणधर्मद्वयं जीवस्य पूर्वमेव व्यञ्जितम् ईश्वरस्यास-साधारणान् सर्वाश्रयत्वादीन् धर्मान् वक्तुं पुनरप्येतच्छब्दमु-पन्यस्यति एष इति । आत्ममायाभिर्मयत्वादात्मानम् ॥ ९ ॥

जीवस्य बन्धुज्ञात्यरिमध्यस्थादयः अज्ञाननिबन्धाः नत्वीश्वर-स्येत्याह नहस्येति । यस्तु भक्तोऽतिप्रियः स्वश्च भक्तद्वेषी अप्रियः परः शत्रुश्च इति तत्र "समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजन्ति च मां भक्त्या मयि ते तेषु चाप्यहम्" इति । "तानहं द्विषतः क्रूरान् संसारेषु नराधमान्" इति गीतोक्तेर्भक्तव-त्सलत्वं भूषणमेव न तु दूषणं किञ्च जीवा बद्धः ईश्वर-स्त्वेक एव गुणदोषयोर्हिताहितयोः कर्तॄणां मित्रादीनां याः सर्वा धियः विचित्रा बुद्धयस्तासां द्रष्टा साक्षी ॥ १० ॥

जीवो हि मित्रामित्रयोर्गुणदोषौ गृह्णाति यतः क्रियाफलं

अथ तस्मै प्रपन्नाय भक्ताय प्रयतात्मने ।
भगवान्नारदः प्रीतो विद्यामेतामुवाच ह ॥ १७ ॥
ॐनमस्तुभ्यं भगवते वासुदेवाय धीमहि ।
प्रद्युम्नायाऽनिरुद्धाय नमः सङ्कर्षणाय च ॥ १८ ॥
नमो विज्ञानमात्राय परमानन्दमूर्त्तये ।
आत्मारामाय शान्ताय निवृत्तद्वैतदृष्टये ॥ १९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सुखं दुःखञ्च भुङ्क्ते ईश्वरस्तु नैवेत्याह—नादत्त इति । अत एव उदासीनवत् सर्वान्तर्यामित्वेनासीनः परावरे भद्राभद्रे साक्षित्वेन पश्यतीति सः उदासीन इवेत्यरिमित्रादिप्रतियोग्युदासीनस्तु नैवेत्यर्थः अत ईश्वरमायानिबद्धानामेषां चित्रकेत्वादीनां महदनुग्रहमूलामीश्वरप्रपत्तिं विना शोकमोहादिमयोऽयं संसारो दुस्तर एवेति किं मया बहुवक्तव्यमिति प्रकरणार्थः ॥ ११ ॥ १२ ॥ १३ ॥

बालहत्याहतप्रभा इति हतप्रभत्वेनैव लक्षणेन बालघ्न्यः एता एवेति यदा सर्वे विदिततत्त्वास्तदा व्रीडितास्ताः सत्यं वयमेव पामर्यो बालमहन्मेति वचसा निष्कपटीभूयाङ्गिरःप्रभृति ब्राह्मणोपदिष्टं प्रायश्चित्तमाचेरुः ॥ १४ ॥ १५ ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु, योनिशब्दनिर्दिष्टः संसारः केन सृष्टः यत्र प्रविष्टो जीवः पण्यवत् पुनःपुनः पारवश्यं प्राप्नोतीत्यत्र परमात्मानमाह—एष इति त्रिभिः, सर्वाचेतनपदार्थाश्रयः आत्ममायागुणैः स्वप्रकृतिगुणैः आत्मानमेव आत्मशक्तिपरिणामात् विश्वं सृजति "तदात्मानं स्वयमकुरुत" इतिश्रुतेः ॥ ९ ॥

सर्वेषां ब्रह्मादिमत्कुणान्तानां जीवानां धियां गुणदोषयोश्च द्रष्टा ॥ १०—११ ॥

विस्मिताः सन्तः आत्मनः स्नेहशृंखलां छित्वा शोकं मुमुचुः ॥ १२ ॥

दुस्त्यजमपि स्नेहं तत्यजुः ॥ १३ ॥

द्विजभाषितं पुत्रादीनां दुःखहेतुत्वमङ्गिरसा प्रोक्तं स्मरन्त्यः व्रीडितास्सत्यः यमुनायां यमुनातीरे बालहत्यायाः व्रतं प्रायश्चित्तं चेरुः इति सार्द्धश्लोकान्वयः ॥ १४ ॥

सरःपङ्कात्सरसः कर्दमात् द्विपो गज इव ॥ १५ ॥

कृताः पुण्यजले पुण्यप्रदे कालिन्दीजले क्रिया आचमनतर्पणाद्या येन सः संयता वशीकृताः प्राणा इन्द्रियाणि येन सः ॥ १६ ॥

भाषाटीका ।

यह आत्मा नित्य अव्यय और सूक्ष्म है। और यह सर्व देव मनुष्यादि देह के आश्रय और स्वयं प्रकाश है । और आत्ममाया गुणों से विश्वात्मक अपने को स्वयं समर्थ होकर स्रजता है ॥ ९ ॥

न इसका कोई प्रिय न अप्रिय न कोई अपना न पराया यह एक ही गुण दोष की करने वाली सर्व बुद्धियों का द्रष्टा [देखने वाला] है ॥ १० ॥

यह आत्मा किसी के गुण दोष को नहीं ग्रहण करता और परावर (कार्य कारण) का देखने वाला और ईश्वर (समर्थ) है ॥ ११ ॥

श्रीशुक उवाच ॥

ऐसे कहकर जीव तो चला गया उस समय उसके सब ज्ञाति लोगों ने विस्मित होकर अपनी स्नेह रूप सांकर को तोडकर शोक छोडदिया ॥ १२ ॥

ज्ञाति लोगों ने भी उस देह को ले जाकर अन्त समय के उचित संस्कार करके, शोक मोह भय और आर्ति (दुःख) के देने वाला जो दुस्त्यज स्नेह रहा उसे छोड दिया ॥ १३ ॥

हे राजन् ! बालहत्या से नष्टकान्तिवाली बालहत्यारी अन्य रानियों ने भी वहां लज्जित होकर, जो ब्राह्मणों ने बतलाया उस बाल हत्या के व्रत को अङ्गिरा के वाक्य का स्मरण कर के यमुनाजी तीर में किया ॥ १४ ॥

इस प्रकार ब्राह्मणों की उक्ति से बोधको प्राप्त होकर वह चित्रकेतु तलाव के पंक से जैसे हस्ती, इस प्रकार गृह रूप अन्धकूप से निकलकर । कालिन्दी में विधिवत् स्नान कर जलाञ्जलिदेकर । मौन हो श्वास रोककर दोनों ब्रह्म पुत्रों (अङ्गिरा नारद) को प्रणाम करता हुआ ॥ १५ ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नमो धीमहि ध्यायेम मनसा नमस्याम इत्यर्थः ॥ १८ ॥
निवृत्ता द्वैतदृष्टिर्यस्मात् ॥ १९ ॥

आत्मानन्दानुभूत्यैव न्यस्तशक्त्यूर्मये नमः ।
हृषीकेशाय महते नमस्ते विश्वमूर्त्तये ॥ २० ॥
वचस्युपरते प्राप्य य एको मनसा सह ।
अनामरूपश्चिन्मात्रः सोऽव्यान्नः सदसत्परः ॥ २१ ॥
यस्मिन्निदं यतश्चेदं तिष्ठत्यप्येति जायते ।
मृण्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः ॥ २२ ॥
यन्न स्पृशन्ति न विदुर्मनोबुद्धीन्द्रियासवः ।
अन्तर्बहिश्च विततं व्योमवत्तं नतोऽस्म्यहम् ॥ २३ ॥
देहेन्द्रियप्राणमनोधियोऽमी यदंशविद्धाः प्रचरन्ति कर्मसु ।
नैवान्यदा लोहमिवाप्रतप्तं स्थानेषु तद्द्रष्टृपदेशमेति ॥ २४ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

न्यस्ता निरस्ताः शक्त्युर्मयो मायानिमित्ता रागद्वेशादयो येन ॥ २० ॥

मनसा सह वचस्यप्राप्योपरते सति य एक एव प्रकाशते वचसीति सर्वेन्द्रियोपलक्षणम् सोऽस्मानव्यात्सदसत्परः कार्यकारणयोः कारणम् ॥ २१ ॥

तदेवाह—यस्मिन्निति । यस्मिन्निदं कार्यकारणं तिष्ठति अप्येति च यतः यतश्च जायते मृण्मयेषु घटादिषु मृज्जातिर्मृण्मात्रमिव सर्वानुस्यूतं यत् तस्मै ॥ २२ ॥

ननु, सर्वानुस्यूतं चेन्मृज्जातिवत्प्रतीयेत तत्कथं मनोवचसोरप्राप्तिस्तत्राह । यद्ब्रह्म व्योमवद्विततमपि असवः प्राणाः क्रियाशक्त्या न स्पृशन्ति मन आदीनि च ज्ञानशक्त्या न विदुः तद्ब्रह्म नतोऽस्मि ॥ २३ ॥

तेषां तदज्ञाने हेतुमाह—देहेन्द्रियादयोऽमी यदंशविद्धा यस्यैतन्यांशेनाविष्टाः सन्तः कर्मसु स्वस्वविषयेषु प्रचरन्ति जाग्रत्स्वप्नयोः अन्यदा सुषुप्तिमूर्च्छादौ नैव प्रचरन्ति यथा अप्रतप्तं लोहं न दहति अतो यथा लोहमग्नेस्तस्यैव दाहकं सदग्निं विना न दहति एवं ब्रह्मगतज्ञानक्रियाशक्तिभ्यां प्रवर्तमाना देहादयस्तत्र स्पृशन्ति न विदुश्चेति भावः जीवस्तर्हि द्रष्टृत्वात् जानातु नेत्याह स्थानेषु जाग्रदादिषु द्रष्टृपदेशं द्रष्टृसंज्ञां तदेवैति प्राप्नोति 'नान्यो जीवो नामास्ति 'नान्योऽतोऽस्ति द्रष्टा' इत्यादि श्रुतेः यथा द्रष्टृपदेशं द्रष्टृसंज्ञं जीवमपि तदेव एति जानाति न तु जीवस्तज्जानातीत्यर्थः तदुक्तं हंसगुह्यस्तोत्रे 'देहोऽसवोऽक्षाः' इत्यादि ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततस्तस्मै प्रपन्नाय यथाविधि गुरूपसत्तिं कृत्वा स्थिताय भक्ताय गुरुभक्तियुक्ताय प्रयतात्मने श्रवणादियुक्तप्रयतमनस्काय भगवान्नारदः प्रीतः शिष्यलक्षणैर्हर्षितः एतां वक्ष्यमाणां विद्यां मन्त्रोपनिषदमुवाचोपदिदेश ॥ १७ ॥

नारदेनोपदिष्टां विद्यामेवाह—नम इत्यादिना, परमेष्ठिन्नमस्त इत्यन्तेन । तावत्सकलेतरविलक्षणं परमात्मानं विशोध्य प्रणमति वासुदेवादिचतुर्व्यूहात्मनावस्थिताय तस्मै तुभ्यं भगवते नमः एवंभूतं त्वां धीमहि ध्यायेमहि ॥ १८ ॥

विज्ञानमात्राय क्वचिदपि जाड्यरहिताय निरतिशयानन्दस्वरूपाय आत्मारामायात्मन्येव रममाणाय सुखान्तरनिरपेक्षायेत्यर्थः शान्ताय रागादिरहिताय निवृत्तद्वैतसृष्टये सृष्टिरुदयः निवृत्ता द्वैतसृष्टिः जात्यादिकल्पना यस्य तस्मै जात्यादिकल्पनारहितायेत्यर्थः निवृत्तद्वैतदृष्टय इति पाठे निवृत्ता द्वैतदृष्टिः स्थूलत्वाणुत्वादिभेददर्शनं यस्मिन् तथा च श्रूयते "अस्थूलमनण्वह्रस्वमदीर्घमगोत्रमचक्षुःश्रोत्रं तदपाणिपादम्" इत्यादि एवं भूताय भगवते षड्गुणपूर्णाय नम इत्यर्थः ॥ १९ ॥

स्वात्मानन्दानुभवेनैव न्यस्ताः निरस्ताः शक्त्या स्वबलेन ऊर्मयः अशनायापिपासाशोकमोहजरामरणरूपाः षडूर्मयो यस्य तस्मै हृषीकाणामिन्द्रियाणां तदधिपतेश्च ईशाय नियन्त्रे करणाधिपायेत्यर्थः महते स्वरूपेण गुणैश्च निरतिशयबृहते विविधविचित्रानन्तशक्तये तुभ्यं नमः ॥ २० ॥

एवं नमनं विधायाथ तस्मात्स्वरक्षां प्रार्थयते—वचसीति । मनसा सह वचसि उपरते निवृत्ते सत्यवधेरभावाद्वाङ्मनसयोर्निवृत्तयोस्सतोः यः प्राप्यः अपरिच्छिन्नतया अनुसन्धेयः अत एवैकः निःसमाभ्यधिकः प्राप्येत्यविभक्तिकपाठे अप्राप्येति छेदः

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

तदा मनसा सहाप्राप्यावधि वचस्युपरते सति यः अपरिच्छिन्नानन्दरूप इति शेषः वाङ्मनसापरिच्छेद्यापरिच्छिन्नानन्दरूप इत्यर्थः चिन्मात्रः ज्ञानैकाकारः अत एवैकः निःसमाभ्यधिकः कर्मकृतनामरूपरहितः सदसत्परः चेतनाचेतनाभ्यां विलक्षणः सः प्रसिद्धः भगवान्नोऽस्मान् रक्षतु. अत्र प्रतिपदमुपनिषदर्था अभिप्रेताः विज्ञानमात्रायं परमानन्दमूर्त्तय इत्यनेन "विज्ञानमानन्दं ब्रह्म" इति श्रुत्यर्थः आत्मारामायेत्यनेन "सर्वैश्वर्यसम्पन्नः शम्भुराकाशमध्यगः" इति निवृत्तद्वैतदृष्टये इत्यनेन अनामरूपश्चेत्यनेन च "अस्थूलमनणु" इति आत्मानन्देत्यादिना "योऽशनाया पिपासे शोकमोहौ जरामृत्यू अत्येति" इति हृषीकेशायेत्यनेन "स कारणं करणाधिपाधिपः" इति महतइत्यनेन "सत्यं ज्ञानमनन्तं ब्रह्म" इति अनन्तशक्तय इत्यनेन "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति वचस्युपरत इत्यादिना "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह आनन्दं ब्रह्मणः" इति एक इत्यनेन "न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते" इति सदसत्परइत्यनेन "भोक्ता भोग्यं प्रेरितारं च मत्वा, सुरात्मा नावशते देव एकः, योऽव्यक्तमन्तरे सञ्चरन्यस्याव्यक्तं शरीरं, योऽक्षरमन्तरे सञ्चरन्यस्याक्षरं शरीरम्" इतिश्रुत्यर्था अभिप्रेताः ॥ २१ ॥

एवं सकलेतरविलक्षणमौपनिषदं ब्रह्म विशोध्य प्रणम्य ततः स्वानिष्टनिवृत्तिं प्रार्थ्य अथतदेव ब्रह्म जगज्जन्मादिकारणत्वेनोपलक्ष्य प्रणमति यस्मिन्निति। सदसत्परं इत्यस्योदाहृतश्रुत्यर्थप्रत्यभिज्ञापकतया उक्तविधस्वरूपस्य परस्य ब्रह्मणश्चिदचिच्छरीरकत्वप्रत्यभिज्ञापितोपनिषद्भिरेव प्रतिपन्नमित्यभिप्रेत्य चिदचिद्विशिष्टस्य जगत्कारणत्वलक्षणमत्रोच्यते, इदं स्थूलचिदचिदात्मकं जगत् यतः सूक्ष्मचिदचिद्विशिष्टाद्ब्रह्मणो जायते यस्मिन्नप्येति लीयते यस्मिन्नुक्तविधे ब्रह्मस्वरूपे तिष्ठति आधेयतया वर्त्तते " ब्रह्म वनं ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः" इति श्रुत्युक्तरीत्या आधारोपि ब्रह्मैवेति भावः तत्र दृष्टान्तः मृण्मयेष्विव मृज्जातिरिति मृज्जातिशब्दो मृज्जातीयपरः यथा मृण्मयेषु मृज्जातीयघटशरावादिकारणभूतेषु मृद्विकाररूपमृत्पिण्डेषु मृज्जातीयो घटादिर्जायते अपादानस्याधिकरणत्वविवक्षया सप्तमी मृण्मयेभ्यो यथा मृज्जातिर्जायत इत्यर्थः यद्वा मृण्मयेष्विति निमित्तसप्तमी निमित्तमत्रोपादानकारणं तथा च मृण्मयेभ्यो मृत्पिण्डेभ्य उपादानभूतेभ्यो मृज्जातीयो घटादिर्जायत इत्यर्थः, अथवा मृण्मयेष्विति पदमेव मृद्विकारघटादिपरं मृज्जातिर्मृत्पिण्डः मृण्मयेषु घटादिषु कारणतयाऽनुस्यूतः अथवा यस्मिन्नधितिष्ठतीत्यत्रैव दृष्टान्तः मृण्मयेषु घटादिषु मृज्जातिर्मृत्पमधितिष्ठति अपृथक्सिद्धप्रकारतया वर्त्तते तद्वदिदं विश्वं चिदचिदात्मकमपृथक्सिद्धप्रकारतया यस्मिन्वर्त्तते तस्मै ब्रह्मणे नमः अत्रापि " यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्ति"इत्यादि श्रुत्यर्थोऽनुसन्धेयः ॥ २२ ॥

एवं प्रतिपदमौपनिषदर्थं प्रत्यभिज्ञापनेन उपनिषदेकगम्यं परं ब्रह्मेति सूचितं तदेव दृढीकर्तुं तदितरप्रमाणाविषयत्वं वदन्प्रणमति-यमिति । "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति श्रुत्युक्तरीत्या कृत्स्नं जगदन्तर्बहिश्च विततं व्याप्य स्थितमपि व्योम व्योमशरीरकम् "आकाशशरीरं ब्रह्म" इति श्रुतेः यं मनोबुद्धीन्द्रियासवो न स्पृशन्ति न विदुः तत्र कर्मेन्द्रियाण्यसवः प्राणाश्च क्रियाशक्तिप्रधाना न स्पृशन्ति न विषयीकुर्वन्ति मनश्च बुद्धिश्च चक्षुरादीनि ज्ञानेन्द्रियाणि च यं न विदुरित्यन्वयः बुद्धीन्द्रियाद्यविषयत्वेन तन्मूलकप्रत्यक्षादिप्रमाणाविषयमिति भावः अतीन्द्रियत्वे हेतुः व्योमेति व्योमशरीरकत्वेन तदन्तप्रवेशयोग्यतया ततोपि सूक्ष्मत्वादिन्द्रियाविषयमिति भावः तद्ब्रह्म त्वामहं नतोऽस्मि ॥ २३ ॥

किञ्च मन आदयः तदाहितज्ञानक्रियादिशक्तिमत्वेन तं न विषयीकुर्वन्तीति सदृष्टान्तमाह—देहेति । अमी देहेन्द्रियादयः यदंशाविद्धाः यस्य "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इत्युक्तज्ञानक्रियादिशक्तिमतो ब्रह्मणोऽशेन ज्ञानक्रियादिशक्तिलेशेन अनुविद्धाः व्याप्ताः कर्मसु स्वस्वव्यापारेषु प्रचरन्ति प्रवर्तन्ते अन्यथा यदंशेनानुविद्धास्तु न प्रचरन्ति तेषामचेतनपरिणामरूपत्वेन वस्तुतो ज्ञानशक्तिविरहादिति, भावः तत्र दृष्टान्तः लोहमिति यथा प्रतप्तं लोहं दहति दाहकशक्तिनाग्निनानुविद्धमेव लोहमितरद्दहदप्यग्नि न दहति अग्निनानुविद्धन्तु इतरदपि न दहति तद्वत्परमात्मनि आहितज्ञानक्रियाशक्तयो देहेन्द्रियादयः स्वस्वविषयेषु प्रचरन्ति न परमात्मनि अनाहितशक्तयस्तु स्वस्वकर्मस्वपि न प्रचरन्तीत्यर्थः तन्विन्द्रियाणि स्वतो ज्ञानशक्तिविरहात्त्वं मा विषयीकुर्वन्तु जीवस्तु स्वभावतो ज्ञानशक्तिमत्त्वात्त्वं विद्यादित्यत्राह स्थानेष्विति, तत्तेन जीवोपि स्थानेषु द्रष्टृपदेशमेति द्रष्टृत्वव्यपदेशमेति गच्छति ईश्वरसङ्कल्पादेव जीवस्य ज्ञानविकास इत्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अथ तयोर्ब्रह्मपुत्रयोर्मध्ये नारदः इत्यनेनाधिकारगुणसम्पन्नस्य विद्योक्तफलं साकल्येन फलतीति ध्वनयति ॥ १७ ॥

चित्तसन्निहितं सम्बोध्य तुभ्यं नम इति वक्ति भगवन् इत्यादिविशेषणानि गुणसामग्रीद्योतकानि यथा सम्भवमूह्यानि ॥ १८ ॥

नित्यं निवृत्ता द्वैतदृष्टिः स्वावतारावौ भेददर्शनं येन स तथा तस्मै निवृत्तद्वैतवृत्तये इति पाठे निवृत्तेन द्वैतेनान्यथाज्ञानेन वृत्तिर्वर्तनं यस्य स तथा, तस्मै नित्यनिवृत्तदेहाद्यहंममाभिमानायेत्यर्थः ॥ १९ ॥

सम्यक् स्यकाः षड्भिर्यो मत्येति तस्मै । यद्वा अशनायादिषड्भिरहिताय "योऽशनाया पिपासे शोकं मोहं जरां मृत्युमत्येति" इति श्रुतेः ॥ २० ॥

मन्त्रमुपदिशन्ध्यानप्रकारमाह । वचसीति वाङ्मनसा सह वचस्युपरते नष्टे चिन्मात्रमनसा सह प्राप्यः सदसत्परः स्थूलसूक्ष्मप्रपञ्चविलक्षणः ॥ २१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अलौकिकवस्तुनो लक्षणमन्तरेण तज्ज्ञानं दुःसाध्यमिति तल्लक्षणमाह—यस्मिन्निति । इदं जगद्यस्मिंस्तिष्ठत्यप्येति च यतश्च जायते अत्र दृष्टान्तमाह—मृण्मयेष्विति "जातिः सामान्यजन्मनोः" इत्यभिधानात् । मृदोजातिर्जन्म वृक्षादेः स तथा यथा वृक्षादिराशिर्मृण्मयेषु मृद्विकारेषु पृथिवीपर्वतादिषु तिष्ठत्यप्येति तेभ्यो जायते च तथा मृज्जातिर्मृत्त्वं मृण्मयेषु घटादिष्विवानुगतमित्यर्थो ब्रह्मणो बहुत्वाभावात् "एकमेवाद्वितीयम्"इति श्रुतेः

"पृथिवी पर्वताश्चैव मृण्मयाः समुदीरिताः ।
तेषु मृज्जातयः सर्वे जायन्ते स्थावरादयः" ॥

इत्यनेन विरुद्धत्वाच्चानुपपन्नः ॥ २२ ॥

मनोबुद्धीन्द्रियासवः मनआदिशब्दवाच्याः रुद्रादयो देवाः॥२३॥

भगवदनुग्रहभावाभावौ तद्विषयकज्ञानाज्ञानकारणमित्युक्तं तत्स्पष्टमाह - देहेति । यस्य हरेरंशैर्विद्धाः प्रेरिता देहेन्द्रियाद्यभिमानिनो देवा ज्ञानादिकर्मसु प्रचरन्ति प्रवर्तन्ते अन्यदा यदंशप्रेरणाभावे नैव प्रवर्तन्त इत्यन्वयः कथमिव प्रतप्तमन्तर्निहितवह्निसामर्थ्याल्लोहं दाहकार्यं प्रवर्तते अप्रतप्तं न हि अहं तद्ब्रह्म शरणमेमि. कीदृशं ? देहेन्द्रियादिस्थानेषु स्थितं द्रष्टृपदेश्यं साक्षिणाम् ॥ २४—२८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र श्रीभगवत्त्वेन नमस्यति—भगवत इति । तद्व्यूहत्वेन वासुदेवायेति सङ्कर्षणस्यान्ते पाठः स्वोपास्यत्वेन तत्रैव विश्रान्तेः ॥ १८ ॥

ब्रह्मत्वेन नमस्यति—विज्ञानमात्रायेति । अत्र मूर्तिः स्वरूपं निवृत्तद्वैतदृष्टय इति यस्मिन् दृष्टे अन्यत्र दृष्टिर्नभवतीत्यर्थः। तच्चाद्वैतवादतो विशिष्य दर्शयति, आत्मानन्देति । स्वरूपानन्दस्यानुभवेन न्यस्ताः नानुसंहिताः शक्त्यन्तरपरम्परा येन तस्मै अनुभवस्य स्वरूपाभिन्नत्वेपि तृतीयार्थाधिक्यात् स्वरूपशक्तिरेव सिध्यति. परमात्मत्वेन नमस्यति-हृषीकेशायेति, विश्वकारणत्वेन, महत इति, विश्वत्वेनानन्तमूर्त्तय इति ॥ १९ । २० ॥

पुनर्भगवत्त्वं ब्रह्मस्वरूपत्वेन विशेषतःस्तौति—वचसीति द्वाभ्याम् ॥ २१ ॥ २२ ॥

परमात्मत्वेन स्तौति--पक्षेति द्वाभ्याम् ॥ २३ ॥

देहेन्द्रिय इति । अत्राद्वैतशारीरकेऽपि सांख्यमाक्षिप्योक्तं यथा, अथ पुनः साक्षिनिमित्तमीक्षितृत्वं प्रधानस्य कल्पेत यथाग्निनिमित्तमयःपिण्डादेर्दग्धृत्वं, तथा सति यन्निमित्तमीक्षितृत्वं प्रधानस्य तदेव सर्वज्ञं मुख्यं जगतः कारणमिति । श्रुतिश्चात्र "तदेव भान्तमनुभाति सर्वं । कोह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् । चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रम्" इत्याद्या इति । टीकोत्थापितश्रुतौच, जीवोनामतो नान्यः स्वयं सिद्धो नास्ति परन्तु तदात्मक एवेत्यर्थः । तथातोऽन्यो द्रष्टा नास्ति सर्वद्रष्टुस्तस्यापरो द्रष्टा नास्तीत्यर्थः इति व्याख्येयम् ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एतां तु नमस्तुभ्यमित्यादि परमपरमेष्ठिनमस्त इत्यन्तां । तुभ्यं धीमहि त्वां प्रसादयितुं ध्यायेम ॥ १७ ॥ १८ ॥

परमात्मत्वेन जीववैलक्षण्यमाह—नवभिर्विशेषणैः । विज्ञानं चिच्छक्तिरेव मात्रापरिच्छेदो यस्य तस्मै जीवस्त्वविद्यापरिच्छेद इत्यर्थः । "मात्रा कर्णविभूषायां वित्ते माने परिच्छदे"इति मेदिनी परमानन्दमयी मूर्तिर्यस्य जीवस्तु पाञ्चभौतिकमूर्तिः । आत्मानन्द एव रममाणाय. जीवस्तु विषयानन्दे रमते । निवृत्तद्वैते मायिकप्रपञ्चे दृष्टिरासक्तिमयी यस्य जीवस्तु मायिकप्रपञ्चे आसज्जते ॥ १९ ॥

न्यस्ताः नितरामस्ताः शक्त्यूर्मयो मायानिमित्ता रागद्वेषादयो यत्र जीवस्तु प्राप्तरागद्वेषादितरङ्गः । हृषीकेशाय सर्वेन्द्रियनियन्त्रे जीवस्तु इन्द्रियनियम्यः महते जीवस्तु क्षुद्रः अनन्ता अविनाश्या मूर्त्तयो यस्य जीवस्तु विनाश्यशरीरः ॥ २० ॥

निर्विशेषब्रह्मत्वेन प्रणमति—वचसीति ॥ २१ ॥

जगत्कारणत्वेन यस्मिन्निदं जगत्तिष्ठति यतो जायते यस्मिन्नप्येति लीयते । मृण्मयेषु घटादिषु मृज्जातिः यथा कारणमित्यर्थः ॥ २२ ॥

इन्द्रियाद्यगम्यत्वेन प्रणमति-यदिति । क्रियाशक्त्या न स्पृशन्ति ज्ञानशक्त्या न विदुः । तस्य निदूरवर्तित्वमदिति चेत्तत्राह, अन्तर्देहादीनामन्तरपि बहिरपि च ॥ २३ ॥

तेषां तदज्ञाने हेतुमाह—देहेन्द्रियेति । यदंशाविद्धाः यच्चैतन्यांशेनाविष्टाः सन्तः कर्मसु स्वस्वविषयेषु चरन्ति जाग्रत् स्वप्नयोः अन्यदा सुषुप्तिः मूर्च्छादौ नैव प्रचरन्ति - यथा अग्नितप्तं लौहं न दहति अतो यथा लोहमग्निशक्त्यैव दाहकं सदग्निं न दहति । एवमेव ब्रह्मशक्त्यैव स्वस्वविषयेषु प्रवर्त्तमाना देहादयो ब्रह्म न स्पृशन्ति नापि जानन्तीति भावः जीवस्तर्हि द्रष्टृत्वाज्जानातु तत्राह - स्थानेषु, जाग्रदादिषु द्रष्टृपदेश्यं द्रष्टृसंज्ञं जीवस्य द्रष्टृत्वासिद्ध्यर्थं स्वीयः किञ्चिच्चैतन्यप्रापणेन स्वयमेव तं प्राप्नोतीत्यर्थः । मन आद्य इव जीवा अपि जरा इति च केचिदाचक्षते । ब्रह्म तत्रैव तं एति जानाति न तु जीवो ब्रह्म जानातीत्यर्थः यदुक्तं हंसगुह्यस्तवे "देहोऽसवोक्षाः" इत्यादि ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रयतः एकाग्रतां नीत आत्मा मनो येन तस्मै ॥ १७ ॥

ओं नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सकलसात्वतपरिवृढनिकरकरकमलकुड्मलोपलालितचरणारविन्दयुगल परम परमेष्ठिन्नमस्ते ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवते तुभ्यं नमो धीमहि मनसा नमस्कुर्मः वासुदेवादिमूर्तिभेदाय च ते तुभ्यं नमः ॥ १८ ॥

"विज्ञानं यज्ञं तनुते" इत्यादिश्रुतिप्रसिद्धो विज्ञानपदवाच्यो जीवो मात्रांशो यस्य तस्मै यद्वा विज्ञानमात्राय विशिष्टं ज्ञानमेव विज्ञानमात्रं ब्रह्म तस्मै मयूरव्यंसकादित्वात्समासः विज्ञानैकस्वरूपाय परमानन्दमूर्तये परमानन्दविग्रहाय निवृत्ता द्वैतदृष्टिः अतदात्मकपदार्थदृष्टिर्यस्मात्तस्मै सर्वात्मने नमः ॥ १९ ॥

आत्मानन्दस्य परमात्मानन्दस्यानुभूत्या न्यस्ताः नितरामस्ताः शक्त्यूर्मयः शक्तिभूतस्योपासकस्य जन्ममृत्युशोकमोहक्षुत्तृष्णा ऊर्मयो यस्मात्तस्मै ॥ २० ॥

इयत्तानवच्छिन्नत्वं प्राकृतनामरूपशून्यत्वञ्च भगवतो वदन् भगवान् अस्मान् अव्यादिति प्रार्थयते—वचसीति । मनसा सह वचासि अप्राप्य यस्य स्वरूपगुणादीयत्तामलब्ध्वा उपरते यः एक एव निःसमातिशयः ध्यातृहृदि प्रकाशते इति शेषः स नः अव्यात् कथंभूतः अनामरूपः । 'नामरूपे व्याकरवाणि' इति स्वविरचिते प्राकृते नामरूपे न विद्येते यस्य सः चिच्चेतनो जीवः मात्रा अंशो यस्य सच्चिन्मात्रश्चेतनस्वरूपमात्रो वा न तु तार्किकाद्यभिमतजडस्वरूप इत्यर्थः सदसत्परः स्थूलसूक्ष्माभ्यां देहदेहिस्वरूपाभ्यां परः "विलक्षणः "यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः। अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" इति श्रीमुखगानात् ॥ २१ ॥

विश्वाधारत्वादिभगवद्गुणवर्णनपूर्वकं प्रणमति—यस्मिन्निति। यस्मिन्सर्वाधारे इदं विश्वं तिष्ठति यतोऽनन्तशक्तिमतः सर्वोपादानरूपात् इदं जायते । यस्मिन्नप्येति लीयते एवं सर्वत्र मृण्मयेषु घटादिषु आधारतयाऽपादानतया प्रवेशस्थानतया मृज्जातिर्भूमिरिव यदस्ति तस्मै ते ब्रह्मणे नमः ॥ २२ ॥

सर्वाधारत्वादिमत्त्वेपि सर्वदोषास्पृष्टं ब्रह्मेति वदन् प्रणमति—यन्न स्पृशन्तीति ॥ २३ ॥

ननु, सत्यां प्राप्तौ निषेधो भवत्यतोऽचेतनान् मनआदीन् प्रति न विदुरिति निषेधः कथं संगच्छते इत्यत्र जीवज्ञानसंसर्गान्मनआद्यचेतनगणः द्रष्टृपदेशमेतीत्याह—देहेन्द्रियेति । : अमी देहादयः यस्य ब्रह्मणः अंशेन एव परस्यांशः "ममैवांशो जीवलोके जीवभूतः सनातनः" इतिश्रुतिस्मृतिप्रसिद्धेन जीवेन विद्धाः आविष्टास्सन्तः कर्मसु स्वविषयेषु प्रचरन्ति चेष्टां कुर्वन्ति अन्यदा जीवसंसर्गाभावे तु न प्रचरन्ति तं नतोस्मीति पूर्वेणान्वयः तत्र दृष्टान्तः यथा लोहमग्नतप्तमग्निसंसर्गरहितं न दहति तद्वत् एवं हि तदचेतनं मनआदिकं वस्तुस्थानेषु विषयेषु, द्रष्टृपदेशमेति प्राप्नोति एवं प्राप्तौ सत्यां न विदुरिति निषेधः सङ्गच्छते मनआदयस्स्वं स्वं विषयं जानन्ति भगवंतं तु तत्कृपां विना न जानन्तीति भावः ॥ २४ ॥

भाषाटीका।

अनन्तर जितांवः करण शरणागत उस भक्तचित्रकेतु को भगवान् नारद ने प्रसन्न होकर इस आगे कही हुई विद्या का उपदेश किया ॥ १७ ॥

भगवान्, वासुदेव संकर्षण प्रद्युम्न और अनिरुद्ध रूप जो आप, तिनको में नमस्कार करताहूँ और मन से ध्यान करता हूँ ॥ १८ ॥

निवृत्त द्वैत दृष्टि वाले शांत आत्माराम परमानन्द मूर्ति विज्ञान मात्र आपको नमस्कारहो ॥ १९ ॥

अपने ज्ञान और आनन्द से निरस्त किये हैं मायाकृत रागद्वेषादिक जिसने ऐसे हृषीकेश महान् विश्वमूर्ति भगवान् को नमस्कार हो ॥ २० ॥

मनके सहित न प्राप्त होकर वाणी के उपराम होने से जो एक प्रकाशित होता है, प्राकृत नाम रूपसे रहित चेतनसरूप कार्य कारण से परे वह ईश्वर हमारीरक्षा करे ॥ २१ ॥

मृत्तिकाके घटादि कार्य जैसे मृत्तिका से उत्पन्न, और मृत्तिका में स्थित, और लीन, होते हैं ऐसे ही यह जगत् जिससे उत्पन्न, और जिसमें स्थित, और जिस में लीन होता है, तिस ब्रह्म को नमस्कार है ॥ २२ ॥

आकाश की तरह अन्तर बाहर व्याप्त, जिस ब्रह्म को मन बुद्धि इन्द्रिय प्राण न स्पर्श कर सके और न जान सके हैं तिस ब्रह्म को मैं नमस्कार करता हूं ॥ २३ ॥

देह इन्द्रिय प्राण मन बुद्धि ये सब जिसके चैतन्यांश से व्याप्त होकर अपने२ विषयों को जाग्रत् स्वप्नावस्था में ग्रहण करते हैं और सुषुप्ति मूर्छा समय में नहीं, जैसे लोहा जब अग्निमे तप्त होता है तब ही दहन करता है अतप्त नहीं, ऐसे ही परमात्मा जीव को जानता है जीव परमात्मा को नहीं जान सका है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सकला ये सात्वतपरिवृढाः तेषां निकरः समूहस्तस्य करकमलानां कुड्मलैर्मुकुलैरुपलालितं चरणारविन्दयुगलं यस्य तस्यसम्बोधनम् परम उत्कृष्ट परमेष्ठिन् सर्वेश्वर, ॥ २५ ॥

श्रीशुक उवाच ।

भक्तायैतां प्रपन्नाय विद्यामादिश्य नारदः ।
ययावङ्गिरसा साकं धाम स्वायम्भुवं प्रभो ! ॥ २६ ॥
चित्रकेतुस्तु विद्यां तां यथा नारदभाषिताम् ।
धारयामास सप्ताहमब्भक्षः सुसमाहितः ॥ २७ ॥
ततश्च सप्तरात्रान्ते विद्यया धार्यमाणया ।
विद्याधराधिपत्यं स लेभेऽप्रतिहतं नृप ! ॥ २८ ॥
ततः कतिपयाहोभिर्विद्ययेद्धमनोगतिः ।
जगाम देवदेवस्य शेषस्य चरणान्तिकम् ॥ २९ ॥
मृणालगौरं शितिवाससं स्फुरत्किरीटकेयूरकटित्रकङ्कणम् ।
प्रसन्नवक्त्रारुणलोचनं वृतं ददर्श सिद्धेश्वरमण्डलैः प्रभुम् ॥ ३० ॥
तद्दर्शनध्वस्तसमस्तकिल्बिषः स्वच्छामलान्तःकरणोऽभ्ययान्मुनिः ।
प्रवृद्धभक्त्या प्रणयाश्रुलोचनः प्रहृष्टरोमाऽऽनमदादिपूरुषम् ॥ ३१ ॥
स उत्तमश्लोकपदाब्जविष्टरं प्रेमाश्रुलेशैरुपमेहयन्मुहुः ।
प्रेमोपरुद्धाखिलवर्णनिर्गमो नैवाशकत्तं प्रसमीडितुं चिरम् ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पूर्वं स नारदोऽङ्गिरा आजगामेत्यङ्गिराः प्राधान्येनोक्तः चित्रकेतोः पुत्रप्रदत्वेन तस्य पूर्वमुक्तत्वात् इह तु नारदोऽङ्गिरसा साकं ययाविति नारदस्य प्राधान्यनिर्देशः तदुपदेशेन तस्य वैराग्योत्पत्तेः प्रभो हे समर्थ, ॥ २६ ॥

यथा यथावज्जारयामास ॥ २७ ॥

विद्याधराधिपत्यं चावान्तरफलं लेभे अप्रतिहतमस्खलितम् ॥ २८ ॥

कतिपयैरहोभिः विद्यया इद्धेन दीप्तेन मनसा गतिर्यस्य ॥२९॥

मृणालवत् गौरं शितिवाससं नीलाम्बरं स्फुरन्ति किरीटादीनि यस्य कटित्रं कटिसूत्रं प्रसन्नानि वक्त्राणि यस्य अरुणानि लोचनानि यस्य तस्य तम् ॥ ३० ॥

दृष्ट्वा च तमादिपुरुषमभ्ययाच्छरणागतः अनमन्ननाम कथम्भूतः तस्य दर्शनेन ध्वस्तं समस्तं किल्बिषं यस्य स्वच्छममलञ्चान्तःकरणं यस्य प्रणयेनाश्रुयुक्ते लोचने यस्य प्रहृष्टानि रोमाणि यस्य सः ॥ ३१ ॥

तं प्रसमीडितुं स्तोतुं चिरं नैवाशकत् न शशाक तत्र हेतुः उत्तमश्लोकस्य पादाब्जयोर्विष्टरमासनम् उपमेहयन् अभिषिञ्चन् प्रेम्णा उपरुद्धः अखिलानां वर्णानां निर्गम उच्चारणं यस्य सः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भगवते पूर्णषाड्गुण्याय पुरुषाय पुरुषसूक्तप्रतिपाद्यमहापुरुषाय अत एव महानुभावाय महाविभूत्योर्नित्यलीलाविभूत्योरधिपतये तुभ्यं नमः सकलाः ये सात्वतपरिवृढा भागवतश्रेष्ठास्तेषां समूहस्तेषां करकमलानां कुड्मलैर्मुकुलैरुपलालितं चरणारविन्दयुगलं यस्य तस्य सम्बोधनं परम निःसमाभ्यधिक, परमेष्ठिन् परमे स्थाने स्थित, ते तुभ्यं नमः ॥ २५ ॥

हे प्रभो राजन्, भक्ताय प्रपन्नाय चित्रकेतवे एवमेतां विद्यामुपदिश्याङ्गिरसा सह नारदः स्वायम्भुवं धाम सत्यलोकं ययौ पूर्वं नारदेन सहाङ्गिरा आजगामेति प्राधान्येनोक्तोऽङ्गिराः चित्रकेतोः पुत्रदत्वेन तस्य प्रथमं वैराग्यजननद्वारोपकारककत्वादिह नारदोऽङ्गिरसा साकं ययौ इति नारदः प्राधान्येन निर्दिष्टः विद्योपदेशेन तस्य महोपकारकत्वात् ॥ २६ ॥

एवमुपदिष्टश्चित्रकेतुस्तां नारदेन भाषितां उपदिष्टां विद्यां यथाविधि सुसमाहितचित्तोऽप एव भक्षयन् सप्त दिवसान् धारयामास जजाप ॥ २७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः सप्तरात्रान्ते धार्यमाणया विद्यया तत्प्रभावेनेत्यर्थः नृपश्चित्रकेतुः अविभक्तिकपाठे हे नृप ! विद्याधराणामाधिपत्यञ्च लेभे चशब्दोऽन्वाचयपरः आनुषङ्गिकं विद्याधराधिपत्यं फलं लब्धवानित्यर्थः ॥ २८ ॥

प्रधानं फलमाह—तत इति ततः कतिपयैरहोभिर्विद्यया इद्धेन दीप्तेन मनसा गतिर्यस्य विद्याप्रभावेन यथेष्टगतिरित्यर्थः देवदेवस्य शेषस्य सङ्कर्षणस्य चरणसमीपं जगाम पाताललोकादधः स्थितसङ्कर्षणसमीपं गतवानित्यर्थः ॥ २९ ॥

सङ्कर्षणं वर्णयन् तं ददर्शेत्याह–मृणालेति ।मृणालवत्पद्मतन्तुवद्गौरं शुक्लं शितिवाससं नीलाम्बरं स्फुरन्ति किरीटादीनि यस्य कटित्रं कटिसूत्रं प्रसन्नानि वक्त्राणि यस्य अरुणानि लोचनानि यस्य तं सिद्धेश्वराणां समूहैर्वृतं परिवेष्टितं विभुं सङ्कर्षणं ददर्श ॥३०॥

ततस्तस्य सङ्कर्षणस्य दर्शनेन ध्वस्तं किल्बिषं यस्य अत एव स्वच्छमन्तःकरणं यस्यात एव प्रवृद्धया भक्त्या प्रणयाश्रु आनन्दबाष्पं लोचनयोर्यस्य प्रहृष्टान्युदञ्चितानि रोमाणि च यस्य तादृशः आदिपुरुषं पुराणपुरुषं सङ्कर्षणमभ्ययादभिमुखं जगाम आनमत्प्रणतवान् ॥ ३१ ॥

ततः स चित्रकेतुरुत्तमश्लोकस्य सङ्कर्षणस्य पदाब्जविष्टरं पादपीठं प्रेमाश्रुलेशैरानन्दबाष्पकणैः मुहुर्मुहुरुपसेचयन्प्रेमोदन प्रेम्णा उपरुद्धः अखिलानां वर्णानामक्षराणां निर्गमम् उच्चारणं यस्या त एव भगवन्तं तं प्रसमीडितुं चिरं नैवाशकन्नाशक्नोत् ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, विष्णूपासनया शेषसमीपगमनं कथं सङ्गच्छते ? इति चेदुच्यते तत्तद्देवान्तर्यामिविष्णुविषयोपासनया तत्तद्देवसमीपप्राप्त्युपपत्तेः—

"अन्यान्तर्यामिणं विष्णुमुपास्यान्यसमीपगः ।
भवेद्योग्यतया तस्य पदं वा चाप्नुयान्नरः" ॥

इत्युक्तेः अनेन तत्तत्पदप्राप्तियोग्यश्चेत्सुतरां तत्तद्देवसमीपं गत इत्युक्तं भवति तस्मादत्र चित्रकेतोरनेन प्रत्यक्षविधानेन मुहुर्मुहुः शेषस्य सकाशमभ्ययादिति श्रुयते चित्रकेतुना शेषान्तर्यामिविष्णुरुपासित इति कुत इति चेत्—

"शेषान्तर्यामिणं विष्णुं चित्रकेतुरुपास्य तु ।
शेषाविष्टहरेश्चापि वरान् प्राप्यापतद्गतिम्" ॥

इति वचनबलात् ॥ २९ ॥

शितिवाससं नीलवस्त्रं कटित्रं काञ्चीगुणं "कटिसूत्रं सारसनं कटित्रं कटिभूषणम्" इत्यभिधानम् ॥ ३० ॥

मनस्य वायोरादिः कारणं पुरुषं पौरुषं यस्मिन्स तथा तम् ॥३१॥

उत्तमश्लोकस्य शेषान्तर्यामिणो हरेः पादपद्मयोर्विष्टरं पीठं उपरुद्धोऽखिलानां वर्णानां शब्दोपलक्षणानां निर्गमो द्वारं यस्य सः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः ।

साक्षाद्भगवत्वेन स्तौति ३० नम इति । तदेवं सङ्कर्षणोपासनापि द्वारमेव ।तस्य सात्वत शास्त्रविग्रहत्वेन वक्ष्यमाणत्वात् ० परमं फलन्तु श्रीभगवानित्यभिप्रेतम् ॥ २५—३४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

महामन्त्रस्य ज्ञानप्रकाशकत्वमुक्त्वा भक्तिरसपरिपूर्णत्वमाह-ओमिति । सकलसात्वतपरिवृढाः सर्वभक्तश्रेष्ठास्तेषां निकरस्य करकमलानां कुड्मलेन उपलालितं लघुसंवाहनवैदग्ध्या प्रीणितं चरणारविन्दयुगलं यस्य हे तथा भूतेति मामपि स्वपादसंवाहनसेवायां स्थापयेत्यभिलाषो ध्वनितः ननु, त्वामतिनिकृष्टं तस्यामत्युत्कृष्टसेवायां कथं नियुञ्जे इत्यत आह हे परमपरमेष्ठिन् परमपरमेश्वरः कर्तुमकर्तुमन्यथा कर्तुञ्च समर्थः ॥ २५ ॥

एतामित्यनेकवाक्यगर्भामेकामेव विद्यां महतीं अत्र चित्रकेतवे पुत्रप्रदत्वेनाङ्गिरसः प्राधान्यं मन्त्रप्रदत्वेन न तु नारदस्य अत एव पूर्वमङ्गिराः सनारद आजगामेत्युक्तं सम्प्रति ययावङ्गिरसा नारद इत्युच्यते हे प्रभो ! एतदाद्यभिप्रायज्ञाने परम समर्थः ॥ २६ ॥ २७ ॥

प्रथममवान्तरफलमाह—विद्याधराधिपत्यमिति ॥ २८ ॥

मुख्यं फलमाह--जगामेति ॥ २९ ॥

सितिवाससं नीलाम्बरं कटित्रं कटिसूत्रम् ॥ ३० ॥

तद्दर्शनेति । किल्बिषमत्र भगवत्प्राप्त्यसम्भावनामयं दुःखं ज्ञेयं दृष्ट्वा च अभ्ययात् अभिमुखोगच्छत् । अभ्येत्यचाऽऽनमत्॥३१॥

नत्वा च तुष्टावेत्याह—स इति । विष्टरमासनम् उपमेहयन् अभिषिञ्चन् ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सकलसात्वतानां ये परिवृढाः श्रेष्ठास्तेषां निकरस्य समूहस्य कमलानां कुड्मलैर्मुकुलैरुपलालितं प्रीणितं चरणारविन्दयुगलं यस्य हे तथाभूतपरा मा यस्य हे परम, हे परमेष्ठिन् परमधामवासिन् महाविभूत्योः नित्यविभूतिलीलाविभूत्योः पतये ते नमो नमः ॥ २५ ॥

प्रभो हे उपदिष्टार्थधारणसमर्थ, ॥ २६ ॥

यथा यथावद्धारयामास ॥ २७ ॥

विद्याधराधिपत्यमवान्तरफलम् ॥ २८ ॥

ततः समाधाय मनो मनीषया बभाष एतत्प्रतिलब्धवागसौ ।
नियम्य सर्वेन्द्रियबाह्यवर्तनं जगद्गुरुं सात्वतशास्त्रविग्रहम् ॥ ३३ ॥

चित्रकेतुरुवाच ।

अजित ! जितः सममतिभिः साधुभिर्भवान् जितात्मभिर्भवता ।
विजितास्तेऽपि च भजतामकामात्मनां य आत्मदोऽतिकरुणः ॥ ३४ ॥
तव विभवः खलु भगवन् ! जगदुदयस्थितिलयादीनि ।
विश्वसृजस्तेंऽशांशास्तत्र मृषा स्पर्द्धन्ते पृथगभिमत्या ॥ ३५ ॥
परमाणुपरममहतोस्त्वमाद्यन्तान्तरवर्ती त्रयविधुरः ।
आदावन्तेऽपि च सत्वानां यद्ध्रुवं तदेवान्तरालेऽपि ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मुख्यं फलञ्च लब्धवानित्याह—ततः कतिपयाहोभिरिति । विद्यया इद्धा दीप्ता मनोभिलषिता गतिर्यस्य सः शेषस्य चरणान्तिकं जगाम ॥ २९ ॥

मृणालवत्पद्मतन्तुवद्गौरं शितिवाससं नीलवसनं स्फुरन्ति किरीटादीनि यस्य कटित्रं कटिसूत्रं सिद्धेश्वराणां मण्डलैर्वृतं ददर्श ॥ ३० ॥

तस्य दर्शनेन ध्वस्तं समस्तं किल्विषं यस्य स्वच्छमुज्वलममलं निर्मलं चान्तःकरणं यस्य मुनिर्मननशीलः प्रवृद्धया भक्त्या प्रणयाश्रूणि लोचनयोर्यस्य प्रहृष्टरोमा आदिपुरुषमनमत् ननाम अभ्यगच्छत् शरणङ्गतः ॥ ३१ ॥

स चित्रकेतुः उत्तमश्लोकस्य पवित्रकीर्तेः पदाब्जयोर्विष्टरमासनं प्रेमाश्रूणां लेशैर्बिन्दुभिरुपमेहयन् सिञ्चन् प्रेम्णोपरुद्धः अखिलवर्णनिर्गममार्गः कण्ठो यस्य सः चिरं समीडितुं नैवाशकत् ॥ ३२ ॥

भाषा टीका ।

सकल पञ्चरात्रनिष्ठभक्तजनों के करकमलके कलियों से उपलालन कियेगये चरणारविन्द दोनों जिनके ऐसे, हे परमेश्वर ! हे परमेष्ठिन् ! आपको नमस्कार हो, आप षडैश्वर्य सम्पन्न महापुरुष हो और महा प्रभाव वाले, महाविभूति के पति हो आप को नमस्कार है ॥ २५ ॥

श्रीशुक उवाच ॥

हे प्रभो ! श्रीनारदजी शरणागत भक्त चित्र केतु को इस विद्या का उपदेश करके अङ्गिरा महर्षि के साथ ब्रह्मा के धाम को चले गये ॥ २६ ॥

चित्र केतु भी नारद की कही हुई उस विद्या को सावधान होकर सप्त दिवस तक केवल जल भक्षण करके धारण करता हुआ ॥ २७ ॥

हे राजन् ! तदनन्तर सप्तदिवस के पश्चात् धारण की हुई उस विद्या से बीच में अवान्तर फल अस्खलित विद्याधरोंके आधिपत्य को चित्र केतु प्राप्त हुआ ॥ २८ ॥

तदनन्तर कितने एक दिनों में विद्या से दीप्त मन की गति होने से, देवों के देव श्री शेषजी के चरणों के समीप में पहुंच गया ॥ २९ ॥

वहांपर कमल नाल सदृश गौर, नील वस्त्र को धारण किये, स्फुरायमाण किरीट केयूर (बाजूबन्द) कांचीगुण (कोंधनी) कंकणों को धारण किये, प्रसन्न मुखारविन्द और अरुण नेत्र वाले सिद्धेश्वर मण्डलों से उपासित प्रभु को देखा ॥ ३० ॥

उन शेषजीके दर्शन से नष्ट हुए समग्रपाप जिसके अतएव निर्मल अन्तः करणवाला और मनन शील होकर समीपगया । बढी हुई भक्ति से प्रेमाश्रु और रोमाञ्च वाला आदि पुरुष को नमस्कार करता हुआ ॥ ३१ ॥

वह चित्रकेतु प्रभु के चरणार विन्द के पीठ को बारम्बार प्रेमाश्रुवोंसे अभिषेक करता हुआ, प्रेम से बहुत काल तक रुद्ध कंठ होकर भगवान् की स्तुति करने को समर्थ न हुआ ॥ ३२ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

मनीषया बुद्ध्या मनःसमाधायैतद्वक्ष्यमाणं बभाषे प्रतिलब्धा वाग्येन सात्वतशास्त्रोक्तो विग्रहो यस्य तम् ॥ ३३ ॥

अन्योऽन्यप्रेमजानन्दनिभृतान्स्वामिसेवकान् ।
अभिनन्दन्मुदा स्तौति दशभिः पञ्चभिर्विभुम् ॥

हे अजित ! अन्यैरजितोऽपि भवान्साधुभिर्भक्तैर्जितः स्वाधीन एव कृतः यतो भवानतिकरुणः तेऽपि च निष्कामाः अपि भवता विजिताः यो भवान् कामात्मनामात्मानमेव ददाति ॥ ३४ ॥

क्षित्यादिभिरेष किलावृतः सप्तभिर्दशगुणोत्तरैराण्डकोशः ।
यत्र पतत्यणुकल्पः सहाण्डकोटिकोटिभिस्तदनन्तः ॥ ३७ ॥
विषयतृषो नरपशवो य उपासते विभूतीर्न परं त्वाम् ।
तेषामाशिष ईश ! तदनु विनश्यन्ति यथा राजकुलम् ॥ ३८ ॥
कामधियस्त्वयि रचिता न परम ! रोहन्ति यथा करम्भबीजानि ।
ज्ञानात्मन्यगुणमये गुणगणतोऽस्य द्वन्द्वजालानि ॥ ३९ ॥
जितमजित ! तदा भवता यदाह भागवतं धर्ममनवद्यम् ।
निष्किञ्चना ये मुनय आत्मारामा यमुपासतेऽपवर्गाय ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु भक्तैरेव जित इति कथं ? स्पर्धमानैरपि सृष्ट्यादिकर्तृभिरन्यैरीश्वरैर्जयसम्भवात्तत्राह—तवेति । जगत उद्भवादीनि तवैव विभवो विभवनं महिमा लीलेति यावत् आदिशब्देन प्रवेशनियमादीनि विश्वसृजस्तु ब्रह्मादयो नेश्वराः किं तु ते तवांशो यः पुरुषस्तस्यांशाः तत्र एवं स्थितेऽपि पृथक्पृथगीश्वरा वयमित्यभिमानेन वृथैव स्पर्धन्ते ॥ ३५ ॥

त्वमेव सृष्ट्यादिकर्तेत्येतदुपपादयति—परमाणुः सूक्ष्ममूलकारणं परममहदन्तिमं कार्यं तयोस्त्वमेवाद्यन्तान्तरवर्ती आदावन्ते चान्तरे मध्ये च वर्तितुं शीलं यस्य सः अत एव त्रयविधुर आद्यन्तमध्यशून्यो ध्रुवः ते च त्वया सृज्यन्ते न तु ध्रुवाः कुत इत्यत आह—सत्वानां सत्वेन प्रतीतानां कार्याणामादावन्तेऽपि अन्तरालेऽपि च तदेव ध्रुवं सुवर्णादिवत् ॥ ३६ ॥

एवं ध्रुवत्वेन कालतः परिच्छेदो नास्तीत्युक्तं देशतोऽप्यपरिच्छेदमाह—क्षित्यादिभिरिति । पूर्वस्मात्पूर्वस्माद्दशगुणमुत्तरोत्तरैरभिरावृतः यत्र त्वय्यणुकल्पोऽणुतुल्यः पतति परिभ्रमति तस्मादनन्तस्त्वम् ॥ ३७ ॥

यस्मादेवं परमेश्वरस्त्वमेवान्ये देवास्तव विभूतयोऽतस्त्वां विहाय विषयकामनयाऽन्योपासका अतिमन्दा इत्याह—विषयेषु तृट् तृष्णा येषां ते नराकाराः पशवः कुतः ये विभूतीरिन्द्राद्या उपासते न तु परं त्वां ततः किं तत्राह—तेषामिति तदनु उपास्यनाशानन्तरं यथा राजकुलमनु राजकुलनाशानन्तरं तत्सेवकानामाशिषो नश्यन्ति तद्वत् भवञ्च परमोऽवधिर्भेदेऽपि नश्यन्त्येव ॥ ३८ ॥

विषयकामेनापि कृता त्वत्सेवा मोक्षफलैवेत्याह—कामधियो विषयकामना अपि हे परम ! त्वयि रचिताः कृताश्चेत् नरोहन्ति देहान्तरोत्पत्तये न भवन्ति करम्भबीजानि भर्जितबीजानि यथा यतोऽस्य जीवस्य गुणगणादेव द्वन्द्वसमूहा भवन्ति अतः कामेनापि निर्गुणस्य तव भजनाच्छनैर्नैर्गुण्यं भवतीत्यर्थः ॥ ३९ ॥

फलकामनयापि त्वदाराधनं यदा मोक्षहेतुस्तदा किं वक्तव्यं भगवद्धर्ममाहात्म्यमिति वक्तुं तत्सम्प्रदायप्रवर्तकत्वेन च भगवन्तं स्तौति—जितमिति । यदा भवान्भागवतं धर्ममाह तदा हे भगवन्, त्वया जितं सर्वोत्कर्षेण स्थितं तत्र हेतुः ये निष्किञ्चनाः सनत्कुमाराद्यो मुनयस्ते यं भगवन्तमपवर्गाय सेवन्ते तेन भवता जितम् यं धर्ममिति वा ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो मनीषया बुद्ध्या मनः समाधाय स्ववशीकृत्य प्रतिलब्धा वाग्येनासौ चित्रकेतुः प्रतिलब्धवाग्रस इति पाठान्तरं तत्र प्रतिलब्धवागसृतः सर्वेन्द्रियाणां बाह्यवर्तनं बाह्यव्यापारं नियम्य अपोह्येत्यर्थः सात्वतशास्त्रं पञ्चरात्रशास्त्रं (१) तत्प्रतिपाद्यो विग्रहो यस्य तं जगद्गुरुं सात्वततन्त्रोपदेष्टारं सङ्कर्षणं प्रतिपतद्वक्ष्यमाणां वसाके वक्ष्यमाणां स्तुतिमकरोदित्यर्थः ॥ ३३ ॥

तामेवाह—अजितेत्यादिना, सहस्रमूर्धन् इत्यन्तेन, तावदाश्रयणसौकर्यापादकसौलभ्यवात्सल्यमहौदार्यगुणविशिष्टं स्तौति—अजितेति । हे अजित ! इतरैः स्वाधीनं कर्तुमशक्य हे दुर्लभेत्यर्थः ! तथापि साधुभिर्जितः भवान् सुलभ इत्यर्थः कथम्भूतैः साधुभिर्विजितः आत्मा मनो यैस्समभतिभिः कृत्स्नं जगद्ब्रह्मात्मकत्वेन पश्यद्भिः कथमेतत्साधुभिर्विजितोऽहमिति तत्राह—यो भवान् भजतामकामात्मनाम् अनन्यप्रयोजनेन भजतामात्मानं स्वं स्वरूपं ददातीत्यात्मदः स्वपर्यन्तदातेत्यर्थः एवं सौलभ्यमुक्तम् आत्मद इत्यनेन महौदार्यञ्च; अथ वात्सल्यमाह—भवता त्वया ते साधवो विजिताः कुतः ? यतस्त्वमतिकरुणः आश्रितवात्सल्यविवशः अत्यन्तवात्सल्येन त्वया साधवोऽपि वशीकृता इत्यर्थः ॥ ३४ ॥

ननु, परत्वे सत्युक्तं गुणत्रयमाश्रयणसौकर्यापादकमन्यथा तृणस्येव सौलभ्यं दरिद्रस्येवौदार्यं पिशाचेरिव कारुण्यमकिञ्चित्करं स्यादित्यत्र परत्वविशिष्टं स्तौति—तवेति । हे भगवन् ! जगतः उत्पत्तिस्थितिलयादीनि आदिशब्देन महानन्दरूपमोक्षान्तर्नियमनादिर्विधान्वितः तव विभवः ऐश्वर्यम् अतस्त्वत्तः परो-

(१) तन्त्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यत इति प्रथमस्कन्धोक्तेः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नास्तीत्यर्थः एवं परत्वं तत एव निरुपाधिकस्वामित्वञ्चोक्तं ननु, जगदुत्पत्त्यादीनि ब्रह्मरुद्रादीनां विभवो न ममेत्यत्राह- विश्वसृज इति । विश्वसृजो ब्रह्मादयः ते तवांशांशाः अग्नेर्विस्फुलिङ्गा इव त्वदंशांशभूतत्वात्तेषां विभवो जगदुत्पत्त्यादिरित्यर्थः त्वन्नियोगेन ते जगदुत्पत्त्यादिकर्त्तार इति भावः ननु, तेपि वयं विश्वस्य स्रष्ट्यादिकर्त्तार इति स्पर्द्धन्ते तत्राह—तत्रेति । तत्र तेषां त्वदंशांशत्वे सति तावन्मात्रेणैव वयमपि पृथगीश्वरा इत्यभिमानेन मद्गतमीशितृत्वं परमपुरुषायत्तम् इत्यज्ञात्वा मुधा व्यर्थमेव स्पर्द्धन्ते तेषां स्पर्द्धामात्रमवशिष्यते नत्वीशत्वं सिद्ध्यतीति भावः ॥ ३५ ॥

जगदुत्पत्त्यादेस्तदेकविभवत्वं दृष्टान्तमुखेन विशदयन् स्तौति–परमाणाविति । परमाणुपरममहतोरल्पीयसो विपुलस्य च वस्तुनो याऽन्याद्यन्तान्तराणि सृष्टिसंहारस्थित्यवस्था इत्यर्थः तेषु वर्त्तत इतिवर्त्ती अन्तरात्मतया व्याप्य स्थितः त्रयविधुरः आद्यन्तमध्यरहितः त्वमेव कार्यस्य वस्तुनः कारणात्मतया यदादाववतिष्ठतेऽन्ते च यदवशिष्यते तद्विभवत्वमेव हि कार्यस्य वस्तुनो दृष्टं यथा मृत्सुवर्णात्मकघटकटकादाविति दृष्टान्तोऽभिप्रेतः एवं समष्टिव्यष्ट्यात्मकस्य कृत्स्नस्य कार्यजातस्यादौ कारणत्वेनावस्थानादन्ते चावशेषात्त्वद्विभव एव जगदुत्पत्त्यादिः न तु मध्यस्थचतुर्मुखादेरिति भावः कार्यं वस्तु मध्यस्थस्य विभवो नेति किं वक्तव्यमित्याह—आदाविति । सत्त्वानां कार्यत्वेनावस्थितानां पदार्थानामादावन्ते च यत् ध्रुवं स्थिरम् आदौ कार्यत्वेनावस्थितम् अन्ते चावशिष्टमित्यर्थः अन्तरालेपि तदेव अन्तरालावस्था तद्विभव एव आद्यन्तयोर्यदस्ति तस्य मध्यस्थविभवत्वं किं पुनर्न्यायसिद्धमिति भावः एवं कालत्रयवर्ती त्वमेवेति भावः अनेन कालतोऽपरिच्छिन्नत्वमप्युक्तम् अथ सर्वदा सर्वेष्वन्तरात्मतया व्याप्य स्थितिकथनेन सर्ववस्तुसामानाधिकरण्यरूपवस्त्वपरिच्छेदोप्युक्तः सर्ववस्तुसामानाधिकरण्यमेव हि वस्त्वपरिच्छेदः यद्वा स्वापेक्षयोत्कृष्टगुणवस्त्वन्तररहित्यं वस्त्वपरिच्छेदः स हि जगत्कारणत्वतदुपयुक्तसार्वज्ञ्यसत्यसङ्कल्पत्वाद्यगणितगुणजातस्य कथनेनाभिहितप्राय एव ॥ ३६ ॥

एवं द्विविधपरिच्छेदराहित्यमुक्तमथ देशपरिच्छेदरहितत्वं वदन्नेतत्त्रिविधपरिच्छेदराहित्यमेव त्वय्यनन्तशब्दस्य प्रवृत्तौ निमित्तमित्याह—क्षित्यादिभिरिति । पूर्वस्मात्पूर्वस्माद् दशगुणमुत्तरैरधिकैः क्षित्यादिभिः पृथिव्यवग्निवाय्वाकाशाहङ्कारमहद्भिः सप्तभिरावृतः एषः परिदृश्यमानोऽण्डकोशः ईदृशीभिरण्डकोटिभिः सह सहितो यतस्त्वं ततोऽनन्त ! विभूत्यानन्त्यादनन्तत्वात्त्वमनन्तशब्दवाच्य इत्यर्थः एतमण्डकोशं विशिनष्टि यत्र एतस्मिन्नण्डकोशेऽणुकल्पः जीवः पतति संसरति यद्वा यस्मादीदृशीभिरण्डकोटिभिः सह एषोऽण्डकोशः यत्र यस्मिन् त्वयि अणुकल्पः पतति परिभ्रमति ततस्त्वमनन्तः सर्वस्य चेतनाचेतनात्मकाण्डकोशरूपदेशस्य त्वद्व्याप्यत्वादिदमत्रनास्तीत्येवंरूपदेशपरिच्छेदरहितस्त्वमिति देशाऽपरिच्छेद उक्तः एतत्त्रिविधपरिच्छेदराहित्यमपि परत्वापादकं भवतीत्यर्थः ॥ ३७ ॥

एवं तस्य समाश्रयणीयोपयुक्तगुणवस्तुत्वाद्देवतान्तरस्य तदभावं वदन् तमेव स्तौति—विषयतृषइति, ये विषयेषु शब्दादिषु तृट् तृष्णाऽभिलाषो येषां ते फलकामा नरा एव पशवः ते विभूतीः त्वद्विभूतिभूतान् रुद्रादीनुपासते न तु परं सर्वोत्कृष्टं विभूतिपतिमुपासते हे ईश ! तेषां विषयतृषां विभूतीरुपासीनानामाशिषस्त्वद्विभूतिभिर्दत्ता अर्वाचीनाः स्वर्गादिफलरूपाः पुरुषार्थाः तदनु विभूतिविनाशमनु नश्यन्ति यथा राजकुलं यथा राजकुलविनाशमनु तत्सेवकानामाशिषो नश्यन्ति तद्वत् उक्तं च त्वयैव । "यो यो यां यां तनुं भक्तः' इत्यारभ्य 'लभते च ततः कामान्मयैव विहितान् हि तान् । अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्" इत्यन्तेनेति भावः त्वद्विभूतीनां परत्वादिगुणपूर्त्यभावादिति तात्पर्यम् ॥ ३८ ॥

त्वदेकप्रयोजनत्वेनकृतास्त्वत्सेवास्तु निरतिशयनित्यफलजनकत्वान्न नश्यन्तीत्याह—कामधिय इति । त्वयि विषयभूते रचिताः कृताः याः कामधियः त्वदेकप्रयोजनास्त्वद्विषया उपासनाः हे परम, पुनर्न रोहन्ति न बन्धाय भवन्ति नित्यनिरतिशयत्वदनुभवरूपानन्दापादका एव भवन्ति न पुनर्जन्ममरणादिरूपबन्धाय भवन्तीत्यर्थः पुनररोहे दृष्टान्तः यथा करम्भबीजानीति यथा भर्जितबीजानि पुनर्न रोहन्ति नाङ्कुरीभवन्ति तद्वत् पुनररोहे हेतुं वदंस्तं विशिनष्टि—ज्ञानात्मनीति, गुणमयः सत्त्वादिप्रकृतिगुणविकारः स न विद्यते यस्य सोऽगुणमयस्तथाभूते नित्यासंकुचितापरिच्छिन्नज्ञानस्वरूपे त्वयि गुणमूलककर्मावश्यत्वात्तन्मूलकसङ्कुचितज्ञानत्वाकर्मसाध्यमोक्षाधिपत्यप्रगातजनानिष्टपरिहारकरत्वतादृष्टप्रापणसमर्थत्वादिगुणयुक्तत्वात्त्वयि रचिताः कामधियो न पुनरनर्थरूपबन्धाय भवन्ति देवतान्तराणान्तूक्तविपरीतगुणत्वात्तेषु रचिताः स्वर्गादिकामधियो नश्यन्तीति भावः तदेवाह—गुणगणात इति, अस्य विरिञ्चिप्रभृत्यकिञ्चनपर्यन्तस्य जीववर्गस्य गुणानां सत्त्वादिप्रकृतिगुणानां ये गणा विकाररूपाः सङ्घाः तेभ्यः गुणगणातः द्वन्द्वजालानि सुखदुःखादीनि द्वन्द्वजालानि भवन्ति उपास्यदेवतान्तरस्यापि उपासकवत्कर्मवश्यत्वादियुक्तत्वात्तत्सेवाश्रृङ्खलितस्य पुंसस्तादृशसेवावदनिष्टपरिहारेष्टप्रापणाक्षमा न भवतीति भावः एवं ज्ञानशक्त्याद्याश्रितकार्यापादकगुणपूर्तिरप्युक्ता. एवं समाश्रयणीयत्वोपयुक्तपरत्वादिगुणपूर्णत्वेन देवतान्तरेभ्यो वैलक्षण्यं तस्यैव समाश्रयणीयत्वं चोक्तं भवति ॥ ३९ ॥

अथ यत एव भवानितरेभ्यः परः अत एव त्वदाराधनात्मकस्त्वदभिहितो धर्मः तदनुष्ठातारश्चेतरदेवताराधनरूपधर्मतदनुष्ठातृभ्यो विलक्षणा इत्याह–जितमितित्रिभिः, हे अजित, अजितशब्दप्रवृत्तिनिमित्ताश्रय, भवता यथा जितं सर्वं स्ववशीकृत्य तस्मात्परत्वेनावस्थितम् एतदेवाजितशब्दप्रवृत्तिनिमित्तमित्यपि सूचितं तथा धर्मेणेति शेषः त्वदाराधनभूतधर्मेणापि जितमित्यर्थः सोऽपि सर्वोत्कृष्टइत्यर्थः कोसौ धर्मः ? तत्राह–यं भागवतं भगवत्स्तवाराधनरूपमनवद्यं निर्दुष्टं धर्मं भवानाह पञ्चरात्रगीतादिमुखेनोक्तवान् यत्र धर्मे निष्किञ्चनाः अनन्यप्रयोजनाः आत्मारामाः ब्रह्मगुणा-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नुभवपरा ये मुनयः अपवर्गाय मुक्तय उपासतेऽनुतिष्ठन्ति ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मनीषया धृतिरूपया प्रज्ञया प्रतिलब्धः सम्यक्प्राप्तो वाग्रसो वचनवीर्यं येन स तथा सात्वतानां शास्ता विग्रहस्तत्त्वोपदेशविशेषो यस्य स तथा तं सर्वेन्द्रियाणां बाह्येषु विषयेषु वर्तमानं व्यापारम् ॥ ३३ ॥

हे अजित ! असितकरुणो यस्त्वमकामानां भजतां साधूनामात्मदो यस्मादतस्ते साधवोपि भवता विजिताः किञ्च जितमनस्कैः समबुद्धिभिः साधुभिर्भवानपि जितो वशीकृतः चशब्दो नियतत्वं सूचयति ॥ ३४ ॥

तत्सत्त्वे प्रमाणमाह—तवेति । जगदुत्पत्त्यादीनि तव विभवः स्वरूपलक्षणानि खलु, यस्मादतस्तत्र तस्यामवस्थायां शास्त्रेण स्थितायां ते भिन्नांशाः विश्वसृजोऽहं जगदीश्वरो जगत्स्रष्टेति पृथक् जगदीश्वरत्वाभिमानेन मृषा निष्प्रयोजनं स्पर्धन्तीति व्यत्यासेन हरेर्माहात्म्यस्यानन्तत्वं दर्शयति ॥ ३५ ॥

तवविभव इत्यादिना गुणानन्त्यमुक्तमधुनाकालदेशानन्त्ये आह—परमाणुवदिति । त्वं त्रयाविधुरः अणुमहन्मध्यपरिमाणरहितोपि स्वतः प्राकृतपरिमाणाभावात् परमाणुपरममहतोरादावन्तेऽन्तरे च वर्तितुं शीलमस्यास्तीति आद्यन्तान्तरवर्ती परमाणुलक्षणकालावयवस्य परममहत्कालावयवस्य च मध्यकालावयवस्य च वर्तते इति सत्त्वानामित्युपलक्षणं घटादीनामप्यावाधुत्पत्तेः पूर्वमन्ते प्रध्वंसादूर्ध्वं यत्ते स्वरूपं ध्रुवम् अव्यभिचारि तदेवान्तरकाले मध्यकालेपि वर्तत इति शेषः ॥ ३६ ॥

य आण्डकोशो दशगुणोत्तरैः सप्तभिः क्षित्यादिभिरावृतः स एषोण्डकोटिभिः सह यत्र भगवति अणुभ्योऽणुकल्पः सूक्ष्मात्सूक्ष्मतरो वर्तते तद्धरेः स्वरूपमनन्तमिति हेतुगर्भविशेषणम् अपरिच्छिन्नत्वादुचितमिति भावः ॥ ३७ ॥

एवं स्वरूपमुक्त्वाऽन्वयव्यतिरेकाभ्यां तज्ज्ञानफलमाह—विषयेति । विषयतृषः शब्दादिविषयतृष्णावन्तः अत एव नरपशवः विभूतीब्रह्मादिशब्दवाच्याः परं तेषां पातारं ज्ञानादिपूर्तिप्रदातारं तेभ्योप्युत्तमं तदनु प्राप्तिसमनन्तरं किञ्चित्कालं फलानुभवानन्तरं वा, "तद्यथेह कर्मजितो लोकः क्षीयत एव" इति श्रुतेः अराजकुलं पालकेन राज्ञा शून्यो जनसमुदायो धर्मविरुद्धानां राज्ञां कुलं वा ॥ ३८ ॥

कामधियः शब्दादिगुणविषयज्ञाना अगुणमये प्रकृतिगुणाविकृतदेहादिशून्ये ज्ञानात्मनि रचिताः यदि स्युस्तर्हि पुनर्नारोहन्ति नोत्पद्यन्ते करम्भबीजानि भर्जितधानाः गुणगणात्तो विषयसमूहादस्य जगतो द्वन्द्वजालानि सुखदुःखादीनि भवन्तीति शेषः ॥ ३९ ॥

दुःखात्मकसंसारनिवृत्तिः केन स्यादित्याशङ्क्य भागवतधर्मानुष्ठानेन तन्निवृत्तिः स्यादित्याशयवानाह—जितमिति । हे अजित, भवान्यदापवर्गाय मुनयो यं धर्ममुपासते तं भागवतधर्ममाह । तदा भवता संसारस्वरूपं जितं भागवतधर्मकथनेन भक्तानां संसारजयोपायो दर्शित इत्यर्थः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विश्वसृजः ब्रह्मरुद्रेन्द्राद्याः अंशांशाः अत्यल्पांशा इत्यर्थः ॥ ३५ ॥ ३६ ॥

दशगुणा उत्तरोत्तरा येषां तैरित्यर्थः ॥ ३७—३९ ॥

जितमिति निजोत्कर्ष आविष्कृतः । भगवन्निति पाठः स्वामिसम्मतः भवतेति तु प्रायः सर्वत्र ॥ ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रतिलब्धवाक् तत्कृपयैवेत्यर्थः । सात्वतशास्त्रोक्तः सच्चिदानन्दमयो विग्रहो देहो यस्येत्यनेन ज्ञानशास्त्रोक्तस्य मायामयविग्रहत्वस्य प्रामाण्यं वारितम् ॥ ३३ ॥

परस्पर वशीभावलभ्यानन्दरसाम्बुधौ । मज्जेतां भगवद्भक्तौ भक्त्यैवेत्याह—संस्तुवन् । हे अजित ! ज्ञानियोगिप्रभृतिभिस्त्वमजित एव साधुभिर्भक्तैस्तु भवान् जितः अधीनीकृतः समतिभिः स्वकीयपरकीयसुखदुःखसमबुद्धिभिर्जितात्मभिर्जितमनस्कत्वेन मनोधर्मस्य कामस्यापि जितत्वात् निष्कामैः तेषां तदुपासने निष्कामत्वमेव त्वज्जये कारणमिति भावः । ते साधवोपि भवता विजिताः यतो भजतामकामात्मनां भजद्भ्यो निष्कामेभ्यः यो भवानात्मदः आत्मानमेव ददाति । यदि यूयं मां परिचर्य किमप्यपवर्गादिकमपि मत्तो नैव वृणुध्वे तर्हि यथेष्टं रात्रिदिनं मामेव परिचरथ मां वशीकुरुथेत्यात्मानं तेभ्यो ददेव बलादात्मनः सौन्दर्यं सौरस्यं सौरभ्यादीनि तच्चयन श्रवणादीन्द्रियभोगार्थमर्पयतीत्यर्थः तेन तद्विजये भवतोप्यात्मदत्वमेव कारणमिति भावः । अत्र साधुभिरिति ज्ञानिभिरपीति न व्याख्येयम् । उत्तरार्द्धे भजतामकामात्मनामिति विशेषणद्वयस्य तद्व्यावर्त्तकत्वात् ज्ञानिनां भजनन्तु मोक्षसिद्ध्यर्थं साधनदशायामेव । अत्र तु भजतामिति वर्त्तमाननिर्देशः । निष्कामत्वं त्वात्यन्तिकदुःखनिवृत्तिकामत्वात्तेषां नास्त्येव ॥ ३४ ॥

एवं प्रभुभक्तयोः परस्परवशीभावमाख्याय, प्रभोः प्रभावमाह—तवेति त्रिभिः विभवो महिमा ननु ब्रह्मादयो जगदुदयादि हेतवो दृश्यन्ते तत्राह—विश्वेति । ननु, ब्रह्मरुद्रादिभक्ताः स्वस्वसेव्यानामेव जगदीश्वरत्वं प्रतिपादयन्तो मिथः स्पर्धन्ते इत्यत आह—तत्र मृषेति पृथगभिमत्या वयं हैरण्यगर्भाः शैवाः सौरा इत्याद्यभिमानवन्तः ॥ ३५ ॥

त्वमेव सृष्ट्यादि कर्ता वास्तव वस्तुरूप इत्युपपादयति परमाणुः सूक्ष्म मूलकारणं परममहत् अन्तिमं कार्यं तयोस्त्वमेवाद्यन्तान्तरवर्ती आदावन्ते अन्तरे मध्ये च वर्त्तितुं शीलं यस्य सः ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अत एव त्रयविधुर आद्यन्तमध्यशून्यो नित्यः यतः सत्वानां कार्य-वस्तूनाम् आदौ अन्ते च यत् ध्रुवं कारणत्वेन स्थिरं तदेव अन्तरालेपि सुवर्णादिवत्. अतस्त्वमेव सर्वकारणं वास्तवं वस्तु अन्यत् सर्वं कार्यजातमवास्तवं वस्त्वित्यर्थः ॥ ३६ ॥

एवं कालतः परिच्छेदाभावमुक्त्वा देशतोऽप्यपरिच्छेदमाह-क्षित्यादिभिः क्षितिजलतेजआकाशाहङ्कारमहत्तत्त्वप्रकृतिभिः सप्तभिः पूर्वस्मात् पूर्वस्मात् दशगुणाधिकैरावृतः यत्र त्वयि अणुकल्पः पतति परिभ्रमति तत्तस्मादनन्तस्त्वम् ॥ ३७ ॥

एवं प्रभोः सर्वोत्कर्षमाख्याय भक्तस्यापि तमभक्तनिन्दया प्रथमं व्यतिरेकेणाह-विषयेति । विभूतीरिन्द्राद्याः न तु त्वां तदनु उपास्य नाशानन्तरम्. यथा राजकुलनाशानन्तरं तत्सेवकानामाशिषो नश्यन्ति ॥ ३८ ॥

भक्तस्योत्कर्षं कैमुत्तिकन्यायेनान्वयेनाह-कामा राज्याद्यास्तदर्थं धियो मतयस्त्वयि रचिताः कृताश्चेत् न रोहन्ति देहान्तरोत्पत्तये न भवन्ति. यथा, करम्भबीजानि भ्रष्टयवबीजानि तथैव. यद्यपि कामधियोऽन्यत्र रोहन्त्यो दृष्टाः, भ्रष्टबीजतुल्या न भवन्ति तदपि विषयसाङ्गुण्याद्भवन्तीत्याह, ज्ञानात्मनि चिन्मये अगुणमये गुणमयात् पदार्थाद्भिन्ने अतो रसकूपपतितं वस्तु यथा रस एव भवेदेव त्वयि प्रविष्टाः कामधियोऽपि चिन्मय्यो भवन्तीति कथं तासां संसारहेतुत्वं स्यादित्यर्थः यतो गुणगणात एव द्वन्द्व जालानि संसारकारणानि भवन्ति ॥ ३९ ॥

यद्येवं स्वमहिम्ना सकामाया अपि भक्तेः श्रैष्ठ्यं तदा किमुत निष्कामायाः किञ्च भक्तेर्निष्कामत्वञ्च त्वत्प्रवर्तितमतो निष्कामभक्तेर्यत्तव जयः पूर्वं प्रतिपादितस्तत्रापि परमकृपालुः स्वभक्तवशीभावेप्सुस्त्वमेव कारणम्. इत्यतो वस्तुतस्तवैवविशेषतो जय इत्याह-जितमिति । हे अजित, भागवतं धर्मं अनवद्यं निष्कामं यदैव भवानाह तदेव जितं भवतैव भक्ता ऋणीकृताः येनैव निष्कामभक्तियोगेन भक्तैर्भवान् जीयते तस्य त्वयैवोक्तत्वात्त्वद्गुणं त्वमेव स्वभक्ताधीनत्वाभिलाषसाधकं कृपाविशेषमास्वादयन्तः प्रत्युतत एव भक्ता स्वयमेव ऋणीभूय स्थिताः भवन्तीति भावः । ये निष्किञ्चना प्रथमत एव शुद्धभक्ताः तथा तत्सङ्गतस्य त्यक्तज्ञाननिष्ठा मुनयस्तापसा, आत्मारामाः जीवन्मुक्ताश्च, केचन यमेव धर्ममुपासते. यद्वा, निष्किञ्चना इत्यस्यैव विशेषणद्वयं मुनयस्त्वन्मननशीला आत्मारामास्त्वय्येव रममाणा इत्यर्थः अपवर्गाय अपकृष्टा वर्गाश्चत्वारोपि यतस्तस्मै प्रेम्णो अपवर्गश्च भवति । लोलावित्यादि पञ्चमस्कन्धीयगद्योक्तलक्षणाय भक्तियोगायेति वा ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सात्वतशास्त्रे प्रतिपाद्यतया विग्रहोऽप्राकृतो देहो यस्य तं यद्वा सात्वतशास्त्रं विग्रहवत्प्रियं यस्य तम् ॥ ३३ ॥

जितः आत्मा मनो यैस्तैः अकामः ऐहिकामुष्मिकभोगवासनाशून्यः आत्मा मनो येषां तेषाम् ॥ ३४ ॥

जगदुदयादीनि तवैव विभवः ऐश्वर्यं विश्वसृजो ब्रह्मरुद्रेन्द्रादयः तवांशांशाः पृथगभिमत्या पृथक् पृथक् ईश्वरत्वबुद्ध्या तत्र जगदुदयादिषु मृषा स्पर्द्धेति त्वां सर्वात्मानं सर्वकर्तारं विस्मृत्येति शेषः ॥ ३५ ॥

परमाणुः अतिसूक्ष्मः परममहान्समष्टिकार्यरूपः पदार्थः तयोरादौ स्रष्टृतया अन्ते संहर्तृतया अन्तरे मध्ये नियन्तृतया वर्त्तमानस्त्वमसि स्वयं तु त्वं त्रयविधुरः स्रष्टृसंहर्तृनियन्तृरहितः अत एव सत्वानां ब्रह्मादिस्तंबपर्यन्तानामादावन्तेऽपि यद्ध्रुवं तदेवान्तरालेपि यद्ध्रुवं तत्त्वमेवासि सर्वरूपोसीत्यर्थः ॥ ३६ ॥

दशगुणोत्तरैः पूर्वस्मात्पूर्वस्माद्दशगुणमुत्तरैराधिकैः क्षित्यादिभिः सप्तभिरेष किलावृतोऽण्डकोशः सहाण्डकोटिभिर्यत्राणुकल्प अणुतुल्यः पतति भ्रमत्यतः स त्वमनन्तोसि ॥ ३७ ॥

एवंभूतं परं पूर्णं त्वां मुक्तिदं ये नोपासते ते नरपशवः नराकारपशवः यतो विषयतृषो विषयेषु इन्द्रियार्थेषु तृट् येषां ते इन्द्रियार्थप्राप्तये विभूतीः भवद्विभूतिभूतान् इन्द्रादीन् उपासते तेषां नरपशूनां आशिषः इन्द्रादिदत्ताः सम्पदः तदनु इन्द्रादिनाशानन्तरं यथा राजकुलमनु राजकुलनाशानन्तरं तद्दत्ताः तत्सेवकाशिषो विनश्यन्ति तद्वद्विनश्यन्ति. अन्यदेवभक्ता अकृतार्था एवेति भावः ॥ ३८ ॥

त्वद्भक्तेषु तु ये सकामत्वेन निकृष्टाः तेऽपि कृतार्था भवन्तीत्याह—कामधिय इति । गुणाः विषयास्तेषां गणातः बुद्धिस्थविषयवासनासमुद्गतः अस्य जीवस्य द्वन्द्वानां जन्ममरणादीनां जालानि भवन्ति एवंभूता ये जन्ममरणजालबन्धनसंसारप्रापकाः कामयन्त इति कामाः, विषयगणास्तदर्थधियः बुद्धयः हे परम सर्वोत्तम, ज्ञानानां जीवानामात्मनि आश्रये प्रिये च गुणमयः संसारस्तद्भिन्ने मुक्तिप्रदे मुक्तौ प्राप्ये च त्वयि रचिताः कृताः न रोहन्ति जन्ममरणफलगा न भवन्ति किन्तु ध्रुवादीनामिव कामान् दत्वा मुक्तिप्रापका भवन्तीत्यर्थः ॥ ३९ ॥

सकामा अपि भगवद्भक्ता मुक्ता भवन्तीति भगवद्भजनमाहात्म्यमुक्त्वाऽथ निष्कामानां भगवद्भक्तानां श्रैष्ठ्यं निष्कामभजनस्य च भगवत्प्रोक्तत्वेन सर्वभूतहितत्वादिना च परमं श्रैष्ठ्यं मध्ये काम्यकर्मणोः दुष्टत्वञ्च वर्णयन् भगवन्तं स्तौति–जितमितिचतुर्भिः । हे अजित हे भगवन्, त्वया तदैव जितं सर्वोत्कर्षेण स्थितं यदा ये निष्किञ्चना मुनयः त्वन्मननशीलाः आत्मनि त्वय्येवारामो येषां ते मुमुक्षवः अपवर्गाय यमुपासते तमनवद्यं निष्कामं भागवतं धर्ममाह ॥ ४० ॥

भाषा टीका ।

तदनन्तर बुद्धि से मन का समाधान कर वाणी को प्राप्त होकर सर्व इन्द्रियों की बाह्य वृत्तियों रोककर पञ्चरात्र शास्त्रोक्त विग्रह वाले, जगद्गुरु श्री शेषजी की इस प्रकार स्तुति करने लगा ॥ ३३ ॥

विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति च यदन्यत्र ।
विषमधिया रचितो यः सह्यविशुद्धः क्षयिष्णुरधर्मबहुलः ॥ ४१ ॥
कः क्षेमो निजपरयोः कियानर्थः स्वपरद्रुहा धर्मेण ।
स्वद्रोहात्तव कोपः परसम्पीडया च तथाऽधर्मः ॥ ४२ ॥
न व्यभिचरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः ।
स्थिरचरसत्त्वकदम्बेष्वपृथग्धियो यमुपासते त्वार्याः ॥ ४३ ॥
न हि भगवन्नघटितमिदं त्वद्दर्शनान्नृणामखिलपापक्षयः ।
यन्नामसकृच्छ्रवणात्पुल्कसकोऽपि विमुच्यते संसारात् ॥ ४४ ॥
अथ भगवन्वयमधुना त्वदवलोकपरिमृष्टाशयमलाः ।
सुरऋषिणा यदुदितं तावकेन कथमन्यथा भवति ॥ ४५ ॥
विदितमनन्त समस्तं तव जगदात्मनो जनैरिहाचरितम् ।
विज्ञाप्यं परमगुरोः कियदिव सवितुरिव खद्योतैः ॥ ४६ ॥
नमस्तुभ्यं भगवते सकलजगत्स्थितिलयोदयेशाय ।
दुरवसितात्मगतये कुयोगिनां भिदा परमहंसाय ॥ ४७ ॥
यं वै श्वसन्तमनु विश्वसृजः श्वसन्ति यं चेकितानमनु चित्तय उच्चकन्ति ।
भूमण्डलं सर्षपायति यस्य मूर्ध्नि तस्मै नमो भगवतेऽस्तु सहस्रमूर्ध्ने ॥ ४८ ॥

भाषा टीका ।

चित्रकेतु रुवाच ।

चित्र केतु बोला कि हे अजित ! सममति और रजितमन वाले साधुओं ने आप को जीतलिये और उनको भी आपने जीता है क्योंकि निष्काम भजन करने वालों को आप अपने को भी दे देते हो ऐसे अति करुणा वाले आप हैं ॥ ३४ ॥

हे भगवन् ! की उत्पत्ति पालन और संहारादिक ये आपका वैभव है । और विश्व सृष्टि करने वाले ब्रह्मादिक आप के अंश-के अंश हैं । तो हम ईश्वर है, इस प्रकार पृथक् अभिमान से मिथ्या ही स्पर्धा करते हैं ॥ ३५ ॥

परमाणु और परम महान् (बड़े से बड़ा) इन के आप आदि मध्य और अन्त में वर्तने वाले हैं अत एव आदि मध्य अन्त शून्य है । प्राणियों के आदि और अन्त में जो है नित्य है मध्य में भी वही है ॥ ३६ ॥

पूर्व २ से दश २ गुने अधिक ऐसे पृथिवी आदिक सप्त आवरणों से आवृत (ढका हुआ) ऐसा यह ब्रह्मांड और कोटि २ ब्रह्मांडों सहित जिन आप में अणु के सदृश भ्रमता है तिसी से आप अनंत हो ॥ ३७ ॥

विषय तृष्णा वाले जो नर पशु आपकी विभूति इन्द्र रुद्रादिकों की उपासना करते हैं और उनसे पर जो आप हैं तिनको नहीं उपासते हैं । उनके बड़े २ वैभव भी देवताओं के नाश होनेपर नाश होजाते हैं जैसे राज्य नाश होनेपर राजानुचर यह तो परम अवधि है बीच में भी नष्ट होता हैं ॥ ३८ ॥

हे परम ! ज्ञानात्मा, अगुणमय आपके विषय मे कामना-करके भी बुद्धि लगावे तो भी फिर जन्म मरण रूप संसार का अंकुर नहीं जामते, ये द्वंद्वजालतो जीव के गुणों-से है ॥ ३९ ॥

हे अजित ! जो आपने अनवद्य भागवत धर्म कथन किये हैं इसलिये आप सर्वोपरिस्थित हो जिन धर्मों को आत्मा रागनिष्टकञ्चन मुनिजन अपवर्ग के लिये उपासते करते हैं ॥ ४० ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

अनवद्यतामेवाह—विषममतिर्यत्र यस्मिन्भागवते धर्मे नास्ति यदन्यत्र यथाऽन्यस्मिन्काम्ये धर्मे; ननु, सोपि वेदोक्तत्वादनवद्य एव तत्राह, विषमधिया शत्रुमरणादिकामनया रचितो विहितो

श्रीधरस्वामिकृतभावार्थदीपिका ।

यः सत्त्वविशुद्धः रागद्वेषादिमत्त्वात् क्षयिष्णुश्च नश्वरफलत्वात् अधर्मबहुलश्च हिंसादिबाहुल्यात् तदुक्तं शबरस्वामिभिः 'उभयमिह चोदनायां लक्ष्यतेर्थोनर्थश्च' इत्यादि ॥ ४१ ॥

एतत्प्रपञ्चयति–कः क्षेमः किं कुशलं न किञ्चित् निजपरयोः स्वस्य परस्य च स्वपरद्रुहा स्वस्मै परस्मै च द्रुह्यतीति स्वपरध्रुक् तेन यतः स्वद्रोहादत्यन्तकायक्लेशात्तव कोपः पीडा सम्भवात तदुक्तं गीतासु"कर्षयन्तः शरीरस्थं भूतग्राममचेतसः । मां चैवान्तश्शरीरस्थं तान्विद्ध्यासुरनिश्चयान्" इति तथा परसम्पीडयाऽधर्मः च शब्दात्तव कोपश्च, अतस्त्वया रागान्धमपि कथञ्चिद्वेदमार्गे प्रवर्तयितुं काम्यधर्मोऽभिहितो न तत्त्वदृष्ट्या ॥ ४२ ॥

भागवतधर्मेण तु न द्रोह इत्याह—नेति । न व्यभिचरति न परमार्थं जहाति तव ईक्षा दृष्टिः, अव्यभिचारे हेतुः—स्थिरेति, स्थावरजङ्गमप्राणिसमूहेषु समबुद्धयो भागवता यं धर्मं सेवन्ते ॥ ४३ ॥

एवम्भूतस्य भागवतधर्मप्रवर्तकस्य तव दर्शनात्सर्वपापक्षयो भवतीति किं चित्रमित्याह–न हीति ॥ ४४ ॥

अतोऽहं कृतार्थोऽस्मीत्याह–अथेति । अथ अतो हेतोः तवावलोकनेन परिमृष्टाः निरस्ताः आशये चित्ते मला येषां ते त्वद्दर्शनश्च मम नारदोपदेशेन जातमित्याह—सुरऋषिणेति ॥ ४५॥

यथा चाहं पूर्वमतिमूढ आसं यथा च नारदेनानुगृहीतोस्मि तत्सर्वान्तर्यामिणस्तव मया किं प्रकाशनीयमित्याह, विदितमिति. विशेषेण आण्वं प्रकाशनीयं कियदिव न किमपीत्यर्थः सवितुर्यथा खद्योतैः प्रकाशनीयं नास्ति तद्वत् ॥ ४६ ॥

उक्तलक्षणं भगवन्तं प्रणमति-नम इति द्वाभ्याम् । सकलस्य जगतः स्थित्यादीनामीशाय समर्थाय दुरवसिता अविज्ञाता आत्मगतिर्निजतत्त्वं यस्य तस्मै केषां कुयोगिनां केन भिदाभेददृष्ट्या ॥ ४७ ॥

श्वसन्ति चेष्टन्ते चेकितानं पश्यन्तमनु चित्तयो ज्ञानेन्द्रियाण्युत्क्रान्ति स्वारूढं पश्यन्ति ॥ ४८ ॥ ४९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यत्र च धर्मे त्वमहं तव ममेति च या नृणामन्यत्रान्यस्मिन् धर्मे विषमा मतिः अहङ्कारममकाररूपा सा नास्ति स इत्यर्थः सर्वज्ञेन भ्रमविप्रलिप्सादिदोषरहितेन परमकारुणिकेन भगवताऽभिहितत्वादहङ्कारममकारप्रयुक्तहिंसादिगर्भत्वाभावात्सर्वस्य ब्रह्मात्मकत्वानुसन्धानगर्भत्वान्निरतिशयानन्दहेतुत्वाच्च त्वदाराधनरूपो धर्मः सर्वोत्कृष्टः तथा तदनुष्ठातारोपि शब्दादिविषयसुखार्थदम्भमात्सर्यहिंसादिस्वभावत्वाभावात्सर्वभूतसुहृत्त्वादि गुणयुक्तत्वाच्च उत्कृष्टाः इतरधर्मतदनुष्ठातारस्तूक्तविपरीता इति भावः तदेवाह—विषमधियेति, अहं ममेत्याद्यहंममाभिमानेन रचितो यो देवतान्तराराधनरूपः स ह्यविशुद्धः रागद्वेषादिगर्भत्वाधर्मप्रचुरः शत्रुमरणादिकामनागर्भत्वात् क्षयिष्णुरस्थिरफलश्च ॥ ४१ ॥

विषमधिया रचितं धर्ममेव निन्दति–क इति । स्वपरद्रुहो स्वं कर्तारं परञ्च द्रुह्यतीति स्वपरध्रुक् अत्यन्तशरीरायासकारित्वादन्ततः संसृतिरूपानर्थहेतुत्वाच्च स्वध्रुक् शत्रुहिंसादिकामनागर्भत्वात्परध्रुक्तेन धर्मेण देवतान्तराराधनरूपेण निजपरयोः कः क्षेमः किं दुःखं न किञ्चिदपीत्यर्थः परग्रहणं दृष्टान्तार्थं यथाऽभिचारादिकर्मणा मुमूर्षोर्नक्षेमस्तथा तत्कर्तुरपीत्यर्थः अस्तु वा कर्तुस्तादात्विकः कश्चित्क्षेमस्तथापि स कियानर्थः पुरुषार्थः अतितुच्छ इत्यर्थः क्षयिष्णुत्वादिति भावः एवं पुरुषार्थहेतुर्भवतीत्युक्तं प्रत्युतानर्थहेतुश्चेत्याह—त्वद्द्रोहादिति, स्वद्रोहात्स्वस्यैवाहितकरणाद्धेतोस्तवेश्वरस्य कोपः निग्रहः स्यादयं स्वस्यैवाहितमाचरति किमुत परस्येत्यतोऽयमतीव निग्राह्य इत्येवं तव कोपः स्यात्—

> "आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः ।
> यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥
> अहङ्कारं बलं दर्पं कामं क्रोधञ्च संश्रिताः ।
> मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥
> तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ।
> क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु" ॥

इत्यादिना प्रतिज्ञातो निग्रहः स्यादिति भावः तवकोपः स्याच्च वा अवश्यं परसम्पीडया परस्य द्रोहाद्धेतोरधर्मस्तेया स्यादेव स्वकृतेन धर्मेण परस्य यादृशी पीडा भवेत्तादृशी पीडा हेतुरधर्मोपि स्वानुष्ठितधर्ममनु स्यादित्यर्थः ॥ ४२ ॥

एवं धर्मान्तरस्य न केवलमपुरुषार्थहेतुत्वं प्रत्युतानर्थहेतुत्वञ्चोक्तं त्वदाराधनरूपधर्मस्य त्वनिष्टपरिहारेष्टप्राप्तिहेतुत्वमव्यभिचरितमित्याह—नेति । तव "सत्यकामः सत्यसङ्कल्पः" इति श्रुत्युक्तसत्यसङ्कल्पस्य तवेक्षा—

> "ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः ।
> अनन्येनैव योगेन मां ध्यायन्त उपासते ॥
> तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
> भवामि न चिरात्पार्थ मय्यावेशितचेतसाम्" ॥

इति कृतः सङ्कल्प इत्यर्थः न व्यभिचरत्ययथार्था न भवति यया हेतुभूतयेक्षया भागवतस्तव सम्बन्धी त्वदाराधनरूपो धर्मोऽभिहितः प्रोक्तः पञ्चरात्रादिमुखेनेति शेषः भागवतधर्माभिधाने उक्तविधे ईक्षैव हेतुरन्यथा त्वद्धर्मानभिज्ञतया केवलविषयासक्ते सति सर्वस्मिन् लोके समुद्धर्त्रभावादीक्षा निर्विषया स्यादिति भावः एवञ्चेक्षायाः सत्यत्वात्तद्विषयत्वापादकभागवतधर्मोऽप्यनिष्टपरिहारेष्टप्राप्तिहेतुत्वं न व्यभिचरतीतितात्पर्यं यत एवमत एव आर्याः त्वदीक्षाभिज्ञास्तद्विषयापादिकया चराचरात्मकभूतसमूहेष्वपृथग्धिया त्वदात्मकबुद्ध्याऽमृतत्वाय मुक्तये उपासते धर्ममितिविभक्तिपरिणामेनानुषङ्गः अनुतिष्ठन्तीत्यर्थः त्वामिति वा शेषः ॥ ४३ ॥

एवं समाश्रयणोपयुक्तसमाश्रितकार्योपादकगुणपूर्तिकथनमुखेन तदाराधनरूपधर्मस्यैव निरतिशयश्रेयःसाधनमुक्तम् इदानीं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

स्वस्य कृतार्थतामाविष्कर्तुं तद्दर्शनस्य कृतार्थतापादकत्वं कैमुत्यन्यायेनाह—नहीति। हे भगवन्, नृणां भवद्दर्शनादखिलपापक्षयो भवतीति इदमघटितं न हि किन्तु युक्तमेव, कुतः? यद्यस्मान्नाम्नस्त्वनाम्नः सकृदेव श्रवणादेव पुल्कसोपि हीनजातिरपि संसारबन्धाद्विमुच्यते नामश्रवणस्यैवेदृशमहात्म्यं किं पुनः साक्षात्त्वद्दर्शनस्येति भावः॥ ४४॥

अथाचार्यकृतं महोपकारं स्मरन्स्वस्य कृतार्थतामाह—अथेति। हे भगवन्, अधुना तवावलोकनेन परिमृष्टा निरस्ता आशये चित्ते मलाः येषां तादृशा वयं कृतार्थाजाता इति भावः यस्मात्तावकेन "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः" इति त्वदुक्तरीत्या तव निरतिशयप्रियेण सुरर्षिणा श्रीनारदेनोदितं त्वद्दर्शनेन मम कृतार्थत्वे निमित्तं मन्त्ररूपं वचो गदितं तत एवमधुना जातं अन्यथा महोपकर्तृसदाचार्यानुग्रहेण कथं भवति एवंविधः परमोऽभ्युदयस्तदनर्हस्य मम कथं भवेदित्यर्थः॥ ४५॥

कथं भवेदित्यनेनेदृशाभ्युदयानर्हत्वं स्वस्य सूचितं तच्च भवता सर्वज्ञेन सर्वं विदितमेव किं मया विज्ञाप्यमधुना विशिष्यत इत्याह—विदितमिति। हे अनन्त! इह लोके जनैर्यद्यदाचरितं तत्समस्तं जगदात्मनः कृत्स्नजगदन्तर्यामितया सर्वेषां बुद्धिवृत्तीर्युगपत्साक्षात्कुर्वतस्तव विदितमेव ततो मादृशैर्विज्ञाप्यं परमगुरोस्तव कियत्, यथा सवितुः खद्योतैः, यद्वा अनन्तकल्याणगुणाकरस्य तव गुणैकदेशमपि स्तोतुमहमसमर्थः इति त्वया विदितमेवेत्याह—विदितमिति। हे अनन्त त्रिविधपरिच्छेदरहित! इह लोके जनैर्जननमरणभाग्भिस्त्वदाहितज्ञानशक्तिभिर्मादृशैर्यद्यदाचरितमन्तर्बहिरिन्द्रियैर्व्यापृतं तत्सर्वं जगदन्तरात्मनः सर्वज्ञस्य तव विदितमेव परिच्छिन्नमतेर्मम वाङ्मनसानन्तस्वरूपस्य सर्वज्ञस्य तव गुणवर्णने यावद्गच्छति तत्त्वया विदितमेवेत्यर्थः अतः परमगुरोर्ज्ञानप्रदानां नारदादीनामपि ज्ञानदस्य तवेह मया विज्ञाप्यं विज्ञापनीयं कियत् मया कर्तव्यं गुणस्तवनं तव कियदल्पमित्यर्थः यथा सवितुर्लोकत्रयप्रकाशकस्य खद्योतैः कीटविशेषैः कृतं द्योतनं कियदल्पं तद्वदित्यर्थः॥ ४६॥

एवं स्वस्य तत्स्तुतावनधिकारमाविष्कृत्य कांश्चित्तद्गुणाननुस्मरन् केवलं नमस्करोति—नम इति द्वाभ्यां। भगवते षाड्गुण्यपरिपूर्णाय निरस्तनिखिलदोषाय सकलस्य जगतः स्थितिलययोः इदमुत्पत्तेरप्युपलक्षणम् उत्पत्तिस्थितिलयानामीशाय कर्त्रे कुयोगिनां कर्तारिपन्थी कुयोगिभिर्भिदा अब्रह्मात्मकस्वतन्त्रवस्तुबुद्ध्या दुरवसिता ज्ञातुमशक्या आत्मनो गतिः स्वरूपं स्वभावश्च यस्य ज्ञातुमशक्यस्वरूपस्वभावायेत्यर्थः परमहंसायात्यन्तपरिशुद्धाय तुभ्यं नमः॥ ४७॥

अनन्तगुणमाहात्म्यं कथयन्नमस्करोति—यमिति। श्वसन्तं "वहु स्याम्" इति सङ्कल्पतो व्याक्रियमाणं यं त्वामनु विश्वसृजः ब्रह्मादयः श्वसन्ति प्राणन्ति त्वदायत्तस्वसत्तालाभेन व्याक्रियन्त इत्यर्थः चेकितानं सर्वं पश्यन्तं यं चित्तयः चित्तवृत्तयः अनूच्छकन्ति प्रसरन्ति ज्ञानमपि त्वदधीनमित्यर्थः यस्य तव मूर्ध्नि कृत्स्नं भूमण्डलं सर्षपायति सर्षपवदाचरति यं कृत्स्नभूमण्डलभारमपि सर्षपवन्मन्यत इत्यर्थः तस्मै सहस्रशिरसे भगवते तुभ्यं नमोऽस्तु मे नमनं भवानङ्गीकरोत्वित्यर्थः॥ ४८॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

तद्धर्मज्ञानेन किं फलमिति तत्राह—विषमेति। यस्मिन् धर्मे ज्ञाते नृणां त्वमहमित्यादिलक्षणा विषममतिः शास्त्रनिषिद्धबुद्धिर्नस्यात्, चकारादीश्वराधीनं सर्वं तत्प्रेरितोऽहं कार्येषु प्रवृत्तोऽस्मीति बुद्धिरित्यर्थः येन धर्मेण यस्मिन् त्वयि ज्ञातेवा इतरेष्वत्र विषमाधिया यथास्थितवस्तुविपरीतज्ञानेन रचितः अतः अहंममतादिप्रचुर इत्यर्थः॥ ४१॥

तज्ज्ञानफलं तम एवेत्याह - क इति। ननु, तर्हि यागादिकर्मलक्षणधर्मेण पुरुषार्थः स्यादिति तत्राह - निजेति, स्वस्य शरीरक्लेशस्य हेतुना परस्य संज्ञपनलक्षणहिंसाहेतुना, कुतो नास्तीति तत्राह—स्वद्रोहादिति, स्वविहितशरीरक्लेशं विनाऽऽत्महत्यादिद्रोहात्तवाज्ञालङ्घनलक्षणात्॥ ४२॥

ननु, शिवादिविहितवत् त्वद्विहितस्यान्यथात्वेन त्वद्विहितलक्षणाज्ञाऽतिलङ्घनदोषनिमित्तकोपाभावोपपत्तेरतस्त्वत्प्रेक्षापि व्यभिचारिण्येवेति तत्राह, नेति। तत्र को हेतुरिति पूर्वोक्तं स्मारयति—यमिति, पूर्वस्माद्विशिनष्टि पृथगिति, कुत्रेत्यत उक्तं स्थिरेति, स्थावरजङ्गमप्राणिसमूहेषु यथास्थितदर्शिनः तदुक्तमित्याह, आर्या इति, तुना तारतम्यमन्ययोगव्यवच्छेदं चाह॥ ४३॥

प्रारब्धवशादार्या अपि उपास्तिं कुर्वन्ति न फलोपलब्ध्या, तस्मादिदमघटीयमान (१) मवयन्तीति तत्राह—नहीति॥ ४४॥

नेह संसारतरणे सकृन्नामश्रवणमेवालं किंपुनर्भवद्दर्शनमिति यस्मादथ तस्मात्त्वद्दर्शनेनाधुना वयं परिमृष्टाशयमला अभूमेति शेषः नारदवाक्यञ्च भगवद्दीक्षाया अव्यभिचरितत्वे लिङ्गमित्याह, सुरर्षिणेति॥ ४५॥

हे अनन्त, तावकेन नारदेन समस्तं विदितं ज्ञातं, भगवद्ज्ञानं अव्यभिचारीति यदुदितं च, तत्कथमन्यथा भवति? निगमयति, तवेति, जगदात्मनो जगदन्तर्यामिणः परमगुरोस्तव जनैश्चेष्टितं कियद्विज्ञाप्यं न किमपीति भावः विज्ञापनं हास्यहेतुरित्यत्र दृष्टान्तमाह, इहेति. इह ज्योतिःषु प्रकृष्टप्रकाशस्य सवितुः खे वितस्तिप्रदेशे एव द्योतः प्रकाशो येषां ते तथा तैः॥ ४६॥

अस्माभिरिदमेव विज्ञाप्यमित्याह—नम इति॥ ४७॥

इदमपि त्वदनुग्रहं विना न शक्यमित्याह—यं वा इति। "श्वस प्राणे" इतिधातोः "प्राणन्तमनुप्रयान्ति" इतिश्रुतिः वै शब्देन सूचिता चेकितानं जानन्तमनुचित्तयः तत्तद्वस्त्वनुगतज्ञानवन्तः उत्क्रान्ति

---

(१) स्तुवन्ति न तु परमार्थः।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सम्यक् जानन्ति सर्वेपवद्वर्तते श्रीहरिविवद्यार्थं "सहस्रशीर्षा-पुरुषः" इत्युपपत्तेः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

निजसंसारहेतुत्वात् स्वद्रुहा पुमान् भवाब्धिं न तरेत् स आत्महेतिवत्-पश्चाद्युपालस्मात् परद्रुहाचेत्यर्थः कोपः औदास्यमयः क्षोभः अधर्मोऽशुद्धो धर्मः ॥ ४२—४६ ॥

नम इति भिदा नानोपास्यभेददृष्ट्या कुयोगिनां दुरवसितेति. यद्वा भिदा भेदमयया भक्त्या परमहंसायेति परेणान्वयः तया शुद्धस्वरूपत्वेन हृत्कमलविहारिणा इत्यर्थः ॥ ४७ ॥

उच्चकन्ति स्वरूपं पश्यन्ति यस्य एव ज्ञानशक्त्यंशेनैव स्वस्वज्ञानं लभन्त इत्यर्थः 'कनीदीप्तिकान्तिगतिषु' इत्यस्य यङ्लुगन्तस्य रूपमिदम् ॥ ४८—५० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यत्र भागवते धर्मेत्वमहमिति मम तवेत्यहन्तास्पदममतास्पदयोर्विषममतिरुत्तरश्लोकार्थदृष्ट्या द्वेषनिबन्धनवैषम्यवती ममतवत्वमहं शत्रुरिति मतिर्नास्ति यत् या अन्यत्र काम्यधर्मे इत्यर्थः काम्यधर्ममेव निन्दति, विषमधिया शत्रुमरणादिकामनया रचितो यः स ह्यविशुद्धः रागद्वेषादिमयत्वात् क्षयिष्णुश्च नश्वरफलत्वात् । अधर्मबहुलश्च हिंसादिबाहुल्यात् । तदुक्तं शबरस्वामिना 'उभयमिह चोदनायां लक्ष्यते अर्थोऽनर्थश्च' इत्यादिना ॥ ४१ ॥

उक्तमर्थं स्पष्टयति—कः क्षेमः किं कुशलं निजपरयोर्निजस्याहन्तास्पदस्यात्मनः परस्य ममतास्पदस्य पुत्रकलत्रादेर्न किञ्चिदित्यर्थः स्वस्मै परस्मै च द्रुह्यतीति स्वपरध्रुक् तेन यतः स्वद्रोहात् परहिंसार्थकात्यन्तस्वकायक्लेशकरतपोव्रतादेः अधर्मः पापं त्वत्कोपश्च ॥ ४२ ॥

ननु, क्षयिष्णुत्वादिबाहुल्येपि काम्यधर्मे फलदर्शनात् प्रवर्तन्ते निर्दोषेपि निष्कामधर्मे फलादर्शनात् प्रवृत्तौ संशेरते जनास्तत्राह—नेति । तवेक्षा मद्भक्त्या जीवः कृतार्थी भवत्विति परामर्शो न व्यभिचरतीति काम्यधर्मे कदाचित् फलस्यापि व्यभिचारः स्यान्न तु त्वदीक्षायाः अत एव आर्या इत्यनार्यास्तु संशेरतां नामेति भावः अपृथग्धियः स्वस्य परस्य च सुखदुःखेषु पृथग्बुद्धिरहिता आर्या इति, आर्यास्त्वं कृत्स्नमेदमिति दर्शितम् ॥ ४३ ॥

निष्कामधर्मस्य मयैव साक्षात् फलं लब्धमित्याह—नहीति । नृणामिति ममैवेति भावः पापक्षयस्य का वार्त्ता मोक्षोपि भवतीत्याह—यन्नाम्न एकस्यैव किमुत बहूनां सकृदेव किं पुनरसकृत्, श्रवणादेव किमुत कीर्त्तनादेः पुल्कसकोपि किमुतान्यः । संसारादेव किमुत पापादिति साधनारम्भ एव दर्शनमिति भावः ॥ ४४ ॥

अतोऽहं कृतार्थोस्मीत्याह—अथेति ॥ ४५ ॥

विषयान्धोप्यहं स्वभक्तं प्रेक्ष्य संसारकूपादुद्धृत्य स्वचरणान्तिकमानीत इत्यादि किं विज्ञापयामीत्याह—विदितमिति । सवितुः सवितरीव त्वयि खद्योतैरिवास्माभिः किं प्रकाशनीयम् ॥ ४६ ॥

भिदा भेददृष्ट्या हेतुना ये कुयोगिनस्तेषां परमहंसाय कृपया परमहंसस्वरूपेणोद्धारकायेत्यर्थः ॥ ४७ ॥

श्वसन्तं चेष्टमानं विश्वसृजः कर्मेन्द्रियाणि श्वसन्ति चेष्टन्ते यं चेकितानं पश्यन्तं चित्तयः ज्ञानेन्द्रियाणि उच्चकन्ति स्वस्वविषयं पश्यन्ति ॥ ४८ ॥ ४९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यत्र भागवते धर्मे त्वमहमिति मम तवेति च विषममतिर्न भवति यत् या अन्यस्मिन् काम्यकर्मरूपे धर्मे भवति इत्यर्थः अन्यं धर्ममेवाह—विषमधिया विषमा धीर्यस्य तेन मन्दबुद्धिना अविशुद्धयः जैह्योपस्थादिसुखफलकः क्षयिष्णुः अल्पकालस्थापिफलदः अधर्मबहुलः प्राणिपीडासंपाद्यः रचितोऽनुष्ठितः आद्रित इत्यर्थः ॥ ४१ ॥

स्वस्मै संसारप्रापकत्वेन परस्मै पीडाकरत्वेन द्रुह्यतीति स्वपरध्रुट् तेन तपोव्रतयज्ञादिरूपेण काम्यकर्मणेत्यर्थः । निजस्य स्वस्य कर्तुः परस्य तेन कर्मणाराध्यस्य यद्वा परस्य कर्मोपयुक्तप्राणिनः प्रारम्भे कः क्षेमो मङ्गलम् समाप्तौ कियानर्थः । फलम् न कोपीत्यर्थः स्वस्य यो द्रोहस्तादृशेन कर्मणा संसारे पातनं तस्मात्तव कोपः तथा परसंपीडया कर्मनिष्पत्त्यर्थप्राणिपीडया अधर्मश्च भवतीत्यर्थः ॥ ४२ ॥

सत्यसंकल्पेन त्वया प्रकाशितं धर्मं तत्त्वज्ञा उपासते इत्याह—नहीति । ईक्षा संकल्परूपा दृष्टिः । नहि व्यभिचरति अयुक्तमर्थं नहि स्पृशति यथा भागवतो धर्मः अभिहितः वर्णितः यं धर्मं स्थिरचरसत्त्वकदंबेषु स्थावरजंगमप्राणिसमूहेषु अपृथग्धियः उपासते अनुतिष्ठन्ति ॥ ४३ ॥

भगवद्दर्शनेन त्वदवलोकनेन चात्मनः कृतकृत्यतां द्योतयति नेति द्वाभ्याम् । त्वद्दर्शनात्त्वत्साक्षात्कारात् ॥ ४४ ॥

त्वदवलोकेन त्वत्कृतेन कृपावलोकेन परिमृष्टा परिमार्जिताः आशयमला येषां ते तथा जाता वयम् "एतां मन्त्रोपनिषदं प्रतीच्छ प्रयतो मम । यां धारयन् सप्तरात्राद्द्रष्टा संकर्षणं प्रभुमि"ति यत्सुरर्षिणोदितं तत्कथमन्यथाभवति ॥ ४५ ॥

हे अनन्त ! जगदात्मनो विश्वात्मनस्तव जनैरिह संसारे आचरितं समस्तं विदितम् अतः खद्योतैः सवितुरिव अस्माभिः हे जगद्गुरो ! तव किमपि विज्ञाप्यं प्रकाशनीयं न किमपीत्यर्थः ॥ ४६ ॥

अथ विश्वहेतुत्वादिभगवदसाधारणान् गुणाननुस्मरन् भगवन्तं प्रणमति—नम इति द्वाभ्याम् । सकलस्य जगतः कार्यजातस्य स्थित्यादीनामभिधाय कर्त्रे कुत्सिते "सर्वं खल्विदं ब्रह्म" "एतदात्म्यमिदं सर्वम्" इत्यादिश्रुतिविरुद्धे स्वोत्प्रेक्षिते प्रधानपरमाण्वादि-

श्रीशुक उवाच ।

संस्तुतो भगवानेवमनन्तस्तमभाषत ।
विद्याधरपतिं प्रीतश्चित्रकेतुं कुरूद्वह ! ॥ ४९ ॥

श्रीभगवानुवाच ।

यन्नारदाङ्गिरोभ्यां ते व्याहृतं मेऽनुशासनम् ।
संसिद्धोऽसि तया राजन् ! विद्यया दर्शनाच्च मे ॥ ५० ॥
अहं वै सर्वभूतानि भूतात्मा भूतभावनः ।
शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू ॥ ५१ ॥
लोके विततमात्मानं लोकं चात्मनि सन्ततम् ।
उभयं च मया व्याप्तं मयि चैवोभयं कृतम् ॥ ५२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

जगत्कारणवादे योगोऽभिनिवेशोऽस्ति येषां तेषां सांख्यतार्किकादीनां सिद्धा केवलेन जगदीश्वरभेदेन दुरवसिता दुर्गमा आत्मगतिः स्वरूपज्ञानमार्गौ यस्य तस्मै परमहंसाय अत्यन्तशुद्धाय ॥ ४७ ॥

यं त्वां श्वसन्तं चेष्टन्तं विश्वसृजः ब्रह्मादयः श्वसन्ति चेष्टां कुर्वंति "सृजामि तन्नियुक्तोयं हरो हरति तद्वशः" इति ब्रह्मोक्तेः यं चेकितानं पश्यन्तम् भान्तम् चितयः चितिज्ञानं तदुपलक्षिताः सर्वाः चेतनाचेतनात्मिकाः प्रजाः अनु उच्चकन्ति अनुपश्यन्ति अनुभान्ति "तमेवभान्तमनुभाति सर्वम्" इति श्रुतेः ॥ ४८ ॥ ४९ ॥

भाषा टीका ।

जिस भागवत धर्म में हम तुम हमारा तुमारा ऐसी विषम मति नहीं है अन्य धर्म में है। क्योंकि वह विषम बुद्धि से रचागया है अत एव वह अविशुद्ध क्षयिष्णु (नाश वान) और अधर्म बहुत है ॥ ४१ ॥

अपने पराये द्रोह करने वाले धर्म से, अपना पराया क्या क्षेम, और कितना प्रयोजन है स्वद्रोह अर्थात् अधिक काय क्लेश से आप अन्तर्यामी को कोप दूसरे को पीडा देने से अधर्म ॥ ४२ ॥

जिस दृष्टि से भागवत धर्म कथन किया वह आपकी दृष्टि कभी अन्यथा नहीं होती ॥ स्थावर जंगम प्राणियों के समूह में अपृथक् धर्म वाले जो आर्य लोग है वोही उस धर्म की उपासना करते हैं ॥ ४३ ॥

हे भगवन् ! आपके दर्शन से जीवों का पाप नाश होना यह असंभव नहीं है क्योंकि जिन तुम्हारा एकवार श्रवण से चंडाल भी संसार से मुक्त होता है ॥ ४४ ॥

हे भगवन् ! आपके दर्शन से हमारा अन्तःकरण निर्मल हुआ क्योंकि नारद का कहा हुआ झूठ कैसे होय ॥ ४५ ॥

हे अनन्त ! जगत् के अन्तर्यामी आपको लोकों का सब चरित्र ज्ञात ही है अतः परमगुरु आपको क्या जनाना है जैसे कि खद्योत सूर्य को क्या प्रकाश करसका है ॥ ४६ ॥

जगत् की उत्पत्ति स्थिति नाश के करने वाले आपको नमः होय क्योंकि आप परम हंस है और पाषंडी भेद दृष्टि से आपके तत्व को नहीं जानते हैं ॥ ४७ ॥

जिसकी सत्ता से ब्रह्मादि देवता श्वास लेते है कर्मेन्द्रिय ज्ञानेन्द्रिय अपने २ विषय को ग्रहण करते हैं और जिसके शिरपर पृथिवी मंडल सर्षप वत् प्रतीत होता है उस भगवान शेष जी के प्रणाम होय ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मेऽनुशासनं मद्विषय उपदेशः तेन तया च विद्यया ऽस्माच्च दर्शनात्संसिद्धोऽसि ॥ ५० ॥

तद्बोधदार्ढ्याय स्वयमप्युपदिशति—अहमित्यादिना । सर्वभूतान्यहमेव, भूतानामात्मा भोकाप्यहमेव भोक्तृभोग्यात्मकं विश्वं मद्व्यतिरिक्तं नास्तीत्यर्थः यतोऽहं भूतभावनः भूतानां प्रकाशकः कारणं च, ननु, शब्दब्रह्मप्रकाशकं परं ब्रह्म कारणं च प्रकाशकं च सत्यम् ते उभे ममैव रूपे इत्याह शब्दब्रह्मेति शाश्वती शाश्वत्यौ ॥ ५१ ॥

अतस्त्वमेवं पश्येत्याह—लोके भोग्यप्रपंचे भोक्तृत्वेन विततमनुगतमात्मानं लोकं चात्मनि भोग्यत्वेन सन्ततं व्याप्तं तदुभयं च मया कारणात्मना व्याप्तम् मयि चैवोभयं कृतं प्रकल्पितं स्मरेदिति तृतीयेनान्वयः पश्येदित्यध्याहारो वा ॥ ५२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

चित्रकेतुनेत्थं स्तुतो भगवाननन्तस्तमभाषतेत्याह—मुनिः, संस्तुत इति । इत्थमनन्तगुणमहात्म्येन स्तुतो भगवाननन्तः प्रीतः सन् हे कुरूद्वह, तं विद्याधराणां पतिं चित्रकेतुमभाषत ॥ ४९ ॥

तदेवाह—यदित्यादिना सिद्धोसीत्यन्तेन । नारदाङ्गिरोभ्यां ते तुभ्यं यद्व्याहृतमुक्तं तदनुशासनं प्रकृतिपुरुषेश्वरस्वरूपविषयकं विविच्य ज्ञापनरूपं वचः मे ममैव मत्सम्बन्ध्येवान्तरात्मभूतमत्सङ्कल्पादेव ताभ्यां ते व्याहृतम्—

> "ईश्वरस्य च सौहार्दं यदृच्छा सुकृतं तथा ।
> विष्णोः कटाक्षमद्वेष आनुकूल्यं च सात्त्विकैः ॥
> सम्भाषणं षडेतानि ह्याचार्यप्राप्तिहेतवः"

इत्युक्तरीत्या मदनुग्रहमन्तरेण सदाचार्यप्राप्तेर्दुर्लभत्वादिति भावः अतो हे राजन्, तया नारदोपदिष्टया मन्त्रविद्यया मम दर्शनाच्च संसिद्धोसि ॥ ॥ ५० ॥

ननु, मह्यमुपदिशतमिति न तौ प्रतिस्वमुक्तवानतः कथं तद्व्याहृतं त्वदनुशासनमेवेति जानीयां किञ्च तयोरेव वचोऽहमश्रौषं न तु तवेत्यत्राह—अहं हीति । तावत्सर्वाणि भूतान्यहमेव सर्वाण्यपि भूतानि मदभिन्नान्येव, किमुत "आचार्यं मां विजानीयात् "ज्ञानी त्वात्मैव मे मतम्" इत्युक्तात्माभिन्नाभिमानविषयावङ्गिरोनारदौ मदभिन्नाविति भावः अतस्तद्व्याहृतं मदनुशासनमेवेति तात्पर्यं. ननु, सर्वभूतान्यहमेवेत्युक्तोऽभेदः किं मृदात्मको घट इति वत्स्वरूपाभेदरूपस्तथात्वे सर्वविकाराश्रयत्वापत्तिस्तत्राह—भूतात्मा सर्वभूतानामन्तरात्मा आत्मा देवो जात इत्यादिवच्छरीरात्मभावप्रयुक्तः सर्वभूतैः सह ममाभेदः विकाराणां शरीरगतानां जीवे बाल्यादीनामिव न मयि प्रसक्तिरिति तात्पर्यं । शरीरात्मभावनिबन्धनोऽभेदव्यपदेशो बहुशो दृष्टः ब्राह्मणोऽहं कृशोऽहं स्थूलोऽहमित्यादिः न चेदं रजतमिति तद्रूपाभिलापं व्यपदेशः नीलो घट इत्याद्यभेदव्यपदेशस्यापि बाधित्वापत्तेः अथ जातिगुणादीनां व्यक्तिगुण्यपृथक्सिद्धप्रकारतया तद्बुद्धितच्छब्दयोर्व्यक्तिगुणिपर्यन्तत्वान्न बाधस्तर्हि शरीरस्याप्यात्मा पृथक्सिद्धप्रकारत्वेन तद्बुद्धितच्छब्दयोरपि तात्पर्यन्तत्वादबाधित एव, ननु, जात्यादेर्व्यक्त्यादीन् प्रति अपृथक्सिद्धप्रकारत्वं प्रत्यक्षगम्यं जातिव्यक्त्योरुभयोरपि प्रत्यक्षविषयत्वात् आत्मनस्तु तदविषयत्वात्कथं शरीरस्यात्मा पृथक्सिद्धविशेषणं त्वमिति चेत् मास्तु जातिव्यक्त्योरिव शरीरात्मनोरेकप्रमाणविषयत्वम् अथाप्यात्मा पृथक्सिद्धप्रकारत्वं शरीरस्यात्मतमेव न हि भिन्नसामग्रीवेद्यत्वमात्रेण तद्व्याहन्तुं शक्यम् अन्यथा चक्षुर्घ्राणेन्द्रियविषययोः पृथवीगन्धयोरपि नियतप्रकारप्रकारिभावानुपपत्तेरित्यन्यत्र विस्तरः न केवलं शरीरात्मभावनिबन्धन एव भूतैर्ममाभेदः, अपि तु कार्यकारणभावनिबन्धन इत्याह—भूतभाव इति, भूतानि चिदचिदात्मकानि देवमनुष्यादीनि भावयत्युत्पादयति स्वस्मादेवोपादानभूतादिति भूतभावनः कार्यकारणयोरभेदस्त्वारम्भणाधिकरणादिभाष्ये बहूपपत्तिभिर्निरूपितः यदा शङ्कितं तयोरेवाऽश्रावं श्रणवं ननु तवेति तत्राह—शब्देति । शब्दात्मकं यद्ब्रह्म परं शब्देन वाच्यमर्थात्मकत्वं च यद्ब्रह्म इमे ब्रह्मणी मम शाश्वती तनू यावत्तत्त्वमपृथक्सिद्धे मम शरीरभूते इत्यर्थः स्वस्मिन्मुख्यवृत्तो ब्रह्मशब्दः शब्दार्थात्मकयोः प्रपञ्चदलयोः स्वशरीरत्वादुपचरितः परब्रह्मणः स्वतनुत्वकथनं दृष्टान्तार्थं यथा परब्रह्मान्तर्गतनारदाङ्गिरसोर्मच्छरीरत्वम् एवं शब्दब्रह्मान्तर्गततद्वचसोऽपि मत्तनुत्वमित्यर्थः यद्यपि स्वस्य सर्वभूतात्मकत्वकथनेनैव सर्वभूतवचसां स्ववचस्त्वमपि कथितप्रायं तथापि नामरूपयोरुभयोरपि स्वशरीरकत्वज्ञापनाय पृथगुक्तमित्यवगन्तव्यम् ॥ ५१ ॥

ननु, सर्वेषां भूतशब्दवाच्यानां देवादिशरीराणामात्मा जीवः स एव किं भवानित्याह—लोक इति । लोके परिदृश्यमानाचित्प्रपञ्चे देवादिशरीररूपे विततं व्याप्तं अन्तःप्रविश्य धारकतया व्याप्तं प्रत्यगात्मानं द्वितीयान्तानां पश्येत्यध्याहृतेनान्वयः तथा आत्मनि प्रत्यगात्मनि सन्ततं प्रोतं धार्यत्वेनावस्थितं लोकं चेत्ये तदुभयं मया परमात्मनाऽन्तःप्रविश्य भर्त्रा व्याप्तस्य उक्तमुभयं मयि कृतं च मदाधेयं कृतमित्यर्थः लोके विततमात्मानमित्यनेन चेतने जीवस्य व्याप्तिरुक्ता. लोकं आत्मनीत्यनेनाचेतनस्य जीवधार्यत्वमुक्तम्. उभयमित्यनेन चेतनाचेतनयोरीश्वरधार्यत्वं व्याप्यत्वमीश्वरस्य स्वस्य धारकत्वं व्यापकत्वञ्चोक्तम् अतो नाहं जीवः भूतात्मेत्यत्र भूतशब्दोऽचेतनविशिष्टचेतनपरः इति भावः आत्मानमित्येकवचनं जात्यभिप्रायकं यद्वा एकामेव जीवव्यक्तिमुपादाय क्रमप्राप्तेषु देवादिशरीरेषु व्याप्तिरुच्यते, अतोऽत्र जीवैक्यवादभ्रमो न कर्तव्यः ॥ ५२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनन्तनामप्रवृत्तिनिमित्तक्रियावत्त्वादनन्तः श्रीहरिः । हरिगुणान्तकथनदर्शनासमर्थत्वादनन्त इत्यर्थः ॥ ४९ ॥

नारदाङ्गिरोभ्यां यन्मम शासनं तव व्याहृतं तत्करणेन या च मम विद्याऽभ्यस्ता तया यच्च मम दर्शनं तस्माच्च संसिद्धोऽसि प्राप्तापेक्षिताशेषपुरुषार्थोऽसीत्यर्थः ॥ ५० ॥

अधुनाऽहं पूर्वोक्तस्थिरीकरणाय किञ्चिद्विशेषज्ञानाय वा किञ्चिदुपदिशामीत्याह—अहमिति । सर्वभूतान्यहमित्यन्वयः वा इत्यनेन "सर्वं खल्विदं ब्रह्म" इति श्रुतिं सूचयति अभेदोपदेशस्य कोऽभिप्राय इति तत्राह—भूतात्मेति । भूतानामन्तःस्थित्वा दानादिकर्तृत्वात्तद्व्यपदेशः "हरिस्तु सर्वभूतानि तदन्तर्यामित्वापेक्षया" इति स्मृतेः सत्ताप्रदत्वाच्च तद्व्यपदेश इतिभावेनाह—भूतभावन इति, भूतानि भावयति सत्तागतानि करोतीति अनेन "अहमस्मि" इत्यादिश्रुतिगतानि पदान्यन्तर्यामिणि मुख्यवृत्त्या प्रवर्तन्त इत्युक्तं तथा चोक्तं "तिङ्पदानि च सर्वाणि सुप्पदानि तथैव च । तस्मिन्नेव प्रवर्तन्ते मुख्यवृत्त्या विशेषतः" इति इदञ्च त्वयावश्यं ज्ञातव्यमित्याह—शब्देति । वेदादिशब्दराशिलक्षणं शब्दब्रह्म सच्चिदानन्दलक्षणं परं ब्रह्मेत्युभे "द्वे अपि ब्रह्मणी मम शाश्वती तनू प्रतिमास्वरूपभेदेन यावद्ब्रह्म विष्ठितं तावती वाक्" इति श्रुतेः "एष नित्योऽव्ययः सूक्ष्मः" इति पूर्वोक्तम् ॥ ५१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आत्मानं जीवं लोके भुवने अविततमव्याप्तं जानीहि लोकं चात्मनि जीवे वासनारूपेण मनसि सन्ततं निव्यूढं विद्धि विपुलस्य लोकस्यात्मप्रदेशमन्तरेण बाहुल्यायोगात् लोक आत्मेत्युभयं मया ब्रह्मरूपेण व्याप्तं, तर्हि, जीवलोकयोराधारः कः ? इति तत्राह-मयीति । उभयञ्च मयि समाश्रितमेव; कुतः ? 'अहमेवोभयाधारः' इति समाधत्स्व ॥ ५२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अहमिति अत्र शब्दब्रह्मणः साहचर्यात् परब्रह्मणोप्यंशत्वमायाति ॥ ५१ ॥

तथैवानुभावयति लोक इति । आत्मानं परंब्रह्म स्वरूपं-विततमाश्रयत्वेन वर्त्तमानम् आत्मनि तस्मिन् सन्ततमाश्रितं पश्य मया भगवद्रूपेण परब्रह्मणोपि मदीयनिर्विशेषाविर्भावरूपत्वात्. अत एवोभयञ्च मयिकृतं मज्ज्ञाननिमित्तमेव निरूपितमित्यर्थः ॥ ५२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

मेऽनुशासनं श्रवणकीर्त्तनादिभजनं तेन तथा विद्यया नारदोपदिष्टमहामन्त्रेण च तत्साध्यान्मम दर्शनाच्च ॥ ५० ॥

किञ्च भक्तितत्त्वं तथा ज्ञातमेव तत्राजितजितेत्यादिस्तुतिरेव प्रमाणं जिज्ञासानैरपेक्ष्यार्थं ज्ञानतत्त्वमहमेवोपदिशामि श्रुतिवत्त्वाह-अहं वै इति । अत्रेदं विवेचनीयं वस्तु तावत् द्विविधं, वास्तवमवास्तवञ्च. ब्रह्म परमात्मा भगवान् सपरिकर इत्येतत् त्रितयमेव वास्तवं वस्तु. मायिकप्रपञ्चजातमिदमवास्तवं वस्तु. अवस्तु च द्विविधं, कार्यमकार्यञ्च. कार्यंस्वप्नेन्द्रजालादिगतं । अकार्यं खपुष्पशशशृङ्गादि. एषां मध्ये विधं वास्तवमत्र वस्त्विति प्रथमोक्तेर्वास्तवं वस्तु न एवोपादेयत्वं वक्तुं प्रथममवास्तववस्त्वाह-सर्वभूतानि भोक्तृभोग्यात्मकानि जगन्ति अहमेव मदीयजीवशक्तिमयत्वादिति भावः अत्र जीवानामवास्तववस्तुत्वमविद्यावृतत्वादेवोक्तं । वास्तवं वस्त्वाह भूतानां समष्टिव्यष्टीनामात्मा अन्तर्यामीति द्वितीयः । तृतीयश्च पुरुषोऽहं तथाभूतानि तानि भावयत्युत्पादयतीति प्रथमः पुरुषश्चाहं तथाभूतानि दास्यसख्यादिभाववन्ति करोतीति भूतभावनः कृष्णो रामश्च सम्प्रति त्वयाहदृश्यश्चाहं किञ्च मन्निश्वासरूपं यत् शब्दब्रह्म वेदः तथामन्निर्विशेषाकारत्वेन ज्ञानिषु प्रतिपाद्यमानं यत् परं ब्रह्म ते उभे ममैवतनुरूपे, वेदस्य शब्दरूपत्वादाकाशगुणत्वेनानित्यत्वशङ्कायास्तथा परब्रह्मणश्चानिर्देश्यत्वेनावस्तुत्वशङ्काया वारणायाह शाश्वती शाश्वत्यौ नित्यसत्ये एव ॥ ५१ ॥

ननु त्वं मम चेत् सर्वं भवसि तर्हि किं सर्वभूताश्रयोपास्यत्वेन ध्येयानि भक्तानभुतान्तर्याम्यादिरूपाणीति तत्राह—लोके भोग्यप्रपञ्चे भोक्तृत्वेन विततमनुगतमात्मानं जीवं तथा लोकञ्चात्मनि भोग्यत्वेन सन्ततं सविस्तरमुपच्छितं तदुभयं मया कारणात्मना व्याप्तं मयि चाधिष्ठानकारणे उभयं कृतं कार्यरूपं स्मरेदिति तृतीयेनान्वयः तेन सर्वभूतानि सच्छक्तिकार्याण्यनित्यान्यस्वरूपभूतानि नोपास्यत्वेन ध्येयानीति भावः ॥ ५२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ते तुभ्यं मेऽनुशासनं मद्विषयकं शास्त्रं मंत्रोपनिषदित्यर्थः तया मंत्रोपनिषद्रूपया विद्यया मे दर्शनाच्च संसिद्धोसि मदीयतां प्राप्तोसि यः भगवदीयत्वं न प्राप्तः स रागाद्यभिभूतत्वादसिद्ध एवेत्यस्मिन्पुराण एवास्ति, 'तावद्रागादयस्तेन तावत्कारागृहं तथा तावन्मोहोंघ्रिनिगडो यावत्कृष्ण न ते जनाः' इति ॥ ५० ॥

एवं सिद्धपदवीं प्राप्तो भवद्विधो जीवः सर्वात्मानं सर्वकारणमसूयास्पर्द्धादिदोषराहित्येन ध्यायेदित्याह अहमितिचतुर्भिः । सर्वभूतानि चेतनाचेतनानि अहं यतः भूतानामात्मा "एष ते आत्मान्तर्यामि"इतिश्रुतेः ॥ "अन्तरात्मा नियंताहं नियम्यानियंत्रोः । स्वाभाविको भेदाभेदः, इन्द्रियगणप्राणयोः न वै वाचो न चक्षूंषि न मन इत्याचक्षते प्राण इत्येवाचक्षते" इति छांदोग्ये प्रसिद्धः । यतः भूतभावनः भूतानि भावयत्युत्पादयतीति स "तथा कार्यकारणयोः" स्वाभाविकोभेदाभेदः सर्वं खल्विदं ब्रह्म, तज्जलानितीत्यनेन वाक्येन दर्शितः आत्मनि प्रमाणम् आत्मनः स्वरूपं चाह, शब्दब्रह्म परं ब्रह्मचेत्युभे मम शाश्वती शाश्वत्यौ नित्ये तनू वेदप्रमाणकपरब्रह्माभिन्नोस्मीत्यर्थः एवं भूतेन मयोभयं ततमित्यवेहीत्यध्याहृतेन द्वयोरन्वयः ॥ ५१ ॥

लोके भोग्ये पदार्थे आत्मानं भोक्तृत्वेनान्वितम् आत्मनि भोक्तरि लोकं च भोग्यतया संततम् उभयं च मया नियंत्रा व्याप्तं यस्मिन्मयि सर्वशक्तौ तदुभयं कृतं गुणिनि गुणवत् निहितम् "भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्" इति सनातनीश्रुत्या प्रतिपादितमित्यर्थः ॥ ५२ ॥

भाषाटीका ।

श्री शुक उवाच ॥

हे राजन् ! अनन्त भगवान् ऐसे स्तुति से प्रसन्न होकर विद्याधरोंके स्वामि चित्रकेतु से बोले ॥ ४९ ॥

श्री भगवान् उवाच ॥

हे राजन् ! नारद और अङ्गिरा मुनिने जो मेरा स्तोत्र कहा उसविद्या से और मेरे दर्शन से तुम सिद्ध हुवे ॥५०॥

सब लोकों का पालन करनेवाला सर्व भूतस्वरूप सब का अन्तर्यामी मैं हूं वेद और परब्रह्म यह दोनों मेरे नित्यशरीर हैं॥५१॥

यथा सुषुप्तः पुरुषो विश्वं पश्यति चात्मनि ।
आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः ॥ ५३ ॥
एवं जागरणादीनि जीवस्थानानि चात्मनः ।
मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ॥ ५४ ॥
येन प्रसुप्तः पुरुषः स्वापं वेदात्मनस्तदा ।
सुखं च निर्गुणं ब्रह्म तमात्मानमवेहि माम् ॥ ५५ ॥
उभयं स्मरतः पुंसः प्रस्वापप्रतिबोधयोः ।
अन्वेति व्यतिरिच्येत तज्ज्ञानं ब्रह्म तत्परम् ॥ ५६ ॥

भाषा टीका ।

संसार में भोक्तृत्व रूप से आत्मा व्याप्त है भोग्यस्वरूप से आत्मा में जगत् व्याप्त है आत्मा और जगत् यह दोनो मुझ से व्याप्त हैं और मुझ में स्थित है ॥ ५२ ॥

श्रीधरस्वामिकृत भावार्थदीपिका ।

ननु, जाग्रदाद्यवस्थाभेदेन भोक्तृभोग्यात्मकं विश्वं स्फुटं प्रतीयमानं कथं कल्पितं स्यादित्याशङ्क्य स्वप्नगतजाग्रदादिदृष्टांतेन संभावयन्नाह—यथेति द्वाभ्यां । यथा स्वप्ने सुप्तो विश्वं गिरिनद्यादिरूपं देशान्तरस्थमात्मन्येव पश्यति स्वप्नमध्ये सुषुप्तिं स्वप्नं च पश्यतीत्यर्थः तथा स्वप्न एवोत्थितः सन्नात्मानमेकदेशस्थं शयनदेशे स्थितं मन्यते जाग्रदवस्थामनुभवति ॥ ५३ ॥

एवं प्रसिद्धान्यपि जागरादीनि जीवस्थानानि जीवोपाधेर्बुद्धेरवस्थाभूतान्यात्मनो मायामात्राणीत्येवं विज्ञाय तेषां द्रष्टारमत एव परं तदवस्थारहितमात्मानं स्मरेत् ॥ ५४ ॥

ननु, तेषां द्रष्टारमिति कथमुच्यते? स्वापे दृश्याभावेन द्रष्टृत्वाभावात्तत्राह—येनेति । प्रसुप्तः पुरुषो जीवो येन रूपेण तदा स्वापकाले आत्मनः स्वापं निर्गुणमतीन्द्रियं सुखं च वेद तमात्मानं ब्रह्म मामवेहि तदा स्वापसुखयोरसंवेदने सुखमहमस्वाप्समिति स्मृतेरसम्भवात् ॥ ५५ ॥

ननु, स्वापसाक्षिणा दृष्टं कथं जाग्रदवस्थः स्मरेत् ? नह्यन्येन दृष्टमन्यः स्मरति तत्राह उभयं प्रस्वापं प्रतिबोधं च स्मरतोऽनुसन्धातः तयोः प्रस्वापप्रतिबोधयोः प्रकाशकत्वेन यदन्वेति ताभ्यां व्यतिरिच्येत यत् एकैकापायेऽप्यनपायात् तज्ज्ञानं परं ब्रह्म तदेव न तु भिन्नमित्यर्थः अतो बाल्ये दृष्टस्य यौवने स्मृतिवदवस्थान्तरत्वेऽपि स्वापान्वयोः स्मरणं घटत इति भावः तदेवं भूतं ब्रह्मात्मानमवेहीत्यनुषङ्गः ॥ ५६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, कथमेतान्निमर्शनीयं सर्वाण्यचेतनानि प्रत्यगात्माभिव्याप्तानि उभयं तु त्वया व्याप्तमित्यपेक्षायां बुद्धिनैपुण्येनेति सदृष्टान्तमाह—यथेत्यादिचतुर्भिः । तावज्जीवस्वरूपविमर्शनाय दृष्टान्तं निरूपयति यथेति, यथा सुषुप्तः स्वप्नद्रष्टा पुरुषः सुषुप्त इति न सुषुप्त्यवस्थो जीव उच्यते स्वप्न उत्थितः इत्यनन्तरोक्तत्वात् सुषुप्तौ विश्वदर्शनानुपपत्तेश्च स्वप्ने स्वप्नावस्थायामेकस्मिन्नेव स्वप्नद्रष्टर्यात्मनि विश्वं पश्यति गजस्कन्धारोहणदेशान्तरगमनराज्याभिषेकशिरच्छेदाद्यर्हं शरीरजातं पश्यति प्रकृत्युपाधिकं पश्यतीत्यर्थः दृष्टान्ते मायामात्राणीति वक्ष्यमाणत्वात् उत्थितो जाग्रदवस्थां प्राप्तस्त्वात्मानमेकदेशस्थं क्वचित्पर्यङ्कादिशयनशरीरमात्रवर्तिनं मन्यते स्वप्नावस्था न स्वप्नद्रष्टृस्वरूपप्रयुक्तापि तु स्वप्नजाग्रदवस्थाद्वयान्वितप्रकृत्युपाधिकस्वप्नद्रष्टृकजीवकर्मानुगुणामीश्वरसृष्टगजादिपदार्थानुप्रवेशपूर्वकतत्तद्दर्शनरूपेति दृष्टान्ते विवक्षितोऽर्थः ॥ ५३ ॥

इममर्थं दार्ष्टान्तिके दर्शयति—एवमिति । एवं स्वप्नावस्थावज्जागरणादीनि च जीवस्थानानि एकस्य जीवस्य स्थानान्यवस्थानानि अवस्थाः इत्यर्थः स्वप्नावस्थावज्जागराद्यन्वयोऽपि नात्मस्वरूपप्रयुक्तः अपि तु प्रकृत्युपाधिकः स्वरूपप्रयुक्तत्वे तस्य सर्वावस्थानुगतत्वेन सम्प्रयुक्ताः पूर्वपूर्वावस्थाः उत्तरोत्तरावस्थासूपलभेत न च प्रकृत्यवस्थतद्दृष्टमेवउपपादयितुं शक्यः कर्मानुस्मृतिशास्त्रविध्यनुपपत्तेः । कर्मतावत्सुषुप्तेन पूर्वकृतं पुण्यपापरूपं तत्त्वज्ञानात्प्राक्तनैव भोक्तव्यं अनुस्मृतिरपि य एवाहं सुप्तः स एव प्रतिबुद्धोऽस्मीति शब्दः श्रुतिरपि सुप्तं प्रबुद्धं स एवेति दर्शयति "त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तथा भवन्ति" इति, विधयश्च मोक्षार्थाः सुप्तस्य पुनरनुत्थितौ अनर्थकाः स्युःअस्त्वेवं स्वप्नावस्थावज्जागरादयो न जीवस्वरूपप्रयुक्ताः अपि तु प्रकृत्युपाधिका इति, तथापि जीवस्वरूपविमर्शने किमायातं ? तत्राह—आत्मन इति । जागरादीन्यवस्थानान्यात्मनो मायामात्राणि परमात्मसम्बन्धिप्रकृत्युपाधिकानि न स्वरूपप्रयुक्तानीति ज्ञात्वा आत्मनो मायामात्राणीत्यनेन जीवस्य स्वप्नावस्था पर-

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

मात्मायत्तेति दर्शितं तद्द्रष्टारं तत्तदवस्थासाक्षिणं परं प्रकृतिविलक्षणं जीवात्मानं स्मरेत् अचेतनस्य तत्तदवस्थाद्रष्टृत्वानुपपत्तेः कर्मानुस्मृत्याद्यनुपपत्तेश्च एकैकं शरीरमेकैकेन जीवेन व्याप्यं तत्स्वरूपञ्च तत्तदवस्थाद्रष्टृत्वपूर्वपूर्वावस्थानुस्मर्तृत्वाहं प्रत्ययगोचरत्वादिभिर्द्धर्मैर्निपुणतरविवेकेनावगन्तव्यमिति भावः ॥ ५४ ॥

एवं परमात्मस्वरूपविमर्शनप्रकारमाह—येनेति । येन हेतुभूतेन परमात्मना प्रसुप्तः सुषुप्त्यवस्थां प्राप्तः पुरुषो जीवः जीवस्य प्रसुप्तौ परमात्मनो हेतुत्वाद्येनेति हेत्वर्थकतृतीयान्तेन निर्देशः तथा हि 'स्वप्नान्तं मे सोम्य विजानीहि' इत्युपक्रम्य 'यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वमपीतो भवति' इति छान्दोग्ये श्रुतं स्वप्नान्तं सुषुप्तिः सता ब्रह्मणा सम्पन्नो भवति जीवः सता साकं सम्पत्तिर्नामशरीरेन्द्रियाधिष्ठातृत्वादिव्यापारान्तरराहित्येन ब्रह्मणि स्थितिमात्रं सैव सुषुप्तिः स्वं स्वशरीरकं परमात्मानं प्रत्यपीतो भवति लीनो भवति उक्तविधा सम्पत्तिरेव च लयः कारण एव हि कार्यस्य लयः एवं सुषुप्त्याधारत्वात्तत्कारणत्वाच्च येनेति तद्धेतुत्वेन निर्दिष्टः एवं येन सुषुप्तः पुरुष आत्मनः स्वस्य स्वापं वेदानुभवतीत्यर्थः तथाच सुखं वेद सुखमहमस्वाप्समिति परामर्शानुगुणं सुखञ्च यत्सम्पत्तिकृतं वेद तं निर्गुणं हेयगुणरहितं ब्रह्मशब्दवाच्यं परमात्मानं मामवेहि जानीहीत्यर्थः सुषुप्त्याधारत्वतत्कारणत्वसौषुप्तिकसुखहेतुत्वादिभिर्द्धर्मैः परमात्मस्वरूपं विमर्शनीयमिति भावः निर्गुणमिति सुखविशेषणं वा निर्गुणं प्रबोधसमयेऽनुसन्धीयमानस्यात्मनो या वर्णाश्रमादित्रिविष्टता तादृशगुणरहितमाप्रबोधादहमित्येकाकारेण प्रतीयमानं सुखरूपमात्मानं तमोगुणाभिभवात्परामर्शानुगुणाभावाच्चाविविक्तस्फुटप्रभासं वेदेत्यर्थः सुप्तोत्थितस्य परामर्शानुगुणमेव हि सौषुप्तिकं सुखं वर्णनीयं तत्परामर्शश्चैवंविधः सुखमहमस्वाप्सं नाहं किञ्चिदवेदिषमिति तत्राहमस्वाप्समित्यनेनाहमर्थस्यात्मनोऽनुवृत्तिर्दर्शिता. सुखमित्यनेन तस्य सुखरूपता. नाहं किञ्चिदवेदिषमित्यनेन तस्य बाह्यब्राह्मणत्वाद्याकारवैधुर्यं च दर्शितम् एवंविधत्वात्सुखमिति विशेष्य परामर्शाभावाच्चास्फुटत्वं च ॥ ५५ ॥

एवं सुषुप्तौ परमात्मस्वरूपविमर्शनप्रकारकथनमुखेन जीवस्वरूपमुभयमित्यादिना विमृशन्नूध ब्रह्म तत्परमित्यनेन ब्रह्मात्मकत्वं विदधाति—उभयमिति । उभयं प्रस्वापं प्रतिबोधं चेत्युभयं स्मरतः पुंसो देहिनो यज्ज्ञानं प्रस्वापप्रतिबोधयोरन्वेति व्यतिरिच्येत तत्तदवस्थाश्रयेणानुवर्तने तदुपाधिविगमे तत्तदवस्थाभिर्व्यतिरिक्तश्चस्यात्तत्तदवस्थानाश्रयं स्यात् यद्वा उत्तरोत्तरावस्थासु पूर्वपूर्वावस्थाव्यतिरिक्तं स्याच्च तस्मात्परिशुद्धज्ञानस्वरूपाज्जीवात्परं विलक्षणं तदात्मभूतं ब्रह्मेत्यर्थः यद्वा उभयं इत्यादिदृष्टान्तार्थे यथा यज्जीवस्वरूपात्मकं ज्ञानं सर्वावस्थानुवर्ति तद्दृष्टं उत्तरोत्तरावस्थासु पूर्वपूर्वावस्थाव्यतिरिक्तञ्च तथा तस्मात्परं विलक्षणं सर्वावस्थासु जीवस्वरूपनियन्तृतयानुवृत्तं द्रष्टृ तत्तदवस्थासम्बन्धिसुखदुःखाद्यनन्वयितया व्यतिरिक्तञ्च ब्रह्मेत्यर्थः यथा सर्वावस्थानुवर्त्तित्वतद्द्रष्टृत्वज्ञानानन्दादिस्वरूपत्वस्वभावतस्तत्तदवस्थानन्वयित्वाहं प्रत्ययगोचरत्वादिभिर्द्धर्मैः जीवस्वरूपं विशोध्यं तथा ब्रह्मशरीरत्वेनापि तद्विशोध्यमित्यभिप्रायः एवं ब्रह्मशरीरत्वेन तदायत्तसत्तास्थितिप्रवृत्तिकत्वरूपपारतन्त्र्यमप्यनुसन्धेयमित्युक्तम् ॥ ५६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, "व्याप्ताश्चात्मानश्चेतना निर्गुणाश्च" इति श्रुतेः लोके विततमात्मानमित्यस्य प्रतीतार्थ एव किं न स्यादित्याशङ्क्य दृष्टान्तानुगुणयात्मकथ्यत इत्यभिप्रेत्याह—यथेति । यथा सुषुप्तः सन् स्वप्नमनुभवन् पुरुषः विश्वं वासनारूपेणात्मनि स्फुरितं च शब्दादिकं पश्यति स्वप्ने आत्मानमेकदेशस्थं मन्यते न तु व्याप्तं स्वप्नादुत्थितः प्रबुद्धोऽपि खट्वादिशयने स्वं मन्यते श्रुतिगतिस्तु परमात्मविषयत्वेन जीवचिद्गुणविषयत्वेन वा कल्प्यते ॥ ५३ ॥

यथा स्वप्नावस्थायां भगवत्कर्तृकत्वस्य प्रमाणकं "मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्" इति सूत्रात्तथा जाग्रत्प्रभृत्यवस्थाश्च अतः प्रबोधोऽस्मादित्यभिप्रेत्याह—एवमिति, यथा स्वप्नावस्था प्रकृतिशब्दवाच्येश्वरेच्छा निर्मिता तथा जीवस्य सुखोपभोगस्य स्थानानि जागरणादीनि मायामात्राणि भगवदिच्छालक्षणप्रकृतिनिर्मितानि विज्ञाय तासामवस्थानां मध्ये निषण्णस्य जीवस्य सुखोपभोगस्य द्रष्टारं साक्षिणं परं ततो भिन्नं स्मरेदित्यन्वयः "अनश्नन्नन्यो अभिचाकशीति" इति श्रुतेः ॥ ५४ ॥

तद्द्रष्टारमित्यत्र जीवात्मनः परमात्मा सम्यग्विविच्य न प्रतीत इति तद्विवक्षार्थमाह—येनेति । येन प्रसुप्तः प्रस्वापं प्रापितः सन् पुरुषो जीवात्मा तदा सुप्त्यवस्थायामात्मनः स्वापम् इयन्तं कालं किञ्चन नावेदिषमिति स्वापशब्दोक्तमेव ज्ञानं सुखमहमस्वाप्समित्यनुभूतं सुखं च सुखिनं स्वात्मानं च वेद नान्यत्किञ्चिद्वेदेत्तमात्मा तं निर्गुणं ब्रह्म ज्ञानादिगुणपूर्णं मामवेहीत्यन्वयः ॥ ५५ ॥

इतोऽपि जाग्रदाद्यवस्थानुभविनो जीवाद्भिन्नं ब्रह्मेत्याह—उभयमिति । जाग्रत् सुषुप्तिश्चेत्युभयं स्मरतोऽनुभवतः पुंसः जीवस्य प्रस्वापप्रतिबोधयोरन्तःस्थवस्तुपरिज्ञानलक्षणो जाग्रति यदन्वेति अनुवर्तते अयमपि प्रतिबुद्धः सुप्तावस्वपनात्तत्स्थवस्तुपरिज्ञानलक्षणसुप्तौ यद्व्यतिरिक्तं स्यात् सर्वज्ञानसम्भवात् "प्रस्वापः स्वपनं स्वप्नम्" इत्याभिधानात्, अथाज्ञानलक्षणप्रस्वापपक्षे केवलेऽपि व्यतिरिक्तं वर्तते तत्परं "ब्रह्मविदाप्नोति परं" इति श्रुतेः 'तत्स्वात्मज्ञानं' "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतेः अनेन सुप्त्यवस्थानुभवी जीवोऽननुभूय तथा न तिष्ठन् परमात्मा ततो भिन्न इति ज्ञातव्यं यद्वा जीवस्याज्ञानसम्भवात्तस्य तदभावाज्जीवस्याल्पगुणत्वादस्यानन्तगुणत्वाज्जीवस्य परिच्छिन्नत्वादस्यापरिच्छिन्नत्वात् "तदेव ज्ञानं तदेव ब्रह्म तदेव परं तदेवतेन्तु सत्याशु एतदेव ब्रह्म परमं कवीनाम्" इति श्रुतेः ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ननु, यावद्विश्वस्मादनासक्तो न स्यात्तावत् कथं तज्ज्ञानं स्यादित्येवमाशङ्क्य शुद्धजीवस्वरूपज्ञानपूर्वकं तज्ज्ञानमुपदिशति । यथेति युग्मकेन । अयमर्थः । यथा स्वप्न मध्य एव सुषुप्तः कश्चित् पुरुषः पुनः स्वप्नं पश्यन् भ्रमविशेषेण विश्वं गिरिवनादिकमात्मनि पश्यति स्वस्मिन्नेवारोपयति पुनस्तस्मिन्नेव स्वप्ने उत्थितो लब्धजागर इव सन् आत्मानमेकदेशस्थं तत्र शयनैकदेशं पश्यन् तद्गिरिवनादिकं भिन्नमेव पश्यति तानि जागरादीनि यथा आत्मनः परमात्मनो मम मायामात्राणि सन्ति जीवस्थानानि जीवोपाधेर्बुद्धेरेवावस्था भवन्ति । एवं मुख्यान्यपि जागरादीनि विज्ञाय विज्ञातस्य पुरुषस्य शुद्धजीवस्यापि द्रष्टारं मामेव परं स्मरेदिति ॥ ५३ ॥ ५४ ॥

तमेव स्पष्टयति—येनेति । मायिकाहङ्कारालये जीवादिगतमहाचिच्छक्त्यंशेन तत्त्वविशेषेण हेतुना स्वापः तत्र निर्गुणसुखञ्च वेद तद्ब्रह्मावेहि आत्मानं परमात्मानं मां भगवद्रूपञ्चावेहि । वदन्ति तत्तत्त्वविद इत्यादेः ॥ ५५ ॥

अतएव जीवज्ञानस्यापि ब्रह्मणि तात्पर्यमित्याह—उभयमिति । तज्ज्ञानं शुद्धजीव स्वरूपं तच्च ब्रह्मणि तत्परमिति ॥ ५६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रत्युत तान्यवास्तववस्तूनि स्वल्पवस्तूनीव त्यक्त्वा ममान्तर्याम्यादि रूपमेवोपासीतेत्याह—यथेति द्वाभ्यां । स्वप्ने स्वप्नमध्ये एव सुषुप्तः सुष्ठु सुप्तः पुरुषः स्वप्नं पश्यन् भ्रमविशेषेण विश्वं गिरिवनादिकमात्मनि पश्यति स्वस्मिन्नेवारोपयति पुनस्तस्मिन्नेव स्वप्ने उत्थितो लब्धजागरस्सन्नात्मानमेकदेशस्थं तत्र शयनप्रदेशस्थं मन्यते जाग्रदवस्थामनुभवन् तद्गिरिवनादिकं भिन्नमेव मन्यते इत्यर्थः तदेवमवस्तुभूतः स्वाप्निको जागरो यथा तथैव प्रसिद्धो वस्तुभूतोपि जागरो ज्ञेयो नश्वरत्वादित्याह—एवमिति । जीवस्थानानि जीवोपाधेर्बुद्धेरेवाऽवस्थाश्च आत्मनः परमेश्वरस्य मायाशक्तिकार्यत्वान्मायामात्राणि ज्ञात्वा तेषां द्रष्टारं परं श्रेष्ठमन्तर्यामिणमिति जीवात्मा व्यावृत्तः अत्र स्वाप्निक्यो जागरस्वप्नसुषुप्तयस्त्वविद्यया जीवेन स्वजात्वादविद्यामात्रमेवावस्तुभूता एव प्रसिद्धा जागराद्यवस्थास्तु मायाशक्त्या भगवता सृष्टा मायामात्र्यः स्वल्पवस्तुभूता एव तथापि स्वाप्निकं गिरिवनसर्पव्याघ्रहस्त्यश्वादिकन्त्वविद्यया जीवेन सृज्यमस्त्वेवेति विवेचनीयम् ॥ ५३ ॥ ५४ ॥

ननु, तं द्रष्टारमन्तर्यामिणं कथमहं जानामीत्यत आह—येनेति । प्रसुप्तः पुरुषो जीवो यदा स्वापं वेद तदेव सुषुप्तावात्मनः स्वस्य निर्गुणं निर्विषयं सुखञ्च येनैव हेतुना वेद तं आत्मानं अन्तर्यामिणम् अवेहि य एव गुणैरेवच्छन्नमात्रतज्ज्ञानानन्दमपि जीवं कृपया सुषुप्तौ नित्यमेव गुणान् प्रविलाप्य निर्गुणं तदीयं सुखं समनुभावयति स एवान्तर्यामी स्पष्टमेवावगम्यतां न हि तं विना ह्यस्वतन्त्रो जीवः स्वयमेव स्वबन्धनं विमोच्य स्वीयसुखं द्रष्टुं शक्नुयादिति भावः । तमन्तर्यामिणमेव निर्विशेषत्वेन प्रतीतं ब्रह्म अवेहि ब्रह्मैव सविशेषं मां भगवन्तमेवाहि । एक एवाहं ब्रह्म परमात्मा भगवानिति त्रिरूपोभवामि न तु मत्स्वरूपस्य द्वित्वं त्रित्वं वा यदुक्तं देवैः स्वरूपद्वयाभावादिति ॥ ५५ ॥

ननु, स्वापस्वाप्निको द्रष्टा जाग्रदवस्थः कथं सुखमहमस्वाप्सामिति स्मरेत् ? नह्यन्येन दृष्टमन्यः स्मरति तत्राह—उभयं प्रस्वापं प्रतिबोधं च स्मरतः अनुसन्दधतः पुंसस्तयोः प्रस्वापप्रतिबोधयोर्यदन्वेति ताभ्यां व्यतिरिच्यते । एकैकापायेप्यनपायात् तदेव ज्ञानं जीव इत्यर्थः अतो बाल्ये दृष्टस्य यौवने स्मृतिवदवस्थान्तरत्वेपि स्वापानन्दयोः स्मरणं घटत इति भावः तत् परं ततो जीवात् परं ब्रह्म न तु स एव ब्रह्मेत्यर्थः जीवस्य तटस्थशक्तित्वेपि तद्रूपत्वेपि तस्य स्वरूपशक्तित्वाभावात् अतो भिन्नमेव ब्रह्मेत्यर्थः ॥ ५६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यस्य संकल्पमात्रेण स्वप्नसृष्टिः जाग्रत्सृष्टिश्चास्ति तं मां ध्यायेदित्याह - यथेतिद्वाभ्याम् । यथा सुषुप्तोऽत्र सुप्तः पुरुषः विश्वं जीवेन स्रष्टुमशक्यं रथाश्वादिकं मम संकल्पनिष्पन्नमेव आत्मनि मनसि पश्यति ततउत्थितः आत्मानं स्वप्नपदार्थद्रष्टारं केवलं न तु स्वाप्नं रथादिकं स्रष्टं मन्यते जानाति एकदेशस्थं स्वप्नदृष्टरथादेर्यत्र गन्धोपि नास्ति तत्र जाग्रत्सृष्टेरेकदेशस्थं न तु निखिललोकस्थमित्यर्थः तन्निर्माणस्य तु का कथा परनिर्मितं तथा भूतं पदार्थं द्रष्टुमपि न क्षमो भवतीत्यर्थः । अनेन स्वप्नसृष्टिर्जीवकृता इति मायावादिनां पक्षो दूरतस्त्याज्यः ॥ ५३ ॥

एवं जागरणादीनि जीवस्थानानि जीवस्य भोक्तुः जागरणाद्या अवस्थास्तत्र भोग्याः पदार्थाश्च यस्यात्मनः मम मायामात्राणि वयुनात्मकसंकल्पकृतानि तत्तयोः परं कारणं द्रष्टारं साक्षिणं च तं मां भवद्भिः स्मरेत् ध्यायेत् कारणं तु ध्येयमिति श्रुतेः ॥ ५४ ॥

एवं प्रतिबोधकाले स्मरणीयं जगत्कारणमात्मानं चित्रकेतुं प्रत्युपदिश्य सर्वं यद्रूपं सुषुप्तौ प्राप्यते तद्रूपमुपदिशति "सतासोम्य तदा सम्पन्नो भवति" इत्येवं सुषुप्तौ प्रसिद्धेन यथा सुषुप्तः पुरुषः आत्मनः स्वापं सुखं सुषुप्तिगतमानन्दं वेद तं निर्गुणं ब्रह्म बृहत्स्वरूपगुणमात्मानं "एष त आत्मान्तर्यामी" इति श्रुतिप्रसिद्धमन्तर्यामिणं मामवेहि ॥ ५५ ॥

ध्यानफलमाह प्रस्वापप्रतिबोधयोः शयनकाले प्रबोधकाले च तत् परं ब्रह्म स्मरतो ध्यायतः पुंसः उभयं जन्ममरणयुग्मं व्यतिरिच्येत तदेव ज्ञानं परं ब्रह्म अन्वेति च पुरुषानिति शेषः परमपुरुषभावापत्तिलक्षणमोक्षं प्राप्नोतीत्यर्थः ॥ ५६ ॥

भाषा टीका ।

स्वप्ने में सोया हुवा पुरुष अपने मे संसार को देखता है और जागकर अपने आत्मा को एक देश में स्थित देखता है ॥५३॥

यदेतद्विस्मृतं पुंसो मद्भावं भिन्नमात्मनः ।
ततः संसार एतस्य देहाद्देहो मृतेर्मृतिः ॥ ५७ ॥
लब्ध्वेह मानुषीं योनिं ज्ञानविज्ञानसम्भवाम् ।
आत्मानं यो न बुद्ध्येत न क्वचित्क्षममाप्नुयात् ॥ ५८ ॥
स्मृत्वेहायां परिक्लेशं ततः फलविपर्ययम् ।
अभयं चाप्यनीहायां सङ्कल्पाद्विरमेत्कविः ॥ ५९ ॥
सुखाय दुःखमोक्षाय कुर्वाते दम्पती क्रियाः ।
ततोऽनिवृत्तिरप्राप्तिर्दुःखस्य च सुखस्य च ॥ ६० ॥

भाषा टीका ।

ऐसे जीवात्माके जाग्रत आदि अवस्थाओं को माया रूप जानकर इन अवस्थायों के द्रष्टा परमात्मा का स्मरण करो ॥ ५४ ॥

सोया हुआ पुरुष जिससे अपनी सुषुप्ति अवस्था के अतीन्द्रिय सुख को जानता है वही ब्रह्म रूप परमात्मा मुझ को जान ॥ ५५ ॥

सुषुप्ति और जाग्रत् को स्मरण करते हुए पुरुष को जो ज्ञान प्राप्त होता है उन दोनो अवस्थाओं से भिन्न भी होता है वह ब्रह्म रूप मुझे जानो ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विपक्षे दोषमाह यद्यपि एतन्मद्भावं मत्स्वरूपं ब्रह्म विस्मृतं तदात्मनः सकाशाद्भिन्नं भवति तत एतस्य पुंसः संसारो भवति संसारस्वरूपमाह देहाद्देहो जन्मानन्तरं पुनर्जन्म मृते- मृतेर्नंतरं मृतिश्चेति ॥ ५७ ॥

योन्यन्तरेऽपि भोगादिसम्पादनं शक्यं ज्ञानार्थं त्वत्रैव यति- तव्यमित्याह—लब्ध्वेति । ज्ञानं शास्त्रोक्तम् विज्ञानमपरोक्षं तयोः सम्भवो यस्यां ताम् ॥ ५८ ॥

वैराग्यार्थमाह—ईहायां प्रवृत्तिमार्गे तत ईहतः अनीहायां निवृत्तिमार्गे त्वभयं मोक्षो भवतीति च स्मृत्वा फलसङ्कल्पा- द्विरमेत पाठान्तरे नोभयं परिक्लेशः फलविपर्ययश्च नास्ती- त्येवं स्मृत्वा ॥ ५९ ॥

एतद्विवृणोति सुखायेतित्रिभिः । दुःखस्यानिवृत्तिः सुख- स्याप्राप्तिः ॥ ६० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्वमननुसन्धानेऽनर्थमाह—यदीति । यदेतत्पुंसो देहिन आत्मनः स्वस्य मद्भावं भावः प्रकारः क्लीबत्वमार्षं मत्प्रकारत्वं विस्मृतं सत् भिन्नं भावप्रधानो भिन्नशब्दः भिन्नत्वं पृथक्सि- द्धस्वरूपस्वतन्त्रं स्यादित्यर्थः भिन्नत्वेनानुसंहितं स्यादिति भावः ततो हेतोरस्य जीवस्य संसारो भवति, संसारस्वरूपमाह—देहा- द्देहः जन्मान्तरं मृतेरनन्तरं पुनर्मृतिश्चेति ॥ ५७ ॥

एवं ब्रह्मात्मकत्वाननुसन्धानेऽनर्थः संसृतिरूप उक्तः अयञ्च मनुष्यजन्मनैव परिहार्यो न तिर्यगादि जन्मनेत्याह—लब्ध्वेति । एष जीवः ज्ञानं शास्त्रजन्यं विज्ञानं विमोकादिसाधनसप्तकज- मुपासनात्मकं तयोः सम्भवो यस्यास्तां मानुषीं योनिं लब्ध्वा मानुष्यं जन्म प्राप्यापीत्यर्थः आत्मानमुक्तविधमात्मस्वरूपं यो न बुध्येत स पुमान्क्वचिदपि क्षेमं नाप्नुयात् तिर्यगादियोनिषु ज्ञान- विज्ञानयोग्यतैव नास्ति "लब्ध्वा सुदुर्लभां मानुषीं योनिं प्राप्या- पि ब्रह्मात्मकमात्मानं स्वशरीरकं ब्रह्म वायो नोपासीत" स पुनः पुनः संसरेदेवेति भावः ॥ ५८ ॥

मानुषीं योनिं लब्धवतोऽपि विषयासक्तस्य कथं ज्ञानादिकं प्रतिष्ठितं भवेत् ? तत्राह—स्मृत्वेति । ईहायां विषयसुखार्थायां चेष्टायां प्रवृत्तिधर्मे परिक्लेशमत्यन्तशरीरायासादिरूपं तत ईहातः फलविप- र्ययं फलविपर्यासं सुखार्थचेष्टातो दुःखप्राप्तिञ्च स्मृत्वा सदृष्टात्मा- वोऽप्यनीहायां निवृत्तिधर्मेऽभयमनपत्याशाश्वत्सुखोदर्कत्वादिति- भिस्तभयरहितममृतत्वं च पश्यन् मुनिः स्वात्मपरमात्मयाथात्म्यमन- नशीलः तत ईहातः शनैर्विरमेत् उक्तविधालोचनेन शनैर्वैराग्य- मुत्पादयेदित्यर्थः ततो ज्ञानविज्ञाने प्रतिष्ठिते भवत इति भावः ॥ ५९ ॥

ईहायां परिक्लेशफलविपर्ययावेव स्पष्टयति—सुखायेति । सुखाय तत्प्राप्तये दुःखनिवृत्तये च क्रियाः तदुपयुक्तान्व्यापारान् दम्पती यद्यपि कुर्वाते तथापि ततस्तत्क्रियायाः दुःखस्यानि- वृत्तिः सुखस्याप्राप्तिश्च दुःखस्य निवृत्तिः सुखस्य प्राप्तिश्च न भवति प्रत्युत विपरीतमेव भवतीति भावः ॥ ६० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

विपक्षे बाधकमुपपादयति-यदीति। यदि पुंस आत्मनो जीवात् भिन्न एष मद्भाव उक्तो मम स्थितिप्रकारो विस्मृतस्तर्हि ततस्तयोः सयुजोः सख्योः जीवात्मपरमात्मनोः एकस्य सर्वभिन्नपरमात्मानं विस्मरतो जीवस्य संसारः स्यात् किं लक्षणक इति-तत्राह— देहादिति। देहयोगवियोगलक्षणो देहाद्देहः तदुक्तम्। "सर्वभिन्नं परात्मानं विस्मरन्संसरेदिह" इति सर्वभिन्न इति विशेषणं विस्मृतस्तर्हि तस्य जीवस्य मृतेर्मृतिः नित्यदुःखात्मकं तम एव प्राप्यते एतदप्युक्तं "अभिन्नसंस्मरन्याति तमो नास्त्यत्र संशयः" इति ॥ ५७ ॥

मद्भावः मदैक्यलक्षणः स्वस्मादभिन्न इत्यर्थाङ्गीकार उत्तरश्लोकेन विरुद्ध्यत इत्यभिप्रेत्याह—लब्ध्वेति। ज्ञानविज्ञानयोः संभवो यस्याः सा तथा ताम् इह जंबूद्वीपे तत्रापि भारतखण्डे त्रिवर्णलक्षणाम् मानुषीम् आत्मानं जीवात्मानं परमात्मानं च निर्विशेषवादिना ज्ञाने सामान्यविशेषानङ्गीकारात् व्यावहारिकस्याप्रामाणिकत्वाच्चेति ज्ञानं शास्त्रार्थविषयं विज्ञानम् अनुभवजमित्ययं भेदोपि गतार्थ इति ॥ ५८ ॥

ननु, ज्ञानेन मोक्षो माभूद्यज्ञादिकर्मणा स्यादिति तत्राह— स्मृत्वेति। ईहायां यज्ञादिकर्मकरणे परितः क्लेशं स्मृत्वा ततः कर्मणः फलविपर्ययं निरतिशयसुखाप्राप्तिं दुःखापरिहारं च पश्यन्ननीहायां सर्वकर्माणि हरौ संन्यस्य ज्ञानमार्गप्रवृत्तौ पश्यन्निरतिशयसुखप्राप्तिं दुःखपरिहारं तयोरभिन्नत्वं वा ज्ञात्वा तद्विविध तत्तादृशं कर्म विरमेन्न कुर्यादित्यर्थः ॥ ५९ ॥

अग्निहोत्रादिक्रियाकरणयोग्यौ दंपती ततः क्रियातः दुःखस्य अनिवृत्तिः सुखस्य चाप्राप्तिः ॥ ६० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तदज्ञाने दोषमाह-यद्यस्माद्ब्रह्मविस्मृतं। अनाद्यज्ञानेनानुसंहितं। ततस्तस्मादेव एतस्य जीवस्य संसारः तत्राभिप्रायविशेषेण जीवाद्भिन्नत्वेन स्वस्माद्भिन्नत्वेन दर्शयति, आत्मनोभिन्नं, मम भावः सत्ता यत्र तदिति "भयं द्वितीयाऽभिनिवेशतः स्यात्" इत्यादेर्युक्तमेव तदज्ञाने संसार इति ॥ ५७—६० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

अतो ब्रह्मजीवयोः स्वरूपैक्यभावनमेवापराधोऽनर्थहेतुरित्याह—यदेतदिति। आत्मनो जीवात् सकाशात् मद्भावं मत्स्वरूपं भिन्नमेव ज्ञीवत्वमार्षं यद्यदि विस्मृतं स्यादभिन्नमेव स्यात् ततो हेतोरेतस्याभिन्नदर्शिनः पुंसः संसारः स्यात् संसारमेवाह—देहादिति। अत एव "तत्त्वमसि" इत्यादौ जीवस्य तदीयतटस्थशक्तित्वेन ताद्रूप्यादेव सूर्यतत्किरणयोरिवैक्यं भावनीयमिति भावः सदेवमवास्तववस्तुनो विश्वस्य तच्छक्तिकार्यत्वेनाभिन्नत्वात्ताद्रूप्यं। ताद्रूप्येति तात्स्वरूप्याभावाद्वित्वमेव नश्वरत्वप्रयोजकं शुद्धजीवस्य त्वनश्वरत्वाद्वास्तववस्त्वन्तःपातित्वेपि तटस्थशक्तित्वात्ताद्रूप्यमेव. न तु तात्स्वरूप्यं ब्रह्मपरपरमात्मभगवतां तु वास्तववस्तुत्वं स्वरूपैक्यात्यैक्यञ्च। भगवन्नित्यप्रेयसी पार्षदधाम्नां चिच्छक्तिविलासत्वात् केषाञ्चिन्नित्यसिद्धत्वादपि वास्तववस्तुत्वं तात्स्वरूप्यञ्च। केषाञ्चिन्नित्यमुक्तभक्तत्वेन, केषाञ्चिल्लब्धभक्तिकैवल्यत्वेन, सिद्धानां दास्यादिवासनावतां जीवानां तु नित्यदासाद्यन्तःपातित्वेन स्वरूपशक्त्याविष्टत्वादेव तात्स्वरूप्यं, लब्धभक्तिप्रधान्येन सिद्धानां जीवानां शान्तभक्तत्वात् दासादिगणान्तःपातित्वाभावेन स्वरूपशक्त्यानाविष्टत्वात्ताद्रूप्यं वास्तववस्तुत्वञ्चेति भगवतोऽनेकशक्तिमत्त्वेनाद्वैतं फलितमिति प्रसङ्गात् वैष्णवसिद्धान्तो दर्शितः ॥ ५७ ॥

उक्तलक्षणज्ञानार्थमवश्यमेव यतितव्यमित्याह — लब्ध्वेति। ज्ञानं शास्त्रोत्थं विज्ञानमपरोक्षं तयोः सम्भवो यस्यां तां। आत्मानं जीवं परमेश्वरञ्च ॥ ५८ ॥

एतज्ज्ञानेच्छुर्ज्ञातदृष्टादृष्टकर्मफलकः कर्मनिष्ठां त्यजेदित्याह—ईहायां सकामत्वे तत ईहात अनीहायां निष्कामत्वे अभयं सर्वत एव भयाभावः। नोभयमिति पाठे क्लेशविपर्ययौ न स्यातामिति स्मृत्वा ॥ ५९ ॥

एतद्विवृणोति-सुखायेति त्रिभिः। दुःखस्यानिवृत्तिः सुखस्याप्राप्तिः ॥ ६० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

भजनाभावे मुक्त्यभाव इत्याह—यदिति यदेतत्। स्मरणादिमद्भावं मद्भजनं पुंसो भिन्नं सत्संगाद्यभावेन दूरीभूतं सत् विस्मृतं भवति ततो हेतोः एतस्यात्मनो जीवस्य देहाद्देहो, मृतेर्मृतिः एवंभूतः जन्ममरणप्रवाहलक्षणः संसार एव स्यात् ॥ ५७ ॥

ज्ञानविज्ञानयोः सम्भवो यस्यां ताम् आत्मानं यद्विज्ञानेन सर्वं विज्ञातं स्यात्तं भगवन्तम् ॥ ५८ ॥

ईहायां प्रवृत्तौ परिक्लेशम्। तथेहितार्थलाभः अनीहितार्थलाभश्चेति. फलविपर्ययञ्च स्मृत्वा अनीहायां निवृत्तौ च अभयं स्मृत्वा ततो हेतोः संकल्पात्प्रवृत्तिमार्गसंकल्पात् ॥ ५९ ॥

फलविपर्ययं स्पष्टयति——सुखायेति ॥ ६० ॥

भाषाटीका।

जब यह ब्रह्म विस्मरण हुआ जीवात्मा से भिन्न हो जाता है तब इस अज्ञानि जीव को बारम्बार जन्म मरण होते हैं ॥ ५७ ॥

इस संसार में ज्ञान विज्ञान की देने वाली मनुष्य योनि को पाकर जिसने आत्माके स्वरूप को नहीं जाना उसको फिर और किसी योनि में शान्ति नहीं प्राप्त होती है ॥ ५८ ॥

एवं विपर्ययं बुद्ध्वा नृणां विज्ञाभिमानिनाम् ।
आत्मनश्च गतिं सूक्ष्मां स्थानत्रयविलक्षणाम् ॥ ६१ ॥
दृष्टश्रुताभिर्मात्राभिर्निर्मुक्तः स्वेन तेजसा ।
ज्ञानविज्ञानसन्तुष्टो मद्भक्तः पुरुषो भवेत् ॥ ६२ ॥
एतावानेव मनुजैर्योगनैपुणबुद्धिभिः ।
स्वार्थः सर्वात्मना ज्ञेयो यत्परात्मैकदर्शनम् ॥ ६३ ॥
त्वमेतच्छ्रद्धया राजन्नप्रमत्तो वचो मम ।
ज्ञानविज्ञानसम्पन्नो धारयन्नाशु सिध्यसि ॥ ६४ ॥

श्रीशुक उवाच ।

आश्वास्य भगवानित्थं चित्रकेतुं जगद्गुरुः ।
पश्यतस्तस्य विश्वात्मा ततश्चान्तर्दधे हरिः ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पारमहंस्याम्
संहितायां वैयासिक्यां चित्रकेतूपाख्याने
षोडशोऽध्यायः ॥ १६ ॥

भाषा टीका ।

प्रवृत्ति मार्ग में बहुत क्लेश और विपरीत फल देखकर तथा निवृत्ति मार्ग में मोम जानकर बुद्धिमान् सङ्कल्पों से विराम को प्राप्त होजाय ॥ ५९॥

स्त्री पुरुष, सुखप्राप्ति और दुःख दूर होने के लिये कर्म करते हैं, परन्तु उस कर्म से दुःखकी निवृत्ति और सुख की प्राप्ति नहीं होती ॥ ६० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विज्ञाः उद्यमे प्रवीणा वयमित्यभिमानवतां स्थानत्रयविलक्षणां तुरीयां बुद्ध्वा ॥ ६१ ॥

दृष्टश्रुताभिर्मात्राभिरैहिकामुष्मिकैर्विषयैः स्वेन तेजसा विवेकबलेन ॥ ६२ ॥

नचातः परः पुरुषार्थोऽस्तीत्याह—एतावानिति । योगे नैपुणं यस्यां सा बुद्धिर्येषां परस्यात्मन एकं दर्शनमिति यदेतावानेव ॥ ६३ ॥ ६४ ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अनीहायामुभयं स्पष्टयति—एवमिति । विज्ञाभिमानिनां वयमीहायां कुशला इत्यभिमानवतां नृणां ईहायामेवमुक्तप्रकारेण विपर्ययं बुध्वा आलोच्य स्थानत्रयविलक्षणां अग्रत्स्वप्नसुषुप्त्यतीतां केवलविषयासक्तैर्दुर्ज्ञेयामात्मनः प्रत्यगात्मनो गतिं ब्रह्मात्मकत्वाद्याकारं बुध्वा ॥ ६१ ॥

दृष्टश्रुताभिरैहिकयामुष्मिकीभिः मात्राभिः विषयसुखलेशैः स्वेन तेजसा स्वविवेकबलेन निर्मुक्तः मात्रासु जातविराग इत्यर्थः ज्ञानविज्ञानाभ्यां पूर्वोक्ताभ्यां सन्तुष्टः ज्ञानसहकृतभगवदनुभवरूपविज्ञानमात्रसन्तुष्टः मद्भक्तः मम निरतिशयप्रियः पुरुषो भवेत् एवञ्चोभयं तस्य ब्रह्मात्मकत्वमनुसन्दधतः करस्थमिति भावः ॥ ६२ ॥

तदेवाह—एतावानिति । योगे नैपुणं यस्याः सा बुद्धिर्येषां तैर्मनुजैः सर्वात्मना सर्वप्रकारेण ज्ञेयः स्वार्थोऽनिष्टपरिहारेष्टप्रापणसमर्थं पुरुषेण प्रार्थनीयं वस्तु एतावानेव, एष एवेत्यर्थः स्वार्थवातिः यद्वा एतावानेवेतरपरिमित एव. कोसौ ? तत्राह—यत्परात्मैकदर्शनमिति, परस्य परमात्मनः आत्मनः स्वस्य च ऐक्यदर्शनमपृथक्सिद्धसम्बन्धदर्शनमिति यदेतावानेवेत्यर्थः यद्वा परात्मनः परमात्मन ऐक्यदर्शनमेकत्वेन प्रकारित्वेनैकेनैवाकारेण च दर्शनं यद्वा परस्य परमात्मनः आत्मनः स्वस्य च ऐक्यदर्शनं परमात्मनः प्रकारित्वेनैकेनाकारेण स्वस्य च तत्प्रकार-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्वरूपेणैकेनाकारेण दर्शनं परमात्मैक्यदर्शनमितियदेतावानित्यर्थः ॥ ६३ ॥

एवं परात्मैक्यद्रष्टा चेत्त्वमप्याशु मुक्तो भविष्यसीत्याह—त्वमिति । हे राजन् चित्रकेतो, त्वमप्रमत्तः समाहितचित्तः श्रद्धया ज्ञानविज्ञानसम्पन्नं सम्पत्तिः सम्पन्नं 'भावेक्तः' ज्ञानविज्ञानयोः सम्पत्तिर्यस्मात्तन्मम वचः धारयन् स्वानिष्ठं कुर्वन् ज्ञानविज्ञानसम्पादकं मदुक्तार्थमनुतिष्ठन्नित्यर्थः ब्रह्मात्मकत्वानुसन्धानेन ज्ञानविज्ञाने प्रतिष्ठिते भवत इति भावः ज्ञानविज्ञानसम्पन्न इति प्रथमान्तपाठे स्पष्टार्थः आशु सिध्यसि मुक्तो भविष्यसि ॥ ६४ ॥

एवमुपादिश्य भगवानन्तर्दधौ इत्याह—मुनिः, आश्वास्येति । विश्वात्मा जगद्गुरुर्भगवान्हरिः सङ्कर्षणश्चित्रकेतुमित्थमाश्वास्य नारदाङ्गिरउक्तिसम्वादितस्वचसा विश्वास्य तस्य चित्रकेतोः पश्यतः सतस्तत्रैव पातालादधस्तात्कस्याश्चिद्दिशि अन्तर्हितवान् ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कर्मविषयविद्याभासे इयमविद्येत्यभिमानिना आत्मनो जीवस्य परमात्मनश्च वैकुंठादिस्थानतया व्याप्तिभूताप्रतिमभूतिमत्त्वया विलक्षणां जाग्रदादिस्थानत्रयातीतां च ॥ ६१ ॥

मात्राभिः शब्दादिभिः स्वेन तेजसा विशुद्धबुद्धिसामर्थ्यातिशयेनैव ज्ञात्वा पुरुषो भवेन्मुक्त इति शेषः ॥ ६२ ॥

उक्तज्ञानमन्ययोगाद्यवच्छिनत्ति—एतावानेवेति । किं तदित्यत उक्तं यदिति । परात्मन एकत्वस्य साम्याधिक्यराहित्यस्य दर्शनम् ॥ ६३ ॥

तत्र योग्यश्चैतदेव नान्यदित्याह—त्वमेतदिति ॥ ६४ ॥

चिरस्थितत्वेन पुनरपि प्रश्नः स्यादित्येतस्य हरेरन्तर्धानमाह । आश्वास्येति ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
षोडशोऽध्यायः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पूर्वानुरूपमेवोपसंहरति—एवमिति युग्मकेन । "आत्मारामाश्च मुनयः" इत्यादेः ॥ ६१ ॥ ६२ ॥

तदेव प्रशंसति—एतावानिति । परमात्मनो भगवत एवैकं केवलं दर्शनं अनुभव इति यत् ॥ ६३ ॥

ससिद्धोसीति । यत् पूर्वमुक्तम् अधुना च सिध्यसीति तद्द्वयमपि वर्तमानसामीप्येनैव ज्ञेयं तत्राप्यप्रमत्तः सन् मम वचो धारयन्निति भाविविघ्नो हेतुरप्युद्दिष्टः ॥ ६४ ॥ ६५ ॥

इतिश्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
षोडशोऽध्यायः समाप्तः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

स्थानत्रयविलक्षणां तुरीयां मात्राभिर्विषयैः स्वतेजसा स्वीयसाधनप्रभावेन ॥ ६१ ॥ ६२ ॥

परस्य श्रेष्ठात्मनः परमात्मन एव एकं दर्शनं न तु विषयस्य ॥ ६३-६५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठेय षोडशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विद्याभिमानिना दृंहितार्थनिष्पादनबुद्धिविगतानां कर्मिणां स्थानत्रयविलक्षणां स्वर्गनरकभूसंबन्धवर्जितां वैकुण्ठसंबन्धिनीमचिरादिरूपां च बुध्वा ॥ ६१ ॥

तेजसा हेयोपादेयविवेकेन मात्राभिर्विषयैर्निर्मुक्तः ज्ञानं चिदचिद्ब्रह्मस्वरूपगुणादियाथात्म्यबोधः विज्ञानं सर्वं ब्रह्मात्मकमिति बोधः ताभ्यां संतृप्तः मद्भक्तो भवेत् ॥ ६२ ॥

योगे ज्ञानभक्त्यादिसाधनयोगे नैपुण्यं यस्याः सा बुद्धिर्येषां तैः परात्मनोर्ब्रह्मजीवयोः अंश्यंशयोरेकदर्शनं गुणगुणिनोर्जातिव्यक्त्योः प्रभाप्रभावतोः कार्यकारणयोश्च यथा अनेकयोरप्येकदर्शनं तद्वत् एतावानेव सर्वात्मना साकल्येन स्वार्थो ज्ञेयः "तत्त्वमसि" इति श्रुतिरप्यत्रानुसन्धेया ॥ ६३ ॥ ६४ ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
षोडशाऽध्यायार्थप्रकाशः ॥ १६ ॥

भाषा टीका ।

पण्डितंमन्य पुरुषो का इस प्रकार का विपर्यय जानकर, आत्माकी सूक्ष्म चतुर्थगति समुझकर पुरुष ज्ञान विज्ञान में सन्तुष्ट होकर हमारा भक्त हो जावे ॥ ६१ ॥ ६२ ॥

भाषाटीका ।

योग में निपुण बुद्धि वाले मनुष्योंको सर्व प्रकार इतना ही स्वार्थ मानना चाहिये कि जो परमात्मा का एक दर्शन हो जावे ॥ ६३ ॥

हे राजन् ! तुम श्रद्धा से अप्रमत्त होकर इस हमारे वाक्य को धारण करते हुए, विज्ञान सम्पन्न होकर शीघ्र ही सिद्ध-हो जावेगे ॥ ६४ ॥

श्री शुक उवाच ॥

जगद्गुरु भगवान् श्री शेषजी इस प्रकार चित्रकेतु को आश्वासन करके चित्रकेतु के देखते २ विश्वात्मा हरि श्री-सङ्कर्षणजी अन्तर्ध्यान होगये ॥ ६५ ॥

इति श्रीमद्भागवतमहापुराण षष्ठस्कन्ध षोडशाध्यायकी भाषा टीका समाप्त ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे षोडशोऽध्यायः समाप्तः ॥ १६ ॥

॥ सप्तदशोऽध्यायः ॥

—:०:*:०:—

श्रीशुक उवाच ।

यतश्चान्तर्हितोऽनन्तस्तस्यै कृत्वा दिशे नमः ।
विद्याधरश्चित्रकेतुश्चचार गगनेचरः ॥ १ ॥
स लक्षं वर्षलक्षाणामव्याहतबलेन्द्रियः ।
स्तूयमानो महायोगी मुनिभिः सिद्धचारणैः ॥ २ ॥
कुलाचलेन्द्रद्रोणीषु नानासङ्कल्पसिद्धिषु ।
रेमे विद्याधरस्त्रीभिर्गापयन्हरिमीश्वरम् ॥ ३ ॥
एकदा स विमानेन विष्णुदत्तेन भास्वता ।
गिरिशं ददृशे गच्छन्परीतं सिद्धचारणैः ॥ ४ ॥
आलिङ्ग्याङ्कीकृतां देवीं बाहुना मुनिसंसदि ।
उवाच देव्याः शृण्वत्या जहासोच्चैस्तदन्तिके ॥ ५ ॥

चित्रकेतुरुवाच ।

एष लोकगुरुः साक्षाद्धर्मं वक्ता शरीरिणाम् ।
आस्ते मुख्यः सभायां वै मिथुनीभूय भार्यया ॥ ६ ॥
जटाधरस्तीव्रतपा ब्रह्मवादी सभापतिः ।
अङ्कीकृत्य स्त्रियं चास्ते गतह्रीः प्राकृतो यथा ॥ ७ ॥
प्रायशः प्राकृताश्चापि स्त्रियं रहसि बिभ्रति ।
अयं महाव्रतधरो बिभर्ति सदसि स्त्रियम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततः सप्तदशेऽमोघमहर्द्धिं प्राप्य खे चरन् ।
विहस्य गिरिशं शापादुमाया वृत्रतां गतः ॥ १ ॥

यतो यस्यां तस्यै दिशे नमः नमनं कृत्वा ॥ १ ॥

स चित्रकेतुर्विद्याधरस्त्रीभिर्हरिं गापयन् रेम इति द्वयोरन्वयः अव्याहतं बलमिन्द्रियपाटवं च यस्य ॥ २ ॥

नानाविधाः सङ्कल्पेनैव सिद्धयो यासु तासु ॥ ३ ॥

अकस्मादद्भुतैश्वर्यगर्वात्प्राचीनकर्मतः ॥
आसुरीं योनिमापन्नो भवानीशापतः स तु ॥

तदाह—एकदेत्यादिना ॥ ४ ॥

अङ्कीकृतामुत्सङ्गेनैकीकृत्य देवीं बाहुनाऽऽलिङ्ग्य स्थितम् उवाच जहास च तस्यान्तिके स्थितः सन् ॥ ५ ॥

धर्मं वक्ता वदति शरीरिणां मध्ये मुख्यश्च भार्यया मिथुनीभूय चाऽऽस्ते ॥ ६ ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत उपरितनं चित्रकेतोर्वृत्तान्तमाह—मुनिः, यत इति । यतः यस्यां दिशि सङ्कर्षणोऽन्तर्हितवान् तस्यै दिशे नमस्कृत्वा स विद्या-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

धारः विद्याधरत्वं प्राप्तः विद्याधरैरिति पाठे तैः सह चित्र-केतुर्गगनचारीभूत्वा तत्रतत्र चचार ॥ १ ॥

तदेवाह—स इति । महायोगी भगवांस्स चित्रकेतुरव्याहतं बलं येषां तानीन्द्रियाणि यस्य तादृशो लक्षवर्षाणां लक्षं बहु-कालमित्यर्थः मुनिभिः सिद्धैश्चारणैश्च स्तूयमानः ॥ २ ॥

नानाविधाः स्वसङ्कल्पानुसारिण्यः सिद्धयः भोग्यभोगोपक-रणादिसिद्धयो यासु कुलाचलेन्द्रस्य मेर्वादेर्द्रोणीषु विद्याधर-स्त्रीभिरीश्वरं हरिं गापयन् गानं कारयन् रेमे ॥ ३ ॥

स चित्रकेतुरेकदा कदाचिद्विष्णुदत्तेन यथासङ्कल्पं भग-वता दत्तेन भास्वता प्रकाशमानेन विमानेन तत्रतत्र गच्छन् सञ्चर-माणः सिद्धैर्योगिभिश्च परीतं परिवृतं गिरिशं रुद्रं ददर्श ॥ ४ ॥

कथंभूतं रुद्रम् अङ्के उत्सङ्गे कृतां निधापितां देवीमम्बिकां बाहुना आलिंग्य मुनीनां मननशीलानां संसदि सभायां स्थित-मिति शेषः ततो देव्याः शृण्वन्त्यां सत्यां उवाच जहास च ह-सितवांश्च ॥ ५ ॥

तदेवाह—एषइति त्रिभिः । एष रुद्रः साक्षाल्लोकानां गुरुर्हितो-पदेष्टा किञ्च शरीरिणां धर्मं वक्ता मुख्यः प्रधानः स्वयमीदृश-स्सन् सभायां भार्यया सह मिथुनीभूयाऽऽस्ते ॥ ६ ॥

किञ्च जटाः बिभर्तीति तथा तीव्रमुग्रं नितान्तं वा तपो यस्य स ब्रह्मवादी ब्रह्मज्ञानोपदेष्टाऽथ च सभायाः पतिः प्रधानः एवंभूतोऽपि लज्जाहीनः अङ्के स्त्रियं कृत्वा निधायाऽऽस्ते उपविष्ट-वान् यथा प्राकृतः अत्यन्तमूढस्तद्वत् ॥ ७ ॥

किञ्च प्राकृता अपि बहुशो रहस्येव स्त्रीयमङ्के बिभ्रति निधापयन्ति अयं तु महाव्रतधरोपि सदसि सभयामेवस्त्रियमङ्के बिभर्ति अयं महान् व्यत्यास इति भावः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यथाशास्त्रार्थतत्त्वेन ज्ञातः श्रीनारायणो मुक्तिं ददाति, नान्यथा. यथाशास्त्रार्थतत्त्वं योग्यानामेव ज्ञातुं सुशकं, नायो-ग्यानां "परोक्षप्रिया इव हि देवाः" इति श्रुतेः दुरवगाहं शास्त्रार्थ-तत्त्वं हरेः प्रीतिजनकं तथा प्रतिपादनमित्ययं प्रकारः कथ्यते अस्मिन्नध्याये, तत्र चित्रकेतोः रुद्राणीशापप्राप्तिप्रकारं वक्तुं तावदाह—यतश्चेति ॥ १ ॥ २ ॥

कुलाचलेन्द्रस्य द्रोणीषु निम्नतटीष्वत एव स्त्रीणां पुरु-षाणां च नानासङ्कल्पसिद्धिषु ॥ ३ ॥

ततश्च किं प्रकृते तत्राह—एकदेति ॥ ४ ॥

दृष्ट्वापि किमभूदत्राह—उवाचेति ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सलक्षमिति युग्मकम् ॥ १—३ ॥

तत्रापि प्राचीनमहदपराधान्तरस्य दुष्फलमाह—एकदेति ॥ ४—८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

चित्रकेतुः सप्तदशे विद्याधरपतिर्भवत् ।
विहस्य शङ्करं देव्याः शापतो वृत्रतामगात् ॥ ० ॥

यतः यस्यां दिशि ॥ १—२ ॥

नानासङ्कल्पसिद्धिष्वपि सङ्कल्पान् विहाय हरिं गापयन्नेव रेमे हरेर्गुणश्रवणकीर्त्तनयोरेव रतोऽभूदित्यर्थः ॥ ३—६ ॥

"भक्तिं भूतिं हरिर्दत्त्वा स्वविच्छेदानुभुतये ।
देव्याः शापेन वृत्रत्वं नीत्वा तं स्वान्तिकेऽनयत्"

अङ्गीकृतां स्वदेहार्द्धीकृतां प्राकृतो यथेति न तु प्राकृतः साक्षादी-श्वरत्वादिति । दक्षवज्जायं शिवनिन्दकोऽपराधी ज्ञेय इति भावः ॥ ७ ॥

महाव्रतधरो नैष्ठिकब्रह्मचारी स्त्रियं बिभर्त्तीत्यचिन्त्यमैश्व-र्यमिति भावः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यथा चित्रकेतुर्वृत्रोऽभूत्तत्सप्तदशे उच्यते—यत इति । यतो यस्यां दिशि अन्तर्हितस्तस्यै नमो नमनं कृत्वा गगनचारी-भूत्वा तत्र चचार ॥ १ ॥

सर्वलक्षाणां लक्षं बहुकालं अव्याहतं न विनष्टं बलमिन्द्रिय-पाटवं यस्य सः ॥ २ ॥

नाना अनेकप्रकाराः संकल्पेनैव सिद्धयो यासु तास्वपि विद्याधरस्त्रीभिर्हरिं गापयन् एव रेमे न तु काप्यशक्तोऽभूदिति भावः ॥ ३ ॥

"मुक्त्यन्तरायभूतप्रारब्धकर्मणस्तस्य तावदेव चिरं यावन्न विमोक्षे" इतिश्रुतिप्रसिद्धस्य फलभोगाय भवानीशापद्वारा वृत्ररूपेण प्रवृत्तो-भूदित्याह—एकदेत्यादिना । मुनिसभायाम् अङ्गीकृत्य उत्संगे आरो-पितो बाहुना आलिंग्य स्थितं प्राप्त तदन्तिके उच्चकैर्जहास देव्याः शृण्वंत्या उवाच च ॥ ४ ॥ ५ ॥

शरीरिणां मध्ये मुख्योऽत एव लोकानां गुरुरत एव साक्षात् धर्मं भगवद्भक्तिलक्षणं वक्ता वदति सभायां भार्यया मिथुनीभूय चास्ते ॥ ६ ॥ ७ ॥ ८ ॥

भाषा-टीका ।

श्री शुक उवाच ॥

जिस दिशा में अनन्त भगवान् अन्तर्धान हुए विद्याधर

श्रीशुक उवाच ।

भगवानपि तच्छ्रुत्वा प्रहस्यागाधधीर्नृप ! ।
तूष्णीं बभूव सदसि सभ्याश्च तदनुव्रताः ॥ ९ ॥
इत्यतद्वीर्यविदुषि ब्रुवाणे ब्रह्वशोभनम् ।
रुषाऽऽह देवी धृष्टाय निर्जितात्माभिमानिने ॥ १० ॥

पार्वत्युवाच ।

अयं किमधुना लोके शास्ता दण्डधरः प्रभुः ।
अस्मद्विधानां दुष्टानां निर्लज्जानां च विप्रकृत् ॥ ११ ॥
न वेद धर्मं किलपद्मयोनिर्न ब्रह्मपुत्रा भृगुनारदाद्याः ।
न वै कुमारः कपिलो मनुश्च ये नो निषेधन्त्यतिवर्तिनं हरम् ॥ १२ ॥
एषामनुध्येयपदाब्जयुग्मं जगद्गुरुं मङ्गलमङ्गलं स्वयम् ।
यः क्षत्रबन्धुः परिभूय सूरीन्प्रशास्ति धृष्टस्तदयं हि दण्ड्यः ॥ १३ ॥
नायमर्हति वैकुण्ठपादमूलोपसर्पणम् ।
सम्भावितमतिः स्तब्धः साधुभिः पर्युपासितम् ॥ १४ ॥
अतः पापीयसीं योनिमासुरीं याहि दुर्मते ! ।
यथेह भूयो महतां न कर्ता पुत्र ! किल्बिषम् ॥ १५ ॥

श्रीशुक उवाच ।

एवं शप्तश्चित्रकेतुर्विमानादवरुह्य सः ।
प्रसादयामास सतीं मूर्ध्ना नम्रेण भारत ! ॥ १६ ॥

भाषा टीका ।

चित्र केतु भी उसी दिशा को प्रणाम कर आकाश मार्ग से विचर ने लगा ॥ १ ॥

मुनि सिद्ध चारणों से स्तूयमान अव्याहत इन्द्रियवाला महायोगी वह चित्रकेतु नाना प्रकार सङ्कल्प से सिद्धियों को प्राप्त करने वाली कुलाचल पर्वत की गुहाओं में विद्याधरों की स्त्रियों से भगवान् का यश गान कराता हुआ रमता भया ॥ २ ॥ ३ ॥

एक समय विष्णु के दिये हुए भास्वर विमान में बैठा हुआ जाता था उसी समय सिद्ध चारणों से व्याप्त महादेव को चित्रकेतु ने देखा कि मुनि लोगों की सभा में श्री पार्वतीजी को बाहु से आलिङ्गन करके अङ्क में बैठाये हैं । तब तो पार्वतीजी के सुनते २ हसकर उनके समीप में जाकर बोला ॥ ४ ॥ ५ ॥

चित्रकेतु रुवाच ॥

यह साक्षात् लोक गुरु है और जीवों के मध्य में साक्षात् धर्म का वक्ता है तौ भी सभा में भार्या के साथ जोडी जोड़ कर बैठा है ॥ ६ ॥

जटा को धारण किये, ब्रह्मवादी, तीव्र तप वाला, सभापति होकर, जैसे प्राकृत मनुष्य, इस प्रकार निर्लज्ज होकर स्त्री को गोद में लेकर बैठा है ॥ ७ ॥

प्राय करके प्राकृत मनुष्य भी एकान्त में स्त्री को गोद में धारण करते हैं यह महाव्रत के धारण करने वाला सभा में स्त्री को धारण किया है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ॥

अगाधा गम्भीरा धीर्यस्य सः ॥ ९ ॥

न तस्य वीर्यं प्रभावं विद्वानतद्वीर्यविद्वांस्तस्मिन् निर्ज-

श्रीधरस्वामिकृतभावार्थदीपिका ।

तात्माभिमानिने जितेंद्रियोऽहमित्यभिमानवते इति रुषा क्रोधेनाह ॥ १० ॥

विरुद्धं प्रकर्षेण करोतीति विप्रकृत् ॥ ११ ॥

अतिवर्तिनं शास्त्रमतिक्रम्य वर्तनशीलं ये नो निषेधन्ति न निवारयन्ति ॥ १२ ॥

एषां ब्रह्मादीनामनुध्येयं पदाब्जयुग्मं यस्य तम् मङ्गलमङ्गलं परमधर्ममूर्तिम् सूरीन् परिभूयाऽऽज्ञान्कृत्वा जगद्गुरुं यः प्रशास्ति तत्तस्मात् ॥ १३ ॥

ननु, हरिभक्तोऽयं न दण्डार्ह इति चेत्तत्राह—नायं साधुभिः परिसेवितं वैकुंठस्य पादमूलोपसर्पणमर्हति यतः संभाविता अहमधिक इति कृता मतिर्येन अत एव स्तब्धोऽनम्रः ॥ १४ ॥

तदेवं स्वयं दंड्यत्वं निश्चित्य तं प्राह—अत इति । हे पुत्र ! यथा भूयो महतां किल्बिषमपराधं न कर्ता न करिष्यसि तथा याहीत्यर्थः ॥ १५ ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततस्तच्चित्रकेतोर्वचः श्रुत्वाऽपि भगवान् रुद्रः अगाधा गम्भीरा धीर्यस्य तादृशोऽत एव प्रहस्य तूष्णीं बभूव, हे नृप, तथा तं रुद्रमनुव्रतास्तदनुव्रताः सभ्याश्च तूष्णीं बभूवुः ॥ ९ ॥

अतद्वीर्यविदुषि न तस्य रुद्रस्य वीर्यं प्रभावं 'तेजीयसां न दोषाय' इति न्यायेन तेजोविशेषं विद्वांस्तस्मिन् अतद्वीर्यविदुषि चित्रकेतौ इति इत्थं ब्रह्म ब्रह्मात्मकं शोभनं शिवंप्रति ब्रुवाणे सति देव्यंबिका निर्जितात्माभिमानिने जितेन्द्रियत्वाभिमानवतेऽत एव दुष्टाय चित्रकेतवे रुषा क्रोधेनोवाच ननु, तदनुव्रताः सभ्यास्तूष्णीं बभूवुः कथं सा तमनुव्रता भवेतिश्रुत्वा तदनुव्रता देवी चित्रकेतुं शपवतीत्याशंक्य रुषेत्युक्तम् ॥ १० ॥

तदेवाह—अयमित्यादिना, किल्बिषमित्यन्तेन । तावत्समुपालभते अयमिति द्वाभ्यां । अयमधुना किमर्थमागत इति शेषः अहोऽस्मान्दण्डयितुमधुनायमागत इत्युपालंभः तदेवाह, अहो निर्लज्जानामस्मद्विधानां दुष्टानामयं शास्ता हिताहितयोर्विविच्य ज्ञापकः शासनातिवर्तित्वे दण्डधरः दण्डयिता प्रभुर्दण्डने समर्थश्चात एव विप्रकृत् दमनकारी ॥ ११ ॥

अहो पद्मयोन्यादयो धर्मं न विदन्ति यतस्तेऽतिवर्तिनं मर्यादातिवर्तिनं हरं रुद्रं नो निषेधन्ति न निषेधन्ति अयं त्वधुना निषेधतीत्युपालम्भः तत्र पद्मयोनिर्ब्रह्मा कुमारः सनत्कुमारः मनुः स्वायंभुवः ॥ १२ ॥

तमेवमुपालभ्यावश्यमयं निग्राह्य इत्याह—एषामिति द्वाभ्यां । तावत्प्रतिपाद्यदृष्ट्या रुद्रं विशिनष्टि, एषां पद्मयोन्यादीनामनुध्येयं ध्यातुं योग्यं पदाब्जयुग्मं यस्य जगद्गुरुं जगद्धितोपदेष्टारं स्वयं साक्षान्मङ्गलानामपि मङ्गलं ईदृशं हरं सूरीनृषींश्चायं क्षत्रियाधमः परिभूय यद्यस्मात्प्रशास्ति तत्तस्मादयं दुष्टो दुरात्मा दण्डच एव सूरीन्परिभूय जगद्गुरुं गिरिशं प्रशास्तीति वान्वयः ॥ १३ ॥

ननु, भगवद्भक्तोऽयं न दण्डच इत्यत्राह—नायमिति । साधुभिः परिसेवितं सत्कृतं वैकुण्ठस्य भगवतः पादमूलस्य उपसर्पणमनुसरणं सेवेति यावत् तत्प्रति अयं क्षत्रबन्धुर्नार्हति, कुतः ? यतोऽयं सम्भावितात्माऽहमधिक इत्यभिमानवती मतिर्यस्य सः अत एव स्तब्धः निश्चल इव स्थितः ॥ १४ ॥

एवं दण्डचतामभिधायाथ शपति—अत इति । अतः भगवत्सेवानर्हत्वात् हे दुर्मते ! त्वमासुरीं पापीयसीं योनिं याहि हे पुत्र, यथा भूयो महातां किल्बिषमपराधं न कर्ता न करिष्यसि तथा याहीति ॥ १५ ॥

हे भारत ! एवम् इत्थं शप्तः स चित्रकेतुर्विमानादवरुह्य सतीमम्बिकां नम्रेण मूर्ध्ना प्रसादयामास प्रसन्नामकरोत् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदं ह्रीश्वरस्येश्वरत्वं यदन्यैरसत्कारैः निर्विकारत्वमित्याशयेन गिरिशस्य क्षमाप्रकारं वक्ति–भगवानपीति । अगाधधीरन्यैरज्ञातेयत्ता बुद्धिः ॥ ९ ॥

स्त्रीनिमित्ताऽसत्कारपरिहारः स्त्रियैव कार्य इति परमेश्वराभिसन्धिं जानती पार्वती प्रतिवक्ति–इतीति । धृष्टाय प्रगल्भाय निर्जित आत्माभिमानः आत्मदर्पो येन स तथा आत्मविज्ञानं वा येन स तथा तस्मै "अभिमानस्तु विज्ञाने प्रणये दर्पहिंसयोः" इति यादवः ॥ १० ॥ ११ ॥

अयं शापयोग्यापराध इति ज्ञापयितुमित्यभिप्रेत्याह—न वेदेति । अतिवर्तिनमसत्प्रज्ञातसमाधित्वेन वर्तमानम् ॥ १२ ॥

अनिषेधे कारणमाह—एषामिति । एषां ब्रह्मादीनां पक्षे ब्रह्मणामिन्द्रादीनामनुध्येयं पदाब्जयुग्मं कृद्योगे षष्ठीयं नित्यसम्बन्धद्योतनाय वा तद्वराणामित्याचार्यैर्व्याख्यातं अत्र किमवलंब्योच्यत इति चेन्न—

> "विष्णुब्रह्मप्राणवीन्द्रास्तद्दारानप्यृते हरः ।
> ध्येयो हरेः पार्षदाद्यैर्ध्यायन्हरिचतुर्मुखौ ॥
> प्राणमेषां तथा दाराश्च स्वतंत्रतया क्वचित्" इति

वचनबलाश्रयणात्, न तु ब्रह्मादीनामनुध्येयपदाब्जयुग्ममिति बहुप्रमाणविरोधात् अत एवास्माभिः शास्त्रार्थोऽसौ परोक्षत्वेन देवप्रियत्वाद्गुरवणाह इत्यभिहितं यस्मादयमपराधी तत्तस्माद्दण्ड्यः ॥ १३ ॥

किं दण्डमर्हतीति तत्राह—नायमिति । अनर्हत्वे कारणमाह—सम्भावितात्मेति ॥ १४ ॥

तदर्थं क उपाय इति तत्राह—अत इति । इह अमुत्र स्थितानां ॥ १५ ॥

शप्तस्य सद्भक्तस्य तदुपसत्तिप्रकारमाह—एवमिति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदनुव्रता इति । अतस्तदभिप्रायानुसारेणैव ते च तूष्णीं बभूवुरित्यर्थः ॥ ९ ॥

देवी तु न क्षन्तुं शक्तवतीत्याह—इतीति । वीर्य्यमस्ताहश लौकिकचारित्रेणाच्छादितं मन्महाभागवतत्वं तदेव तथैवोक्तमगाधधीरिति ॥ १०—१२ ॥

एषामित्यस्य टीकायां अवज्ञां कृत्वेति पाठे तेषामिति शेषः अज्ञान् कृत्वेति अज्ञान् मत्वेत्यर्थः ॥ १३—१४ ॥

ततश्च तं भीतं मत्वा सकृपमाह—यथेति । एतदपराधबीजेन पुनस्तु पूर्ववन्महदपराधो न जनयिष्यत इत्यर्थः ॥ १५ ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रहस्येति मामपि सदाचारे स्थापयितुमिच्छतीति भावः, सहसैव चित्रकेतोरभिप्रायज्ञानादगाधा सर्वेषुप्रवेशा धीर्यस्य सः चित्रकेतोरभिप्रायश्चायं स्वत्वीश्वर एव नास्य दुराचारत्वेपि क्षतिः । यः स्वत्वनभिज्ञः इमं निन्दिष्यति तस्यापराधात् सर्वनाशो भविष्यति यथा दक्षस्येत्यत इममधारभ्यापि यदि सदाचारे स्थापयितुमहं शक्नुयां तदा लोकानां भद्रं स्यात् । तथा विष्णुः परमेश्वरो भद्र एव सुचरितत्वात्, रुद्रस्त्वभद्रो दुराचारत्वादित्यप्रतिष्ठाऽप्यस्य न भवेदिति । तदस्मै हितैषिणा कठोरभाषिणोऽपि हरिभक्ताय नाहं कुप्यामीति भगवतः शम्भोरभिप्रायानुसारिणः सभ्याश्च तूष्णीं बभूवुरेव न तु चुक्रुधुः । श्रीशिवनिन्दनस्य तदभिगतत्वे ते सभ्याः सद्य एव कर्णौ पिधाय ततो निरवास्यन्निति ज्ञेयं । यदुक्तं "भगवन्निन्दनं श्रुत्वा तत्परस्य जनस्य वा" इत्यादि ॥ ९ ॥

न तस्य वीर्य्यं प्रभावं वेत्तीति तस्मिन् न हि स्वतन्त्र ईश्वरः कस्याचिदपि शिक्षया किमपि करोतीति भावः । अशोभनं ब्रुवाणे इति जगदीश्वरे नीतिशिक्षणाऽनौचित्यात् धृष्टाय निःशङ्कभाषित्वादतिप्रगल्भाय निःशेषेण जितो मया, प्रेमवशीकृतः आत्मा परमात्मा सङ्कर्षणोऽपीत्यभिमानवते । रुषेति चित्रकेतुमहादेवयोरभिप्रायस्याऽज्ञानादेव रुष्टेयमिति न व्याख्येया किन्तु बहुभाषाणा इति हितमप्येतदस्मद्गुपादिदिक्षितमयं नैकस्मात् वारात् वापि त्रिचतुरान् किन्तु बहूनेव वारान् ब्रूते इति कोपे कारणं ज्ञेयम् ॥ १० ॥

विशेषेण प्रकर्षं करोतीति विप्रकृत शासनेन हितकृदित्यर्थः ॥ ११ ॥ १२ ॥

परिभूय मुहुरपि कठोरोक्त्या तिरस्कृत्य सूरीन् एतत्सभासदोऽप्यनभिज्ञान् ज्ञात्वा परिभूय जगद्गुरुं प्रशास्ति ॥१३॥

सम्भाविता अहं महाभक्त इत्यभिमानवती मतिर्यस्य सः ॥१४॥

अभिशापानन्तरमेव अहो किं कृतं निरपराधो हरिभक्तः शप्त इति पश्चात्तापवती प्राह—हे पुत्रेति । माता यथा दुर्नयं पुत्रं स्वहस्तेन प्रहरति प्रकृत्यैव पुनः शिक्षति तथैव त्वामहं दण्डयामीति भावः । अत एव मातृसमुचितमेवाह—भूय इति । बाल्यक्रीडाचापल्येन गृहविप्रियकारिणं शिशुं प्रहृत्य माता यथा ब्रूते हे अदान्त ! पुनरेवं न करिष्यमीति तद्वदेवेत्यर्थः अत एव भवान्याः सोऽभिशापश्चित्रकेतुं नापचकार प्रत्युत वृत्रजन्मनि प्रेमवृद्धिमेव प्राप. सत्यां प्रेमसम्पत्तौ भक्तानां पार्षदतनुत्वदैत्यतनुत्वयोरविशेषमननात् ॥१५॥ ॥१६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तदनुवृताः सभ्याश्च तूष्णीं बभूवुः ॥ ९ ॥

अतश्चार्यविदुषि अन्ये जलादौ मदनभयात्प्रविश्य तपोजपादिकं कुर्वाणाः मदनवश्या भवन्ति, शिवस्तु स्त्रियमुत्संगे विधायापि मदनवश्यो न भवतीत्यादि शिवप्रभावानभिज्ञे ॥ १० ॥

विरुद्धं प्रकर्षेण करोति तथा ॥ ११ ॥

पद्मयोन्यादयो धर्मं न जानंति अतिवर्तिनं धर्म्ममुल्लंघ्य वर्त्तमानं नोनिषेधन्ति न वारयन्ति अयं तेभ्योऽपि वृद्धः यतो हरं दुराचाराद्वारयतीति भावः ॥ १२ ॥

एषामित्यनेनास्मिन्नेव पुराणे शिवस्य पितृत्वेन वर्णितत्वाद्ब्रह्मणो व्यतिरिक्तानां अस्माकम् एषां भृग्वादीनाम् अनुध्येयपदाब्जयुग्मं सूरीनभिभूय प्रशास्ति अतो धृष्टः अतो दंड्यः ॥ १३ ॥

सम्भावितमतिः गर्वितबुद्धिः वैकुण्ठस्य हरेः पादमूलोपसर्पणं नार्हति ॥ १४ ॥

किल्बिषमपराधम् ॥ १५ ॥ १६ ॥

भाषा टीका ।

श्री शुक उवाच ॥

अगाध बुद्धि भगवान श्री शङ्कर और उस सभा जो सभ्य थे वे सब ही इस बात को सुनकर हसकर चुप होगये ॥ ९ ॥

श्री शङ्कर के प्रभाव को नहीं जानने वाले को सभा में ऐसे अयुक्त वोलने पर जितेन्द्रियाभिमानी उस ढीठ से पार्वतीजी क्रोधकर ऐसे बोली ॥ १० ॥

पार्वत्यु वाच ॥

पार्वतीजी बोली कि आज काल लोक में क्या यह, हमारे सदृश दुष्ट निर्लज्जों का दण्ड देने वाला नियामक स्वामी है ॥ ११ ॥

पद्म योनि (ब्रह्माजी) धर्म नहीं जानते और ब्रह्मा के पुत्र भृगु नारदादिक तथा सनत्कुमार कपिल मनु ये सब भी धर्म नहीं जानते हैं क्योंकि शास्त्र का अति-क्रमण करके वर्त्तने वाले श्रीमहादेव जी को ये लोग निषेध नहीं करते हैं ॥ १२ ॥

चित्रकेतुरुवाच ।

प्रतिगृह्णामि ते शापमात्मनोऽञ्जलिनाऽम्बिके ! ।
देवैर्मर्त्याय यत्प्रोक्तं पूर्वदिष्टं हि तस्य तत् ॥ १७ ॥
संसारचक्र एतस्मिन् जन्तुरज्ञानमोहितः ।
भ्राम्यन्सुखं च दुःखं च भुंक्ते सर्वत्र सर्वदा ॥ १८ ॥
नैवात्मा न परश्चापि कर्ता स्यात्सुखदुःखयोः ।
कर्तारं मन्यते प्राज्ञ आत्मानं परमेव च ॥ १९ ॥
गुणप्रवाह एतस्मिन्कः शापः कोन्वनुग्रहः ।
कः स्वर्गो नरकः को वा किं सुखं दुःखमेव वा ॥ २० ॥
एकः सृजति भूतानि भगवानात्ममायया ।
(१) एषां बन्धं च मोक्षं च सुखं दुःखं च निष्कलः ॥ २१ ॥
न (२) तस्य कश्चिद्दयितः प्रतीपो न ज्ञातिबन्धुर्न परो न च स्वः ।
समस्य सर्वत्र निरञ्जनस्य सुखे न रागः कुत एव रोषः ॥ २२ ॥
तथापि तच्छक्तिविसर्ग एषां सुखाय दुःखाय हिताहिताय ।
बन्धाय मोक्षाय च मृत्युजन्मनोः शरीरिणां संसृतयेऽवकल्पते ॥ २३ ॥
अथ प्रसादये न त्वां शापमोक्षाय भामिनि ! ।
यन्मन्यसे असाधूक्तं मम तत्क्षम्यतां सति ॥ २४ ॥

भाषाटीका ।

इन सबों के ध्यान करने योग्य युगल चरण कमल जिनका ऐसे जगद्गुरु स्वयं मंगल मूर्त्ति श्रीशंकर को ज्ञानियों का तिरस्कार करके, यह ढीठ प्रशासन (शिक्षा) करता है तस्मात् यह दण्ड योग्य है ॥ १३ ॥

यह साधुवों से उपासित श्री गोविन्द के चरण की शरणागति के योग्य नहीं हैं क्योंकि यह अपने को बड़ा मानने वाला और अनम्र ॥ १४ ॥

इसीसे हे दुर्मते ! अति पाप प्रचुर आसुरी योनी को तू प्राप्त हो हे पुत्र ! जिससे फिर तू फिर ऐसे महत्पुरुषों का अपराध न करे ॥ १५ ॥

श्रीशुक उवाच ॥

श्रीशुकदेव जी बोले कि ऐसे जब चित्र केतु शाप को प्राप्त हुआ तब हे भारत ! विमान से उतर कर नत मस्तक से श्री सतीजी को प्रसन्न करता हुआ ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पूर्वदिष्टं प्राचीनकर्म प्राप्तमेव ॥ १७ ॥

अयं च संसारचक्रस्वभाव एव न चित्रमित्याह—संसारचक्र इति ॥ १८ ॥

अत एवात्र मम च तव च न कोपि दोष इत्याह—नैवेति ॥ १९ ॥

एवं तावत्सुखदुःखादिकमङ्गीकृत्योक्तमिदानीं तदपि वस्तुतो नास्तीत्याह—गुणानां मायामयानां प्रवाहे संसारे ॥ २० ॥

ननु, मायागुणानाञ्चेदयं प्रवाहस्तर्हि तेषां जडत्वाद्बन्धमोक्षाद्यनुभवो न स्यात्तत्राह—एकः परमेश्वरो मायया निमित्तभूतया भूतानि प्राणिनः सृजति एषां बन्धादिकं च सृजति निष्कलः स्वयं बन्धादिशून्यः ॥ २१ ॥

ननु,एवंभूतविषमसृष्टौ तस्य किं कारणं ? प्रियादिवैषम्याभावादित्याशंक्य, यद्यपि प्रियादयो न सन्ति तथापि तत्तत्कर्मवशात्सर्वं घटत इत्याह—न तस्येति द्वाभ्याम् । प्रतीपोऽप्रियः न ज्ञातिर्बन्धुश्चेत्यर्थः तत्र हेतुः सर्वत्र समस्य तत्कुतः निरञ्जनस्य निःसङ्गस्य अत एव तन्निमित्ते सुखे रागो नास्ति रागानुबन्धो रोषः कुतः स्यात् ॥ २२ ॥

(१) येषां बन्धश्च मोक्षश्च, इति पाठान्तरम्--वीर०   (२) नै करयति पाठान्तरम्--वीर०

श्रीधरस्वामिकृतभावार्थदीपिका ।

यद्यप्येवं तथाऽपि तस्य शक्त्या मायया यो विसर्गः पुण्यपापादिलक्षणं कर्म एषां शरीरिणां सुखाद्यर्थमवकल्पते समर्थो भवति यथोक्तं गीतासु "भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः" इति ॥ २३ ॥

अथ तस्माद्भामिनि हे कोपने ! त्वां केवलं प्रसादयामि न तु शापमोक्षाय. तर्हि किं प्रसादनेनात आह ममोक्तमुक्ति साध्वप्यसाधुवन्मन्यसे तत्त्वया क्षम्यताम् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह—प्रतिगृह्णामीत्यादिना, क्षम्यतां सतीत्यन्तेन । तावत्त्वेव मम रोषो नास्तीति सूचयन् शापं स्वीकरोमीत्याह—प्रतिगृह्णामीति । हे अम्बिके ! ते त्वया दत्तं शापमात्मनोऽञ्जलिना प्रतिगृह्णाम्यंजलिबन्धपूर्वकं स्वीकरोमि मयि महाननुग्रहस्त्वया कृतो न तु निग्रह इति भावः । तदेव स्पष्टयति—देवैरिति. देवैर्यद्यत्प्रोक्तं निग्रहरूपमनुग्रहरूपं वा तत्सर्वं मेऽर्थैवप्रोक्तं, कुतः ? हि यस्मात्तद्देवैः प्रोक्तं तस्य निग्राह्यस्यानुग्राह्यस्य वा जन्तोः पूर्वदिष्टं प्राचीनकर्मप्रयुक्तं मोक्षविरोधिप्राचीनकर्मणा एवं भ्राम्यतो नितरां मुमुक्षोर्ममाशु तद्विरोधिप्राचीनकर्मफलरूपत्वाच्छापानुभवेन निःशेषनिरस्तकर्मबन्धस्य भगवत्प्राप्त्या नित्यनिरतिशयानन्दरूपमहाभ्युदयलाभात्त्वयानुग्रह एव कृत इति भावः ॥ १७ ॥

एतदेव स्फुटयितुं तावज्जन्तूनां कर्मभिर्भ्रमणमाह—संसारचक्र इति । एतस्मिंश्चक्रवत्परिवृत्तिशीले गर्भजन्मजरामरणादिरूपे संसारे अज्ञानेन ज्ञानेतरेणानादिपुण्यपापात्मकेन कर्मणा मोहितः स्वात्मपरमात्मयाथात्म्यज्ञानरहितः केवलदेहात्माभिमानी जन्तुर्भ्राम्यन्पुनःपुनः पूर्वपूर्ववासनानुरूपाण्युत्तरोत्तरसुखदुःखादिहेतुभूतानि कर्माणि कुर्वन् तत्फलं सुखं दुःखञ्च भुङ्क्ते एतच्च केवलमन्येषामेव जन्तूनां, किन्तु तवापीत्याशयेनाह—सर्वस्य सर्वदेति । सर्वस्यान्यस्य तव मम च सर्वदा यावन्मुक्ति एतत्समानमिति भावः; अन्यथा मत्कृतहेलनासचानादिकर्मप्रयुक्तदेहात्माभिमानमूलकः क्रोध एव न स्यादिति तात्पर्यम् ॥ १८ ॥

यत एव सत्कारन्यक्कारसुखदुःखादिकं सर्वमनादिकर्मनिमित्तमत एव त्वत्तिरस्कर्तुर्मम मां शपन्त्यास्तव च न दोष इत्याह—नैवेति । सुखदुःखयोः कर्ता कारकः सुखदुःखापदक इत्यर्थः आत्मा स्वयं परोऽन्यश्च न स्यान्नभवति. किन्तु तयोः कर्मैव निमित्तमिति भावः, कर्मणः क्षणिकत्वाज्जडत्वाच्च कथं तत् कालान्तरभावि सुखदुःखनिमित्तं ? तत्राह—कर्तारमिति । प्राज्ञः पुण्यपापयाथात्म्यवित् परमात्मानं परमपुरुषमेव सुखदुःखयोः कर्त्तारं मन्यते. अयं भावः, पुण्यपापे हि परमात्मनो निग्रहानुग्रहरूपे, तत्र श्रुतिस्मृत्याद्यात्मकशास्त्रार्थानुवर्त्तिन्यनुग्रहः परमपुरुषस्य, स एव हि पुण्यं नाम. अननुवर्त्तिनि तु निग्रहः, स एव हि पापं. एवञ्च परमपुरुष एव स्वशास्त्रानुवृत्त्यननुवृत्तिनिमित्तानुग्रहनिग्रहरूपपुण्यपापफलभूतयोः सुखदुःखयोः कर्तेति ॥ १९ ॥

एवं वैषयिकसुखदुःखयोः पुरुषार्थत्वापुरुषार्थत्वाभ्युपगमेन कर्मानुसारेणेश्वरस्तत्कर्त्तेत्युक्तम्. इदानीं वैषयिकसुखं विषमिश्रक्षीरवदन्ततो दुःखहेतुत्वादपुरुषार्थरूपमेवेत्याह—गुणप्रवाह इति । गुणानां प्रकृतेर्गुणानां सत्त्वरजस्तमसां प्रवाहरूपे परिणामरूपे एतस्मिन् प्रकृतिमण्डले जन्तूनां, कः शापः ? को वानुग्रहः ? उभयोर्वैलक्षण्यमेव दुर्वचमेवेति भावः; ननु, न दुर्वचन्तयोः स्वरूपं स्वर्गहेतुरनुग्रहः नरकहेतुर्निग्रह इति सुवचमेवेत्यत्राह—कः स्वर्गो नरकः को वेति स्वर्गनरकयोरपि स्वरूपं दुर्वचमेवेति भावः । ननु, स्वर्गः सुखं, दुःखं नरकमिति सुवचमित्यत्राह—किं सुखं दुःखमेव वेति. तदप्यव्यवस्थितमित्यर्थः स्वर्गस्य सुखरूपत्वे तस्य दुःखगर्भत्वं न स्यात् नरकस्य दुःखरूपत्वे वा तस्य सुखगर्भता न स्यात् स्वर्गोऽप्यन्ततो दुःखहेतुः नरकोऽप्यन्ततः किञ्चित्सुखहेतुरेव अत उभयोरुभयगर्भत्वात् न परस्परस्य व्यवस्थितिरिति भावः । शापनरकदुःखानि दृष्टान्तार्थतया उपात्तानि यथा, तेषु पुरुषार्थत्वं तद्धेतुत्वञ्च नास्ति तथानुग्रहःस्वर्गसुखेष्वित्यर्थः ॥ २० ॥

नन्वेवंविधसुखदुःखभाञ्जि भूतानि किमकस्मात्स्वयमेवोत्पद्यन्ते ? नेत्याह—एक इति । भगवान्निरस्तनिखिलदोषः षाड्गुण्यपूर्णः परमपुरुषः आत्मनः स्वस्य मायया स्वयमेकः निस्समाभ्यधिकः स्वसमाभ्यधिककर्त्रन्तरोपकरणान्तरनिरपेक्ष एव भूतानि देवमनुष्यादीनि चिदचिदात्मकानि आब्रह्मस्तम्बपर्यन्तानि सृजति. न तु तान्यकस्मादुत्पद्यन्त इति भावः, तर्हि किं कुलालादिवत्कर्माधीनदेही भगवान् ? नेत्याह—निष्फलः कर्मायत्तपाणिपादाद्यवयवात्मकदेहरहितः, तस्य वैषम्यनैर्घृण्यादिदोषपरिहाराय भूतानि विशिनष्टि—येषामिति, येषां भूतानां स्वस्वकर्मानुगुणबन्धमोक्षादिकं भवति तानि सृजतीत्यन्वयः, बन्धमोक्षमिति द्वितीयान्तपाठे येषां भूतानां तत्तत्कर्मानुसारेण बन्धादिकञ्च सृजति, स एव तानि भूतान्यपि सृजति, न ततोऽस्य वैषम्यादिदोष इत्यर्थः एषामितीदंशब्दपाठे बन्धमित्यादीनाञ्च द्वितीयान्तपाठे तु सृष्टानामेतेषां भूतानां तत्तत्कर्मानुसारेण बन्धादिकमपि सृजतीत्यर्थः एवं बन्धादिकं देवमनुष्यादिवैचित्र्यञ्च तत्तज्जीवकर्मानुसारेण तेषां तेषामीश्वरकृतमौपाधिकं न स्वरूपप्रयुक्तमित्युक्तं भवतीत्यर्थः ॥ २१ ॥

कीदृशं तर्हि जीवस्य स्वरूपं ? कुतस्तस्य कर्म ? यतो देवादिवैचित्र्यं बन्धादिकं चेत्यपेक्षायामाह—न कस्येति । वस्तुतः कस्यापि जीवस्य कश्चिदपि दयितादिर्नास्ति, कुतः ? सर्वत्र देवादिशरीरेषु समस्य समत्वेनावस्थितस्य ज्ञानैकाकारतया ज्ञानानन्दस्वरूपत्वेन चावस्थितस्येत्यर्थः परस्परतारतम्ये हि प्रियाप्रियादिविभागः सर्वेषामात्मनामेकरूपत्वान्न स्वरूपकृतः प्रियाप्रियादिविभाग इति भावः । ननु, देवादिरूपेण वैचित्र्यात्कथं समत्वं ? तत्राह—निरञ्जनस्येति । अञ्जनं रूपान्तरापत्तिः तद्रहितस्य देवादिवैचित्र्यस्य प्रकृतिगतत्वाज्जीवस्वरूपगतत्वाभावात्स सर्वत्र सम इति भावः, यत एव समो निरञ्जनश्च, अत एव तस्य वैषयिकसुखे न रागः नासक्तिः सुखैकतानस्वरूपत्वेन वैषयिकसुखलेशे न तस्य राग इति भावः यत एव सुखे न तस्य रागः कुतस्तरां ? तस्य वैषयिकसुख-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

लाभप्रतिबन्धकविषयो रोषः स्यादित्यर्थः तत्र दयितः प्रीतिविषयः अनुकूल इति यावत् प्रतीपः प्रतिकूलः ज्ञातिः सपिण्डः बन्धुर्वैवाहिकादिसम्बन्धवान् परोऽन्यदीयः स्वः स्वकीयः ॥ २२ ॥

एवं प्रकृतिविलक्षणं स्वाभाविकं जीवस्वरूपमुक्तमथैवंभूतस्य दैवादिवैचित्र्यं बन्धादिकं चोपपादयति–तथापीति । यद्यप्येवंभूता जीवाः तथाप्येषां शरीरिणां जीवानां तच्छक्तिविसर्ग एव तस्य तज्जीवसम्बन्धिकर्मणो या शक्तिर्वासनारूपा शक्तिः तस्या विसर्गः सृष्टिस्तत्तत्कर्मैव सुखादिरूपसंसृतये मोक्षाय चावकल्पते समर्थं भवति तन्निमित्तमित्यर्थः; अयं भावः, स्वभावतः पूर्वोक्तविधानामपि बीजाङ्कुरन्यायेनानादिकर्मवासनामात्रावशेषितानां कल्पान्ते परमात्मन्युपसंहृतानां पुनः कल्पादौ परमकारुणिकेनेश्वरेण स्वाराधनेनैते निस्तरेयुरित्यनुजिघृक्षुणा प्रदत्तकरणकलेबरधर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयतत्साधनावबोधिवेदाख्यशास्त्राणामध्ययनादिवासनया "अन्नं भोज्यं मनुष्याणां, श्वपशूविट्तृणाहारौ" इत्याद्युक्तरीत्या ईहमानानां पुण्यपापरूपकर्मोपनिपाततत्फलानुभवपुनस्तदर्थकर्मोपनिपाततत्फलानुभवादिपरंपरया सर्वमुपपन्नमिति, तत्र हिताहिताय सुखदुःखहेतुभूतधर्माधर्माय मृत्युजन्मनोः जन्ममरणाभ्यामित्यर्थः ताद्‌र्थ्यस्य बन्धसामान्यत्वेन विवक्षया षष्ठी प्रयुक्ता मोक्षाय च तच्छक्तिविसर्ग एवावकल्पत इत्यनेन भगवत्प्रसादहेतुः कश्चिद्यादृच्छिकानुषङ्गिकप्रासंगिकाद्यन्यतमः पुण्यपापकर्मविशेष एव मोक्षोपायोपसंहारहेतुरिति सूचितम् ॥ २३ ॥

एवं वस्तुस्थितिमभिधाय त्वच्छापोऽनुग्रह एवेति वदन् स्वापराधं प्रतिक्षमापयति–मत इति । अतः वस्तुस्थितेरेवंविधत्वात्, हे भामिनि, शापनिर्हरणाय त्वां न प्रसादये न प्रार्थये, किन्तु हे सति, मम मया यदुक्तमसाधु यथातथा मन्यसे तत् क्षम्यतामिति त्वां प्रसादये ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पूर्वदिष्टं पूर्वजन्मनि यत्पुण्यपापलक्षणं कर्म देवैर्मनुष्यैश्च धर्मोक्तं विहितं तस्य मर्त्यस्य तत्कर्म ह्येव सुखदुःखयोः कारणमिति शेषः ॥ १७ ॥

तदेव विविनक्ति—संसार इति । सर्वत्र जन्मसु ॥ १८ ॥

ननु, सुखदुःखोत्पत्तौ किं भोक्ता कारणमुतेतर इत्याशंक्य यद्भगवता क्लृप्तं तदेव नियमं कर्म कारणं ज्ञानी मन्यते तत्राज्ञानी स्वमन्यं वा मन्यत इत्याह–नैवेति । आत्मा स्वयं परः स्वस्मादितरः अं हरिं जानातीत्यज्ञः श्रीहरिस्वज्ञः परमात्मानमेव मन्यत इति च योजनाऽवगन्तव्या "यत्तद्भगवता क्लृप्तं तदेव नियतं भवेत्" इति वचनात् ॥ १९ ॥

यत एवं श्रीहरिणा क्लृप्तमायातीत्यतः शापादिप्राप्तौ दुःखादिकं न कार्यमित्याह—गुणेति । गुणप्रवाहे संसारे शापादेः श्रीहरीच्छाधीनप्राचीनसुकृतदुष्कृतयोः कारणत्वात्स्वर्गस्य चानित्याल्पसुखत्वान्नरकस्य किंचिद्दुःखत्वा चपणासंभवात् सुखादेश्चाल्पत्वादनित्यत्वाच्च. तदुक्तम्—

> "अतोऽन्येषां वरः शापो गुणदोषः प्रकल्पिता ।
> स्वतः प्राप्ता भेदकृतिर्वासनारूपिणी यथा ॥
> विद्यमानस्य मनसि पुनः स्वप्नेऽपि दर्शनम् ।
> भगवद्वशता यस्मात्सर्वेषां क्षेयमेव तत्" इति ॥

स्वतः स्वतन्त्राद्धरेः प्राप्ताकरणी भेदकृतिर्दृश्यत इति शेषः अनेनैतदुक्तं भवति, मनसि विद्यमानस्य वासनारूपिणो वस्तुनः स्वप्ने यथा दर्शनं तथा परादनित्यसुखादिदर्शनं स्यात् न चैतत्सर्वं स्वाधीनं किं तु हरीच्छाधीनमिति ॥ २० ॥

ननु, हरीच्छादिनियतत्वं शापादेः कस्मात्कल्प्यत इति तत्राह–एक इति । कर्मादिसत्तापीशेच्छाधीनेति सूचनायैक इति आत्ममायेत्यनेनानन्यनियत इति सूचितम् ॥ २१ ॥

हरेः समत्वं च स्वभक्तसेवानतिरेकेण फलदातृत्वं शत्रोरप्यपराधानतिरेकेण दण्डकरणत्वं सेवायोग्यातिरेकेण स्वानामपि न दास्यति "अपराधातिरेकेण नान्यस्यातः समो हरिः" इति वचनात् ॥ २२ ॥

यद्यपि विशेषतोऽनुरागादिकं नास्ति तथापि तस्य हरेः शक्तेर्विसर्गो विशिष्टस्य भाव एषां जीवानां सुखाद्यर्थे कल्पत इत्यन्वयः यद्यपि भगवानेव मुख्य कर्ता तथापि तेषां पूर्वकर्मणा शक्तीनां विविधसर्गः समूहो येषां शरीरिणामिति वा ॥ २३ ॥

अथ तस्मादीश्वराधीनत्वात् तर्हि किमाकांक्षसीति तत्राह–यदीति ॥ २४—२६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पूर्वदिष्टं हीति पूर्वादिष्टेनैव हि ममैषा बुद्धिर्जातेति । ननु, केवलगुणहेतुत्वे चेतनं कर्तारं विना बन्धमोक्षादिकं जीवानां न स्यात्. तत्राह—एक इति ॥ १७—२३ ॥

यद्यदि मन्यसे अनुगृह्णासि तत्तदा मम असाधूक्तं क्षम्यताम् ॥ २४—२६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रतिगृह्णामीति ममानेन शापेन कापि क्षतिर्न भविष्यति महादेवे त्वच्छत्यकृतापराधत्वादिति भावः, निरागस्काय मह्यं शप्तवत्यास्तवापि नात्र कोपि दोष इत्याह देवैरिति पूर्वदिष्टं प्राचीनकर्म प्राप्तमिति भक्तस्य तस्य स्वार्तिस्तथा भावना दैन्येन समुचितैव वस्तुतस्तु जातप्रेम्णस्तस्य कुतः कर्मगन्धोऽपि प्रेम पूर्वदशायामेव "क्षीयन्ते चास्य कर्माणि मयि दृष्टेऽखिलात्मनि" इत्यादिना सर्वकर्मक्षयोक्तेः । हरेर्भक्तवश्यत्वप्रसिद्धिर्भक्तानां कर्माधीनत्वे सति न सिद्ध्येत् नहि स्वयं

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

कर्माधीनो भगवन्तमधीनमायं वशीकुर्य्यादिति, ततश्च तस्य शापानुग्रहस्वर्गापवर्गनरकादिसमदर्शित्वमहाबलख्यापनार्थं विद्याधराधिपत्यकुपथ्यदूरीकरणार्थं स्वविरहोष्मणा प्रेमक्षुद्विवर्द्धनार्थं स्वीयवैकुण्ठगतस्वचरणसाक्षात्सेवामहामाधुर्य्यभोगप्रदानार्थं च स्वेनैवान्तःप्रेरितया देव्याऽभिशापः श्रीसङ्कर्षणदेवेनैव भगवता स्नेहवता पित्रेव कारित इति तत्त्वं तत्तत्फलदर्शनादवगतम् ॥१७॥

अयञ्च संसारचक्रस्वभाव एव न चित्रम् इत्याह—संसारेति ॥ १८ ॥

अप्राज्ञोऽविवेकी ॥ १९ ॥

एवं तावत् सुखदुःखादिकमङ्गीकृत्योक्तम् । इदानीन्तु लवणाकरे पतितः सर्वो लवणरस इव संसारे सर्व एव पदार्थः संसार इति सुखदुःखादिभेदावगमो नोपपद्यत इत्याह—गुणप्रवाह इति । न ह्यनलस्पर्शप्रवाहमध्ये पतितस्य यावत्तटानवाप्तिः तावत् किमपि वस्तुनः सुखायेत्यतः शापानुग्रहादिकं सर्वमपि दुःखमेवेति भावः ॥ २० ॥

ननु, तर्हि अत्र गुणप्रवाहे को वा पातयिता ? को वास्मादुद्धर्ता? इति चेद्भगवानेवेत्याह—एक इति । आत्ममायया रजसा सृजति, सत्त्वेन पालयति, तमसा संहरति. एषां बन्धञ्चाविद्यया सृजति, विद्यया मोक्षञ्च, सत्त्वेन सुखं, तमसा दुःखञ्च. निष्कलः कला माया तद्रहितः ॥ २१ ॥

ननु, तस्य कश्चित् प्रियोऽप्रियश्च जीवोऽवश्यं वर्त्तत एव यतः कमपि बध्नाति कमपि मोचयति कमपि दुःखयति कमपि सुखयतीत्यत आह—नेति । न ज्ञातिर्नबन्धुः तत्र हेतुः सर्वत्र समस्य समत्वे हेतुः निरञ्जनस्य अञ्जनं माया तद्रहितस्य अतएव सुखे विषयसुखे राग आसक्तिर्नास्ति विषयसुखप्रातिकूल्ये रोषो द्वेषः कुतः स्यात् यदुक्तम् "इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ" इति अतएव रागद्वेषमूलकौ दयितप्रतीपौ तस्य न स्त इति भावः ॥ २२ ॥

एवं तस्य साम्यञ्चेत्तर्हि कथं कमपि स सुखयति कमपि दुःखयति ? इत्यत्राह—तथापीति । यद्यपि स सर्वत्र समस्तदपि तस्य शक्त्या मायया यो विसर्गः अनादिपुण्यपापादिलक्षणकर्मपरम्परा स एव सुखाद्यर्थमवकल्पते । अयमर्थः यद्यपि मायायास्तच्छक्तित्वात् स एव सुखदुःखादिकं सृजतीति तस्य वैषम्यमेव, तदपि मायायाः स्वरूपशक्तित्वाभावात् स न सुखदुःखादि सृजतीति, वस्तुतस्तस्य साम्यमेव. यथा मायिकविश्वस्य भगवद्रूपत्वेऽपि न भगवत्स्वरूपभूतत्वमिति यथा सूर्य्यसम्बन्धिन आतपस्य घूककुमुदादीनां दुःखदत्वेन चक्रवाककमलादीनां सुखदत्वेन वैषम्येऽपि सूर्यस्य तेषु वैषम्यं कोऽपि न वर्णयति तद्वदिति भावः ॥ २३ ॥

अथ अहं त्वां केवलं प्रसादयामि न तु शापमोक्षाय. हे भामिनि, अविचारेण कोपने ! ननु, तर्हि किं प्रसादनेन तत्राह—मयोक्तं साध्वपि यदसाधु मन्यसे तदसाध्वेवास्तु त्वया चुम्यतां मम तु शापे शापान्ते वा दुःखसुखयोरभावस्ततः प्रसन्नापि शापान्तं माकार्षीरिति भावः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पूर्वदिष्टं पूर्वेण भगवतैव प्रारब्धकर्मानुसारिणा दिष्टम् आदिष्टम् ॥ १७ ॥

सर्वत्र सर्वेषु लोकेषु सर्वदा सर्वेषु भूतेषु पूर्वदिष्टमित्यनुषङ्गः ॥ १८ ॥

तमेवं भगवन्तं सुखदुःखयोर्हेतुं मन्यमानः आत्मनः परस्य च तद्धेतुतां निराकरोति—नैवेति । सुखदुःखयोः आत्मा स्वयं कर्ता न स्यात् परोऽन्यश्चापि नैव स्यात् अप्राज्ञस्तु आत्मानं परञ्च कर्तारं सुखदुःखहेतुं मन्यते प्राज्ञस्तु परमात्मानमेव कर्तारं हेतुं मन्यत इति भावः——

"सुखं दुःखं भवो भावो भयं चाभयमेव च ।
अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ॥
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः" ॥

इतिश्रीमुखोक्तेः ॥ १९ ॥

आद्ये प्रविष्टस्यैव संसारे पतितस्य पुनः कः शापादिरिति वैराग्यार्थमाह—गुणप्रवाह इति । गुणप्रवाहे भगवन्मायागुणप्रवाहे संसारे ॥ २० ॥

एवम्भूते संसारे प्रविष्टस्य जीवस्य जन्मबन्धमोक्षादिषु भगवानेव हेतुरित्याह—एक इति । मायया सत्त्वादित्रिगुणया भूतानि देवतिर्यगादीनि सुखदुःखादिभाजनानि सृजति ॥ २१ ॥

सर्वत्र समस्यापि भगवतो विषमसुखदुःखादिदातृत्वे तत्तत्कर्मैव कारणमित्याह—न तस्येति द्वाभ्याम् । प्रतीपः प्रतिकूलः निरञ्जनस्य अज्यते इत्यञ्जनं प्राकृतदेहेन्द्रियसम्बन्धस्तद्रहितस्य अत एव तन्निमित्ते सुखे रागो न भवति रागनिमित्तो रोषः कुतो भवति ॥ २२ ॥

तथापि तस्य भगवतः शक्त्या सत्त्वादित्रिगुणया यो विसर्गः सात्त्विकादिलक्षणं कर्म, एषां देवादीनां सुखाद्यर्थं कल्पते समर्थो भवति तत्तत्कर्मनिमित्तीकृत्य भगवान् सुखादिकं देवादिभ्यो ददातीति फलितोऽर्थः ॥ २३ ॥

अथ अतो हेतोः हे मामिके ! त्वां शापमोक्षाय न प्रसादये किन्तु ममोक्तं साध्वपि यदसाधु मन्यसे तत् हे सति, क्षम्यताम् इति त्वां प्रसादयामि ॥ २४ ॥

भाषाटीका ।

चित्रकेतुरुवाच ॥

हे अंबिके ! आपकी शाप को अपनी अंजलि से प्रति ग्रहण करता हूं । क्योंकि देवताओं ने मनुष्य को जो कुछ कहा वह उसकी पूर्वकी प्रारब्ध है ॥ १७ ॥

श्रीशुक उवाच ।

इति प्रसाद्य गिरिशौ चित्रकेतुररिन्दम ! ।
जगाम स्वविमानेन पश्यतोः स्मयतोस्तयोः ॥ २५ ॥

ततस्तु भगवान् रुद्रो रुद्राणीमिदमब्रवीत् ।
देवर्षिदैत्यसिद्धानां पार्षदानां च शृण्वताम् ॥ २६ ॥

श्रीरुद्र उवाच ।

दृष्टवत्यसि सुश्रोणि ! हरेरद्भुतकर्मणः ।
माहात्म्यं भृत्यभृत्यानां निःस्पृहाणां महात्मनाम् ॥ २७ ॥

नारायणपराः सर्वे न कुतश्चन बिभ्यति ।
स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥ २८ ॥

देहिनां देहसंयोगाद् द्वन्द्वानीश्वरलीलया ।
सुखं दुःखं मृतिर्जन्म शापोऽनुग्रह एव च ॥ २९ ॥

अविवेककृतः पुंसो ह्यर्थभेद इवात्मनि ।
गुणदोषविकल्पश्च भिदेव स्रजिवत्कृतः ॥ ३० ॥

वासुदेवे भगवति भक्तिमुद्वहतां नृणाम् ।
ज्ञानवैराग्यवीर्याणां नेह कश्चिद्व्यपाश्रयः ॥ ३१ ॥

नाहं विरिञ्चो न कुमारनारदौ न ब्रह्मपुत्रा मुनयः सुरेशाः ।
विदाम यस्येहितमंशकांशका न तत्स्वरूपं पृथगीशमानिनः ॥ ३२ ॥

भाषा टीका ।

इस संसार चक्र में अज्ञान मोहित जंतू भटकता हुआ सदा सब जगे सुख और दुःख भोगता है ॥ १८ ॥

सुख दुःख का कर्त्ता न आप है न पर है । प्राज्ञ पुरुष परमात्मा ही को कर्त्ता मानता है ॥ १९ ॥

गुणों के प्रवाह वाले इस संसार में शाप और अनुग्रह क्या ? एवं स्वर्ग और नरक तथा सुख और दुःख क्या है ॥ २० ॥

एक भगवान अपनी माया से प्राणियों को सृजता है । और इनके बंध मोक्ष और सुख दुःख को भी सृजता है, और आप स्वयं निर्लेप है ॥ २१ ॥

न उस परमात्मा का कोई प्रिय न कोई विरुद्ध, न ज्ञाति न बंधु न अपना न पराया क्योंकि वह सर्वत्र सम है और निःसंग है उसका सुख में भी राग नहीं तो फिर द्वेष कहां से होगा ॥ २२ ॥

तथापि उसकी मायाशक्ति की रचना जो है वही इन-जन्तुओं के सुखदुःख, हित अहित, बन्धमोक्ष, इत्यादि रूप-संसार के लिये समर्थ होती है ॥ २३ ॥

हे भागिनि ! (कोपस्वभाववाली) अब मैं आप को शाप छुडाने के लिये नहीं प्रसन्न करता हूं । हे सति मेरे कथन को जो आपने अयुक्त समझा है, उसकी माफ क्षमा कीजिये ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

गिरिशौ भवानीशङ्करौ प्रसाद्य स्मयतोर्विस्मयङ्कुर्वतोः सतोः ॥ २५ ॥ २६ ॥ २७ ॥

स्वर्गादावेव तुल्योऽर्थः प्रयोजनमिति द्रष्टुं शीलं येषां ते तथा ॥ २८ ॥

तत्र तदुक्तमेव हेतुमाह-द्वाभ्याम् । देहिनां सुखं दुःखमित्यादि द्वन्द्वानीश्वरस्य लीलया मायया भवन्ति तेषु च गुणदोष-विकल्पश्चेत्यन्वयः ॥ २९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इष्टानिष्टभेद इवयः स्फुरति स आत्मन्यर्थभेदः सुखादिभेदः पुंसः स्वप्ने यथा अविवेककृतो भवति स्रजिवत्सर्पमालादिभिर्यथा तथैव कृत इत्यर्थः । स्रग्वदिति वक्तव्ये स्रजिवदित्यार्षं पाठान्तरे तु सुगमम् ॥ ३० ॥

अतो भागवतानां निःस्पृहत्वमुचितमेवेत्याह—वासुदेव इति । ज्ञानवैराग्ययोर्वीर्यं बलं येषां तेषां व्यपाश्रयो विशिष्टबुद्ध्या आश्रयणीय अर्थो नास्ति ॥ ३१ ॥

अस्य च हरिदासत्वेन तत्स्वभावत्वान्नैतच्चित्रमिति वक्तुं हरेर्माहात्म्यमाह—नाहमिति द्वाभ्याम् । ईहितमभिप्रायं लीलां वा यदा वयं न विद्मस्तदा तस्य स्वरूपमंशांशका अपि सन्तः पृथगीशमानिनो न विदुरेव ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इतीत्थं गिरिजां पार्वतीं प्रसाद्य प्रसन्नां कृत्वा चित्रकेतुः हे अरिन्दम, स्मयतोः आश्चर्यं प्राप्तयोः तयोर्भवभवान्योः पश्यतोस्ततः विमानेन गमनसाधनेन जगाम ॥ २५ ॥

ततश्चित्रकेतोर्गमनानन्तरं रुद्रः रुद्राणीमम्बिकांप्रति इदं वक्ष्यमाणं देवर्षिप्रभृतीनां स्वपार्षदानाञ्च शृण्वतां सतामब्रवीत् ॥ २६ ॥

तदेवाह—दृष्टवतीत्यादिना, समदर्शिष्वित्यन्तेन । हे सुश्रोणि ! अद्भुतकर्मणः विविधविचित्रस्वाभाविकक्रियाशक्तेर्हरेर्भगवतो भृत्यवर्गाणां माहात्म्यं दृष्टवत्यसि कथंभूतानां निःस्पृहाणां वैषयिकं सुखमनिच्छतां महात्मनाम् अपकर्तृष्वप्युपकर्तृत्वबुद्धीनां सुखदुःखयोः समबुद्धीनाञ्चेत्यर्थः ॥ २७ ॥

एतद् दृष्टान्तेन अन्यानपि भगवद्भक्तानीदृशानेवाऽहो इत्याह—नारायणपरा इति । सर्वे नारायण एव परः परतत्त्वं येषां ते कुतश्चन अर्वाचीनस्य निग्रहादेर्न बिभ्यति भयं न कुर्वन्ति, कुतः ? यतस्ते स्वर्गादिष्वपि तुल्यार्थदर्शिनः तुल्यप्रयोजनदर्शिनः विषमार्थदर्शनमेव भयहेतुरिति भावः । अपवर्गोऽत्र कैवल्यं मोक्षस्य भगवदनुभवरूपत्वेन तेषां तस्य स्वर्गादितुल्यत्वकथनानुपपत्तेः यद्वा अपवर्गो मुक्तिरेव भगवद्दास्यानन्तर्येण तेषां न प्रयोजनं किं पुनस्स्वर्गादिस्तेषां न प्रयोजनमिति सूचनार्थं वाऽपवर्गशब्दः प्रयुक्तः स्वर्गस्यापि नरकतुल्यताख्यापनाय नरकशब्दः, यथा नरकस्तथा स्वर्गोऽपीत्यर्थः, तथा चोक्तम्—

"एते वै निरयास्तात स्थानस्य परमात्मनः" इति ।

"वासुदेवे मनो यस्य जपहोमार्चनादिषु ।
तस्यान्तरायो मैत्रेय ! देवेन्द्रत्वादिकं फलम् ॥"

इति च स्वर्गादिषु तुल्यार्थदर्शित्वकथनेन विषमदर्शनं भयहेतुरिति सूचितम् ॥ २८ ॥

तत्र समदर्शननिमित्तं वक्तुं तावद्विषमदर्शननिमित्तमाह—देहिनामिति द्वाभ्यां । तावद्देहिनां जीवानाम् ईश्वरलीलया हेतुभूतया ईश्वरस्य लीलात्मिकया जगत्सृष्ट्या यो देहसम्बन्धः तस्मादेव सुखदुःखादीनि द्वन्द्वानि भवन्ति, न तु स्वरूपत इति निर्विवादं, देहसंयोगमात्र एवेश्वरलीलाहेतुभूता, न तु द्वन्द्वेषु वा देहयोगवैचित्र्ये वा हेतुरिति तात्पर्यम् ॥ २९ ॥

तर्हि तत्र को हेतुः ? तत्राह—अविवेककृत इति । आत्मनि ज्ञानैकाकारे जीवे अर्थभेद इव देवमनुष्यत्वादिभेद इव गुणदोषविकल्पः गुणाः सुखजन्मानुग्रहाः दोषाः दुःखमृतिशापाः एषां विकल्पः भेदः अविवेककृतः अनादिकर्मनिमित्तो यो देहात्मभ्रान्तिस्वतन्त्रात्मभ्रान्तिरूपोऽविवेकः तेन कृतः तन्निमित्त इत्यर्थः । अर्थभेदस्याविवेककृतत्वासिद्धत्वात्कारणे सदृष्टान्ततः उभयमप्यविवेककृतमिति तात्पर्यम्. अत एवार्थभेदस्याविवेककृतत्वं देहात्मभ्रान्तिमतां पुरुषाणामप्रसिद्धमिति, तस्य दृष्टान्तत्वमस्वरसमित्यभिप्रेत्य तत्प्रसिद्धं दृष्टान्तान्तरमाह—भिदेव स्वप्नकल्पितेति । यथा स्वप्नकल्पिता भिदा भेदः अविवेककृतः तथा गुणदोषविकल्पोऽप्यविवेककृत इत्यर्थः यथाऽपवरकादिषु शयानस्य एकस्य पुरुषस्य स्वप्नद्रष्टुः स्वस्मिन्वस्तुतोऽविद्यमान एव गजस्कन्धारोहणदेशान्तरगमनराज्याभिषेकशिरश्छेदाद्यहंवेदभेदस्तन्मात्रानुभाव्यः तत्कालमात्रावसायी च तत्तत्कर्मनिमित्तदेहात्मभ्रान्त्याद्यनुगुणमीश्वरकल्पितोऽविवेककृतः तथा जाग्रदवस्थानुभाव्यसुखदुःखादिद्वन्द्वजालानि देवादिवैचित्र्याणि च तत्तत्कर्मतन्मूलकदेहात्माभिमानाद्यनुगुणमीश्वरकृतान्यप्यविवेकमूलकान्येवेति भावः ॥ ३० ॥

एवं भयनिमित्ते विषमदर्शनेऽविवेक एव हेतुरित्युक्तम् अथ नारायणपरायणानामीदृशाविवेकाभावात्कथञ्चिदुपजातस्याप्यविवेकस्य पुनः स्वात्मपरमात्मयाथात्म्यानुदर्शने तदपोहात्तन्मूलकं विषमदर्शनं तन्मूलकं भयञ्च नास्तीत्याह—वासुदेव इति । ज्ञानं शास्त्रजन्यं प्रकृतिपुरुषेश्वरयाथात्म्यावमर्शनरूपं तत्प्रयुक्तं वैराग्यं शब्दादिविषयेष्वनासक्तिरूपम् एतदुभयमेव. वीर्यं बलं येषां तेषां वासुदेवे भगवति निरतिशयानन्दरूपे भक्तिमुद्वहतां कुर्वतां नृणां कुतश्चिदपि हेतोर्व्यपाश्रयः व्यपगत आश्रयः यस्मात्तद्व्यपाश्रयं यस्मात् विषमदर्शनादाश्रयः आश्रयमाणः परमात्मा व्यपगतो भवति विस्मृतो भवति तादृशं विषमदर्शनं नास्तीत्यर्थः निरन्तरं प्रकृतिपुरुषेश्वरयाथात्म्यावलोकनतत्प्रयुक्तवैराग्यबलाभिस्मृतदेहतदनुबन्धितद्धर्माणां निरतिशयानन्दरूपभगवद्भक्तिनिष्ठानामविवेकाभावात्कथञ्चित् आपतितस्याप्युक्तनिबर्हणवैराग्यबलेन तन्निरसनशीलत्वाच्च तेषां विषमदर्शनमेव नास्ति, कुतः, तन्निमित्तं भयमिति भावः ॥ ३१ ॥

एवं स्वभार्यायै नारायणपरायणानां माहात्म्यमजानत्यै तत्प्रदर्शितं रुद्रेण, अथ स्त्रीस्वभावत्वात्सर्वेश्वरे सर्वकारणे त्वयि त्वद्भक्तेषु मा त्वत्तुल्यत्वाभिप्रायस्य नारायणस्य तद्भक्तानां वा समुद्रे विप्रुडिव किंचित्तन्माहात्म्यमित्याशङ्कमानां प्रत्याह—नाहमिति । अहं रुद्रः अस्मदादयो यस्य नारायणस्य ईहितं 'सात्वकः'

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ईहां चेष्टां तत्स्वरूपञ्च न विदामः न जानीमः ईहा च जगद्व्यापाररूपा चेष्टा, अज्ञाने हेतुः, अंशांशकाः तदाहिततज्ज्ञानशक्तिलेशयुक्ताः तन्मात्रेणैव वयमपि पृथगीश्वरा इत्यभिमानयुक्ताः, अनेन स्वस्मिन् सर्वेश्वरत्वशङ्का निवारिता. ईहितं न विदामेत्यनेन कारणत्वशङ्कापि, सृष्ट्यादिव्यापारस्य तत्कर्तृकत्वकथनात्. स्वरूपं न विदामेत्यनेन तत्स्वरूपस्यानन्तमहिमशालित्वमपरिच्छिन्नत्वञ्चोक्तं. तत्र विरिञ्चो ब्रह्मा कुमारः सनत्कुमारः ब्रह्मपुत्राः मरीच्यादयः मुनयः तद्व्यतिरिक्ता अन्ये मुनयः सुरेशाः इन्द्रादयः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरेर्भृत्यभृत्यानां माहात्म्यं देहवियोगलक्षणावस्थाप्राप्तावप्यभ्रासलक्षणम् ॥ २७ ॥

अस्यैव नैतादृशमाहात्म्यं किन्त्वन्येषामप्यस्तीत्यभिप्रेत्याह—नारायणेति । कुतो न बिभ्यतीति तत्राह—स्वर्गेति ॥ २८ ॥

द्वन्द्वानीत्युक्तविवरणं सुखमित्यादि ईश्वरलीलया देहसंयोगात् द्वन्द्वानि भवन्तीतिशेषः ॥ २९ ॥

ननु, देहसम्बन्धाद्द्वन्द्वादीनि सन्त्वस्य श्वशृगालाद्याकारेण भेदः किं कृतः ? इति तत्राह—अविवेककृत इति । इहात्मनि जीवे श्वायं शृगालोऽयमित्याद्याकारनिमित्तव्यवहारभेदः पुंसोऽविवेकेन हरेः स्वस्य च स्वरूपविषयज्ञानाभावेन कृतो यस्मात्तस्मादियमनर्थपरम्परा किञ्चात्मन्ययं गुणोयोस्त्वयं दोषोऽस्तीति विकल्पश्चाविवेकेन कृतः कथमिव स्वप्ने कल्पिता वासनोपादानकृता गजादिलक्षणा भिदेव अनित्यत्वादेवैतत्साम्यं न तु मिथ्यात्वात्, अन्यथार्थक्रियायोग इति ॥ ३० ॥

तर्हि अस्यानर्थस्य निवृत्तौ किं साधनमिति तत्राह—वासुदेव इति । अन्यः कश्चिद्विशिष्टाश्रयो नास्ति भक्तिज्ञाने एवेति शेषः ॥ ३१ ॥

देवदत्तज्ञानवदस्य ज्ञानं न सुसाधनमित्याह—नाहमिति ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

दृष्टवत्यसि भवच्छापेऽपि भयाभावेन तर्कितवत्यसि किम् ॥२७॥

श्रीनारायणं विनान्यत्र ज्ञानोपादानदृष्टिराहित्यादपवर्गे इव स्वर्गे इव नरकेऽपि तुल्यमेकमेवार्थं नारायणरूपपुरुषार्थं द्रष्टुमनुभवितुं शीलं येषां ते. तुल्यशब्दस्यैकवाचित्वम् "रथाङ्गं नाम्नाः समानपदे" इतिवत् ॥ २८—२९ ॥

अविवेकेत्यस्य टीकायां तेतु चेत्यव्याहृतं । इदानीन्तेति गुणा दोष विकल्पस्य व्याख्येयं भिदा यथेत्यत्र भिदाचेति ज्ञेयं चका रान्वयात्तत्कृत इति पाठान्तरम् ॥ ३० ॥ ३१ ॥

पृथगीशमानिनश्चेत्तर्हि वयमंशकांशका अपि यस्येहितं स्वरूपञ्च न विदाम । किन्तु भक्ताश्चेत्तर्हि सर्वेपि विदुरित्यर्थः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

स्मयतोः विस्मयवतोः सतोः ॥ २५ ॥ २६ ॥

हे सुश्रोणि ! इति त्वं सौन्दर्य्यगुणैरेवाधिकमाहात्म्यासि न तु भक्तिज्ञानवैराग्यादिभिरिति परिहासो ध्वनितः । अद्भुतकर्मणा इति, हरेरिदमद्भुतं कर्म मया दृष्टं यत्त्वया शापं दापयित्वा तवापकर्ष एव तेन कृतः स्वभक्तस्य प्रेमसम्पद्भिरीषदपि न्यूनतामप्राप्तस्यागणितदेवीशापत्वरूपप्रभावख्यापनया परमोत्कर्ष एव कृतः । महात्मनामिति त्वया कोपभरितयापि दत्तोऽभिशापस्तस्मै यदि खल्वीषदपि दुःखं दातुमपारयिष्यत्तदापि ते शापः सफलोऽभविष्यत् हन्त हन्त व्यर्थ एवायमभूदित्यतो महात्मसु प्रेमिभक्तेषु त्वयाद्यारभ्य नैवं व्यवहर्त्तव्यमिति शिक्षा ध्वनिता ॥ २७ ॥

नन्वेवं माहात्म्यवत्त्वे भक्तानां को हेतुस्तत्र नारायणैकनिष्ठत्वमेव नान्य इत्याह—नारायणेति । न केवलमेते चित्रकेतुप्रभृतयः एवमपि तु सर्व एव स्वर्गेति त्रयाणामेव भक्तिसुखराहित्येनारोचकत्वाविशेषादिति भावः ॥ २८ ॥

नारायणनिष्ठत्वाभावे त्वेवं भवेदित्याह—देहिनामिति । ईश्वरलीलयेति तदीक्षणलीलालब्धबलया माययेत्यर्थः ॥ २९ ॥

तस्मान्मायिकमवास्तवं वस्तु सुखदुःखादिकमस्थिरत्वात्स्वप्नवदिवव जानीयादित्याह—अविवेकेति । पुंसः स्वप्ने आत्मनि अर्थभेदः क्षीरभोजनपुत्रमरणादिरिव जागरेऽपि गुणदोषविकल्पः सुखदुःखादिभेदः कृतो ज्ञेयः । तत्र दृष्टान्तः । स्रजि मालायां भित् रज्जुरियमिति सर्पोऽयमिति भेद एव वत् यथेत्यर्थः "इव वद्वेति सादृश्ये" इत्यभिधानात्, स्रजि वदिति पाठे स्रजि मालायां तत्त्वतो हेतोर्भिदा भेद इव प्रथमे पाठे भित् किबन्तः द्वितीये भिदा टाबन्तः ॥ ३० ॥

तदेवं ज्ञानिनां द्वन्द्वेषु ज्ञानाभ्यासेनाप्यवस्तुबुद्धिर्दुष्करा भक्तानान्तु ज्ञानवैराग्ययोर्भक्त्यनुभावरूपत्वात् विनापि ज्ञानाभ्यासेन तेष्वनुसन्धानमपि न भवतीत्याह—वासुदेव इति । इह संसारे कश्चिदप्यर्थो विशेषस्यापकर्षस्य चाश्रयो नास्ति भक्त्यनुसन्धानादेव मायिकवस्तूनामुत्कर्षापकर्षानुसन्धानं नैव जायत इति भक्तानां तत्त्वमवधारयेति भावः ॥ ३१ ॥

अस्मदादीनामपि तत्त्वं श्रृणिवत्याह—नाहमिति । ईहितमभिप्रायं लीलां वा न विदाम यतः पृथगीशमानिनः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गिरिशौ सतीभवौ स्मयतोः आश्चर्यं प्राप्नयोः सतोः ॥ २५ ॥ २६ ॥ २७ ॥

न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा ।
आत्मत्वात्सर्वभूतानां सर्वभूतप्रियो हरिः ॥ ३३ ॥
तस्य चायं महाभागश्चित्रकेतुः प्रियोऽनुगः ।
सर्वत्र समदृक्शान्तो ह्यहं चैवाऽच्युतप्रियः ॥ ३४ ॥
तस्मान्न विस्मयः कार्यः पुरुषेषु महात्मसु ।
महापुरुषभक्तेषु शान्तेषु समदर्शिषु ॥ ३५ ॥

श्रीशुक उवाच ।

इति श्रुत्वा भगवतः शिवस्योमाऽभिभाषितम् ।
बभूव शान्तधी राजन्देवी विगतविस्मया ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्वर्गादिषु आधारत्वेन अन्तःप्रविष्टत्वेन वस्तुतः समर्थो भगवान् तद्दर्शिनः ॥ २८ ॥

ईश्वरस्य सर्वेश्वरस्य लीलया तत्तत्कर्मानुरूपफलदानुरूपया ॥ २९ ॥

ननु, किं मूलस्तर्हीश्वरनैरपेक्ष्येणाहं समर्थत्वात्सुखी असौ असमर्थत्वात् दुःखीति गुणदोषविकल्प इत्यत्राज्ञानमूल इत्याह–आत्मनि अर्थभेद इव आत्मस्थाने स्थूलोहं कृशोहमिति अर्थभेदोऽर्थान्तरभूतोऽनात्मा देहो यथाऽविवेककृतः अज्ञाननिरूपितः अथवा अनात्मनो देहस्यार्थत्वेन भेदो मतभेदः बाह्यपचरूपो विभागोद्भवः पुंसः गुणदोषविकल्पः अविवेककृत एव अहं समर्थत्वेन गुणवान्सुखित्वात् असौ असमर्थत्वेन दोषवान् दुःखित्वात् इति गुणदोषभेदः सर्वमूलभूतभगवदनवबोधकृतः——

"ईश्वरोऽहमहं भोगी सिद्धोहं बलवान् सुखी ।
आढ्योऽभिजनवानस्मि कोऽन्योस्ति सदृशो मया" इति ॥

मायेति शास्त्रोक्त इत्यर्थः दृष्टान्तान्तरम् । स्रजि भितुवञ्च मालायां सर्पोयमिति भेद इव च गुणदोषविकल्पोऽविवेककृत एव "इव वद्वेति सादृश्ये" इत्यभिधानात् वदऽव्ययं सादृश्यवाचकं पृथगेव अतः स्रजि वदित्यार्थमित्युक्तिरयुक्ता ॥ ३० ॥

उक्तप्रकारेण भगवानेव सुखादिप्रदः अतो भगवति भक्तिमुद्वहतां कश्चिद्भगवदितरः व्यपाश्रयः सुखादिप्राप्तये सुखादिनिराकृतौ विशिष्टबुद्ध्या आश्रयो नास्ति ॥ ३१ ॥

एवंविधस्य श्रीहरेः यथाहमनुगस्तथा चित्रकेतुरपीत्याह–नाहमिति त्रिभिः । अंशकः पुरुषावतारस्तदंशकाः ईहितं स्वरूपं चेयतावच्छिन्नतया न विदामः ॥ ३२ ॥ ३३ ॥

———

भाषा टीका ।

श्रीशुक उवाच ॥

हे अरिन्दम ! (शत्रुवों के दमन करने वाले) चित्रकेतु इस प्रकार भवानी और शङ्कर दोनों को प्रसन्न कर, मुसक्याते हुए उन दोनों के देखते २ विमान पर बैठ कर चलदिया ॥ २५ ॥

तदनन्तर भगवान् श्रीशङ्कर, देव ऋषि दैत्य सिद्ध और पार्षदों के सुनते २ श्रीपार्वतीजी से ऐसे बोले ॥ २६ ॥

श्री रुद्र उवाच ॥

हे सुश्रोणि ! (सुन्दरनितम्ब वाली) अद्भुत कर्मा हरि के निस्पृह दासानुदास ऐसे महात्माओं का माहात्म्य तुमने देखा ? ॥ २७ ॥

सबही नारायण परायण किसी से भय नहीं करते क्योंकि वे लोग स्वर्ग नरक और अपवर्ग में भी एकार्थ दर्शी होते हैं ॥ २८ ॥

जीवों के देह के संयोग होने से ईश्वर की माया से सुखदुःख जन्म मरण शाप अनुग्रह रूप द्वंद्व होते हैं ॥ २९ ॥

घटपटाद्यर्थ भेद के तरह आत्मा में देव मनुष्यादि भेद अविवेक कृत हैं गुण दोष विकल्प भी इसी प्रकार माला में सर्पादि भेद के तरह किया गया है ॥ ३० ॥

वासुदेव भगवान् में भक्ति करनेवाले और ज्ञान वैराग्य रूप वीर्यवाले भक्तों को इस संसार में विशेष आश्रयणीय कुछ भी नहीं है ॥ ३१ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत एव हरिरपि सर्वेषां भूतानां प्रियः ॥ ३३ ॥

अहञ्चैवाच्युतस्य प्रियः तस्मान्ममास्मिन् क्रोधो नाभूदिति भावः ॥ ३४ ॥ ३५ ॥ ३६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यद्यर्यं सर्वेश्वरः सर्वकारणभूतः तर्ह्यस्य प्राकृतस्येवाश्रितेष्वेव विशिष्योक्तविधमाहात्म्यापादकः किमयं पक्षपातः तत्राह—न हीति । अस्य नारायणस्यातीव प्रियादिः कश्चिन्नास्ति, तत्र हेतुः, आत्मत्वात्सर्वभूतानां ब्रह्मादिस्तम्बपर्यन्तानां चिदचिदात्मकानां भूतानामात्मत्वादन्तरात्मत्वात् न ह्यात्मनः एकं शरीरं प्रियमेकमप्रियं भवतीति भावः, यत एवात्मा सर्वभूतानामतस्तेषामाश्रयः धारकः अन्तःप्रविश्य भर्त्तेत्यर्थः । सर्वभूताश्रय इत्यनेन शरीराणां सर्वभूतानाम् आत्मभूतपरमात्मानुवर्तनं युक्तमेवेति सूचितम्. न हि शरीरमात्मानमननुवृत्यावतिष्ठते शरीरस्यात्मानुवर्त्तनस्वभावत्वात्. हरिरित्यनेन स्वानुवर्त्यार्तिहरत्वं सूचितम्. एवञ्च ये स्वाभाविकं जीवपरमात्मनोः शरीरात्मभावं जानन्तस्तमनुवर्त्तन्ते तेषु तस्यानुग्रहः इतरेषु तदभाव इति तात्पर्यम् अत एव तस्य वैषम्यमित्यपि सूचितं. न ह्यननुवर्तिष्वननुग्रहमात्रेण तस्य वैषम्यं. न ह्याश्रिताभीष्टप्रदस्य सुरद्रुमस्यानाश्रिताभीष्टाप्रदानमात्रेण तस्य वैषम्यमापादयितुं शक्यम् ॥ ३३ ॥

यत एवायमात्मा भूतानामाश्रितानामभीष्टार्थदोऽविषमश्चात एव चित्रकेतुवदहमपि तमेवोपासे इत्याह—तस्येति । यथा महाभागः विवेकी सर्वत्र समदृक् शान्तश्च चित्रकेतुस्तस्य नारायणस्यानुगः भृत्यः भक्तः अत एव प्रियः निरतिशयप्रीतिविषयः तथा अहमप्यच्युतस्य प्रियः तन्निमित्तमक्तिमांश्च ॥ ३४ ॥

तस्मान्नारायणप्रियमाहात्म्ये न विस्मयः कार्य इति वदन्नुपसंहरति—तस्मादिति । यस्मान्नारायणस्तद्भक्ताश्च अस्मदादिभ्यो विलक्षणप्रभावाः तस्मान्महापुरुषस्य भगवतः भक्तेषु महात्मसु प्रकृतिपुरुषेश्वरयाथात्म्यावमर्शनप्रवणचित्तेष्वत एव समदर्शिषु शान्तेषु विरक्तेषु पुरुषेषु न विस्मयः कार्यः ॥ ३५ ॥

भगवतः शिवस्येत्थम् एवमभिभाषितं वचः श्रुत्वा गौरी देवी विगतविस्मया विस्मयरहिता शान्तधीः क्रोधरहिता च बभूव ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आत्मस्वात्स्वामित्वात् न हि सर्वभूतस्वामिनः स्वपरभेदकल्पना युक्ता हेत्वन्तरमाह—सर्वभूतेति ॥ ३२ ॥ ३४ ॥ ३५ ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भक्तमाहात्म्यमेव चित्रकेतुदृष्टान्तेन स्पष्टयति—न ह्यस्येति द्वाभ्याम् । प्रियाप्रिययोः स्वपरयोश्च भेदो नास्तीत्यर्थः । तत्र हेतुः, आत्मत्वादिति, आत्मत्वेन साम्यादनपेक्षणीयत्वाच्चेत्यर्थः । आत्मत्वादेव हेतोः सर्वभूतानान्तु प्रियः निरुपाधिप्रीतिविषयः ॥ ३३॥३४ ॥

विरुद्धं । अत्र एवाग्रे वक्ष्यते । "इतिहासमिमं पुण्यं चित्रकेतोर्महात्मनः" इति ॥ ३५-३८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

हरेश्च तत्त्वं शृणु—नहीति । स तु हरिः सर्वभूतानां प्रिय एव तदपि यत् स केषाञ्चित् प्रियो भवति केषाञ्चिद्द्वेष्यश्च भवति तत्र तारतम्येन मायैव कारणमिति तन्मायायाश्च तत्त्वं ह्याधितम् ॥ ३३ ॥

तस्य च तथाभूतस्यापीत्यर्थः प्रियत्वे हेतुः सर्वत्र समदृक् स्वर्गापवर्गादौ तुल्यार्थदर्शी अत एव शान्तः । उच्चनीचबुद्धिरहितः एतादृशगुणकत्वेन तत्प्रियत्वे दृष्टान्तं दर्शयति—अहं चैवेति, अहञ्च समदृक् शान्तश्च सन्नच्युतस्य प्रियः अतो ममानासक्तत्वाल्लौकिकलज्जाद्यनादरत्वाच्च सभादौ भवदाद्यालिङ्गनमपि न सङ्कोचहेतुरिति भावः । तस्मादच्युतस्याश्रयत्वात् ॥ ३४ ॥

पूर्वं धृष्टायेत्यादिना निन्दितं सम्प्रति स्वेतावत् साधुलक्षणमिति स्तुतं तत्त्वञ्च तस्य व्यवहृतासाधुत्वमवलम्ब्योक्तत्वात् किन्त्वस्य चित्रकेतोर्मम च तत्त्वं शृण्वित्याह—तस्य सर्वत्र समस्यापि ।

"समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति च मां भक्त्या मयि ते तेषु चाप्यहम्"

इति तद्वाक्यादेवायमनुगश्चित्रकेतुः प्रियः । ममापि भक्तत्वादहञ्च प्रियः तस्मादावयोस्सङ्कर्षणभक्तयोः परस्परसख्येनान्तःस्नेहवत्वात् कठोरोक्त्यादिकमपि सख्यसुखपोषकमेव, त्वन्तु वृथैव कोपिन्यभूः । किञ्च सत्यमहमीदृशी एव त्वन्त्वात्मानं निष्किञ्चनमैकान्तिकभक्तत्वेन सर्वत्र दर्शयसि अथ च रहसि विद्याधरीसहस्रेण सह रमसे तस्मात्त्वं कपटी अहन्त्वात्मानं स्त्रीलाम्पट्यमयं दोषं दर्शयन्निष्कपट एवास्मि. किञ्च त्वं भक्तिं दर्शयसि विषयभोगं गोपयसि अहन्तु तद्विपरीत एव वर्त्ते इत्यावयोः अन्तरमेते सभ्या एव साक्षित्वेनाचक्षन्तामित्यादि नर्मगोष्ठीरसास्वादोऽप्यद्याभविष्यदेव यदि त्वमन्तरा अन्तरायं नाकरिष्य इति त्वत्कोपवैरस्यादेव स नाभूदित्युपालम्भो ध्वनितः । हन्त हन्त त्वत्रबन्धुष्वर्वाचीनेष्वणुष्वेव भक्तिमार्गमारूढेषु तवेश्वरस्यानादिमहाभक्तस्याप्येतादृशोऽप्येतावान् भावो नमस्तुभ्यं तदिति विस्मयवत्यां तस्यां सत्यमेतावानेव भाव इत्याह—तस्मादिति ॥ ३५ ॥

शान्तधीरिति । स्वीयपूर्वस्वभावस्मृत्या लज्जया पटाञ्चलेन मुखमाच्छादयामासेति भावः ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अच्युतप्रियोऽहं तस्यानुग एव अयं चित्रकेतुश्च तस्य प्रियोऽनुगः ममास्मिन् क्रोधो नास्ति त्वया तु बाल्याच्छापो नियोजित इति भावः ॥ ३४ ॥

विशेषतो रमयो वयमुत्तमा इति गर्वः ॥ ३५ ॥

विगतविस्मया विनष्टगर्वा ॥ ३६ ॥

इति भागवतो देव्याः प्रतिशप्तुमलन्तमः ।
मूर्द्ध्ना सञ्जगृहे शापमेतावत्साधुलक्षणम् ॥ ३७ ॥
जज्ञे त्वष्टुर्दक्षिणाग्नौ दानवीं योनिमाश्रितः ।
वृत्र इत्यभिविख्यातो ज्ञानविज्ञानसंयुतः ॥ ३८ ॥
एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ।
वृत्रस्यासुरजातेश्च कारणं (१) भगवन्मतेः ॥ ३९ ॥
इतिहासमिमं पुण्यं चित्रकेतोर्महात्मनः ।
माहात्म्यं विष्णुभक्तानां श्रुत्वा बन्धाद्विमुच्यते ॥ ४० ॥
य इमंप्रातरुत्थाय श्रद्धावान् वाग्यतः पठेत् ।
इतिहासं हरिं स्मृत्वा स याति परमां गतिम् ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां चित्रकेतूपाख्यानं नाम
सप्तदशोऽध्यायः ॥ १७ ॥

भाषा टीका ।

पृथक् ईश्वराभिमानी मैं ब्रह्मा सनत्कुमार नारद, ब्रह्मा के पुत्र मुनिलोग जिसके अंश के अंश है और जिसकी चेष्टा को और स्वरूप को नहीं जानते हैं ॥ ३२ ॥

न इस परमात्मा का कोई प्रिय न कोई अप्रिय, न कोई अपना न पराया, क्योंकि वह हरि सर्व प्राणियों का आत्मा है इसीसे सर्वभूतप्रिय हैं ॥ ३३ ॥

तिन हरि का यह महाभाग चित्रकेतु प्रिय अनुचर है। जैसा यह सर्वत्र सम दृष्टि वाला और शान्त हरि प्रिय है ऐसे मैं भी अच्युत भगवान का प्रिय हूं ॥ ३४ ॥

तस्मात् महापुरुष के भक्त शांत समदर्शी महात्माओं के विषे कुछ विस्मय करने के योग्य नहीं है ॥ ३५ ॥

हे राजन् ! इस प्रकार भगवान् श्रीशिवजी का भाषण सुनकर श्रीपार्वतीजीने भी शांतबुद्धि होकर विस्मय का त्याग किया ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रतिशापं दातुमलन्तमः समर्थतमोऽपि ॥ ३७ ॥ ३८ ॥
असुरजातेरसुरभावेनोत्पत्तेः भगवति मतेश्च ॥ ३९ ॥ ४० ॥
एतदेतत् ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो भागवतश्चित्रकेतुर्गौर्याः प्रतिशप्तुं प्रतिशापं कर्तुं अलन्तमः समर्थोऽपि तस्याः शापं मूर्द्ध्ना सञ्जगृहे शिरसोवाह साधूनां लक्षणमेतावदेव हि,अपकर्तृष्वप्युपकर्तृत्वबुद्धिमत्त्वमेव हि साधूनां लक्षणमित्यर्थः ॥ ३७ ॥

यत्पृष्टं राज्ञा वृत्रस्यासुरस्वभावस्य " नारायणे भगवति कथमासीद्दृढामतिः " इति तस्योत्तरं सङ्गमयति--जज्ञ इति । योऽयमुक्तश्चित्रकेतुः स एव त्वष्टुः संकल्पाद्दक्षिणाग्नौ जज्ञे जातः स एवासुरीं योनिमासुरं भावमाश्रितः वृत्र इत्यभितः विख्यातः प्रसिद्धः स पूर्वजन्मसिद्धभगवद्भक्त्याऽस्मिन्नपि जन्मनि ज्ञानविज्ञानाभ्यां युक्तः ॥ ३८ ॥

एवं त्वत्प्रश्नोत्तरमुक्तमित्याह--एतदिति । यत्त्वमसुरजातेर्वृत्रस्य भगवति स्मृतेर्भक्तेः कारणं परिपृच्छसि पर्यपृच्छः तत्सर्वमेतत्सर्वं स्वप्रश्नं ते तुभ्यं मया आख्यातं कथितम् ॥ ३९ ॥

---

(१) भगवत्स्मृतः इति पाठान्तरम्. वीर०

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अस्य चित्रकेतिवितिहासस्य श्रवणादिफलमाह—इतिहासमिति । महात्मनश्चित्रकेतोः सम्बन्धिनं पुण्यमिममितिहासं विष्णुभक्तानां माहात्म्यसूचकं श्रुत्वा बन्धात्संसारबन्धाद्विमुच्यते मुक्तो भवेत् ॥ ४० ॥

यः पुमान् प्रातरुत्थाय श्रद्धावान् वाग्यतः नियमितवाक् हरिं स्मृत्वा एतामितिहासं पठेत् । स परमां गतिं सर्वोत्कृष्टं भगवत्सायुज्यं प्राप्नुयात् श्रवणपठनाभ्यां शनैः परिनिष्पन्नभक्तियोगी मुक्तो भवेदिति भावः ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अथ प्रसादये न त्वां शापमोचयितुमस्यार्थश्चतुर्धा सम्भाव्यते शापोऽभिमत इति कृत्वा, तन्मोचनायाऽप्रसादनम् अनिष्टोऽयमर्थकित्वेन प्राप्तोभिमत इति कृत्वा वा, तदभिभवशक्त इति कृत्वेति, आहोस्वित् प्रतिशापदानसमर्थ इति कृत्वेति, कोऽयमर्थोऽनेनाङ्गीकृत इति तत्राह—प्रतिशप्तुमिति, मूर्ध्ना सञ्जगृह इत्यनेन द्वितीयोभिमत इति ज्ञायते प्रश्रयस्य साधुलक्षणत्वात् अस्य च साधुत्वेकत्वाच्चतुर्थपक्षयोर्वैरितत्वेनाङ्गीकारो न भवति "देवा एव तदन्येभ्यः शक्ता नास्त्यत्र संशयः" इति वचनात् अत्र यः कश्चिद्विशेषोस्तीति मतम्—

"अशक्ता अपि शक्तानां शक्ताः शापादिषु स्फुटम् ।
तथाप्यशक्तैर्विहिताः शापाद्याः शक्तिमत्सु च ॥
अत्यल्पा अल्पकालाश्च न सम्यक् प्रभवन्ति च ।
यत्नेनापोहितुं शक्त्या उत्तमैस्तु न संशयः ॥
उत्तमेषु कृताः शापाः कर्तॄणां ज्ञातपुण्ययोः
निःशेषेण निहन्तारः" इत्यादि ॥ ३७ ॥

कुत्रास्य जन्माभूदत्राह-जज्ञ इति ॥ ३८ ॥

परमप्रमेयमुपसंहरति—एतदिति । वृत्रस्य यच्चरितं मां परिपृच्छसि किञ्च सर्वमेतत्सर्वं किञ्च तस्यासुरजातेरासुरवंशे जननस्य यत्कारणं चैतच्च कथितमिति शेषः ॥ ३९ ॥

फलमाह—इतिहासमिति ॥ ४० ॥

शृङ्खलादिबन्धमोक्षोपि बन्धमोक्षः स्यात् न तु संसारबन्धमोक्षणं वैकुण्ठलोकप्राप्तिरस्मादवगतेति शङ्कित्वाकालविशेष इतिकर्तव्येन सा स्यादित्याह—य एतदिति ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

असुरजातेः कारणं महदपराधः भगवन्मतेः कारणं महदनुग्रहः ॥ ३९—४१ ॥

इतिश्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
सप्तदशोऽध्यायः समाप्तः ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

चित्रकेतुरर्वाचीनत्वादल्पप्रभाव इति माऽवमंस्था इत्याह—इतीति । देव्याः देव्यै अलंतमः प्रतिसमर्थोपि ॥ ३७ ॥ योनिं जातिम् ॥ ३८—४१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठे सप्तदशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इत्येवं स भागवतः प्रतिशप्तुं प्रतिशापं दातुमलन्तमोऽतिसमर्थोपि देव्याः शापं मूर्ध्ना जगृहे एतावदेव साधूनां लक्षणम् ॥ ३७ ॥

स एव वृत्र इति विख्यातः जज्ञे जातः ॥ ३८ ॥

वृत्रस्यासुरजातेः असुरभावेनोत्पत्तेः भगवन्मतेः भगवद्भक्तेश्च कारणमित्येतत्सर्वं ते तुभ्यमाख्यातम् ॥ ३९ ॥

उक्तेतिहासश्रवणादिफलमाह—इतिहासमितिद्वाभ्याम् ॥ ४० ॥

एतदिममितिहासं यः प्रातरुत्थाय पठेत्स हरिं स्मृत्वा परमां गतिं याति ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
सप्तदशाऽध्यायार्थप्रकाशः ॥ १७ ॥

भाषाटीका।

हे राजन् ! वह परम भागवत चित्रकेतु पार्वती के प्रति शाप देने को भली तरह समर्थ रहा तौभी पार्वतीजी के शाप को शिर से ग्रहण किया इतनाही तो साधु का लक्षण है ॥ ३७ ॥

फिर वही दानवी योनि का आश्रय लेकर त्वष्टा की दक्षिणाग्नि में वृत्रासुर इस नाम से विख्यात होकर उत्पन्न हुआ तब भी ज्ञान विज्ञान से संयुक्त ही हुआ ॥ ३८ ॥

जो तुमने हमसे पूछा यह आख्यान हमने सर्व कथन किया जो कि भगवद्भक्त वृत्रासुर का असुर जाति का कारण रहा ॥ ३९ ॥

यह महात्मा चित्रकेतु का पुण्य रूप इतिहास है और विष्णु भक्तों का माहात्म्य है इसको सुनकर मनुष्य संसार के बन्ध से छूट जाता है ॥ ४० ॥

जो इस इतिहास को प्रातःकाल उठकर श्रद्धापूर्वक वाक् संयम करके पठन करे और स्मरण करे वह परमगति को जाता है ॥ ४१ ॥

इति श्रीमद्भागवतमहापुराण षष्ठस्कन्ध सप्तदशअध्यायकी भाषा टीका समाप्त ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे सप्तदशोऽध्यायः समाप्तः ॥ १७ ॥

॥ अष्टादशोऽध्यायः ॥

श्रीशुक उवाच ।

पृश्निस्तु पत्नी सवितुः सावित्रीं व्याहृतीं त्रयीम् ।
अग्निहोत्रं पशुं सोमं चातुर्मास्यं महामखान् ॥ १ ॥
सिद्धिर्भगस्य भार्याङ्ग महिमानं विभुं प्रभुम् ।
आशिषं च वरारोहां कन्यां प्रासूत सुव्रताम् ॥ २ ॥
धातुः कुहूः सिनीवाली राका चानुमतिस्तथा ।
सायं दर्शमथ प्रातः पूर्णमासमनुक्रमात् ॥ ३ ॥
अग्नीन्पुरीष्यानाधत्त क्रियायां समनन्तरः ।
चर्षणी वरुणस्यासीद्यस्यां जातो भृगुः पुनः ॥ ४ ॥
वाल्मीकिश्च महायोगी वल्मीकादभवत्किल ।
अगस्त्यश्च वसिष्ठश्च मित्रावरुणयो ऋषी ॥ ५ ॥
रेतः सिषिचतुः कुम्भे उर्वश्या सन्निधौ द्रुतम् ।
रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात् ॥ ६ ॥
पौलोम्यामिन्द्र आधत्त त्रीन्पुत्रानिति नः श्रुतम् ।
जयन्तमृषभं तात ! तृतीयं मीढुषं प्रभुः ॥ ७ ॥
उरुक्रमस्य देवस्य मायावामनरूपिणः ।
कीर्तौ पत्न्यां बृहच्छ्लोकस्तस्यासन्सौभगादयः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आदित्यानां चतुर्थस्य त्वष्टुर्वंशप्रसङ्गतः ।
प्रोक्तमिन्द्रकृतविश्वरूपवृत्रवधादिकम् ॥ १ ॥
अदितेः पञ्चमादीनां पुत्राणामन्वयोक्तिभिः ।
अष्टादशे दितेर्गर्भे शक्रेण मरुतां भिदा ॥ २ ॥
त्वष्टुर्वंशमनुक्रम्य सप्रसङ्गं यथाक्रमम् ।
आदित्यानामथान्येषां वंशानाह मुनीश्वरः ॥ ३ ॥

दक्षकन्यान्वयानुकथने अदित्याः द्वादश पुत्राः प्रोक्ताः ।
"विवस्वानर्यमा पूषा त्वष्टाथ सविता भगः ।
धाता विधाता वरुणो मित्रः शक्र उरुक्रमः" ।
इति तत्र षष्ठाध्यायान्तमारभ्य विश्वरूपवृत्रचित्रकेतूपाख्यानैस्त्वष्टुर्वंशमनुवर्ण्येदानीं सवितुर्वंशमाह—पृश्निस्त्विति । सावित्रीमित्यादिषु प्रासूतेत्युत्तरस्यानुषङ्गः पशुं पशुयागम् महामखान् पञ्च यज्ञान् ॥ १ ॥ २ ॥

धातुर्भार्या कुहूः सायं पुत्रं प्रासूत एवं सिनीवाली दर्शमित्यनुक्रमात् ॥ ३ ॥

समनन्तरो विधाता क्रियायां भार्यायां पुरीष्यानग्नीन् पञ्च चितान् "पुरीष्यासो अग्नय इति पञ्च वा एतेऽग्नयो यच्चितयः" इतिश्रुतेः । चर्षणी वरुणस्य भार्यासीत् पूर्वं ब्रह्मणः पुत्रो भृगुर्यस्यां पुनर्जातः ॥ ४ ॥

वाल्मीकिर्वरुणस्यैव पुत्रोऽभवत् एतौ वरुणस्यासाधारणौ पुत्रौ तथोत्सर्गादयोपि मित्रस्यासाधारणाः तयोरेव साधारणौ द्वौ पुत्रावाह अगस्त्यश्च वसिष्ठश्च ऋषी मित्रावरुणयोरभवताम् ॥५॥

श्रीधरस्वामिकृतभावार्थदीपिका।

यत उभावपि कुम्भे रेतः सिषिचतुः "सत्रे ह जाता विषिता नमोभिः कुम्भे रेतः सिषिचतुः समानम्" इति श्रुतेः द्रुतं स्कन्नम् ॥ ६ ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवं दाक्षायण्याः कश्यपस्य भार्याया अदितेर्वंशमुपक्रम्य विवस्वदर्यमपूष्णां तत्पुत्राणां वंशमभिधाय ततस्त्वष्टुर्वंशस्तदनु प्रयुक्त्याभिहितम् अथ सवित्रादीनां वंशमुपक्रमते मुनिः—पृश्निरित्यादिना। सवितुः पत्नी पृश्निः सावित्र्याद्यभिमानिदेवताः प्रासूतेत्युत्तरस्यानुषङ्गः पशुं पशुयागं तदभिमानिदेवताविशेषमिति एवमुत्तरत्रापि महामखान् पञ्च महायज्ञान् ॥ १ ॥

एवं भगस्य भार्या सिद्धिरिति प्रसिद्धा महिमादींश्चतुरः पुत्रान् सुव्रतां सुशीलां वरारोहामत्यन्तसुन्दराङ्गी आशीर्नाम्नीं कन्यां च प्रासूत॥२॥

धातुः पत्न्यः कुहूप्रभृतयश्चतस्रः अनुक्रमात् सायादीन् चतुरः पुत्रान् ॥ ३ ॥

तथा धातुः समनन्तरो विधाता क्रियायां पत्न्यामग्नीन्पुरीष्यसंज्ञकानिष्टकाचितोऽग्नीनाधत्त जनयामास ॥ ४ ॥

वरुणस्य चर्षणीति प्रसिद्धा भार्या आसीत् भृगुः पूर्वं ब्रह्मणः पुत्रो यस्यां चर्षण्यां पुनर्जातः तथा वरुणस्यैव पुत्रो वाल्मीकिर्महायोगी वल्मीकादभवत् एतौ वरुणस्यासाधारणौ पुत्रौ ॥ ५ ॥

तथा रेवत्यां भार्यायां मित्रवरुणयोः सर्गादयोऽसाधारणाः सुताः उभयोः साधारणौ सुतौ अगस्त्यवसिष्ठौ ऋषी, कथमेकैकस्योभयसुतत्वम्? तत्राह—रेत इति। कदाचिन्मित्रावरुणौ ऊर्वश्या अप्सरसः सन्निधौ द्रुतं स्खलितं रेतः कुम्भे घटे सिषिचतुः सिक्तवन्तौ तत्र कुम्भे वसिष्ठागस्त्यौ जातौ इति भावः रेवत्यामित्यर्थं व्याख्यातप्रायं रेवती जनयामासेत्यर्थः ॥ ६ ॥

हे तात, प्रभुरिन्द्रस्त्रयः पौलोम्यां शच्यां पत्न्यां जयन्तमृषभं तृतीयं मीढुषम् इति त्रीन्पुत्रानजनयदिति नोऽस्माभिः श्रुतम् ॥ ७ ॥

तपोमयस्य त्रिभिः पादक्रमैः लोकत्रयमाक्रान्तवतो मायया आत्मीयसङ्कल्पेन वामनरूपेणावतीर्णस्य कीर्त्याख्यायां भार्यायां बृहच्छ्लोकः पुत्र आसीत् तस्य बृहच्छ्लोकस्य सौभगादयः पुत्रा आसन् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अस्मिन्नध्याये पूर्वोक्तं सृष्टिशेषं निरूपयति—पृश्निरिति। कुहाद्यादपूर्वस्मात्फलान्वितोऽयमाह—सावित्री गायत्र्यभिमानिनीरयुत्तरत्राप्येवमनुसन्धेयम् ॥ १ ॥ २ ॥

"चन्द्रे दृष्टे सिनीवाली चन्द्रे नष्टकले कुहूः" धातुः (१) क्रिया नाम भार्याः याः कुहूसिनीवाल्याद्याः ताः अधत्त ॥ ३ ॥

समनन्तरो विधाता च क्रियायां भार्यायां पुरीष्याख्यानग्नीनाधत्त वरुणनाम्नः सूर्यस्य वारुणी नाम भार्या पूर्वं ब्रह्मणो जातत्वात्पुनरित्युक्तम् ॥ ४ ॥

वाल्मीकिश्च वरुणवीर्याद्वल्मीकादभूत् ब्रह्मजो वसिष्ठश्च पुलस्त्यजोऽगस्त्यश्च द्वौ ऋषी पुनर्मित्रावरुणयोर्जातौ ॥ ५ ॥

तयोर्जन्मप्रकारमाह—रेत इति। उर्वश्या दर्शनात्तत्सन्निधौ द्रुतं स्कन्नं रेतस्तदनन्तरं मित्रावरुणौ कुम्भे सिषिचतुः तस्मादुभावपि कुम्भसम्भवावीति प्रसिद्धिः ॥ ६ ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

पृश्निस्त्विति त्रिकम् ॥ १ ॥ २ ॥ ३ ॥

अग्नीनित्यर्द्धकम् ॥ ४—१९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

अष्टादशे हतसुता दितिः कृत्वा व्रतं दधौ।
गर्भं तस्माच्छक्रलिखितात् भीमजिह्वे मरुद्गणाः ॥
तुर्यस्यादिति पुत्राणां त्वष्टुरन्वयकीर्त्तने।
प्रसङ्गतः समायाता विश्वरूपवधादिकाम् ॥
चित्रकेतवभिशापान्तां समाप्यैव कथासुधाम्।
अदितेः पञ्चमादीनां सुतानां वंश उच्यते ॥

पशुं पशुयागं महामखान् पञ्चयज्ञान् प्रासूतेत्युत्तरस्यानुषङ्गः ॥१—३॥

समनन्तरो विधाता क्रियायां भार्यायां पुरीष्यान् पुरीष्यसंज्ञान् अग्नीन् पञ्चाचितीः "पुरीष्यासोऽग्नयः" इति श्रुतेः। चर्षणी वरुणस्य भार्या आसीत् भृगुरिति प्राग्ब्रह्मपुत्रोऽपि पुनर्वरुणपुत्रोऽभूत्। भृगुवाल्मीकी वरुणस्यासाधारणौ पुत्रौ ॥ ४ ॥

तयोस्सर्गादयो मित्रस्यासाधारणाः पुत्रा वक्ष्यन्ते। तयोर्मित्रावरुणयोः साधारणौ द्वौ पुत्रौ आह—अगस्त्यश्च वसिष्ठश्चेतौ ऋषी मित्रावरुणयोरभवताम् ॥ ५ ॥

यतो रेत इत्यादि "कुम्भे रेतः सिषिचतुः समानम्" इति श्रुतेः द्रुतं स्कन्नम् ॥ ६ ॥ ७ ॥

मायया स्वरूपभक्त्या वामनरूपवतः—

"स्वरूपभूतया नित्यशक्त्या मायाख्यया युतः।
अतो मायामयं विष्णुं प्रवदन्ति मनीषिणः" ॥

इति माध्वभाष्यप्रमाणितश्रुतेः ॥ ८ ॥

(१) कर्मनामविशिष्टभार्याः।

तत्कर्मगुणवीर्याणि कश्यपस्य महात्मनः ।
पश्चाद्वक्ष्यामहेऽदित्यां यथैवावततार ह ॥ ९ ॥
अथ कश्यपदायादान्दैतेयान्कीर्त्तयामि ते ।
यत्र भागवतः श्रीमान् प्रह्लादो बलिरेव च ॥ १० ॥
दितेर्द्वावेव दायादौ दैत्यदानववन्दितौ ।
हिरण्यकशिपुर्नाम हिरण्याक्षश्च कीर्तितौ ॥ ११ ॥
हिरण्यकशिपोर्भार्या कयाधुर्नाम दानवी ।
जम्भस्य तनया दत्ता सुषुवे चतुरः सुतान् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

दक्षकन्यायाः अदित्याः—

"विवस्वानर्यमा पूषा त्वष्टाथ सविता भगः ।
धाता विधाता वरुणो मित्रः शक्र उरुक्रमः" इति ।

द्वादशात्मजाः प्रोक्तास्तेषां मध्ये पूषानपत्य इत्युक्तं अथाद्यो विवस्वदर्यमत्वष्टॄणां सन्ततयश्चोक्ताः त्वष्टुः पुत्रो विश्वरूपो देवैः पौरोहित्ये वृत इति चोक्तं षष्ठाध्यायान्ते तदनन्तरमेकादशभिरध्यायैस्त्वष्टृपुत्रविश्वरूपस्य देवपौरोहित्यप्रसङ्गतो नानाकथाः कथिताः अथ सवित्रादीनामदितिपुत्राणां वंशं दितिसन्ततिश्च वर्णयन् दितिकोपादिन्द्ररक्षणमिन्द्रकोपाद्दितिपुत्ररक्षणं सर्वरक्षणकर्तुर्भगवतः सर्वजनरक्षणार्थमाराधनञ्च वर्णयति—पृश्निस्त्वित्याद्यध्यायद्वयेन । सवितुः पत्नी पृश्निस्तु सावित्र्यादिकन्याः अग्निहोत्रादीन् सुतांश्च प्रासूतेत्युत्तरस्यानुषङ्गः तत्र पशुं पशुयागं सोमं सोमयागं महामखान् पञ्च यज्ञान् ॥ १ ॥

हे अङ्ग ! भगस्य भार्या सिद्धिः महिमादिपुत्रत्रयम् आशिषं कन्यां च प्रासूत ॥ २ ॥

धातुः पत्नी कुहूः सायम् सिनीवाली दर्शम् राका प्रातः अनुमतिः पूर्णमासञ्चाति अनुक्रमात् प्रासूत ॥ ३ ॥

समनन्तरो विधाता क्रियायां पत्न्यां पुरीष्यान् अग्नीन् पञ्च चितीन् आधत्त जनयामास "पुरीष्यासो अग्नय इति पञ्च वा एते अग्नयो यच्चितयः" इति श्रुतेः ॥ ४ ॥

वरुणस्य भार्या चर्षणी आसीत् यस्यां भृगुर्ब्रह्मजोपि पुनर्जातः वाल्मीकिश्च वरुणस्यैव पुत्रो वल्मीकादभवत् एतौ वरुणस्यासाधारणौ पुत्रौ ॥ ५ ॥

मित्रावरुणयोरसाधारणौ पुत्रावाह—अगस्त्यश्च वसिष्ठश्चेति द्वौ ऋषी ब्रह्मपुत्रौ पुनर्मित्रावरुणयोरभवताम्. यतस्तौ मित्रावरुणौ उर्वश्याः सन्निधौ कुम्भे रेतो वीर्यं द्रुतं स्कन्नं सिषिचतुः ॥ ६ ॥

मित्रस्यासाधारणान्पुत्रानाह—रेवत्यामिति । इन्द्रस्तु जनयामास पौलोम्यां पुलोम्नः कन्यायाम् ॥ ७ ॥

मायावामनरूपिणः स्वसङ्कल्पेन वामनरूपिणः कीर्तौ बृहच्छ्लोक आसीत् तस्य सौभगादयः आसन् ॥ ८ ॥

भाषाटीका ।

श्रीरुक्मिणीरमणो जयति ।

श्रीशुक उवाच ।

सविता की पृश्नी नामक भार्या, सावित्री व्याहृति त्रयी अग्नि होत्र पशुयाग सोमयाग चातुर्मास्य और पंच महायज्ञों को पैदा करती हुई ॥ १ ॥

भग नामक सूर्य की भार्या ने महिमा विभु प्रभु को पैदा किया, तथा एक सुव्रता वरारोहा आशिष नामवाली कन्या को पैदा किया ॥ २ ॥

धाता नामक सूर्य की, कुहू सिनीवाली राका और अनुमति इन चारों पत्नियों ने क्रमसे, सायं दर्श प्रातः और पूर्णमास इन चारों को उत्पन्न किया ॥ ३ ॥

विधाता ने क्रिया नामक भार्या में पुरीष्य अग्नियों को पैदा किया । वरुण की चर्षणी भार्या हुई जिस में फिर से भृगुने जन्म लिया ॥ ४ ॥

और दूसरे वरुण के पुत्र वल्मीक से महायोगी वाल्मीकि हुए तथा मित्र और वरुण इन दोनों के साधारण पुत्र अगस्त्य और वशिष्ठ हुए ॥ क्योंकि उर्वशी के सन्निधि में मित्र और वरुण दोनों ने कुंभ में वीर्य का सेचन किया इसी से दोनों के पुत्र हुए ॥ मित्रने रेवती के विषे उत्सर्ग अरिष्ट पिप्पल इन को उत्पन्न किया ॥ ५ ॥ ६ ॥

इन्द्रने पौलोमी में जयन्त ऋषभ और मीढुष इन तीन पुत्रों को उत्पन्न किया ऐसा हमने सुना है ॥ ७ ॥

माया से वामन रूप लेनेवाले उरुक्रमदेवने कीर्ति नामक भार्या में बृहच्छ्लोक पुत्र उत्पन्न किया जिस बृहच्छ्लोक के सौभागादिक पुत्र हुये ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पश्चादष्टमस्कन्धे ॥ ९ ॥

अथेति कश्यपस्यादितेः पुत्राणां द्वादश्यादित्यानां सन्ततिमुक्त्वा दितेः पुत्रान्कथयामीत्यर्थः ॥ १० ॥

संह्लादं प्रागनुह्लादं ह्लादं प्रह्लादमेव च । [1]
तत्स्वसा सिंहिका नाम राहुं विप्रचितोऽग्रहीत् ॥ १३ ॥
शिरोऽहरद्यस्य हरिश्चक्रेण पिबतोऽमृतम् ।
संह्लादस्य कृतिर्भार्याऽसूत पञ्चजनं ततः ॥ १४ ॥
ह्लादस्य धमनिर्भार्याऽसूत वातापिमिल्वलम् ।
योऽगस्त्याय त्वतिथये पेचे वातापिमिल्वलम् [2] ॥ १५ ॥
अनुह्लादस्य सूर्म्यायां बाष्कलो महिषस्तथा ।
विरोचनस्तु प्राह्लादिर्देव्यास्तस्याभवद्बलिः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हिरण्यकशिपुर्हिरण्याक्षश्चेति प्रथमं द्वावेव तौ च कीर्तितौ तृतीयस्कन्धे ॥ ११ ॥ १२ ॥

विप्रचितो दानवाद्भर्तुः सकाशाद्राहुं पुत्रमग्रहीत् ॥ १३ ॥

ततः संह्लादादसूत ॥ १४ ॥

यो मेषरूपं वातापिं पेचे तमिल्वलम् यं पेचे तं च वातापिं चासूतेत्यन्वयः ॥ १५ ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

काश्यपस्य कश्यपपुत्रस्य महात्मनः उरुक्रमस्य तानि प्रसिद्धानि कर्माणि पदत्रयेण लोकत्रयाक्रमणादीनि गुणाः स्वभक्तविषयकानुग्रहादयः सर्वशक्त्यादयश्च वीर्याणि उत्कृष्टगुणैरन्येभ्यः उत्कर्षो हि वीर्यं तद्रूपाणि वीर्याणि च पश्चादष्टमस्कन्धे वक्ष्यामहे तथा अदित्यां यथा येन प्रकारेण अवततार अवतीर्णवान् तञ्च प्रकारं तत्रैव वक्ष्यामहत्यर्थः ॥ ६ ॥

एवं साकल्येनादितेर्वंशमनुक्रम्याथ दितेर्वंशस्यानुक्रमं प्रतिजानीते—अथेति । काश्यपादीनां चित्स्वरूपाणामादितेयानां दायादान् सपिण्डान् शत्रून् दैतेयान् दितेः पुत्रान् ते तुभ्यं कीर्तयामि कथयामि तद्वंशे भागवतानामभावात् तच्छ्रवणं ममापेक्षितमिति राज्ञोऽभिप्रायमालोच्याह—यत्रेति । यत्र दितेर्वंशे श्रीमान् भगवता तुल्यं कल्याणगुणसंयुक्तः महाभागवतः प्रह्लादः बलिश्च बभूवतुः ॥ १० ॥

तर्हि कथयेत्यत्राह—दितेरिति । दितश्चावेव दायादौ काश्यपानां देवानां शत्रू मरुतामदायादत्वस्य वक्ष्यमाणत्वाद्द्वावेवेत्युक्तं पुत्रौ दैत्यैस्तत्पुत्रपौत्रादिभिर्दानवैश्च वन्दितौ बभूवतुः तौ च हिरण्यकशिपुर्हिरण्याक्षश्चेति कीर्तितौ प्रख्यातौ ॥ ११ ॥

तत्र हिरण्यकशिपोर्भार्या जम्भस्य दुहिता दानवी दनुवंशोद्भवा कयाधुरिति प्रसिद्धा सा कयाधुः प्रह्लादादीन् चतुरः सुतान् सुषुवे ॥ १२ ॥

प्राक् प्रथमं प्रह्लादं ततः क्रमेणानुह्लादसंह्लादह्लादान् सुषुवे इत्यर्थः तत्स्वसा तेषां प्रह्लादादीनां चतुर्णां स्वसा भगिनी सिंहिकेति प्रसिद्धा बभूव सा विप्रचितः विप्रचितेर्भर्तुर्दानवात्सकाशाद्राहुं पुत्रमग्रहीत् सुषुव इत्यर्थः ॥ १३ ॥

राहुं विशिनष्टि—शिर इति । यस्य राहोरमृतं पिबतः शिरश्चक्रेण चिच्छेद संह्लादस्य हिरण्यकशिपोस्सुतस्य मतिर्नाम भार्या पञ्चजनाख्यं सुतमसूत सुषुवे ॥ १४ ॥

तथा ह्लादस्य भार्या धमनीति प्रसिद्धा वातापिमिल्वलञ्चासूत, इल्वलं विशिनष्टि—य इति, अतिथये आतिथ्यार्थं निमन्त्रितायातिथये अगस्त्याय इल्वलो मेषरूपं वातापिं पेचे पपाच तमिल्वलमित्यन्वयः । वातापिमिल्वल इति प्रथमान्तपाठस्तु सुगमः ॥ १५ ॥

तथा अनुह्लादस्य सूर्म्यायां भार्यायां बाष्कलो महिष इति द्वौ पुत्रौ बभूवतुः तथा धृत्यां प्रह्लादस्य भार्यायां विरोचनः प्राह्लादिः प्रह्लादस्यापत्यं पुमान् बभूव, तस्य विरोचनस्य पुत्रो बलिरभवत् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

महात्मनः कश्यपस्य पत्न्यामदित्यां यथाऽसावुरुक्रमोऽवततार तत्कर्मादीनि पश्चादष्टमस्कन्धे वक्ष्याम इत्यन्वयः ॥ ६ ॥

अथ मङ्गलमस्तु नतु, दैत्यवंशवर्णनं किमर्थं क्रियते ? तत्कथनस्य श्रेयःसाधनत्वानुपयोगित्वादिति तत्राह—यत्रेति । यत्र दितिसन्ताने प्रह्लादबलिचरितकीर्तनश्रवणाभ्यां श्रेयःसाधनत्वसम्भवादित्यर्थः ॥ १० ॥ ११ ॥

विप्रचितः विप्रचितेः सकाशाद्राहुं सुतम् ॥ १२ । १३ । १४ । १५ ॥

तस्य विरोचनस्य ॥ १६ ॥

---

(१) प्रह्लादं प्रागनुह्लादं ह्लादं संह्लादमेव च । इति पाठान्तरम् वा०रा० । (२) इल्वलः इति पाठान्तरम्—वी०रा०

बाणज्येष्ठं पुत्रशतमशनायां ततोऽभवत् ।
तस्यानुभावः सुश्लोक्यः पश्चादेवाभिधास्यते ॥ १७ ॥
बाण आराध्य गिरिशं लेभे तद्गणमुख्यताम् ।
यत्पार्श्वे भगवानास्ते ह्यद्यापि पुरपालकः ॥ १८ ॥
मरुतश्च दितेः पुत्राश्चत्वारिंशन्नवाधिकाः ।
त आसन्नप्रजाः सर्वे नीता इन्द्रेण सात्मताम् ॥ १९ ॥

राजोवाच ।

कथं त आसुरं भावमपोह्यौत्पत्तिकं गुरो ! ।
इन्द्रेण प्रापिताः सात्म्यं किं तत्साधु कृतं हि तैः ॥ २० ॥
इमे श्रद्दधते ब्रह्मन्नृषयो हि मया सह ।
परिज्ञानाय भगवंस्तन्नो व्याख्यातुमर्हसि ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

पश्चादष्टमस्कन्धे ॥ ९ ॥

अथेति । कथान्तरारम्भे, दायादान् पुत्रान् दैतेयान् दित्यां जातान् ॥ १० ॥ ११ ॥ १२ ॥

विप्रचित्तो दानवात् पत्युः सकाशात् राहुं पुत्रमग्रहीत् प्राप ॥ १३ ॥ १४ ॥

य इल्वलः अगस्त्याय अगस्त्यं भोजयितुं वातापिं मेषरूपं पेचे ॥ १५ ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यथा अवततार तत्प्रकारः तस्यावतीर्णस्य कर्मादीनि च पश्चादष्टमस्कन्धे वक्ष्याम हे राजन् ॥ ९ ॥

यत्र येषु भागवतः प्रह्लादो बलिश्च ॥ १० ॥

कीर्तितौ वर्णितौ तृतीयस्कन्धे ॥ ११ ॥

जृंभस्य तनया तेन दत्ता ॥ १२ ॥

तेषां स्वसा भगिनी सिंहिकानाम प्रसिद्धा सापि विप्रचित्तो दानवाद्भर्तुः सकाशात् राहुं पुत्रमग्रहीत ॥ १३ ॥

यस्य राहोः शिरो हरिश्चिच्छेद संह्लादस्य भार्या कृतिस्ततः संह्लादात्पञ्चजनमसूत ॥ १४ ॥

ह्रादस्य भार्या धमनिर्वातापिमिल्वलञ्चासूत य इल्वलः वातापिमगस्त्यायातिथये पेचे पपाच ॥ १५ ॥

प्राह्लादिः प्रह्लादपुत्रः तस्य विरोचनस्य देव्यां भार्य्यायां बलिरभवत् ॥ १६ ॥

भाषा टीका ।

कश्यपके पुत्र श्रीवामनजी के गुण कर्म वीर्य आगे [अष्टमस्कन्धमें] कहेंगे । जैसे अदितिमें प्रकट हुपे ॥ ९ ॥

अब कश्यपके पुत्र दैत्योंको कहता हूं जिनमें महा भागवत श्रीप्रह्लाद और बलि हुपे ॥ १० ॥

दैत्य दानवोंसें वन्दित वडे प्रसिद्ध हिरण्यकशिपु और हिरण्याक्ष ये दो पुत्र दितिके हुए ॥ ११ ॥

जम्भकी पुत्री दानवी हिरण्यकशिपुकी भार्याने चार पुत्र उत्पन्न किये ॥ १२ ॥

वे चार ये हैं संह्राद, अनुह्राद, ह्राद, प्रह्राद । और इनकी वहिन सिंहिका ने विप्रचित्तिसे राहु को पैदा किया । अमृत को पान करते हुए जिसके शिरको हरिने चक्रसे काटा । संह्रादकी कृति नामक भार्याने पतिसे पञ्चजन नामक पुत्रको उत्पन्न किया ॥ १३ ॥ १४ ॥

जिस इल्वलने अगस्त्यरूप अतिथिके लिये वातापी को पकाया उस इल्वल, और जिसको पकाया उस वातापी को अर्थात् इल्वल और वातापी इन दोनों को ह्राद की धमनी नामक भार्याने उत्पन्न किया ॥ १५ ॥

अनुह्राद की सूर्म्या भार्याने वाष्कल और महिष इनको उत्पन्न किया । प्रह्लादके विरोचन पुत्र हुआ जिस विरोचनकी भार्या से बलि उत्पन्न हुआ ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततो बलेः सकाशादभवत् तस्य बलेरनुभावः सुश्लोक्यः पुण्यकीर्तिः यद्वा अनुभाव्यते सद्भिः स्तूयत इत्यनुभावम् सुश्लोकयं यश इति शेषः ॥ १७ ॥

सूत उवाच ।

तद्विष्णुरातस्य स बादरायणिर्वचो निशम्यादृतमल्पमर्थवत् ।
सभाजयन् [1]सन्निभृतेन चेतसा जगाद सत्रायण ! सर्वदर्शनः ॥ २२ ॥

श्रीशुक उवाच ।

हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना ।
मन्युना शोकदीप्तेन ज्वलन्ती पर्यचिन्तयत् ॥ २३ ॥
कदा नु भ्रातृहन्तारमिन्द्रियाराममुल्बणम् ।
अक्लिन्नहृदयं पापं घातयित्वा शये सुखम् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य गणेषु मुख्यतां प्राधान्यम् ॥ १८ ॥

सात्मतां समानरूपताम् ॥ १९ ॥

सात्म्यं देवत्वं प्रापिताः ॥ २० ॥ २१ ॥

आदृतं सादरं अल्पं मिताक्षरं अर्थवत् बह्वर्थयुक्तं सत्रमयनमाश्रयो यस्य हे सत्रायण शौनक ॥ २२ ॥

शक्रस्य पार्ष्णिग्राहेण पृष्ठतः सहायेन ॥ २३ ॥

भ्रातृहन्तारमिन्द्रं मारयित्वा सुखिनी कदा स्यामिति चिन्तयामास दितिः उल्बणं क्रूरं अक्लिन्नहृदयं कठिनचित्तम् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो बलेः अशनायां भार्यायां बाणः ज्येष्ठो यस्य तत्पुत्राणां शतमभवत् तस्य महादस्यव बलेर्या अनुभावः प्रभावः सुश्लोक्यः अतीव वर्णनीयः स पश्चादिव स्सम स्कन्धे वा अभिधास्यते कथयिष्यते॥१७॥

बाणस्तु गिरिशं रुद्रमाराध्य तद्भृत्यवर्गेषु मुख्यतां लेभे तदेव व्यञ्जयन् बाणं विशिनष्टि, यस्य बाणस्य पार्श्वे अद्यापि पुरपालकः स भगवान् गिरिश आस्ते ॥ १८ ॥

अन्यानपि दितेः पुत्रानाह— मरुतश्चेति । चकारो हिरण्यकशिपुहिरण्याक्षयोस्समुच्चयार्थः मरुतो मरुद्गणाः चत्वारिंशदधिकाः एकोनपञ्चाशत्संख्याकाः दितेः पुत्रा एव ते सर्वे मरुतः अप्रजाः अपुत्राः आसन् ते चेन्द्रेण सात्मतां समानरूपत्वं देवत्वमिति यावत् नीताः प्रापिताः अतो न देवानां दायादा इति भावः ॥ १९ ॥

एतदेव शुश्रूषुः पृच्छति राजा—कथमिति द्वाभ्यां हे गुरो ! मुने, ते मरुतः कथमौत्पत्तिकं जन्मसिद्धमासुरभावमपोह्य त्यक्त्वा इन्द्रेण सात्म्यं देवत्वं प्रापिताः देवत्वप्राप्तौ तैर्मरुद्भिः किं तस्येन्द्रस्य साधु हितं कृतम् ॥ २० ॥

न केवलमिदमहमेव शुश्रूषुरपि तु हे ब्रह्मन्, इमे ऋषयोऽपि परिज्ञानाय वेदितुं श्रद्धते श्रद्धां कुर्वन्ति. अतो हे भगवन्, नोऽस्मभ्यं व्याख्यातुं कथयितुमर्हसि ॥ २१ ॥

एवमापृष्टो मुनिः प्रश्नमभिनन्दयन् यथावदाचख्यौ इत्याह सूतः—तदिति । बादरायणस्यापत्यं पुमान् । विष्णुरातः श्रीशुकः अल्पं मिताक्षरमर्थवदाशयगर्भं तस्य राज्ञस्तद्वचः आदृतं सादरं यथा भवति तथा निशम्य निभृतेन चेतसा पूर्णेनान्तः करणेन तं राजानं संभावयन् सम्मानयन् सर्वज्ञो मुनिः हे सत्रायण, सत्रं ब्रह्मसत्रम् अयनमाश्रयो यस्य स ब्रह्मसत्रेण दीक्षित इत्यर्थः तस्य सम्बोधनं हे शौनक, जगाद ॥ २२ ॥

तदेवाह—हतपुत्रेति । शक्रपार्ष्णिग्राहेण शक्रमिन्द्रं पार्ष्णिः पक्षः स्वीयत्वेन ग्राहिणा गृहीतवता विष्णुना हतौ पुत्रौ हिरण्याक्षहिरण्यकशिपू यस्याः सा दितिः अत एव शोकेन दीप्तो यो मन्युः क्रोधस्तेन ज्वलन्ती परितपन्ती पर्यचिन्तयत् परितश्चिन्तामकरोत् ॥ २३ ॥

चिन्तामेव वर्णयति—कदेति । भ्रात्रोर्हिरण्यकशिपुहिरण्याक्षयोः हन्तारं विष्णुद्वारा हन्तारं, तत्र हेतुः इन्द्रियारामं केवलवैषयिकसुखासक्तम् उल्बणं क्रूरम् अक्लिन्नहृदयम् अनार्द्रचित्तम् अत एव पापं पापात्मानं इन्द्रं घातयित्वा कथमहं सुखं यथातथा स्वपे सञ्जातनिद्रा भवेयम् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ततो बलेस्तस्यानुभावः पश्चादष्टमस्कन्धे अनुभावमिति पाठेऽभिधास्यते वदिष्यति व्यास इति शेषः । अयं जन इति वा ॥ १७ ॥

यस्य बाणस्य पार्श्वे ॥ १८ ॥

सात्मतां समानजातितां सोदरत्वम् ॥ १९ ॥

---

(१) सन्निभृतेनेति पाठान्तरम्—विजय० ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

साधु पुण्यम् ॥ २० ॥ २१ ॥

तद्वचः तन्निभृतेन तस्मिन् स्निग्धेन सत्रायणः सत्रे प्रधानः सर्वदर्शनः सर्वज्ञः ॥ २२ ॥

पक्षपाततया कर्मकरः पार्ष्णिग्राहस्तेन शोकसन्दीपितेन ॥ २३ ॥

अक्लिन्नहृदयं अनार्द्रहृदयं स्वपे निद्रां कुर्याम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अपोह्य त्याजयित्वा ॥ २० ॥

ननु कथं भवानिमां बहिरङ्गां कथां शुश्रूषते तत्राह—इमे श्रद्धत इति । मया सहेति, स्वस्य गौणत्वं बोधयंस्तथैव व्यञ्जितवान् ॥ २१ ॥

अत एव श्लाघते-तदिति । आदृतम् ऋषीणामादरेण सहितम् अर्थवत् एतच्च भगवदाराधनविशेषसम्बन्धेनैव भवेदिति स्वाभीष्टयुक्तं सन्निभृतेन श्रीभगवत्सुखपूर्वेण अतस्तदपि भगवत्सम्बन्धं योजयिष्यतीति भावः । टीकायां बह्वर्थमिति ऋष्यभिप्रेतश्रीशुकाभिप्रेतसिद्धियुक्तम् ॥ २२—२५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तस्य बलेः अनुभावमित्यार्ष बाह्यकर्म सम्बन्धेन वा ॥ १७ ॥ १८ ॥

सात्मतां समानस्वभावतां देवत्वं प्रापिता इत्यर्थः ॥ १९ ॥ २० ॥

इमे मुनयः श्रद्धते इति स्वस्यैव श्रद्धां मुनिष्वारोपयति रहस्यमर्थं तान् ज्ञापयितुम् ॥ २१ ॥

अर्थवत् अनेकार्थयुक्तं तत्रैको जिघांसितोऽप्योऽस्माकमुपास्यतामुपकल्प्यते, यथा, परहिंसामभिलषन्त्यापि तामसीं भगवद्भक्तिं कुर्वन्त्यशुद्धचित्तापि, निष्कलामतामसीं भक्तिमानुषङ्गिकीं संसारान्मुक्तिं चित्तशुद्धिप्राप्त्या परजिघांसानिवृत्तिश्च लभत इत्यत्र दितिरेव प्रमाणम्, तथा, कुटिलचित्ताः विवेकिनोऽपि यान् दोषान् परेषां पश्यन्ति तानेव दोषान् स्वस्मिन् स्थितानपि न पश्यन्ति इत्यत्र क्रमिविडित्यादिकवचनात्, दितिरेव प्रमाणमिति द्वितीयः । श्रीमायया महाविज्ञोऽपि प्रतार्यो भवतीत्यत्र कश्यप एव प्रमाणमिति तृतीयः । अल्पं मिताक्षरं सन्निभृतेन सम्पूर्णेन एकाग्रीकृतेनेत्यर्थः । हे सत्रायण शौनक ! ॥ २२ ॥

शक्रस्य पार्ष्णिग्राहेण पृष्ठतः सहायेन परोक्षसाहाय्य कर्त्रेत्यर्थः ॥ २३ ॥

उल्वणं क्रूरम् । सुखं शये सुखेन निद्रामीत्यर्थः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ततो बलेः सकाशादशनायां भार्यायां बाणो ज्येष्ठो यस्मिन् तत् पुत्रशतमभवत, तस्य बलेरनुभावः सुश्लोक्यः कविभिः शोभनैः श्लोकैर्वर्णनार्हः पश्चादष्टमे स्कन्धेऽभिधास्यते ॥ १७ ॥

तस्य गणेषु मुख्यतां प्राधान्यम् । भगवान् भवः पुरपालकः सन् अद्यापि यस्य पार्श्वे आस्ते ॥ १८ ॥

इन्द्रेण सात्मतां देवत्वं नीताः ॥ १९ ॥

हे गुरो ! इन्द्रेण औत्पत्तिकं सहजं तदीयमासुरं भावमपोह्य ते सात्म्यं देवत्वं कथं प्रापिताः ? तैस्तस्य किं साधुकृतम ? ॥ २० ॥ २१ ॥

सत्रमयनमाश्रयो यस्य सम्बोधने हे सत्रायण ! शौनक स प्रसिद्धः सर्वदर्शनो बादरायणिः शुकः विष्णुरातस्य तत्प्रश्नरूपं आदृतं आदरान्वितं अल्पं मितवर्णं अर्थवत् बह्वर्थयुक्तम् वचो निशम्य निभृतेनानन्दपूर्णेन चेतसा समाजयन् प्रशंसयन् जगाद ॥ २२ ॥

शक्रस्य पार्ष्णिग्राहेण सहायेन ॥ २३ ॥

उल्वणं क्रूरम् अक्लिन्नहृदयमनार्द्रचित्तम् पापं पापात्मानम् घातयित्वा कथमहं सुखं यथा तथा शये ॥ २४ ॥

भाषाटीका ।

उस बली की अशना नामक भार्या में सौ पुत्र उत्पन्न हुये जिनमें बाणासुर जेष्ठथा । उस बलीके पवित्र प्रभाव को आगे 'अष्टमस्कन्धमें' कहेंगे ॥ १७ ॥

बाणासुर महादेव का आराधन करके उनके गणों में मुख्य होगया। जिसके समीप में अबतक भी पुरपालक होकर भगवान् शंकर रहते हैं ॥ १८ ॥

और भी दिति के ऊनपञ्चाशत ४९ मरुत नामक पुत्र हुए वे सबही अप्रज नाम विना सन्तान के हुए और इन्द्रने उनको अपने भाई बना लिये ॥ १९ ॥

राजो वाच ॥

हे गुरो उन सबोंको, उनके स्वाभाविक असुरपने को दूर कर किस प्रकार ? इन्द्रने अपने बराबर के किये, ऐसा उनों ने क्या पुण्य किया था । हे ब्रह्मन् हे भगवन् ! मेरे सहित ये सब ऋषि लोग इस वृत्तान्त के सुनने की श्रद्धा करते हैं तस्मात् आप कहने योग्य हैं ॥ २० ॥ २१ ॥

सूत उवाच ॥

हे शौनक ! सर्वज्ञ श्री शुकदेवजी राजा परीक्षित के सार्थक और थोडे से मधुर वचन को सुनकर आनन्दित चित्त से श्लाघाकर बोले ॥ २२ ॥

श्री शुक उवाच ॥

इन्द्र के सहायक विष्णुने जब दिति के दोनों पुत्रों को

क्रमिविड्भस्मसंज्ञाऽऽसीद्यस्येशाभिहितस्य च ।
भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ॥ २५ ॥
आशासानस्य तस्येदं ध्रुवमुन्नद्धचेतसः ।
मदशोषक इन्द्रस्य भूयाद्येन सुतो हि मे ॥ २६ ॥
इति भावेन सा भर्तुराचचाराऽसकृत्प्रियम् ।
शुश्रूषयाऽनुरागेण प्रश्रयेण दमेन च ॥ २७ ॥
भक्त्या परमया राजन् ! मनोज्ञैर्वल्गुभाषितैः ।
मनो जग्राह भावज्ञा सुस्मिताऽपाङ्गवीक्षणैः ॥ २८ ॥
एवं स्त्रिया जडीभूतो विद्वानपि विदग्धया ।
बाढमित्याह विवशो न तच्चित्रं हि योषिति ॥ २९ ॥
विलोक्यैकान्तभूतानि भूतान्यादौ प्रजापतिः ।
स्त्रियं चक्रे स्वदेहार्द्धं यया पुंसां मतिर्हृता ॥ ३० ॥
एवं शुश्रूषितस्तात ! भगवान्कश्यपः स्त्रिया ।
प्रहस्य परमप्रीतो दितिमाहाभिनन्द्य च ॥ ३१ ॥

कश्यप उवाच ।

वरं वरय वामोरु ! प्रीतस्तेऽहमनिन्दिते ! ।
स्त्रिया भर्तरि सुप्रीते कः काम इह चागमः ॥ ३२ ॥

भाषा टीका ।

मारदिये तब शोक से दीप्त हुआ जो क्रोध तिससे जलती हुई दिति चिन्ता करने लगी ॥ २३ ॥

कि भाइयों के मारने वाला विषयी, स्वभाव से क्रूर कठिन हृदय, पापी इन्द्रको मरवाकर, कब सुख से सोऊंगी ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, राजा स्वदेहरक्षार्थमन्येषां घातं करोत्येव किमत्र चित्रं ? तत्राह-कृमीति । ईशः प्रभुरित्यभिहितस्यापि यस्य पूर्वेषां राज्ञां देहस्य मरणानन्तरं क्षितिविनावस्थितस्य कृमय इति, श्वादिभिर्भक्षितस्य तु विष्ठेति, दग्धस्य भस्मेति संज्ञा आसीत्तत्कृते तस्य देहस्यार्थे यो भूतेभ्यो द्रुह्यति स किं स्वार्थं वेद ? न वेदैव. तत्र हेतुः, यतो भूतद्रोहान्निरयो भवति ॥ २५ ॥

इदं देहादिकं ध्रुवं नित्यमाशासानस्य मन्यमानस्यात उन्नद्धमुच्छृंखलं चेतो यस्य तस्येन्द्रस्य यो मदस्तस्य शोषकः पुत्रो मे येन हेतुना भूयाद्भवेत् ॥ २६ ॥

भर्तुः प्रियाचरणमेवेति भावेन सा भर्तुः प्रियमसकृदाचचार ॥ २७ ॥ २८ ॥

विवशः स्त्रीपरतन्त्रस्सन् बाढं तव मनोरथं पूरयिष्यामीति यदाह तन्न चित्रम् ॥ २९ ॥

तत्र हेतुमाह-विलोकयेति । एकान्तभूतानि निःसङ्गानि मैथुनेन सृष्टिवृद्ध्यर्थं स्वदेहार्धमेव स्त्रियं चक्रे ॥ ३० ॥

एवं स्त्रिया शुश्रूषितः सन् ॥ ३१ ॥

इह चकारात्परत्र च अगमोऽप्राप्यः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ॥

ननु, सर्वोऽपि लोकः स्वसुखाय परस्याहितमाचरति, किमनेनाक्रोशेन ? तत्राह-कृमीति । ईशाभिहितस्य "ईश्वरोऽहमहं भोगी" इत्युक्तरीत्या स्वेनैवेशत्वेनाभिहितस्य ईशं मन्यमानस्यापि यस्य पुंसः मरणानन्तरं देहस्य दाहाभावे कृमिरिति, तत्समये श्वादिभिर्भक्षितस्य विष्ठेति, दग्धस्य तु भस्मेति, संज्ञा आसीत् तत्कृते तादृशदेहसुखार्थी भूतध्रुक् भूतहिंसाकारी स किं स्वार्थं पुरुषार्थं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वेद न वेदेत्यर्थः । कुतः ? यतो भूतद्रोहाद्धेतोस्तस्यां ततो निरयो नरक एव अतो भूतध्रुक् स्वार्थमपि न जानात्येवेति भावः ॥ २५ ॥

इदं शरीरमेवाशासानस्यमात्मानं मन्यमानस्य उन्नद्धमुच्छृङ्खलं चेतो यस्य तस्येन्द्रस्य यो मदस्तस्य शोषकृत्पुत्रो मम येन कारणेन ध्रुवं नूनं भूयात् ॥ २६ ॥

हे राजन्, इत्थं भावेनाभिप्रायेण सा दितिर्भर्तुः कश्यपस्य शुश्रूषादिभिरसकृत्प्रियं हितम् आचचार आचरितवतीत्यर्थः तत्र शुश्रूषा सेवा परिचर्येति यावत् अनुरागः स्नेहः प्रश्रयो विनयः दमः इन्द्रियनिग्रहः ॥ २७ ॥

भावज्ञा दितिर्वल्गुभाषितैः मधुरालापैः सस्मितैः मन्दहाससहितैः अपाङ्गवीक्षणैः कश्यपस्य मनो जग्राह स्ववशीकृतवती बभूव ॥ २८ ॥

कथं जितेन्द्रियस्य तस्य विदुषः स्त्रीवश्यता ? तत्राह—एवमिति । विद्वानपि विदग्धया पुरुषवञ्चननैपुण्ययुक्तया स्त्रिया दित्या जडीभूतः मोहं प्रापितः अत एव विवशः परवशः बाढमित्याह सम्भोगार्थमङ्गीकृतवानित्यर्थः । योषिति स्वयङ्कामयमानायां स्त्रियां पुरुषस्य तद्बाढमितिवचो न चित्रं हीति लोकचरित्रप्रदर्शनम् ॥ २९ ॥

प्रजापतिः कश्यपः आदौ प्रथमं भूतानि स्त्रीपुंसरूपाणि भूतानि एकान्तभूतानि एकान्तरूपाणि । एकान्तान्येकदेश इवाविभागेन लक्ष्यमाणानि एकान्तभूतानि विलोक्य परस्परमेकशरीरवन्मिलितानि भवन्तीत्यालोच्येत्यर्थः स्वयमपि स्त्रियं स्वदेहस्यार्द्धम् अर्द्धांशश्चक्रे मिथुनीभूतो बभूवेत्यर्थः एवं करणे हेतुं वदन् सामान्यतः स्त्रियं विशिनष्टि—यया स्त्रिया पुंसां मतिर्हृता भवतीति लोकरीत्युक्तिः ॥ ३० ॥

भगवान् कश्यपः स्त्रिया दित्या एवं सम्भोगेन शुश्रूषितः परिचरितः अत एव नितरां प्रीतः अभिनन्द्य तस्याः सम्भोगकौशलमभिनन्द्य प्रहस्य दितिंप्रति इदं वक्ष्यमाणमाह ॥ ३१ ॥

तदेवाह—वरमिति । हेवामोरु ! हे अनिन्दिते ! वरमभीष्टं वरय कामयस्व भर्तरि स्त्रियाः नितरां प्रीते सति इह लोके चकारात्परत्र च लोके अगमो ऽप्राप्यः कामः को वा ? न कोऽप्यस्तीत्यर्थः स्त्रिया ऽप्राप्य इति वान्वयः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वाशब्दोऽपि शब्दार्थः ईशाभिहितस्य ईशोऽहं राजाहमित्यादिशब्दवाच्यस्यापि यस्य देहस्यान्ते मरणोत्तरकाले कृमिविड्भस्मसंज्ञा भवेच्चिरकालावस्थाने कृमिरिति संज्ञा, श्वादिभिर्भक्षिते विट्संज्ञा, वह्निदाहे भस्मसंज्ञाः तत्कृते तस्य देहस्यार्थे भूतध्रुक् सर्वप्राणिहिंसकः स्वार्थं स्वप्रयोजनं किं वेद ? न किमपि वेदेत्यन्वयः । यः स्वार्थं कुरुते स वेद किं ? ज्ञानवान् किं न भवतीत्यर्थ इति वा । कुत इति तत्राह—निरय इति । निर्गतम् अयमिष्टमदं दैवं यस्मात् स तथा तादृशो भवतीति यतस्तस्माद्यतः स्वरूपाज्ञानाद्वा भूतद्रोहाद्वा ॥ २५ ॥

इदं जगत् ध्रुवमित्याशासानस्य वाञ्छतः उद्धतबुद्धेरिन्द्रस्य मदशोषणं येन सुतेन स्यात् स सुतो मे स्यात् ॥ २६ ॥

इतिभावेनाभिप्रायेण ॥ २७ ॥ २८ ॥ २९ ॥

जगदादौ प्रजापतिर्ब्रह्मा भूतान्येकान्तभूतानि परस्परस्नेहरहितानि केवलं मृत्युभूतानि विलोक्य मिथःस्नेहबन्धार्थं स्वशरीरार्धां स्त्रियं चक्रे ससर्जेत्यन्वयः ॥ ३० ॥ ३१ ॥

भर्तरि स्त्रीणामर्थे सुप्रीते सति किं कामः पुरुषार्थोऽगमः प्राप्तुमशक्य इत्यन्वयः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आशासानस्येति येन भवेत् तत्तु भर्तृप्रियाचरणमेवेति भावेनेत्यर्थः ॥ २६—३४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ईशाभिहितस्य ईशो राजेत्यभिहितस्यापि देहस्य मरणानन्तरं कतिचिद्दिनावस्थितत्वे कृमय इति, श्वादिभिर्भक्षितत्वे विष्ठेति, पुत्रादिभिर्दग्धत्वे भस्मेति, संज्ञा आसीत् । पूर्वपूर्वनृपाणामपि तथा दृष्टत्वादिति भूतनिर्देशः तस्य देहस्य कृते यो भूतेभ्यो द्रुह्यति स किं स्वार्थं वेद ? नैव वेद. यतः स्वस्यैव निरयो भवति तस्मादिन्द्र एव विवेकशून्य इति व्यञ्जयति. अथ च स्वयमेव विवेक शून्या. यत इन्द्रजिघांसुः स्वयमपीन्द्रमेव भूतद्रुहं स्वयमक्लिष्टवयापीन्द्रमेवाक्लिष्टवयं स्वयं स्वार्थानभिज्ञापि इन्द्रमेव स्वार्थानभिज्ञं मन्यत इत्यतो विवेकोऽप्यविवेकिनामविवेकमेव दृढयतीति दर्शितम् ॥ २५ ॥

येनैव तेन दुश्चेष्टितेन हेतुनैव तस्य मदशोषकः सुतो मे भूयादिति प्रार्थनेत्यर्थः । तस्य कथम्भूतस्य इदं देहादिकं ध्रुवं नित्यं आशासानस्य मन्यमानस्य उच्छृङ्खलचेतसः भर्त्तरि तुष्यति स्त्रीणां मनोरथः सिद्ध्यति । तस्मादहं परिचर्यया पतिं तोषयामीति भावेन ॥ २६ ॥ २८ ॥

बाढं तव मनोरथं पूरयिष्यामीति यदाह तन्न चित्रम् ॥ २९ ॥

एकान्तभूतानि निस्सङ्गानि मतिर्हृता अत एव संसारप्रवाहोऽविच्छिन्नोऽभूदिति भावः ॥ ३० ॥

अगमः अप्राप्यः ॥ ३१ ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु, स्वदेहस्यार्थे राजानो घातं करोत्वेवेत्यत आह—कृमीति । पूर्वेषां राज्ञामीशाभिहितस्य देहः सम्यक् इयेवं भोक्तस्यापि

पतिरेव हि नारीणां दैवतं परमं स्मृतम् ।
मानसः सर्वभूतानां वासुदेवः श्रियः पतिः ॥ ३३ ॥
स एव देवतालिङ्गैर्नामरूपविकल्पितैः ।
इज्यते भगवान्पुम्भिः स्त्रीभिश्च पतिरूपधृक् ॥ ३४ ॥
तस्मात्पतिव्रता नार्यः श्रेयस्कामाः सुमध्यमे !
यजन्तेऽनन्यभावेन पतिमात्मानमीश्वरम् ॥ ३५ ॥
सोऽहं त्वयाऽर्चितो भद्रे ! ईदृग्भावेन भक्तितः ।
तत्ते सम्पादये काममसतीनां सुदुर्लभम् ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

देहस्य मरणानन्तरं त्रित्रिदिनावस्थितस्य कृमय इति, श्वादिभिर्भक्षितस्य विडिति, दग्धस्य भस्मेति च, संज्ञा आसीत् तत्कृते तदर्थं यो भूतेभ्यो द्रुह्यति स किं स्वार्थं वेद ? नैव वेदेत्यर्थः । अपि तु यतो भूतद्रोहान्निरयो भवति ॥ २५ ॥

इदं देहादिकं ध्रुवं नित्यमाश्वासानस्य मन्यमानस्य उन्नद्धमुच्छृङ्खलं चेतो यस्य तस्येन्द्रस्य मदशोषको गर्वहन्तो येनोपायेन मे मम सुतो भूयात्तद्भर्त्तृभजनं करिष्यामीति शेषः ॥ २६ ॥

इति भावेन इत्यभिप्रायेण सा भर्तुः शुश्रूषादिनाऽकृत प्रियमाचचार ॥ २७ ॥

भावज्ञा अभिप्रायज्ञा ॥ २८ ॥

विदग्धया भर्तुर्मनोग्रहणे निपुणया एवं भजनेन विद्वानपि जडीकृतो मोहितः अत एव विवशः स्त्रीपरतन्त्रः बाढमित्याह, त्वत्कामं सम्पादये इति स्वीकृतवानित्यर्थः । तत्स्वाचरितैः पुरुषविमोहनं योषिति चित्रमद्भुतं न भवति ॥ २९ ॥

एवंविधा स्त्री प्रजापतिनैव सृष्टेत्याह—विलोक्येति । प्रजापतिर्ब्रह्मा आदौ एकान्तभूतानि निःसङ्गानि विलोक्य स्वदेहार्द्धं स्त्रियं चक्रे यया पुंसां मतिर्हृता दारापत्यगृहाद्यभिनिविष्टा कृता ॥ ३० ॥

बाढमित्याहविवश इति यदुक्तं तत्प्रपञ्चयति—एवमित्यादिना । भगवान् बहुज्ञोऽपि स्त्रिया एवं कपटेन शुश्रूषितः सन् प्रहस्य परमप्रीतः दितिमभिनन्द्याह ॥ ३१ ॥

हे वामोरु ! मनोहरोरु, हे अनिन्दिते ! वरं वरय भर्तरि प्रीते इह स्वातन्त्र्ये च कः कामः मनोरथः अगमोऽप्राप्यः ॥ ३२ ॥

भाषाटीका ।

जिस शरीर की राजा संज्ञा है अन्त में वही कृमि विष्ठा और भस्म संज्ञा वाला होता है उस शरीर के लिये प्राणियों से द्रोह करने वाला पुरुष क्या अपने यथार्थ स्वार्थ को जानता है ? नहि, क्योंकि उससे नरक होता है ॥ २५ ॥

देहादि को नित्य मानने वाले, और स्वतंत्र चित्त वाले, उस इन्द्रके मद का नाशक पुत्र जिस प्रकार हो इस अभिप्राय से वह अदिति सेवा अनुराग नम्रता आदि से अपने पति श्री कश्यपजी का सदा प्रिय करने लगीं ॥ २६ ॥ २७ ॥

हेराजन् ! कश्यप के अभिप्राय को जानने वाली दिति ने परम भक्ति और मनोहर प्रिय वचन, तथा सहास कटाक्ष पूर्वक देखना, इन से पति के मनको वश करलिया ॥ २८ ॥

इस प्रकार विद्वान भी श्रीकश्यपजी चतुर स्त्री के जड़की तरह वश होकर उसकी प्रार्थना को स्वीकार करते हुये । यह स्वीकार करना स्त्री के वश होकर कुछ आश्चर्य नहीं ॥ २९ ॥

क्योंकि सृष्टि के पूर्व में ब्रह्माने लोगों को संसार से विमुख देखकर अपने देह के अर्द्ध भाग को स्त्री करदिया जिससे पुरुषों की मति हरण हुई ॥ ३० ॥

हे तात (प्रिय) श्री भगवान् कश्यपजी ऐसे दिति की शुश्रूषा से परम प्रसन्न हुए । और हँसकर दिति की स्तुति करके बोले ॥ ३१ ॥

कश्यप उवाच ॥

हे अनिन्दिते ! (निन्दा के अयोग्य) हे वामोरु ! (सुन्दर ऊरु वाली) हम तुम पर प्रसन्न हुये तुम वर मांगो क्योंकि स्वामी के प्रसन्न होने पर ऐसा कौन मनोरथ है कि जो सिद्ध न हो ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, परमेश्वरे सुप्रीते सर्वकामप्राप्तिरिति प्रसिद्धं तत्राह—पतिरेवेति । ननु, मनसि स्थितः श्रीवासुदेव एव लक्ष्मीपतिः परं दैवतमिति प्रसिद्धं सत्यं स एव स्वाधिकारेण रूपभेदैः पूज्यत इत्याह—मानस इति सार्द्धेन ॥ ३३ ॥

दितिरुवाच ।

वरदो यदि मे ब्रह्मन् ! पुत्रमिन्द्रहणं वृणे ।
अमृत्युं मृतपुत्राहं येन मे घातितौ सुतौ ॥ ३७ ॥
निशम्य तद्वचो विप्रो विमनाः पर्यतप्यत ।
अहो अधर्मः सुमहानद्य मे समुपस्थितः ॥ ३८ ॥
अहो अर्थेन्द्रियारामो योषिन्मय्येह मायया ।
गृहीतचेताः कृपणः पतिष्ये नरके ध्रुवम् ॥ ३९ ॥
कोऽतिक्रमोऽनुवर्तन्त्याः स्वभावमिह योषितः ।
धिङ्मां बताबुधं स्वार्थे यदहन्त्वजितेन्द्रियः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

देवतालिङ्गैर्मूर्तिभिरुपलक्षितः तान्येवाह—नाम इन्द्रादि, रूपं वज्रहस्तत्वादि, ताभ्यां विविधकल्पितैः ॥ ३४—३६ ॥

इन्द्रहणं इन्द्रहन्तारम् अमृत्युं मृत्युशून्यं येनेन्द्रेण विष्णुना सहायेन घातितौ ॥ ३७—३९ ॥

स्वभावमनुवर्तमानाया योषितः कोऽतिक्रमोऽपराधः ॥४०॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, कर्मवश्ये ऽनीश्वरे भर्तरि प्रीते सति कथं स्वस्य सर्वकामसौलभ्यम् ? तत्राह–पतिरिति । नारीणां पतिरेव हि सर्वोत्कृष्टं दैवतम् अतः परमदैवप्रीणनेन सर्वकामसौलभ्यमितिभावः। ननु, "तं देवतानां परमञ्च दैवतम्" इति श्रुत्युक्तरीत्या श्रियःपतिर्हि परमं दैवतं, न भर्ता, तत्राह–मानस इति, यः सर्वभूतानां मानसः मनसःसाक्षी वासुदेवः सर्वान्तरात्मा श्रियः पतिः ॥ ३३ ॥

स एव भगवान्नामरूपाभ्यां विकल्पितैः विभिन्नैर्देवतालिङ्गैः अग्नीन्द्रादिदेवतारूपैः शरीरैरिज्यते इदं दृष्टान्तार्थं "तदेवाग्निस्तद्वायुस्तत्सूर्यः" इत्यादिश्रुत्युक्तरीत्या पुंभिर्यष्टृभिरग्न्यादिशरीरैरात्मभूतैर्यथा तदनन्तरात्मा भगवानिज्यते यागादिभिराराध्यते तथा स्त्रीभिरपि पतिरूपधृक् पतिशरीरकः परमात्मैव नानोपचारैस्तोष्यत इत्यर्थः भगवति तुष्टे सति सर्वे कामाः सुलभाः इति भावः ॥ ३४ ॥

यत एवं तस्मात् हे सुमध्यमे ! अर्थस्कामाः पतिव्रता नार्यः अनन्यभावेन अनन्यार्हशेषत्वेन ईश्वरात्मकं पतिमेवाराधयन्ति॥३५॥

हे भद्रे ! यतोऽहमीदृशभावेन अनन्यभावेन भक्तितश्च त्वया अर्चितः यत्तस्मात्ते तव काममिष्टं सम्पादये सिद्धं करोमि कथंभूतमसतीनामपतिव्रतानां सुतरां दुर्लभं लब्धुमशक्यम् ॥ ३६ ॥

एवं वराय चोदिता दितिराह—वरद इति । हे ब्रह्मन् ! मम यदि त्वं वरदः वरं दद्यास्तर्ह्यमर्त्यैर्देवैः हतौ पुत्रौ यस्याः सा अहम् इन्द्रस्य हन्तारं पुत्रं वृणे येनेन्द्रेण प्रयोजकेन भगवता प्रयोज्यकर्त्रा मे सुतौ हिरण्याक्षहिरण्यकशिपू घातितौ मारितौ ॥ ३७ ॥

एवं तस्याः दितेः वचो निशम्य विप्रः कश्यपः विमनाः खिन्नः पर्यतप्यत परितापञ्चकार, तमेव परितापप्रकारमाह—अहो इति । अद्य महानधर्मो मम प्राप्तः अहो इति खेदे ॥ ३८ ॥

अहो अस्मादधर्मादहं नरके ध्रुवं नूनं पतिष्ये कथम्भूतः इन्द्रियारामः अत एव योषिद्रूपया भगवन्मायया गृहीतं चेतो यस्य स अत एव कृपणः दीनः ॥ ३९ ॥

स्वभावं स्त्रीस्वभावमनुवर्तमानायाः योषितः कोऽतिक्रमः न कश्चिद्दोषः, अपि तु मामेव स्वार्थमप्यजानन्तं धिक् अहमेव स्वार्थमप्यजानन्निन्द्य इत्यर्थः । कुतः ? यदस्मादहं लालितानीन्द्रियाणि येन तादृशः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु "तदेतत्प्रेत्य" इति श्रुतेरविगानेन सर्वजनस्य परमेष्टदेवता श्रीधर इति, यतः कथं पतिरेव नारीणामिष्टदेवतेति विशेष्योच्यते ? इति तत्राह—मानस इति । वासुदेवः मानसः सर्वभूतानां मानसो मनसि स्थितस्सन् मनसा पूज्यः, को वासुदेवः ? इति तत्राह–श्रिय इति ॥ ३३ ॥

एतदेव विवृणोति—स इति । वासुदेव एव नामरूपाभ्यां विविधत्वेन कल्पितैर्देवतालिङ्गैः देवताविग्रहैः विशेषतः सन्निहितत्वेन स्त्रीभिः पुम्भिश्चेज्यते तत्र स्त्रीभिः पतिसहितत्वेन पूज्यते तदर्थं पतिरूपधृगिति, पुरुषैस्तु देवतालिङ्गनामरूपत्वेनेति, लिङ्गं लक्षणं विग्रहश्चोच्यते ॥ ३४ ॥

यस्मात्पतावाहित ईशस्तस्मात्पतिपूजनेन भगवानेव पूजितः स्यादित्युपसंहरति–तस्मादिति । पतिं पतिरूपम् ॥ ३५ ॥

शरत्पद्मोत्सवं वक्त्रं वचश्च श्रवणामृतम् ।
हृदयं क्षुरधाराभं स्त्रीणां को वेद चेष्टितम् ॥ ४१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ईदृग्भावेन पतिस्थितः परमात्मा मह्यं प्रसीदत्विति बुद्ध्या ॥ ३६ ॥

अमृत्युमनश्वरम् ॥ ३७ ॥ ३८ ॥ ३९ ॥

स्वभावं गुप्तचौर्यभावमनुवर्तमानाया अतिक्रमोऽन्यायः स्वभावं सौशील्यमनुवर्तन्त्या इति वा ॥ ४० ॥ ४१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पतिः खल्वत्र जीव एव स कथं परं दैवतमीश्वरः स्यात्तत्राह—मानसः मनसश्चित्तस्याधिष्ठाता यो वासुदेवः स एव भगवान् देवतानां लिङ्गैश्चिन्हैरिज्यते कीदृशैर्नाम इन्द्रादि, रूपं वज्रहस्तत्वादि, ताभ्यां विविधं कल्पितैः इन्द्राय स्वाहा अग्नये स्वाहा इत्यादिभिर्नामरूपभेदेन पुम्भिः कर्मिलोकैर्भगवानेव इज्यते यथा, तथा स्त्रीभिः पतिरूपेणेत्यर्थः ॥ ३४-३६ ॥

इन्द्रहणं इन्द्रहन्तारं हन्तेर्गत्यर्थत्वात् पक्षे इन्द्रानुगम अमृत्युं सर्वैरवध्यं पक्षे देवत्वादमरम्. ऊनपञ्चाशद्भिरेक एव देवो मारुत इत्येकवचनम्. विमना इति दितेरीप्सितोऽर्थस्तु इन्द्रमरणं विना न सम्भवेदिति भावः ॥ ३७—३९ ॥

अतिक्रमोऽपराधः क्रौर्यं हि स्त्रीजातेः स्वभाव एव तमनुवर्त्तन्त्याः अनुवर्त्तमानायाः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु, जीवे पत्यादिरूपे प्रीते कुतो मनोरथसिद्धिरित्यत्राह—वासुदेवः श्रियःपतिः स्त्रीणां पतिरेव वासुदेवदृष्ट्या सेवितः पतिर्मनोरथप्रदो भवतीत्यर्थः । किञ्च सर्वभूतानां मानसं हृद्यन्तःस्थं परमं दैवतं स्मृतम् "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति" इति स्मृत्या वर्णितं तद्दृष्ट्या पूजितानि सर्वाण्यपि भूतान्यपि मनोरथप्रदानि भवन्ति न पतिरेवैक इत्यर्थः ॥ ३३ ॥

अत एव पुम्भिर्याज्ञिकैः स एव वासुदेवः सर्वहृत्प्रविष्टः देवतालिङ्गैः इन्द्रादिदेवमूर्तिभिरधिष्ठानमूर्तेर्निमित्तैः नाम्नेन्द्रादिना रूपेण वज्रहस्तत्वादिना विकल्पितैर्विशेषतया समर्थितैः इज्यते तथा स्त्रीभिश्च पतिरूपधृक् पतिरूपेण भृणोति अन्तर्यामिरूपेण प्रगल्भते इति पतिरूपधृक् ॥ ३४ ॥

यस्मादेवं तस्मात् पतिव्रताः ईश्वरं सर्वनियन्तारम् आत्मानं सर्वान्तर्यामिणं वासुदेवं पतिं पत्यभिन्नं भजन्ते ॥ ३५ ॥

कामं वाञ्छितार्थम् ॥ ३६ ॥

यदि वरदस्तर्हि इन्द्रहन्तारं पुत्रं वृणे ॥ ३७ ॥ ३८ ॥

अथेदानीमिन्द्रियारामोऽहं ध्रुवं निश्चितं नरके पतिष्ये यतः योषिन्मय्या मायया गृहीतं चेतो यस्य सः स्वपुत्रनाशे तया प्रवर्तितः इति यावत् ॥ ३९ ॥

स्वभावमनुवर्तिन्याः योषितः अतिक्रमः अपराधः कः ? न कोऽपि, यतोऽहमविजितेन्द्रियः अतः स्वार्थेऽबुधं मां धिक् ॥ ४० ॥

भाषा टीका ।

पति ही स्त्रियों का परम दैवत प्रसिद्ध है सम्पूर्ण प्राणियों के हृदय में रहने वाले श्री पति वासुदेव ही परम दैवत प्रसिद्ध हैं ॥ वही वासुदेव भगवान् नाना प्रकार के नाम रूपादि से विकल्पित अनेक देवादि मूर्तियों से उपलक्षित होकर पुरुषों से पूजित होते है. और स्त्रियों से पति स्वरूप पूजित होते हैं ॥ ३३ ॥ ३४ ॥

हे सुमध्यमे ! इसीसे कल्याण की इच्छा वाली पतिव्रता स्त्रियें अनन्य भावसे पति रूप परमात्मा का सेवन करती है ॥ ३५ ॥

हे भद्रे ! ऐसी भक्ति से जो तुमने हमारा पूजन किया इसी से असति स्त्रियों को दुर्लभ भी तुमारे मनोरथ को हम पूरा करेंगे ॥ ३६ ॥

दितिरुवाच ॥

हे ब्रह्मन् ! आप यदि मुझे वर देने को प्रसन्न हो और जिस इन्द्र ने विष्णु के द्वारा मेरे पुत्रों को मरवाया है उस इन्द्र के मारने वाले और मृत्यु रहित पुत्र को आप से नष्ट पुत्र वाली मैं मांगती हूं ॥ ३७ ॥

कश्यपजी भी दिति का वचन सुनकर बड़े उदास होकर ताप को प्राप्त हुये । और बोले कि अहो आज मुझे बड़ा आश्चर्य प्राप्त हुआ ॥ ३८ ॥

अहो इन्द्रियारामी मैं स्त्रीमयी माया के वश होकर अब निश्चय नरक में पहूंचा ॥ ३९ ॥

अपने स्वभाव में चलने वाली स्त्री का यह क्या दोष है क्योंकि मैं ही अजितेन्द्रिय हूं अपने स्वार्थ न जानने वाला ऐसे मुझको धिक्कार है ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वभावमेवाह—शरदिति । शरत्पद्मस्येवोत्सवो विकासो यस्मिन् श्रवणे श्रुती तयोरमृतं क्षुरधारोपमं चित्तम् ॥ ४१ ॥

न हि कश्चित्प्रियः स्त्रीणामञ्जसा स्वाशिषात्मनाम् ।
पतिं पुत्रं भ्रातरं वा घ्नन्त्यर्थे घातयन्ति च ॥ ४२ ॥

प्रतिश्रुतं ददामीति वचस्तन्न मृषा भवेत् ।
वधं नार्हति चेन्द्रोऽपि तत्रेदमुपकल्पते ॥ ४३ ॥

इति सञ्चिन्त्य भगवान्मारीचः कुरुनन्दन ! ।
उवाच किञ्चित्कुपित आत्मानं च विगर्हयन् ॥ ४४ ॥

कश्यप उवाच ।

पुत्रस्ते भविता भद्रे ! इन्द्रहा देवबान्धवः ।
संवत्सरं व्रतमिदं यद्यञ्जो धारयिष्यसि ॥ ४५ ॥

दितिरुवाच ।

धारयिष्ये व्रतं ब्रह्मन् ! ब्रूहि कार्याणि यानि मे ।
यानि चेह निषिद्धानि न व्रतं घ्नन्ति यानि तु ॥ ४६ ॥

कश्यप उवाच ।

न हिंस्याद्भूतजातानि न शपेन्नानृतं वदेत् ।
न छिन्द्यान्नखरोमाणि न स्पृशेद्यदमङ्गलम् ॥ ४७ ॥

नाप्सु स्नायान्न कुप्येत न संभाषेत दुर्जनैः ।
न वसीताधौतवासः स्रजं च विधृतां क्वचित् ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वाशिषात्मनां स्वार्थकामनयात्मवत्प्रेष्ठत्वेन प्रतीयमानानाम् ॥४२॥

तत्रेदमुपकल्पते योग्यं भवति. अयं भावः । वैष्णवं व्रतं तावदुपदेक्ष्यामि तेनैवास्याः शुद्धचित्तायाः इन्द्रं प्रति क्रोधो निवर्तिष्यते पुत्रस्त्वमरो भविष्यति दीर्घकालत्वे च व्रतस्य कथंचिद्वैगुण्ये सतीन्द्रस्य वधोऽपि न भविष्यतीति ॥ ४३ ॥ ४४ ॥

हे भद्रे ! अञ्जः यथावद्यदि धारयिष्यसि तर्हीन्द्रहा भविष्यति वैगुण्ये तु देवबान्धवो भविष्यति वैष्णवत्वाद्व्रतस्य कथंचिद्वैगुण्येऽपि सति सर्वथा वैफल्याभावात् ॥ ४५ ॥

कार्याण्यावश्यकानि व्रतं यानि न घ्नन्ति अवश्यकानि न च निषिद्धानि किन्त्वभ्यनुज्ञातानि तानि सर्वाण्यपि ब्रूहि ॥ ४६ ॥

तत्रैकोनविंशन्निषेधानाह—न हिंस्यादिति पञ्चभिः । न शपेन्नाक्रोशेत् यदमङ्गलं कपालास्थ्यादिकं तन्न स्पृशेत् ॥ ४७ ॥

नाप्सु प्रविश्य स्नायात् पूर्वविधृतां स्रजं पुनर्न धारयेत् ॥४८॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्त्रीणां स्वभावं प्रकाशयन्परितप्यते—शरदिति । अहो स्त्रीणां वक्त्रं मुखं शरच्चन्द्रतुल्यं तथा वचश्च श्रवणयोः कर्णयोरमृततुल्यं हृदयं तु क्षुरस्य धारासदृशम्. अतस्तासां चेष्टितं को वेद ? न कोपीत्यर्थः ॥ ४१ ॥

न हि स्त्रीणां अञ्जसा तत्त्वतः कश्चिदपि पुमान् प्रियोऽस्ति. तत्र हेतुः, स्वाशिषात्मनां स्वाशिषि स्वापेक्षित एवार्थे आत्मा चित्तं यासां तासां स्वाशिषात्मत्वादिति भावः, अत एवार्थे स्वापेक्षितार्थनिमित्तं पतिं पुत्रं भ्रातरं वा घ्नन्ति मारयन्ति ॥ ४२ ॥

इदं महत्सङ्कटमित्याह—ददामीति । यत्प्रतिश्रुतं प्रतिज्ञारूपं मम वचः न मृषा भवेत् मिथ्या भवितुं नार्हति वचसोऽनृतत्वभयेन दास्यामि चेदिन्द्रो हन्येत इन्द्रोऽपि वधंप्रति नार्हति अत इदं महत्सङ्कटमिति भावः । तत्रैतस्मिन् सङ्कटे इदं मया वक्ष्यमाणम् एतत्सङ्कटनिवृत्तये उपकल्पते योग्यं भवति ॥ ४३ ॥

हे कुरुनन्दन ! भगवान्मारीचः कश्यपः इतीत्थं सञ्चिन्त्यालोच्य किञ्चित्कुपितः मनसैवात्मानं गर्हयन्नुवाच ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तदेवाह—पुत्रइति। हे भद्रे ! इदं मयोच्यमानं व्रतमङ्ग सम्यक् संवत्सरपर्यन्तं यदि त्वं धारयष्यासि करिष्यसि तर्हीन्द्रस्य हन्ता पुत्रस्तव भविष्यति नोचेद्देवानां बान्धवो भविष्यतीति ॥ ४५ ॥

तद्वचः श्रुत्वाह दितिः—धारयिष्य इति। हे ब्रह्मन् ! व्रतमहं धारयिष्ये मे कार्याणि मया कर्त्तव्यानि यानि प्रवृत्तिनिवृत्तिरूपाणि यानि च कर्माणि व्रतं न घ्नन्ति न मारयन्ति वृतघ्नानि न भवन्ति वृतघ्नानि निवृत्ति रूपाणि च कार्याणि मे ब्रूहि ॥ ४६ ॥

एवमुक्तस्तावद्व्रताङ्गनिवृत्तिरूपान् नियमानाह कश्यपः—नेति। भूतजातानि प्राणिसमूहान्नाहिंस्यात् न हन्यात् कञ्चन न शपेत् नाक्रोशेत् तथा अनृतमसत्यं न वदेत् यदमङ्गलं केशकपालास्थितुषभस्मादि, तन्न स्पृशेत् ॥ ४७ ॥

अप्सु जलेषु प्रविश्य न स्नायात् कस्मैचिदपि न कुप्येत् दुर्जनैर्न सम्भाषेत. अधौतमप्रक्षालितं वासः वस्त्रं न वसीत नाच्छादयेत् न बिभृयाच्च पूर्वं विधृतां त्यक्तां स्रजं च न पुनर्धारयेत् ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

स्वार्थे आशीःषु आत्मा यासां तास्तथा तासां स्वाशिषमिच्छन्तीनामित्यर्थः ॥ ४२ ॥ ४३ ॥ ४४ ॥

देवानां बन्धुभूतः ॥ ४५ ॥ ४६ ॥ ४७ ॥

अधौतवासः अनिर्णिक्तवस्त्रं न वसीत नाच्छादयेत् विधृतामन्योपभुक्ताम् ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

पुत्रस्त इति। यदि व्रतं धारयिष्यसि तदा इन्द्रहा तथैव देवानामसुराणाञ्च बान्धवो भविता। अन्यथातु इन्द्रहा न भविता देवानामेव बान्धवश्च भवितेत्यर्थः ॥ ४५—५० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

स्वभावमेवाह—शरदिति ॥ ४१ ॥

स्वस्य आशिषा कामनयैव आत्मा यत्नो यासां न तु पत्यादिसुखापेक्षयेति भावः। अलुक्समास आशिषा शब्दस्थाने वा ॥ ४२ ॥

तवेदमुपकल्पते योग्यं भवति. अयं भावः, वैष्णवं व्रतं तावदुपदेक्ष्यामि तेनैवास्याश्चित्तशुद्धौ सत्यामिन्द्रे क्रोधो निवर्त्स्यते ततश्चेन्द्रवधमनाकाङ्क्षन्त्यानया विहितस्य वैष्णवव्रतस्य कामितदुष्फलदानानर्हत्वान्नेन्द्रघाती भविष्यति किन्तु वरप्रार्थनप्रदानवाक्ययोर्हन्तिधातुप्रयोगाद्धन्तेश्च गत्यर्थत्वादिन्द्रानुगोऽमरः पुत्रो भविष्यति व्रतस्य दीर्घकालत्वे सत्यवश्यं वैगुण्यं च किञ्चिद्भविष्यतीति तेनैवास्या अविज्ञायाः मनःसमाधानञ्च भविष्यति. वस्तुतस्तु वैष्णवव्रतस्य वैगुण्येऽपि फलसिद्धिरवश्यं भाविनीत्यस्याः श्रमश्च सफल एव भविष्यतीति ॥४३-४४॥

इन्द्रहा इन्द्रघाती अदेवानामसुराणां बान्धव इति दितिबोधयितुमिष्टोऽर्थः। इन्द्रहा इन्द्रानुगो देवानां बान्धव इति स्वाभीष्टोऽर्थः ४५—४६ ॥

न हिंस्यादिति प्रथमत एवेन्द्रवधाशङ्का निषिद्धा ॥ ४७ ॥

अप्सु प्रविश्य न स्नायात्. अधौतं वासः न वसीत न परिदध्यात्. विधृतां पूर्वधृतां स्रजं पुनर्न धारयेत् ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

योषित्स्वभावं वर्णयति—शरदिति द्वाभ्याम्। यासां वक्त्रं शरत्पद्मादिवोत्सवो दर्शनोल्लासो यस्मात्तत् वचः श्रवणयोः कर्णयोरमृतममृततुल्यम् क्षुरधाराया आभा उपमा यस्य तद्धृदयञ्च, तासां स्त्रीणां चेष्टितं को वेद ? न कोपि. यद्वा को ब्रह्मैव तासां कृतं वेद नान्य इत्यर्थः ॥ ४१ ॥

स्वकीये आशिषि सुखे आत्मा मनो यासां तासाम् अञ्जसा शुद्धभावेन कश्चिदप्रियो न अर्थे स्वार्थसिद्ध्यर्थं पत्यादीन् घ्नन्ति घातयन्ति च ॥ ४२ ॥

ददामीति यत्प्रतिश्रुतं प्रतिज्ञावाक्यरूपं वचस्तन्न मृषा भवेत् इन्द्रोपि न वधमर्हति तत्र कार्यद्वयसिद्धौ इदमुपदिश्यमानं वैष्णवव्रतमुपकल्पते योग्यं भवति. अयंभावः, उपदिश्यमानवैष्णवव्रतप्रभावादस्याः एकस्य तु का कथा बहवः पुत्रा भविष्यन्ति बन्धुश्च परकीयो भवति इन्द्रस्तु परकीयभावं छित्वा अस्या दासस्तथा गर्भं प्रविश्य पुत्रश्च भविष्यति अयमेव परकीयभावत्यागलक्षणाम् इन्द्रस्य वधो भविष्यति न तु दैहिकवध इति ॥ ४३ ॥ ४४ ॥

हे भद्रे कल्याणि ! यदीदं व्रतं सांवत्सरमङ्ग: यथोपदिष्टं धारयिष्यसि तदा इन्द्रहा भविता भविष्यति वैगुण्ये तु देवबान्धव इन्द्राविरोधी भविष्यति व्रतस्य वैष्णवत्वात् सर्वेषां सुखं भविष्यतीति भावः ॥ ४५ ॥

हे ब्रह्मन्, व्रतं धारयिष्ये यानि आहारत्वेन देयत्वेन न घ्नन्ति. तान्येव विमृश्याह, यानि कार्याणि यानि च इह व्रते निषिद्धानि तानि मे मह्यं ब्रूहि कथय ॥ ४६ ॥

तत्र पञ्चभिर्निषिद्धानि वर्णयति—नेति। यदमङ्गलमपवित्रं तन्न स्पृशेत् ॥ ४७ ॥

अप्सु प्रविश्य न स्नायात् स्रजं पुष्पमालां विधृतां पुनर्न धारयेत् ॥ ४८ ॥

भाषाटीका।

शरत्काल के कमल सदृश जिनका मुख और कानों में अमृत

नोच्छिष्टं चण्डिकान्नं च सामिषं वृषलाहृतम् ।
भुञ्जीतोदक्यया दृष्टं पिबेदञ्जलिना त्वपः ॥ ४९ ॥
नोच्छिष्टाऽस्पृष्टसलिला सन्ध्यायां मुक्तमूर्धजा ।
अनर्चिताऽसंयतवाङ्नासंवीता बहिश्चरेत् ॥ ५० ॥
नाधौतपादाऽप्रयता नार्द्रपान्नो उदक्शिराः ।
शयीत नापराङ्नान्यैर्न नग्ना न च सन्ध्ययोः ॥ ५१ ॥
धौतवासा शुचिर्नित्यं सर्वमङ्गलसंयुता ।
पूजयेत्प्रातराशात्प्राग्गोविप्रांश्छ्रियमच्युतम् ॥ ५२ ॥
स्त्रियो [1] वीरवतीश्चार्चेत्स्रग्गन्धबलिमण्डनैः ।
पतिं चार्च्योपतिष्ठेत ध्यायेत्कोष्ठगतं च तम् ॥ ५३ ॥
सांवत्सरं पुंसवनं व्रतमेतदविप्लुतम् ।
धारयिष्यसि चेत्तुभ्यं शक्रहा भविता सुतः ॥ ५४ ॥
बाढमित्यभिप्रेत्याथ दिती राजन्महामनाः ।
काश्यपं गर्भमाधत्त व्रतं चाञ्जो दधार सा ॥ ५५ ॥
मातृष्वसुरभिप्रायमिन्द्र आज्ञाय मानद ! ।
शुश्रूषणेनाश्रमस्थां दितिं पर्यचरत्कविः ॥ ५६ ॥

भाषा टीका ।

सदृश जिनके वचन है और हृदय जिनका छुरा की धार सदृश है ऐसी स्त्रियों के चेष्टित को जान सक्ता है ॥ ४१ ॥

अपने स्वार्थ के लिये आत्मा के सदृश प्रिय मालूम होने वाली स्त्रियों का कोई प्रिय नहीं। क्योंकि वे अपने प्रयोजन के लिये पति पुत्र वा भ्राता को आप मारडालें और अन्य से मरवाडालें ॥ ४२ ॥

जो हम कहचुके कि वर देंगे यह वाक्य भी मिथ्या नहो। और इन्द्र भी न माराजाय यहां यही योग्य है ॥ ४३ ॥

हे कुरुनन्दन ! मरीचिपुत्र भगवान् कश्यपजी ने ऐसे विचार कर अपने को भी निन्दित समुझते हुये किंचित कुपित होकर बोले ॥ ४४ ॥

कश्यप उवाच ।

हे अभद्रे ! तेरे इन्द्र के मारने वाला और देवताओं का बन्धु ऐसा पुत्रहोगा। यदि व्रत को एक वर्ष तक ठीक धारण करेगी तो ॥ ४५ ॥

दितिरुवाच ।

हे ब्रह्मन् ! मैं व्रत धारण करूंगी आप कहिये जो २ व्रत में कार्य है और जो इस व्रत में निषिद्ध है और जिनसे व्रत खण्डित होता हो सो भी कहिये ॥ ४६ ॥

कश्यप उवाच ।

प्राणिमात्र की हिंसा न करे न आक्रोश करे न झूठ बोले नख और रोम का छेदन न करे और अमङ्गल वस्तु का स्पर्श न करे ॥ ४७ ॥

जल में घुसकर स्नान न करे न कोप करे तथा दुर्जनों के साथ भाषण न करे और विना धोये वस्त्र को न धारण करे तथा धारण की हुई माला को फिर न धारण करे ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भोजने पञ्च निषेधानाह—नोच्छिष्टमिति । चण्डिकान्नं भद्रकाल्यै निवेदितं पिपीलिकादिदूषितं वा अञ्जलिना त्वपो न पिबेत् ॥ ४९ ॥

गृहाद्बहिर्निर्गमे सप्त निषेधानाह—नोच्छिष्टेति । अनर्चिता मण्डनहीना असंवीताऽप्रावृता ॥ ५० ॥

शयने अष्टौ निषेधानाह—नाधौतपादेति । नापराक्पश्चिमशिराः ॥ ५१ ॥

(१) वरवतीरिति पाठान्तरम् । विज०

श्रीधरस्वामिकृतभावार्थदीपिका ।

कार्याण्याह–धौतवासा इति द्वाभ्याम् । प्रातराशात्प्रथमभोजनात् ॥ ५२ ॥

वीरवतीर्जीवद्भर्तृकाः आचर्य सम्पूज्य कोष्ठगतं कुक्ष्यन्तरगतम् ॥ ५३ ॥

पुंसवनं पुत्रोत्पत्तिकरं तुभ्यं तव ॥ ५४—५७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भोजने पञ्च निषिद्धान्याह—उच्छिष्टं चण्डिकान्नं भद्रकाल्यै निवेदितं सामिषं पिपीलिकादिदूषितं वृषलाहृतं शूद्रानीतं उदक्यया रजस्वलया दृष्टञ्चान्नं न भुञ्जीत अञ्जलिना अपः जलं न पिबेत् ॥ ४९ ॥

उच्छिष्टा चेत् अस्पृष्टसलिला न भवेत् किन्तु जलं स्पृशेदित्यर्थः सन्ध्ययोः सायंप्रातः मुक्ताः मूर्द्धजाः केशाः यया तादृशी तथा अनर्चिता अनलङ्कृता च न भवेत् न संयता वाक् यया सा न भवेत् असंवीता अप्रावृता बहिर्न चरेत् ॥ ५० ॥

अधौता पादौ यस्या सा अप्रयता असमाहितचित्ता न शयीत तथा आर्द्रौ पादौ यस्याः उदक् उत्तरदिशि शिरो यस्याः अपरा पश्चिमशिराश्च न शयीत तथाऽन्यैस्सह नग्ना विवसना च तथा सन्ध्ययोरपि न शयीत ॥ ५१ ॥

धौतं वासो यस्याः सा नित्यं सदा शुचिः सर्वैमङ्गलैर्हरिद्राचन्दनादिभिर्मङ्गलद्रव्यैः संयुता, प्रातराशात् प्रातर्भोजनात्प्रागेव गाः विप्रान् श्रियं महालक्ष्मीमच्युतञ्च पूजयेत् ॥ ५२ ॥

तथा वीरवतीः पुत्रवतीः जीवद्भर्तृकाः नारीश्च स्रगादिभिरर्चयेत्, बलिरुपायनं मण्डनमलङ्कारः तथा पतिञ्चार्च्य संपूज्य उपसमीपे तिष्ठेत तं पतिं कोष्ठगतं ध्यायेत् स्वपतिमेव स्वोदरगतं ध्यायेत् ॥ ५३ ॥

एतदङ्गकलापेन युक्तं पुंसवनाख्यम् इदं सांवत्सरं संवत्सरपर्यन्तं कार्यं व्रतम् अविप्लुतमविकलं यथा तथा धारयिष्यसि चेदिन्द्रस्य हन्ता पुत्रस्तव भविष्यति ॥ ५४ ॥

इत्येवमुक्ता दितिः, हे राजन्! बाढमित्यङ्गीकृत्य अथ महामनाः उक्तव्रतासक्तमनाः सती कश्यपाद्गर्भमाधत्त दधार तथा व्रतञ्च सम्यग्व्रतञ्च दधार ॥ ५५ ॥

तत इन्द्रः कविः विद्वान् अत एव मातृभगिन्याः दितेः अभिप्रायं ज्ञात्वा, हे मानद! आश्रमस्थां व्रतस्थां कश्यपस्याश्रमस्थां वा दितिं शुश्रूषणेन पर्यचरत् ॥ ५६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

चण्डिकान्नं सप्तमातृभ्योऽर्पितमन्नं पिपीलिकामूषिकाभोज्यं उदक्यया रजस्वलया ॥ ४९ ॥

अनर्चिता अलङ्काररहिता असंवीता प्रावरणादिरहिता ॥ ५० ॥

अपराक् पश्चिमशिरा न शयीत ॥ ५१ ॥

प्रातराशात् प्रातःकालभोजनात्पूर्वम् ॥ ५२ ॥

वरवतीः भर्तृसहिताः पतिमभ्यर्च्योपतिष्ठेत स्तुतिं कुर्यात्पतिस्थितं परमात्मानं कोष्ठगतं हृदिगतं ध्यायेत् स्वबाह्यान्तरगतं वा नाम्ना पुंसवनं ॥ ५३ ॥ ५४ ॥ ५५ ॥

मातृष्वसुः मातुरदित्याः स्वसुर्दित्याः ॥ ५६ ॥ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अपरां पश्चिमदिशमञ्चति शिरसा प्राप्नोति अपराक् तादृशं यथास्यात्तथेति क्रियाविशेषणत्वेपि तद्विशेषणत्व एव तात्पर्यात् पश्चिमशिरा इत्येवार्थः यद्वा अपराची प्रतीची । ततो 'लुप्तलोपे पञ्चम्यन्तादिक्शब्देभ्यः' इत्यादिना स्वार्थे एवास्ताति प्रत्ययः तस्य चाञ्चतेर्लुगिति लुक् तद्धितलुगिति स्त्रीप्रत्ययस्य लुक् ततो अपरामिति स्थिते प्रतीचीमारभ्य तां पूर्वाङ्गसात्कृत्येति तथैवार्थः ५१—६२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भोजने पञ्च निषेधानाह–नोच्छिष्टमिति । चण्डिकान्नं दुर्गानिवेदितं पिपीलिकास्पृष्टञ्च "चण्डिका स्यात् पिपीलिका" इत्यभिधानात् । उदक्यया रजस्वलया ॥ ४९ ॥

गृहाद्बहिर्निर्गमे सप्त निषेधानाह—नोच्छिष्टेति । अस्पृष्टसलिला अनाचान्ता अनर्चिता निर्भूषणा असम्वीता अप्रावृतसर्वाङ्गा ॥५०॥

शयने अष्टौ निषेधानाह–नाधौतपादेति । अप्रयता अपवित्रा "पवित्रः प्रयतः पूतः" इत्यमरः । न अपराक् पश्चिमशिराः ॥ ५१ ॥

कर्त्तव्यानाह—प्रातराशाद्भोजनात् प्राक् प्रातः पूजयेत् ॥ ५२ ॥

वीरवतीः जीवद्भर्तृकाः कोष्ठगतं कुक्ष्यन्तरगतम् ॥ ५३ ॥

पुंसवनं पुत्रोत्पत्तिकरम् ॥ ५४ ॥ ५५ ॥

मातृष्वसुर्दितेः ॥ ५६—५८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भोजने पञ्च निषेधानाह–नोच्छिष्टमिति । चण्डिकान्नं भद्रकाल्यै निवेदितम् "चण्डिका स्यात्पिपीलिका" इत्यभिधानात्. पिपीलिका दूषितञ्च सामिषं सूक्ष्मकृमिनिराकरणाभावेनाशोधितमित्यर्थः वृषलाहृतं शूद्रानीतम् उदक्यया रजस्वलया दृष्टं च न भुञ्जीत अञ्जलिना अपो न पिबेत् ॥ ४९ ॥

गृहान्निर्गमे सप्त निषेधानाह–नोच्छिष्टेति । उच्छिष्टा अकृता-

नित्यं वनात्सुमनसः फलमूलसमित्कुशान् ।
(१) पत्राङ्कुरमृदोऽपश्च कालेकाल उपाहरत् ॥ ५७ ॥
एवं तस्या व्रतस्थाया व्रतच्छिद्रं हरिर्नृप ! ।
प्रेप्सुः पर्यचरज्जिह्मो मृगहेव मृगाकृतिः ॥ ५८ ॥
नाध्यगच्छद्व्रतच्छिद्रं तत्परोऽथ महीपते ! ।
चिन्तां तीव्रां गतः शक्रः केन मे स्याच्छिवं त्विह ॥ ५९ ॥
एकदा सा तु सन्ध्यायामुच्छिष्टा व्रतकर्शिता ।
अस्पृष्टवार्यधौताङ्घ्रिः सुष्वाप विधिमोहिता ॥ ६० ॥
लब्ध्वा तदन्तरं शक्रो निद्राऽपहृतचेतसः ।
दितेः प्रविष्ट उदरं योगेशो योगमायया ॥ ६१ ॥
चकर्त्त सप्तधा गर्भं वज्रेण कनकप्रभम् ।
रुदन्तं सप्तधैकैकं मा रोदीरिति तान्पुनः ॥ ६२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वमना अस्पृष्टसलिला असलिला अस्नाता अनर्चिता अभूषिता असंवीता अनावृतसर्वाङ्गा ॥ ५० ॥

शयनेऽष्टौ निषेधानाह—नाधौतपादेति । अप्रयता अपवित्रा पवित्रः पूतद्रवात् क्लिन्नाङ्घ्रिः अपराक् पश्चिमशिरा ॥ ५१ ॥

कार्याण्याह—धौतवासा इति द्वाभ्याम् । प्रातराशात् प्रथमभोजनात् प्राक् गवादीन् पूजयेत् ॥ ५२ ॥

वीरवतीः जीवद्भर्तृकाः स्रग्भिर्गन्धैः बलिभिरुपायनैः मण्डनैः अलङ्कारैश्चार्चेत् पतिश्चार्च्यं संपूज्योपतिष्ठेत तत्परतत्परा समीपे स्थिता भवेत् कोष्ठगतमुदरगतं ध्यायेत् ॥ ५३ ॥

सांवत्सरं संवत्सरानुष्ठेयं पुंसवनं पुत्रदम् तुभ्यं तव ॥ ५४ ॥

बाढमित्यभ्युपेत्य अङ्गीकृत्य ॥ ५५ ॥

कविः स्वार्थवित् ॥ ५६ ॥ ५७ ॥

भाषाटीका ।

जूंठा, कालीका भोग लगा हुआ, सामिष । शूद्रका लाया हुआ, और पिपीलिकादि दूषित रजस्वला से दृष्ट-ऐसे अन्न को भक्षण न करे और अञ्जलि से जलपान न करे ॥ ४९ ॥

जूंठ मुख, विनाआचमन किये, संध्यासमय केश खोलकर, अमण्डित होकर वाणी को न रोककर तथा शरीर उघाड कर, बाहर न निकले ॥ ५० ॥

विना पगधोये, विना प्रयत्न से आर्द्रपग से, उत्तर को शिर कर, पश्चिम को शिर कर, और किसी के साथ,नग्न होकर तथा दोनों संध्याओं में शयन न करे ॥ ५१ ॥

नित्य ही वस्त्र धोकर शुचि होकर सर्व मङ्गल संयुक्त होकर प्रातःकालभोजन से पहिले, गौ ब्राह्मण लक्ष्मी और अच्युत (श्रीकृष्ण) की पूजा करे ॥ ५२ ॥

और जीवते पति वाली स्त्रियों की, माला चन्दन भेट-अलङ्कार आदि से पूजा करे । और पति का पूजन करके उपस्थान करे अर्थात् हाथ जोडकर खडी होवे । और अपनी कुक्षि में पति के प्राप्त होने का ध्यान करे ॥ ५३ ॥

एक वर्षतक इस पुंसवन व्रतको यदि तुम अखण्डितधारण करोगी तो तुमारे इन्द्र के मारने वाला पुत्र होगा ॥ ५४ ॥

हे राजन् ! बडे उत्साह वाली दिती भी बहुत भला है ऐसे अभिप्राय कर कश्यपके गर्भ को और इस व्रत को विगतश्रम से धारण करती हुई ॥ ५५ ॥

हे मानव ! इन्द्र भी मासी के अभिप्राय को जानकर कोई एक बटुके रूपके रूपको धारणकर, आश्रमस्था दिति की शुश्रूषाकरके आप ही परिचर्या करने लगा क्योंकि वह तो बडा-ही चतुर है ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हरिरिन्द्रो व्रतस्य छिद्रं प्रेप्सुः प्राप्तुमिच्छुः जिह्मः कुटिलः साधुवेषः मृगहा लुब्धको यथा मृगवञ्चनाय मृगवेषो भवति तद्वत् ॥ ५८ ॥

पत्राङ्कुरमृदापश्चेति पाठान्तरम्—वीर० ।

ते तमूचुः पाट्यमानाः सर्वे प्राञ्जलयो नृप ! ।
नो जिघांससि किं इन्द्र ! भ्रातरो मरुतस्तव ॥ ६३ ॥
माभैष्ट भ्रातरो ! मह्यं यूयमित्याह कौशिकः ।
अनन्यभावान्पार्षदानात्मनो मरुतां गणान् ॥ ६४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

केन मे शिवं स्यादिति चिन्तां प्राप्तः ॥ ५९ ॥

अस्पृष्टवार्यधौताङ्घ्रिश्च ॥ ६० ॥

निद्रयाऽपहृतं चेतो यस्याः ॥ ६१ ॥

मा रोदीरित्युपलालयन्निव तान्पुनः सप्तधा चकर्त चिच्छेद ॥ ६२ ॥ ६३ ॥

कौशिकः इन्द्रः गणान् सप्त " सप्त गणा वै मरुतः " इति श्रुतेः ॥ ६४—६६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह-नित्यमहरहः सुमनसः पुष्पाणि फलानि च मूलानि च समिधश्च कुशांश्च तान् पत्राणि किसलयानि च दूर्वाकुरांश्च मृदः मृत्स्नाश्च आपश्च ताः कालेकाले उचितकाले उपाहरत् आनीय समर्पितवान् ॥ ५७ ॥

एवं तस्यां दितौ व्रतस्थायां सत्यां हे नृप ! हरिरिन्द्रः व्रतस्य छिद्रं वैकल्यं प्रेप्सुः कामयमानः अत एव जिह्मः कुटिलचित्तः पर्यचरत्, यथा, मृगस्येवाकृतिर्यस्य सः मृगाणां हन्ता मृगाननुवर्त्तते तथा ॥ ५८ ॥

हे महीपते ! तत्परः व्रतच्छिद्रपर्यालोचनपरोपि व्रतच्छिद्रं नाध्यगच्छत् नापश्यत् अथ नितरां चिन्तां प्राप्तः केन हेतुना मम शिवं भद्रं स्यादिति तीव्रां चिन्तां प्राप्तः ॥ ५९ ॥

एकदा सा दितिः व्रतकर्शिता अत एवाशक्त्या न स्पृष्टं वारि जलं यया सा अधौतावप्रक्षालितावङ्घ्री यया सा तादृशी अत एव उच्छिष्टा सन्ध्यायां सायंकाले विधिना दैवेन मोहिता सती सुष्वाप ॥ ६० ॥

तदा तदन्तरं व्रतच्छिद्रं लब्ध्वा शक्रो निद्रया अपहृतं चेतो यस्यास्तस्याः दितेरुदरं प्रविष्टः, कथं परकायप्रवेशसामर्थ्यं तस्य ? इत्यत्राह-योगेशः परकायप्रवेशसामर्थ्यापादकयोगयुक्तः अत एव योगमायया विचित्रयोगसामर्थ्येनोदरं प्रविष्ट इत्यर्थः ॥ ६१ ॥

उदरे प्रविष्टः शक्रो वज्रायुधेन तं कनकप्रभं गर्भं सप्तधा चिच्छेद. रुदन्तमेकैकं गर्भस्य भागं मारोदीरिति वदन् तान् खण्डान् पुनः सप्तधा एकैकं चिच्छेद. येतो मारोदीरिति तान् चिच्छेद, अत एव निमित्तान्मरुच्छब्दस्य तेषु प्रवृत्तिः आर्षत्वान्माशब्दस्य ह्रस्वः । "रुदेर्भावेक्विप्" मा न विद्यते इन्द्रवाक्यात् रुत् रोदनं येषां ते मरुतः ॥ ६२ ॥

हे नृप ! ते छिद्यमानाः सर्वे गर्भस्य भागाः तथैव प्रविभक्तपाणिपाद्याद्यवयवाः प्राञ्जलयस्सन्तः तमिन्द्रमूचुः, तदेवाह—किमिति, हे इन्द्र ! तव भ्रातरो मरुतः मरुत्संज्ञान् नोऽस्मान् किं किमर्थं जिघांससि हन्तुमिच्छसि ॥ ६३ ॥

इति तैरुक्तः कौशिकः शक्रो यदि यूयं मह्यं मम भ्रातरः तर्हि मा भैष्ट भयं माकुरुतेत्याह, तत आत्मनः स्वस्य पार्षदान् पार्षदत्वं प्राप्ताननन्यभावान् अनन्यस्वामित्वाभिप्रायकान् मरुतां गणानाहेति पूर्वेणान्वयः ॥ ६४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

योगमायया योगसामर्थ्येन ॥ ६१ ॥ ६२ ॥

जिघांससि हन्तुमिच्छसि ॥ ६३ ॥

माभैष्ट भयं मा कुरुध्वं कौशिक इन्द्रः मरुतां गणानाह ॥ ६४ ॥ ६५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ते तमूचुरिति । अत एकस्यैव जीवस्य नानाकाराध्यासः । यद्वा, पूर्वमेकस्मिन् देहे बहूनां जीवानामध्यस्थता देहविभागप्राप्तेरिति ज्ञेयम् ॥ ६३—६६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

हरिरिन्द्रो व्रतस्य छिद्रं प्राप्तुमिच्छुरितीन्द्रस्याप्यविज्ञत्वमेव. यतो विष्णोः स्मरणेन कीर्त्तनेन वा सच्छिद्रमपि निश्छिद्रं स्यात् तस्य विष्णोरिदं व्रतं छिद्रेऽप्यच्छिद्रमेव भवेत् । यदुक्तम् "यस्य स्मृत्या च नामोक्त्या" इति "मन्त्रतस्तन्त्रतश्छिद्रम्" इत्यादि च, किञ्चोपरिष्टादिन्द्रेणापि व्रतस्य निश्छिद्रतामनुभविष्यता वक्ष्यते "महापुरुषसेवायाः सिद्धिः काप्यानुषङ्गिकी" इति जिह्मः कुटिलः । मृगहा लुब्धको मृगवञ्चनाय यथा मृगाकृतिर्भवति तद्वत् तस्विरचारकलोकाकृतिः ॥ ५९ ॥

अस्पृष्टवार्यधौताङ्घ्रिश्च ॥ ६० ॥

योगस्य परकायप्रवेशाख्यस्य सिद्ध्यर्थो या माया तया ॥ ६१ ॥

मारोदीरित्युपलालयन्निव तान् पुनः सप्तधा चकर्त

न ममार दितेर्गर्भः श्रीनिवासानुकम्पया ।
बहुधा कुलिशक्षुण्णो द्रौण्यस्त्रेण यथा भवान् ॥ ६५ ॥
सकृदिष्ट्वाऽऽदिपुरुषं पुरुषो याति साम्यताम् ।
संवत्सरं किञ्चिदूनं दित्या यद्धरिरर्चितः ॥ ६६ ॥
सजूरिन्द्रेण पञ्चाशद्देवास्ते मरुतोऽभवन् ।
व्यपोह्य मातृदोषं ते हरिणा सोमपाः कृताः ॥ ६७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

चिच्छेद । अल्पकाल एव बहुपुण्यपापभोजिनो जीवस्य योगिनो वा कायव्यूह इवैकस्यैव जीवस्योनपञ्चाशत्कायव्यापकत्वमिति केचित् भाविदृष्ट्या प्रथममेवैकस्मिन् देहे प्रविष्टानामेकोनपञ्चाशज्जीवानामिन्द्रकृतविभागेनैकैकदेहप्राप्तिरित्यपरे. इन्द्रकृतखण्डेष्वन्येषामप्यष्टचत्वारिंशज्जीवानां तत्क्षण एव प्रवेशो यथा, लतागुल्मानां केषाञ्चित् खण्डं खण्डीकृत्यैव भूमावारोपितानां पृथक् पृथक् प्ररोहोद्गमात् पृथक् पृथक् जीवस्य प्रवेशोऽनुमीयते इत्यन्ये च प्राहुः ॥ ६२ ॥ ६३ ॥

मह्यं मम कौशिकः इन्द्रः गणान् "सप्त गणा वै मरुतः" इति श्रुतेः ॥ ६४ ॥ ६५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मृगहा यथा मृगवञ्चनाय मृगाकृतिर्भवति तथा हरिरिन्द्रः तस्याः व्रतच्छिद्रं प्रेप्सुः प्राप्तुमिच्छुः जिह्मः कुटिलः भृत्याकृतिस्सन् पर्यचरत् ॥ ५८ ॥

मे केनोपायेन शिवं स्यादिति तीव्रां चिन्तां गतः प्राप्तः ॥ ५९ ॥

सन्ध्यायां शयनायोग्यकाले अस्पृष्टवारिश्चासावधौताङ्घ्रिश्च सुष्वाप विधिना इन्द्रकर्मफलदेनेश्वरेण मोहिता ॥ ६० ॥

तदन्तरं तच्छिद्रं निद्रयाऽपहृतं चेतो यस्याः योगस्य तपोव्रतादिरूपस्य माया परकायप्रवेशरूपा शक्तिस्तया ॥ ६१ ॥

कनकप्रभं तस्याः गर्भं वज्रेण सप्तधा चकर्त चिच्छेद पुनश्च तानेकैकं रुदन्तं मा रोदीरिति वदन् सप्तधा चकर्त । ननु, "अणुरेष आत्मा चेतसा वेदितव्यः" इत्यादिश्रुतिप्रसिद्धस्य जीवस्यैकस्य बहुषु देहेषु युगपत् प्रवेशाद्यसम्भवात् कथं घटेत तानेकैकं रुदन्तमिति ? अत्रोच्यते, दैवात् प्रथमत एवैकस्मिन् देहे प्रविष्टानामेकोनपञ्चाशज्जीवानामिन्द्रकृतविभागेनैकैकदेहप्राप्तिरिति, अत एव एकस्मिन् गर्भे दैवात्प्रविष्टाः एकाधिकशतसङ्ख्याकाः जीवाः श्रीव्यासाज्ञया गान्धार्यां तद्गर्भखण्डाः पृथक् पृथक् कुम्भेषु निहिताः दुर्योधनादयः शतसङ्ख्याकाः पुत्राः जाताः कन्या चैकोत्पन्नेति. सौभर्यादयस्तु स्वकर्मजन्यदेहमाश्रित्य योगबलेन पृथक् पृथक् जीवयुक्तान् बहून् देहान् सृजन्ति चेति दिक् ॥ ६२ ॥ ६३ ॥

कश्चित्कुशिकान्वये जातत्वात्कौशिकः इन्द्रः गणान् "सप्त गणा वै मरुतः" इति श्रुतेः ॥ ६४ ॥ ६५ ॥

भाषा टीका ।

प्रति दिन यथोचित समय मे वन से पुष्प फल मूल समिध कुश पत्र अंकुर (दूर्वादि) मृद जल इन सबका उपहार करताथा ॥ ५७ ॥

हे नृप ! जैसे वधिक मृग वञ्चनार्थ स्वयं मृग रूप धारणाता है वैसे कुटिल वेषधारी इन्द्र पूर्वोक्त व्रत में स्थित दिति के व्रत छिद्र को देख हुआ सेवा में रहताथा ॥ ५८ ॥

हे महीपते ! सदा छिद्रान्वेषण में तत्पर रहा परन्तु जब छिद्र नहीं मिला तब इन्द्र को बडी चिन्ता हुई अब मेरा कल्याण किस प्रकार से होगा ॥ ५९ ॥

एक समय व्रत से कर्षित वह दिति सन्ध्या के समय जूंठे मुख विना आचमन किये विना पग धोये दैव से मोहित होकर सोगई ॥ ६० ॥

इन्द्रने भी उस अन्तर को पाकर अपनी योग माया से निद्रा मे सोई हुई दिति के उदर मे प्रवेश किया ॥ ६१ ॥

इन्द्रने गर्भ के वज्र से सात टुकडे करदिये । जब वह गर्भ रोने लगा तब रोते हुए को, 'मतरो' एसा कह फिर एक २ के सात २ टुकडे करडाले ॥ ६२ ॥

हे नृप वे सब ही फाटते हुए हाथजोडकर इन्द्रसे ऐसे बोले कि, हे इन्द्र हम तेरे मरुतनामक भ्राता हैं हम को मारने की इच्छा क्यों करता है ॥ ६३ ॥

इन्द्र भी अनन्य भाववाले, अपने पार्षद मरुद्गणों से ऐसे बोला कि जब तुम मेरे भ्राता हो तो मतडरो ॥ ६४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सजूः सह ॥ ६७—७० ॥

दितिरुत्थाय ददृशे कुमाराननलप्रभान् ।
इन्द्रेण सहितान्देवी पर्यतुष्यदनिन्दिता ॥ ६८ ॥
अथेन्द्रमाह ताताहमादित्यानां भयावहम् ।
अपत्यमिच्छन्त्यचरं व्रतमेतत्सुदुष्करम् ॥ ६९ ॥
एकः सङ्कल्पितः पुत्रः सप्तसप्ताभवन्कथम् ।
यदि ते विदितं पुत्र ! सत्यं कथय मा मृषा ॥ ७० ॥

इन्द्र उवाच ।

अम्ब ! तेऽहं व्यवसितमुपधार्यागतोऽन्तिकम् ।
लब्ध्वान्तरोऽच्छिदं गर्भमर्थबुद्धिर्न धर्मवित् ॥ ७१ ॥
कृत्तो मे सप्तधा गर्भ आसन्सप्त कुमारकाः ।
ते पिचैकैकशो वृक्णाः सप्तधा नापि मम्रिरे ॥ ७२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दित्या निष्कपटमुक्ते सतीन्द्रोऽपि निष्कपटमेवाह—अम्बेति । लब्धमन्तरं येन अर्थे एव बुद्धिर्यस्य ॥ ७१—७३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो दितेर्गर्भः कुलिशेन वज्रेण बहुधा छिन्नोऽपि श्रीनिवासस्य भगवतोऽनुकंपया अनुकंपापूर्वकानुग्रहविशेषेण न ममार न मृतः यथा भवान्परीक्षित् अश्वत्थाम्नोऽस्त्रेण दग्धदेहोपि भगवता रक्षितस्तद्वत् ॥ ६५ ॥

अस्मिन्नर्थे उपपत्तिमाह—सकृदिति । पुमान्सकृदप्यादिपुरुषं भगवन्तामिष्ट्वा आराध्य तन्माहात्म्येन शनैः सात्मतां समानरूपतां याति किं पुनरसकृदिष्ट्वेति भावः । वस: किञ्चिदूनं संवत्सरमेवं दित्या आराधितः इन्द्रेण सह जुषते सेवत इति सजूः इन्द्रेण सह वर्तमान इत्यर्थः । हरिर्भगवानुपेन्द्रः अभ्ययात् आगत्य गर्भस्य खण्डानजीवयदित्यर्थः । ततः ते पञ्चाशत् एकोनपञ्चाशत् अन्यथा "मरुतश्च दितेः पुत्राश्चत्वारिंशन्नवाधिकाः । चकर्त्त सप्तधा गर्भम्" पुनरेकैकं सप्तधा चकर्तेति पूर्वोक्तसंख्याविरोधापत्तेः मरुतो मरुत्संज्ञकाः मातुर्दोषमासुरत्वापदेशं त्यक्त्वा देवा अभवन् ते च हरिणा इन्द्रेण भगवता वा सोमपाः सोमं पिबन्तीति तथा यज्ञीयभागार्हाः कृता इत्यर्थः ॥ ६६ ॥ ६७ ॥

ततो दितिरुत्थाय कुमारानग्नितुल्यप्रकाशानिन्द्रेण सहितान् ददर्श दृष्ट्वा च देवी दितिरनिन्दिता वस्तुतः शुद्धभावा पर्यतुष्यत् ॥ ६८ ॥

अथानन्तरं इन्द्रमुवाच. तदेवाह—हे तात इन्द्र ! आदित्यानामदितेरपत्यानां युष्माकं भयावहमेकमपत्यमहम् इच्छन्ती सुदुष्करमेतत्पुंसवनं व्रतमचरमाचरितवत्यस्मि ॥ ६९ ॥

मया त्वेकः पुत्रः सङ्कल्पितः कथं सप्तसप्त एकोनपञ्चाशदभवन् हे पुत्र, एतद्यदि तव विदितं तर्हि सत्यं कथय मृषा मिथ्या मा कथय ॥ ७० ॥

एवमुक्तः शक्रस्तामाह—हे अम्ब, ते तव व्यवसितमभिप्रेतम् उपधार्य ज्ञात्वाऽहं तवान्तिकं समीपं गतः प्राप्तः लब्धमन्तरं व्रतच्छिद्रं येन तादृशोऽहं गर्भमच्छिनं छिन्नवानस्मि यतोऽहमर्थे वैषयिकपुरुषार्थे एव बुद्धिर्यस्य न धर्मवित् ॥ ७१ ॥

यतोऽहमीदृशस्ततो मे मया तावत्सप्तधा गर्भः कृत्तश्छिन्नः कृत इति पाठे वज्रेणेति शेषः एवं सप्तधा कृतोपि गर्भः तावत्सप्तकुमारा आसन् ते पि पुनरेकैकशो वृक्णाः ।
बभूवुः नापि मम्रिरे न मृताश्च ॥ ७२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

साम्यतां समानरूपतां हरिः श्रीनारायणो दित्या किञ्चिदूनं सम्वत्सरमर्चितो यतः साम्यतां यातीति किमु कुतः पुरुषः सकृत्सम्पूज्य साम्यतां याति तस्मात् ॥ ६६ ॥

इन्द्रेण सजूः सह अश्विभ्यामुषसा सजूरित्यादौ दृष्टत्वात् हरिणेन्द्रेण सोमपाः सोमं पिबन्तः ॥ ६७ ॥

पर्यतुष्यत्सचेतनत्वात् ॥ ६८ ॥

आदित्यानां अदितिपुत्राणाम् ॥ ६९—७२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

हरिणा इन्द्रेण श्रीविष्णुनेति वा ॥ ६७—६

ततस्तत्परमाश्चर्यं वीक्ष्याध्यवसितं मया ।
महापुरुषपूजायाः सिद्धिः काप्यनुषङ्गिणी ॥ ७३ ॥
आराधनं भगवत ईहमाना निराशिषः ।
ये तु नेच्छन्त्यपि परं ते स्वार्थकुशलाः स्मृताः ॥ ७४ ॥
आराध्याऽऽत्मप्रदं देवं स्वात्मानं जगदीश्वरम् ।
को वृणीते गुणस्पर्शं बुधः स्यान्नरकेऽपि यत् ॥ ७५ ॥
तदिदं मम दौर्जन्यं बालिशस्य महीयसि ! ।
क्षन्तुमर्हसि मातस्त्वं दिष्ट्या गर्भो मृतोत्थितः ॥ ७६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मे मया ॥ ७२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सात्मतां पुरुषसमानाकारत्वम् ॥ ६६ ॥

सजूः सह ॥ ६७-७० ॥

दित्या निष्कपटमुक्ते सति इन्द्रोऽपि निष्कपटमेवाह— अम्बेति । लब्धान्तरः प्राप्तच्छिद्रः व्यवसितं, निश्चितं तदेवाह— महेति । सार्द्धद्वयेन कापि सिद्धिर्मुक्तिरपि आनुषङ्गिकी ॥७१-७३॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वासुदेवानुकम्पायां हेतुं संस्मारयति । आदिपुरुषं हरिं पुरुषः सकृदिष्ट्वा सात्मतां आत्मना हरिणा सह वर्तमानः सात्मा हरिसदृशो मुक्तस्तस्य भावः सात्मता तां याति दित्या तु सम्वत्सरं सह हरिरर्चितः ॥ ६६ ॥

अत एव इन्द्रेण सजूः सह पञ्चाशद्भवन् सङ्कल्पितस्त्वेकः देवाः अभवन् सङ्कल्पितस्तु देवाद्धिद् अत्यद्भुतं हर्य्यर्चनमाहात्म्यमिति भावः ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥

लब्धान्तरः प्राप्तच्छिद्रः अर्थे बुद्धिर्यस्य सः ॥ ७१ ॥
कृत्ताः खण्डिताः ॥ ७२ ॥ ७३ ॥

भाषाटीका ।

जैसे अश्वत्थामाके गर्भ से तुम ऐसे ही वज्र से बहुत ही काटापरअदिति का वह गर्भ श्रीनिवास की कृपा से नहीं मरा ॥ ६५ ॥

आदि पुरुष को एकवार भी पूजकर पुरुष उनकी समताको प्राप्त होता है । फिर दितिने तो कुछ कम एक वर्ष हरि का पूजन कियाथा ॥ ६६ ॥

वे इन्द्र के साथी पञ्चाशत मरुत देव हुए । इन्द्रने भी के दोष को मानकर सोमपान करने वाले कर लिये ॥ ६७ ॥

दिति उठकर अग्नि सदृशप्रभावाले कुमारों को इन्द्र सहित देखकर संतुष्ट हुई ॥ ६८ ॥

अनन्तर इन्द्रसे बोली हे तात ! मैंने अदिति के पुत्रों को भय प्राप्त करने वाले पुत्र की इच्छा करके यह अति दुष्कर व्रत का आचरण किया ॥ ६९ ॥

एक पुत्र का सङ्कल्प किया था परन्तु यह (सप्त सप्त) सात सात गुने अर्थात् उगणपचास कैसे हुए पुत्र ! यदि तुम को मालुम होयतो सत्य कहना, झूठ न कहना ॥ ७० ॥

इन्द्र उवाच ॥

हे अम्ब मैंने तुमारा व्यवसाय सुन तुमारे समीप आया और अन्तर पाकर गर्भ का छेदन करदिया क्योंकि मैंने प्रयोजन में बुद्धि रखकर धर्म को नहीं जाना ॥ ७१ ॥

मे सात प्रकार गर्भ को काटा तब सात पुत्र होगये उनसबको भी एक२ को सात२ तरह से छेदन किया तब उन्चास होगये पर मरे नहीं ॥ ७२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अपि परं मोक्तुमपि ॥ ७४ ॥

गुणस्पर्शं विषयभोगं बुधः को वृणीते यद्यस्मान्नरकेऽपि विषयभोगः स्यात् ॥ ७५ ॥

महीयसि हे महत्तमे ! मृतः सन्नुत्थितः ॥ ७६—७८ ॥

श्रीशुक उवाच ।

इन्द्रस्तयाऽभ्यनुज्ञातः शुद्धभावेन तुष्टया ।
मरुद्भिः सह तां नत्वा जगाम त्रिदिवं प्रभुः ॥ ७७ ॥
एवं ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ।
मङ्गलं मरुतां जन्म किम्भूयः कथयामि ते ॥ ७८ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां षष्ठस्कन्धे मरुज्जन्मकथनं नाम
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततोऽनन्तरमिदं महदाश्चर्यं विलोक्य मया निश्चितं अध्यवसितं. नश्चितमाह–महापुरुषस्य भगवतः पूजायाः कार्यं पूजकाभिल-षितं प्रयोजनं तदानुषङ्गिकमप्रधानं फलं यस्यास्सा ठक उपसर्ज-नत्वेपि जीवार्थः सिद्धिर्मुक्तिर्भवतीति असमासाया अपि महापुरुष-पूजायाः पूजकाभिलषितप्रयोजनावहत्वमधुनावलोक्यामुक्त्यर्थत्वे-नापि कृतायास्तत्पूजयाः परिपूर्णायाः मुक्तिरेव प्रधानं फलं, पूजका-भिलषितं तु आनुषङ्गिकमिति मया निश्चितमित्यर्थः । यद्वा, महापुरुषस्य पूजायाः सकामपूजायाः सिद्धिः परिसमाप्तिरेव कार्यानुषङ्गिकीकार्येण प्रयोजनेनानुबध्यते अनुबध्यते पूजका-भिलषितप्रयोजनावहा भवति न त्वपरिपूर्णा, सा तु विपरीतफल-दैवेति मया निश्चितमित्यर्थः ॥ ७३ ॥

अत एव ये पुरुषाः निराशिषो निष्कामाः भगवत आरा-धनं कुर्वाणाः परं मोक्षमपि नेच्छन्ति त एव स्वार्थे स्वस्य निर-तिशयपुरुषार्थे कुशलाः स्वस्य निरतिशयपुरुषार्थप्रसाधनकुशलाः स्मृताः ॥ ७४ ॥

एवमनभिसंहितफलं भगवदाराधनं प्रस्तुत्याभिसंहितफलं निन्दति–आराध्येति । आत्मप्रदं निरतिशयपुरुषार्थरूपमात्मानं निरति-शयप्रियमीश्वरं देवं भगवन्तं तमाराध्य बुधो विवेकी चेत् कः पुमान् गुणस्पर्शं शब्दादिविषयानुभवं कः पुमान् वृणीत कामयेत. गुणस्प-र्शं विशिनष्टि–स्यादिति, यत् गुणस्पर्शजं नरकेपि स्यात्सम्भवेत् ॥ ७५

स्वापराधक्षमार्थं तां प्रार्थयते—तदिति । हे गर्हीयसि पूज्ये ! बालिशस्य मूर्खस्य मम तदिदं गर्भच्छेदनादिरूपं दौर्जन्यं दुर्ज-नस्य कर्म हे मातः ! त्वं क्षन्तुमर्हसि मातुरसह्योऽपराधो नास्ती-त्यभिप्रायेण मातरिति सम्बोधनं दिष्ट्या दैवात् मृतोपि तत्र गर्भः पुनरुत्थितो जीवितः ॥ ७६ ॥

एवमुक्तया विशुद्धभावेन निष्कपटभावेन तुष्टया तया दित्या अभ्यनुज्ञातः तां नत्वा मरुद्भिस्सह प्रभुरिन्द्रः त्रिदिवं स्वर्गं जगाम ॥ ७७ ॥

एवं यत्पृष्टं "कथं त आसुरं भावम्" इत्यादिना तस्योत्तर-मुक्तमित्याह—एवमिति । यन्मरुतां जन्म त्वं मां परिपृच्छसि पर्य-पृच्छः तन्मरुतां मङ्गलावहं सर्वं सप्रपञ्चं यथातथा ते तुभ्यं मया आख्यातं कथितम्भूयः किं कथयामि यदि किञ्चिच्छुश्रूषितमस्ति तर्हि तत्कथयामीति प्रश्नप्रोत्साहः ॥ ७८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कार्यानुषङ्गिणी कार्यानुकूल्यं सङ्गमयन्तीति ॥ ७३ ॥

फलकामक्रियायोगमविन्द्यविधा सिद्धिरभूत किमु निरा-शीस्त्वेनेति भावेनाह—आराधनमिति ॥ ७५ ॥

गुणस्पर्शं विषयसुखम् ॥ ७५—७८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ततस्तदिति । व्यवसितं विचारितम् । तदेवाह—महेति ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

परं मोक्षमपि स्वार्थकुशला इति तेन येत्वाराधनेन मोक्षमिच्छन्ति ते वर्त्तमानमहानिधिविनिमयेन तृणार्थिनः स्वार्थानभिज्ञाः किन्तु विषयषाड्गुण्याप्तेऽपि कृतार्था एवेत्यर्थः । यदुक्तम् "सत्यं दिशत्यर्थितमर्थितो नृणाम्" इति ॥ ७४ ॥

देवं क्रीडापरं स्वात्मानं सुन्दरविग्रहम् ॥ ७५—७८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठे अष्टादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

परं मोक्षम् ॥ ७४ ॥

स्वस्य अंशभूतस्य आत्मानमर्पिनं गुणस्पर्शं विषयभोगं बुधः को वृणीत ? यद्यस्मात् विषयभोगो नरकेऽपि स्यात् ॥ ७५ ॥

हे महीयसि महत्तमे ! बालिशस्य मूढस्य मम यद्दौर्जन्यं तत् क्षन्तुमर्हसि दिष्ट्या भद्रं गर्भो मृतस्सन्नुत्थितः ॥ ७६ ॥

मरुद्भिः सह दिवं जगाम ॥ ७७ ॥ ७८ ॥

श्रीमद्भागवते महापुराणे षष्ठस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
ष्टादशाऽध्यायार्थप्रकाशः ॥ १८ ॥

भाषा टीका ।

तिससे उस परमाश्चर्य को देखकर मैंने यह निश्चय किया कि यह कोई महा पुरुष की पूजा सम्बन्धिनी सिद्ध है ॥ ७३ ॥

जो निष्काम होकर भगवान के आराधन की चेष्टा करते हैं और मोक्ष पर्यन्त की भी चाहना नहीं करते वे लोग ही स्वार्थ में कुशल समझे गये हैं ॥ ७४ ॥

आत्मा को देने वाले अपने अन्तर्यामी जगदीश्वर का आराधन करके कौन बुद्धिमान विषय भोगों को मांगेगा, जो नरक में भी हैं ॥ ७५ ॥

हे महीयसि ! (अति बड़प्पन वाली) हे मातः ! मेरी इस दुर्जनता को क्षमा करने योग्य है और यह भला हुआ जो मृत गर्भ भी फिर उठ खड़ा हुआ ॥ ७६ ॥

श्री शुक उवाच ॥

इन्द्र के शुद्धभाव सन्तुष्ट होकर दिति ने इन्द्र को आज्ञा दी तब इन्द्र भी मरुद्गणों के सहित दिति को नमस्कार करके स्वर्गको गया ॥ ७७ ॥

हे राजन् ! जो तुमने हमसे पूछा सो हमने सब तुम से मङ्गल रूप मरुद्गणों का जन्म तुम से कथन किया अब और तुम से क्या कथन करें ॥ ७८ ॥

इति श्रीमद्भागवत मह
की भाषाटीका में अ
समाप्त ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे अष्टादशोऽध्यायः समाप्तः ॥ १८ ॥

॥ एकोनविंशोऽध्यायः ॥

राजोवाच ।

व्रतं पुंसवनं ब्रह्मन् भवता यदुदीरितम् ।
तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति ॥ १ ॥

श्रीशुक उवाच ।

शुक्ले मार्गशिरे पक्षे योषिद्भर्तुरनुज्ञया ।
आरभेत व्रतमिदं सार्वकामिकमादितः ॥ २ ॥
निशम्य मरुतां जन्म ब्राह्मणाननुमन्त्र्य च ।
स्नात्वा शुक्लदती शुक्ले वसीतालङ्कृताम्बरे ।
पूजयेत्प्रातराशात्प्राग्भगवन्तं श्रिया सह ॥ ३ ॥
अलं ते निरपेक्षाय पूर्णकाम ! नमोऽस्तु ते ।
महाविभूतिपतये नमः सकलसिद्धये ॥ ४ ॥
यथा त्वं कृपया भूत्या तेजसा महिमौजसा ।
जुष्ट ईश गुणैः सर्वैस्ततोऽसि भगवान्प्रभुः ॥ ५ ॥
विष्णुपत्नि महामाये ! महापुरुषलक्षणे ! ।
(१) प्रीयेथा मे महाभागे ! लोकमातर्नमोऽस्तु ! ते ॥ ६ ॥

ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह महाविभूतिभिर्बलिमुपहरामीति । अनेनाहरहर्मन्त्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शनस्नानवासउपवीतविभूषणगन्धपुष्पधूपदीपोपहाराद्युपचारांश्च समाहित उपाहरेत् ॥ ७ ॥

हविःशेषन्तु जुहुयादनले द्वादशाहुतीः ।
ॐ नमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ऊनविंशे तु यत्प्रोक्तं कश्यपेन दितेर्व्रतम् ।
तदेव विवृतं लोकहिताय हरितोषणम् ॥ १ ॥

तस्य प्रकारमिति शेषः ॥ १ ॥
मार्गशिरे मासे शुक्लपक्षे आदितः प्रतिपदि ॥ २ ॥

अनुमन्त्र्य पृष्ट्वा शुक्लाः दन्ताः यस्याः सा शुक्लदती धौतदन्ता अलङ्कृता सती पूजयेत् ॥ ३ ॥

आदौ तावन्नमस्कारमन्त्रानाह त्रिभिः—ते तुभ्यमलं पर्याप्तमेव सर्वं न किञ्चिदन्यैः कृत्यमस्त्यतः केवलं ते तुभ्यं नमोऽस्तु पर्याप्तौ हेतवः, निरपेक्षाय हे पूर्णकाम ! महाविभूतिपतये लक्ष्मीपतये सकलाः सिद्धयोऽणिमाद्या यस्मिन् तस्मै ॥ ४ ॥

---

(१) प्रिये धाम्नि इति पाठान्तरम् । वीर०

श्रीधरस्वामिकृतभावार्थदीपिका ।

भो ईश ! यथा यथावत् त्वं कृपादिभिर्जुष्टः अन्यैश्च सत्यसङ्कल्पत्वादिभिः सर्वैर्गुणैः ततस्तस्मात् ॥ ५ ॥

महापुरुषस्य परमेश्वरस्यैव लक्षणानि निरपेक्षत्वादीनि यस्यास्तस्याः संबोधनम् ॥ ६ ॥

पूजामन्त्रमाह—ओं नम इति ॥ ७ ॥

हविःशेषमुपहारावशिष्टं होममन्त्रं दर्शयति-ओमिति ॥ ८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

किं भूयः कथयामीति प्रश्नार्थं चोदितः पृच्छति राजा—व्रतमिति । हे ब्रह्मन् ! भवता यदुदीरितं पुंसवनाख्यं व्रतं तस्य पुंसवनस्य प्रपञ्चमितिशेषः ज्ञातुमिच्छामि येन पुंसवनेन तच्छ्रवणेन वा भगवान् प्रसीदति ॥ १ ॥

एवमापृष्टः सप्रपञ्चं व्रतमाह मुनिः—शुक्लइत्यादिना । मार्गशिरे मासि शुक्ले पक्षे कस्यांचिच्छुभतिथौ भर्तुरनुज्ञया योषिदिदं वक्ष्यमाणं सार्वकामिकम् अभिलषितसर्वपुरुषार्थसाधनं पुंसवनाख्यं व्रतमारभेत ॥ २ ॥

तत्रादितः प्रथमं मरुतां जन्म उत्पत्तिं श्रुत्वा ब्राह्मणाननुमन्त्र्यानुज्ञाप्य तैरनुज्ञातेत्यर्थः । स्नात्वा शुक्लाः धौताः दन्ताः यस्याः सा धौतदन्तेत्यर्थः अहते नूतने शुक्ले च अंबरे वसित्वा प्रातराशात्प्रागेव भगवन्तं श्रिया लक्ष्म्या सह सलक्ष्मीं पूजयेत् ॥ ३ ॥

तावन्नमस्कारमन्त्रानाह त्रिभिः—ते तुभ्यं अलं पर्याप्तमेव न किञ्चिदन्यैः कृत्यमस्ति. तत्र हेतुः, हे पूर्णकाम अवाप्तसमस्तकाम ! अत एव निरपेक्षाय ते तुभ्यं नमः। पूर्णकामत्वमेव विशदयंस्तं विशिनष्टि—महाविभूत्योर्नित्यलीलाविभूत्योरधिपतये अत एव सकलासिद्धयः अभिलषितानि यस्मात्तस्मै ॥ ४ ॥

हे ईश ! यथा यतः त्वं कृपादिभिः सर्वैर्गुणगणैर्जुष्टः युक्तः ततस्त्वं भगवान् प्रभुरसि तत्र कृपा स्वार्थानपेक्षपरदुःखनिराचिकीर्षा भूतिरैश्वर्यं तेजः पराभिभवनसामर्थ्यं महिमा लोकोत्तरप्रभावः ओजो बलं सर्वैरित्यनेनान्ये सर्वज्ञत्वसर्वशक्तित्वादयो गुणाः अभिप्रेताः ॥ ५ ॥

हे विष्णुपत्नि ! हे महामाये महाश्चर्यशक्तियुक्ते ! लक्ष्यतेऽनयेति लक्षणा महापुरुषचिन्हभूतेत्यर्थः तथा महापुरुषस्य प्रिये,हे धामे, सर्वलोकसम्पदाश्रयभूते, हे लोकानां मातः, ते तुभ्यं नमः ॥ ६ ॥

पूजामन्त्रमाह—ओं नम इति । भगवते पूर्णषाड्गुण्याय निरस्तनिखिलदोषाय महापुरुषाय पुरुषसूक्तप्रतिपाद्यमाहात्म्ययुक्ताय महानुभावाय लोकविलक्षणप्रभावाय महाविभूतेः महालक्ष्म्याःपतये विभूतिभिःसह सपार्षदायेत्यर्थः, तुभ्यं बलिमहं आविकम् उपहरामि समर्पयामीत्यनेन मन्त्रेण अहरहः विष्णोरावाहनाद्युपचारानुपाहरेत्. तत्रोपस्पर्शनमाचमनं उपहारो नैवेद्यं हविः आदिशब्देन तांबूलनीराजनादिकं विवक्षितं शेषं भगवते निवेदितं हविरनले द्वादशाहुतीः जुहुयात् ॥ ७ ॥

तत्र मन्त्रमाह— ओंनम इति ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्र निष्कामत्वेन क्रियमाणं पुंसवनं नाम व्रतं श्रीनारायणानुग्रहजनकं ज्ञानजनकत्वेन पुरुषार्थसाधनं भवतीत्यभिप्रायेण प्रश्नोत्तरपूर्वकमेतद्व्रतं निरूप्यते पुंसवनस्य विधानम् ॥ १ ॥

मार्गशिरे धनुर्मासि शुक्लपक्षे सार्वकामिकं मोक्षादिसर्वपुरुषार्थसाधनम् आदितः शुक्लपक्षमारभ्य आदितो मरुतां जन्मेति वा ॥ २ ॥

शुक्ले अम्बरे च ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ते तुभ्यमलं त्वदर्थं नान्येन प्रयोजनमस्तीत्यर्थः ॥ १ ॥ २ ॥ ॥ ३ ॥ ४ ॥ ५ ॥

विष्णुपत्नीति । महामाये पराख्यशक्तिरूपे ! अत एव महापुरुषलक्षणे तदेकस्वरूपे ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विष्णुप्रसादनं चेतः कौर्य्यविध्वंसनं व्रतम् ।

नृपेण पृष्टोऽवर्णयदूनविंशे मुनिः पुनः ॥ ० ॥

तस्य विधिमिति शेषः ॥ १ ॥

मार्गशिरे मार्गशीरे मासि आदितः प्रतिपदि ॥ २ ॥ ३ ॥

अलमतिशयेन तुभ्यं नम एवास्तु । देवान्तरो यथा निजैश्वर्यसिद्ध्यर्थं सेवकान् अपेक्षते तथा न त्वमित्याह-निरपेक्षाय स्वाभाविकमहदैश्वर्यवत्त्वादित्यर्थः । एवं पूर्णकामाय ते केन नैवेद्यादिना प्रीणयामि । महाविभूतिपतये तुभ्यं कैर्गृहोद्यानरथगजदासीभृत्यगीतदुन्दुभिघोषाद्यैः एवं सकलसिद्धये स्वर्गापवर्गप्रेमादिसिद्धिदात्रे तुभ्यं कर्मज्ञानयोगभक्त्यादिसाधनार्पणैः कथं प्रीणयामीति भावः ॥ ४ ॥

तदपि त्वत्कृपया सर्वं घटत इत्याह—यथा त्वं कृपया जुष्टस्तथैव भूत्यादिभिश्च ततो हेतोस्त्वमेव भगवानसीत्यन्वयः । अयमर्थः, कृपया शक्त्या जुष्टः सेवितस्सन् भक्तदत्ततुलसीपत्रमात्रमप्यपेक्षमाणः अहमद्य क्षुधार्त्तोस्मि किञ्चिद्देहीति भक्ताय याचमानोऽपूर्णकामोपि भवसि मम गृहोद्यानादिकं सम्प्रति जीर्णं क विलासमीस्यादि स्वप्नान्तरे ब्रुवन् विभूतिशून्योपि भवसि अणिमादिसिद्धियुक्तोपि भक्तप्रेमरशनया बद्धः क्वापि गन्तुमपि न शक्नोषि तथैव भूत्या महालक्ष्म्या शक्त्या तेजसा सर्वानधीनतया शक्त्या महिम्ना विभूत्या शक्त्या च ओजसा बलेन सर्वैरन्यैश्च सत्यसङ्कल्पत्वादिभिश्च सर्वत्र जगति निरपेक्षत्वपूर्णकामत्वादिमांश्च भवसीति त्वमेव भगवान् त्वमेव प्रभुर्भजनीय इति भावः ॥ ५ ॥

इत्थं भगवन्तं प्रणम्य लक्ष्मीं प्रणमेदित्याह-विष्णुपत्नीति । महामाये, मायाशब्दस्य शक्तिवाचित्वात् पराख्यशक्तिरूपे अत

श्रियं विष्णुं च वरदावाशिषां प्रभवावुभौ ।
भक्त्या सम्पूजयेन्नित्यं यदीच्छेत्सर्वसम्पदः ॥ ९ ॥
प्रणमेद्दण्डवद्भूमौ भक्तिप्रह्वेण चेतसा ।
दशवारं जपेन्मन्त्रं ततस्तोत्रमुदीरयेत् ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एव महापुरुषस्य विष्णोरिव लक्षणानि निरपेक्षत्वादीनि यस्याः ॥ ६ ॥

पूजामन्त्रमाह—ओं नम इति ॥ ७ ॥

हविः शेषमुपहारावशिष्टम् ॥ ८ ॥ ९ ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पुत्रदस्य व्रतस्य विष्णुप्रसादकरं विधिं पृच्छति—व्रतमित्येकोनविंशे । पुंसवनं पुत्रदं यद्व्रतं भवतोदीरितं तस्य येन विष्णुः प्रसीदति प्रसन्नो भवति तं विधिमिति शेषः वेदितुमिच्छामि ॥ १ ॥

मार्गशिरे तत्रापि शुक्ले पक्षे तत्रापि आदितः प्रतिपदि ॥२॥

ब्राह्मणान् अनुमन्त्र्य पृष्ट्वा मरुतां जन्म निशम्य एकः पुत्रः सङ्कल्पितः व्रतप्रभावादेकोनपञ्चाशत्पुत्रा जाता इति व्रतमहात्म्यसूचकं मरुतां जन्म ब्राह्मणेभ्यः श्रुत्वेत्यर्थः तदनन्तरं ब्राह्मणाननुमन्त्र्य इदं करिष्ये इति पृष्ट्वा च स्नात्वा शुक्ले अलङ्कृताम्बरे मङ्गलद्रव्यैः संस्कृते वस्त्रे वसीतेत्यन्वयः ॥ ३ ॥

प्रथमं नमस्कारमन्त्रानाह–अलमितित्रिभिः । ते तुभ्यमलं पर्याप्तमेव सर्वं न किञ्चिदन्यैः कृत्यमस्ति अतो निरपेक्षायापि केवलं ते तुभ्यं नमोऽस्तु पर्याप्तौ हेतुदर्शनार्थं सम्बोधनं हे पूर्णकाम ! स्वतःपूर्णकाम, सकामैरस्मदादिभिः सिद्धिकामैश्च सेव्योभिति विशेषणाभ्यां सूचयति महत्यो विभूतयो यस्याः सकाशादुपासकानां सा महाविभूतिः श्रीः तस्याः पतये सकलाः सिद्धयो यस्मात्तस्मै ॥ ४ ॥

हे ईश ! त्वं कृपादिभिः सर्वैर्गुणैरैश्वर्यादिभिश्च यथा यथावज्जुष्टोसि अतो भगवानसि ॥ ५ ॥

महती माया कृपा यस्याः सा महामाया महती चासौ मायाशक्तिर्महामायेति वा तस्याः सम्बोधनम् महापुरुषस्य विष्णोरिव लक्षणानि सौंदर्यादीनि यस्यास्तस्याः सम्बोधनम् हे लोकमातः ! ते तुभ्यं नमः प्रीयेथा प्रसन्ना भव ॥ ६ ॥

पूजामन्त्रमाह—ॐ नम इति ॥ ७ ॥

हविःशेषमुपहारावशिष्टं होममन्त्रमाह ॐ नम इति ॥ ८ ॥

भाषा टीका ।

राजो उवाच ।

हे ब्रह्मन् पुंसवन नामक व्रत आपने जो कथन किया है उसको मैं जानने की इच्छा करता हूं । जिस व्रत से विष्णु-भगवान् प्रसन्न होते हैं ॥ १ ॥

श्री शुक उवाच ।

मार्गशीर्ष मास के शुक्ल पक्ष में स्त्री अपने पति की आज्ञा लेकर आदि से इस सर्व काम देने वाले व्रत का आरम्भ करे ॥ २ ॥

मरुद्गणों का जन्म सुनकर ब्राह्मणों का निमन्त्रण कर । दांतोंको मञ्जन करके शुक्लदन्त वाली होकर स्नान कर अलंकृत शुक्लवस्त्रों को धारण करे प्रातःकाल भोजन के पहले लक्ष्मी सहित भगवान् का पूजन करे ॥ ३ ॥

हे पूर्णकाम निरपेक्ष आप को अन्य किसी से कोई कृत्य नहीं आप को नमस्कार हो । महाविभूति के पति आप को नमस्कार हो सकलसिद्धिप्रद आपको नमस्कार हो ॥ ४ ॥

जिस कारण आप कृपा भूति (संपद्) तेज महिमा पराक्रम इत्यादि संपूर्ण ईश गुणों से इसी से आप भगवान है ॥ ५ ॥

हे विष्णु पत्नि ! हे महामाये ! हे महापुरुष के लक्षण वाली हे महा भागे मेरे ऊपर प्रसन्न हूजिये हे लोक मात आपको नमस्कार हो ॥ ६ ॥

प्रणव रूप भगवान महापुरुष महानुभाव महाविभूति पति ऐसे आपको नमस्कार हो । महा विभूतियों सहित मैं बलि उपहार करता हूं इस मंत्र से श्री विष्णु भगवान को आवाहन अर्घ्य पाद्य आचमन स्नान वस्त्र यज्ञोपवीत भूषण चन्दन पुष्प धूप दीप उपहार (भेंट) आदिक उपचार सहित होकर समर्पण करे ॥ ७ ॥

उपहार से अवशिष्ट हवि को अग्नि में "ॐ नमो भगवते महापुरुषाय महाविभूतिपतये स्वाहा" इस मंत्र से द्वादश १२ आहुति हवन करे ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रकर्षेण भवन्त्याभ्यामिति प्रभवौ ॥ ९ ॥ १० ॥ ११ ॥

युवान्तु विश्वस्य विभू जगतःकारणं परम् ।
इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया ॥ ११ ॥
तस्या अधीश्वरः साक्षात्त्वमेव पुरुषः परः ।
त्वं सर्वयज्ञ इज्येयं क्रियेयं फलभुग्भवान् ॥ १२ ॥
गुणव्यक्तिरियं देवी व्यञ्जको गुणभुग्भवान् ।
त्वं हि सर्वशरीर्यात्मा श्रीःशरीरेन्द्रियाशया ।
नामरूपे भगवती प्रत्ययस्त्वमपाश्रयः ॥ १३ ॥
यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ ।
तथा म उत्तमश्लोक सन्तु सत्या महाशिषः ।
इत्यभिष्टूय वरदं श्रीनिवासं श्रिया सह ॥ १४ ॥
तन्निःसार्योपहरणं दत्वाऽऽचमनमर्चयेत् ॥ १५ ॥
ततः स्तुवीत स्तोत्रेण भक्तिप्रह्वेण चेतसा ।
यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्चयेद्धरिम् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इज्या यज्ञाभिनिवर्तकः पुरुषव्यापारो भावनाख्यः क्रिया लौकिकी ॥ १२ ॥

प्रत्ययो नामरूपयोः प्रकाशकः अपाश्रयस्तयोराधारः ॥१३-१६॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदि सर्वसम्पदः इच्छेत्कामयेचेदेवं श्रियं लक्ष्मीं विष्णुं च आशिषां प्रभवौ प्रभवन्त्यस्यामिति प्रभवौ उभौ भक्त्या सम्यक् पूजयेत् ॥ ९ ॥

भक्त्या प्रह्वेण नम्रेण शिरसेति शेषः चेतसा च दण्डवद्भूमौ प्रणमेत्. ततो मन्त्रम्. ओंनमो भगवते महानुभावाय महाविभूतिपतये इति मन्त्रं दशवारं जपेत् ततो वक्ष्यमाणं स्तोत्रमुदीरयेत् पठेत् ॥ १० ॥

तमेवाह--युवामिति । युवां विश्वस्य विभू विभुश्च विभ्वी चविभू पुमान् स्त्रियेत्येकशेषः जगतः परं कारणं स्वयं कारणान्तररहितकारणभूतौ इत्यर्थः इयं लक्ष्मीः प्रकृतिः "स्त्रीनाम्नी लक्ष्मीरेव" इत्युक्तप्रकारेण प्रकृत्यादिस्त्रीनामकपदार्थविभूतिमत्वात् प्रकृतिरित्युच्यते प्रकृतिपुरुषादिपदार्थानां स्त्रीपुंसात्मकानां तयोर्विभूतित्ववर्णनात्मकमिदं स्तोत्रं विभूतिभूतां प्रकृतिं विशिनष्टि, सूक्ष्मा कारणावस्थायां निरतिशयसूक्ष्मा दुरवबोधस्वरूपा वा माया आश्चर्यरूपा शक्तिः कार्योपयुक्ता भगवदपृथक्सिद्धविशेषणभूता दुरत्यया भगवत्प्रपन्नैरनतिलङ्घ्या, कथं भगवद्विभूतिभूतायाः प्रकृतेर्लक्ष्मीविभूतित्वमिति नशङ्कनीयं कृत्स्नस्य कार्यकारणात्मकस्य जगत उभयोरपि विशेषणत्वात् ॥ ११ ॥

तस्याः प्रकृतेरधीश्वरस्त्वमेव. हे पुरुषोत्तम । त्वमेव सर्वयज्ञः इज्यात्वियं लक्ष्मीः तत्र यज्ञः प्रधानयागः इज्यास्तदङ्गभूता दीक्षणीयेष्ट्यादिका तथा स्मार्तक्रिया च इयं लक्ष्मीरेव तादात्म्यमत्र तत्फलप्रदातृत्वेन तदाराध्यत्वेन च तद्विभूतित्वप्रयुक्तं. तदेवाह—फलभुगिति, त्वम् इयं लक्ष्मीश्च यज्ञियं यत्फलं चरुपुरोडाशादिकं तद्भुङ्क्ते इति तथा. यद्वा, क्रियेयं लक्ष्मीः फलभुक् क्रियाफलभोक्तातु त्वमितीयान्वयःक्रिया लक्ष्म्याः विभूतिः कर्ता तु त्वद्विभूतिरित्यर्थः ॥ १२ ॥

तथा गुणव्यक्तिरियं देवी लक्ष्मीः या सर्ववस्तुगता गुणाभिव्यक्तिः सा लक्ष्मीः तद्विभूतिरित्यर्थः भोग्यत्वभोगोपकरणत्वादिगुणानां सर्ववस्तुगतानामभिव्यञ्जकस्तु भवान् त्वद्विभूतिरित्यर्थः तथा गुणभुग्भावान् भुक्तिस्त्वियं देवीत्यपि बोध्यं त्वं सर्वशरीरिणाम् आत्मा शरीरं यस्य तादृशः सर्वशरीरिणो जीवास्त्वद्विभूतिभूताः श्रीलक्ष्मीः सर्वेन्द्रियबुद्धिरूपा तद्विभूतिमतीत्यर्थः तथा नामरूपे भगवती लक्ष्मीः प्रत्ययः नामरूपविषयकः प्रकाशः अपाश्रयः आधारः नामरूपयोर्निर्वोढा च त्वमित्यर्थः ॥१३ ॥

एवं तौ स्तुत्वा तयोरुक्तधर्मवैशिष्ट्यवत्प्रार्थनाया अपि सत्यत्वं प्रतिजानीते–यथेति । युवां यथात्रिलोकस्य वरदौ परमेष्ठिनौ च यथेदमसत्यं न भवतीतिभावः हे उत्तम श्लोक ! तथा ममाशिषः त्वद्विषयप्रार्थनाः सर्वाः सत्यास्सन्तु श्रिया लक्ष्म्या सह सहितं श्रीनिवासं वरप्रदं इत्थमभिष्टूय तत आवाहितभगवत्सकाशादुपहरणमविशिष्टं पूजाद्रव्यं निस्सार्य

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

अपनीय भगवते आचमनं समर्प्य सम्यक् पुनरर्चयेत्॥ १४ ॥१५॥

ततः पुनः स्तोत्रेण स्तुवानाः स्तोत्रं कुर्वाणाः भक्तिकृतप्रह्वीभावेन चेतसा यज्ञोच्छिष्टमाघ्राय पुनरपि हरिमर्चयेत् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

प्रभवौ जनकौ ॥ ९ ॥

दशवारं दशसङ्ख्या तदूर्ध्वं यथाशक्ति तावती सर्वथाऽपेक्षिता ॥ १० ॥

सर्वयज्ञः सर्वान्तर्यामी इयं लक्ष्मीः इज्यान्तर्यामिणी क्रियान्तर्यामिणी—"अन्तर्यामी तु यज्ञादेर्विष्णुरिज्यादिनां रमा।
तत्तच्छब्दैस्ततोवाच्यैर्न तु सर्वस्वरूपतः॥
अन्तर्यामी श्रियश्चापि विष्णुरेव न संशयः।
नान्तर्यामी कश्चिदस्ति विष्णोः क्वापि कुतश्चन"॥
इतिवचनात् फलभुक् यज्ञफलभोक्तरि यजमाने स्थित्वा तत्फलस्य भोजकः ॥ ११ ॥ १२ ॥

सत्त्वादिगुणानां व्यक्तेः कारणं फलव्यञ्जकः गुणभोक्तरि जीवे स्थित्वा तद्भोजकः शरीरेन्द्रियाणामभिमानिदेवता नामरूपयोर्गुणहेतुत्वात् श्रियश्च गुणाभिमानित्वान्नामरूपे श्रीरित्युच्यते प्रत्ययो निश्चयज्ञानं स्वत्प्रसादजनकत्वम् ॥ १३ ॥ १४ ॥

उपहरणं नैवेद्यं निःसार्य मोचयित्वा ॥ १५ ॥

स्तुवाना स्तुतिं कुर्वाणा यज्ञोच्छिष्टं पूजाशेषं महापुरुषो विष्णुरस्मिन्सन्निहित इति बुद्ध्वा ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

युवामिति सार्द्धकं परात्परयोरपि तयोर्जगत्कारणत्वे हेतुमाह---इयं हीति। प्रकृतिर्निजांशाभासेनेति भावः ॥ ११ ॥

तस्या इति। "विष्णोस्तु त्रीणि रूपाणि" इत्यादेः ॥ १२ ॥

तथैवाह---त्वमित्यादि ॥ १३—२३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

इज्या यज्ञाभिनिवर्तकः पुरुषव्यापारो भावनाख्यः। क्रिया लौकिकी ॥ १२ ॥

प्रत्ययो नामरूपयोः प्रकाशकः अपाश्रयस्तयोराधारः परमेष्ठिनौ परमेश्वरौ। तन्निस्सार्य निर्माल्यापसारणं कृत्वा ॥ १३--१७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

प्रकर्षेण भवस्त्वाभ्यामिति प्रभवौ ॥ ९ ॥

भक्तिप्रह्वेन भक्त्या नम्रेण ॥ १० ॥

युवां विश्वस्य परं कारणं ननु विश्वस्य परं कारणमेकमस्ति कथमावयोः परं कारणत्वमत्राह—इयं या सा आश्चर्यरूपा शक्तिः एषः प्रपन्नवरदो रमयात्मशक्त्येति तृतीयस्कन्धोक्तेः प्रकृतिरनादिसिद्धा सूक्ष्मा सर्वैः प्राकृतैर्दोषैरस्पृष्टा दुरत्यया प्रकृतिकालकर्मादिभिर्दुर्लङ्घ्या तस्यास्त्वमधीश्वरः स्वामी अतस्त्वच्छक्तितया त्वत्पत्नीत्वेन त्वदन्तर्गतत्वादियं सुतरां विश्वस्य कारणमित्यर्थः ॥ ११ ॥

श्रियः भगवदनपायनीत्वं प्रतिपादयति--त्वं सर्वयज्ञ इत्यादिना। इज्या व्यापाररूपा क्रिया फलभोगानुकूलो भोक्तृव्यापारः इयं गुणव्यक्तिः भवान् गुणव्यंजको गुणभुक् च प्रत्ययो नामरूपयोः प्रकाशकः अपाश्रयोऽन्यनिरपेक्ष आधारश्च त्वम् ॥ १२ ॥ १३ ॥

परमेष्ठिनौ परमस्थानवासिनौ ॥ १४ ॥

तदुपहरणं तन्नैवेद्यं निःसार्य आचमनं दत्वा ताम्बूलपुष्पाञ्जल्यादिनाऽर्चयेत् ॥ १५ ॥ १६ ॥

भाषाटीका।

कामनाओं को पूर्ण करने वाले श्री लक्ष्मी और विष्णु दोनों का भक्ति से नित्य पूजन करे। जो सर्व संपत्ति की इच्छा करे ॥ ९ ॥

भक्तिनम्र चित्त से भूमि में दंडवत् प्रणाम करे, दशवार मंत्र जपे पश्चात् इस प्रकार स्तुति करे ॥ १० ॥

आप दोनों समर्थ हो जगत् के परम कारण हो यह जो श्री हैं सोई सूक्ष्म प्रकृति है और आपकी दुरत्यय माया शक्ति हैं ॥ ११ ॥

जिस कारण आप इन [श्री लक्ष्मी] जी के अधीश्वर (पति) हैं इसी से आप साक्षात् परमपुरुष हैं आप सर्वयज्ञ स्वरूप हैं, ये इज्या हैं, ये क्रियारूप हैं, आप फल भोक्ता हो ॥ १२ ॥

गुणों की व्यक्ति ये श्रीदेवी हैं, व्यंजक गुणों के भोक्ता आप हो। आप सर्व जीवों के आत्मा हो, श्रीजी शरीर इन्द्रिय अन्तःकरण रूप हैं, नाम और रूप भगवती है, नाम रूप के प्रकाशक और आधार आप हैं ॥ १३ ॥

जैसे आप दोनों लोक के वर देने वाले परमेष्ठी (पति) हैं। हे उत्तमश्लोक! तैसे ही हमारी सर्व कामना सफल हो ॥ १४ ॥

इस प्रकार श्रीदेवी सहित श्रीनिवास भगवान की स्तुति करके जो उपहार समर्पण किया है उसको उतारकर आचमन देकर फिर पूजा करे ॥ १५ ॥

भक्ति नम्रचित्त से फिर स्तुति करे यज्ञके उच्छिष्ट का आघ्राण कर फिर हरिका अर्चन करे ॥ १६ ॥

पतिं च परया भक्त्या महापुरुषचेतसा ।
प्रियैस्तैस्तैरुपनमेत्प्रेमशीलः स्वयं पतिः ।
बिभृयात्सर्वकर्माणि पत्न्या उच्चावचानि च ॥ १७ ॥

कृतमेकतरेणापि दम्पत्योरुभयोरपि ।
विष्णोर्व्रतमिदं बिभ्रन्न विहन्यात्कथञ्चन ॥ १८ ॥

विप्रान्स्त्रियो वीरवतीः स्रग्गन्धबलिमण्डनैः ।
अर्चेदहरहर्भक्त्या देवं नियममास्थितः ॥ १९ ॥

उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः ।
अद्यादात्मविशुद्ध्यर्थं सर्वकामर्द्धये तथा ॥ २० ॥

एतेन पूजाविधिना मासान्द्वादश हायनम् ।
नीत्वाऽथोपरमेत्साध्वी कार्तिके चरमेऽहनि ॥ २१ ॥

श्वोभूतेऽप उपस्पृश्य कृष्णमभ्यर्च्य पूर्ववत् ।
पयःशृतेन जुहुयाच्चरुणा सह सर्पिषा ।
पाकयज्ञविधानेन द्वादशैवाहुतीः पतिः ॥ २२ ॥

([१] ब्राह्मणान् भोजयेद्भक्त्या साध्वन्नैर्द्वादशात्मवित् ।
तेभ्यो दद्यात्तिलान् राजन् सोदपात्रान् * गुडान्वितान् ॥ ० ॥)

आशिषः शिरसाऽऽदाय द्विजैः प्रीतैः समीरिताः ।
प्रणम्य शिरसा भक्त्या भुञ्जीत तदनुज्ञया ॥ २३ ॥

आचार्यमग्रतः कृत्वा वाग्यतः सह बन्धुभिः ।
दद्यात्पत्न्यै चरोः शेषं सुप्रजस्त्वं सुसौभगम् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

महापुरुषचेतसा ईश्वरबुद्ध्योपनमेद्भजेत् पतिश्च स्वयं प्रेमशीलः सन् पत्न्याः कर्माणि बिभृयात् तदनुकूलो भवेदित्यर्थः ॥१७॥

यतो दम्पत्योर्मध्ये एकतरेण कृतमुभयोरपि भवति ॥ १८ ॥

न विहन्यान्न विच्छिन्द्यात् ॥ १९ ॥ २० ॥

द्वादश मासानित्युक्ते कदाचित्तन्मध्ये मलमासे सति तेन सह द्वादशसंख्यायां सत्यां शुद्धस्यैकस्य त्यागः स्यात् हायनमित्युक्ते तन्मध्यपतितस्य तस्यापि प्रसङ्गः स्यात् तदुभयं वारयितुमुभयमुक्तम् उपचरेदुपरमेत् ॥ २१ ॥

श्वोभूते प्रभाते सति पयसि शृतेन पक्वेन पाकयज्ञविधानेन पार्वणस्थालीपाकविधानेन ॥ २२ ॥ २३ ॥

सुप्रजस्त्वं सत्पुत्रत्वमित्यर्थः वाग्यतस्सन् शेषम् ॥ २४ ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

महापुरुषचेतसा ईश्वरबुद्ध्या परया भक्त्या तैस्तैः प्रियैर्वस्तुभिश्च पतिमुपनमेत् भजेत् पतिरपि भार्यायां स्वयं प्रेमशीलस्सन्

(१) श्लोकोऽयमधिकः पठ्यते ॥ वीर०

* इडान्वितान् इति पाठान्तरम्. विजय०

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पत्न्याः कर्माणि सर्वाणि विभृयात् पोषयेत् उक्तधर्मानुकूलो भवेदित्यर्थः ॥ १७ ॥

एवमन्योन्यानुकूल्ये कारणमाह—कृतमिति । दम्पत्योरन्यतरेणापि कृतं कर्म उभयोरपि फलदं भवति यतस्ततोऽन्योन्यानुकूल्येन भाव्यमिति भावः ॥ १८ ॥

अत एव पत्न्यामनर्हायाम् अशक्तायां सत्यां पतिरेव एतद्व्रतं समाहितः समाहितचित्तस्सन् कुर्यात् पत्न्यशक्ता चेत् कर्तुं भर्ता कुर्यादित्यर्थः । विष्णोरिदं व्रतं बिभ्रत् केनापि हेतुना न विहन्यात् अन्तरितं न कुर्यात् विप्रान् वीरवतीः पुत्रवतीः जीवद्भर्तृकाश्च स्त्रियः स्रगादिभिः अहरहः एवं व्रतमास्थितः पुमानभ्यर्चयेत् ॥ १९ ॥

ततो देवं भगवन्तं स्वे धाम्नि स्वस्थाने हृदयादावित्यर्थः । उद्वास्य अग्रतः तस्मै भगवते निवेदितं हविः आत्मनो विशुद्ध्यर्थं सर्वकामप्राप्त्यर्थं च अद्यात् अश्नीयात् ॥ २० ॥

अनेन उक्तेन पूजाविधानेन द्वादशमासान् हायनं वत्सरं नीत्वा कार्तिके मासि चरमे अहनि उपचरेत् व्रतोद्यापनाङ्गमुपचारं कुर्वीत द्वादशमासानित्युक्ते कदाचित्तन्मध्ये मलमासे सति तेन सह द्वादशसङ्ख्यायां सत्यां शुद्धस्यैकस्य त्यागस्स्यात् हायनमित्युक्ते तन्मध्यपातिनस्तस्यापि प्रसङ्गः स्यात् तदुभयं वारयितुं द्वादशमासान् सम्वत्सरमित्युभयोर्ग्रहणम् ॥ २१ ॥

उपचारमेवाह—श्वोभूत इति । श्वोभूते प्रातः अप उपस्पृश्य स्नात्वा पूर्ववद्भगवन्तमभ्यर्च्य पयःशृतेन पयसि क्षीरे पक्वेन चरुणा "शृतं पाकः" इतिनिपातितः शृतशब्दः सहसर्पिषा सर्पिस्सहितेन पाकयज्ञविधिना द्वादशैवाहुतीः पतिर्जुहुयात् ॥ २२ ॥

ततो द्वादश ब्राह्मणान् साध्वन्नैः समीचीनान्नैः भक्त्या भोजयेत् आत्मवित् ब्राह्मणान् परमात्मरूपत्वेन पश्यन्नित्यर्थः तेभ्यो ब्राह्मणेभ्यः पूर्णोदकपात्रैस्सहितान् गुडान्वितान् तिलान् लाजांश्च दद्यात् ॥ ० ॥

द्विजैस्समीरिताः प्रयुक्ताः आशिषः शिरसा धारयन् तेभ्यः प्रणम्य ततस्तदनुज्ञया स्वयं भुञ्जीत ॥ २३ ॥

ततो बन्धुभिस्सह आचार्यमग्रतः पुरः कृत्वा उपवेश्य सुप्रजस्त्वसौभगत्वफलकं चरोर्हविःशेषं पत्न्यै दद्यात् ॥ २४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पतिः स्वयं यदि पत्न्यां प्रेमशीलस्तर्हि पत्न्यै पत्न्यर्थं, उच्चावचानि सर्वकर्माणि पतिर्बिभृयात् तर्हि तत्पत्नीकृतं न स्यादिति शङ्का माभूत् उभयोर्दम्पत्योरेकतरेण कृतमिदं पत्न्या कृतं भवति ॥ १७ ॥

रजोदर्शनादिनाऽनर्हायां पत्न्यां कथमेतदनुष्ठानमन्तरितं घटत इति तत्राह—पत्न्यामिति ॥ १८ ॥ १९ ॥ २० ॥

द्वादश मासान् तदात्मकं हायनं "सम्वत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः" इत्यभिधानात्. वर्षं नीत्वा कार्तिके मासि चरमेऽहनि अवसानदिवसे पूर्ववत् पूर्वोक्तार्चनविधिना ॥ २१ ॥

पयःशृतेन क्षीरपक्वेन पाकयज्ञविधानेन स्मार्तसूत्रोक्तविधिना होममन्त्रस्तूक्त एव ॥ २२ ॥ २३ ॥

द्वादशात्मवित्केशवादिद्वादशमूर्तिलक्षणवेत्ता, ब्राह्मणान् द्वादश तत्प्रीतये भोजयेदित्यर्थः । सोदपात्रानुदपात्रसहितान् इलान्वितान् भूमिसहितान् तिलान् भूमितिलसहितगुडशब्दवाच्यैः पायसाद्यधिकान्नयुक्तानिति वा शोभनं प्रजास्त्वं येन स तथा ॥ ० ॥ २४ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अग्रत इति तदग्रिमदेशं त्यक्त्वा तदग्रे भोजननिषेधात् ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दम्पत्योर्मध्ये एकतरेण कृतमुभयोरपि भवति ॥ १८ ॥

न विहन्यात् न विच्छिन्द्यात् ॥ १९ ॥

अग्रत इति ल्यब्लोपे पञ्चमी अग्रभागं यथोचितं विभज्येत्यर्थः ॥ २० ॥

चरमेऽहनि पौर्णमास्याम् ॥ २१ ॥

श्वोभूते प्रभाते सति पयसि शृतेन पक्वेन पाकयज्ञविधानेन पार्वणस्थालीपाकविधानेन ॥ २२ ॥ २३ ॥

शेषं सुप्रजास्त्वं सुप्रजस्त्वकरं सुसौभगं सुसौभगकरञ्च । यद्वा, ततस्तस्य सुप्रजास्त्वं स्यादिति वाक्यान्तरम् ॥ २४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

महापुरुषचेतसा विष्णुबुध्या पतिश्चोपनमेद्भजेत् पतिश्च पत्न्याः सर्वकर्माणि विभृयादित्युत्तरेणान्वयः ॥ १७ ॥

यत एकतरेण कृतमुभयोर्दम्पत्योर्भवति अनर्हायां सत्यां पतिरेव कुर्यात् न विहन्यात् न छिद्यात् अग्रतः इत्यत्र सार्वविभक्तिकस्तसिः श्रेष्ठैर्गुर्वतिथ्यादिभिः सह अद्यात् ॥ १८—२० ॥

श्रीनिम्बार्काय नमः । एतेन पूजाविधिना द्वादशमासान् हायनं द्वादशमासयुक्तं हायनं मलमासयुक्तहायनव्यतिरिक्तमित्यर्थः नीत्वा उपचरेदेवं पूजयेत् कार्तिके चरमेऽहनि अमावास्यायामित्यर्थः अमावास्यतः कार्तिकोऽत्र ज्ञेयः "शुक्ले मार्गशिरे पक्षे योषिद्भर्तुरनुज्ञया आरभेत व्रतमिदं सार्वकामिकमादितः" इत्युपक्रमानुसारात् ॥ २१ ॥

तत्र विधिमाह—श्वोभूतेइत्यादिना । श्वोभूते प्रभाते सति अप उपस्पृश्य स्नानादिकं विधाय पूर्ववत् कृष्णमभ्यर्च्य पयःशृतेन पयसि पक्वेन पाकयज्ञविधानेन पार्वणस्थालीपाकविधानेन ॥ २२ ॥

तदनुज्ञया ब्राह्मणानुज्ञया ॥ २३ ॥

सुप्रजस्त्वं सुप्रजस्त्वकरं सुसौभगं सुसौभगकरम् ॥ २४ ॥ २५ ॥

एतच्चरित्वा विधिवद्व्रतं विभोरभीप्सितार्थं लभते पुमानिह ।
स्त्रीत्वे तदास्थाय लभेत सौभगं श्रियं प्रजां जीवपतिं यशो गृहम् ॥ २५ ॥
कन्या च विन्देत समग्रलक्षणं वरं त्ववीरा हतकिल्बिषा गतिम् ।
मृतप्रजा जीवसुता धनेश्वरी सुदुर्भगा सुभगा रूपमग्र्यम् ॥ २६ ॥
विन्देद्विरूपा विरुजा विमुच्यते य आमयावीन्द्रियकल्पदेहम् ।
एतत्पठन्नभ्युदये च कर्मण्यनन्ततृप्तिः पितृदेवतानाम् ॥ २७ ॥
तुष्टाः प्रयच्छन्ति समस्तकामान्होमावसाने हुतभुक् श्रीहरिश्च ।
राजन्महन्मरुतां जन्म पुण्यं दितेर्व्रतं चाभिहितं महत्ते ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे अष्टादशसाहस्रिकायां पारमहंस्यां संहितायां
वैयासिक्यां षष्ठस्कन्धे पुंसवनव्रतकथनं नाम
एकोनविंशोऽध्यायः ॥ १९ ॥

समाप्तश्चायं षष्ठस्कन्धः ॥ ६ ॥

हरिः ॐ तत्सत्

भाषाटीका ।

पति को परम भक्ति से और परमात्मा की बुद्धि से तिन २ प्रिय पदार्थों को समर्पण करे और पति भी स्वयं प्रेम शील होकर पत्नी के ऊंचे नीचे सब कामों का भार आप लेवे॥१७॥

स्त्री पुरुष दोनों में एक कोई करे तो फल दोनों को होगा यदि किसी कारण पत्नी व्रत के अयोग्य होजाय तो समाहित होकर पति ही व्रत करे ॥ १८ ॥

इस विष्णु के व्रतको धारण कर किसी प्रकार व्रत भंग न करे । नियम में स्थित होकर भक्ति से प्रति दिन परमात्मा की पूजा करे, तथा ब्राह्मण और पतिव्रती स्त्रियों का माला चंदन बलि अलंकार से पूजन करे ॥ १९ ॥

पश्चात् परमात्मा को वैकुंठ धाम में उद्वासन (विसर्जन) करके उनके आगे जो समर्पण किया है उसको आत्मा की शुद्धि के लिये तथा सर्व समृद्धि के लिये भक्षण करे ॥ २० ॥

ऐसे पूजा विधि से द्वादश मास अर्थात् एक वर्ष व्यतीत कर कार्तिक मास के अंतिम दिवस में सम्यक् उपचार करे ॥ २१ ॥

बडे प्रातःकाल स्नान करके पूर्ववत् श्रीकृष्ण की पूजा करके घृत सहित, पाक यज्ञ विधान से दुग्ध पक्व चरु सिद्ध कर उस चरु से पति द्वादश १२ आहुती हवन करे ॥ २२ ॥

प्रसन्न हुए ब्राह्मणों से कथित आशीर्वाद को शिरसे ग्रहण कर, शिर से भक्ति पूर्वक उनको प्रणाम कर, उनकी आज्ञा से भोजन करे ॥ २३ ॥

आचार्य को आगे करके, वाग्यत होकर, सुन्दर प्रजा, ऐश्वर्य, देनेवाले, उस चरुशेष को पत्नी को देवे ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अवीरा विधवा धनेश्वरी सत्यपि या सुदुर्भगा सा सुभगा भवति ॥ २६ ॥

य आमयावी रोगी स विरुजा विशिष्टया रुजा विमुच्यते इन्द्रियैः सहितं कल्पं देहं च विन्देदिति शेषः पठन्यो वर्तेत तस्य पितृणां देवतानां चानन्ता तृप्तिर्भवतीत्यर्थः ॥ २७ ॥

उपसंहरति-राजन्निति । महत्पुण्यं जन्म महद् व्रतञ्च ॥ २८ ॥

षष्ठस्कन्धनिगूढार्थपदभावार्थदीपिका ।
सद्भिरासेव्यतामेषा यतिश्रीधरनिर्मिता ॥ १ ॥

इतिश्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीधरस्वामि-
विरचितायांभावार्थदीपिकायामेकोनविंशोऽध्यायः ॥ १९ ॥
समाप्तोऽयं षष्ठस्कन्धः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं सविस्तरं व्रतमुपवर्ण्य तदनुष्ठानफलमाह--एतदिति । एतद्विभोः परमात्मनः व्रतं यथाविधि कृत्वा पुमानिह लोके अभीप्सितार्थं लभते स्त्री तु तद्व्रतमनुष्ठाय सौभाग्यसम्पत्पुत्रपतिदीर्घजीवनकीर्तिगृहान् लभते ॥ २५ ॥

अवीरा अलब्धभर्तृका कन्या तु एतद्व्रतमास्थाय समग्राणि लक्षणानि यस्य तं पतिं विंदेत लभेत यद्वा अवीरा विधवा तु हतं किल्बिषं यस्याः तां गतिं सद्गतिं लभते मृता प्रजा पुत्रो यस्यास्सा जीवः सुतो यस्याः सा भवेत्तथा दुर्भगा सौभाग्यरहिता सुभगा भवेत् ॥ २६ ॥

विरूपाऽन्यं श्रेष्ठं रूपं विन्देत यः पुमानामयावी रोगी स एतद्व्रतं कृत्वा विरुजः नानाविधरोगाद्विमुच्यते इन्द्रियकल्यदेहं पटुतरेन्द्रियदेहं विन्देत एवमेतद्व्रतकल्पमभ्युदये कर्मणि पठन्यो वर्तते तस्य पितॄणां देवानाञ्चानन्ततृप्तिर्भवति ॥ २७ ॥

ते च पितरो देवाश्च तस्मै पठते सर्वान्कामान्प्रयच्छन्ति पितृदैवतयोर्होमयोरवसाने साक्षाद्धरिः श्रीश्च हुतभुग्भवेत् तावपि प्रसन्नौ भवेतामित्यर्थः उक्तमुपसंहरति--राजन्निति. हे राजन्, मरुतां महत्पुण्यं जन्म तथा महत्पुण्यं दितेर्व्रतं पुंसवनं च ते तुभ्यं मया अभिहितम् ॥ २८ ॥

इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः
श्रीशैलगुरोः सुतेन तच्चरणकमलपरिचर्याप्रसन्नतत्सूक्तिसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवैष्णवदासेन श्रीवात्स्य
श्रीवीरराघवविदुषा विरचितायां श्रीमद्भागवतचन्द्र
चन्द्रिकायां श्रीमद्भागवतव्याख्यायां षष्ठेस्कन्धे
एकोनविंशोऽध्यायः ॥ १९ ॥

समाप्तोऽयं षष्ठस्कन्धः ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

जीवपतिमायुष्मन्तं पतिं गृहान् गृहाणि शोभनं सौभाग्यं येन स तथा तम् एतच्चरुशेषविशेषणाम् ॥ २५ ॥

कन्या समग्रलक्षणं पतिं विन्देत अवीरा पतिरहिता मृतप्रजा तु जीवत्सुतान्विन्देत ॥ २६ ॥

विरूपा दृष्टिविरुद्धस्वरूपा अग्र्यं रूपं विन्देत इन्द्रियदेहशक्तिरहिता या सा विरुजो विविधरोगान्मुच्यते अभ्युदये कर्मणि मङ्गलकर्मणि पितृदेवतानां अनन्ततृप्तिमुपैतीति शेषः ॥२७॥२८॥

भक्तिप्रह्वश्रीवासकगातिसमुक्षितः सुरराशिमिमं स्वितश्रीब्रह्मप्रागोग्रमुखविबुधमुकुटतटीघट्टितपदपीठकं वन्दे ॥ लक्ष्मीकान्तं घनरससंविरसारदघसरोरुहलोचनं सत्यज्ञानानन्दाकारं मुदितसुजन समुदायं मर्दितासुरसम्पदम् ॥ १ ॥

शब्दशक्त्यनुसारेण विजयध्वजभिक्षुणा ।
पदरत्नवली भाति षष्ठस्कन्धगता कृता ॥ २ ॥

इतिश्रीमन्महेन्द्रपूज्यस्य पादशिष्यस्य विजयध्वजतीर्थस्य कृतौ
पदरत्नावल्याम् श्रीभागवतेविजयध्वजटीकायांषष्ठस्कन्धे
एकोनविंशोऽध्यायः ॥ १९ ॥

अनुकूलं यदादिष्टमभून्नारायणस्य ह ।
प्रसादतो लब्धमिदं तदा पुण्यदमस्तु मे ॥ १ ॥

समाप्तोऽयं षष्ठस्कन्धः ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इतिश्रीमद्भागवते महापुराणे षष्ठस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकोनविंशोऽध्यायः ॥ १९ ॥

समाप्तोऽयं षष्ठस्कन्धः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

जीवतीतिजीवः सचासौपतिश्च तम् ॥ २५ ॥

अवीरा पतिपुत्रशून्या या मृतप्रजा सा जीवसुता धनेश्वरी च भवति । य आमयावी स विशिष्टया रुजा विमुच्यते । इन्द्रियैः सह कल्यं समर्थं देहञ्च विन्देत ॥ २६ ॥

अभ्युदये अभ्युदयिकश्राद्धादौ तुष्टा हुतभुक् श्रीहरिश्च ॥ २७ ॥ २८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठ एकोनविंशोऽयं सङ्गतः सङ्गतः सताम् ॥ १९ ॥

समाप्तोऽयंषष्ठस्कन्धः ॥ ६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

फलमाह—एतदित्यादिना अवीरा पतिपुत्रहीना गतिं हरिपदरूपाम् ॥ २६ ॥

विरूपा विन्देत आमयावी विरुजा विविधया रुजा विमुच्यते इन्द्रियैः कल्यं देहं च विन्देत अभ्युदये कर्मणि य एतत्पठन् वर्तेत तस्य पितॄणां देवतानां च अनन्ततृप्तिर्भवति उपसंहरति—राजन्निति, हे राजन् मरुतां महत्पुण्यं जन्म दितेर्महत्पुण्यं व्रतं च मया तेऽभिहितम् ॥ २७ ॥ २८ ॥

इतिश्रीमद्भगवन्निम्बार्कचरणचिन्तकश्रीशुक-
सुधीप्रणीते श्रीमद्भागवतसिद्धान्तप्रदीपे
एकोनविंशाध्यायार्थप्रकाशः ॥ १९ ॥

संख्या ॥ २६७५ ॥

समाप्तोऽयं षष्ठस्कन्धः ॥ ६ ॥

भाषा टीका ।

समर्थ हरि के इस व्रत को करके पुरुष इस संसार में इच्छित अर्थ को प्राप्त होता है। स्त्री होकर इस व्रत को करैतो सुभगतो श्री सन्तान पति यश और गृह को प्राप्त हो ॥ २५ ॥

कन्या समग्र लक्षण वाले वर को प्राप्त हो विधवा निष्पाप होकर गति को प्राप्त हो। मृत पुत्रवाली पुत्रको और धनी होकर जो दुर्भागिनी है वह सुभागिनी हो। कुरूपा सुन्दररूप को प्राप्त हो और जोरोगी है वह विशेष रोग से छूटे और इन्द्रियों सहित समर्थ देह को भी प्राप्त होय॥ और अभ्युदय वाले कर्म में इसे पढे, तौ पितृदेवताओं को अनन्त तृप्ति हो ॥ २६ ॥ २७ ॥

हवन किये हुये के भोक्ता लक्ष्मीनारायण सन्तुष्ट हो कर समग्र कामनाओं को देते हैं। हे राजन् ! मरुत देवोंका जन्म और बड़ा पुण्य दिति का व्रत मैंने तुम्हारे आगे वर्णन किया ॥ २८ ॥

श्रीमद्भागवते षष्ठस्कन्धभावार्थबोधिनी ।
भाषा भागवताचार्यकृता पूर्त्ति समन्वगात् ॥

इतिश्रीमद्भागवत महापुराण षष्ठस्कन्ध एकोनविंश
अध्यायकी भाषाटीका समाप्त ॥ १९ ॥

श्रीरुक्मिणीरमणायनमः ॥

षष्ठस्कन्धकी भाषाटीका समाप्त हुई ॥ ६ ॥

हरि ओम् तत्सत् ॥

इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे एकोनविंशोऽध्यायः समाप्तः ॥ १९ ॥

समाप्तश्चायं षष्ठस्कन्धः ॥ ६ ॥

॥ हरिः ओम् तत्सत् ॥

श्रीकृष्णार्पणमस्तु ।